BIBLIOTHECA INDICA
A COLLECTION OF ORIENTAL WORKS

AVADĀNA KALPALATĀ

WITH ITS TIBETAN VERSION

EDITED BY

SARAT CHANDRA DAS, C.I.E.

AND

PAṆḌIT HARI MOHAN VIDYĀBHŪSHAṆA

(REPRINT EDITION)

PARTLY REVISED AND SEEN THROUGH THE PRESS BY

DURGACHARAN CHATTERJI, M.A.

CENTRAL ARCHAEOLOGICAL LIBRARY
New Delhi

Work Number
124
Vol. I, Fasc. 2

Issue Number
1542
New Series

BSa5
Kse/D.V.

CALCUTTA:
Printed at the Baptist Mission Press
Published by the Royal Asiatic Society of Bengal, 1, Park Street
1940

NOTICE

BIBLIOTHECA INDICA

PUBLISHED BY

THE ROYAL ASIATIC SOCIETY OF BENGAL

THE Bibliotheca Indica is a collection of works belonging to or treating of Oriental literatures and contains original text editions as well as translations into English, and also bibliographies, dictionaries, grammars, and studies.

The publication was started in 1849, and consists of an Old and a New Series. The New Series was begun in 1860, and is still running.

The issues in the series consisted originally of fascicles of 96 or 100 pages print, though occasionally numbers were issued of double, triple or larger bulk, and in a few cases even entire works were published under a single issue number. Of late years the single issues are made as much as possible to constitute complete volumes. Several different works are always simultaneously in progress. Each issue bears a consecutive issue number. The Old Series consists of 265 issues; in the New Series, till January 1st, 1940, inclusive, 1,534 issues have been published. These 1,799 issues represent 258 different works; these works again represent the following literatures:—

Sanskrit, Prakrit.
Rājasthānī, Kāshmīrī, Hindī.
Tibetan.
Arabic, Persian.

Several works published are partly or wholly sold out, others are still incomplete and in progress. A few works, though incomplete have been discontinued.

Two price-lists concerning the Bibliotheca Indica are available and may be had on application. One describes the Indian and the other the Islamic works published in the series. These lists are periodically revised.

The standard sizes of the Bibliotheca Indica are:—

Demy (or small) octavo.
Royal (or large) octavo.
Quarto.

PREFATORY NOTE TO THE REPRINT EDITION

Avadāna Kalpalatā was originally published under the Joint Editorship of Sarat Chandra Das, C.I.E., and Paṇḍit Hari Mohan Vidyābhūṣaṇa in 24 fascicles (2 vols.) between 1889–1917. Fascicle 2 of Volume I was, however, sold out and it was decided in 1924 to reprint this portion. Mr. Johan van Manen undertook to see it through the Press and pages 59–114 were printed and proofs of pages 115–154 were set up by the Press during that year. No further progress was made to complete the work until 1939, when the overhauling and re-organization of the Society's activities was taken in hand. As the work required a knowledge of both Sanskrit and Tibetan Prof. Durga Charan Chatterjee of the Bethune College, Calcutta, was engaged by the Council on the recommendation of Prof. S. K. Chatterji, the Philological Secretary.

Prof. D. C. Chatterjee has revised pages 115–154 which were in proof and made some improvements in the texts, both Sanskrit and Tibetan (noted in Appendix II), besides carefully going through the fifty-six pages (59–114) already printed—his emendations on these being given in Appendix I. For the Tibetan text the Narthang edition of the Tanjur, Mdo., Vol. Ge, in the possession of the Society, was consulted. The original block-print of both the Sanskrit and Tibetan texts discovered by the late Sarat Chandra Das in Tibet and from which he prepared the *Bibliotheca Indica* edition of the Avadāna Kalpalatā could not, however, be consulted as no copies of it were available in India.

In the completion of this work, Mr. Trin Chen, Sino-Tibetan clerk, of the Society helped Prof. D. C. Chatterjee in elucidating the meaning of difficult Tibetan expressions and in comparing portions of the text with the original Tibetan.

Prof. D. C. Chatterjee also received the kind advice and assistance of Prof. S. K. Chatterji, the Philological Secretary and Prof. Vidhusekhar Sastri, Ashutosh Professor of Sanskrit in the University of Calcutta, to both of whom the Society's thanks are due.

B. S. Guha,
General Secretary,
Royal Asiatic Society of Bengal.

1, Park Street,
December, 20, 1940.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 27.48
Date 24-2-59
Call No. BSa 5 | Kse | D.V. 1

A list of those cases, in which, apart from evident clerical errors and slips, some changes might have been made either in spelling or in grammar to conform to the rules of ordinary Sanskrit, is subjoined.

Third Pallava.

WORDS AS THEY OCCUR IN THE XYLOGRAPH.			SUGGESTED ALTERATIONS.
Śloka	16	गोविन्दो नाभिगर्भेण	गोविन्दनाभिगर्भेण
,,	21	पाथेयमन्ये	पाथेयमन्थे
,,	22	नृपो वधूवधः	नृपवधूवधः
,,	,,	जनै	जनः
,,	26	तुरितं	दुरितं
,,	28	पुष्परत्नध्वजं छत्रं पताका०	पुष्परत्नध्वजच्छत्रपताका०
,,	41	मोच्छासेनेव	सोच्छ्वासेनेव
,,	55	सर्व्वार्थसार्थं०	सर्व्वार्थिसार्थं०
,,	66	वैगसं	वैशसं
,,	77	यात्यनुकम्पताम्	यात्यनुकम्प्यताम्
,,	81	तूर्णँ	तूर्णं
,,	99	ग्रक्तानां	सक्तानां
,,	107	वनमवविगाह्यताम्	वनमेव विगाह्यताम्
,,	118	बभूव दृष्टि०	बभूवादृष्टि०
,,	122	संसारवैमुख्यः विवेक०	संसारवैमुख्यविवेक०
,,	123	न देयं	नादेयं
,,	124	तथेत्यवधार्य्य	तथेत्याधार्य्य
,,	138	मनोवृत्तेरिव न सुखतां	मनोवृत्तिरिव निःसुखतां
,,	146	भोगक्षयो नैव	भोगक्षयेनैव
,,	148	निलयं	निलये
,,	149	विस्मृताः	विस्पष्टाः
,,	150	विस्रस्त०	विश्रस्त०
,,	155	न	नु
,,	156	चय०	चयं०

WORDS AS THEY OCCUR IN THE XYLOGRAPH.		SUGGESTED ALTERATIONS.
Śloka 158	कृपाकोमलचित्तहर्षैः	कृपाकोमलचित्तहर्षः
,, 161	न्दग्रंसहर्षैः	न्दग्रंमहर्षः
,, 164	सहर्षैः	सहर्षं
,, ,,	०मनोरथेन	०मनोरथस्य

मणिचूडावदानम् ॥ ३ ॥

मान्धात्रवदानम् ॥ ४ ॥

ཡིད་བཞིན་ནོར་བུ་གཙུག་ནོར་གྱིས། ༣

ང་ལས་ནུ་ཡང་འཛིག་རྟེན་རྒྱལ།། ༤

BSa5
KSL / D.V.

CHAPTER III.

ཡལ་འདབ་གསུམ་པ།

གཙུག་ན་ནོར་བུའི་རྟོགས་པ་བརྗོད་པ་ནི།

འགྲོ་འདིར་སྨོན་པ་མེད་བྱུང་རིན་ཆེན་ཚོགས།
ཆུ་སྲིན་འབྱུང་གནས་དག་ལས་སྐྱེ་བར་ལྡན།
སུ་ཞིག་ཀྱང་ནི་རབ་ཏུ་གསལ་བ་རྟུ།
བདེ་བར་འགྲོ་བ་སྐྱེས་བུ་རིན་ཆེན་སྐྱེས། 1

*བ་གམ་འོད་ཚོགས་ག་བུར་གྱིས། ཡོངས་སུ་དཀར་པོའི་གྲོང་ཁྱེར་ནི།
སཱ་ཀི་ད་ཞེས་བྱ་བ་སྟེ། སྐལ་བཟང་ས་ཡི་ཐིག་ལེ་ཡོད། 2

འཇུག་ངོགས་བཞིན་དུ་བསྟེན་འོས་གང་། བསོད་ནམས་བྱེད་གཙང་གཟི་བྱིན་དང་།
སྙིང་སྟོབས་རང་བཞིན་གང་གཱ་ལྟར། དྲི་མེད་ཡིད་ལྡན་དག་ཏུ་གནས། 3

ནམ་ཞིག་གྲགས་པའི་མེ་ཏོག་ལྡན། བསོད་ནམས་དྲི་བཟང་རབ་ཏུ་རྒྱས།
ལེགས་བྱས་སྐྱེད་ཚལ་དགའ་སྟེར་དུ། གྲོང་ཁྱེར་པ་རྣམས་རབ་ཏུ་རྩེན†། 4

དེར་ནི་ས་བདག་རྒྱ་གཏེར་ཆེ། རབ་མང་ཡོན་ཏན་རིན་ཆེན་དང་།
གྲགས་པའི་རི་བོང་མཚན་མ་བསྐྱེད། གསེར་གྱི་གཙུག་ཕུད་ཅེས་གྲགས་བྱུང་། 5

---

* सौभि। † ई. रमन्ते।

तृतीयः पल्लवः ।

मणिचूडावदानम् ।

अस्मिन्नद्भुतसर्गे मकराकरजायमानमणिवर्गे ।
कोऽपि प्रकटितसुगतिः पुरुषमणिर्जायते ॥ १ ॥

अस्ति सौभि[1]प्रभापूरकर्पूरपरिपाण्डुरम् ।
साकेतनाम नगरं सौभाग्यतिलकं भुवः ॥ २ ॥

सेव्यैः[2] प्रभासत्त्वमयैर्गङ्गाविमलमानसैः ।
तीर्थैरिव स्थितं यत्र पवित्रैः पुण्यकर्तृभिः ॥ ३ ॥

यशःकुसुमिते यत्र पुण्यसौरभनिर्भरे ।
रमन्ते सुकृतोद्याने नन्दने पुरवासिनः ॥ ४ ॥

तत्राभूत् भूपतिर्भूरिगुणरत्नमहोदधिः ।
भूतिर्यशःशशाङ्कस्य हेमचूड इति श्रुतः ॥ ५ ॥

---

१ सौभि (dome). २ Orig. सैव्यैः ।

རྟག་ཏུ་དམ་པས་བསྟེན་འོས་ཤིང་། ཚོད་དུས་རབ་ཏུ་འགྲོག་བྱེད་པ།
རྫོགས་ལྡན་ལྟ་བུ་གང་གིས་ནི། སྐྱེ་བོ་ཆོས་རྣམས་འཛིན་པར་བྱས། 6

ས་བདག་བཟོད་ལ་ཀུན་ཆགས་ཤིང་། དཔལ་གྱིས་དཀྲིས་གྱུར་སྙིང་རྗེ་དཀའ།
རབ་གྲགས་ལ་ཡང་དབང་ཕྱུལ་གང་། སྐྱེ་རྒུ་རྣམས་ཀྱི་དགའ་བྱེད་གྱུར། 7

མི་གསོད་མཆོད་སྦྱིན་བསླབ་ལྡན་པ། གང་གི་བསོད་ནམས་མི་འཇིགས་ཡོན།
འཆི་མེད་སྒྲ་*དབྱངས་ཡོངས་རྫོགས་པ། འབྱུང་པོ་ཀུན་ལ་ཕྱིན་པར་གྱུར། 8

མཐུ་དང་ལྡན་ཡང་གང་མ་སྨྲོས། རྣམ་པར་འགྱུར་ཡང་སྐྱོན་པར་སྨྲ།
རྗེ་ཉིད་ཡིན་ཡང་བཟོད་ལྡན་ཚུལ། ལང་ཚོ་ལྡན་ཡང་དབང་པོ་ཐུལ། 9

མཐོན་པོར་གྱུར་པའི་ཟབ་མོ་དང་། ཟླ་བའི་འོད་ཟེར་དཔའ་བོ་དང་།
ས་གཞི་འཛིན་པ་དམ་པའི་ཕྱོགས། གང་གི་ཡ་མཚན་བྱས་པར་གྱུར། 10

རྒྱལ་པོ་དེ་ལ་ཟླ་མེད་པའི། རྒྱན་ནི་གཉིས་ཞིག་བྱུང་གྱུར་ཏེ།
གཏོང་བ་རྫོགས་པའི་སྙིང་རྗེ་དང་། ལེགས་བྱས་དཔལ་ནི་དར་བབ་པའོ། 11

པདྨའི་འབྱུང་གནས་དེ་ཡིས་ནི། ལྷ་མོ་མཛེས་ལྡན་དགའ་མར་གྱུར།
སྲ་དྲོ་འི་དཔལ་བཞིན་རྟག་ཏུ་ནི། སྐྱོན་མེད་དགའ་བ་མངོན་པར་འཆར། 12

ལུགས་ནི་རྗེ་ཡི་ཡོན་ཏན་དང་། དཔལ་ནི་འཕར་བ་གཏོང་བ་དང་།
མཛེས་པ་ཉིད་ནི་ཁྲིམས་ཀྱིས་བཞིན། དེ་ནི་རྒྱལ་པོས་ཟླ་བས་མཛེས། 13

* Sound and voice.

सदा सदाश्रयार्हेण कलिकालापहारिणा ।
कृतः कृतयुगेनेव येन धर्म्मधरो जनः ॥ ६ ॥

महीपतिः क्षमाशक्तः श्रीहृतः करुणारतः ।
वल्लभोऽभूत् प्रजानां यः प्रख्यातो विजितेन्द्रियः ॥ ७ ॥

अमरासवसम्पूर्णामहिंसासत्रदीक्षितः ।
ददौ यः सर्व्वभूतानां पुण्यामभयदक्षिणाम् ॥ ८ ॥

निर्मदो यः प्रभावेऽपि विभवेऽपि प्रियंवदः ।
क्षमाशीलः प्रभुत्वेऽपि यौवनेऽपि जितेन्द्रियः ॥ ९ ॥

गम्भीरेणोन्नतिमता शूरेण शशिकान्तिना ।
सत्पक्षेण क्षितिभृता येनातन्यत विस्मयः ॥ १० ॥

राज्ञस्तस्याद्वितीयस्य बभूवाभरणद्वयम् ।
त्यागपूर्णञ्च कारुण्यं तारुण्यं सुकृतश्रियः ॥ ११ ॥

पद्माकरस्य तस्याभूत् देवी कान्तिमती प्रिया ।
प्रभातश्रीरिव सदा निर्दोषाभ्युदयोत्सवा ॥ १२ ॥

नीतिः प्रभुगुणेनेव त्यागेन श्रीरिवोज्ज्वला ।
रराज राजचन्द्रेण सा शीलेनेव चारुता ॥ १३ ॥

རྟག་ཏུ་དགའ་བྱེད་སྐན་པ་དག། རབ་བཀྲམ་རྣམ་པར་གྲགས་པ་དེས།
ས་འཛིན་མཆོག་ཏུ་མཛེས་གྱུར་པ། མཐོ་རིས་དཔལ་གྱི་ལྷུན་པོ་བཞིན། 14

རྗེ་ལས་དུས་སུ་དགེ་བའི་གནས། མངལ་ནི་དེ་ཡི་བཟུང་གྱུར་ཏེ།
འཇིག་རྟེན་པདྨ་འགྱུར་བའི་སྐད། ཨ་དི་ཏི་ཡི་ཉིན་བྱེད་བཞིན། 15

བདུད་རྩིའི་ཟེར་གྱི་རྒྱ་གཏེར་རླབས། ཚངས་པའི་པདྨས་ཁྱབ་འཇུག་སྟེ།
དག་བྱེད་དག་གིས་སྤུབ་ཞིང་བཞིན། དེ་ནི་མངལ་གྱིས་རྫོས་པར་གྱུར། 16

དེ་ཡི་མངལ་གྱི་མཐུས་སྤྱོད་པའི། མངོན་པར་འདོད་བཞིན་མི་བདག་གིས།
མངོན་པར་འདོད་ལས་མངོན་ལྷག་ནོར། སྤྱོད་བའི་དོན་མཐུན་ཀུན་ལ་བྱིན། 17

སྤར་ཡང་ས་བདག་གིས་སྤྱོད་བྱིས། དགེ་བའི་མངལ་དང་ལྡན་པ་དེ།
དབྱངས་ཅན་མ་བཞིན་རང་ཉིད་ཀྱིས། དམ་ཆོས་རྣམ་པར་བཤད་པ་བྱས། 18

ཡོངས་རྫོགས་བསོད་ནམས་རིན་ཆེན་ནི། ཆོས་གཏེར་བསྒྲུབ་པ་རབ་འཛིན་པས།
ཕོངས་པའི་སྡུག་བསྔལ་རྒྱས་པ་ལས། རྟག་ཏུ་བསྐྱངས་ཤིང་རབ་ཏུ་བསྐྱང་། 19

འབྲོག་དགོན་བགྲོད་དཀར་ཡོངས་ལྷུང་འཇིག་རྟེན་ནི།
ཕ་རོལ་ལས་དུ་གདུང་བས་ཉེན་རྣམས་ལ།
ཡིད་འོང་རབ་རྒྱས་འབྲས་བུས་རྫོགས་པའི་ལྗོངས།
སྒྲིབ་ཞིང་ཆོས་དང་མཚུངས་པ་གཞན་ཡོད་མིན། 20

सदानन्दनविख्यातयशःप्रसरया तया ।
मेरुस्त्रिदिवलक्ष्म्येव बभौ भूमिभृतां वरः ॥ १४ ॥

काले कल्याणनिलयं भर्त्तुः सा गर्भमादधे ।
भूत्यै भुवनपद्मस्य दिवाकरमिवादितिः ॥ १५ ॥

अरणिः पावकेनेव वेलेवाब्धेः सुधांशुना ।
ब्रह्माब्जेनेव गोविन्दो नाभिगर्भेण सा बभौ ॥ १६ ॥

तस्या गर्भानुभावेन दोहदाभिमतं नृपः ।
ददौ सर्व्वार्थिसार्थेभ्यो वाञ्छिताभ्यधिकं वसु ॥ १७ ॥

पुनर्भूमिभुजा पृष्टा दोहदं शुभगर्भिणी ।
सरस्वतीव सा चक्रे स्वयं सद्धर्म्मदेशनाम् ॥ १८ ॥

पूर्णपुण्यमणिर्धर्म्मनिधिर्विधिसमुद्धृतः ।
विपद्विपुलदुःखेभ्यः सदा रक्षति रक्षितः ॥ १९ ॥

कान्तारदुर्गेषु परिच्युतानां
तापातुराणां परलोकमार्गे ।
स्निग्धः प्रवृद्धः फलपूरिताशः
छायातरुर्धर्म्मसमोऽस्ति नान्यः ॥ २० ॥

རབ་རིབ་ཅན་ལ་སྣང་བ་བོངས་པའི་དུག་ལ་ནོར་བུ་ལྟུང་
ལ་ཨག་པའི་མཆིལ་པ་སྟེ།
སྐྱོང་ལ་དཔག་བསམ་ལྗོན་པ་འགྲོ་ལ་རྒྱལ་བའི་ཞིང་ན་
ལམ་གཞན་དག་ལ་ལམ་གྱི་བརྒྱགས།
སྡུག་བསྔལ་ནད་ལ་སྨན་ཆེན་དང་ནི་སྲིད་པའི་འཇིགས་པ་
ཀུན་འཁྲུགས་བསམས་པ་དབུགས་འབྱིན་པ།
གདུང་བ་དག་ལ་ཙན་དན་ནགས་ཚལ་བརྟན་པའི་མཛོད་
ཞེས་ཆོས་ནི་དམ་པ་རྣམས་ཀྱི་གཉེན། 21

དེ་སོགས་མི་བདག་བཙུན་མོ་འི་ཚིག། དཀར་བའི་ཆོས་ནི་ཐོས་གྱུར་ནས།
དཔལ་ལྡན་འགྲོ་ལ་འཇིག་རྟེན་དུ། དམ་ཆོས་གཅིག་པུ་སྐྱབས་སུ་གྱུར། 22

དེ་ནས་དུས་ནི་ཡོངས་རྫོགས་ཏེ། མཁའ་ལ་བདུད་རྩིའི་འོད་ཟེར་བཞིན།
འགྲོ་བའི་རབ་རིབ་འཇོམས་པའི་བུ། ལྷ་མོ་ལ་ནི་བཙས་པར་གྱུར། 23

དེ་ཡི་གཙུག་རྒྱན་ནོར་བུ་ནི། ལྷན་སྐྱེས་དག་དུ་སྐྱེས་གྱུར་ཏེ།
སྐྱེ་བ་གཞན་སྤྱར་འགྲོགས་པ་ཡི། དཔེན་པ་བཞིན་དུ་དྲི་མ་མེད། 24

དེ་ཡི་གཙུག་ན་གང་འོད་མཐུས། མཚན་མོ་ཉིན་དུ་བགྱིད་པ་ཡིས།
ནོར་བུ་བསོད་ནམས་ལ་སྐྱེས་པ། *རབ་སྡུག་དེ་ཡིས་མཛེས་པར་གྱུར། 25

* सुभग ।

आलोकस्तिमिरे[1] विपद्विषमणिः पाते करालम्बनम्
यात्राकल्पतरुर्जगज्जयरथः पाथेयमन्ये पथि ।
दुःखव्याधिमहौषधं भवभयोद्भ्रान्ताश्रयाश्वासनम्
तापे चन्दनकाननं स्थिरसुहृद्धर्म्मः सतां बान्धवः ॥ २१ ॥

इत्यादिधर्म्मधवलं श्रुत्वा नृपो वधूवचः ।
धर्म्मैकशरणः श्रीमान् बभूव भुवने जने ॥ २२ ॥

ततः कालेन सम्पूर्णं द्यौरिवामृतदीधितिम् ।
असूत दारकं देवी[2] जगत्तिमिरदारकम् ॥ २३ ॥

अजायतास्य सहजश्चूडालङ्करणं मणिः ।
प्राग्जन्मान्तरसंसक्तो विवेक इव निर्म्मलः ॥ २४ ॥

स बभौ सुभगस्तस्य[3] मूर्द्ध्नि पुण्यमयो मणिः ।
यस्य प्रभाप्रभावेण यामिन्यो दिनतां ययुः ॥ २५ ॥

१ Orig. आलोके तिमिरे ।

२ Orig. has also another reading सा हि ।

३ Orig. स बभौ भगस्तस्य ।

10

གཙུག་ཏོར་དང་བཅས་ནོར་བུ་དེའི། པ་དྨ་རཱ་ཁུ་བའི་ཐིགས་པ་ཡིས།
ཀླུགས་རྣམས་སྐུར་དུ་ཞི་བ་དང་། གསེར་དུ་བསྒྱུར་བ་ཉིད་དུ་འདང་བགྱིད། 26

དེ་ནས་སྐྱེ་བྲན་ཉིས་པ་དེའི། ཚིག་གིས་ས་ཡི་བདག་པོ་ཡིས།
ནོར་བུའི་བཅུད་འཁྲུངས་གསེར་རྣམས་ཀུན། སློང་བ་རྣམས་ལ་རྟག་དུ་ཕྱིར། 27

དེ་སྐྱེས་ཚེ་ན་ལྷ་རྣམས་ཀྱིས། མཁའ་ལ་གྲོང་ཁྱེར་མེ་ཏོག་དང་།
རིན་ཅེན་རྒྱལ་མཚན་གདུགས་དང་ནི། པ་དན་རླུང་གཡབ་གོས་ཀྱིས་བཀང་། 28

ཤིན་ཏུ་གསལ་བར་བསྐྱེད་པ་ཡི། རིག་པ་ཀུན་གྱིས་རྣམ་མཛེས་བདག།
དེ་མིང་ནི་བདག་གིས་མཛད་པ། གཙུག་ན་ནོར་བུ་ཞེས་སུ་གྲགས། 29

ཡོངས་འདུ་དག་གི་རྩ་གདེང་བཞིན། བུ་སྐྱེས་མཐོང་བར་སྐྱེས་པ་དེས།
ཡབ་ཀྱི་བསམ་པ་དགའ་བ་ཡི། བདུད་རྩིས་རབ་དུ་རྒྱས་པར་བྱས། 30

རྒྱལ་བས་པོ་ལོ་མ་བཞིན་དང་། གཞོན་ནུས་རི་ཡི་སྲས་མོ་བཞིན།
མཆོད་པར་འོས་པར་སྐྱེས་པ་ཡིས། གཞོན་ནུ་དེ་ཡི་ཡུམ་ཡང་མཛེས། 31

དེ་ནས་དུས་ཀྱི་ས་ཡི་བདག། བསོད་ནམས་ཁྲིམས་ལྡན་དག་ལ་ནི།
ལྷ་ཡི་གནས་སུ་ཡང་དག་འཛོགས། གཙུག་ན་ནོར་བུ་མི་བདག་གྱུར། 32

སློང་བ་རྣམས་ཀྱི་ཡིད་བཞིན་ནོར། དེ་ཡི་སྦྱིན་པས་ཡོངས་ཁེངས་པས།
བསོད་ནམས་བདེ་སྣང་འཇིག་རྟེན་ན། ཕོངས་པར་གྱུར་མེད་སློང་བའང་མེད། 33

सोष्णीषस्य मणेस्तस्य पीयूषस्यन्दिविन्दवः ।
नयन्ति हेमतां लोहं तुरितं शमयन्ति च ॥ २६ ॥

शिशोर्जातिस्मरस्याथ वचसा तस्य भूपतिः ।
ददौ हेम सदार्थिभ्यः सर्व्वं मणिरसोद्भवम् ॥ २७ ॥

पुष्परत्नध्वजं छत्रं पताकाव्यजनांशुकैः ।
अपूरयन् पुरं व्योम्नः तस्य जन्मनि देवताः ॥ २८ ॥

सुप्रकाशोदिताशेषविद्याविद्योतितात्मनः ।
मणिचूड़ इति ख्यातं नाम तस्याकरोन्नृपः ॥ २९ ॥

स चकाराशयं हर्षपीयूषोच्छलितं पितुः ।
अभिजातः सुतो जातः पारिजात इवोदधेः ॥ ३० ॥

पौलोमीव जयन्तेन जननी पूज्यजन्मना ।
बभौ तेन कुमारेण कुमारेणेव पार्व्वती ॥ ३१ ॥

ततः कालेन सुकृतसोपानैः पृथिवीपतौ ।
दिव्यधामसमारूढ़े मणिचूड़ोऽभवन्नृपः ॥ ॥ ३२ ॥

अर्थिचिन्तामणे[१]स्तस्य दानेन परिपूरिते ।
लोके पुण्यसुखालोके नास्तीऽभून्न च याचकः ॥ ३३ ॥

---

१ Orig. मणि: ।

རྒྱལ་པོ་དེ་ཡི་གླང་ཆེན་ནི། བཟང་པོའི་རི་ཞེས་བྱ་བར་གྱུར།
བདག་པོ་བཞིན་དུ་རྗེས་མཐུན་པར། སྨིན་པའི་བརྙན་ལྡན་ལག་པའི་རྫིང་། 34

ནམ་ཞིག་འཇིག་རྟེན་འདྲེན་བྱེད་དེ། ཆེན་པོའི་གནས་ན་འཁོད་གྱུར་པར།
ཀྲི་གུའི་རིགས་འཕྲུངས་ཐུབ་པ་ནི། སྲིད་འགྲོར་ཡང་དག་འོང་གྱུར་དེ། 35

མི་དམར་མཚན་མོའི་བདག་པོ་ཡི། འོད་ཀྱི་དཔལ་འབྱོར་གཟུགས་བརྙན་བཞིན།
འཇོ་སྒྲིག་རོལ་པའི་བཞིན་རས་ཅན། མཛེས་མ་མཆོག་གཅིག་བཟུང་བར་གྱུར། 36

ཀུ་མ་དག་ནི་མི་དབེན་བཞིན། ཁང་པའི་ཆུ་སྐྱེས་དམར་པ་དང་།
མིག་དག་གཡོ་བས་འགྲོ་ལ་དེ། ཞིན་དུ་ངོ་མཚར་གྱུར་པ་བཞིན། 37

དཀའ་ཐུབ་དཔལ་དང་འགྲོགས་པ་བཞིན། མཛེས་མ་རྗེས་འབྲང་ཐུབ་པ་དེ།
སྐྱེ་རྒུའི་མགོན་གྱིས་མཆོད་བྱས་ནས། ལྷན་ནི་ཡོངས་སུ་བཟུང་བར་གྱུར། 38

མཛེས་མ་དེས་ཀྱང་མི་བདག་ནི། བརྟན་ལྡན་ཟབ་ཅིང་མཛེས་པ་དག།
གཞན་གྱི་གདུང་ལ་སྙིང་རྗེ་ནས། གཞུ་བཞག་འདོད་པའི་དབང་ཕྱུག་བཞིན། 39

གཙུག་གི་རིན་ཆེན་འོད་ཟེར་ནི། མི་རྟུང་འཇིགས་པར་བྱེད་པ་ཡིས།
ཕྱོགས་སུ་བསྐྱང་བའི་ཡིག་འཕྲིང་དག། གྱུར་གྱུམ་གྱིས་ནི་འདྲེ་བ་བཞིན། 40

རླུང་ནི་གཡབས་ཞིང་འཕེན་བྱེད་པའི། ཛ་ཡབ་དག་གིས་རྣམ་མཛེས་པ།
འགྲོ་བ་ཡང་དག་སྐྱོལ་མིན་པར། སྙིང་སྟོབས་བྱིན་དུ་འཕྱུར་བཅས་བཞིན། 41

तस्य भद्रगिरिर्नाम बभूव गजपुङ्गवः ।
प्रभोरिवानुकारेण दानार्द्रकरपुष्करः ॥ ३४ ॥

तं कदाचिन्महास्थानस्थितं भुवननायकम् ।
भवभूतिः समभ्यायात् भृगुवंशभवो मुनिः ॥ ३५ ॥

दिव्यकन्यां समादाय लावण्यललितानाम् ।
मूर्त्तामिव प्रभालक्ष्मीमक्षीणस्य क्षपापतेः ॥ ३६ ॥

कुचयोरविवेकेन रागेण चरणाब्जयोः ।
नेत्रयोश्चापलेनेव सा जगत्यतिलज्जिता ॥ ३७ ॥

तपःश्रियेव सहितं तं कन्यानुगतं मुनिम् ।
अपूजयत् प्रजानाथः कृतासनपरिग्रहम् ॥ ३८ ॥

कन्यापि नृपमालोक्य धीरं गम्भीरसुन्दरम् ।
परपीड़ासु कारुण्यात् न्यस्तचापमिव स्मरम् ॥ ३९ ॥

चूड़ारत्नस्य किरणैर्दुरितक्षयकारिभिः ।
लिखन्तं कुङ्कुमेनेव दिक्षु रक्षाक्षरावलिम् ॥ ४० ॥

विक्षेपक्षिप्तमरुता चामरेण विराजितम् ।
सोच्छ्वासेनेव सत्त्वेन जगत्संतारणं विना ॥ ४१ ॥

རིན་ཆེན་ཡིད་འོང་དོ་ཤལ་དག། སྙིང་གར་བཟུང་བར་བྱས་པ་ནི།
ས་འོག་རྒྱུད་པ་ཞི་བའི་སྐྱིད། ཀླུག་མ་ཅན་གྱིས་བསྟེན་པ་བཞིན། 42

ཆེ་བའི་དཔུང་པས་ས་དང་ནི། སེམས་ཀྱི་བཟོད་པ་ཐོབ་པ་དག།
མཐོང་ནས་མངོན་པར་འདོད་པ་དང་། ཡ་མཚན་དབང་དུ་རབ་དུ་གྱུར། 43

རི་དགས་གཡོ་བའི་མིག་ཅན་མ། ལུས་མེད་ཀྱི་ནི་གསོས་གྱུར་དེ།
ཐུབ་པས་པང་དུ་བཟུང་ནས་ནི། འགྲོ་བའི་བདག་ལ་རབ་སྨྲས་པ། 44

འཇིག་རྟེན་འདི་ན་འགྲོ་བའི་མིག། འདབ་བརྒྱ་རྣམ་པར་རྒྱས་བྱེད་པ།
ལྷ་ནི་ཁྱོད་དང་ཉི་མ་དག། འཆར་བས་རབ་ཏུ་མཛེས་པར་གྱུར། 45

འཁོར་ལས་རྟེན་སྣར་འབྱུང་བ་ཡི། ཀུན་སློངས་གྲོགས་ལྡན་རྒྱགས་པ་དག།
དགེ་རྣམས་ཡོན་ཏན་ལ་སྡང་བཞིན། ཨོ་ན་ཏེ་ཁྱོད་ལ་མེད་པ་ཉིད། 46

རྒྱལ་པོ་བྱམས་ལྡན་འཇིག་རྟེན་མགོན། འཇིག་རྟེན་སྙིང་རྗེ་ཀུན་རྫོགས་ཐུགས།
ཁྱོད་ཀྱི་གྲགས་པ་སྒྲོལ་བ་བཞིན། མཆོག་ཏུ་ཤ་རོལ་ཕྱིན་པར་གྱུར། 47

ཁྱོད་ནི་མི་སྐྱོ་དྲང་པོ་དང་། གདོང་འོད་ཟླ་མེད་ལེགས་བྱས་ལྡན།
འདི་ཉིད་ཕྱིར་ན་ཁྱད་པར་དུ། བློ་ལྡན་རྣམས་ཀྱིས་བསྟེན་བྱར་གྱུར། 48

མཛེས་མ་མེ་ཏོག་མིག་ཅན་འདི། པདྨའི་ཁྱིངས་ནས་ཡང་དག་བྱུང་།
སྨིན་ཐིག་ལྷག་མའི་འོ་མ་ཡིས། བདག་གི་གནས་སུ་ལེགས་པར་གསོས། 49

रत्नोदारेण हारेण हृदयग्रहकारिणा ।
पातालविपदां शान्त्यै शेषेणेव निषेवितम् ॥ ४२ ॥

वहन्तं महता दोष्णा क्ष्मां चित्तेन च क्षमाम् ।
प्रथयै साभिलाषस्य विस्मयस्य विधेयताम् ॥ ४३ ॥

गृहीत्वा मुनिरुत्सङ्गे कुरङ्गतरलेक्षणाम् ।
जीवनीं तामनङ्गस्य जगाद जगतीपतिम् ॥ ४४ ॥

उदितेन जगन्नेत्र[1]-शतपत्रविकाशिना ।
भवता भाति लोकोऽयं देवेन च विवस्वता ॥ ४५ ॥

अहो नु तव नास्त्येव विभूतिसुलभोद्भवः ।
साधोरिव गुणद्वेषः सम्मोहोपचितो[2] मदः ॥ ४६ ॥

लोकनाथस्य ते लोककारुण्यपूर्णचेतसः ।
राजन् मैत्रीजुषा कीर्त्तिः स्थिरा पारमिता परम्[3] ॥ ४७ ॥

अखेदसरलो दाता निर्व्याजसुकृतो भवान् ।
अतएव विशेषेण माननीयो मनीषिणाम् ॥ ४८ ॥

पद्मोदरसमुद्भूता कन्या कमललोचना ।
होमावशेषपयसा वर्धितेयं मयाश्रमे ॥ ४९ ॥

---

१ Orig. नेत्रं शतपत्र । २ Orig. सम्मोहपचिवो ।
३ Orig. राजन् मैत्रिजुषस्थिरा कीर्त्तिः पारमिता परम् ।

བཙུན་མོ་ཆེན་མོ་ས་གཞི་ཡིས། ཆུན་མར་སྐྱེས་མཆོག་ཁྱེད་ཀྱིས་ལོང་།
ཁྲབ་འཇུག་ལ་ནི་དཔལ་མོ་བཞིན། འདི་ནི་ཁྱེད་བདག་ཉིད་ལ་འདེས། 50

དུས་ཀྱི་མཆོད་སྦྱིན་བསོད་ནམས་འབྲས། རྫོགས་པར་བདག་ལ་སྨིན་པར་མཐོང་།
འདི་བཟོད་ཆོ་གས་རྒྱལ་པོ་ལ། མཛེས་མ་བྱིན་ནས་ཐུབ་པ་གཤེགས། 51

ཡིད་སྐྱུབ་དགའ་མ་ཐོབ་པ་བཞིན། རྒྱལ་པོས་ཕྱུག་མ་པདྨ་ལྡན།
དགེ་ལ་བསོད་ནམས་ལྡན་པ་བཞིན། མཛེས་མས་སྙིང་སོས་ཚལ་དུ་རྩེས། 52

དེ་ནས་དུས་ཀྱི་དེ་ཡི་བུ། འཁྲི་ཤིང་སྨིག་མའི་སྨུ་དྲིག་བཞིན།
བདུད་རྩི་པདྨའི་གཙུག་ཅེས་པ། ཡབ་ཀྱི་ཡོན་དན་མི་ལོང་གྱུར། 53

བརྒྱ་བྱིན་འཛིག་རྟེན་སྐྱོང་སོགས་ཀྱིས། བགོས་པར་མི་འདེས་ཆེ་བར་དར།
རང་ཉིད་པདྨར་སྐྱེས་སོགས་ཀྱིས། ཀུན་ནས་བསྟོད་འོས་སྤྱོད་པར་ལྡན། 54

གྲགས་པའི་དྲི་བཟང་རབ་རྒྱས་པས། ཕྱོགས་ཀྱི་ཁོངས་ནི་ཡང་དག་རྫོགས།
སྐྱོང་བའི་ཚོགས་ཀུན་དགེ་བ་རུ། བགྱིད་པའི་དཔག་བསམ་ཤིང་འཕྲུང་ནི། 55

ས་བདག་བདག་གིས་ཐུབ་པའི་ཚིག ། དུས་སུ་བྱ་བར་དྲན་གྱུར་ནས།
མི་འཆི་ནོར་ནི་ཡོངས་རྫོགས་ཤིང་། ཡོན་ནི་ཡངས་པའི་མཆོད་སྦྱིན་པས། 56

ཕྲི་གཞུའི་བུ་སོགས་ཐུབ་པ་དང་། མི་བདག་རབ་དུ་བཟོད་དཀའ་སོགས།
འདོད་པ་ཀུན་གྱིས་མ་བསྐུམས་པའི། མཆོད་སྦྱིན་དེར་ནི་ཡང་དག་འོངས། 57

गृह्यतामग्रमहिषी पत्नीत्वे भवता नृप ।
विष्णोः श्रीरिव योग्येयं तवैव पुरुषोत्तम ॥ ५० ॥

यज्ञपुण्यफलं पूर्णं कालेन मम दास्यसि ।
इत्युक्त्वा विधिना राज्ञे कन्यां दत्त्वा ययौ मुनिः ॥ ५१ ॥

प्रियां पद्मावतीं राजा रतिं प्राप्येव मन्मथः ।
अरंस्त रुचिरोद्याने सुकृते पुण्यवानिव ॥ ५२ ॥

ततः कालेन सा पुत्रं वंशवल्लीव मौक्तिकम् ।
असूत पद्मचूडाख्यं गुणानां दर्पणं पितुः ॥ ५३ ॥

शक्रादिभिर्लोकपालैरनुल्लङ्घ्य[१]महोदयः ।
संस्तूयमानचरितः स्वयं कमलजन्मना ॥ ५४ ॥

यशःसौरभसम्भारसम्पूरितदिगन्तरः ।
सर्वार्थसार्थकल्याणकलनाकल्पपादपः ॥ ५५ ॥

स्मृत्वा मुनेर्वचः काले कर्तुं विपुलदक्षिणाम् ।
अहिंसावसुसंपूर्णामाजहार महीपतिः ॥ ५६ ॥

तस्मिन् यज्ञे समाजग्मुः सर्वकामैरनर्गलै[२] ।
मुनयो भार्गवमुख्या नृपा दुष्प्रसहादयः ॥ ५७ ॥

---

१ Orig. रनुलङ्घ्य । २ Orig. कामैर्विरर्गले ।

གྲངས་མེད་ནོར་གྱི་ཆར་འབེབས་པའི། སྦྱིན་སྐྱིག་མཛོད་དུ་གྱུར་པ་དེའི།
མི་ཡི་དབུས་ནས་ལྷ་ཡི་དབང་། སྦྱིན་པོའི་གཟུགས་སུ་ཡང་དག་ལངས། 58

རིད་ཅིང་རྣམ་འགྱུར་ལུས་ཅན་ནི། ས་སྐྱོང་ལ་ནི་ཉེར་བཏུད་དེ།
བདག་ནི་བཀྲེས་སོ་སྐོམ་མོ་ཞེས། བཟའ་དང་བཏུང་བ་སློང་བར་གྱུར། 59

དེ་ནས་ས་ཡི་བདག་པོའི་བཀས། རིམ་གྲོ་པ་ཡི་འཁོར་རྣམས་ཀྱིས།
བཟའ་བ་རྣམ་པ་སྣ་ཚོགས་དང་། བཏུང་བ་དག་ཀྱང་ཉེ་བར་བསྟབས། 60

དེ་ནས་སྦྱིན་པོས་ས་བདག་ལ། ཆུང་ཟད་དགོད་བཞིན་རབ་ཏུ་སྨྲས།
རྒྱལ་པོ་འདི་ལ་བདག་མི་དགའ། གང་ཕྱིར་བདག་ནི་ཤ་ཡིས་འཚོ། 61

འཕྲལ་ལ་བསད་པའི་ཤ་དང་ནི། ཤིན་ཏུ་མང་བའི་ཁྲག་དག་གིས།
བདག་ཅག་ཚིམ་པ་རབ་ཏུ་སྐྱེ། གང་ཞིག་འདོད་པ་གནང་བར་མཛོད། 62

འདོད་ཀུན་རབ་ཏུ་སྟེར་རོ་ཞེས། ཁྱོད་ཅན་བདག་ནི་ཡང་དག་འོངས།
སྦྱིན་ནོ་ཞེས་ནི་རབ་བསྒྲགས་ནས། དགག་པ་ཁྱོད་ཀྱིས་འོས་པ་མིན། 63

དེ་སྐད་སྦྱིན་པོའི་ཚིག་ཐོས་ནས། སྙིང་རྗེས་གཟིར་བའི་མི་བདག་ནི།
འཚོ་བ་མེད་པར་ངེས་པས་ན། སློང་བ་ཕྱིར་ཕྱོགས་སྡུག་བསྔལ་གྱུར། 64

བཟོད་དཀའི་འཚོ་བ་མི་བཟོད་དེ། སློང་བ་འབྲས་བུ་མེད་པའང་མིན།
ཀྱེ་མ་ཆོས་ལ་བྲ་ཆོས་འདི། བྱེད་པོས་བྱས་ཤེས་དེ་ཡིས་བསམས། 65

वर्त्तमाने मखे तस्मिन् निःसंख्यश्रुवार्षिणि ।
रक्षोरूपः समुत्तस्थौ वह्निमध्यात् सुरेश्वरः ॥ ५८ ॥

उपसृत्य स भूपालं कृशो विकृतविग्रहः ।
क्षुत्पिपासार्द्दितोऽस्मीति ययाचे पानभोजनम् ॥ ५९ ॥

शासनादथ भूभर्त्तुस्तस्मै विविधभोजनम् ।
उपनिन्युः परिचिताः पानञ्च परिचारकाः ॥ ६० ॥

ततः किञ्चिद् विहस्यैव क्षितिपं प्राह राक्षसः ।
नेदमस्मित्प्रयं राजन् वयं हि पिशिताशनाः ॥ ६१ ॥

सद्योहतस्य मांसेन रुधिरेण च भूयसा ।
तृप्तिरुत्पद्यतेऽस्माकं दीयतां यदभीप्सितम् ॥ ६२ ॥

सर्व्वकामप्रदोऽसीति त्वामहं समुपागत ।
ददामीति प्रतिश्रुत्य न निषेधस्तवोचितः ॥ ६३ ॥

इति रक्षोवचः श्रुत्वा करुणाकुलितो नृपः ।
अहिंसानियमेनाभूदर्थिवैमुख्यदुःखितः ॥ ६४ ॥

सोऽचिन्तयत्तदा दैवाज्जातोऽयं धर्म्मसंशयः ।
न सहे दुःसहां हिंसां न नैष्फल्यमर्थिनः ॥ ६५ ॥

---

१ Orig. सोऽचिन्तयद्देवाज्जतोऽयम् ।

བསད་པ་མེད་པར་ལུས་ལས་ནི། ཤ་དག་སྐྱེད་པ་ཡོད་མ་ཡིན།
བདག་གི་གྲོག་སྦུར་དག་གི་ཡང་། ལུས་ཀྱི་ཉེན་མོངས་ཟླ་མི་བཟོད། 66

བདག་གིས་འབྱུང་པོ་ཐམས་ཅད་ལ། འཇིགས་མེད་བསོད་ནམས་ཡོན་བྱིན་ནས།
སྲོག་ཆགས་བསད་ལས་བྱུང་བའི་ཤ། འདི་ལ་བདག་གིས་ཇི་ལྟར་སྤྱོད། 67

དེ་ལྟར་ལེགས་བསམས་སི་བདག་ནི། སྙིང་རྗེས་འཁྲུགས་པས་དེ་ལ་སྨྲས།
རང་ལུས་ཡང་དག་བཅད་ནས་ནི། ཤ་ཁྲག་ཁྱོད་ལ་སྦྱིན་པར་བྱ། 68

ས་ཡི་བདག་པོས་དེ་སྨྲས་པས། འགྲོ་བ་རྣམས་ནི་འཁྲུགས་པར་གྱུར།
ལུས་ནི་ཟད་པར་སྤྲོ་བ་ཡང་། གྲོགས་མཆོག་རྣམས་ཀྱིས་བཟོད་མ་གྱུར། 69

ས་སྐྱོང་དེ་བཞིན་ཐུབ་རྣམས་ཀྱིས། བརྩེ་བས་རབ་ཏུ་བཟློག་གྱུར་ཀྱང་།
རང་གི་ལུས་ལ་བཅད་ནས་ནི། ཤ་ཁྲག་ཞག་རྣམས་དེ་ལ་བྱིན། 70

མགྲིན་པའི་ངར་དུ་ཁྲག་འཐུངས་པའི། སྲིན་པོས་ས་ཡི་བདག་པོ་ཡི།
ཤ་རྣམས་རབ་ཏུ་ཟ་བའི་ཚེ། སྐད་ཅིག་ས་ནི་རབ་ཏུ་འདར། 71

དེ་ནས་ལྷ་མོ་པདྨ་ལྡན། བདག་པོ་དེ་ལྟར་གྱུར་མཐོང་ནས།
སྙི་སྡུགས་འདོན་ཅིང་རབ་ཏུ་འཁྱིལ། སྨོངས་ཤིང་བརྒྱལ་བས་དཀྲིས་པར་གྱུར། 72

མི་ཡི་དབང་པོའི་སྙིང་སྟོབས་ནི། རབ་རྒྱས་དེ་མཐོང་ལྷ་དབང་གིས།
སྲིན་པོའི་གཟུགས་ནི་ཡོངས་བཏང་ནས། ཐལ་མོ་སྦྱར་ནས་དེ་ལ་སྨྲས། 73

न च मांसं शरीरेभ्यो लभ्यते वैगमं विना ।
नाहं पिपीलकस्यापि कायक्लेशलवं सहे ॥ ६६ ॥

दत्त्वाहं सर्व्वभूतेभ्यः पुण्यामभयदक्षिणाम् ।
कथमस्मै प्रयच्छामि मांसं प्राणिवधोद्भवम् ॥ ६७ ॥

इति सञ्चित्य नृपतिस्तमूचे करुणाकुलः ।
स्वशरीरसमुत्कृत्तमसृङ्मांसं ददामि ते ॥ ६८ ॥

इत्युक्ते भूमिपतिना बभूवाकुलितं जगत् ।
न च देहव्ययोत्साहं सचिवास्तस्य सेहिरे ॥ ६९ ॥

प्रणयात् वार्य्यमाणोऽपि भूपालैर्मुनिभिस्तथा ।
ददौ स्वदेहमुत्कृत्य तस्मै मांसमसृग्वसाम् ॥ ७० ॥

आकण्ठं पीतरक्तेन राक्षसेन क्षितिप्रभोः ।
भक्ष्यमाणेषु मांसेषु क्षणं क्षितिरकम्पत ॥ ७१ ॥

ततः पद्मावती देवी पतिं दृष्ट्वा तथागतम् ।
विलपन्ती निपतिता मोहमूर्च्छाकुलाभवत् ॥ ७२ ॥

मनुजेन्द्रस्य देवेन्द्रस्तद्दृष्ट्वा सत्त्वमूर्ज्जितम् ।
रक्षोरूपं परित्यज्य तमुवाच कृताञ्जलिः ॥ ७३ ॥

ཨེ་མ་ཧོ་རྒྱལ་པོ་ཁྲིད་ཀྱི་ནི། བྱ་ཁ་དཀར་བའི་ལམ་འདི་ཤེས།
ཟ་སྦྲ་ཡངས་པ་གདམས་པའི་གོས། ལུས་ལ་ཅི་ཕྱིར་འབྱུང་མི་འགྱུར། 74

རྒྱལ་པོ་རྫུལ་བྲལ་ཁྲིད་ཀྱི་ནི། ཨེ་མ་བསོད་ནམས་ཕུན་སོང་མིན།
ཨེ་མ་སྙིང་སྟོབས་བློ་ན་མེད། ཨེ་མ་བདུན་པ་མཐའ་དང་བྲལ། 75

ཕ་རོལ་སྡུག་ལས་སྡུག་བསྔལ་ཞིང་། ཉིད་དཀར་ལ་ཡང་ཚགས་དང་བྲལ།
མི་མ་ཕུན་ཕྱོགས་ལ་བཟོད་ལྡན་པ། དམ་པ་རྣམས་ནི་ལེགས་བྱས་ལས། 76

གང་གིས་འཇིག་རྟེན་གསུམ་པོ་ལ། རྗེས་སུ་བརྩེར་གྱུར་བདག་ཉིད་ཆེ།
སྙིང་རྗེས་བརླན་པའི་སྙིང་སྟོབས་ཀྱིས། སྒྲོ་བ་འདི་ནི་ཡང་དག་གསལ། 77

འདི་བཟོད་ལྷ་ཡི་སྨན་རྣམས་ཀྱིས། དེ་ལུས་རྣལ་དུ་གནས་པར་བྱས།
རབ་ཏུ་དང་ཞིང་ངོ་ཚས་དམན། བརྒྱ་བྱིན་རང་གི་གནས་སུ་སོང་། 78

དེ་ནས་མཆོད་སྦྱིན་ཆོ་ག་བཞིན། རྫོགས་དེ་སྐབས་གསུམ་པས་མཆོད་པའི།
ས་ཡི་བདག་པོས་རྒྱལ་པོ་དང་། ཕྱུག་མཆོག་རྣམས་ཀྱང་མཆོད་པ་བྱས། 79

མཆོད་སྦྱིན་མཇུག་ཏུ་མཛེས་མ་དང་། གྲོང་དང་གྲོང་ཁྱེར་རིན་ཆེན་ཆར།
སྐབས་གསུམ་པར་འོས་རྟ་དག་ནི། གསེར་གྱི་འཕྲེང་ལྡན་བཅས་དེས་བྱིན། 80

དཔག་ཚད་བརྒྱར་ནི་མགོགས་པ་རུ། ཉི་མ་གཅིག་གིས་འགྲོ་བ་གང་།
རྒྱལ་པོ་འི་གླང་ཆེན་མདུན་ན་འདོན། ཚངས་པའི་ཤིང་རྟ་ཞེས་པར་བྱིན། 81

अहो नु कर्म्मणा राजन् दुष्करेण तवामुना ।
रोमाञ्चकञ्चुकाकीर्णः कायः कस्य न जायते ॥ ७४ ॥

अहो पुण्यमसामान्यमहो सत्त्वमनुत्तरम् ।
अहो धैर्य्यममर्य्यादं राजन् विरजसस्तव ॥ ७५ ॥

दुःखिताः परदुःखेषु निर्ल्लोभा दुर्ल्लभेषु च ।
विपक्षेषु क्षमावन्तः सन्तः सुकृतसेतवः ॥ ७६ ॥

समुन्मिषति कोऽप्येष सत्त्वोत्साहो महात्मनाम् ।
त्रैलोक्यं करुणार्द्राणां येन यात्यनुकम्प्यताम् ॥ ७७ ॥

उक्तेति दिव्यौषधिभिस्तं कृत्वा स्वस्थविग्रहम् ।
प्रसाद्य लज्जावनतः शक्रः स्वनिलयं ययौ ॥ ७८ ॥

ततः समाप्ते विधिवत् यज्ञे राज्ञां महीपतिः ।
चक्रे मुनिवराणाञ्च पूजां त्रिदशपूजितः ॥ ७९ ॥

स रत्नवर्षैर्यज्ञान्ते कन्याग्रामपुरप्रदः ।
सहितं त्रिदशार्हेण हरिणा हेममालिना ॥ ८० ॥

ददौ राजगजं ब्रह्मरथाख्याय पुरोधसे ।
योजनानां शतं तूर्णं एकेनाह्ना प्रयाति यः ॥ ८१ ॥

རྒྱལ་པོའི་གླང་ཆེན་བཟང་པོའི་རི། དེ་ལ་ཡང་དག་གཏད་མཐོང་ནས།
རྒྱལ་པོ་ཤིན་ཏུ་བཟོད་དཀའ་དེར། ཆགས་པས་བྲངས་པའི་ཡིད་དུ་གྱུར། ༤༢

དེ་ནས་ས་བདག་མཆོད་སྦྱིན་གྱིས། དཔལ་གྱི་ཡ་མཚན་གཞིགས་གྱུར་ཅིང་།
ས་ཡི་སྐྱོད་པས་མཆོད་སྦྱིན་འབྲས། ཀྲྀ་གྲུའི་བུ་ལ་གཏད་པའི་ཚེ། ༤༣

མ་རི་ཙི་སློབ་ཐུབ་པ་ནི། མཆོད་དང་སྨན་གྲོབ་བླ་རི་ཀ།
ཡང་དག་འོངས་ནས་ཞིས་པའི་ཚིག། མངོན་དུ་བཏང་ནས་དེ་ལ་སྨྲས། ༤༤

རྒྱལ་པོ་སློབ་གཉེར་གང་གི་མཐར། བདག་གི་བླ་མ་བླ་མའི་ཡིན།
གསོག་འཁོར་དོན་དུ་སྐྱེ་བོ་ནི། ཐུན་མོང་བ་ལས་རྙེད་དཀའ་བཞེད། ༤༥

སྒྲུབ་བྱེད་ཁྱོད་ཉིད་གཅིག་པུ་ཡིས། རྙེད་དཀའ་རབ་ཏུ་སྦྱིར་པ་སྤྲུལ།
དཔག་བསམ་ཤིང་འཕྲུང་འཛིག་རྟེན་ན། ནམ་ཡང་མང་པོ་སྐྱེ་མི་འགྱུར། ༤༦

བདག་གི་བླ་མ་དཀའ་ཐུབ་ཀྱིས། ཉམ་ཆུང་ཤུས་པའི་གསོག་འཁོར་དུ།
པདྨ་ལྡན་པའི་ལྷ་མོ་ནི། བུ་དང་བཅས་པ་གནང་བར་མཛོད། ༤༧

ཐུབ་པས་དེ་བཟོད་རྒྱལ་པོ་ནི། བདར་པ་ས་འཛིན་བཙུན་མོ་དང་།
འབྲལ་ལས་སྐྱེས་པའི་མྱ་ངན་ལས། ཡིད་ནི་བརྟན་པས་དེ་ལ་སྨྲས། ༤༨

དགའ་མ་སློག་ལས་མངོན་པར་ལྷག། རྒྱལ་ཚབ་དག་དང་བཅས་པ་ནི།
མངོན་པར་འདོད་པ་བླ་མའི་ཡིན། ཐུབ་པ་ཁྱོད་ལ་རབ་ཏུ་སྦྱིན། ༤༩

तस्मै समर्पितं दृष्ट्वा राज्ञा भद्रगिरिं गजम् ।
अभूद् दुष्प्रसहो राजा तत्स्पृहाकृष्टमानसः ॥ ८२ ॥

प्रयातेष्वथ भूपेषु विस्मितेषु मखश्रिया ।
समर्पिते यज्ञफले भार्गवाय महीभुजा ॥ ८३ ॥

तमुवाच समभ्येत्य स्वस्तिवादपुरःसरम् ।
मरीचिशिष्यो बाहीकः प्राप्तपूजासनो मुनिः ॥ ८४ ॥

राजन्नध्ययनस्यान्ते गुरुर्मे गुरुदक्षिणाम् ।
ईहते परिचर्य्यार्थी सामान्यजनदुर्लभाम् ॥ ८५ ॥

एकस्त्वमेव विधिना निर्म्मितो दुर्लभप्रदः ।
बहवो जातु जायन्ते न लोके कल्पपादपाः ॥ ८६ ॥

देवी पद्मावती पुत्रसहिता गुरवे मम ।
तपःकृशाय वृद्धाय दीयतां परिचारिका ॥ ८७ ॥

इत्युक्ते मुनिना राजा दयिताविप्रयोगजाम् ।
रुजं संस्तभ्य मनसा तमूचे धैर्य्यभूधरः ॥ ८८ ॥

प्रयच्छामि मुने तुभ्यमीप्सितां गुरुदक्षिणाम् ।
सहितां युवराजेन जीविताभ्यधिकां प्रियाम् ॥ ८९ ॥

དེ་སྐད་བརྗོད་ནས་མི་བདག་གིས། །པད་ལྡན་སྲས་བཅས་དེ་ལ་བྱིན།
སེམས་དཔའ་ཚུལ་ལྡན་བདག་ཉིད་རྣམས། །རང་ཕྱོགས་ལ་ཡང་ཆགས་མེད་གཏོང་། 90

བྲལ་བའི་ཉིན་མོངས་ཀྱིས་སྨག་པའི། །རྒྱལ་པོའི་བཙུན་མོ་སྲས་དང་བཅས།
གླངས་དེ་གནས་སུ་སོང་ནས་ནི། །ཐུབ་པས་བླ་མ་ལ་རབ་ཕུལ། 91

སྐབས་དེར་དྲེགས་བཅས་ཀུ་རུའི་རྒྱལ། །ཤིན་དུ་བཟོད་དཀའ་ས་དབང་ལ།
གླང་ཆེན་བཟང་པོའི་རི་བོ་ནི། །འཁྱེར་ཕྱིར་པོ་ཉམས་ཉེ་བར་བླངས། 92

མ་དུན་ན་འདོན་ལ་བྱིན་ཟེར་བའི། །སོ་གཉིས་རྒྱལ་པོས་མ་བྱིན་གང་།
དེ་ཚོ་རང་ཉིད་མང་པོའི་སྡེས། །གཡུལ་ནི་རབ་དུ་འགྱེད་དུ་འོང་། 93

ཀུ་རུའི་རྒྱལ་པོའི་དཔུང་རྣམས་ཀྱིས། །གྲོང་ཁྱེར་ལམ་རྣམས་བཀགས་པ་ལ།
ས་གཞི་སྐྱོང་བའི་དམག་གི་ཚོགས། །གཡུལ་དུ་འཛུག་པ་རབ་སྐྱོར་གྱུར། 94

དཔའ་བོ་གླང་ཆེན་སེང་གེ་དེ། །དགྲ་ནི་རྣམ་འཇོམས་ནུས་གྱུར་ཀྱང་།
སྐྱེ་བོ་འཇོང་པས་འཇིགས་ཤིང་འཁྲུགས། །སྙིང་རྗེ་ལས་ནི་ཡང་དག་བསམས། 95

རྒྱལ་པོ་ཤིན་དུ་བཟོད་དཀའ་ནི། །བདག་གི་རྗེས་མཐུན་གྲོགས་ཀྱི་མཆོག།
གླང་པོ་དག་ལ་ཆགས་སྨོངས་པ། །བྱེ་མ་འཐམ་ལ་དགྲ་ཉིད་གྱུར། 96

དམ་པའི་མཛད་པ་མཛད་པའི་མཐར། །བར་མ་རྣམས་ཀྱིས་མཛད་མེད་མཐར།
ངན་པ་རྣམས་ཀྱི་ཕྱོག་འཕྲོག་པས། །ཤིན་དུ་འཇིགས་ཅང་དགྲ་མཐར་ཡིན། 97

इत्युक्त्वा सम्सुतां तस्मै ददौ पद्मावतीं नृपः ।
स्वजीविते विनिःस्नेहस्त्यागः सत्त्वमयात्मनाम् ॥ ९० ॥

आदाय राजदयितां विरहक्लेशकातराम् ।
सपुत्रामाश्रमं गत्वा प्रददौ गुरवे मुनिः ॥ ९१ ॥

अत्रान्तरे दुष्प्रसहः कुरुराजः क्षितीश्वरम् ।
हस्तो ययाचे दूतेन भूत्यै भद्रगिरिं गजम् ॥ ९२ ॥

पुरोहितार्पितं राजा न ददौ द्विरदं यदा ।
तदा विपुलसैन्येन स्वयं योद्धुं समाययौ ॥ ९३ ॥

बलिना कुरुराजेन रुद्धेषु पुरवर्त्मसु ।
बभूव भूमिपालस्य सैन्यं रणरसोद्भटम् ॥ ९४ ॥

स वीरकुञ्जरहरिः शक्तोऽप्यरिविदारणे ।
जनक्षयभयोद्विग्नः कारुण्यात् समचिन्तयत् ॥ ९५ ॥

अहोऽनुकूलमित्रं मे राजा दुष्प्रसहः परम् ।
मातङ्गलोभमोहेन सहसा शत्रुतां गतः ॥ ९६ ॥

स्नेहान्ताः सुजनैः स्नेहा निःस्नेहान्ताश्च मध्यमैः ।
दुर्जनैर्घोरवैरान्ता भवन्ति प्राणहारिणः ॥ ९७ ॥

ཀྱི་མ་འཁྱེར་བ་ལ་ཆགས་པས། བདག་གི་ཡང་དག་སྤྱོར་བ་འདི།
སྲོག་ནི་སྐད་ཅིག་འཛིགས་ལྷར་ཞིང༌། གཞན་གྱི་སྲོག་ནི་གཅོད་པ་ལོར། 98

འཆི་བས་ངལ་ལ་རབ་ཆགས་ཤིང༌། གཡུལ་གྱི་ཁྲག་གིས་མངོན་བཀྲུས་པའི།
སེམས་ཅན་ཡང་དག་སྤྱོར་བ་འདི། ཟས་དོན་རྩོད་པའི་ལས་པའོ། 99

གཡོག་འཁོར་གཏུམ་དྲག་ཕྲ་མ་ཅན། སྲོག་རྣམས་འཚོང་ཞིང་ཁ་ཟས་དག
དོན་གཉེར་རྣམས་ཀྱི་རྩོད་པ་ནི། ཁྲི་རྣམས་ཁྲི་བཞིན་བཟོད་པར་དཀའ། 100

ཀྱི་མ་རྫས་ལ་ཆགས་པའི་བློ། ཕ་རོལ་གདུང་བས་བསོལ་གྱུར་པ།
རང་ཉིད་བདེ་བ་ཁོ་ནའི་ཕྱིར། མ་རུངས་སྤྱོད་ལ་རབ་ཏུ་རྒྱུག། 101

གང་ཞིག་གཡུལ་གྲུབ་གོ་བགོས་ཤིང༌། ཁྲག་གིས་སྦྲགས་པའི་དཔལ་ཟླ་བ།
དེ་སྙིང་རབ་ཏུ་དྲག་པོ་ལ། སྙིང་རྗེའི་ཆ་ནི་ག་ལ་ཞིག། 102

རྒྱལ་པོ་ཤིན་ཏུ་བཟོད་དཀའ་འདི། རྣམ་པར་འཁྱེར་ལ་ཆགས་ཤིང་སྨོངས།
བདག་གི་སྙིང་རྗེའི་ཡུལ་གྱུར་པས། གནོད་བྱེད་གྱུར་ཀྱང་གསོད་མི་འོས། 103

དེ་ལྟར་བསམས་ཤིང་སྙིང་རྗེ་ལས། ནགས་ནི་འཚོལ་བྱེད་དེ་ཡི་སྐྱད།
རང་སངས་རྒྱས་ནི་རྣམ་པ་བཞི། རང་ཉིད་མཁའ་ལས་ཡང་དག་འོངས། 104

ཀུན་མཁྱེན་མཆོད་དང་ལྡན་ཐོབ་ཅིང༌། དང་བས་རབ་ཞི་ངང་ཚུལ་ཅན།
རྒྱལ་པོ་ཡང་དག་བཞེད་པ་དེ། ཐོས་ནས་དེ་ཉིད་རབ་ཏུ་གསུངས། 105

अहो विभवलोभेन क्षणक्षयिणि जीविते ।
समुद्यमोऽयमस्माकं परप्राणनिपातने ॥ ९८ ॥

हिंसयापप्रशान्तानां शक्तानां कलिकर्म्मसु ।
रणरक्ताभिषिक्तानां भक्तार्थोऽयं समुद्यमः ॥ ९९ ॥

सेवाविक्रीतजीवानां चण्डपिण्डार्थिनामयम् ।
कलहो दुःसह क्रौर्य्य पिशुनानां शुनामिव ॥ १०० ॥

अहो विभवलुब्धानां परसन्तापशीतलाः ।
स्वसुखायैव धावन्ति नृशंसचरिता धियः ॥ १०१ ॥

ये युधि सिद्धिसन्नद्धा रक्तान्तां भुञ्जते श्रियम् ।
कुतः क्रूरतरे तेषां हृदये करुणाकणाः ॥ १०२ ॥

एष दुष्प्रसहो राजा लुब्धो विभवमोहितः ।
न वध्यः सापराधोऽपि कारुण्यायतनं मम ॥ १०३ ॥

इति चिन्तयतस्तस्य कारुण्यात् काननैषिणः ।
प्रत्येकबुद्धाश्चत्वारः स्वयं व्योम्ना समाययुः ॥ १०४ ॥

प्राप्तपूजासनाः श्रुत्वा सर्व्वज्ञास्तत्समीहितम् ।
राज्ञः प्रशमशीलस्य प्रसन्नास्तत्त्वमूचिरे ॥ १०५ ॥

འཁོར་བ་ཀུན་སྤོངས་རབ་རིབ་ཀྱི། ལོང་བར་བཙོ་བ་དང་ལྡན་པས།
སེམས་པ་སྣང་བའི་རྣམ་རིག་ཅན། ས་སྐྱོང་ཁྱོད་ནི་མཛེས་པར་གྱུར། 106

རྒྱལ་པོ་དཀྲིས་པར་མཛོད་ཅིག་དང་། བྱང་ཆུབ་དུ་ནི་བློ་གྲོས་ཚུགས།
ད་ལྟ་རབ་ཏུ་འགོག་པའི་ཚེ། ནགས་ཉིད་དུ་ནི་འགྲོ་བར་བྱས། 107

ཆུ་རྒྱུན་རབ་གསལ་ལྷུང་ལྷུང་སྒྲོག ཡང་དག་སེམས་བྱེད་གྲིགས་པ་ཅན།
དབེན་པའི་ནགས་ཀྱི་ས་ཕྱོགས་དེ། ཞི་བ་རྣམས་ཀྱི་དགའ་བསྐྱེད་ཉིད། 108

རྗེས་སུ་བཟུང་བློས་འདི་གསུངས་ནས། དེ་ལ་མཁའ་ག་ཞིགས་བསྒྲུབས་བྱས་ཏེ།
འོད་ཀྱིས་ཕྱོགས་རྣམས་རབ་གསལ་ཞིང་། དེ་དང་ལྡན་ཅིག་དེ་རྣམས་ག་ཞིགས། 109

དེ་རྣམས་རང་རང་གནས་ག་ཞིགས་ཏེ། ས་སྐྱོང་གངས་ཅན་ངོས་ཀྱི་ནགས།
ཡང་དག་ཐོབ་པས་རབ་དང་ཞིང་། རབ་ཏུ་ཞི་བ་དག་ཏུ་གྱུར། 110

སྙིང་སྟོབས་ལྡན་རྣམས་ནང་ན་ནི། དེ་བློ་དབེན་ཞིང་དྲི་མ་མེད།
དགའ་བའི་ཚར་ནི་རྫོགས་བའི་ས།* ནགས་ཀྱི་ས་གཞི་བཞིན་དུ་གྱུར། 111

ས་བདག་འོད་ལྡན་འཕྲམ་ལ་ནི། ས་འཛིན་དག་གིས་བསྒྲིབས་པ་དེར།
གཏི་མུག་རབ་རིབ་ཐོབ་པ་ཡིས། རྒྱ་ངན་འགྲོ་ཚོགས་སྐྱེ་རྒྱུ་ཉལ། 112

དེ་ནས་ཐུབ་པ་མ་ཧཱ་ཙེའི། དབུས་སུ་དེ་ཡི་བློན་པོ་སེང་།
རྒྱལ་སྲིད་བསྲུང་བར་ནུས་གྱུར་པའི། རྒྱལ་པོའི་སྲས་ནི་རབ་ཏུ་བསྐྱངས། 113

* པར་འདིར་ "དགའ་བའི་ཚར་" ཀྱི་སྐད་དོད་ཡིག་འབྲུ་གསུམ་ཚད་པ་མ་དཔེ་རྣམས་ལས་མ་རྙེད་པ "ཤྲི་ཡ་ནི་" ཞེས་པ་འདི་འདར་ཞོས་གསར་དུ་བཙུག།

सम्मोहपटलान्धेषु संसारिषु दयालुता ।
शोभते तव भूपाल सत्त्वलोकविवेकिनः ॥ १०६ ॥

क्रियतामीप्सितं राजन् बोधौ बुद्धिर्निधीयताम् ।
सम्प्रति प्रतिरोधेऽस्मिन् वनमर्वविगाह्यताम् ॥ १०७ ॥

स्वैरनिर्झरझङ्कारकीर्णसन्तोषशीकराः ।
विविक्तकाननोद्देशाः शमिनामेव वल्लभाः ॥ १०८ ॥

इत्युक्तानुग्रहधिया विधायास्य वियज्ञतिम् ।
प्रभाप्रसाधितदिशस्ते तेन सहिता ययुः ॥ १०९ ॥

यातेषु स्वपदं तेषु हिमवत्तटकाननम् ।
सम्प्राप्य पृथिवीपालः प्रयतः प्रशमोऽभवत् ॥ ११० ॥

विवेकविमलास्तस्य धियः सत्त्ववतामिव ।
बभुः प्रियनिवुः* पूर्णनिवाण्यो वनभूमयः ॥ १११ ॥

भूधरान्तरिते तस्मिन् सहसा भूपभास्वति ।
शुशुचुर्मोहतिमिरप्राप्तशोकप्रजाः प्रजाः ॥ ११२ ॥

ततस्तत्सचिवा जग्मुर्मरीचं मुनिमाश्रमे ।
शान्तं राज्यस्य रक्षार्थै राजपुत्रं ययाचिरे ॥ ११३ ॥

---

* Three words of this line, *i.e.*, the Sanskrit equivalent of དཀར་བའི་ཆར་གྱུ were lost. Hdar Locháva substituted प्रिय निवु &c. in their place.

ཐུབ་པས་རྣམ་འགྱུར་མེད་པར་བྱིན། བློན་པོ་ཡིས་ནི་བླངས་བྱས་ཏེ།
རྒྱལ་སྲས་རང་གི་གྲོང་ཁྱེར་དུ། དམག་ཚོགས་ཡང་དག་ལྷན་པར་བྱས། 114

དེ་ནས་དམག་སྤྱིའི་སློ་བ་བཞིན། ཤིན་ཏུ་དཔའ་བ་སྤྲིན་འགྲོ་བ།
རྒྱལ་པོ་མཆོག་གི་སྲས་པོ་ཡིས། འཁྲུག་སར་ཀུ་རུའི་རྒྱལ་པོ་སླེབ། 115

དེ་ཡི་ཤིང་རྟ་གླང་པོ་ཆེ། བཅོམ་ཞིང་རྣམ་བཤིག་བཅག་པས་དེ།
འབྲོས་པས་ཡོངས་སུ་སྐྱོབ་བྱེད་ཅིང་། ཤྲཱི་ན་ཡི་གྲོང་དུ་སོང་། 116

སྟོབས་ལྡན་རྒྱལ་པོ་འདི་སྲས་པོ་དེས། ཤིན་ཏུ་བཟོད་དཀའི་གཡུལ་བཅོམ་ལ།
བློན་པོས་དེ་དཔུངས་བཀོད་པས། ཀླག་མ་ཅན་བཞིན་དགའ་བར་གྱུར། 117

དེ་ནས་དུས་ཀྱི་ཕྱིག་བདག་ཉིད། རྒྱལ་པོ་ཤིན་ཏུ་བཟོད་དཀའ་ཡི།
གྲོང་དུ་ཆད་མེད་སྒོ་ཁ་དང་། ཡམས་ཀྱི་ཉི་བར་འཚེ་བ་བྱུང་། 118

མི་བཟད་གྲོང་རྡལ་རྒྱུད་པ་དག། བསམས་པས་རྗེས་སུ་གདུང་བས་གཟིར།
དགེ་བའི་བྱ་བ་འབྲས་མེད་དེས། ཡོངས་སུ་སྐྱབ་པ་རིག་མ་གྱུར། 119

རྒྱུད་པ་སེལ་བྱེད་དེ་ཡིས་རིས། བློན་པོ་རྣམས་ཀྱིས་དེ་ལ་སྨྲས།
རྒྱལ་པོ་ཆེན་པོ་བཟོད་དཀའ་འདི། སྐྱེ་བོ་གདུང་བ་ཡང་དག་བསྐྱེད། 120

ས་བདག་གཙུག་ན་རིན་ཆེན་གྱིས། ཇོ་བོག་ལ་དེ་གཙུག་གི་ནོར།
བདུད་རྩིའི་བསྟན་རྣམ་སྐྱེད་ན་ནི། དེ་ཡི་རྒྱུད་པ་འདི་ལས་ཐར། 121

मुनिना निर्विकारेण दत्तमादाय मन्त्रिणः ।
राजसूनुं स्वनगरे चक्रुः सैन्यसमुद्यमम् ॥ ११४ ॥

ततः सैन्यसमुत्साह इव राजवरात्मजः ।
सुभटाग्रेसरः प्राप कुरुराजं रणाजिरे ॥ ११५ ॥

स तेन हतविध्वस्तभङ्गस्यन्दनकुञ्जरः ।
पलायनपरित्राणः प्रययौ हस्तिनापुरम् ॥ ११६ ॥

बलिना राजपुत्रेण जिते दुष्प्रसहे युधि ।
मन्त्रिभिस्तद्भुजन्यस्ता भूमिः शेषधृतिं ययौ ॥ ११७ ॥

राज्ञो दुष्प्रसहस्याथ कालेन कलुषात्मनः ।
बभूव वृष्टिदुर्भिक्षमरकोपप्लवः पुरे ॥ ११८ ॥

स विचिन्त्यानुतापार्त्तस्तीव्रां जनपदापदम् ।
न विवेद परित्राणं विफलस्वस्तिकक्रियः ॥ ११९ ॥

पृष्टा विपत्प्रतीकारं तेनामात्यास्तमूचिरे ।
दुःसहोऽयं महाराज प्रजानां व्यसनोद्भवः ॥ १२० ॥

मणिचूड़स्य भूभर्त्तुर्यदि चूड़ामणिः प्रभो ।
लभ्यते स सुधास्यन्दी तेनेयं तीर्य्यते विपत् ॥ १२१ ॥

གངས་ཅན་ངོས་ན་རྒྱལ་པོ་དེ། དབེན་ཞིང་དྲི་བྲལ་བསམ་པ་ཡིས།
འཁོར་བའི་ལས་ནི་ཕྱིར་ཕྱོགས་གནས། བདག་གིས་བྱ་མ་ཏ་ལས་ཐོས། 122

ཀུན་གྱི་ཡིད་བཞིན་ནོར་བུ་དེ། བསླངས་ན་ནོར་བུ་སྦྱིར་བ་ཉིད།
བུ་དང་ཆུང་མ་ལུས་ལ་སོགས། དེ་ཡིས་སྦྱིན་མིན་ཅི་ཡང་མེད། 123

དེ་སྐད་གློན་པོ་འི་ཚིག་ཐོས་ནས། སེམས་ལ་དེ་བཞིན་བརྟན་བྱས་ཏེ།
དེ་ཡི་སློང་ཕྱིར་བྲམ་ཟེ་རྣམས། དེ་ཡི་དྲུང་དུ་བཛངས་པར་གྱུར། 124

སྐབས་འདིར་རྒྱལ་པོ་གཙུག་ན་ནི། ནོར་བུ་ནགས་སུ་རྒྱུ་བ་ཡིས།
ཐུབ་པ་མ་ཧཱི་ཤོའི་གནས་ཀྱིས། ཉེ་འཁོར་ཡངས་པར་ཕྱིན་པར་གྱུར། 125

དེར་ནི་ལྷ་མོ་པདྨ་ལྡན། ཙ་བ་འབྲས་ཟའི་བརྡུལ་ཞུགས་བཟུང་།
མི་མེད་ནགས་སུ་ཐུབ་པ་ཡིས། བསྟན་པ་ལས་ནི་འཇིགས་ཤིང་སོང་། 126

ཇོན་ལ་འགོ་བའི་ཤ་བ་རིས། ཕྱུག་བསྐྱལ་གནས་སྐབས་བསྟེན་པ་མཐོང་།
འཇོན་པར་འདོད་པས་འདར་གྱུར་ཅིང་། སྐྱིང་རྗེ་རྗེ་སྐད་ཚེ་ངེས་བདབ། 127

ཀྱེ་རུད་རྒྱལ་པོ་གཙུག་ན་ནོར། ཞེས་དང་སྐྱབས་ཞེས་མི་བཟོད་པ།
བུ་ནི་ཀུ་ར་རི་སྐོགས་བཞིན། སྐྱིང་རྗེར་ཚེ་ངེས་གྲགས་པ་ཐོས། 128

མི་བདག་རྒྱགས་པའི་འཕྲལ་ལ་ནི། རང་གི་མཛེས་མ་མཐོང་གྱུར་ཏེ།
ཟླ་བ་སྒྲ་གཅན་གྱིས་སྒག་པ། འོད་ནི་རྣམ་པར་ཉམས་པ་བཞིན། 129

चारेभ्यः श्रुतमस्माभिः स राजा हिमवत्तटे ।
स्थितः संसारवैमुख्यः विवेकविमलाशयः ॥ १२२ ॥

अर्थितः स ददात्येव विश्वचिन्तामणिर्मणिम् ।
पुत्रदारशरीरादि न देयं तस्य किञ्चन ॥ १२३ ॥

इति मन्त्रिवचः श्रुत्वा तथेत्यवधार्य्य चेतसि ।
स द्विजान् मणियाञ्चायै विससर्ज्ज तदन्तिकम् ॥ १२४ ॥

अस्मिन्नवसरे राजा मणिचूड़श्चरन् वने ।
मरीचेराश्रमोपान्तमवाप विपुलं मुनेः ॥ १२५ ॥

देवी पद्मावती तत्र फलमूलधृतव्रता ।
व्रजन्ती विजने भीता विपिने मुनिशासनात् ॥ १२६ ॥

शबरैर्मृगयायातैर्दृष्टा कष्टदशां श्रिता ।
जिघृक्षुभिः कम्पमाना चुक्रोश करुणस्वरम् ॥ १२७ ॥

आकर्ण्य करुणाक्रन्दं कुरलीकूजितोपमम् ।
हा राजन् मणिचूड़ेति त्रायस्वेति सुदुःसहम्[1] ॥ १२८ ॥

सहसाभिद्रुतः कान्तां[2] ददर्श नृपतिर्निजाम् ।
राहुसन्त्रासितस्येन्दोर्द्युतिं निपतितामिव ॥ १२९ ॥

१ Orig. स्दुःसहम् ।   २ Orig. सहसाभद्रुतकान्ताम् ।

ཆགས་བྲལ་ལུས་ཀྱི་གོས་འཛིན་ཅིང་། མིག་སྨན་ཡོངས་སུ་འཛིན་དང་བྲལ།
རྫོགས་པའི་ལོངས་སྤྱོད་ཀུན་སྤྱོར་རྣམས། མི་རྟག་ཉིད་དུ་སྨྲ་བ་བཞིན། 130

རྒྱལ་པོ་ངང་པ་བདེ་བར་གཤེགས། ཉ་མའི་དཀྱིལ་འཁོར་རྣམ་པར་གནས།
འདྲེན་བྱེད་མཆེ་མའི་ཏུར་སྒྲིག་ཅན། སྙིང་རྗེའི་ས་དེ་རྣམ་གཟིགས་ནས། 131

འཁོར་བའི་སྤྱོད་པ་ངོ་མཚར་ཅན། རྣམ་པར་སྤྱོད་ལ་སྨྲ་གྱུར་ཀྱང་།
ས་བདག་ཡིད་ནི་བརྩེ་བ་ཡི། ཆུ་གྲིས་ངེས་པར་བཅད་པ་བཞིན། 132

ལྷ་མོ་མགོན་མེད་ལྷ་བུ་ཡིས། ནགས་སུ་མགོན་པོ་གཅིག་པུ་ཉིད།
འཇིག་རྟེན་མགོན་པོ་དེ་ལྟར་སོང་། གདུགས་དང་རྔ་ཡབ་བྲལ་མཐོང་ནས། 133

དེ་བྲལ་དུག་གིས་ཟིན་པ་དང་། དེ་མཐོང་ཉམས་དགའ་རྒྱས་པ་དག།
སྒྲ་ངན་དགའ་བ་ཡང་དག་རྫོགས། སྒྱུར་དུ་རྣམ་པར་འཁྲུགས་པར་གྱུར། 134

རྒྱལ་པོ་ཞི་བཀྲིས་ཤ་བ་རི། དམོད་པས་འཇིགས་ནས་རབ་ཏུ་བྲོས།
ཉི་མ་མངོན་པར་འཆར་བ་ཡིས། མཐུ་ལྡན་སྤྲུན་པ་དམར་གྱུར་མཐོང་། 135

བར་འདིར་ཞི་ལ་སྣང་བའི་བདུད། འབྱུང་པོ་ཀུན་གྱི་བསམ་པར་གནས།
སྐྱེས་བུའི་གཟུགས་ཀྱིས་ཡང་དག་འོངས། མི་བདག་ལ་ནི་སྨྲས་པར་གྱུར། 136

རྒྱལ་པོ་ཆུ་སྐྱེས་སྤྱན་ལྡན་དག། མི་མེད་ནགས་སུ་དགའ་མ་ནི།
ཕྲེང་ལྡན་མིག་ཅན་མཉེས་གཤེན་མ། འདི་ནི་གཏང་བར་མི་འོས་སོ། 137

वीतरागाङ्गवसनां निरञ्जनपरिग्रहाम् ।
वदन्तीमिव सम्भोगसंयोगानामनित्यताम् ॥ १३० ॥

तां राजहंससुगतां विहारस्तनमण्डलाम् ।
अश्रुकाषायनयनां विलोक्य करुणावनीम् ॥ १३१ ॥

संसारचरिताश्चर्य्यविचारेष्वपि कर्कशम् ।
कृपाकृपाणीनिर्लूनमिवासीद् भूपतेर्मनः ॥ १३२ ॥

एकाकीनं वने देवी विगतच्छत्रचामरम् ।
दृष्ट्वा नाथमनाथेव लोकनाथं तथागतम् ॥ १३३ ॥

तद्वियोगविषाक्रान्ता तद्दर्शनरसाकुला ।
शोकहर्षसमाकीर्णा बभूव भृशविह्वला ॥ १३४ ॥

सा नीता शवरा राज्ञा शापभीताः प्रदुद्रुवुः ।
न नामाभ्युदये भानोर्दृष्टं सप्रतिभं तमः ॥ १३५ ॥

अत्रान्तरे शमद्वेषी सर्व्वभूताशयाशयः ।
मारः पुरुषरूपेण समेत्य नृपमब्रवीत् ॥ १३६ ॥

राजन् राजीवनयनां प्रियां प्रणयिणीमिमाम् ।
न त्यक्तुमर्हस्यजने वने वनजलोचन ॥ १३७ ॥

རྒྱལ་སྲིད་ལོངས་སྤྱོད་ཀྱིས་སྤྲངས་ནས། ངེས་པར་བདེ་མེད་གྱུར་པ་འདི།
ཁྱོད་ཀྱི་ཡིད་ཀྱི་སྤྱོད་ཚུལ་བཞིན། རྒྱལ་པོའི་རྒྱལ་པོ་མི་མཛེས་སོ། 138

དེ་དག་གྲོས་ཤིང་དབེན་པ་ཡིས། བར་དུ་གཅོད་བྱེད་ཡོད་གྱུར་དུ།
རྣམ་པར་ཤེས་དེ་མི་བདག་གིས། འཛུམ་བཅས་དེ་ལ་ལན་སྨྲས་པ། 139

དུལ་ལ་ཞི་བ་མི་འདོད་པའི། འདོད་པ་ཁྱོད་ནི་བདག་གིས་ཤེས།
རབ་ཏུ་སེམས་པར་འདོད་པ་རྣམས། སུ་ཞིག་ཁྱོད་ཀྱིས་ནམ་ནི་སྨིངས། 140

ས་སྐྱོང་དེ་རྣམ་བཟོད་པ་ཡིས། འཕྲུལ་ལ་འདོད་པ་མི་སྣང་གྱུར།
འབྲལ་བའི་མི་ཡིས་གཞུངས་པ་ཡིས། ལྷ་མོ་ཤིན་ཏུ་རྣམ་པར་འཁྲུགས། 141

ཡིད་འབྱུང་ལས་རྒྱལ་རྒྱལ་པོ་ཡི། བཙུན་མོ་བདག་གི་ལོངས་སྤྱོད་བྲལ།
སྡུག་བསྔལ་མི་འདོད་སྡུག་བསྔལ་ལྡན། དེ་ལ་དབྱུགས་ནི་འབྱིན་ཞིང་སྨྲས། 142

ལྷ་མོ་ཚེས་ནི་བྱ་བར་རིགས། ཤུ་ངར་བྱ་བར་མི་འོས་སོ།
བདེ་བས་རྣམ་པར་བསྒྲུབ་པ་ཡིས། རོ་བྲལ་མཇུག་ནི་སྡུག་བསྔལ་ཡིན། 143

ལུས་ཅན་ཚེ་ནི་རྒྱུག་ཆུ་འདྲ། གཡོ་བ་རྣམས་ཀྱི་སྙིང་སྡུག་གྲོགས།
པདྨ་གཡོ་བའི་འདབ་ཅེ་ན། འབྱིང་བའི་ཆུ་ཐིགས་ལྟ་བུ་ཡིན། 144

དཔལ་འདི་ཡུད་ཙམ་གར་མཁན་དང་། དུས་ཀྱི་སྒྲིན་གློག་འཁྱུག་པ་དང་།
འཁོར་བའི་སྒྲུབ་ཀྱི་རོ་འཛིན་ནི། རྣམ་པར་ཅི་བཞིན་རབ་ཏུ་གཡོ། 145

इयं हि ते मनोवृत्तेरिव न सुखतां गता ।
वर्ज्जिता राज्यभोगेन राजराज न राजते ॥ १३८ ॥

एतदाकर्ण्य नृपतिस्तं विज्ञाय मनोभवम् ।
अन्तरायं विवेकस्य प्रत्यभाषत सस्मितः ॥ १३९ ॥

जानामि त्वामहं काममकामं शमसंयमे ।
सन्तोषवतां को नाम भवता न विमोहितः ॥ १४० ॥

इति वादिनि भूपाले सहसान्तरिते स्मरे ।
बभूव विह्वला देवी तप्ता विरहवह्निना ॥ १४१ ॥

दुःखितां तामार्त्तदुःखां पतिभोगवियोगिनीम् ।
उवाचाश्वासयन् राजा जायां जितमनोभवः ॥ १४२ ॥

देवी धर्म्मक्रियायुक्ता न शोकं कर्त्तुमर्हसि ।
दुःखावसानो विरसः सर्व्वोऽयं भोगविभ्रमः ॥ १४३ ॥

देहिनां दयितासङ्गास्तरङ्गतरलायुषाम् ।
लोलपद्मपलाशाग्रस्खलज्जललवाकुलाः ॥ १४४ ॥

इमा मुहूर्त्तनर्त्तक्यः कालमेघतडिल्लताः ।
संसारसर्परसना विलासचपलाः श्रियः ॥ १४५ ॥

ལོངས་སྤྱོད་སྐད་ཅིག་ཁོ་ནས་འབྲལ་བའི་ནང་།
འགྱུར་བ་མི་ལམ་བག་མ་ལེན་དང་མཚུངས།
བདེ་བའི་དཔལ་ནི་རླུང་བསྒྱུར་མར་མེའི་རྩེ།
སྲིད་པའི་སྤྱོད་ཚུལ་འདི་དག་སྒྱུར་པའི་གར། 146

སྙིང་རྗེ་ཀུན་གྱི་བསྟེན་བྱ་དཔལ་འབྱོར་མིན།
དམ་ཆོས་རྟག་ཏུ་གསལ་བྱེད་མར་མེ་མིན།
གྲགས་སྙན་རྣམས་ཀྱིས་དགའ་ལྡན་ན་ཚུང་མིན།
བསོད་ནམས་དག་ནི་བརྟན་ལྡན་འཚོ་བ་མིན། 147

བདེན་པའི་བཏུལ་ཞུགས་ཀྱིས་ནི་དེ་ལ་དེ་སྐད་གདམས།
དྲང་སྲོང་ཆེན་པོའི་འདུལ་བ་བཙུན་མོ་རྣམས་བདང་ནས།
འཁོར་བ་ལས་ནི་ཕྱིར་ཕྱོགས་རྣམས་ཀྱི་དཀའ་ཐུབ་ནགས།
ཡང་དག་བསྐིལ་བྱེད་བསོད་ནམས་ལྡན་པར་རྒྱུ་ཞིང་སོང་། 148

རྒྱལ་པོ་ཤིན་ཏུ་བཟོད་དཀས་སྒྱུར་བར་གཉིས་སྐྱེས་ལྷ།
རྣམ་པར་བདང་ཞིང་དེ་བཞིན་སོང་བས་དེས།
རྣམ་དག་སྙིང་སྟོབས་སྐྱོང་བ་རྣམས་ཀྱི་ནི།
དུས་མེད་གཉེན་གཅིག་པོ་དེ་ནགས་མཐར་མཐོང་། 149

भोगक्षणो नैव वियोगरोगः ।
विभूतयः स्वप्नविवाहतुल्याः ।
वाताहता दीपशिखा सुखश्री-
रुन्मत्तनृत्यं[1] भववृत्तमेतत् ॥ १४६ ॥

सर्व्वोपजीव्या करुणा न लक्ष्मीः
धर्म्मः प्रकाशः सततं न दीपाः[2] ।
यशांसि रम्याणि न यौवनानि
स्थिराणि पुण्यानि न जीवितानि ॥ १४७ ॥

सत्यव्रतस्तामिति सान्त्वयित्वा
विसृज्य जाया निलयं महर्षेः ।
चचार संसारपराङ्मुखानाम्
सन्तोषपुण्येषु तपोवनेषु ॥ १४८ ॥

तथागतास्ते त्वरया विसृष्टाः
पञ्च द्विजा दुष्प्रसहेन राज्ञा ।
तमर्थिनामेकमकालबन्धुम्
विशुद्धसत्त्वं ददृशुर्वनान्ते ॥ १४९ ॥

१ Orig. सुखश्रीत्युन्मत्तनृत्यं । २ Orig. लक्ष्मी सद्धर्म्मप्रकाशः सततनदीपाः ।

འཇིགས་ནས་བརྟན་པ་རྣམ་པར་བདང་བ་བཞིན།
དེ་དག་གིས་ནི་སྒྲ་བསྒྲུངས་ཤིས་བརྗོད་བསྒྲུབས།
ཞུགས་རིང་རིང་ཞིང་རྟེ་བའི་རྒྱུང་དག་གིས།
མི་བཟད་གདུང་བ་བསལ་བྱེད་དེ་ལ་སྨྲས། 150

རྒྱལ་པོ་ཤིན་དུ་བཟོད་དཀའི་གྲོང་ཁྱེར་དུ།
རྒྱལ་པོ་དྲག་པོའི་ཉེར་འཚོས་དགེ་ཚོགས་བཅོམ།
སྐྱེ་བོའི་འདོད་པ་མཐའ་དག་ཆད་པར་གྱུས།
རབ་འདོད་གཟིར་བའི་སྒྲ་ཙམ་ལྷག་མར་གྱུར། 151

སྐྱོན་རྣམས་མ་ལུས་ཞི་བའི་རྒྱུ་གཅིག་པུ།
འཇིག་རྟེན་གསུམ་བསྐྱུང་གྲགས་པའི་མཐུ་ལྡན་པ།
གཙུག་གི་ནོར་བུ་ཀླུ་ཁྱོད་གནང་བ་ན།
དེ་ཡིས་ཉེ་བར་འཚེ་རྣམས་ཞི་བར་བགྱིད། 152

བརྩེ་ནས་བསྟེན་པ་ཙན་དུ་ཡལ་འདབ་བརྙན་པ་དང་།
ཏྲི་མེད་བསམ་པ་ཟླ་བའི་ནོར་བུ་རབ་གསལ་བ།
ཁྱོད་ཉིད་ལྷ་བུ་ཡོངས་སུ་གདུང་བའི་དུས་སུ་ནི།
སྲིད་པར་སྐྱེ་བོ་རྣམས་ཀྱི་སྐྱབས་སུ་འགྱུར་བ་ཡིན། 153

ते स्वस्तिवादं शनकैर्विधाय
विस्रस्तधैर्य्या इव साध्वसेन ।
तमूचिरे सूचिततीव्रतापाः
दीर्घोष्णनिश्वाससमीरणेन ॥ १५० ॥

राजन् पुरे दुष्प्रसहस्य राज्ञः
क्रूरोपसर्गैर्हतशान्तवर्गः ।
जनः कृतः कृत्तसमस्तकामः
प्रकाममार्त्तस्वनमात्रशेषः ॥ १५१ ॥

अशेषदोषप्रशमैकहेतुः
त्रैलोक्यरक्षाप्रथितप्रभावः ।
चूड़ामणिर्देव भवद्वितीर्णः
करोति तस्योपनिपातशान्तिम् ॥ १५२ ॥

दयायुषश्चन्दनपल्लवार्द्राः
स्वच्छाशयाश्चन्द्रमणिप्रकाशाः ।
सन्तापकाले शरणं जनानाम्
भवद्विधा एव भवे भवन्ति ॥ १५३ ॥

དེ་དག་གིས་ནི་དེ་སྐད་བསྒྲངས་ལ་སྙིང་སྟོབས་ཉམས།
ཉམས་པར་མ་བྲི་སྙིང་རྗེའི་རོ་ཡིས་ཡང་དག་ཁེངས།
གྲོས་པའི་ལམ་ནས་སྐྱེ་བོའི་ཉེ་བར་གདུང་བ་དག།
གོང་དུ་ཡང་དག་ཞུགས་བཞིན་ལེགས་པར་བསམས་ནས་སྨྲས། 154

ཀྱེ་མ་ཨ་ལ་ཉེ་བར་འཛོམས་པའི་ལམ་ཀྱིས་ནི།
ངེས་པར་གཟིར་བའི་སྐྱེ་རྒུ་བྲལ་བའི་སྡུག་བསྔལ་ལས།
རབ་སྐྱེས་ཚེ་ངའི་སྙ་ནི་ནང་གི་བྲིད་པ་དག།
ངེས་པར་འཛོམས་པ་རྒྱལ་པོ་དེས་ནི་ཇི་ལྟར་བཟོད། 155

བདག་གི་མགོ་ཡི་རྩ་བ་ལས་སྐྱེས་ནོར་བུ་འདི།
སྐུར་དུ་ངེས་པར་ཚོད་ལ་རབ་ཏུ་བཟུང་བར་གྱིས།
གལ་ཏེ་སྐྱེ་བོ་སྐྱོང་བའི་སྡུག་བསྔལ་འཛད་པ་ཡི།
རྒྱུ་ཉིད་དུ་ནི་སྐད་ཅིག་བདག་འགྲོ་བདག་ལེགས་སོ། 156

ནོར་འཛིན་བདག་པོས་དེ་སྐད་སྨྲས་ཙམ་ལ།
ས་འཛིན་རྒྱ་གཉེར་དང་བཅས་འཛིན་མ་ནི།
དེ་ཡི་སྐྱེ་བོ་འགེམས་པའི་སྡུག་བསྔལ་དག།
དྲག་པོས་འཇིགས་པ་བཞིན་དུ་རིང་ཞིང་འདར། 157

इत्यर्थितस्तैरविलुप्तसत्त्वः
संपूर्य्यमाणः करुणारसेन ।
उवाच सञ्चिन्त्य जनोपतापम्
संक्रान्तमन्तः श्रुतिवर्त्मनेव ॥ १५४ ॥

अहो स राजा सहते कथं न
दैवोपघातेन निपीड़ितानाम् ॥
निदारितान्तःकरणं प्रजानाम्
वियोगदुःखोद्भवमार्त्तनादम् ॥ १५५ ॥

अयं मणिर्मस्तकमूलजन्मा
निष्कृत्य तूर्णं प्रतिगृह्यतां मे ।
धन्योऽस्मि यद्यर्थिजनस्य दुःख-
क्षये क्षणकारणतां व्रजामि ॥ १५६ ॥

इत्युच्यमाने वसुधाधिपेन
धराधराम्बोधिमहीधरित्री ।
चिरं चकम्पे चकितेव तस्य
शिरस्तटोत्पाटनतीव्रदुःखात् ॥ १५७ ॥

དེ་འོག་མི་བདག་ཐུགས་སྤྲོད་བརྩེ་བ་ཡིས།
མཆེན་པའི་གསུང་གིས་རབ་རྣོ་མཚོན་པས་ཀྱང་།
རྣོ་བའི་སེམས་ལྡན་དེ་རྣམས་མཚོན་རྣོན་གྱིས།
རང་ཉིད་སྐྱེ་བོ་འགེམས་ལ་རབ་ཏུ་ཞུགས། 158

རིག་འཛིན་གྲུབ་པ་སྒྲུབ་བཅས་ལྷ་རྣམས་ནི།
པདྨའི་སྔོན་སོགས་མཁའ་ཡི་གཞལ་ཡས་ནས།
མི་དབང་དེ་ཡི་དཀའ་སྤྱོད་མཛད་པ་ལ།
སྙིང་སྟོབས་མ་ཞུམ་བལྟ་ཕྱིར་ཡང་དག་འོངས། 159

འཕྲུལ་ལ་སྐྱེ་བོ་རྣམ་པར་བཀས་པ་ཡིས།
རིན་ཆེན་འོད་དུ་རྣམ་པར་འཕྲུལ་འཛིན་པའི།
ཁྲག་གི་རྒྱུན་གྱིས་མདོན་གཏེར་ལུས་ཅན་དེ།
སྐྱོང་བའི་བདེ་ལ་རབ་ཞུགས་གདུང་བ་བཟོད། 160

སྡུག་བསྔལ་དྲག་པོའི་ཤུགས་ཀྱིས་མིག་ཟླུམ་ཞིང་།
བརྟན་པའི་སྙིང་སྟོབས་ཀྱིས་བཅིངས་དེ་མཐོང་སྟེ།
སྐད་ཅིག་སྨིན་པོ་ཉིད་ནི་ཐོབ་པ་བཞིན།
གདུམ་སྤྱོད་བྲམ་ཟེ་དགའ་དང་བྲལ་མི་གྱུར། 161

ततः कृपाकोमलचित्तवृत्तैः
सुतीक्ष्णशस्त्रैर्वचसा नृपस्य ।
सुतीक्ष्णशस्त्रादपि तीक्ष्णचित्तः
स्वयं शिरः पाटयितुं प्रवृत्तः ॥ १५८ ॥

तद्दुष्करं कर्म्म नरेश्वरस्य
व्योम्नि विमानैर्नलिनासनाद्याः ।
सुराः सविद्याधरसिद्धसाध्याः
समाययुर्द्रष्टुमलुप्तसत्त्वम् ॥ १५९ ॥

विपाद्यमाने शिरसि प्रसह्य
रत्नप्रभाविभ्रममादधानैः ।
स रक्तपूरैरभिषिक्तकायः
सेहे व्यथामर्थिसुखे प्रवृत्तः ॥ १६० ॥

विलोक्य तं सत्त्वनिबद्धधैर्य्यम्
तीव्रव्यथावेगनिमीलिताक्षम् ।
ययुर्विरामं न नृशंसवृत्तैः
विप्राः क्षणं राक्षसतामवाप्ताः ॥ १६१ ॥

རྒྱལ་པོས་རང་ལུས་སྡུག་བསྔལ་རྣམ་དཔྱད་པས།
འཁོར་བ་པ་རྣམས་ཉོན་མོངས་རང་བཞིན་ལུས།
རྣམ་པ་འདི་ལྟའི་སྡུག་བསྔལ་སྟོང་འབྱུང་གི།
ཟིལ་གྱིས་མནན་ཅེས་རབ་ཏུ་གདུང་བར་གྱུར། 162

རེས་བསམས་ལུས་བཅིངས་རིན་ཅེན་ཁྲིན་པ་ལས།
བསོད་ནམས་འབྲས་བུ་བདག་གིས་གང་ཐོབ་དེས།
བསོད་ནམས་མིན་སྨིན་དམྱལ་བར་མི་རྣམས་ཀྱི།
དྲག་པོའི་སྡུག་བསྔལ་ཆ་ཡང་མེད་པར་གྱུར། 163

ཁྲག་དང་ཞག་གིས་ངེས་བྲན་ནོར་བུ་དེ།
གཡོ་མེད་འཚོག་མའི་རྩ་བ་ལས་བརྟེན་པའི།
བརྒྱལ་བས་འཁྲུགས་ཀུང་སྐྱོང་པའི་རི་བ་དག།
ཡོངས་སུ་རྫོགས་པས་དེ་ནི་རབ་དགར་གྱུར། 164

གཉིས་སྐྱེས་རྣམས་ལ་རང་གི་ལག་སོར་གྱི།
ཡལ་འདབ་འདར་བཞིན་ནོར་བུ་ཕྱིན་ནས་དེ།
ཡང་དག་སྤུན་པས་འཇིག་རྟེན་འཛུམ་ཕྱེད་ཅིང་།
ཚ་ཟེར་ཅན་བཞིན་ཤིན་ཏུ་དམར་བར་སྣང་། 165

विचार्य्य राजा स्वशरीरदुःखम्
संसारिणां क्लेशमयं शरीरम् ।
एवम्विधैर्दुःखसहस्रलक्षै-
राक्रान्तमित्यार्त्ततरो बभूव ॥ १६२ ॥

सोऽचिन्तयद्देहनिबद्धरत्न-
दानेन यत्पुण्यफलं मयाप्तम् ।
तेनोग्रदुःखं कलयामि माभूत्
अपुण्यपाके नरके नराणाम् ॥ १६३ ॥

समुद्धृते रक्तवसावसिक्ते
तस्मिन्मणौ निश्चलतालुमूलात् ।
मूर्च्छाकुलोऽपि प्रययौ सहर्षः
सम्पूरणेनार्थिमनोरथेन ॥ १६४ ॥

स कम्पमानाङ्घ्रिपल्लवेन
दत्त्वा स्वहस्तेन मणिं द्विजेभ्यः ।
निमीलयन् सन्तमसेन लोकम्
पपात तिग्मांशुरिवातिरक्तः ॥ १६५ ॥

ལྷ་རྣམས་མེ་ཏོག་ཆར་དང་ལྷན་ཅིག་ཏུ།
སྙིང་སྟོབས་བྲི་བ་མེད་པའི་ས་དེར་ལྷུང་།
གཉིས་སྐྱེས་དེ་རྣམས་ནོར་བུ་ཡང་དག་བླངས།
རྒྱལ་པོ་ཤིན་ཏུ་བཟོད་དཀའི་གྲོང་ཁྱེར་སོང་། 166

དེ་ཡི་འཕྲུལ་ལ་ཉེ་བར་འཚོ་རྣམས་ནི།
མཐོ་རིས་འདོད་པའི་ལོངས་སྤྱོད་ཚོགས་རྣམས་ཐོབ།
སེམས་ཅན་མཐར་དག་ཡང་དག་སྒྲོལ་འདོད་པ།
བྱང་ཆུབ་སེམས་དེའི་སྙིང་སྟོབས་དེ་ཡིས་བསྔགས། 167

སྐབས་འདིར་མི་དབང་འདུ་ཤེས་ཆུང་ཟད་ཐོབ།
ཁྲི་ཀྲུའི་བུ་དང་གཙུ་ད་མ་སོགས།
མ་རཱི་ཙི་སོགས་ཐུབ་པ་ནགས་ཚལ་ལས།
རིན་ཅེན་བྱིན་པ་ཐོས་ནས་ཡང་དག་འོངས། 168

ལྷ་མོ་པད་ལྡན་མ་རཱི་ཙི་ཉིད་ཀྱིས།
རྗེས་བཞིན་སོང་བས་ཡོངས་བརྟག་དེ་མཐོང་ནས།
ཀུན་སློངས་ཤུགས་ཀྱིས་མངོན་བཅོས་ས་ལ་ནི།
འཁྲི་ཤིང་གཞོན་ནུ་བ་ཅན་བཞིན་སྐད་ཅིག་འཁྱིལ། 169

अलुप्तसत्त्वे पतिते पृथिव्याम्
तस्मिन् सुराणां सह पुष्पवर्षैः ।
मणिं समादाय ययुर्दिशास्ते
तूर्णं पुरं दुष्प्रसहस्य राज्ञः ॥ १६६ ॥

स तेन सद्यः शमितोपसर्गः
स्वर्गोचितास्वादितभोगवर्गः ।
तद्बोधिसत्त्वस्य समस्तसत्त्व-
सन्तारणार्हं प्रशशंस सत्त्वम् ॥ १६७ ॥

अत्रान्तरे किञ्चिदवाप्तसंज्ञम्
नरेश्वरं विस्रुतरक्तदानम् ।
समाययुर्भार्गवगौतमाद्याः
मरीचिमुख्या मुनयो वनेभ्यः ॥ १६८ ॥

मरीचिमेवानुगता च देवी
पद्मावती वीक्ष्य परिक्षतं तम् ।
सम्मोहवेगाभिहता पपात
क्षणं क्षितौ वाल्लतेव लूना ॥ १६९ ॥

དེ་ནས་མཁའ་ལ་རྒྱུ་བའི་ལྷ་རྣམས་ཀྱི།
མི་བདག་ལེགས་བརྗོད་ཕྱོགས་མཐར་རྒྱུ་བའི་ཚེ།
རྒྱལ་པོ་འི་སྲས་དེ་གླིང་དང་ལྷན་ཅིག་ཏུ།
སྤྱི་རྒྱུ་སྤྱི་རྒྱུའི་མགོན་ཅན་ཉེ་བར་སོང་། 170

ཁྲག་གིས་ལུས་བགོས་སྙིང་སྟོབས་མ་ཟད་ཅིང་།
ས་ཡི་དབང་པོ་ས་ལ་འགྱེལ་མཐོང་ནས།
ཉོན་མོངས་བདུང་བ་ཆེ་ལྡན་སྐྱེ་བོ་རྣམས།
ཡང་ངག་མིན་དོན་རྣམ་རྟོག་བརྗོད་པར་གྱུར། 171

རང་དོན་ལ་ཆགས་མངོན་སྦྱོར་བདག་ཉིད་ངན།
ཤིང་གཅོད་འགའ་ཡིས་སྙིང་རྗེས་བརླན་ལྡན་ཞིང་།
སྐྱོང་ཀུན་གྱིས་བསྟེན་དྲང་ཞིང་ལེགས་སྤྱོད་པའི།
ཀྱེ་མ་ཉམ་ངར་གྲིབ་བསིལ་ཤིང་འདི་བཅད། 172

ཀྱེ་མ་ཕ་རོལ་དོན་དུ་སྲོག་གཏོང་འདི།
ས་ཅིག་ཏུ་ངོ་མཚར་གནས་སྐབས་ངག་ཏུ་སོང་།
ཤིན་དུ་དྲི་བཟང་རང་གི་ལུས་གཅོད་པ།
ཡིད་འོང་ཤིང་ནི་ས་ཏ་ཀ་ར་ཉིད། 173

दिगन्तसञ्चारिणि चारणानाम्
नभश्चराणां नृपसाधुवादे ।
सराजपुत्राः सह मन्त्रिमुख्यैः
प्रजाः प्रजानाथमथोपजग्मुः ॥ १७० ॥

वीक्ष्य क्षितीशं क्षतजोक्षिताङ्ग-
मक्षीणसत्त्वं पतितं पृथिव्याम् ।
पृथुव्यथाक्लेशयुषं जनाना-
मभूदभूतार्थविकल्पजल्पः ॥ १७१ ॥

कुठारिकैः कैश्चिदहो दयार्द्रः
सर्व्वार्थिसेव्यः सरलः सुवृत्तः ।
दुरात्मभिः सार्थलवाभियुक्तैः
छायातरुः कष्टमयं निकृत्तः ॥ १७२ ॥

अहो परार्थोज्झितजीवितोऽयम्
परां चमत्कारदशां प्रयातः ।
ससौरभच्छिन्नतनुर्गतात्मा
भवत्युदारः सहकार एव ॥ १७३ ॥

27418

བཀམ་ཆགས་སྒྲོག་ཆགས་རང་གི་ཡིན་ཡང་རང་།
མ་ཡིན་འདོད་པའི་འདོད་པ་ཉེར་ངོར་མིན།
སེམས་ཅན་ཀུན་ལ་ཕན་བརྩོན་བདག་ཉིད་ཅན།
བརྩེ་ལྡན་དེ་ཡི་ལུས་ཀྱང་ཆགས་གནས་མིན། 174

གང་དོན་སྤྱོང་སྤྱི་འདི་ནི་སྤྱོང་བའི་དངོས།
ཀུན་དོན་གཅེར་ལ་ཞུམ་པར་རབ་འགྲོ་བ།
ཞུམ་པ་འདོན་པའི་བརྟུལ་ཞུགས་ཅན་གྱི་སྒྲོག
དེ་ཉིད་ཡོངས་སུ་སྐྱོབ་ཟིང་རྩ་ལྷ་ཡིན། 175

དེ་སྐད་རབ་བརྗོད་ནུས་མང་མཐུ་ཡིས་ནི།
ཐུབ་པའི་དཀྱིལ་འཁོར་རྣམ་པར་འཕེལ་བའི་ཚེ།
མ་ནྲི་ཙེ་ཐུབ་མཆི་མར་བཅས་པའི་སྤྲིན།
ཆགས་པས་ས་སྐྱོང་ལ་ནི་མངོན་ཕྱོགས་སྒྲུས། 176

ཀྱེ་ས་མ་ལ་རྒྱལ་པོའི་སྐྱེ་རྒུ་རྣམས།
ཡོངས་སྐྱོབ་གཏེར་གྱི་ས་གཞི་འགྲོ་བ་ཡིས།
རྒྱུ་མེད་གཅེན་གྱི་དངོས་པོར་བསྟེན་བྱས་ནས།
ཁྲོད་ཀྱི་བརྩེ་བས་ལུས་འདི་རྩྭ་བཞིན་བྱིན། 177

लुब्धस्य न स्वः स्वजनोऽपि जन्तोः
न कामकामस्य धनेऽनुरोधः ।
सर्व्वात्मना सत्त्वहितोद्यतस्य
देहोऽपि न स्नेहपदं दयालोः ॥ १७४ ॥

येषां कृते दैन्यमयं प्रयाति
सर्व्वात्मना चार्थिजनोऽर्थिभावम् ।
त एव दीनोद्धरणव्रतानाम्
प्राणाः परित्राणपणे तृणानि ॥ १७५ ॥

इति प्रवादे विविधानुभावे
विजृम्भमाणे मुनिमण्डलस्य ।
भूपालमभ्येत्य सवाष्पचक्षुः
मुनिर्मरीचिः प्रणयादुवाच ॥ १७६ ॥

अहो नु निष्कारणबन्धुभाव-
मालम्ब्य राजन् दयया जनस्य ।
प्रजापरित्राणविधानभूमिः
तनुस्तवेयं तृणवद् वितीर्णा ॥ १७७ ॥

སྐྱོང་བའི་གཉེན་ཁྱེད་རང་ཉིད་སྐྱོག་ལ་ཡང་།
ལྟོས་པའི་སྤྱོད་ཚུལ་ཟད་པར་ངེས་རབ་ཞུགས།
གང་ཞིག་དཔལ་འབྱོར་གནས་ཀྱི་ལུས་འདི་ནི།
ཁྱོད་ཀྱིས་གནོང་པའི་གནས་སུ་ཡང་དག་སྒྱུར། 178

རྒྱལ་པོ་ལེགས་བྱས་བརྟུལ་ཞུགས་བསོད་ནམས་ཀྱི།
ཟོང་འདི་ལས་ཀྱང་འབྲས་འགའ་བཞེད་ལས་རྡང་།
སྐྱོང་བའི་རྒྱུས་ཀྱང་ཁྱོད་ཀྱི་མཆོག་མ་ཕྱེ།
སྐྱེ་ལས་ཐུགས་ཀྱི་རྣམ་འགྱུར་མ་བསྟེན་ནམ། 179

ཐུབ་དབང་དབུས་སུ་ཐུབ་པས་དེ་སྐད་དུ།
རྨད་བྱུང་མཚར་བའི་ཡིད་ཀྱིས་དྲིས་པ་དེས།
འབད་པས་ངལ་དུབ་བཟོད་བྱས་ཁྲག་གིས་ནི།
མངོན་པར་སྒྲགས་པའི་བཞིན་རས་ཕྱིས་ནས་སྨྲས། 180

ཐུབ་པ་བདག་ལ་འབྲས་འདོད་གཞན་མ་མཆིས།
འོན་ཀྱང་མངོན་འདོད་གཅིག་ཉིད་ར་བ་དུ་མང་།
གང་ཞིག་སྐྱོག་ཆགས་འཛིགས་རྩུང་འཁོར་བར་ཕྱིང་།
སྒྲོལ་བྱེད་ཉིད་དུ་སྲིད་པར་བདག་གྱུར་ཅིག། 181

स्वयः प्रवृत्तो निरपेक्षवृत्ते-
स्तवार्थिबन्धोर्निजजीवितेऽपि ।
यद्येष कामं कमलानिकायः
कायस्त्वयापायपदे नियुक्तः ॥ १७८ ॥

अप्यस्ति राजन् सुकृतव्रतेऽस्मिन्
फलस्पृहा प्राणपणेऽपि काचित् ।
अस्यार्थिहेतोस्तव तालुभेद-
खेदाद् विकारं भजते न चेतः ॥ १७९ ॥

इत्यद्भुताविष्कृतमानसेन
मुनीन्द्रमध्ये मुनिना स पृष्टः ।
उवाच संस्तभ्य रुजं प्रयत्नाद्
रक्ताभिषिक्तं वदनं प्रमृज्य ॥ १८० ॥

फलस्पृहा नास्ति मुने ममान्या
किन्त्वेक एव प्रचुरोऽभिलाषः ।
यद्घोरसंसारनिमग्नजन्तु-
सन्तारणायैव भवे भवेयम् ॥ १८१ ॥

སྨོང་བ་དགའ་བར་ལུས་ནི་རྣམ་བཅོམ་འདིར།
རྣམ་འགྱུར་ཆ་ཤས་གང་ཡང་མེད་པ་ཉིད།
གལ་དེ་ངེས་བརྗོད་དམ་ཚིག་འདི་བདེན་ན།
དེ་ཡི་ལུས་འདི་རྣལ་དུ་གནས་གྱུར་ཅིག། 182

རྒྱལ་པོ་བདེན་ནོར་ལྡན་འདི་བརྗོད་ཙམ་ལ།
སྙིང་སྟོབས་ལ་འོས་ལྷུན་སྐྱེས་མཐུ་ལྡན་པ།
བདེན་པའི་སྟོབས་ཀྱིས་དེ་ལུས་རྨ་གསོས་ཤིང་།
དེ་ཚེ་སྐྱེས་པའི་རིན་ཅན་ལྡན་པར་གྱུར། 183

དེ་ནས་བརྒྱ་བྱིན་ཚངས་སོགས་ལྷ་རྣམས་དང་།
རབ་དགའ་སྐྱེས་པའི་ཐུབ་པ་ཐམས་ཅད་ཀྱིས།
ས་སྐྱོང་སྐད་དུ་མངོན་པར་གསོལ་བཏབ་ཀྱང་།
ས་བདག་ལོངས་སྤྱོད་མངོན་པར་བཞེད་མ་གྱུར། 184

དྲན་ཉིད་པདྨ་དང་ལྡན་ཐུབ་པ་ཡིས།
རབ་བསྐུལ་རྒྱལ་པོའི་སྲས་དང་འགྲོགས་ནས་ནི།
སྐྱེ་དགུ་སེང་གེའི་ཁྲིར་བཞུགས་བདེ་བ་ལ།
འཕྲལ་བ་ཞི་སྐད་བདག་ལ་གསོལ་བ་བཏབ། 185

अर्थिप्रिये देहविदारणेऽस्मिन्
नैवास्ति मे कोऽपि विकारलेशः ।
यद्येष सत्यः समयो मयोक्त-
स्तदस्तु मे स्वस्थमिदं शरीरम् ॥ १८२ ॥

इत्युक्तमात्रे सहजानुभावे
सत्त्वोचिते सत्यधनेन राज्ञा ।
अभूद्वपुः सत्यबलेन तस्य
रूढव्रणं तत्क्षणजातरत्नम् ॥ १८३ ॥

ततः सुरैः शक्रविरिञ्चिमुख्यै-
र्जातप्रहर्षैर्मुनिभिश्च सर्व्वैः ।
अभ्यर्थितोऽपि क्षितिपालनाय
भोगाभिलाषी न बभूव भूपः ॥ १८४ ॥

अवाप्तसंज्ञा मुनिना प्रयुक्ता
पद्मावती राजसुतेन सार्द्धम् ।
पतिं ययाचे विरहोपशान्त्यै
सिंहासनाक्रान्तिसुखं प्रजानाम् ॥ १८५ ॥

དེ་ནས་རང་རྒྱལ་དེ་རྣམས་མངོན་ཕྱོགས་ཏེ།
འགྲོ་ལ་ཕན་ཕྱིར་བརྩེ་བས་འཁྲུགས་གྱུར་ཏེ།
ལུས་ཀྱི་འོད་ཀྱིས་ཕྱོགས་ཆ་ཁྱེངས་པ་ནི།
དཀྱིས་པ་གསལ་བར་མཛད་བཞིན་དེ་ལ་སྨྲས། 186

བྲལ་བའི་མཇུག་ནི་རིང་ཞིག་ལོན་ནས་ཐོབ།
ཡང་ནི་ཡོངས་གཏོང་གནས་སྐབས་བཟོད་དཀའ་བ།
གང་ཕྱིར་ལན་གཅིག་མིན་པར་སྡུག་བསྔལ་བཅིངས།
བཟོད་པ་རྒྱལ་པོ་འི་བུས་མིན་ལྷ་མིས་མིན། 187

རྒྱུད་ལྡན་སྡུག་བསྔལ་རབ་ཞིའི་རྒྱུ་གཅིག་པུ།
རང་ལུས་སྐྱོང་ལ་གང་གིས་རབ་སྤྲིན་ཞིང་།
གང་གི་ཆོས་འདིའང་གཞན་དོན་ཉིད་ན་དེ།
རང་གི་མི་ལའང་བདང་སློམས་ཇི་ལྟར་བྱ། 188

དེ་དག་གིས་ནི་བརྗོད་ཐོས་མི་ཡི་དབང་།
བློ་ཡིས་དེ་བཞིན་ཞེས་ངེས་ཇི་ལྟར་ཡང་།
མཁའ་ཡི་ལམ་ནས་རང་གི་གྲོང་ཁྱེར་ཕྱིན།
སྨྲས་བཅས་རང་གི་རྒྱལ་སྲིད་གནས་རྣམས་བསྟེན། 189

ततस्तमभ्येत्य कृपाकुलास्ते
प्रत्येकबुद्धा जगतो हिताय ।
देहप्रभापूरितदिग्विभागा
बभाषिरे हर्षमिवोद्गिरन्तः ॥ १८६ ॥

चिरादवाप्ते विरहावसाने
पुनः परित्यागदशामसह्याम् ।
न राजपुत्रः सहते न देवी
दुःखानुबन्धो ह्यसकृन्निपातः ॥ १८७ ॥

स्वमर्थिने यः प्रददाति देहम्
आपन्नदुःखप्रशमैकहेतुः ।
कथं स कुर्य्यात् स्वजनेऽप्युपेक्षां
धर्म्मोऽप्ययं यस्य परार्थ एव ॥ १८८ ॥

इत्युक्तमाकर्ण्य नरेश्वरस्तै-
स्तथेति निश्चित्य धिया कथञ्चित् ।
व्योम्ना विमानैः स्वपुरीमवाप्य
भेजे निजं राज्यपदं सपुत्रः ॥ १८९ ॥

དེ་ལྟར་དེ་ནི་སྙིང་སྟོབས་ཡངས་ཤིང་བདེན་ལྡན་བྱང་ཆུབ་སེམས་དཔའ་སྟེ།
ཤིན་ཏུ་ཡུན་རིང་རྒྱལ་སྲིད་བཟུང་ཞིང་བདེ་བར་གཤེགས་པའི་གནས་བརྟེན་ནས།
རྒྱལ་བའི་གྲོང་ཁྱེར་རིན་ཅེན་མཆོད་རྟེན་ག་ཀུ་གས་དང་རིན་ཅེན་སྒྲོན་མ་ནི།
རབ་ཏུ་གསལ་བ་རྣམ་མང་དཔལ་གྱིས་མཚན་པའི་བྱང་ཆུབ་གོམས་པར་གྱུར། 190

ཡང་དག་རྫོགས་པའི་བྱང་ཆུབ་བསྒྲུབ་པའི་ཕྱིར།
དགེ་སློང་རྣམས་ལ་སྦྱིན་པའི་གདམས་ངག་ཏུ།
རང་གི་སྤྱོད་ཚུལ་མཐར་ནི་དཔེར་མཛད་ནས།
སངས་རྒྱས་བཅོམ་ལྡན་འདས་ནི་འདི་སྐད་གསུངས། 191

ཞེས་པ་དགེ་བའི་དབང་པོས་དྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ
བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས
གཙུག་ན་ནོར་བུའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་གསུམ་པའོ།།

इति स विपुलसत्त्वः सत्यवान् बोधिसत्त्वः
सुचिरविहितराज्यः सौगतं धाम भेजे ।
जिनपुरमणिचैत्यच्छत्ररत्नप्रदीप-
प्रकटितविविधश्रीर्लक्षणाभ्यस्तबोधिः ॥ १९० ॥

इत्याह भगवान् बुद्धः स्ववृत्तान्तनिदर्शने ।
दानोपदेशे भिक्षूणां सम्यक्सम्बोधिसिद्धये ॥ १९१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मणिचूडावदानं नाम तृतीयः पल्लवः ॥

CHAPTER IV.

ཡལ་འདབ་བཞི་པ།

ང་ལས་རྒྱུའི་རྟོགས་པ་བརྗོད་པ།

༄༅། གང་ཞིག་མཐོ་རིས་མཛེས་མའི་ལག་པས་མཆོག་ཏུ་རབ་བསྐྱོད་མཛེས་པའི་ཛ་ཡབ་དག་དང་ནི།
གདུགས་དཀར་འཛུམ་པའི་ཕྲུན་ཚོགས་དག་གི་འཇིག་རྟེན་ན་ནི་ལེགས་ལྡན་ཕྱུགས་ནི་རྣམ་མཛེས་དང་།

གང་ཡང་གྲགས་སྙན་ག་བུར་རྒྱུན་གྱི་དྲི་མེད་ཐོས་པ་སིམ་བྱེད་རབ་ཏུ་འགྲོ་བ་དག།
སྨིན་པའི་ཆ་ཤས་དེ་འབྲས་ཤིན་ཏུ་ཆུང་ངུའོ་ཨེ་མ་སྨིན་པ་དཔལ་གྱི་དང་པོ་འི་རྒྱུ། 1

འོ་མའི་མཚོ་ལས་བདུད་རྩི་བཞིན། མཁས་རྣམས་མངོན་འདོད་གྲགས་པ་ཡིས།
གང་ཞིག་རྣམ་གསལ་ས་འཛིན་ནི། གསོ་སྦྱོང་འཕགས་ཞེས་བྱ་བ་བྱུང་། 2

ནོར་འཛིན་བསྲུང་བ་ནོར་དང་ནི། གཟི་བརྗིད་ལྡན་པ་གང་མདུན་དུ།
མི་ཡི་བདག་པོ་འི་སྤྱི་བོ་དག། ངེས་པར་ཕྱུག་ལ་སྨུས་མ་བཏུད། 3

ཆོས་ཀྱིས་དག་པའི་བློ་གྲོས་བཞིན། སྨིན་པས་བརྩེ་བ་ལྡན་ཉིད་བཞིན།
དུལ་བས་རྣམ་པར་འབྱོར་པ་བཞིན། གང་གིས་ས་ནི་བརྒྱན་པར་གྱུར། 4

ཡོན་ཏན་ཀུན་ལྡན་རིགས་སུ་མཐོ། ཀུན་གྱི་གདུང་སྐྱོབ་ཟླ་བའི་འོད།
གང་གི་གནས་པའི་སྤྱི་བོར་གྱུར། ས་ཡི་བདག་པོ་ཀུན་གྱིའོ། 5

चतुर्थः पल्लवः ।

मान्धात्रवदानम् ।

शोभन्ते भुवनेषु भव्यमनसां यत्नाककान्ताकर-
प्रौढोदञ्चितचारुचामरसितच्छत्रस्मिताः सम्पदः ।
यच्चोत्सर्पति तर्पितश्रुति यशः कर्पूरपूरोज्ज्वलं
स्वल्पं दानकणस्य तत् फलमहो दानं निदानं श्रियः ॥ १ ॥

अभूदुपोषधो नाम भूभृद् यस्य विभावतः ।
विबुधाभिमता कीर्त्तिः सुधा दुग्धोदधेरिव ॥ २ ॥

वसुधामवती यस्य वसुधामवतः पुरः ।
ननाम प्रणतौ कस्य न नाम नृपतेः शिरः ॥ ३ ॥

शुद्धा धीरिव धर्म्मेण दानेनेव दयालुता ।
विभूतिर्विनयेनेव भूषिता येन भूरभूत् ॥ ४ ॥

गुणिनः प्रांशुवंशस्य बभूवेन्दुद्युतेः स्थितिः ।
यस्य सर्व्वातपत्रस्य मूर्द्धि सर्व्वमहीभृताम् ॥ ५ ॥

གང་གི་གྲགས་པ་འཇིག་རྟེན་རྒྱན། དཀར་ཞིང་དབང་ཕྱུག་སྤྱི་བོར་གནས།
དྲི་མེད་གང་གཱའི་ཆུ་བོ་ནི། རབ་མང་འཇིག་རྟེན་རྣམས་སུ་རྒྱུ། 6

མཆོད་སྦྱིན་སྟོང་གི་བྱེད་པ་པོ། མིག་སྟོང་པ་ལས་ལྷག་པའི་དཔལ།
གང་གི་བཙུན་མོ་ལྷ་མཛེས་ནི། སྟོང་ཕྲག་དྲུག་ཅུ་བྱུང་བར་གྱུར། 7

ནམ་ཞིག་དྲང་སྲོང་བསྲུང་བའི་ཕྱིར། སྲིན་པོ་གཞོམ་པར་དམ་བཅས་ནས།
དཀའ་ཐུབ་ནགས་ཀྱི་ས་ལ་དེ། རྟ་ལ་ཞོན་ནས་རྣམ་པར་རྒྱུས། 8

རྒྱལ་པོ་དྲང་སྲོང་འགའ་ཡིས་དེར། བྱ་ཡི་མཆོད་སྦྱིན་བུམ་པ་བཞག།
ལམ་རིང་གིས་ངལ་དུབ་པ་དེས། ཆུ་ཡིས་གང་བ་འཐུངས་པར་གྱུར། 9

སྐྱེ་བོ་མེད་པར་རྙེད་པའི་ཆུ། ལྕགས་ཀྱི་བུམ་པ་ལས་འཐུངས་ནས།
རྒྱལ་པོ་འི་ཕོ་བྲང་འོངས་པ་ན། ས་ཡི་བདག་པོས་མངལ་ཐོབ་གྱུར། 10

རྫི་ལས་སྒྱུ་མ་མིག་འཕྲུལ་སོགས། གང་གི་ལྷུད་མོ་འི་ཟེར་མ་ནི།
སྨད་བྱུང་ཡང་དག་ཚོགས་པའི་ས། བརྟག་པར་བྱ་དེ་རྒྱལ་གྱུར་ཅིག། 11

མཚར་བའི་ལས་ཀྱིས་རྣམ་བསྐྲུན་པ། སྒྲུབ་བྱེད་སྣ་ཚོགས་རྣམ་པར་བཀྲ།
ངོ་མཚར་རི་མོ་བཀོད་པ་ལ། གཅོད་པར་བྱེད་པའི་དབང་ཕྱུག་སུ། 12

དུས་ཀྱིས་དེ་ཡི་སྤྱི་བོ་ནི། རྩོལ་ནས་བྲིས་པ་ཉི་མ་བཞིན།
མཛེས་སྡུག་འོད་ལྡན་སྐྱེས་གྱུར་ཏེ། འཕྲལ་ལ་རྨ་ནི་རབ་ཏུ་བསོས། 13

यस्येश्वरशिरःस्थायि शुभ्रं गङ्गाजलोज्ज्वलम् ।
अमर्त्यदृश्यं लोकेषु भुवनाभरणं यशः ॥ ६ ॥

कर्त्तुः क्रतुसहस्राणां सहस्राक्षाधिकश्रियः ।
यस्य षष्टिसहस्राणि कलत्रं सुदृशामभूत् ॥ ७ ॥

कदाचिन् मुनिरक्षायै रक्षःक्षयकृतक्षणः ।
विचचाराश्रमारुह्य स तपोवनभूमिषु ॥ ८ ॥

तत्र राजर्षिभिः कैश्चित् पुत्रेष्टिकलशं धृतम् ।
दूराध्वश्रमसन्तप्तः स पयःपूर्णमापपौ ॥ ९ ॥

विजनासादितं पीत्वा स मन्त्रकलशात् पयः ।
राजधानीं समासाद्य गर्भं लेभे विभुर्भुवः ॥ १० ॥

स्वप्नमायेन्द्रजालादि यस्याः कौतुकविप्रुषः ।
जयत्यद्भुतसम्भारभूमिः सा भवितव्यता ॥ ११ ॥

विधेर्विविधवैचित्र्यचित्रकर्म्मविधायिनः ।
आश्चर्य्यरेखाविन्यासं कः परिच्छेत्तुमीश्वरः ॥ १२ ॥

कालेन तस्य मूर्द्धानं भित्वा बालोऽंशुमानिव ।
रूढव्रणस्य सहसा दिव्यद्युतिरजायत ॥ १३ ॥

བསོད་ནམས་གཟུགས་ལ་བརྟེན་པ་བཞིན། འགྲོ་བའི་ཡང་དག་རྒྱལ་པོ་འི་མཚན།
ལྡན་པ་དེ་ནི་མཉེས་གཡེན་ལས། ནུ་ཟགས་རྒྱལ་པོ་འི་བཙུན་མོས་བླངས། 14

ཁྲིམས་པ་བསྣུགས་འོས་འདི་ཡི་ནི། མ་ཡི་གནས་སུ་བདག་གྱུར་ཅེས།
དེ་རྣམས་ཕན་ཚུན་ཚིག་གིས་ནི། རྒྱལ་སྲས་ང་ལས་ནུ་ཞེས་གྱུར། 15

དབང་པོ་དྲུག་ནི་རབ་འདས་དུས། བསོད་ནམས་ཀྱིས་བརྟེན་མི་ཟད་ཚེ།
དེ་ནི་རབ་ཏུ་བསྐྱེད་ལྡན་ཞིང་། ཁྲིམས་པའི་རྩེ་དགས་རྣམ་པར་རོལ། 16

ལང་ཚོ་གསར་པར་རབ་ཞུགས་དེ། རིག་གནས་ཀུན་གྱི་ཕ་རོལ་ཕྱིན།
ཡབ་ནི་མཐོ་རིས་གཤེགས་ལ་དེས། རིམ་པས་འོངས་པའི་རྒྱལ་སྲིད་བཟུང་། 17

ལེགས་བྱས་ཀྱིས་ནི་འབངས་གྱུར་པའི། གཙོད་སྤྲིན་མཁའ་ཡི་ཁྲིམ་ཞེས་པས།
དེ་ཡི་དབང་བསྒྱུར་ཡོ་བྱད་རྣམས། མཆོག་ནི་ཉེ་བར་བསྒྲུབས་པར་གྱུར། 18

གསེར་གྱིས་བཅིངས་པའི་ཅོད་པན་དང་། གཙུག་ཏོར་ཟུར་ཕུད་བྱས་པ་དེས།
སྟོན་ཀའི་སྤྲིན་གྱི་ནྲ་ཚ་ཅན། ལྷུན་པོ་འི་མཛེས་པ་ཐོབ་དང་ལྡན། 19

དེ་ནས་དེ་ཡི་རིན་ཅན་བདུན། དེ་ཚེ་བྱུང་གྱུར་འཁོར་ལོ་ཛ།
ནོར་བུ་གླང་པོ་བུད་མེད་དང་། ཁྱིམ་བདག་དམག་དཔོན་སྟོར་འགྲོ་བའོ། 20

ས་བདག་འདི་ཡི་བུ་རྣམས་ནི། གཟུགས་དང་སྟོབས་དང་གཞི་བརྗིད་མཚུངས།
དཔུང་པ་བཞིན་དུ་དགྲ་འཇོམས་པ། སྟོང་ཕྲག་དག་ནི་བྱུང་བར་གྱུར། 21

तं राजजाया जगृहुर्जगत्साम्राज्यलक्षणम्[1] ।
वात्सल्यप्रस्नुतक्षीराः[2] पुण्यं मूर्त्तिमिवाश्रितम् ॥ १४ ॥

मां धारयिष्यति शिशुः श्लाघ्योऽयं जननीपदे ।
इति तासां मिथोवाक्यैर्मान्यातामूत् नृपात्मजः ॥ १५ ॥

तस्य प्रवर्धमानस्य बालक्रीड़ाविलासिनः ।
षड़िन्द्रः प्रययौ कालः पुण्यक्रीड़ाक्षयायुषः ॥ १६ ॥

नवयौवनमारूढ़ः सर्व्वविद्यासु पारगः ।
स याते पितरि स्वर्गं भेजे राज्यं क्रमागतम् ॥ १७ ॥

यक्षो दिवौकसो नाम सुकृतेर्दासतां गतः ।
अभिषेकोपकरणं दिव्यं तस्योपनीतवान् ॥ १८ ॥

स स्वर्णौबद्धमुकुटः कल्पितोष्णीषशेखरः ।
शरदभ्रावतंसस्य मेरोः शोभामवाप्तवान् ॥ १९ ॥

सप्त रत्नानि तस्याथ प्रादुर्भूतानि तत्क्षणे ।
चक्राश्वमणिहस्तिस्त्रीगृहसेनाग्रगाण्यपि ॥ २० ॥

बभूव चास्य पुत्राणां तुल्यरूपबलौजसाम् ।
सहस्रं विजितारातेर्भुजानामिव भूभुजः ॥ २१ ॥

---

१ Orig. जगत्सम्राज्यलच्छणि । २ Orig. वात्सल्यप्रस्नुतक्षवाः ।

ལྷག་མ་ངལ་བས་བདེར་གནས་པ། མཐའ་དག་རྒྱ་གཏེར་རླབས་ཀྱི་ནི།
སྐྱེ་རགས་ལྡན་པའི་ནོར་འཛིན་མ། མ་ལུས་དཔུང་པས་བཟུང་བར་གྱུར། 22

ས་ནི་བསྐྱུང་བར་ཆས་གྱུར་ཅིང་། རབ་ཏུ་གསལ་བའི་དཔལ་ལ་གནས།
འཁོར་ལོས་སྒྱུར་དེ་ལེགས་བྱས་ཀྱིས། ཁྱབ་འཇུག་ལག་པ་བཞིན་དུ་མཛེས། 23

གྲགས་པ་འགྲོ་གསུམ་གང་གཱ་དང་། མཐུ་ཡིས་རྣམ་པར་བརྒྱན་པའི་དཔལ།
འདི་དེ་བསོད་ནམས་འཁྲི་ཤིང་གི། མེ་ཏོག་རབ་འཕྲིན་དང་པོ་ཡིན། 24

དེ་ནི་ནམ་ཞིག་ནགས་ཀྱི་མཐར། བློན་པོ་དག་དང་ལྷན་ཅིག་ཏུ།
མེ་ཏོག་རྣམ་པར་རྒྱས་པའི་དཔལ། མཛེས་པ་ལྟ་ཞིང་རྒྱུ་བར་གྱུར། 25

དེར་ནི་འདབ་མ་མེད་པའི་བྱ། ཁང་པས་འགྲོ་རྣམས་མཐོང་གྱུར་དེ།
མཁའ་ཡི་ལམ་བགྲོད་དྲན་པ་ཡི། ཤིན་ཏུ་རིད་པར་གྱུར་པ་བཞིན། 26

འདབ་མས་དམན་ཞིང་བགྲོད་བྱེད་མིན། འཚོ་བ་ཟད་ཅིང་ལུས་གཡོགས་མེད།
དེ་རྣམས་དབུལ་པོ་བཞིན་མཐོང་ནས། མི་བདག་བརྩེ་བས་རབ་སྨྲས་པ། 27

ཀྱེ་མ་སྡུག་པའི་བྱ་འདི་རྣམས། ངན་པའི་བྱ་བ་ཅི་ཞིག་བྱས།
གང་ལས་འདི་དག་སྒྲོ་དང་བྲལ། དཀའ་ལས་ཁང་པས་རྒྱུ་བར་གྱུར། 28

སྙིང་རྗེས་འཁྲུགས་པའི་བདག་ཉིད་ཅན། ས་བདག་གིས་དེ་བརྗོད་པ་ལ།
བློན་པོ་ཆེན་པོ་བདེན་པའི་སྐྱེ། མདུན་དུ་འདུག་སྟེ་དེ་ལ་སྨྲས། 29

वसुन्धरां समस्ताब्धिवेलाकलितमेखलाम् ।
निखिलां विदधे दोष्णि शेषविश्रान्तिनिर्वृताम् ॥ २२ ॥

भुवनत्राणसन्नद्धः प्रत्यग्रकमलाश्रयः ।
चक्रवर्त्ती स सुकृतेर्विष्णोः कर इवाबभौ ॥ २३ ॥

त्रिजगज्जाह्नवी कीर्त्तिः प्रभावाभरणाः श्रियः ।
सोऽयं सुकृतवल्लीनां प्रथमः कुसुमोद्गमः ॥ २४ ॥

स कदाचिद् वनान्तेषु विकाशिकुसुमश्रियः ।
रुचिरं सचिवैः सार्द्धं विचचार विलोकयन् ॥ २५ ॥

ददर्श तत्र निष्पक्षान् विहगान् पादचारिणः ।
व्योममार्गगतिं स्मृत्वा प्रयातान् कृशतामिव ॥ २६ ॥

पक्षहीनानगतिकान् वृत्तिक्षीणान् निरम्बरान् ।
दरिद्रानिव तान् वीक्ष्य प्रोवाच कृपया नृपः ॥ २७ ॥

अहो वराकैर्विहगैः किमेतैः कुकृतं कृतम् ।
यदेते पक्षविकलाः कृच्छ्रचरणचारिणः ॥ २८ ॥

इत्युक्ते भूमिपतिना करुणाकुलितात्मना ।
पुरःस्थितो महामात्यः सत्यसेनस्तमब्रवीत् ॥ २९ ॥

ལྷ་གཅིག་འདབ་ཆགས་རྣམས་ཀྱི་འདབ། གང་ལས་བྱི་བར་གྱུར་པའི་རྒྱུ།
ནགས་ན་སྤྱོད་རྣམས་གླིང་གྱུར་པ། དེ་དག་བདག་གིས་རབ་ཏུ་ཐོས། 30

དཀའ་ཐུབ་ཁ་དོན་ཉུས་ལྡན་པ། ཐུབ་པ་གཟི་བརྗིད་འབར་བ་ནི།
ལྷ་བརྒྱ་བསོད་ནམས་གནས་གྱུར་པའི། དཀའ་ཐུབ་ནགས་ཚལ་འདི་ན་ཡོད། 31

དེ་དག་གི་ཀློག་བསམ་གཏན་དང་། བཟླས་པའི་བགེགས་ནི་སྐྱུབ་བྱེད་པ།
ཤིང་གི་ནགས་ལ་བྱ་འདི་རྣམས། རྟག་ཏུ་ཙ་ཙོ་སྒྲོགས་པར་གྱུར། 32

ནུ་བར་མཆོག་ཏུ་གནོད་པ་དག། ཤིན་ཏུ་ཡང་དག་རྒྱས་བྱེད་པ།
བྱ་ཡི་འདུས་པ་དེ་དག་ལ། ཐུབ་པའི་དཀྱིལ་འཁོར་ཁྲིམས་པར་གྱུར། 33

དེས་བསྐྱུར་ཆེན་པོ་འི་དམོད་པ་ནི། སྡིག་བྱེད་གདུང་བ་ཐམས་ཅད་དུ།
གནོད་པ་བྱས་པའི་བྱ་རྣམས་ཀྱི། འདབ་ག་ཤོག་སྐད་ཅིག་གིས་ཟགས་གྱུར། 34

བྱ་ནི་འདི་རྣམས་དེ་དག་སྟེ། སྡུག་བསྔལ་གྱིས་འཚོ་འདབ་ག་ཤོག་བྲལ།
ཁྱོད་ཀྱི་མི་མཐུན་ཕྱོགས་བཞིན་དུ། ངལ་ཞིང་ནགས་སུ་ཀང་པས་རྒྱུ། 35

བློན་པོ་ཆེན་པོས་བརྗོད་དེ་དག། ཐོས་ནས་ས་ཡི་བདག་པོ་ནི།
བྱ་རྣམས་དམོད་པས་གདུངས་པ་ལ། སྙིང་རྗེས་རབ་ཏུ་ནོན་པས་སྨྲས། 36

ཀྱེ་ས་ཐུབ་པ་སོལ་བ་རྣམས། ཞི་བར་གྱུར་ཀྱང་ནགས་སུ་ནི།
ཡོངས་སུ་གྱུར་པའི་ནེ་དག་གིས། མི་ཟློག་སྡིག་པར་བྱེད་པ་ཉིད། 37

श्रुतमेतन् मया देव कथ्यमानं वनेचरैः ।
कारणं पक्षपतने यदभूत् पक्षिणामिह ॥ ३० ॥

सन्ति पञ्चशतान्यत्र पुण्यधाम्नि तपोवने ।
तपःस्वाध्यायशक्तानां मुनीनां दीप्ततेजसाम् ॥ ३१ ॥

तेषामध्ययनध्यानजपविघ्नविधायिनः ।
एते कोलाहलं चक्रुः खगास्तरुवने सदा ॥ ३२ ॥

तस्मै विहगसंघाय कर्णापायकृते परम्[१] ।
अतिसंवर्धमानाय चुकोप मुनिमण्डलम् ॥ ३३ ॥

तदुद्भूतमहाशापतापशोषेण सर्व्वतः ।
क्षणेन पक्षिणां पक्षा व्यशीर्य्यन्त कृतागसाम् ॥ ३४ ॥

त एते विहगाः पक्षरहिताः कृच्छ्रवर्त्तिनः ।
त्वद्विपक्षा[२] इव वने श्रान्ताश्चरणचारिणः ॥ ३५ ॥

महामात्येन कथितं निशम्यैतन् महीपतिः ।
उवाच करुणाक्रान्तस्तत्तः शापेन पक्षिणाम् ॥ ३६ ॥

अहो तेजः परिणतं शान्तानामपि कानने ।
अङ्गाराणां मुनीनाञ्च दहत्येवानिवारितम् ॥ ३७ ॥

---

१ Orig. कर्णां कायपरं श्रुते । २ Orig. खद्विपच्चा इव ।

རང་ཉིད་བདེ་ཕྱིར་གང་གི་ཡིད། ཁྲོ་བས་གདུང་ལ་བཟོད་པ་ཡི།
ཚ་ཡིས་ཡོངས་སུ་བྲན་མ་བྱས། ཡོག་པའི་བཀའ་ཐུབ་ཅན་དེས་ཅི། 38

རང་དང་བློ་དང་བྲམས་པའི་ཡིད། བརྩེ་བའི་སྙིན་པ་དུལ་ཞིང་བཟོད།
གང་དེ་དཀའ་ཐུབ་བསྔགས་པར་འོས། ལྷག་མ་ལུས་ནི་སྐེམས་པ་ཉིད། 39

འཇིག་ཚོགས་འཛིན་པའི་དཀའ་ཐུབ་ཅི། རྣམ་པར་བསླད་ལ་ནགས་ཀྱིས་ཅི།
ཆགས་དང་བཅས་ལ་འབྱོར་པས་ཅི། སྤྱོད་ཚུལ་ངན་ལ་ཐོས་པས་ཅི། 40

དེ་ལྟར་སྡིག་པའི་སེམས་ལྡན་ཞིང་། ཁྲི་བ་དྲུག་པོས་བསྐྱོད་པ་ཡི།
བཟོད་དཀའ་ཐུབ་པ་དེ་དག་ཉིད། བདག་གི་ཡུལ་ནས་འགྲོ་གྱུར་ཅིག 41

འདི་བརྗོད་དེ་ལ་མི་བདག་གིས། ཇི་སྲིད་བདག་ནི་དབང་བའི་ས།
དེ་སྲིད་བདང་བར་བྱོས་ཤིག་ཅེས། སྐྲེས་བུས་འཕྲིན་ནི་བསྒྲིངས་པར་གྱུར། 42

ཟྲ་སི་འདབ་གཤོག་ཏྲི་བ་ཡིས། ཁྲོས་པའི་ས་ཡི་བདག་པོ་དེའི།
འཕྲིན་ཐོས་སྐྱེངས་པར་གྱུར་པ་ཡི། ཐུབ་པ་རྣམས་ཀྱིས་ཡང་དག་བསམས། 43

རྒྱ་མཚོ་བཞི་ཡི་འོབས་ཀྱི་ནི། སྐྱེ་རགས་ལྡན་པ་ས་ཡི་བདག
ཡུལ་གང་མི་བདག་མི་དབང་ལ། གང་ཞིག་བདག་ཅག་གང་དུ་འགྲོ། 44

དེ་ལྟར་བསམས་ནས་ཐུབ་པ་རྣམས། གསེར་གྱི་ས་འཛིན་དག་གི་ངོས།
ལྷ་དང་གྲུབ་པས་ཡོངས་གང་བ། འཛམྦུའི་ཕྱོགས་དང་ཉེ་བར་སོང་། 45

मिथ्यातपस्विभिः किं तैः स्वसुखाय न यैः कृतः ।
मनसः कोपतप्तस्य परिषेकः क्षमाम्बुभिः ॥ ३८ ॥

प्रसन्ना धीर्मनो मैत्रं दया दानं दमः क्षमा ।
येषां तेषां तपः श्लाघ्यं शेषाणां कायशोषणम् ॥ ३९ ॥

किं तपोभिः सकोपानां विलुप्तानां वनेन किम् ।
विभवैः किं सलोभानां दुर्वृत्तानां श्रुतेन किम् ॥ ४० ॥

एवं कलुषचित्तास्ते तीव्रमन्युपरायणाः ।
दुःसहा एव मुनयः प्रयान्तु विषयान्मम ॥ ४१ ॥

इत्युक्त्वा प्राहिणोत्तेभ्यः सन्देशं पुरुषैर्नृपः ।
यावती मद्वशा भूमिस्तावती त्यज्यतामिति ॥ ४२ ॥

विहङ्गपक्षपातेन कुपितस्य महीपतेः ।
सन्देशं मुनयः श्रुत्वा विलक्षाः समचिन्तयन् ॥ ४३ ॥

चतुःसमुद्रपरिखामेखलायाः क्षितेः पतिः ।
नरेन्द्रोऽयं क्व गच्छामः को देशोऽस्य वशे न यः ॥ ४४ ॥

इति सञ्चिन्त्य मुनयः पार्श्वं कनकभूभृतः ।
सुरसिद्धसमाकीर्णं जम्बूखण्डान्तिकं ययुः ॥ ४५ ॥

དེ་ནས་ས་ཡི་བདག་པོ་དེའི། མཐུ་ནི་ཤིན་ཏུ་ཆེ་བ་ཡིས།
ས་ནི་མ་རྨོས་སྨིན་བྱེད་ཅིང་། མཁའ་ཡང་རིན་ཅན་གོས་སྐྱེད་གྱུར། 46

སྨིན་པ་གསོད་བྱེད་སྐྱེངས་པར་ནི། བགྱིད་པར་དེ་ཡིས་བསྟན་པ་ལས།
སྤྲིན་ཚོགས་འཐིབས་པར་བགྱིད་རྣམས་ཀྱིས། ཞག་བདུན་གསེར་གྱིས་ཆར་
པ་ཕབ། 47

དེ་ཡི་མཐུ་ནི་ཆེན་པོ་ཡིས། སྡེ་དང་ལྡན་ཅིག་མཁའ་ལ་ཕྱིན།
ཤར་གྱི་ལུས་འཕགས་ཞེས་བྱའི་གླིང་། མཆོག་གི་སྐྱེ་བོ་དབང་དུ་བྱས། 48

དེ་ཡི་དམག་དཔོན་མཆོག་དག་ནི། རྟུལ་ཕོད་སྤོབས་དང་གཟི་རྒྱས་པ།
དཔའ་བོ་བྱེ་བ་ཕྲག་བཅོ་བརྒྱད། མཁའ་ལ་སྔོན་དུ་འགྲོ་བར་གྱུར། 49

དེ་འོག་བ་གླང་སྤྱོད་གླིང་དང་། དེ་ནས་བྱང་གི་སྒྲ་མི་སྙན།
ལྷུན་པོ་ཡི་ནི་ངོས་རྣམས་ཀྱང་། ཉམས་མེད་བསྟན་ནས་བསྒྲུངས་པར་གྱུར། 50

བརྒྱ་བྱིན་མང་པོ་འདས་གྱུར་དུས། ལྷུན་པོ་གསེར་གྱི་ལྟོག་ལ་ནི།
གླིང་བཞིའི་ས་ཡི་བདག་པོ་དེ། བདེ་བས་རྣམ་པར་རབ་ཏུ་རྩེ། 51

ནམ་ཞིག་ལྷ་རྣམས་བལྷ་བཞེད་པས། ལྷ་བཞིན་མཁའ་ལ་ག་ཤེགས་བཞིན་དེའི།
སྤྲིན་སྔོན་གྱིས་བཞིན་གླང་པོ་ཡིས། ཕྱོགས་རྣམས་རབ་ཏུ་ཁྱབ་པར་གྱུར། 52

དེ་ནས་ཐུབ་པ་བསྐྱད་དེ་རྣམས། ལྷུན་པོ་འི་ངོས་ལ་དཀའ་ཐུབ་ཀྱིས།
གནས་པའི་སྤྱི་བོར་མཁའ་ལས་ནི། དེ་ཡི་རྟ་གླང་སྤྲངས་རྣམས་ལྷུང་། 53

अथ तस्य महीभर्त्तुः प्रभावेण महीयसा ।
अभूदक्लिष्टशस्या भूर्द्यौश्च रत्नाम्बरप्रसूः ॥ ४६ ॥

पाकशासनवैलक्ष्यकरणात्तस्य शासनात् ।
सप्ताहं हेम ववृषुर्मेघाः संघातवर्षिणः ॥ ४७ ॥

स प्रभावेण महता सह सैन्यैर्नभोगतिः ।
चक्रे पूर्व्वविदेहाख्यं द्वीपं दिव्यजनं वशे ॥ ४८ ॥

बभूवुरग्रे सैन्यानि स्फीतशौर्य्यबलौजसाम् ।
भटानां व्योमगमने तस्याष्टादशकोटयः ॥ ४९ ॥

गोदानीयं ततो द्वीपमथोत्तरकुरूनपि ।
पार्श्वानि स सुमेरोश्च शशासाहतशासनः ॥ ५० ॥

सुखं विहरतस्तस्य मेरोः कनकसानुषु ।
बहुशक्रो ययौ कालश्चतुर्द्वीपमहीपतेः ॥ ५१ ॥

स कदाचित् सुरान् द्रष्टुं व्योम्ना गच्छन् सुरोपमः ।
चकार नीलजलदैर्व्याप्ता इव गजैर्दिशः ॥ ५२ ॥

अथ तेषां निरस्तानां मेरुपार्श्वे तपस्यताम् ।
मुनीनामपतन् मूर्ध्नि तन्नजाश्वशकृद्दिवः ॥ ५३ ॥

དེ་ལས་དེ་རྣམས་ཁྲོ་བས་གདུངས། མིག་གིས་མཁའ་ལ་ལྟ་བྱེད་ཅིང་།
སེར་སྐྱའི་འོད་ཀྱིས་འཁྲི་ཤིང་གི། ཚོགས་ཀྱིས་ཕྱོགས་རྣམས་སེར་སྐྱར་བྱས། 54

དེ་རྣམས་འདི་ཅི་ཞེས་བརྗོད་ཁྲོས། དམོད་པའི་མེ་ནི་སྤྲོ་འདོད་དེར།
ལྷ་ཡི་བོ་ཉ་མངོན་ཕྱོགས་དེ། རབ་དགའ་རྣམ་པར་རྒྱས་པས་སྨྲས། 55

འདི་ནི་ས་སྐྱོང་མ་ལུས་ཀྱི། མགོ་ལ་བཀའ་ནི་ངལ་གསོ་ཞིང་།
བརྒྱ་བྱིན་དག་དང་མཚུངས་པའི་དཔལ། ས་ཡི་བདག་པོ་ང་ལས་ཉུ། 56

མི་ཡི་ལྷ་ནི་ནམ་མཁའ་ལ། སྤྲི་དང་བཅས་པ་རབ་དུ་གཤེགས།
གང་གི་གྲག་པའི་ཚིག་འདི་སྒྲགས། བསོད་ནམས་མངོན་པའི་ང་རྒྱལ་ལྡན། 57

འཇིག་རྟེན་ཀུན་གྱི་བདེ་བའི་དཔལ། སྦྱིན་བྱེད་གང་ལ་འབྱོར་པ་ཡིས།
རབ་བསྐྱེད་རྒྱགས་པ་མ་མཐོང་སྟེ། ཡང་དག་རིག་ལ་གདི་སྨུག་བཞིན། 58

ནོར་འཛིན་གསལ་བས་ཀུ་བེ་ར། སྟོབས་དང་ལྡན་པའི་གཞོན་ནུ་སྟེ།
ཁྲུ་མཆོག་ལྡན་པ་དབང་ཕྱུག་དང་། དཔལ་དང་འགྲོགས་པས་ཁྱབ་འཇུག་དང་། 59

འོད་རབ་སྤྲོ་བས་ཉི་མ་དང་། སྐྱེ་བོ་དགའ་བས་ཟླ་བ་དང་།
མཐོང་བས་སྟོབས་གཅོད་དབང་པོ་ཡི། གཟུགས་མཆོག་འདི་ཡིས་རྣམ་པར་
འཛིན། 60

སྟོབས་ལྡན་ས་འོག་རབ་དུ་ཞུགས། དཱྀ་ཙ་ཡང་རྡུས་ལྷག་ཉིད།
ཆུ་གཏེར་རིང་ཡང་འཁྲུག་མི་འདོར། འདི་ཡི་གཏིང་བས་ཡིན་ནམ་སྙམ། 61

ततस्ते क्रोधसन्तप्तदृशा व्योमावलोकिनः ।
चक्रुः पिङ्गप्रभावल्लीकलापकपिला दिशः ॥ ५४ ॥

किमेतत् कोपादित्युक्त्वा शापाग्निविसिसृक्षया[1] ।
अभ्येत्य देवदूतस्तान् प्रहर्षाकुलितोऽवदत् ॥ ५५ ॥

एष निःशेषभूपालमौलिविश्रान्तशासनः ।
पाकशासनतुल्यश्रीर्मान्धाता पृथिवीपतिः ॥ ५६ ॥

नभसा नरदेवोऽयं सह सैन्यैः प्रसर्पति ।
यस्य कीर्त्तनधन्येयं वाणी पुण्याभिमानिनी ॥ ५७ ॥

न दृष्टो यस्य निर्द्दिष्टसर्व्वलोकसुखश्रियः ।
मोहः संविन्मयस्येव विभवप्रभवो मदः ॥ ५८ ॥

कौवेरं धनदव्यक्त्या कौमारं शक्तिमत्तया ।
ऐश्वरं वृषसंयोगाद् वैष्णवं श्रीसमागमात् ॥ ५९ ॥

प्रतापप्रसरात् सौरमैन्दवं जननन्दनात् ।
ऐन्द्रं वृत्रबलच्छेदाद् दिव्यं रूपं बिभर्त्त्ययम् ॥ ६० ॥

बलिः प्रयातः पातालं दधीचोऽप्यस्थिशेषताम् ।
अस्य त्यागेन जलधिः[2] क्षोभमद्यापि नोज्झति ॥ ६१ ॥

---

१ Orig. इत्युक्तैः शापाग्निसिसृक्षया । २ Orig. जलेब्धिः ।

དེ་སྐད་ལྷ་ཡི་ཕོ་ཉའི་ཚིག། ཐོས་ནས་ཐུབ་པའི་དབུས་སོན་པའི།
བཞིན་ངན་ཞེས་བྱ་ཐུབ་པ་ཡིས། དམོད་པའི་རྒྱ་ནི་མཁའ་ལ་གཏོར། 62

དེ་ནས་སྐྱེ་དཔོན་ཡོངས་འདྲེན་གྱིས། རབ་ཏུ་བཞད་ཅིང་དེ་ལ་སྨྲས།
དྲང་སྲོང་ཆེན་པོ་ཁྲོ་བ་ཐོང་། དཀའ་ཐུབ་ཟད་པར་ཡོངས་མ་མཛོད། 63

ས་བདག་མདུན་དུ་དམོད་པ་འདི། འབྲས་མེད་ངོ་ཚར་འགྲོ་བར་འགྱུར།
ཁྱོད་ཀྱིས་གང་གིས་འདབ་གཤོག་ཟད། བཟོད་པའི་བྱ་དེ་བདག་ཅག་མིན། 64

དེ་སྐད་སྐྱེ་དཔོན་གྱིས་སྨྲས་ཚེ། དམོད་པས་བཟུང་བའི་དབྱུང་ཚོགས་ལ།
མདུན་དུ་ས་བདག་གིས་བལྟས་ནས། ཡ་མཚན་ལས་འདི་ཅི་ཞེས་གསུངས། 65

དེ་ནས་སྐྱེ་དཔོན་ཁྲི་ལྡན་པས། དེ་ལ་ཡང་དག་མངོན་ཕྱོགས་སྨྲས།
ལྷ་གཅིག་དྲང་སྲོང་དེ་དག་གི། དམོད་པས་དབྱུང་འདི་མི་བགྲོད་དོ། 66

ཁྱོད་ཀྱི་འཁོར་ལོ་རིན་ཅེན་འདི་འང་། མཁའ་ལ་དམོད་པས་རྣམ་པར་འཁྲུས།
སྤྲིན་གྱིས་ཡང་དག་བགགས་པ་ཡི། ཚ་ཟེར་ཅན་དང་མཚུངས་པར་བཟུང་། 67

དེ་དག་ཐོས་ཤིང་མི་བདག་གིས། མདུན་དུ་དེ་ལྟར་མཐོང་ནས་ཀྱང་།
མིག་ཉིད་ཀྱིས་བསྒྲུབས་དམོད་པ་དག།འབྲས་མེད་རབ་གཏུམ་བསྒྲད་པར་རོ། 68

སྙིང་རྗེའི་ཚོགས་ཀྱིས་ལུས་འཛིག་པས། ཡོངས་བསྐྱངས་དེ་ཡི་ཀུལ་ཀའི་བཀའ།
དམན་པའི་དྲང་སྲོང་ཆེ་རྣམས་ཀྱི། རལ་པ་ས་ལ་ལྷུང་བར་གྱུར། 69

श्रुत्वेति देवदूतस्य वचनं मुनिमध्यगः ।
ससर्ज दुर्मुखो नाम मुनिः शापजलं दिवि ॥ ६२ ॥

प्रहसन्नथ तं प्राह सेनानां परिणायकः ।
महर्षे संहर रुषं मा कृथास्तपसः क्षयम् ॥ ६३ ॥

वैफल्यलज्जां शापोऽयं यास्यत्यग्रे महीपतेः ।
नैते बत खगा येषां यूयं पक्षक्षयक्षमाः[१] ॥ ६४ ॥

इत्युक्ते सैन्यपतिना शापस्तब्धामनीकिनीम् ।
दृष्ट्वाग्रे विस्मयादूचे किमेतदिति भूपतिः ॥ ६५ ॥

संरब्धोऽथ समभ्येत्य सेनापतिरुवाच तम् ।
तेषां देव महर्षीणां शापात् सैन्यं न सर्पति ॥ ६६ ॥

इदञ्च चक्ररत्नं ते व्योम्नि शापविघूर्णितम् ।
धत्ते जलदसंरुद्धतिग्मदीधितितुल्यताम् ॥ ६७ ॥

एतदाकर्ण्य नृपतिर्दृष्ट्वा चाग्रे तथैव तत् ।
दृशैव विदधे शापं विफलोच्चण्डविप्लवम् ॥ ६८ ॥

देहक्षयं महर्षीणां परिरक्षन् कृपाकुलः ।
जटा न्यपातयद्[२] भूमौ स लीलाखसशासनः ॥ ६९ ॥

---

१ Orig. न ते वथ खगा येषां यूयं पत्तयव्यमाः ।
२ Orig. जटन्यपतियत् ।

ཁྲོ་དང་རྨོངས་པ་མི་ཐུལ་ན། བདག་ཅག་དོན་མེད་ཁྱེར་གྱུར་ཅེས།
དེ་དག་རལ་པ་ཊོ་ཚ་ནས། ས་གཞི་ལ་ནི་འབྱུར་བ་བཞིན། 70

དེ་ནས་མི་བདག་ལྷུན་པོའི་རྩེར། ཕྱིན་ནས་ལྷ་རྣམས་གནས་པ་ནི།
གྲོང་ཁྱེར་ལྟ་ན་སྡུག་ཅེས་པ། ལྟ་ན་མཛེས་པ་མཐོང་བར་གྱུར། 71

དེར་ནི་རོལ་མཚོ་ལས་འཁོར་པའི། ཀླུ་རྣམས་དག་ལ་རབ་བརྩམས་ནས།
གནོད་སྦྱིན་ལག་ན་གཞོང་ཐོགས་དང་། འཕྲེང་འཛིན་ཞེས་པའི་ལྷ་དང་ནི། 72

དེ་བཞིན་རྟག་མྱོས་ཞེས་པའི་ལྷ། ཁྲོ་བས་སྨོམ་བྱེད་སྐྱེ་རྣམས་དང་།
རྒྱལ་ཆེན་བཞི་ཡི་རིས་ཞེས་པ། ཤིན་དུ་སྟོབས་ལྡན་སྐབས་གསུམ་པ། 73

རྒྱལ་པོ་ཆེན་པོ་བཞི་པོ་རྣམས། གོ་བགོས་མཚོན་ཐོགས་གཡུལ་ཞུགས་པ།
རྒྱལ་པོའི་མཐུ་ཡིས་ཕམ་གྱུར་ནས། རང་སྡེ་རྣམས་ཀྱི་སྔོན་འགྲོ་བྱས། 74

དེ་ནས་རྒྱ་ཆེ་དཔག་བསམ་ཤིང་། ཡིད་འཕྲོག་ཀོ་བི་དཱ་ར་ནི།
ཡོངས་འདུ་ཞེས་པ་མཐོང་བར་གྱུར། ལྷ་རྣམས་ཀྱིས་ནི་ཡང་དག་བསྟེན། 75

དེ་ནས་ལྷུན་པོའི་རྩེར་འོད་ཟེར། འཕྲེང་བ་བཞིན་དུ་དྲི་མ་མེད།
མཁའ་ནི་རང་འོད་ཀྱིས་གསལ་བ། ཆོས་བཟང་ཞེས་པའི་མདུན་སར་ཕྱིན། 76

གསེར་དང་བྱུ་རུ་བཻ་ཌཱུརྱའི། ཀ་བའི་ཚོགས་ནི་གསལ་ཞིང་མཛེས།
ཁང་བཟང་རྣམ་པར་རྒྱལ་ཞེས་པ། གྲགས་པས་གང་ལ་རྣམ་པར་མཛེས། 77

अजितक्रोधमोहानां भारभूता वृथा वयम्।
इतीव लज्जया तेषां लीनाः क्षितितले जटाः[१] ॥ ७० ॥

अथ मेरुशिरः प्राप्य नृपः सुरनिकेतनम्।
पुरं सुदर्शनं नाम ददर्श प्रियदर्शनम् ॥ ७१ ॥

नागास्तत्र कृतारक्षाः प्रख्यातोदकनिःसृताः।
करोटपाणयो यक्षाः सुरा मालाधराभिधाः ॥ ७२ ॥

सदा मत्तास्तथा देवाः क्रोधोत्तम्भितसैनिकाः।
महाराजकायिकाख्या[२]स्त्रिदशा बलवत्तराः ॥ ७३ ॥

महाराजाश्च चत्वारः सन्नद्धकवचायुधाः।
जित्वा राज्ञा प्रभावेण निजसेनाग्रगाः कृताः ॥ ७४ ॥

ततः कल्पद्रुमोदारकोविदारमनोहरम्।
ददर्श पारिजाताख्यं संश्रयं त्रिदिवौकसाम् ॥ ७५ ॥

मेरोर्मूर्ध्नि ततः शुभ्रप्रभां मालामिवामलाम्।
सुधर्माख्यां सभां प्राप स्वभासोद्भासिताम्बराम्[३] ॥ ७६ ॥

हेमविद्रुमवैदूर्यस्तम्भसम्भारभास्वरः।
प्रासादो वैजयन्ताख्यः प्रख्यातो यत्र राजते ॥ ७७ ॥

---

१ Orig. जनेः। २ Orig. reads also चातुर्राजकायिकाख्याः।
३ Orig. reads also स्वभावोद्भासिताम्बराम्।

གང་བྱ་རྒྱ་སྐྱེས་བཞིན་རས་དང་། བྱུང་བ་ལན་བུས་མཚུངས་གྱུར་པ།
ལྷ་ཡི་བུ་མོས་པད་ཟློན་དང་། པདྨ་འི་ཤིང་གི་ལྷ་མོ་འོ། 78

ནོར་བུའི་ཞལ་ཞལ་ཀ་བ་ས། གང་དུ་ལྷ་ཡི་གཟུགས་བརྟན་གྱིས།
ལྷ་ཡི་འཛིག་རྟེན་གཅིག་ཉིད་ཀྱང་། ལྷ་ཡི་འཛིག་རྟེན་དུ་མ་འཛིན། 79

རིན་ཅེན་རྡ་བབས་བ་གམ་གྱི། འོད་ཀྱི་ཚོགས་ཀྱིས་རྣམ་བཀྲ་གང་།
ཕྱོགས་རྣམས་མཛེས་པས་ཁྱབ་གྱུར་དེ།བརྒྱ་ཕྲག་བརྒྱ་བྱིན་མཆོད་གྱིས་བཞིན། 80

གང་དུ་ལྗང་གཞོན་གྱིས་བསྐྱོད་པའི། དཔག་བསམ་ཀང་འཕྱང་འཁྲི་ཤིང་གིས།
དགའ་བ་བསྐྱེད་དེ་དགའ་བའི་དཔལ། ཞིང་རབ་བསྐྱར་མ་བཞིན་དུ་མཛེས། 81

གང་ན་ཤིང་རྡ་སྣ་ཚོགས་ཞེས། ལྷ་ཡི་སྐྱིད་ཚལ་ཡིད་དགའ་བ།
རྟག་དུ་སྤྲོ་བས་དགའ་མ་དག། འདོད་དང་སོ་ཀའི་བཞེད་པ་བཞིན། 82

འདོད་པ་ཀུན་དང་བདེ་བ་ཀུན། དུས་ཚིགས་ཀུན་དུ་མི་དོག་འབར།
ལྷ་རྣམས་གནས་ནི་ཐམས་ཅད་ལས། ཁྱད་འཕགས་རྒྱལ་པོས་མཐོང་གྱུར་ནས། 83

ཡུད་ཙམ་ཡ་མཚན་གཡོ་མེད་ཅིང་། འཛུམ་པའི་སྤྱན་དང་ཀུན་དགར་བཅས།
ལེགས་བྱས་རྣམས་ཀྱི་བསོད་ནམས་ཀྱིས། འབྲས་བུ་དེ་ནི་འདི་ཞེས་བསམས། 84

ལྷ་ཡི་བདག་པོ་འི་ས་སྐྱོང་ནི། སྲིད་ལེན་བྱུང་བའི་ཚོགས་རྒྱས་པ།
དགའ་ཚལ་རྣམ་པ་དང་བཅས་བཞིན། དེར་ནི་དྲི་བཟང་ལྡན་པ་མཐོང་། 85

यत्राब्जैर्वदनैर्भृङ्गैरलकैस्तुल्यतां गताः ।
पद्मिन्यः सुरनारीणां पद्मिनीनां सुराङ्गनाः ॥ ७८ ॥

बिम्बितैस्त्रिदशैर्यत्र मणिभूस्तम्भभित्तिषु ।
सुरलोको बिभर्त्त्येकोऽप्यनेकसुरलोकताम् ॥ ७९ ॥

रत्नतोरणहर्म्यांशुनिवहैर्यत्र चित्रिताः ।
व्याप्ता विभान्ति ककुभः शक्रायुधशतैरिव ॥ ८० ॥

यत्र बालानिलालोलकल्पपादपपल्लवैः ।
नृत्यन्त्यस्ता इवाभान्ति नन्दिन्यो नन्दनश्रियः ॥ ८१ ॥

यत्र चैत्ररथं नाम देवोद्यानं मनोरमम् ।
धत्ते नित्योत्सवं प्रेमिकामं कामवसन्तयोः ॥ ८२ ॥

सर्व्वकामं सर्व्वसुखं सर्व्वर्त्तुकुसुमोज्ज्वलम् ।
सर्व्वातिशयितं दृष्ट्वा देवानां सदनं नृपः ॥ ८३ ॥

मुहूर्त्तविस्मयास्पन्दसानन्दस्निग्धलोचनः ।
अचिन्तयत् सुकृतीनामिमास्ताः फलभूमयः ॥ ८४ ॥

ऐरावणं सुरपतेर्लीलालिवलयाकुलम् ।
ददर्श तत्र सामोदं साकारमिव नन्दनम् ॥ ८५ ॥

དེ་ནས་ས་ཡི་དབང་པོ་ནི། འོངས་པར་ཤེས་ནས་དབང་པོ་ནི།
ལྷ་ཡི་ཚོགས་དང་བཅས་པ་དག། རབ་དགའ་ལྡན་པས་བསུ་བ་བྱས། 86

རིན་ཆེན་འཕྲེང་བས་རྣམ་མཛེས་པའི། མདུན་སའི་ས་གཞི་རྒྱལ་པོ་ཡི།
རྒྱལ་པོ་ལྷ་ཡི་རྒྱལ་པོ་ཡིས། མཆོད་པ་རྟུལ་བྲལ་མཆོག་གིས་བསྟེན། 87

རིན་ཆེན་སྟན་གྱི་འཕྲེང་བ་ལ། སྐབས་གསུམ་པ་རྣམས་ཉེར་བཞུགས་ཤིང་།
མཆོད་སྦྱིན་བརྒྱ་པའི་སྟན་ཕྱེད་ལ། མི་ཡི་བདག་པོ་དཔལ་ལྡན་བཞུགས། 88

དེར་ནི་སྟན་གཅིག་ལ་འདུག་པའི། ལྷ་དབང་མི་ཡི་བདག་པོ་དག།
ཡོན་ཏན་ཚོགས་ནི་རྒྱ་ཆེ་བའི། གཟུགས་ནི་ཁྱད་པར་མེད་པར་མཐོང་། 89

དེ་ནས་ལྷ་ཀུན་གྱིས་སྨོས་པའི། རབ་གསལ་མིག་ནི་རྐང་དྲུག་པས།
བཞིན་པད་འཕུང་ལྡན་མི་བདག་ལ། འཁྲོག་བྱེད་ཀྱིས་ནི་ཡང་དག་སྨྲས། 90

ཀྱེ་མ་གཟི་བརྗིད་གཏེར་གྱི་གཟི། གང་ཞིག་བསྔགས་འོས་མངོན་པར་འཆར།
ཁྱེད་ཀྱིས་ས་ནི་བརྒྱན་གྱུར་ཅིང་། འོད་ལྡན་ལྷ་ཡི་ནམ་མཁའ་ཡང་། 91

མཐུ་ཡིས་རབ་མགྲོ་གྲགས་སྙན་དག། གསལ་བའི་གོས་ཅན་ས་གསུམ་དུ།
ཡང་དག་རྒྱལ་པོ་རྣམ་རྒྱལ་བ། ཁྱོད་ཀྱི་རྒྱལ་མཚན་འདི་མཛེས་སོ། 92

ཁྱོད་གདམས་བདུད་རྩིའི་བཏུང་བ་དང་། ཁྱོད་ནི་བལྟ་བའི་རོ་ལ་ཡང་།
རྣ་བ་མིག་ཀྱང་རབ་བསྐུལ་ཅིང་། བདེ་བའི་སྒྲ་ལ་དབྱངས་ཅན་ནོ། 93

पुरन्दरस्ततो ज्ञात्वा प्राप्तं भूमिपुरन्दरम् ।
प्रत्युद्ययौ प्रमुदितः सह सर्व्वैर्मरुद्गणैः ॥ ८६ ॥

पूजितः सुरराजेन रत्नराजिविराजिताम् ।
राजराजः सभाभूमिं भेजे विरजसां वरः ॥ ८७ ॥

त्रिदशेषूपविष्टेषु रत्नपर्य्यङ्कपंक्तिषु ।
उपाविशन्नृपः श्रीमानासनार्धे शतक्रतोः ॥ ८८ ॥

एकासनजुषोस्तत्र सुरेन्द्रमनुजेन्द्रयोः ।
रूपं गुणगणोदारं निर्विशेषमदृश्यत ॥ ८९ ॥

ततः सर्व्वसुरोत्सृष्टस्पष्टलोचनषट्पदैः ।
पीयमानमुखाम्भोजं व्याजहार हरिर्नृपम् ॥ ९० ॥

अहो उदयः श्लाघ्यस्ते तेजसा तेजसां निधे ।
भवता भूषिता भूमिर्द्यौश्च देवेन भास्वता ॥ ९१ ॥

अभ्युन्नतप्रभावोऽयं लसत्सितयशोंऽशुकः[1] ।
भ्राजते ते त्रिभुवने साम्राज्यविजयध्वजः ॥ ९२ ॥

त्वत्कथामृतपानस्य त्वद्दर्शनरसस्य च ।
प्रेर्य्यते श्रोत्रनेत्रेण सुखाख्याने सरस्वती ॥ ९३ ॥

१ Orig. लसत्सितयशांसुकम् ।

ལས་རྣམས་འབྲས་བུ་སྨིན་པ་ཡི། །ཐེ་ཚོམ་ཆད་ཅིང་ངེས་པ་འདི།
འགྱུར་བ་ལེགས་བྱས་ཀྱིས་ཐོབ་པ། །ཁྱོད་ཉིད་ཁོ་ནས་བརྟན་པར་བྱས། 94

བསོད་ནམས་འོས་པའི་ཀུན་སྤྱོད་ལྡན། །ཁྱོད་ལྟ་བསོད་ནམས་ཀྱིས་མཐོང་གང་།
འདི་ཉིད་ཕྱིར་ན་དབང་པོ་ཡི། །ཚོགས་ལས་མིག་ཉིད་དགའ་བའི་གནས། 95

ལྷ་ཡི་དབང་པོས་འདི་བརྗོད་ཚེ། །གྲགས་པའི་གཏེར་ནི་ང་ལས་ཐུས།
མཐུ་འདི་ཁྱོད་ཀྱི་དྲིན་ནོ་ཞེས། །སྨྲས་ནས་གདོང་ནི་དུད་པར་གྱུར། 96

དེ་ལྟར་དེ་ནི་ལྷ་རྣམས་ཀྱིས། །རྟག་ཏུ་གུས་པས་མཆོད་ལྡན་དེའི།
ལྷ་ཡུལ་བཞུགས་ཤིང་གནས་པ་ལས། །དབང་པོ་དྲུག་གི་དུས་འདས་གྱུར། 97

ལྷ་མིན་དཀྱིལ་འཁོར་མཐའ་དག་ནི། །དེ་ཡི་ཕ་རོལ་གནོན་པས་ཉམས།
ལྷ་ཡི་རྒྱལ་པོ་འཚོ་མེད་ཅིང་། །དར་བ་དང་ནི་རྒྱལ་བར་གྱུར། 98

གཟི་ལྡན་གསུམ་དུ་གཞུ་འཛིན་ལྷའི། །དཔུང་པའི་གྲིབ་མས་ཉེར་འཚོ་རྣམས།
དཔའ་བོ་ལྡོན་པ་ཆེན་པོ་དེའི། །ངལ་གསོ་དག་ནི་བསྟེན་པར་བྱེད། 99

དེ་ཡི་བསོད་ནམས་ཚོང་ཟེང་གིས། །ཉེས་པ་མི་ཟད་བདེ་སྤྱོད་པའི།
དུས་ཀྱི་རྒྱུན་ནི་ཆེ་བ་ལ། །བརྒྱ་བྱིན་དྲུག་ནི་འདས་པར་གྱུར། 100

དམ་པའི་ལས་འབྲས་སྤྱོད་པ་ཡིས། །རྟགས་ནི་དྲི་མ་མེད་པའི་ཡིད།
དེ་ནི་རྙོག་པར་གྱུར་པ་ལས། །རབ་ཏུ་ཉེ་བར་ཡོངས་ཟད་གྱུར། 101

स्थिरीकृतस्त्वयैवायं[1] सुकृतात्तविभूतिना ।
कर्म्मणां फलवादस्य निश्चयश्छिन्नसंशयः ॥ ९४ ॥

अत एवेन्द्रियग्रामे चक्षुरेव स्पृहास्पदम् ।
पुण्यैः पुण्योचिताचारा दृश्यन्ते यद्भवद्विधाः ॥ ९५ ॥

इत्युक्ते त्रिदशेन्द्रेण मान्धाता यशसां निधिः ।
त्वत्प्रसादप्रभावोऽयमित्युवाच नताननः ॥ ९६ ॥

इत्येवं पूज्यमानस्य तस्य नित्यादरैः सुरैः ।
षड़िन्द्रः प्रययौ कालस्त्रिदिवे वसतः सतः ॥ ९७ ॥

तत्पराक्रमविध्वस्तसमस्तासुरमण्डलः ।
बभूव सुरराजस्य निरपायोदयो जयः ॥ ९८ ॥

दीप्तदानवसंग्रामे तस्य शौर्य्यमहातरोः ।
विश्रान्तिं भेजिरे देवा भुजच्छायोपजीविनः ॥ ९९ ॥

तस्य पुण्यपणक्रीतं भुञ्जानस्याक्षयं सुखम् ।
कालप्रवाहे महति प्रययुः षट् पुरन्दराः ॥ १०० ॥

सत्कर्म्मफलभोगस्य लाञ्छनं विमलं मनः ।
कालुष्याज्जायते तस्य प्रत्यासन्नः परिक्षयः ॥ १०१ ॥

---

१ Orig. वायि ।

དེ་ནས་དུས་ཀྱིས་ས་བདག་ནི། ཉེས་པའི་རྟོག་པས་རབ་བགོས་ཤིང་།
མངོན་པའི་ང་རྒྱལ་ཆགས་པ་ཡིས། ཟིལ་གནོན་ཡིད་ལ་འདོད་པར་གྱུར། 102

སྐབས་གསུམ་པ་ཡི་དཔལ་འབྱོར་ནི། བདག་གི་དཔུང་པའི་སྟོབས་ཀྱིས་བསྐྱངས།
དེ་སྐད་རེ་ཞིག་སྨན་བྱེད་ཀྱི། བག་འཁྲུམས་འདི་ནི་ཡོངས་མི་བཟོད། 103

འགྲོ་བ་ཀུན་གྱི་ཁུར་འཛིན་པ། བདག་གི་དཔུང་པ་འདི་ཡིས་བཟོད།
བདག་རང་གཅིག་པུ་ལྷ་དབང་དུ། མཐུ་ཡིས་འགྱུར་བ་མིན་པ་ཅི། 104

ལྷ་ཡི་དབང་པོ་ཉམས་བྱས་ནས། མཐོ་རིས་རྒྱལ་སྲིད་ཕུན་སུམ་ཚོགས།
གདུགས་གཅིག་ཉིད་ཀྱི་ཐིག་ལེ་ནི། རང་ཉིད་འཛིན་པར་འོས་པ་བསྟེན། 105

དེ་ལྟར་བསམས་ཤིང་བརྒྱ་བྱིན་ལ། འཁུ་བར་མངོན་པར་འདོད་པ་དེའི།
དཀར་བའི་འོད་ལྡན་མཐུ་ཡི་དཔལ། འབྲིང་བ་བཞིན་དུ་ཉམས་པར་གྱུར། 106

སྡུག་པོས་རྒྱས་པར་བསམས་པ་ཡིས། སྐྱེ་བོ་ལེགས་པའི་ངོགས་གཅོད་པའི།
གཡོ་ལྡན་དཔལ་ནི་སྒྲིད་བཅས་ཀྱིས། ཡིད་ཀྱི་རྫིང་བུ་དྲི་མར་བྱེད། 107

བག་མེད་ཕྱུད་པའི་བོ་ཉ་ནི། ཆེ་རྣམས་ཀྱིས་ཀྱང་བཟོད་པར་དཀའ།
རིགས་ནི་ཉམས་པ་ཉིད་ཀྱི་སྐད། སྡིག་པས་འཁྲུངས་པའི་གླེ་གྲོས་སོ། 108

སྡིག་པ་རྣམ་པར་བརྟགས་ཙམ་གྱིས། ས་བདག་ས་ལ་སྐད་ཅིག་གིས།
ལྷུང་སྟེ་འབྲས་བུ་རྣམ་ལྷུང་ཞིང་། རྩ་བ་བཅད་པའི་ལྗོན་པ་བཞིན། 109

अथ कालेन कालुष्यकलितस्य मनोरथः ।
अभूल्लोभाभिभूतस्य भूपतेरभिमानिनः ॥ १०२ ॥

त्रिदशानामियं लक्ष्मीर्मद्बाहुबलपालिता ।
तदिमां न सहे तावदर्धासनविडम्बनाम् ॥ १०३ ॥

अहमेकः सुरपतिः प्रभावान्न भवामि किम् ।
अयं मम भुजः सर्व्वजगद्भारभरक्षमः ॥ १०४ ॥

च्यावयित्वा सुराधीशं स्वर्गसाम्राज्यसम्पदम् ।
एकातपत्रतिलकां स्वयंग्राह्योचितां भजे ॥ १०५ ॥

इति चिन्तयतस्तस्य शक्रद्रोहाभिलाषिणः ।
शुभ्रप्रभा प्रभावश्रीर्मालेव म्लानतां ययौ ॥ १०६ ॥

घनोदयसमुत्सिक्ता सौजन्यतटपातिनी ।
लोलं कलुषयत्येव मानसं श्रीतरङ्गिणी ॥ १०७ ॥

प्रमादो विपदां दूतः दुःसहो महतामपि ।
कुशलोन्मूलनायैव किल्बिषाकुलिता मतिः ॥ १०८ ॥

पापसंकल्पमात्रेण क्षितौ क्षितिपतिः क्षणात् ।
पपात विस्रस्तफलच्छिन्नमूल इव द्रुमः ॥ १०९ ॥

མ་གོམས་པ་ཡིས་རིག་པ་འཛོམས། གྲུགས་པ་གྲུས་པས་དཔལ་འབྱོར་འཛོམས།
རྣམ་སྣང་གིས་ནི་ལེགས་ཉིད་འཛོམས། ཆགས་པས་ཡང་དག་མཐོ་བ་འཛོམས། 110

ཀྱེ་མ་ཀྱཱ་ཡི་དར་རྒྱས་ཆེ། ཆེ་ཞིང་མཐོ་བའི་རྩེར་འཛེགས་པ།
འབྱོར་པས་གྲུགས་པ་སྐྱེས་པ་རྣམས། འཕྲུལ་ཉིད་དུ་ནི་འོག་ཏུ་ལྷུང་། 111

དེ་ཡི་སྐྱེ་བ་སྔ་མ་ལ། ཐམས་ཅད་ཟིལ་གནོན་ཞེས་བྱ་མཆོད།
ལྷ་དབང་རྒྱལ་སྲིད་བསྟེན་འོས་ནི། དེ་ཡིས་འབྲས་བུ་ཐོབ་གྱུར་ཅིང་། 112

གང་ཡང་ལྷ་དབང་ལས་ལྷག་པ། མཐུ་ནི་ཡ་མཚན་ལྡན་པ་དག།
དེ་ཡི་སྟོད་ལ་སྦྱིན་པའི་ཚེ། བསྐྱེད་པ་མི་ཉུང་སྐལ་བར་གྱུར། 113

གཅིན་ལྡན་ཞེས་ནི་བྱ་བ་ཡི། གྲོང་ཁྱེར་འོས་ཤིང་གཙང་བ་རུ།
ཚོང་དཔོན་ཤུད་ཀ་རི་ཀ་ཞེས། དེ་ཡི་སྤྲོན་གྱི་སྐྱེ་བར་གྱུར། 114

ཡང་དག་རྫོགས་པའི་སངས་རྒྱས་ནི། ཉིད་དུ་གྱུར་ཅིང་སེམས་ཅན་ཀུན།
སྒྲོལ་བ་ལ་བརྩོན་རྣམ་གཟིགས་མཚན། བསོད་སྙོམས་སླད་དུ་དེ་ཁྱིམ་ཕྱུགས། 115

དེ་ཡི་སྣོད་དུ་དང་བའི་བློས། སྨན་མ་ཆག་གང་དེ་ཡིས་འཕངས།
དེ་ལས་ལྷག་མ་བཞི་དག་ནི། ས་ཡི་གཞི་ལ་ལྷུང་བར་གྱུར། 116

དེ་ཡི་སྦྱིན་པའི་མཐུ་ཡིས་ནི། ས་ཡི་བདག་པོ་ང་ལས་ཏུ།
གླིང་རྣམས་ཀུན་གྱི་བདག་གྱུར་ནས། བརྒྱ་བྱིན་སྟན་ཕྱེད་ཐོབ་པར་གྱུར། 117

हन्ति विद्यामनभ्यासः श्रियं हन्ति मदोदयः ।
विद्वेषः साधुतां हन्ति हन्ति लोभः समुन्नतिम् ॥ ११० ॥

अहो बत महोत्कर्षशृङ्गारोहो महोदयः ।
विभवोद्भवमत्तानां सहसैव पतत्यधः ॥ १११ ॥

तेन सर्व्वविभूर्नाम पूजितः पूर्व्वजन्मनि ।
तत्फलादाप्तवान् राज्यं स्पृहणीयं मरुत्पतेः ॥ ११२ ॥

सुराधिपाधिकः कोऽपि प्रभावो विस्मयावहः ।
अनल्पपिण्डस्तस्याभूत् पात्रदानांशसम्भवः ॥ ११३ ॥

बन्धुमत्यभिधानायां नगर्य्यामुषितः शुचिः ।
वणिगुत्करिको नाम सोऽभवत् पूर्व्वजन्मनि ॥ ११४ ॥

विपश्यी नाम भिक्षार्थी सम्यक्सम्बुद्धतां गतः ।
विवेश तद्गृहं सर्व्वसत्त्वसन्तारणोद्यतः ॥ ११५ ॥

पात्रे तस्य स चिक्षेप[१] मुद्गमुष्टिं प्रसन्नधीः ।
फलानि तत्र चत्वारि पेतुः शेषाणि भूतले ॥ ११६ ॥

तेन दानप्रभावेण मान्धाता पृथिवीपतिः ।
सर्व्वद्वीपपतिर्भूत्वा शक्रार्द्धासनमाप्तवान् ॥ ११७ ॥

---

१ Orig. स नंचेव।

དེ་ཡི་སེམས་ནི་གཞན་གང་ལས། སྲན་མ་ལྷག་མ་ས་ལ་ལྷུང་།
དེ་ཚེ་འདི་ནི་འབྲས་བུའི་མཐར། སྐབས་གསུམ་པ་ལས་ལྷུང་བར་གྱུར། 118

གང་ཞིག་ཀྱི་ལམ་སྐྱུ་མའི་གནས་སྐབས་སྲུ་ཡང་ནམ་ཡང་མི་འགྲོ་བའི།
རྣམ་རྟོག་འཕྲེང་བ་ཙུང་ཟད་འཁྲུགས་པས་གང་ལ་ཉེ་བར་རབ་སྦྱར་བ།
དེ་ནི་སྨིན་པའི་དཔག་བསམ་ཤིང་གི་མཚུངས་མེད་འབྲས་བུ་རབ་རྒྱས་ཆེ།
འབྱོར་པའི་ལོངས་སྤྱོད་སྤྱོད་པ་ཉིད་དུ་སྐལ་བ་བསྟེན་པ་རྣམ་དག་གྱུར། 119

སངས་རྒྱས་བཅོམ་ལྡན་དགེས་པ་ཡིས། རང་གི་སྐྱེ་བ་གཞན་བརྗོད་ཅིང་།
དགེ་སློང་རྣམས་ལ་རྗེས་བསྟན་དུ། སྨིན་པའི་འབྲས་བུའི་དཔལ་འདི་གསུངས། 120

ཞེས་པ་དགེ་བ་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་
ང་ལས་ནུའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཞི་པའོ།།

मुक्तश्लेषश्च्युतो यस्माद् भूमौ तस्यान्यचेतसः ।
तदसौ फलपर्यन्ते पतितस्त्रिदशालयात् ॥ ११८ ॥

लुठति विकलकल्या यत्र संकल्पमाला
स्फुरति न च कदाचित् स्वप्नमायान्तरे या ।
भवति विभवभोगाभोगिनी भाग्यभाजा-
मतुलफलततिः सा दानकल्पद्रुमाणाम्[1] ॥ ११९ ॥

इत्याह भगवान् बुद्धः प्रीत्या दानफलश्रियम् ।
निजजन्मान्तराख्याने भिक्षूणामनुशासने ॥ १२० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मान्धात्रवदानं नाम चतुर्थः पल्लवः ॥

---

१ Orig. दानकल्पद्रुमः ।

Chapter V.

ཡལ་འདབ་ལྔ་པ།

ཟླ་བའི་འོད་ཀྱི་རྟོགས་བརྗོད་པ།

༄༅། །ལྷ་རྣམས་ཀྱིས་བསྐྱངས་བསྐྱབས་པས་ཤིན་ཏུ་འཁྲུགས་ཤིང་འོ་མའི་
ཆུ་གཏེར་རིང་ཞིག་འདར།
རང་བཞིན་ཉིད་ཀྱི་འབྲས་བུ་རབ་ཏུ་གཏོང་ཆེ་དཔག་བསམ་ཤིང་ཡང་འདར་རོ་ལོ།
གང་ཞིག་ལུས་ནི་རབ་ཏུ་གཏོང་ཡང་སྐྱོ་ལོང་ཚོགས་འཛིན་འདར་བ་མི་མངའ་བ།
སུ་ཞིག་གཅིག་པུ་དེ་ནི་ལུས་བརྒྱས་སྦྱིན་པའི་ལུགས་འདི་གོམས་པར་གྱུར་པ་
ཡིན། 1

ཀི་ལ་ཤས་མཆོན་བྱུང་ཕྱོགས་ན། ཟླ་ན་མེད་པའི་གྲོང་ཁྱེར་ནི།
བཟང་པོ་འི་ཁྲག་ཅེས་བྱ་བ་སྟེ། ས་ཡི་རྒྱན་དུ་གྱུར་པ་ཡོད། 2

གང་དུ་གྲགས་སྐན་མེ་ཏོག་དཀར། ཕུན་ཚོགས་ཀུན་གྱི་འབྲས་བུ་བཟང་།
སྦྱིན་པའི་སྐྱིད་ཚལ་འཁྲི་ཤིང་ནི། གྲོང་ཁྱེར་པ་རྣམས་དགའ་སྐྱེད་གྱུར། 3

གྲོང་ཁྱེར་གསུམ་རྒྱལ་མིག་གིས་མེས། གང་དུ་སྐྲག་པས་ཡིད་འབྱུང་ནི།
སྟོབས་མེད་གཡོ་ཞིང་རྩེ་བ་ཡི། སྨིན་མ་འཁྲིག་པོ་ཉིད་ཀྱིས་བསྐྱངས། 4

APPENDIX I

Page 59. Read གཙུག་ན་ནོར་བུའི་རྟོགས་པ་བརྗོད་པ། for ཡིད་བཞིན་ནོར་བུ་གཙུག་ནོར་གྱིས།

,, Read ང་ལས་ནུའི་རྟོགས་པ་བརྗོད་པ།། for ང་ལས་ནུ་ཡང་འཇིག་རྟེན་རྒྱལ།།

Third Pallava

[‘Ed.’ refers to the alterations suggested by the original editors of the Avadānakalpalatā (= A.K.) in the Bib. Indica Series.]

Verse, 1[d] Add जगति after जायते which is suggested by the Tibetan translation (= Tib.) of the verse (cf. འགྲོ་ etc.). Metre (आर्या) also demands the addition of a word of three *mātrās* to have the requisite number of *mātrās* for the last *pāda* of the verse.

,, 2[a] The word पौभि (པ་གམ) could not be traced in the lexicon. Tib. པ་གམ་ may well suggest सौध (cf. གསེར་གྱི་པ་གམ = हेमहर्म्य॰ A. K. I. 4).

,, 7[a] Tib. བཟོད་ལ་ཀུན་ཆགས་ཤིང suggests क्षमासक्ताः.

,, 7[b] Read དཀྲིས་ཁྱུར for དཀྲིས་ཀྱུར.

,, 8[a] अमराशवसम्पूर्णाम् appears obscure. Tib. འཆི་མེད་སྒྲ་དབྱངས་ཡོངས་རྫོགས་པ suggests अमरस्वरसम्पूर्णाम् which is also not very satisfactory.

,, 10[b] Read क्षुरेण for क्षूरेण.

,, 10[d] ,, གྱིས for གི.

,, 14[a] ,, सदा नन्दन॰ for सदानन्दन॰.

,, 16[a] ,, གྲིས for གྲི.

,, 16[c] ,, ཅེད for བྱེད.

,, 20[a] ,, དཀའ for དཀར.

,, 20[c] ,, ॰पूरिताम- for पूरिताशः.

,, 20[d] ,, च्छाया॰ for छाया॰.

,, 21[b] धन्ये (Ed.) has been rightly suggested for चान्ये. But it is curious to note the Tibetan version, གཞན་དག་ལ supports the obviously corrupt reading चान्ये.

Verse, 21[d] Read ०सुहृद्‌ धर्म्मः for सुहृद्धर्म्मः.

,, 22[b, d] The suggested alterations स्वपवधूवचः and जनः (Ed.) are quite acceptable, but in the Tibetan version འགྱོ་ལ should be read as འགྱོ་བ.

,, 26[b] Read ०बिन्दवः for विन्दवः.

,, 26[d] दुरितं (Ed.) as suggested for तुरितं seems to be the most plausible reading: cf. चूडारत्नस्य किरणैर्दुरितचय-कारिभिः, A. K. III. 40. See also III. 121 and 152. But it is to be noted that the Tibetan translator took or rather mistook the reading as तुरित(= त्वरित) and renders it into Tib. as མྱུར་དུ (quickly).

,, 35[c] Read समभ्यायाद्‌ for समभ्यायात्.

,, 39[c] ,, कारुण्यान् for कारुण्यात्.

,, 43[b] ,, གྱིས for གྱི. Cf. Sans. चित्तेन.

,, 46[c] ,, ०द्वेषः for ०द्धेषः.

,, 47[c-d] ,, मैत्रीजुष स्थिरा कीर्त्तिः for मैत्रीजुषा कीर्त्तिः स्थिरा; cf. the original reading in footnote, 3.

,, 51[a] ,, གྱིས for གྱི.

,, 52[d] ,, པས for མས.

,, 55[c] The suggestion सर्व्वार्थि० (Ed.) for सर्व्वार्थ० is supported by Tib. སྡོང་པའི་ etc.

,, 57[b] Read ०र्गलैः for ०र्गलै.

,, 61[c] ,, यस्मात्प्रियं for यस्मित्प्रयं.

,, 63[b] ,, समुपागतः for समुपागत.

,, 64[b] ,, स्वपः for त्वपः.

,, 66[b] वैशस (Ed.) as suggested in place of वैगम is supported by Tib. བསད་པ.

,, 70[a] Read प्रणयाद्‌ for प्रणयात्.

,, 75[a] ,, ཀུལ་པོ for ཀུལཔོ.

,, 79[a] ,, विधिवद्‌ for विधिवत्.

,, 81[c] तूर्ण (Ed.) has been suggested in place of तूर्यं. But तूर्णम् (མགྱོགས་པ་རུ) appears better here.

Verse, 83[a] Read གྱི for གྱིས.

,, 83[b] ,, གྱིས for གྱི.

,, 99[a-b] ,, हिंसायासप्रसक्तानां सत्त्वानां for हिंसयापप्रशान्तं शक्तानां or सक्तानां (Ed.). The emendation which is suggested by Tib. definitely improves the sense.

,, 100[c] ,, दुःसहः for दुःसह.

,, 106[d] ,, सत्त्वालोक॰ for सत्त्वलोक॰. The emendation has the support of Tib. སེམས་པ་སྣང་བའི.

,, 107[d] The suggested alteration वनमेव विगाह्यताम् (Ed.) for वनमवविगाह्यताम् has the suport of Tib. ནགས་ཉིད་དུ་ནི་འགྲོ་བར་གྱུས.

,, 109[c] Read ॰प्रसादित॰ (Tib. གསལ) for ॰प्रसाधित॰.

,, 111[c-d] बभुः प्रियनिवुः पूर्णनिवाप्यो वनभूमयः is hopelessly obscure. Tib. suggests an original like बभुवुः प्रियवर्षेण पूर्णास्ता वनभूमयः.

,, 112[d] Read ॰शोकव्रजाः॰ (Tib. མྱ་ངན་འགྲོ་ཚོགས) for ॰शोकप्रजाः.

,, 113[a] ,, མ་དྲི་ཙའི for མ་དྲུ་ཙའི.

,, 113[b] ,, मरीचिं for मरीचं.

,, 114[b] ,, मन्त्रिणः for मन्त्रणिः.

,, 116[b] ,, ॰भग्न॰ for ॰भङ्ग॰.

,, 118[c] ,, ཆར for ཆད.

,, 118[c] The emendation बभूवावृष्टि॰ (Ed.) for बभूव वृष्टि॰ is supported by Tib. ཆར་མེད.

,, 121[b] Read ཇོ་བོ་གལ for ཇོ་བོགལ.

,, 121[d] ,, དེ་ཡིས (तेन) for དེ་ཡི.

,, 122[c] ,, ॰वैमुख्यो for ॰वैमुख्यः. The emendation ॰वैमुख्यविवेक॰ (Ed.) does not appear happy and also lacks support from the Tibetan version.

,, 123[d] ,, The suggested alteration नादेयं (Ed.) for न देयं besides being obvious from the context has the support of Tib. སྦྱིན་མིན་ཙེ་ཡང་མེད,

Verse, 124[b] The emendation तथेत्याधार्य्यं for तथेत्यवधार्य्यं (Ed.) does not appear satisfactory. तथावधार्य्यं as suggested by Tib. དེ་བཞིན་བརྟན་བྱས་ཏེ seems to be the proper reading.

,, 126[c] Read ཐུབ་པ་ཡི (मुनेः) for ཐུབ་པ་ཡིས.

,, 127[a] ,, प्रबरै० for प्रवरै०.

,, 131[d] कल्पावनीम् though in agreement with the Tibetan version (སྙིང་རྗེའི་ས) does not seem to be the proper reading. We would like to suggest कल्पावतीम्.

,, 133[a] Read एकाकिनं for एकाकीनं.

,, 133[b] ,, विगतच्छन्न० for विगतछन्न०.

,, 135[a] ,, शमिताः (ཞི་བགྱིས) प्रवरा(ः) for शा नीता प्रवरा(ः).

,, 138[a-b] The emendation मनोहृत्तिरिव (Ed.) for मनोहृत्तेरिव is quite acceptable but न सुखतां गता need not be altered to निःसुखतां गता (Ed.).

,, 142[a] Read तामदुःखार्त्तां (སྡུག་བསྔལ་མི་འོས) for खार्त्तदुःखां.

,, 143[a] ,, देवि for देवी.

,, 143[c] ,, दुःखावसानविरसः for दुःखावसानो विरसः.

,, 145[a] ,, དང་ for དང.

,, 146[a] The suggested emendation भोगक्षणेनैव (Ed.) for भोगक्षणो नैव is supported by Tib. ལོངས་སྤྱོད་སྐད་ཅིག་ཕོ་ནས.

,, 146[a] Read ནད (०रोगो) for ནང་.

,, 146[a] ,, ०रोगो for रोगः.

,, 147[a] ,, लक्ष्मी- for लक्ष्मीः.

,, 147[b] ,, र्धर्म्माः for धर्म्माः.

,, 148[b] ,, जायां for जाया.

,, 148[c] ,, पराङ्मुखानां for पराङ्मुखानाम्.

,, 149[a] The reading विद्रुताः (Ed.) as suggested for विध्रुताः is supported by Tib. རྣམ་པར་བརྡང་.

,, 149[c] Read ०बन्धु for ०बन्धुम्.

,, 150[b] The emendation विग्रस्त० (Ed.) for विन्यस्त० does not appear satisfactory. Tib. རྣམ་པར་བརྡང་ suggests विद्रुत०

Verse, 150[c] Read ०तापा for ०तापाः.
,, 152[a] ,, ०हेतु- for हेतुः.
,, 152[b] ,, त्रैलोक्य० for त्रैलोक्य०.
,, 153[a] ,, दयाजुषः (བརྩེ་བས་བརྙེན་པ) for दयायुषः.
,, 153[c] ,, जनानां for जनानाम्.
,, 154[c] ,, ०तापं for ०तापम्.
,, 155[a] कथं नु (Ed.) as suggested for कथं न is supported by Tib. ཇི་ལྟར.
,, 155[c] Read प्रजानां for प्रजानाम्.
,, 157[b] ,, धराधराम्भोधिमती धरित्री for धराधराम्भोधिमद्वीधरित्री. The emendation has the support of Tib. ས་འཛིན་ཆུ་གཏེར་དང་བཅས་འཛིན་མ་ནི.
,, 158[c-d] ,, तीक्ष्णचित्ताः and प्रवृत्ताः for तीक्ष्णचित्तः and प्रवृत्तः respectively. See A.K. III. 156 and 161.
,, 161[a] ,, ०धैर्यं for धैर्यम्.
,, 161[b] ,, तीव्र० for तीव्र०.
,, 161[c] ,, ०वृत्ते- (Ed. ०वृत्तेः) for ०वृत्तैः.
,, 161[d] ,, विप्राः for विप्राः.
,, 162[a] ,, ०दुःखं for ०दुःखम्.
,, 162[c] ,, एवंविधे० for एवम्विध०.
,, 163[c] ,, कलयापि (ཆ་ཡང་) माभूद् for कलयाभि माभूत्.
,, 164[c] ,, स ययौ प्रहर्षं (དེ་ནི་རབ་དགར་གྱུར) for प्रययौ सहर्षः or सहर्षं (Ed.).
,, 165[c] ,, लोकं for लोकम्.
,, 166[a] ,, पृथिव्यां for पृथिव्याम्.
,, 167[c] ,, तद्बोधि० for तद्बोधि०.
,, 168[a] ,, ०संज्ञं for ०संज्ञम्.
,, 168[c] ,, ०गौतमाद्या for गौतमाद्याः.
,, 169[a] ,, པདྨ་ལྡན (=पद्मावती) for པད་ལྡན.
,, 169[d] ,, बाल० for बाल०.
,, 170[a] ,, चारणानां for चारणानाम्.

Verse, 171 c — Read क्लेशजुषं for क्लेशयुषं.

,, 171 d — ,, ཡང་དག for ཡང་ངག.

,, 172 c — ,, स्वार्थलवाभियुक्ति-(རང་དོན etc.) for सार्थलवाभियुक्तिः.

,, 172 d — ,, च्छाया॰ for छाया॰.

,, 173 a — ,, ॰जीवितोऽयं for ॰जीवितोऽयम्.

,, 173 c — ,, ससौरभश्छिन्न॰ for ससौरभच्छिन्न॰.

,, 174 a — ,, जन्तो- for जन्तोः.

,, 174 b — ,, नँ for न.

,, 175 c — ,, ॰व्रतानां for ॰व्रतानाम्.

,, 176 c — ,, ॰चक्षु- for ॰चक्षुः.

,, 176 d — ,, र्मुनि॰ for मुनि॰.

,, 177 c — ,, भूमि- for ॰भूमिः.

,, 177 d — ,, स्तनु॰ for तनु॰.

,, 178 a — ,, ཉིད for ཉིང་.

,, 178 d — ,, གཅོད for གཅོང་.

APPENDIX II

Necessary changes effected owing to *Sandhi* and corrections of punctuations have not been noted here.

	READINGS IN THE ORIGINAL EDITION	READINGS CHANGED IN THE REVISED REPRINT
	Third Pallava	
Verse, 178[a]	क्षयं	क्षयः
,, 185[a]	प्रमुक्ता	प्रयुक्ता (རབ་བསྐུལ)
,, 189[d]	स्वपुत्रैः	सपुत्रः (སྲས་བཅས) : cf. न राजपुत्रः सज्जते ; A.K. III. 187.
,, 190[a]	བདེ་ལྡན	བདེན་ལྡན (सत्यवान्)
,, 190[b]	०पिच्छितराज्यः	०विच्छितराज्यः (རྒྱལ་སྲིད་བཏུང་ཞིང་)
	Fourth Pallava	
Verse, 1[c]	ཀ་པུར	ཀ་པུར (कर्पूर०)
,, 1[d]	तत्फलम्	तत् फलम्
,, 3[a]	བསྐུང་	བསྐྱུང་ (स्रवतः)
,, 4[d]	གང་གི	གང་གིས (येन)
,, 7[c-d]	यस्य षष्टिसहस्राणि कलत्रं सुदृशामभूत् : the construction appears anomalous.	
,, 11[d]	ཧྲེ	དེ (सा)
,, 13[a]	དུས་ཀྱི	དུས་ཀྱིས (कालेन)
,, 14[b]	०साम्राज्यरक्षणे	०साम्राज्यलक्षणम् (རྒྱལ་པོའི་མཚན) : cf. the reading of the xylograph in footnote, 1, A.K., p. 127.
,, 14[c]	०चौरा	०चौराः
,, 14[d]	मूर्तम्	मूर्तिम् (གཟུགས)

		READINGS IN THE ORIGINAL EDITION	READINGS CHANGED IN THE REVISED REPRINT
Verse,	21 d	भूभुजाम्	भुजानाम् (དཔུང་པ)
,,	23 a	भुवनातप०	भुवनत्राण० (ས་ནི་བསྲུང་)
,,	33 b	कर्णज्वरकृते वते	कर्णापायकृते परम् (རྣ་བར་མཆོག་ཏུ་གནོད་པ་དག). Cf. the reading of the xylograph in footnote, 1, A.K., p. 131.
,,	33 c	अभिसम्बद्धमानाय	अतिसंवर्धमानाय (ཤིན་ཏུ་ཡང་དག་རྒྱས་བྱེད་པ)
,,	40 b	बलेन	वनेन (ནགས་ཀྱིས)
,,	50 a	གླང་སྤྱོད	གླང་སྤྱོད (गोदानीयम्)
,,	52 c-d	नीलजलदव्यस्ता(:)	नीलजलदैर्व्याप्ता(:) (སྤྲིན་སྔོན་གྱིས་ ··· རབ་ཏུ་ཁྱབ་པར་གྱུར)
,,	53 d	०सक्तद्	०प्रक्तद् (སྤྲངས)
,,	54 c	धूटङ्गप्रभावश्लि०	पिङ्गप्रभावल्ली० (སེར་སྐྱའི་འོད་ཀྱིས་འཁྲི་ཤིང་གི)
,,	54 d	ཚོགས་ཀྱི	ཚོགས་ཀྱིས
,,	55 a-b	कोप इत्युक्त्वा शापाग्निं विसिसृक्षया	कोपादित्युक्त्वा शापाग्निविसिसृक्षया. Cf. Tibetan version.
,,	58 c-d	मोहसंविन्मयस्येव * * * विभवो मदः with a footnote : Three letters are wanting in this line, the equivalents of which are not traceable.	मोहः संविन्मयस्येव विभवप्रभवो मदः (འདོད་པ་ཡིས་རབ་བསྐྱེད་རྒྱགས་པ་ ··· ཡང་དག་རིག་ལ་གཏི་མུག་བཞིན)
,,	59 c	छषभयोगात्	छषसंयोगाद्
,,	68 c	བརྡང་ (*Sic*)	བསྒྲུབས (विदधे)
,,	69 b	བཀས	བཀའ
,,	72 b	प्रख्यातोदकनिश्चिताः	प्रख्यातोदकनिःसृताः (རོལ་མཚོ་ལས་འཐོན་པའི)
,,	72 d	सुरमाल्लाधराभिधाः	सुरा माल्लाधराभिधाः (འཕྲེང་འཛིན་ཞེས་པའི་ལྷ་དང་ནི)

	READINGS IN THE ORIGINAL EDITION	READINGS CHANGED IN THE REVISED REPRINT
Verse, 76^{d}	प्रभावोद्भासिताम्बराम्	स्वभासोद्भासिताम्बराम् (མཁའ་ནི་རང་འོད་ཀྱིས་གསལ་བ)
,, 91^{a}	पद्योयं	उदयः (མངོན་པར་འཆར)
,, 95^{c}	पुण्योचितचार	पुण्योचिताचारा(:) (བསོད་ནམས་འོས་པའི་ཀུན་སྤྱོད་ལྡན)
,, 98^{a-b}	तत्पराक्रमविश्वस्तसमस्त-सुरमण्डलः	तत्पराक्रमविध्वस्तसमस्तासुरमण्डलः (ལྷ་མིན་དཀྱིལ་འཁོར་མཐའ་དག་ནི། དེ་ཡི་ཕ་རོལ་གནོན་པས་ཉམས)
,, 99^{d}	भुजच्छायोपजीविवत्	भुजच्छायोपजीविनः (དཔུང་པའི་གྲིབ་མས་ཉེར་འཚོ་རྣམས)
,, 100^{b}	སྨྲས་པ	ཉོས་པ (क्रीत)
,, 102^{d}	ཟིལ་མནོན	ཟིལ་གནོན (अभिभूत)
,, 103^{b}	ངཔུངས་པ	དཔུང་པ (बाहु)
,, 103^{c}	དེ་ལས	དེ་སྐད (तत्): this is the reading of the Narthang xylograph. དེ་ལས had better be retained.
,, 103^{c}	ཀྱིས	ཀྱི
,, 103^{d}	བག་འཁྲུམ	བག་འཁྲུམས (विडम्बना)
,, 104^{a-b}	सुरपतिप्रभावोऽनुभवामि कम्	सुरपतिः प्रभावान्न भवामि किम् (ལྷག་དབང་དུ། མཐུ་ཡིས་འགྱུར་བ་མིན་པ་ཅི)
,, 107^{b}	རྡོགས	ངོགས (तट)
,, 108^{a-b}	प्रमदा विपदां द्रुतिः दुःसहा महतामपि	प्रमादो विपदां द्रुतः दुःसहो महतामपि (བག་མེད་རྒྱུད་པའི་ཕོ་ཉ་ནི། ཆེ་རྣམས་ཀྱིས་ཀྱང་བཟོད་པར་དཀའ). རིགས་ནི་ཉམས་པ་ཉིད་ཀྱི་སྐད suggests कुलस्योन्मूलनायैव.
,, 109^{c}	पपाताविश्रब्धः॰	पपात विस्रस्तः॰ (ལྷུང་སྟེ ··· རྣམ་ལྷུང་ཞིང་)
,, 110^{c}	རྣམ་སྨད་གིས	རྣམ་སྡང་གིས (विद्वेषः)
,, 112^{d}	स्पृहणी	स्पृहणीयं
,, 119^{c}	འདི	དེ (सा)
,, 120^{b}	प्रेत्य	प्रीत्या (དགེས་པ་ཡིས)
Colophon	སེམས་ས	སེམས

Fifth Pallava

p. 154, l. 2	ཟླ་འོད	ཟླ་བའི་འོད (चन्द्रप्रभ)

पञ्चमः पल्लवः ।

चन्द्रप्रभावदानम् ।

दुग्धाब्धिर्विबुधार्थनातिविधुरः क्षुब्धश्चकम्पे चिरं
कम्पन्ते च निसर्गतः किल फलोत्सर्गेषु कल्पद्रुमाः ।
एकः कोऽपि स जायते तनुशतैरभ्यस्तदानस्थितिः
निष्कम्पः पुलकोत्करं वहति यः कायं प्रदानेष्वपि ॥ १ ॥

अस्ति कैलाशशैलासिन्ध्यामुत्तरस्यामनुत्तरा ।
दिशि भद्रशिला नाम भुवनाभरणं पुरी ॥ २ ॥

यस्यां सितयशःपुष्पाः सफलाः सर्व्वसम्पदः ।
दानोद्यानलताः प्रीत्यै बभूवुः पुरवासिनाम् ॥ ३ ॥

यत्र त्रिपुरजिन्नेत्रशिखिखिन्नो मनोभवः ।
अबलाभिस्त्वलक्षीकृभ्रूभङ्गैरेव रक्ष्यते ॥ ४ ॥

གང་དུ་གསེར་གྱི་ཁང་པའི་འཕྲེང་། སྣ་རིག་ཚོགས་རབ་འབར་བས་མཛེས།
ལྷུན་པོ་རྩེ་ཡི་འཕྲེང་བ་ནི། ཀྲུས་པའི་རྒྱུ་སྐར་འཁྲོ་བ་བཞིན། 5

དེར་ནི་དཔལ་ལྡན་ཟླ་བའི་འོད། ས་འཛིན་རྣམས་ཀྱི་མཆོག་ཏུ་གྱུར།
ཉིན་མོའི་ཟླ་འོད་མཛེས་པ་ཡིས། གང་ཞིག་ཀི་ལ་ཤ་བཞིན་བྱས། 6

གང་གིས་ལུས་འོད་ཟླ་ཉ་ཡི། འོད་ལྟར་རྫོགས་པའི་འཕྲོག་བྱེད་ཀྱིས།
གསལ་བྱེད་ཅན་མིན་སྣང་བའི་མཚན། བྱམས་པའི་ཡོན་ཏན་ཟད་མ་གྱུར། 7

འདི་མཐོང་ཉིད་ན་རྒྱུ་སྐར་རྣམས། འདོད་པའི་རི་མས་ནི་བསྐྱེད་འགྱུར་ཞེས།
མཁའ་ལ་གདུགས་ཀྱི་ཟློལ་དག་གིས། འདི་ནི་ཟླ་བས་བསྒྲིབས་པ་བཞིན། 8

དམ་པའི་མཛོད་ན་གནས་པའི་དཔལ། དོག་ཏུ་འདི་ཡིས་རབ་སྐྱེར་ཞེས།
གང་ཞིག་མཐོང་ལ་པདྨ་ཅན། ཟླུམ་པར་རབ་ཏུ་ཐོབ་པ་བཞིན། 9

སྤྲེ་ཡི་ང་རྒྱལ་རབ་བཏང་ནས། གདོང་བ་དཀར་བའི་དཔལ་གྱིས་དཔལ།
གདུགས་དང་ཅོད་པན་རབ་གསལ་རྣམས། གྲོང་ཁྱེར་པ་རྣམས་དག་ལ་བཏང་། 10

དེ་ཡི་འབྱོར་པ་དུལ་པ་ཡིས། དཔལ་གྱིས་བརྒྱན་ཅིང་མགྲོ་བ་མཛེས།
གཞུ་ལྟར་གུག་པའི་ཡོན་ཏན་རྒྱུད། གཞན་དག་རྩེ་རྩུ་འཛེགས་པ་ཉིད། 11

སྟོང་ཕྲག་བཞི་བཅུ་དག་དང་ནི། བརྒྱ་ཕྲག་དག་གི་ལོ་རྣམས་ཀུན།
ལུས་ཅན་རྣམས་ཀྱི་ཚེར་གྱུར་པ། དེ་དུས་རྩོད་ལ་སྣང་བ་བྱུང་། 12

मुक्ताजालोज्ज्वला यत्र भाति हेमगृहावली ।
मेरोः शिखरमालेव विस्फुरत्स्फीततारका ॥ ५ ॥

तस्यां चन्द्रप्रभः श्रीमानभूत् भूमिभृतां वरः ।
कैलास इव यः कान्त्या चकार दिनचन्द्रिकाम् ॥ ६ ॥

यस्य देहप्रभापूरैः पूर्णेन्दुद्युतिहारिभिः ।
निशासु दीपकाभासु नाभूत् स्नेहगुणक्षयः ॥ ७ ॥

स्मरज्वरं भजन्तोऽस्य दर्शनेनैव तारकाः ।
इति छत्रछलादस्य छादितं खमिवेन्दुना ॥ ८ ॥

प्रदिशत्येष सततं श्रियं सत्कोशसंश्रयाम् ।
इति तद्दर्शनेनैव संकोचं प्राप पद्मिनी ॥ ९ ॥

सेनाहंकारमुत्सृज्य त्यागशुभ्रश्रिया श्रियः ।
निर्दिष्टाः छत्रमुकुटप्रकटाः पुरवासिनाम् ॥ १० ॥

शुशुभे विभवस्तस्य पुण्यालङ्करणोन्नतेः ।
आरोहति परां कोटीं नम्रस्य धनुषो गुणः ॥ ११ ॥

चत्वारिंशत्सहस्राणि वत्सराणां शतानि च ।
बभूव देहिनामायुस्तस्य काले कलिद्विषः ॥ १२ ॥

འཇིག་རྟེན་སྐྱོང་ལས་ལྷག་པའི་དཔལ། འཇིག་རྟེན་སྐྱོང་དེའི་གྲོང་ཁྱེར་ནི།
ཕུན་སུམ་ཚོགས་པས་གང་བ་དག། སྟོང་ཕྲག་དྲུག་ཅུ་བྱུང་བར་གྱུར། 13

མཆོད་སྦྱིན་བྱེད་པོ་དེ་ཡི་དཔལ། གྲགས་པའི་ཐིག་ལེ་བསོད་ནམས་བསྒྲུབ།
མཆོད་སྦྱིན་དུ་བའི་འཁྲི་ཤིང་དག། འཁྲུག་པས་གཡོ་བའི་ལན་བུ་མཛེས། 14

དེ་ཡི་བློན་པོ་ཀླུ་ཆེན་པོ། རབ་འབར་ཀླུ་བའི་སྣང་བ་བཞིན།
ཕུན་ཚོགས་ཀུ་མུད་ལྡན་པ་ནི། རྟག་དུ་རྣམ་པར་གྲོས་བགྱིད་གྱུར། 15

གཡོ་མེད་མཚན་མ་ཤེས་རབ་ཀྱིས། བ་དན་རྒྱལ་སྲིད་རྒྱ་གཏེར་གྱི།
ནོ་བ་འཛིན་པ་གང་གིས་ནི། གཙོ་བོའི་གྲགས་པ་ཕ་རོལ་བསྒྲལ། 16

དེ་ཡི་བློན་པོའི་གླང་པོ་ནི། ས་འཛིན་ཞེས་བྱ་ས་ཡི་ཁྱེར།
བཟོད་པ་གཞན་ཡང་བྱུང་གྱུར་ཏེ། ཕྱོགས་ཀྱི་གླང་པོ་ལྟ་བ་བཞིན། 17

གང་ཞིག་ཕུར་བུའི་ལུགས་ཀྱིས་ནི། མ་བྲི་གྲོས་ཀྱི་གསང་སྔགས་ཀྱིས།
མི་མཐུན་ཕྱོགས་ཀྱི་དཔའ་བོ་དག། སྤྲུལ་གྱི་དུག་བཞིན་བཏང་བར་གྱུར། 18

བློན་པོ་དེ་ཡི་མི་བདག་དང་། རྒྱལ་པོ་ཡིས་ཀྱང་དེ་བསྒྲུན་པ།
སྐྱེས་བུ་དམ་པས་ཡོན་ཏན་དང་། ཡོན་ཏན་གྱིས་ཀྱང་སྐྱེས་བུ་བཞིན། 19

བྲུས་ཤེས་དྲང་བའི་རྗེ་བོ་དང་། དམ་པའི་གཡོག་ནི་རབ་གུས་པ།
ལེགས་བྱས་ལས་སྐྱེས་ཁོ་ན་ཡི། སྐལ་པ་ལྡན་པར་བརྟེན་པར་འགྱུར། 20

तस्य षष्टिसहस्राणि पुरीणां पूर्णसम्पदाम्।
बभूवुर्लोकपालस्य लोकपालाधिकश्रियः॥ १३॥

यज्वानः कीर्त्तितिलकास्तस्य पुण्यविभूषणाः।
यज्ञधूमलताभङ्गैः बभुर्लीलालकाः श्रियः॥ १४॥

तस्य सम्पत्कुमुदिनीविकासेन सदोदितः।
अभूत् मन्त्री महाचन्द्रश्चन्द्रलोक इवोज्ज्वलः॥ १५॥

येन निश्चललक्ष्येण प्रभोः प्रज्ञापताकया।
राज्याब्धिकर्णधारेण पारमुत्तारितं यशः॥ १६॥

महीधराभिधश्चासौ बभूवामात्यकुञ्जरः।
भूमिभारसहस्तस्य दिङ्नाग इव पञ्चमः॥ १७॥

मन्त्रणाभिन्नमन्त्रस्य यस्य नीतिबृहस्पतेः।
त्याजिताः प्रतिसामन्ताः शौर्य्यं विषमिवाहयः॥ १८॥

तेनामात्येन स नृपः स च राज्ञा विभूषितः।
गुणः सत्पुरुषेणेव गुणेनेव च सज्जनः॥ १९॥

कृतज्ञः सरलः स्वामी सत्भृत्यो भक्तिनिर्भरः।
सुकृतप्रभवेणैव भाग्ययोगेन लभ्यते॥ २०॥

རྗེ་ཡི་སྐྱེས་བུ་དམ་པའི་ནང་། གང་གི་ཡོན་ཏན་ཞེས་པས་རིག།
འདི་ཉིད་ཁོ་ན་ཕུན་ཚོགས་ཀུན། རིང་དུ་འཁྲུམ་པའི་ངལ་གསོ་ཡིན། 21

སྦྱིན་ལ་ཞེན་པས་ས་བདག་ནི། འཇིག་འགྱུར་གང་གི་འབྲས་བུ་ཅན།
བློན་པོ་གཞན་དང་དེ་གཉིས་ཀྱིས། ནམ་ཞིག་རྨི་ལམ་མཐོང་བར་འགྱུར། 22

མཚན་མ་ངན་པར་རབ་བྱུང་བ། མཐོང་བས་དོགས་པར་འགྱུར་དེ་དག།
རྟག་ཏུ་ཞི་དང་ཤེས་པ་ཡིས། ལས་ཉམས་དག་ལ་ཆགས་པར་འགྱུར། 23

སྣ་ཚོགས་བཤེས་གཉེན་ལ་སོགས་པ། དཀའ་ཐུབ་ནགས་ན་དྲང་སྲོང་ཆེ།
འདི་ཉམས་ཀྱང་ནི་མཚན་མ་དག། མཐོང་བས་ཡིད་དམན་དེ་དག་བརྗོད། 24

བར་དེར་སྐྱེ་བོ་སྤྲུ་མ་ནི། ཚངས་པའི་སྲིན་པོ་ཚངས་པའི་གཉེན།
མ་རུངས་བཟོད་དཀའ་སྐྱེ་བོ་ངན། ཁྲག་དོག་དྲག་པོའི་མིག་ཅན་པས། 25

རྒྱལ་པོའི་ཡོན་ཏན་ཀུན་རབ་འབར། སྦྱིན་པས་རབ་བསྐྱེད་གྲགས་སྙན་ཐོས།
ཡོན་ཏན་མེད་དེ་ཡོན་ཏན་ལ། སྡང་བའི་གདུང་བས་ཡང་དག་བསམས་མས། 26

ཀྱེ་མ་ཀྱེ་ཧུད་མི་བདག་འདིའི། གྲགས་པ་མཁའ་ལ་ཉིན་མཚན་དུ།
གཡབ་པ་དྲི་ཟ་ཚིག་མངའ་ཡི། བུད་མེད་ཚོགས་ཀྱིས་སྒྲོགས་པར་འགྱུར། 27

དེ་ཡི་ཡོན་ཏན་བསྟོད་པའི་ཁབ། རྟག་ཏུ་བདག་གི་ནི་བར་ཞུགས།
ཅི་བྱ་ཡོན་ཏན་གྱིས་མཐོ་གཞན། རང་བཞིན་ཉིད་ཀྱིས་ཡོངས་མི་བཟོད། 28

इयमेव चिरभ्रान्तिविश्रान्तिः सर्व्वसम्पदाम् ।
यत् गुणज्ञतया वेत्ति स्वामिसत्पुरुषान्तरम् ॥ २१ ॥

तौ कदाचिद्ददृशतुः स्वप्नमन्ये च मन्त्रिणः ।
क्षयो यस्य फलं दानव्यसनेन महीपतेः ॥ २२ ॥

तौ दृष्ट्वा दुर्निमित्तानि प्रादुर्भूतानि शंकितौ ।
व्यग्रौ बभूवतुर्नित्यं शान्तिस्वस्तिककर्म्मसु ॥ २३ ॥

निमित्तदर्शनोद्विग्नास्तपोवनगता अपि ।
विश्वामित्रप्रभृतयः स्वामीत्यूचुर्महर्षयः ॥ २४ ॥

अत्रान्तरे ब्रह्मबन्धुः प्राग्जन्मब्रह्मराक्षसः ।
रौद्राक्षो नाम मात्सर्य्यक्रौर्य्यदौर्जन्यदुःसहः ॥ २५ ॥

श्रुत्वा दानोद्भवां कीर्त्तिं राज्ञः सर्व्वगुणोज्ज्वलाम् ।
निर्गुणः स गुणद्वेषी सन्तप्तः समचिन्तयत् ॥ २६ ॥

अहो बतास्य नृपतेर्गीयते गगने यशः ।
अनिशं सिद्धगन्धर्व्वगीर्व्वाणललनागणैः ॥ २७ ॥

सदा विशन्ति मे कर्णे तत्गुणस्तुतिसूचयः ।
किं करोमि प्रकृत्यैव सहे नान्यगुणोन्नतिम्[१] ॥ २८ ॥

१ Orig. नान्यस्य गुणोन्नतिम् ।

དེས་ན་སྦྱིན་པའི་ངང་ཅན་དེའི། སྦྱིན་པས་བསྒྲུབས་པའི་གྲགས་པ་དག།
ཕྱིན་ནས་མགོ་སྐྱོང་དགག་པ་ཡིས། ཉམས་པ་འདི་ནི་བདག་གིས་བྱས། 29

གལ་ཏེ་མགོ་བོ་མི་སྟེར་ན། སྦྱིན་པས་བསྐྱང་བའི་གྲགས་ཉམས་འགྱུར།
ཅི་སྟེ་སྟེར་ན་བདག་གི་ནི། ཞི་སྡང་རབ་ཏུ་ཞི་བར་འགྱུར། 30

དེ་ལྟར་ཡུན་རིང་བསམས་ནས་ནི། དྲི་ལྡང་རི་ཞབས་མཐར་གནས་པ།
གཡོ་ལྡན་མ་རུངས་དྲག་པོ་དེ། བཟང་པོའི་བྲག་ཏུ་སོང་བར་གྱུར། 31

མིག་འཕྲུལ་སྤྲུར་བ་ཤེས་པ་དེ། རབ་ཏུ་ཞི་ཞིང་རིགས་པས་ཆས།
བྱས་ཤིང་སྡིག་པའི་ཀུན་རྟོག་ལྡན། ས་བདག་གྲོང་ཁྱེར་སླེབ་པར་གྱུར། 32

སྲིད་པའི་ནགས་འདིར་དེག་ཏུ་ནི། ཡོན་དན་སྐྱོན་གྱིས་ཡང་དག་གང་།
དཔག་བསམས་ཤིང་ཚེམས་རབ་སྐྱེས་ཏེ། དུག་གི་ཤིང་ཚེམས་སྐྱེས་པར་གྱུར། 33

མ་ལུས་ཉམས་པ་མཚོན་བྱེད་ཅིང་། འཇིགས་རུང་སྐྲག་པར་བྱེད་པ་དག།
ལྟས་ངན་ལྟ་བུའི་མི་བསྲུན་པས། སྲུ་ལ་ཉོན་མོངས་སྐྱེད་མི་བྱེད། 34

ཡོན་དན་ལྡན་པའི་རང་བཞིན་གྱིས། དཀར་གྱུར་རབ་གསལ་མི་མཐུན་ཕྱོགས།
སྐྱོན་ལ་བརྟེན་པར་མི་བསྲུན་དང་། རབ་རིབ་དག་ལ་དབྱེ་བ་ཅི། 35

ལེགས་པ་ཚོམས་ཀྱི་ཡིད་གཙུགས་འཛོམས། ཆོས་པར་སྣང་བའི་དུག་བཟོད་དཀའ།
ལོགས་རིང་སྐྱེ་བོ་མི་བསྲུན་སྦྲུལ། འཇིགས་སུ་རུང་བ་སུ་ཡིས་སྦྲུལ། 36

तत् गत्वा दानशीलस्य तस्य दानार्जितं यशः ।
करोम्येष शिरोयाच्ञाप्रतिषेधेन खण्डितम् ॥ २९ ॥

यशस्त्याज्यते दानोत्थं शिरस्तेन प्रदास्यति ।
अथ दास्यति विद्वेषप्रशान्तिर्मे भविष्यति ॥ ३० ॥

इति सञ्चिन्त्य सुचिरं स क्रौर्य्यकठिनः शठः ।
गन्धमादनपादान्तवासी भद्रशिलां ययौ ॥ ३१ ॥

इन्द्रजालप्रयोगज्ञः स कृत्वा प्रशमोचितम् ।
वेशं कलुषसंकल्पः पुरीं प्राप महीपतेः ॥ ३२ ॥

अस्मिन् भववने नित्यं गुणदोषसमाकुले ।
कल्पवृक्षाः प्रजायन्ते जायन्ते च विषद्रुमाः ॥ ३३ ॥

अशेषनाशपिशुनैर्घोरसन्त्रासकारिभिः ।
दुर्निमित्तैरिव खलैः खेदः कस्य न दीयते ॥ ३४ ॥

गुणिद्वेषः प्रकृत्यैव प्रकाशपरिपन्थिनः ।
दोषाश्रयस्य को भेदः खलस्य तिमिरस्य च ॥ ३५ ॥

स्वच्छन्दघाती साधूनां विद्वेषविषदुःसहः ।
दीर्घपक्षः खलव्यालकरालः केन निर्मितः ॥ ३६ ॥

གྲོང་ཁྱེར་དེར་ནི་རབ་ཞུགས་ཚེ། གྲོང་ཁྱེར་ལྷ་ནི་གཟུགས་ཅན་མ།
སྐྲག་པའི་མིག་ནི་གཡོ་བ་ཡིས། ས་སྐྱོང་ལ་ནི་མངོན་ཕྱོགས་སྨྲས། 37

ཚངས་པའི་གཉེན་ནི་མགོ་སྐྱོང་བ། འདི་ནི་ཁྱོད་ཅན་ཉེ་བར་འོངས།
འགྲོ་བཞི་འཚོ་བ་ཁྱེད་ཀྱིས་ནི། འཚོ་བ་གཅོད་བྱེད་འདི་གཞོམ་འོས། 38

བདག་གིས་བསམས་པ་དྲི་མ་ཅན། དེ་ནི་གྲོང་ཁྱེར་སྒོ་རུ་བཀག་གས།
དེ་མཐོང་བ་ན་བདག་གི་ཡིད། སྐྲག་ཅིང་དགའ་བ་མ་ཐོབ་སོ། 39

འདི་སྐད་གྲོང་ཁྱེར་ལྷ་མོ་ལ། སྐྱོང་བ་བཀག་པས་ངོ་ཚ་དག།
རབ་སྐྱེས་བཞིན་རས་དམན་གྱུར་པའི། ས་སྐྱོང་གིས་ནི་རབ་ཏུ་སྨྲས། 40

ལྷ་མོ་སྐྱོང་བ་མངོན་འོངས་པ། འདི་ནི་མ་སྒྲོག་ནང་དུ་ཐོང་།
སྐྱོང་བའི་བསམ་པ་འབྲས་མེད་པའི། ཤུགས་རིངས་བདག་གིས་ཡོངས་མི་བཟོད། 41

སྐྱོང་བའི་དོན་གཉེར་ཚོམས་དོན་དུ། ལུས་ཉམས་བསོད་ནམས་རབ་ཏུ་ཐོབ།
གང་ཕྱིར་ལུས་ནི་དུས་བཞིའི་གྲངས། གནས་ཀྱང་ཚོམ་པར་འཇིག་པར་འགྱུར། 42

སྐྱོང་བ་རེ་བ་ཉམས་པ་དག། འདི་ཚོམས་མདུན་དུ་མི་བགྲོད་གང་།
དེ་ཉིད་སྐྱེ་བོ་ལེགས་ཚོམས་ཀྱིས། འཚོ་བ་འགྲོ་བར་མཆོད་པར་འོས། 43

བདག་གི་རྗེས་སུ་མཐུན་པ་ནི། དགེ་བར་འོས་པ་ཁྱོད་ཀྱིས་མཛོད།
དེ་ཡི་བསམ་པ་ཚོམ་བཅོམ་པའི། གདུང་བ་སྤུར་དུ་ཟློག་པར་མཛོད། 44

तस्मिन् प्रविष्टे नगरं रूपिणी पुरदेवता ।
उवाचाभ्येत्य भूपालं सन्त्रासतरलेक्षणा ॥ ३७ ॥

शिरोयाचक एष त्वां ब्रह्मबन्धुरुपागतः ।
वध्योऽसौ जीवितोच्छेदी जगतो जीवितस्य ते ॥ ३८ ॥

निरुद्धो नगरद्वारि स मया मलिनाशयः ।
मम तद्दर्शनत्रस्तं[1] धृतिं न लभते मनः ॥ ३९ ॥

इति ब्रुवाणां भूपालः प्रोवाच पुरदेवताम् ।
अर्थिसंरोधसंजातलज्जया नमिताननः ॥ ४० ॥

देवि याच्ञाभियातोऽसौ प्रविशत्वनिवारितः ।
दीर्घोच्छ्वासं सहे नाहमाशावैफल्यमर्थिनः ॥ ४१ ॥

याच्ञाप्रणयिनामर्थे पुण्यप्राप्तस्तनुव्ययः ।
युगसंख्यामपि स्थित्वा विपद्यन्ते हि देहिनः ॥ ४२ ॥

एतदेव सुजातानां पूज्यं जगति जीवितम् ।
यदेषामग्रतो याति नार्थी भग्नमनोरथः ॥ ४३ ॥

क्रियतामानुकूल्यं मे भवत्या कुशलोचितम् ।
आशाविघाते संतापस्तस्य तूर्णं निवार्यताम् ॥ ४४ ॥

---

१ "ममवक्त्रं चक्षम्" ।

དེ་སྐད་ས་བདག་ཚིག་ཐོས་ནས། གཡོ་བ་མེད་པར་ངེས་པ་ཡིས།
བསམ་པས་ཡིད་ནི་རབ་གདུང་བ། ལྷ་མོ་སྣང་བ་མིན་པར་གྱུར། 45

དེ་ནས་གྲུ་གྲུ་ཅན་དེ་འོངས། མི་བསྲུན་སོག་ལེའི་སྤྱོད་ཚུལ་ཅན།
མི་བཟད་དྲང་པོའི་ཞིང་དག་ནི། སྤྱོད་ལ་རང་ཉིད་སྦྱོར་བ་བཞིན། 46

སློང་ལ་སྒོ་ནི་རབ་ཕྱེ་བ། མི་བདག་ཁང་པ་དེར་འོངས་ལ།
ས་བདག་འཛིན་པས་འཛིགས་པ་ཡིས། ས་འཛིན་དང་བཅས་འདར་བར་གྱུར། 47

སྒྲ་གཅན་བཞིན་དུ་གདོང་ངན་དྲེ། མི་དབང་ཟླ་བའི་དྲུང་དུ་འོངས།
མི་ཞིས་དོན་བཞིན་ཞིས་པ་ནི། བརྗོད་པ་སྔོན་དུ་འགྲོ་བར་བྱ། 48

རྒྱལ་པོ་དགེ་གྱུར་གཉིས་སྐྱེས་བདག། དབེན་པར་གྲུབ་པ་སྒྲུབ་པ་པོ།
སློང་བ་ཀུན་གྱི་ལྷ་ཡི་ཞིང་། ཁྲོད་ཅན་འདོད་པ་ཐོབ་ཕྱིར་འོངས། 49

རྟག་ཏུ་གང་གིས་གཟིགས་པ་བདུད་རྩིའི་ཆར་ཆེན་ཡིད་ནི་སྐྱེ་བོ་དམ་པའི་གྲོགས།
བཟོད་པ་ཁོང་ཁྲོའི་རྡུལ་རྣམས་རབ་སེལ་རྒྱུ་བོ་བློ་གྲོས་སྡུག་བསྔལ་གྱིས་གཟིར་མ།
དཔལ་འབྱོར་དྲི་མེད་སྦྱིན་པའི་རྒྱུ་ནི་མངོན་འཕོར་ཚིག་ནི་བདེན་ཞིང་རིགས་པར་ལྡན
འགྲོ་བ་རྣམས་ཀྱི་གཉེན་དུ་སྐྱེས་པ་དེ་ནི་ཁྱོད་ཉིད་གཅིག་པུ་ཁོ་ན་ཡིན། 50

འཁོར་ལོ་བསྒྱུར་བའི་མགོ་ཡིས་ནི། བདག་གིས་འཁྱུབ་ཅེས་འགའ་ཡིས་སྨྲས།
ད་ནི་བྱིན་མཛོད་ཁྱོད་ལས་གཞན། སུ་ཡི་མགོ་བོ་སྦྱིན་པར་ནུས། 51

इति भूमिभृतः श्रुत्वा वचो निश्चलनिश्चयम्।
जगामादर्शनं देवी चिन्तासन्तापमानसा ॥ ४५ ॥

अथायया स कुटिलः खलः क्रकचचेष्टितः।
दारुणः सरलस्यैव छेदाय स्वयमुद्यतः ॥ ४६ ॥

तस्मिन्नृपगृहं प्राप्ते विवृतद्वारमर्थिनाम्।
भूर्भूपतिक्षयभयाच्चकम्पे सधराधरा ॥ ४७ ॥

नरेन्द्रचन्द्रमासाद्य स राहुरिव दुर्मुखः।
समभ्यधाद्विधाय प्रागशिवार्थामिवाशिषम् ॥ ४८ ॥

स्वस्ति राजन् द्विजन्मा हि विजने सिद्धिसाधकः।
प्राप्तस्त्वामीप्सितप्राप्त्यै सर्व्वार्थिसुरपादपम् ॥ ४९ ॥

दृष्टिर्दृष्टिरिवामृतस्य महती सौजन्यमिद्धं मनः
क्षान्तिः क्रोधरजःप्रमार्जननदी दुःखार्त्तमाता मतिः।
लक्ष्मीर्दानजलाभिषेकविमला सत्योपयुक्तं वचः
नित्यं यस्य स एक एव हि भवान् जातो जगद्बान्धवः ॥ ५० ॥

सिद्धये कथितं कैश्चिच्चक्रवर्त्तिशिरो मम।
दीयतां तत् त्वदन्यो वा दातुं शक्नोति कः परः ॥ ५१ ॥

གསལ་བའི་དོན་སྟེར་ཡིད་བཞིན་ནོར། དཔག་བསམ་ལྗོན་པ་ལ་སོགས་ཡོད།
རྙེད་དཀའ་དོན་ནི་རབ་སྟེར་མཆོག། ཁྱོད་ལྟ་བུ་ནི་ཤིན་དུ་ཉུང་། 52

དེ་ཡི་དེ་བརྗོད་མི་བདག་ནི། མིག་གཡོ་ཡངས་པའི་བསམ་པ་ཅན།
སྐྱོང་བ་གཟིགས་པས་ཀུན་དགའ་ར་དག། རྟོགས་པ་ཡིས་ནི་དེ་ལ་སྨྲས། 53

གང་ཞིག་བདག་གིས་ལེགས་འཚོ་དག། སྐྱོང་བ་ཉམས་ཀྱི་དོན་གྲུབ་སྨད།
ཉམས་པར་མི་རྟོག་ཡོ་བྱད་དུ། ཟད་འགྱུར་བྲམ་ཟེ་བདག་ལེགས་སོ། 54

བདག་སྲོག་ཕ་རོལ་དོན་དུ་ནི། ནམ་ཞིག་འགྱུར་ཞེས་རེ་བ་ཡོད།
གལ་ཏེ་ཁྱོད་ཀྱི་དེ་བསྐྱངས་པ། འདི་ནི་བསོད་ནམས་ཅིས་མ་ཡིན། 55

འཇིག་རྟེན་འདིར་ནི་སྐྱོང་ཉམས་ལ། གང་གང་བྱིན་པ་དེ་དེ་བརྟེན།
གྲུབ་པའི་ཡོ་བྱད་བདག་གི་མགོ། བསྡུགས་པར་འོས་པ་བཟུང་བར་མཛོད། 56

ས་སྐྱོང་སྙིང་སྟོབས་ལེགས་ལྡན་པ། རབ་དགའ་ལྡན་པས་འདི་བརྗོད་ཏོ།
བློན་པོ་ཆེན་པོ་ཀླུ་ཆེན་དང་། ས་འཛིན་དག་གིས་དེ་ལ་སྨྲས། 57

རྗེ་བོ་ཁྱོད་ཀྱི་ཆོས་དང་པོ། རང་གི་སྲོག་ནི་བསྲུང་བ་ཉིད།
འགྲོ་བར་ཁྱོད་ནི་འཚོ་བ་ན། སྲོག་ཆགས་ཐམས་ཅད་འཚོ་བར་འགྱུར། 58

གང་ཕྱིར་ཁྱོད་ལུས་ཀུན་གྱི་གཞི། མགོ་བོ་སྦྱིན་པར་མི་འོས་སོ།
རིན་ཅན་གསེར་གྱི་རང་བཞིན་མགོ། བྲམ་ཟེ་འདི་ལ་སྦྱིན་པར་མཛོད། 59

सन्ति स्पष्टार्थदाश्चिन्तामणिकल्पद्रुमादयः ।
दुर्लभार्थप्रदातारो विरलास्तु भवद्विधाः ॥ ५२ ॥

इत्युक्ते तेन नृपतिर्निष्कम्पविपुलाशयः ।
अर्थिसन्दर्शनानन्दनिर्भरस्तमभाषत ॥ ५३ ॥

धन्योऽहं यस्य मे ब्रह्मन्नर्थिनामर्थसिद्धये ।
निर्विकल्पोपकरणं व्ययं याति सुजीवितम् ॥ ५४ ॥

कदा प्राणाः परार्थे मे प्रयान्तीति मनोरथः ।
किमेतानि न पुण्यानि प्रार्थ्यन्ते ते यदि त्वया ॥ ५५ ॥

अहोपकरणसिद्धौ श्लाघ्यं मे गृह्यतां शिरः ।
तत्तदेव स्थिरं लोके यद्यदर्थिसमर्पितम् ॥ ५६ ॥

इत्युक्ते हर्षयुक्तेन भूभुजा सत्त्वशालिना ।
तमूचतुर्महामात्यौ महाचन्द्रमहीधरौ ॥ ५७ ॥

निजजीवितरक्षैव धर्मस्ते प्रथमः प्रभो ।
त्वयि जीवति जीवन्ति सर्व्वे जगति जन्तवः ॥ ५८ ॥

न दातुमर्हसि शिरः सर्व्वाधारं हि ते वपुः ।
दीयतां ब्राह्मणायास्मै हेमरत्नमयं शिरः ॥ ५९ ॥

སྐྱོང་བའི་དོན་མཐུན་རེ་བ་དག། གང་གི་དོན་ཀུན་གྱིས་རྫོགས་པ།
དེ་དག་ཡང་དག་བསྐྱངས་པ་ཡིས། ཐམས་ཅད་བསྐྱངས་པ་ཉིད་དུ་འགྱུར། 60

སྡིག་པའི་སེམས་ལྡན་གཉིས་སྐྱེས་འདིའི། ཚིག་རྫོགས་འདི་ནི་འཇིགས་སུ་རུང་།
གང་ཕྱིར་སྐྱོང་བའི་དཔག་བསམ་ཤིང་། ཅི་བཅད་ཅི་བར་འཚོ་བྱ་མིན། 61

རིན་ཆེན་གསེར་གྱི་མགོ་ཐོབ་ནས། འདི་ནི་འགྲོ་འགྱུར་མགོ་ཡིས་ཅི།
བཀྲེས་པ་ནམས་ཀྱི་ཡིད་བཞིན་ནོར། ཉམས་པར་བརྟགས་ནས་བཀག་མ་བྱ་མིན། 62

བློན་པོའི་གཙོ་བོས་འདི་སྐད་ཅེས། རིན་ཆེན་གསེར་གྱི་རང་བཞིན་མགོ།
དེ་ནི་བདག་གིས་འགྲུབ་པ་ལ། ཉེར་མཁོ་མེད་ཅེས་བྲམ་ཟེས་སྨྲས། 63

དེ་ནས་ཅོད་པན་མི་བདག་གིས། རབ་བཀྲོལ་སྨུ་དིག་འོད་ནམས་ནི།
མགོ་དང་བྲལ་བའི་སྡུག་བསྔལ་གྱིས། ཀུན་ནས་མཆི་མའི་རྒྱུན་བཅས་བཞིན། 64

སྐད་ཅིག་དེ་ལ་གྲོང་ཁྱེར་པའི། ཅོད་པན་ནམས་ནི་ས་གཞི་ལ།
ཕྱོགས་ནི་བསྒྲིག་མཚུངས་མགལ་མེ་དང་། སྐར་མདའ་དག་དང་ལྡན་ཅིག་ལྷུང་། 65

རྒྱལ་པོས་མགོ་ནི་རབ་སྦྱེར་བ། ཚམ་པ་ཀུན་དུ་ཡོངས་བརྟགས་ཏེ།
མཐོང་བར་མི་བཟོད་བློན་པོ་ནི། དེ་དག་ལུས་ནི་བདང་བར་བྱས། 66

དེ་ནས་སྐྱེད་ཚལ་རིན་ཆེན་ནང་། ཕྱུགས་དེ་ས་ཡི་བདག་པོ་ཡིས།
རབ་རྒྱུས་ཙམ་པ་ཀ་འོག་ཏུ། མགོ་བོ་གཅོད་དུ་ཡང་དག་གཞིགས། 67

सर्व्वार्थैरर्थिसार्थानां पूर्य्यन्ते यैर्मनोरथाः ।
तेषां संरक्षणेनैव सर्व्वं भवति रक्षितम् ॥ ६० ॥

संकल्पोऽयं द्विजस्यास्य क्रूरः कलुषचेतसः ।
मूलच्छेदोपजीव्यो हि न कल्पतरुरर्थिनाम् ॥ ६१ ॥

हेमरत्नशिरः प्राप्य यात्वेष शिरसास्य किम् ।
चिन्तामणिर्विनिष्पेष्यो भुज्यते न बुभुक्षितैः ॥ ६२ ॥

इत्युक्ते मन्त्रिमुख्याभ्यां हेमरत्नमयं शिरः ।
सिद्धो नैवोपयोग्यं तन्ममेति ब्राह्मणोऽब्रवीत् ॥ ६३ ॥

अथोन्मुमोच नृपतिर्मुकुटं मौक्तिकांशुभिः ।
शिरोविरहदुःखेन साश्रुधारामिवाभितः ॥ ६४ ॥

मुकुटानि क्षणे तस्मिन् निपेतुः पुरवासिनाम् ।
दिग्दाहोन्मुखतुल्याभिरुल्काभिः सह भूतले ॥ ६५ ॥

राज्ञा प्रदाने शिरसः सर्व्वथा परिकल्पिते ।
तौ चक्रतुस्तनुत्यागं मन्त्रिणौ द्रष्टुमक्षमौ ॥ ६६ ॥

रत्नगर्भमथोद्यानं प्रविश्य पृथिवीपतिः ।
उत्फुल्लचम्पकस्याधः शिरश्छेत्तुं समुद्ययौ ॥ ६७ ॥

སྐྱིད་མོས་ཚལ་གྱི་ལྷུས་མཐོང་ནས། མགོ་བོ་གཅོད་པར་བརྩོན་དེ་ལ།
རྒྱལ་པོ་ཐུབ་ཚོད་མ་མཛད་ཅེས། ཀླུ་ངན་དག་གིས་འཁྲུགས་པར་སྨྲས། 68

འདོད་ལྡན་འཁྲི་ཤིང་རབ་སྨྲས་པ། ཤུང་བ་རྒྱས་ཚོགས་སྨྲ་དང་ནི།
ཡལ་འདབ་རབ་ཏུ་གཡོ་བ་ཡིས། ལག་པ་དག་གིས་བཀློག་པ་བཞིན། 69

ཉམས་པར་བརྟགས་པ་གཡོ་མེད་དེས། སྐྱིད་ཚལ་ལྷ་ཡང་དག་ཁྲུས་ནས།
དྲི་མེད་བྱང་ཆུབ་ལ་དམིགས་པའི། སྨོན་ལམ་དག་དང་ལྡན་པར་གྱུར། 70

གྲོང་དང་རིན་ཅན་རང་བཞིན་ཚལ། འདི་ནི་བསོད་ནམས་ཕུང་པོས་མཐོ།
སེམས་ཅན་ཡང་དག་སྒྲོལ་འདོས་པ། སྟོན་པའི་མཆོད་རྟེན་འགྱུར་གྱུར་ཅིག། 71

བདག་གིས་བརྟག་པ་འདི་ཡིས་ནི། བསོད་ནམས་ཅུང་ཟད་གང་བསྒྲུབས་པ།
དེ་ཡི་འཁོར་བར་ལུས་ཅན་ཉམས། འཁོར་བ་མེད་པར་འགྱུར་བར་ཤོག། 72

དེ་ལྟར་དམིགས་ནས་མི་བདག་གིས། ཅམ་པ་ཀ་ཤིང་ལོ་མ་ལ།
སྨྲ་ཚོགས་ཀྱིས་བདགས་བཅད་ནས་མགོ། གཉིས་སྐྱེས་ལ་ནི་རབ་ཏུ་བྱིན། 73

དེ་ནས་མི་ཡི་བདག་པོའི་སྙིང་སྟོབས་སྤྲོ་ཞིང་གསལ་བའི་སྨོན་ལམ་དང་།
གང་ཡང་དྲི་མེད་བསོད་ནམས་སྣང་བ་ཕྱོགས་མཐར་ཉམས་པར་འཕྲོ་བ་ཡིས།
རྨོངས་པའི་མུན་ཆེན་ཉམས་པར་སེལ་ཞིང་ཡོངས་སུ་རྒྱུང་འདྲས་ལ་བརྟེན་དང་།
སྲིད་པར་གཏམས་པའི་ངལ་བ་རབ་སེལ་འགྲོ་ལ་སྐད་ཅིག་དག་གིས་གྱུར། 74

उद्यानदेवता दृष्ट्वा तं शिरश्छेत्तुमुद्यतम् ।
मा कृथाः साहसं राजन्नित्युवाच शुचाकुला ॥ ६८ ॥

कम्पमानाः प्रलापिन्यस्तं मत्तालिकुलस्वनैः ।
न्यवारयन्नवलता लोलपल्लवपाणिभिः ॥ ६९ ॥

सोऽपि निश्चलसंकल्पः प्रसाद्योद्यानदेवताम् ।
विमलां बोधिमालम्ब्य बभूव प्रणिधानवान् ॥ ७० ॥

अस्मिन् रत्नमयोद्याने पुण्यराशिसमुन्नतम् ।
स्तूपमस्तु प्रशास्तुस्तु सत्त्वसन्तारणोचितम् ॥ ७१ ॥

यत्किञ्चिदर्जितं पुण्यं संकल्पेन मयामुना ।
भवन्तु तेन संसारे निःसंसाराः शरीरिणः ॥ ७२ ॥

ध्यात्वेति चम्पकतरोः शाखायां नृपतिः शिरः ।
बद्ध्वा कचकलापेन छित्त्वा प्रादात् द्विजन्मने ॥ ७३ ॥

अथ नरपतेः सत्त्वोत्साहस्फुटप्रणिधानतः
किमपि विमलैः पुण्यालोकैर्दिगन्तविसारिभिः ।
विगलितमहामोहौघान्तः श्रितः परिनिर्वृतिम्
प्रविरतभवाभ्यासायासः क्षणादभवज्जनः ॥ ७४ ॥

དེ་ལྟར་སྨོན་སྨྲེས་སྤྱོད་པའི་མཐའ། བཤད་ནས་བཅོམ་ལྡན་རྒྱལ་བ་ཡིས།
སྦྱིན་པ་དག་པའི་དམ་ཆོས་དག། དགེ་སློང་རྣམས་ལ་བསྟན་པ་བསྒྲུབས། 75

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས། ཟླ་བའི་འོད་ཀྱི་རྟོགས་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་པའོ།།

इति प्राग्जन्मवृत्तान्तकथया भगवान् जिनः।
भिक्षूणां विदधे शुद्धदानसद्धर्मदेशनाम्॥ ७५॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां चन्द्रप्रभावदानं नाम पञ्चमः पल्लवः।

Chapter VI.

བ་ད་རའི་གླིང་དུ་འགྲོ་བའི་རྟོགས་བརྗོད་ནི།

ཡལ་འདབ་དྲུག་པ།

༄༅། །སྦྱིན་པ་ལ་བརྩོན་བརྩོན་འགྲུས་ཀྱི་ཆའི་གནས།
དགེ་བའི་བདག་ཉིད་སྙིང་སྟོབས་ཀྱི་མཚོ་དང་།
སྐྱོ་བ་ཆེ་ལྡན་རྣམས་ནི་གཞན་དོན་ལ།
ཀྱེ་མ་བསམས་ཀྱིས་མི་ཁྱབ་བཞེད་པ་ཡིན། 1

གང་ཞིག་མཁར་སྒོག་རི་བོ་སྲུལ་བཅས་དག་ལ་རྩེ་དགས་པ་གམ་ལ་འཛེགས་དང་།
གང་དག་རྒྱ་མཚོགས་འཁྲུག་ཅིང་གཉེན་འཕྲོར་གྱི་མཚོ་དག་ལ་རོལ་པས་བ་ལང་རྫེས།
གང་ཡང་ནགས་ཚལ་སྟུག་པོའི་ཁྲོན་ལ་དགའ་བདེར་ཁང་པའི་ཐང་བཞིན་འགོད་
བྱེད་པ།
དེ་ནི་བདག་ཉིད་ཆེ་རྣམས་སྙིང་སྟོབས་ཀྱིས་བསྐྱབས་ཀྱིས་པའི་བརྩོན་འགྲུས་རྣམ་
རྒྱན་ཡིན། 2

སྟོན་ནི་སངས་ཀྱིས་བཅོམ་ལྡན་འདས། མན་ངག་རབ་དུ་གསལ་བ་ཡིས།
མཉན་ཡོད་གྲོང་ཁྱེར་པ་རྣམས་ཀྱིས། མི་ཤེས་ལས་སྐྱེས་མུན་པ་གསལ། 3

षष्ठः पल्लवः ।

बदरद्वीपयात्रावदानम् ।

दानोद्यतानां पृथुवीर्य्यभाजां
शुद्धात्मनां सत्त्वमहोदधीनाम् ।
अहो महोत्साहवतां परार्थे
भवन्त्यचिन्त्यानि समाहितानि ॥ १ ॥

हर्म्यारोहणहेलया यदचलाः स्वभ्रैः सहाभ्रंलिहा
यद्वा गोष्पदलीलया जलभरक्षोभोद्धताः सिन्धवः ।
लङ्घ्यन्ते भवनस्थलीकलनया ये चाटवीनां तटा-
स्तद्वीर्य्यस्य महात्मनां विलसतः सत्त्वोर्जितं स्फूर्जितम् ॥ २ ॥

पुरा हि भगवान् बुद्धः श्रावस्त्यां पुरवासिनाम् ।
उपदेशप्रकाशेन जहाराज्ञानजं तमः ॥ ३ ॥

དེ་ནི་ནམ་ཞིག་མ་ག་དྲར། དགེ་སློང་ཚོགས་ཀྱིས་ཡོངས་བསྐོར་ཅིང་།
ཚོང་པའི་སྐྱེ་བོའི་རྗེས་འབྲང་བཅས། རང་ཉིད་རྒྱུ་ཞིང་གཤེགས་པར་གྱུར། 4

ནོར་ཆེན་དོན་མཐུན་རྗེས་འབྲང་ཞིང་། ནགས་ཀྱི་ལམ་ནས་གཤེགས་པ་དེ།
ཆོམ་ཀུན་ཚོགས་ཀྱིས་མཐོང་གྱུར་ནས། སླུ་བའི་ནགས་སུ་ནོམ་བསམས་པ། 5

སེམས་ཅན་ཕན་དགོས་བཅོམ་ལྡན་འདས། འདི་ནི་སྔོན་ལ་གཤེགས་སུ་གཞུག།
ནོར་གྱི་ཕྱུང་པོས་གང་བ་ཡི། དོན་མཐུན་ཕྱི་ནས་གཟུང་བར་བྱ། 6

དེ་ནས་བཅོམ་ལྡན་ཀུན་མཁྱེན་གྱིས། དེ་ནོམས་འདོད་པ་མཁྱེན་གྱུར་ནས།
ནམ་འགྱུར་མི་མངའ་བཞིན་འཛུམ་པས། འདི་དག་ཅི་ཞེས་དེ་ལ་གསུངས། 7

དེ་ཡིས་རབ་དངས་འཛུམ་པ་ཡིས། སྣང་བས་རབ་རིབ་བཅོམ་པ་བཞིན།
དེ་དག་གདུག་པ་ཡོངས་བཏང་ཞིང་། སྙན་པའི་ཚིག་གིས་དེ་ལ་སྨྲས། 8

བཅོམ་ལྡན་བདག་ཅག་འཚོ་བ་འདི། སྐྱིད་པར་འོས་པ་ལས་ཀྱིས་སྦྲུལ།
གླ་རྔོན་མ་ཡིན་ཞིང་ལས་མིན། གཞན་སྐྱུང་མ་ཡིན་ཁྲིན་ལེན་མིན། 9

བདག་ཅག་གདུག་པ་ལྷན་ཅིག་སྐྱེས། རང་བཞིན་གྱིས་ནི་སྡིག་བདག་ཉིད།
ངོ་བོ་ཉིད་ཀྱི་ལས་ཀྱིས་ནི། སྦྲུལ་གྱི་མཆེ་རྣོན་ཇི་ལྟར་སེལ། 10

དེས་ན་བདག་ཅག་འཚོ་བ་ནི། ཉམས་གྱུར་མི་འོས་གཤེགས་པར་མཛོད།
ཁྱོད་ནི་གཤེགས་ན་དོན་མཐུན་གྱི། ནོར་ནོམས་ཐམས་ཅད་བདག་ཅག་འཕྲོག། 11

भिक्षुसङ्घैः परिवृतः स कदाचिद्वणिग्जनैः।
कृतानुयानो मगधात् स्वयं चारिकया ययौ ॥ ४ ॥

महार्थसार्थानुगतं व्रजन्तं वनवर्त्मना।
तं दृष्ट्वा तस्करगणः शालाटव्यामचिन्तयत् ॥ ५ ॥

एष प्रयातु भगवान् पुरः सत्त्वहिते रतः।
पश्चात् सार्थं ग्रहीष्यामः पूर्णं द्रविणराशिभिः ॥ ६ ॥

भगवानथ सर्व्वज्ञस्तेषां ज्ञात्वा समाहितम्।
किमेतदिति तानूचे निर्व्विकारस्मिताननः ॥ ७ ॥

ते तमूचुः परित्यज्य क्रौर्य्यं मधुरया गिरा।
तत्प्रसादस्मितालोकैर्विनष्टतिमिरा इव ॥ ८ ॥

भगवन् जीविकास्माकं[१] निन्द्येयं कर्म्मनिर्म्मिता।
न भृतिर्न कृषिर्नान्यरक्षणं न प्रतिग्रहः ॥ ९ ॥

सहजं क्रौर्य्यमस्माकं निसर्गकलुषात्मनाम्।
क्रियते किं स्वभावस्य देव तीक्ष्णाहिकर्णिका ॥ १० ॥

तस्मान्न वृत्तिलोपो नः कर्त्तुमर्हसि गम्यताम्।
याते तु त्वयि सार्थस्य वयं सर्व्वार्थहारिणः ॥ ११ ॥

१ Orig. जीविता।

དེ་སྐད་དེ་དག་ཚིག་ཐོས་ནས། སྙིང་རྗེ་ཡོངས་སུ་རྫོགས་པའི་ཐུགས།
བཅོམ་ལྡན་འདས་ཀྱི་བློ་གྲོས་ནི། སྐད་ཅིག་ཁྲོགས་ལ་འཕྲུང་བར་གྱུར། 12

དེ་ནས་དོན་མཐུན་ནོར་རྣམས་ཀུན། ཡོངས་བགྲངས་དེ་དང་མཉམ་པ་ནི།
དེ་ཚེ་ཐོབ་པའི་གཏེར་དག་ལས། ཆོས་ཀུན་ཚོགས་ལ་དེ་ཡིས་ཕྱིན། 13

ཡང་གཞིགས་ཕྱིན་པས་ལམ་དུ་ནི། རིམ་པ་དེ་ལྟ་བུ་ཉིད་ཀྱིས།
དོན་མཐུན་སྒྲོལ་ཕྱིར་དེ་ཡིས་ནོར། ལན་དྲུག་དེ་རྣམས་ལ་རབ་ཕྱིན། 14

ཡང་ནི་ལམ་དེ་ནས་འོང་སྟེ། རྗེས་སུ་འབྲང་དང་བཅས་དེ་ལ།
དེ་ཡི་ཟས་ནི་མགྲོན་གཉེར་བའི། བློ་གྲོས་ཆོས་ཀུན་རྣམས་ལ་བྱུང་། 15

དམ་པ་མཐོང་བས་དྲི་བྲལ་དེ། ཡང་དག་བཤད་བས་དགེ་བ་ཡང་།
འགྲོགས་ལ་གོམས་པས་ལེགས་པའི་ལམ། ཟམ་སྟེགས་དག་ནས་འགྲོ་དང་གྱུར། 16

མི་དགེ་ཐམས་ཅད་ཡོངས་ཟད་ལས། དེ་རྣམས་འདོད་པ་དག་པ་ཀུན།
དེར་ནི་བཅོམ་ལྡན་རྒྱལ་བ་དག། དྲང་པོར་གཟིགས་པས་མཁྱེན་པར་གྱུར། 17

དོན་སྤྱོད་པ་དང་དོན་མཐུན་དང་། བརྡོག་པ་གཏོང་དང་སྨིན་པར་སྨྲ།
བསྡུ་བའི་དངོས་པོར་བཞི་པོ་ལ། ངེས་པའི་བདག་ཉིད་གང་དག་དང་། 18

གང་ཞིག་སྙིང་སྟོབས་ལྡན་རྣམས་ཀྱིས། ཚངས་པ་ཡི་ནི་གནས་བཞི་པོ།
སྙིང་རྗེ་དགའ་བ་བཏང་སྙོམས་དང་། བྱམས་པ་ཞེས་བྱ་ཡོངས་འཛིན་དང་། 19

इति तेषां वचः श्रुत्वा करुणापूर्णमानसः।
दोलालोलायितमतिः बभूव भगवान् क्षणम्॥ १२॥

ततः सार्थधनं सर्व्वं परिसङ्ख्याय तत्समम्।
स ददौ चौरचक्राय तत्क्षणात्तनिधानतः॥ १३॥

तद्विधेन क्रमेणैव पुनः पथि गतागतैः।
षट्कृत्वः प्रददौ तेभ्यः सोऽर्थं सार्थस्य मुक्तये॥ १४॥

पुनश्चोपगते तस्मिन् वर्त्मना तेन सानुगे।
बभूव बुद्धिश्चौराणां तद्भोजननिमन्त्रणे॥ १५॥

दृष्ट्वा दिशन्ति वैमल्यं शुभं सम्भाषणेन च।
व्रजन्ति सङ्गमाभ्यासैः सन्तः सन्मार्गसेतुताम्॥ १६॥

तत्रातितिर्य्यग्दृष्ट्या सर्व्वं सर्व्वाकुशलसंक्षयात्।
तेषां समाहितं शुद्धं विदधे भगवान् जिनः॥ १७॥

येषां संग्रहवस्तूनि चत्वारि नियतात्मनाम्।
अर्थचर्य्या समानार्थभावस्त्यागः प्रियं वचः॥ १८॥

येषां ब्रह्मविहाराश्च चत्वारः सत्त्वशालिनाम्।
करुणा मुदितोपेक्षा मैत्री चेति परिग्रहः॥ १९॥

མ་ཆགས་ཡོངས་སུ་སྤང་བ་མེད། མ་རྨོངས་པ་དེ་དགེ་བའི་རྩ།
གསུམ་ནི་ཐུགས་ལ་ཞེན་པ་ཡིས། བདག་ཉིད་ཆེན་པོ་གང་དག་དང་། 20

སྦྱིན་དང་ཚུལ་ཁྲིམས་བཟོད་བརྩོན་འགྲུས། བསམ་གཏན་ཤེས་རབ་རྟོག་བསྟེན་ཞིང་།
ཐབས་དང་སྨོན་ལམ་ཡེ་ཤེས་དང་། སྟོབས་ཀྱི་རབ་ཏུ་བསྟེན་པའི་ཐུགས། 21

ཡོངས་སྐྱོབས་དཔའ་བོ་གཅིག་པུ་དང་། རྟག་ཏུ་གཉིས་མེད་གསུང་ཉིད་དང་།
རིག་པ་གསུམ་གྱི་གསལ་བ་དང་། དྲི་མེད་བཞི་དང་ལེགས་པར་ལྡན། 22

ཕུང་པོ་ལྔ་ལས་ནམ་གྲོལ་ཞིང་། སྐྱེ་མཆེད་དྲུག་ནི་འབྱེད་པ་དང་།
བྱང་ཆུབ་ཡན་ལག་བདུན་དང་ལྡན། འཕགས་ལམ་ཡན་ལག་བརྒྱད་ཉེར་སྟོན། 23

ཀུན་སྦྱོར་དགུས་དམན་གྲོལ་བ་ནི། སྟོབས་བཅུའི་བདག་ཉིད་ལྡན་དག་གིས།
འཇིག་རྟེན་སྐྱེ་བོའི་སྤྱོད་ཚུལ་ལ། མི་མཁྱེན་པ་ནི་ཅི་ཞིག་ཡོད། 24

དེ་ནས་ཤིན་ཏུ་སྙིང་རྗེ་ཡིས། ཞབས་ལ་མགོས་གཏུགས་དེ་དག་ལ།
དེ་བཞིན་ནོ་ཞེས་བཅོམ་ལྡན་གྱིས། དེ་ཡི་ཟས་ལ་ཞལ་གྱིས་བཞེས། 25

དེ་མཐོང་སྡིག་པ་ཟད་གྱུར་པ། དེ་དག་གིས་ནི་མཉམ་དུ་ཕྱུལ།
དགེ་སློང་ཚོགས་ཀྱིས་བསྐོར་བ་ཡིས། ཟས་ཀུན་ཚོ་ག་བཞིན་དུ་བླངས། 26

དེ་འོག་དེ་ཡི་སྨོན་ལམ་ནི། ཡེ་ཤེས་སྣང་བའི་ཐུར་མ་ཡིས།
དེ་དག་མིག་ནི་ཡང་དག་ཕྱེ། རབ་ཏུ་གསལ་བའི་གནས་མཐོང་གྱུར། 27

येषां कुशलमूलानि सक्तानि[1] त्रीणि चेतसि।
अलोभश्चापरिद्वेषोऽप्यमोहश्च महात्मनाम्॥ २०॥

दानशीलक्षमावीर्यध्यानप्रज्ञाजुषां सदा।
उपायप्रणिधिज्ञानबलैराश्रितचेतसाम्॥ २१॥

परित्राणैकवीराणां सदैवाद्वय[2]वादिनाम्।
विद्यात्रयप्रदीप्तानां चतुर्वैमल्यशालिनाम्॥ २२॥

पञ्चस्कन्धविमुक्तानां षडायतनभेदिनाम्।
सप्तबोध्यङ्गयुक्तानामार्य्याष्टाङ्गोपदेशिनाम्॥ २३॥

नवसंयोगहीनानां तेषां दशबलात्मनाम्।
किं वस्त्वविदितं लोके जिनानां जनचेष्टितम्॥ २४॥

ततस्तेष्वतिकारुण्याच्चरणालीनमूर्धसु।
तथेत्युवाच भगवांस्तद्भोज्योपनिमन्त्रणे॥ २५॥

तैस्तत्सन्दर्शनक्षीणकिल्बिषैः सममर्पितम्।
भिक्षुसङ्घैर्वृतो भोज्यं विधिवत् सर्व्वमाददे॥ २६॥

ततस्तत्प्रणिधानेन ज्ञानालोकशलाकया।
ते समुन्मीलितदृशः प्रकाशं ददृशुः पदम्॥ २७॥

---

१ Orig. शक्तानि। २ Orig. यदैवाद्वय०।

དེ་དག་འཕྲུལ་ལ་དྲག་པོར་ནི། ཆགས་བྲལ་ཡོངས་སྨིན་རབ་ཏུ་དངས།
རབ་ཏུ་བྱུང་དང་ལྡན་ཐོབ་ནས། འགྲོ་བའི་མཆོད་འོས་ཉིད་དུ་གྱུར། 28

དེ་དག་འཕྲུལ་ལ་དགེ་བ་དེ། སྔོན་དུ་ཉེ་བར་གནས་མཐོང་ནས།
དགེ་སློང་རྣམས་ཀྱིས་འདི་ཅི་ཞེས། དྲིས་ཤིང་བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས། 29

འདི་དག་བདག་དང་འབྲེལ་བ་འདི། དོན་མཐུན་བསྒྲུངས་ཤིང་སྒྲུ་བ་ཡིས།
གླིང་དུ་འགྲོ་བའི་སྐྱེ་བ་ནི། གཞན་དག་ལ་ཡང་གྲུབ་པར་གྱུར། 30

ཉམ་གྲུས་སྦྱོ་བ་སྐྲུབ་བྱེད་ཀྱིས། རབ་མཆོག་མཁས་པ་དགའ་བའི་ས།
བར་ན་སི་ཞེས་པའི་གྲོང༌། མཐོ་རིས་སྐྱེ་ཡིས་འཚམས་གྱུར་ཡོད། 31

གང་ན་དྲི་མེད་ཆུ་རླབས་ནི། འཛིན་པ་ལྷ་ཡི་གྲུན་འཛིན་དག
རྟག་དུ་ལུས་ཅན་རྣམས་ཀྱིས་སྐྱིང༌། བརྩེ་བ་བཞིན་དུ་དང་བར་བགྱིད། 32

བཟོད་པ་བཞིན་དུ་འབྱུང་པོ་ཀུན། བག་ཕབ་བདེ་བར་གནས་པ་གང༌།
འཆི་བ་མེད་བཞིན་དམ་པས་བསྟེན། རིག་པ་བཞིན་དུ་མཁས་པས་འདོད། 33

དེ་ནས་མི་བདག་ཚངས་པར་ནི། བདག་བྲ་ཉམ་གྲུས་སྤྲད་ར་བསྟེན།
ཚངས་བྱིན་ཞེས་བྱས་འཇིག་རྟེན་ནི། འཇིག་རྟེན་གསུམ་པོ་བཞིན་དུ་བསྲུངས། 34

དེར་ནི་དེད་དཔོན་དགའ་བའི་སྐྱེ། ཞེས་པ་ཉམ་ཐོས་བུ་ལྟ་བུ།
ཆུ་རྣམས་དག་གི་ཆུ་གཏེར་བཞིན། ནོར་གྱི་དོན་མཐུན་གནས་སུ་གྱུར། 35

ते सद्यस्तीव्रवैराग्यपरिपक्काः प्रसादिनः ।
प्रव्रज्यायोगमासज्य जग्मुर्जगति पूज्यताम् ॥ २८ ॥

तत् तेषां कुशलं दृष्ट्वा सङ्घसोपनतं पुरः ।
बभाषे भगवान् पृष्टः किमेतदिति भिक्षुभिः ॥ २९ ॥

एतैर्ममायं सम्बन्धः सार्थरक्षणनिष्क्रयैः ।
द्वीपयात्रागतस्यासीदन्यस्मिन्नपि जन्मनि ॥ ३० ॥

अस्ति विस्तीर्णमार्गस्य स्वर्गवर्गावधिर्विधेः ।
पुरी वाराणसी नाम कौशलोत्कर्षहर्षभूः ॥ ३१ ॥

यस्याममलकल्लोलवाहिनी सुरवाहिनी ।
सदा दयेव हृदयं प्रसादयति देहिनाम् ॥ ३२ ॥

अहिंसेव सतां सेव्या विद्येव विदुषाम्मता ।
क्षमेव सर्व्वभूतानां या विश्रम्भसुखस्थितिः ॥ ३३ ॥

ब्रह्मकल्पे नृपे तस्या विकसत्कमलाश्रये ।
ब्रह्मदत्ताभिधे लोकं[१] त्रैलोक्यमिव रक्षति ॥ ३४ ॥

प्रियसेनाभिधानोऽभूत् तत्र वैश्रवणोपमः ।
सार्थवाहोऽर्थसार्थानां स्थानमब्धिरिवाम्भसाम् ॥ ३५ ॥

---

१ Orig. लोके ।

དེ་སྐབས་ཤིན་ཏུ་དགའ་ཞེས་པ། སྐྱེས་བུ་ལེགས་པའི་གནས་སུ་གྱུར།
གང་ལ་བརྟེན་པའི་ཡོན་ཏན་ཚོགས། དོན་བྱས་ཉིད་དུ་རབ་ཏུ་གྱུར། 36

སྦྱིན་པ་ཚུལ་ཁྲིམས་བཟོད་པ་དང་། བརྩོན་འགྲུས་བསམ་གཏན་ཤེས་རབ་ལྡན།
བྱེད་པོ་རྣམ་པར་ཆགས་སྐྱད་གང་། ལེགས་བྱས་དཔལ་དུ་བྱས་པ་བཞིན། 37

དེ་ནི་དྲི་མེད་རིག་ཀུན་ནང་། སྒྲུ་ཅོལ་ཤིན་ཏུ་ཡངས་པར་ཡང་།
རོ་ལྡན་ཡིད་འོང་ཆུ་གཏེར་ཆེར། ཆུ་བོ་བཞིན་དུ་ཞུགས་པར་གྱུར། 38

སྤྱོད་པ་ཡོན་ཏན་གྱིས་བརྒྱན་ཅིང་། ལུས་ནི་མཚན་གྱིས་བརྒྱན་པ་གང་།
སྐྱེས་བུ་མཆོག་ལ་ཆགས་པ་བཞིན། བསྔགས་པར་འོས་པའི་དཔལ་གྱིས་བསྟེན། 39

བསོད་ནམས་ཀྱིས་སྤྱོས་མཐོ་རིས་སུ། ཡང་ནི་དུས་ཀྱི་ཀ་ཤེགས་པའི་ཚེ།
དེ་ཡི་ཐ་སྙད་ཁྲར་དག་ནི། ཐུག་པའི་ངོས་ལ་གནས་པར་བྱས། 40

དེ་བསམས་བདག་གི་དཔལ་འབྱོར་འདི། རིམ་པས་འོང་ཞིང་ཡངས་པ་སྟེ།
དེ་ལྟ་ན་ཡང་སྐྱོང་ཀུན་གྱིས། རེ་བ་ཡོངས་སུ་མ་རྫོགས་སྐམ། 41

སྤུར་འོངས་སྐྱོང་བས་ཟློས་ཉིད་ཚེ། གང་ཞིག་ཕྱིས་སྐྱོང་འབྲས་བུ་མེད།
སྐྱེས་བུ་དམ་པ་ལ་གནས་དཔལ། ཤིན་ཏུ་ཆེ་བ་དེས་ཀྱང་ཅི། 42

ཏེ་གཏོང་སྐྱོང་བ་གཅིག་དེ་ཡང་། གང་གིས་ད་དུང་ཡོངས་མ་རྫོགས།
རིན་ཅེན་འབྱུང་གནས་བྱེད་པོ་ཡིས། ཡངས་པར་བྱས་པའི་འབྲས་བུ་མེད། 43

तस्यासीत् सुप्रियो नाम सौजन्यनिलयः सुतः ।
प्रययौ यं समाश्रित्य गुणसार्थः[1] कृतार्थताम् ॥ ३६ ॥

दानशीलक्षमावीर्य्यध्यानप्रज्ञासमन्वितः ।
धात्रा विलोभनायैव यः कृतः सुकृतश्रियः ॥ ३७ ॥

तं सर्व्वविद्या विशदाः कलाश्च विपुलाशयम् ।
विविशुः सरसोदारा महोदधिमिवापगाः ॥ ३८ ॥

गुणालङ्कृतचारित्रं लक्षणालङ्कृताकृतिम् ।
पुरुषोत्तमलुब्धेव यं श्लाघ्यं श्रीरशिश्रियत्[2] ॥ ३९ ॥

कालेन सुकृतकीर्तं पितरि त्रिदिवं गते ।
चक्रे स्कन्धतटे तस्य व्यवहारभरः स्थितिम् ॥ ४० ॥

सोऽचिन्तयदियं लक्ष्मीर्विपुलात्मक्रमागता ।
तथापि मन्ये पर्य्याप्ता न सर्व्वार्थिमनोरथे ॥ ४१ ॥

किं तया सुमहत्यापि श्रिया सत्पुरुषस्थया ।
पूर्व्वागतार्थिभुक्तेव या शेषार्थिषु निष्फला ॥ ४२ ॥

रत्नाकरस्य वैपुल्यं निष्फलं वेधसा कृतम् ।
अद्यापि पूरितो येन नैकोऽप्यर्थी स वाड़वः ॥ ४३ ॥

१ Orig. omits the word गुण in गुणसार्थ० ।
२ Orig. श्रीरश्रिश्रियत् ।

ཡང་ན་བཙོག་པ་ཀྱི་ཆེ་བའི། སྣོང་བ་སྲུ་ཡི་ཡོངས་རྫོགས་དེ།
ཨ་ག་སྟྱ་ཡི་ཁྲོར་ཆུ་ཡིས། ཧུབ་དུ་ཀྱི་མཚོ་ཆེན་པོ་སོང་། 44

དཔལ་ནི་གཅིག་ལ་སྣོང་བ་མང་། སྣོང་བ་ཀུན་ཁེངས་བཟོད་་པ་གང་།
ནོར་དེ་བདག་གིས་ཡོངས་མི་འཐོབ། ཅི་བྱ་འདི་ནི་ཤིན་དུ་གདུང་། 45

དཔལ་དང་ནོར་བྲུ་ལ་སོགས་ཀྱིས། ལྷ་དྲུག་ཉིད་ཁེངས་གཞན་མིན་ཞེས།
ཆུ་གཏེར་ད་དུང་རྡོ་གདོང་མི། གདུང་བ་ནང་དུ་འབར་བ་བཞིན། 46

སྣོང་བ་ཕྱིར་ཕྱོགས་ཁ་ཡིས་ནི། སྡུག་བསྔལ་ཤུགས་རིངས་ཡོངས་མི་བཟོད།
དེ་སྐད་བདག་གིས་འབད་པ་ཡིས། གྲངས་མེད་ནོར་ནི་བསྒྲུབ་པར་བྱ། 47

དེ་ལྟར་ཡུན་རིང་བསམས་ནས་དེ། དོན་མཐུན་ཆེན་པོས་བསྐོར་ནས་ནི།
རིན་ཅེན་གླིང་གི་གྲོང་ཁྱེར་དུ། ཕྱིན་ནས་རིན་ཅེན་བསྡུ་བ་བྱས། 48

དེ་འོག་དོན་གྲུབ་སླར་ལོག་སྟེ། འོང་བ་དེ་ནི་ཆོམ་ཀུན་པ།
དོན་མཐུན་ནོར་འཕྲོག་སྦྱོར་བ་ལ། ནགས་ན་ཀྱི་བས་ལམ་དུ་མཐོང་། 49

དེ་དག་དོན་མཐུན་ནོར་བསྲུང་ཕྱིར། བབ་ཅོལ་དུ་སྦྱོར་རེས་མཐོང་ནས།
རང་གི་ནོར་ཀུན་བྱིན་ནས་ནི། རྗེས་སུ་འབྲང་བའི་ནོར་ཚོམས་བསྲུངས། 50

ཕྱི་ནས་རིམ་པ་དེ་བཞིན་ཉིད། རིན་ཅེན་གླིང་གི་འགྲོ་འོང་གིས།
དོན་མཐུན་བསྒྲུབ་ཕྱིར་ཆོམ་ཀུན་ལ། ནོར་ནི་ལན་དྲུག་རབ་དུ་བྱིན། 51

अथवा पृथुसङ्कल्पः केनार्थी परिपूर्य्यते ।
जगामाब्धिरगस्त्यस्य चुलुकाचमनीयताम् ॥ ४४ ॥

किं करोम्यतितापोऽयं श्रीरेका बहवोऽर्थिनः ।
न तदासाद्यते वित्तं यत् सर्व्वार्थिभरक्षमम् ॥ ४५ ॥

पञ्च षट् पूरिता एवं नान्ये श्रीकौस्तुभादिभिः ।
इतीवाद्यापि तप्तोऽन्तर्ज्वलदौर्व्वानलोऽम्बुधिः ॥ ४६ ॥

तस्मात् करोमि यत्नेन निःसङ्ख्यद्रविणार्ज्जनम् ।
न सहे दुःखनिःश्वासं विमुखस्य मुखेऽर्थिनः ॥ ४७ ॥

इति सञ्चिन्त्य स चिरं सार्थेन महता वृतः ।
रत्नद्वीपपुरं गत्वा विदधे रत्नसंग्रहम् ॥ ४८ ॥

ततः प्रतीपमायान्तं कृतार्थन्तं वनेचराः[१] ।
सार्थार्थहरणोन्मुक्ता ददृशुर्दस्यवः पथि ॥ ४९ ॥

सार्थार्थहरणे दृष्ट्वा स तेषां साहसोद्यमम् ।
निजसर्व्वस्वदानेन संररक्षानुयायिनम्[२] ॥ ५० ॥

पुनः क्रमेण तेनैव रत्नद्वीपगतागतिः ।
सार्थत्राणाय चौराणां षट्कृत्वः प्रददौ धनम् ॥ ५१ ॥

---

१ Orig. कृतार्थं वनेचरः । २ Orig. संरक्षानुयायिनम् ।

ཕྱིས་ཀྱང་ལམ་ནི་དེ་ཉིད་ནས*། འོངས་པས་དེ་བཞིན་ཆོས་ཀུན་པ།
དོན་མཐུན་ནོར་ནི་འཕྲོག་པ་ལ། ལྷག་པར་བགོམ་པ་དེ་དག་མཐོང་། 52

དེས་བསམས་ཀྱི་མ་བདག་གི་ནོར། ཆེན་པོ་ཡིས་ནི་ཡོངས་སུ་སོས།
འདི་དག་ཕ་རོལ་ནོར་འཕྲོག་ལ། བརྩོན་པ་ལས་ནི་ཕྱིར་མ་ལོག། 53

ནོར་གྱིས་འགྲོ་བ་ཁེངས་གྱུར་ཞིང་། བདག་གིས་ཡང་ཡང་བཟློད་གྱུར་ཀྱང་།
ཀྱི་མ་མ་ལ་ཆོས་ཀུན་ནི། གདུག་པ་འདི་དག་ཡོངས་ས་ཁེངས། 54

རིགས་པའི་སྒྲོ་བ་ཞན་གྱུར་ཅིང་། ལན་སྨྲ་ཀུན་དུ་བཅོམ་པ་དང་།
སྨད་པར་འོས་པའི་རྣམ་བཅའ་བཞིན། ངན་པ་སྐྱེས་པ་བདག་སྐྱེ་སྨད། 55

དེ་ལྟར་སེམས་ཤིང་འགྲོད་པ་ཡི། མ་ཡིས་རབ་དུ་གདུངས་པ་དེ།
སྐྱེ་བོ་མེད་པར་མཚན་མོ་ནི། ལོ་བརྒྱ་ལྟ་བུར་རབ་དུ་གྱུར། 56

སྲུ་ངན་འདམ་དུ་བྱིང་བ་ཡི། གླང་པོའི་དབང་པོ་བཞིན་མི་གཡོ།
དབུགས་རིང་དེ་ལ་མི་ལམ་དུ། ལྷ་ནི་མཐུ་ཆེན་ལྡན་པས་སྨྲས། 57

བློ་བཟང་སྲུ་ངན་མ་བྱེད་ཅིག། དོན་མེད་ལུས་ནི་རབ་སྐྱེམ་ཡིན།
ནམ་བརྟགས་དམ་པར་མངོན་འཇོགས་པ། ཁྱེད་ཀྱི་འདོད་པ་འབྱུང་བར་འགྱུར། 58

---

* ཕྱིས་ཀྱང་ལམ་ནི་དེ་ཉིད་ནས་ཞེས་པའི་ཚིག་རྐང་གཅིག་པོ་འདིའི་སྐད་དོད་མི་འདུག་པ་རྐང་པ་གཞན་རྣམས་དང་མཐུན་པ་ལ་སློ་ཅན་པའི་རྩེ་བ་སློར་ཙ་འདར་ལོས་བསྒྲིགས་པ་ཚེ་དཔེ་ཉིད་ན་བྱུང་།

तथैव त्वां पुण्यविपन्वानिसंप्राप्तस्तथैव[1]।
तान् ददर्श चौरान् सार्थार्थहरणेऽधिकादरान्॥ ५२॥

सोऽचिन्तयदहो वित्तैर्महद्भिः परिपूरिताः।
मयैते न निवर्त्तन्ते परार्थहरणोद्यमात्॥ ५३॥

जगत् सम्पूरयाम्यर्थैरित्युक्तापि मया सकृत्।
अहो नु दस्यवो नैते वराकाः परिपूरिताः॥ ५४॥

उचितोत्साहहीनस्य व्याहतोत्तरवादिनः।
विकत्थनप्रतिज्ञस्य धिङ्मे जन्म कुजन्मनः॥ ५५॥

इति चिन्तयतस्तस्य तप्तस्यानुशयाग्निना।
विजने प्रययौ रात्रिः सम्वत्सरशतोपमा॥ ५६॥

तं शोकपङ्कसंमग्नं[2] गजेन्द्रमिव निश्चलम्।
दीर्घोच्छ्वासं महेशाख्या स्वप्ने प्रोवाच देवता॥ ५७॥

सुमते मा कथाः शोकं शरीरोच्छोषणं वृथा।
सत्सङ्कल्पाभिरूढस्य भविष्यति तवेप्सितम्॥ ५८॥

---

१ The original of this line was lost. The present line which was composed by *B*dar Locháva is quite unintelligible.

२ Orig. ०सदुज्जम्।

བློ་ལྡན་བརྩོན་འགྲུས་ཅན་རྣམས་ཀྱིས། འབད་པས་འགྲུབ་པར་མི་འགྱུར་བ།
སྲི་ལམ་རྣམ་རྟོག་རྙེད་དཀའ་དང་། འཇིག་རྟེན་འདི་ན་དེ་ཡོད་མིན། 59

གང་ཡང་ནུས་པ་དེ་དཔེ་མེད། གང་ཞིག་གཉིས་སྐྱེས་གཅིག་གི་ཡང་།
གསུང་གི་ཀུ་ལ་ཀ་ཁོ་ན་ཡིས། འབིགས་བྱེད་ས་དང་མཚུངས་པར་གྱུར། 60

བདག་ཉིད་ཆེན་པོའི་བྲོ་བའི་དུས། མི་མཉམ་པ་ཡང་མཉམ་པར་འགྱུར།
རིང་བ་རྣམས་ཀྱང་ཉེ་བར་འོང་། རྒྱ་ཡང་སྐམ་ས་ཉིད་དུ་གྱུར། 61

གཞན་དོན་ཁྲིད་ཀྱི་བརྩོན་པ་འདི། འབྲས་བུ་ཉིད་དུ་ཐེ་ཚོམ་མེད།
སྙིང་སྟོབས་སྦྱོད་པ་སླུ་བ་ཡིས། ཐེ་ཚོམ་ལ་ཡང་མི་འབྱུང་ངོ་། 62

ལྷ་རྣམས་ཀྱིས་བསྙེན་བ་ད་རའི། གླིང་ན་རིན་པོ་ཆེ་དག་ཡོད།
གང་ཞིག་གཅིག་གི་མཐུ་ཡིས་ཀྱང་། འཇིག་རྟེན་གསུམ་པོ་ཁེངས་པར་མཛོད། 63

གང་ཕྱིར་མི་ཡི་ས་འདས་ནས། དེ་ནི་ཤིན་དུ་ཆེ་བའི་ས།
བསོད་ནམས་རང་བཞིན་གྱིས་འཐོབ་སྟེ། སྙིང་སྟོབས་ལེགས་བྱས་མིན་པས་མིན། 64

བྲུ་དག་ཡིད་ནི་གདུང་བ་ཐོང་། བརྟན་པའི་བློ་གྲོས་རྣམ་པར་བསྐྱབས།
བ་ད་ར་ཡི་གླིང་འགྲོ་ལ། རབ་དུ་སྤྲོ་བ་ཡོངས་སུ་ཟུངས། 65

ཁྲིད་ནི་སྙིང་སྟོབས་མཐུ་གྱིས་ཤིང་། འཁོར་བ་རབ་དུ་སྐྱོལ་བར་བཟོད།
དེ་ཐོབ་བྲུ་ཕྱིར་ཕྱོགས་དང་ནི། ལམ་གྱི་རིམ་པ་འདི་དག་ཉོན། 66

न तदस्ति जगत्यस्मिन् स्वप्नसङ्कल्पदुर्लभम् ।
यन्न सिध्यति यत्नेन[1] धीराणां व्यवसायिनाम् ॥ ५९ ॥

सा काप्यनुपमा शक्तिरेकस्यापि द्विजन्मनः ।
यदाज्ञास्यन्दितेनैव विन्ध्यः क्ष्मासमतां ययौ ॥ ६० ॥

विषमं समतां याति दूरमायाति चान्तिकम् ।
सलिलं स्थलतामेति कार्य्यकाले महात्मनाम् ॥ ६१ ॥

परार्थोऽयं तवारम्भः फलत्येव न संशयम् ।
न भवन्ति विसम्वादसन्दिग्धाः सत्त्ववृत्तयः ॥ ६२ ॥

रत्नानि वदरद्वीपे सन्ति त्रिदशसेविते ।
येषामेकप्रभावोऽपि त्रिजगत्पूरणक्षमः ॥ ६३ ॥

मर्त्त्यभूमिमतिक्रम्य सा हि भूमिर्महीयसी ।
आसाद्यते पुण्यमयी नासत्त्वैर्नाकृतात्मभिः ॥ ६४ ॥

विषादस्त्यज्यतां पुत्र स्थिरा बुद्धिर्विधीयताम् ।
वदरद्वीपयात्रायामुत्साहः परिगृह्यताम् ॥ ६५ ॥

श्रूयतामेष तत्प्राप्त्यै दिङ्मात्रानुक्रमक्रमः ।
स्फीतसत्त्वप्रभावस्त्वं संसारोत्तरणक्षमः ॥ ६६ ॥

---

१ Orig. सिध्यत्ययत्नेन ।

ནུབ་ཀྱི་ཕྱོགས་ཀྱི་ཆ་ན་ཡོད། ཤིན་དུ་ཆེ་བའི་གླིང་དག་ནི།
བདུན་བརྒྱ་རབ་དུ་འདས་གྱུར་ཅིང་། དེ་བཞིན་དུ་ནི་རིན་ཆེན་བདུན། 67

རྒྱ་སྐྱང་བདུན་དང་རྫེས་འགྲོ་དང་། བཟློག་འགྲོ་ཞེས་བའི་རྒྱ་ཡི་གཏེར།
རྫེས་སུ་མཐུན་པའི་རླུང་གིས་དེར། ཕ་རོལ་འཐོབ་པོ་བསོད་ནམས་ཅན། 68

དེ་ནས་དེ་མཚུངས་མིང་ཅན་རི། རླུང་གིས་རབ་རིབ་སྨོངས་པར་བྱེད།
སྨན་ཆེན་དོན་ཡོད་ཅེས་པ་ཡིས། མིག་གཉིས་གང་དུ་ནོལ་གནས་སྟེར། 69

དེ་ནས་ཀུན་འཁོར་ཞེས་རྒྱ་གཏེར། གང་དུ་རླུང་ནི་བེ་དྲམ་བྲས།
འཁྲིང་ཞིང་འབྱུང་བས་སྲོག་ཆགས་ནམས། ཀུན་འཁོར་བདུན་ལས་སྐྲོལ་བར་བྱེད།
70

དེ་ནས་ཀུན་འཁོར་ཞེས་པའི་རི། གང་ན་མཚན་གྲུ་དུང་གི་ལྡེ།
འཛིགས་སུ་རུང་ཞིང་སྲོག་འཕྲོག་པ། སྐབས་གསུམ་པ་ཡང་སྐྲག་བྱེད་གནས། 71

དེ་ན་སྨན་ཆེན་དུང་གི་ལྡེ། སྦྲུལ་ནི་ནག་པོས་དཀྲིས་གྱུར་པ།
མིག་དང་མགོ་ལ་བཞག་པ་ན། བསོད་ནམས་ལྡན་པ་ཡོངས་སུ་སྐྱོབ། 72

དེ་ནས་རྒྱ་སྔོན་ཞེས་པའི་མཚོ། གང་ན་སྲིན་པོའི་མིག་དམར་ཡོད།
མ་ཀིར་ཞེས་བྱའི་སྨན་འཛིན་དང་། སངས་རྒྱས་རིག་བྱེད་རིག་པའི་དབང་། 73

དེ་ནས་རྒྱ་སྔོན་ཞེས་པའི་རི། གང་ན་མགྲིན་པ་སྔོན་པོ་ནི།
མཚན་གྲུ་མིག་ནི་རབ་འབར་བ། སྲིན་པོ་ལྔ་བརྒྱ་དག་དང་གནས། 74

अस्ति पश्चिमदिग्भागे समुल्लङ्घ्य महीयसाम्[१] ।
शतानि सप्त द्वीपानां तथा सप्त महाचलान् ॥ ६७ ॥

सप्तापगाश्चानुलोमप्रतिलोमाभिधोऽम्बुधिः ।
अनुकूलानिलैर्यस्मिन् पारमाप्नोति पुण्यवान् ॥ ६८ ॥

ततस्तन्तुल्यनामाद्रिर्वातैस्तिमिरमोहकृत् ।
यत्राक्ष्णोर्दिशति स्वास्थ्यममोघाख्या महौषधिः ॥ ६९ ॥

अथावर्त्ताभिधोऽम्भोधिर्वैरम्भैर्यत्र वायुभिः ।
मज्जनोन्मज्जनैर्जन्तुः सप्तावर्त्तेषु तार्य्यते ॥ ७० ॥

आवर्त्ताख्यस्ततः शैलः शङ्खनाभो निशाचरः ।
घोरः प्राणहरो यत्र त्रिदशत्रासकृत् स्थितः ॥ ७१ ॥

कृष्णसर्पावृता यत्र शङ्खनाभिर्महौषधिः ।
त्रायते पुण्यसम्पन्नं नेत्रे शिरसि चार्पिता[२] ॥ ७२ ॥

अथ नीलोदनामाब्धीरक्ताक्षो यत्र राक्षसः ।
मकर्य्याधिभूतां बहुविद्याविद्वान् वशे[३] ॥ ७३ ॥

अथ नीलोदनामाद्रिर्नीलग्रीवः क्षपाचरः ।
प्रदीप्तनेत्रो यत्रास्ते रक्षसां पञ्चभिः शतैः ॥ ७४ ॥

---

१ Orig. महायसाम् । २ Orig. चार्पितम् ।
३ This line is hopelessly corrupt.

དེ་ན་དོན་ཡོད་ཅེས་པའི་སྨན། མགྲོང་དང་དབུགས་དང་རིག་པ་དང་།
མཆི་བ་རབ་སྒྲོས་དུག་གི་མེ། དོག་ཏུ་སྦྲུལ་གྱི་དུག་ཉམས་སྐྱུང་། 75

གསོ་སྦྱོང་བརྟུལ་ཞུགས་ལྡན་པ་དང་། བྱམས་དང་སྙིང་རྗེའི་བདག་ཉིད་ཀྱིས།
སྦྲུལ་ནི་ནག་པོ་རབ་བསྒྲད་ནས། སྨན་ཆེན་དེ་ནི་ཐོབ་པར་འགྱུར། 76

དེ་ཡིས་མིག་སྨན་ཟུར་ཕུད་ནི། བྲུས་ནས་སྦྱིན་པོའི་ཤིང་དུ་རི།
འབྲས་མེད་བྲུག་པ་ཕྲུ་མོ་ཅན། བསོད་ནམས་ལྡན་བས་སྒྲོལ་བར་འགྱུར། 77

དེ་ནས་བེ་རམ་བྷྲ་ཞེས་རི། དེ་རྗེས་གང་གིས་ཕ་རོལ་གཞན།
འཇིགས་རུང་ཟངས་ཀྱི་ནགས་ཞེས་པ། སྦུ་ལ་ཆེན་པོའི་ནགས་ཀྱི་ནང་། 78

དེ་ན་སྦྲུལ་ནི་སྦྲུམ་ཆེན་དག། ཟངས་མིག་ཅེས་པ་བཟློད་དཀའ་བ།
དྲག་པོའི་དྲི་ལྡན་གང་གི་རླུང་། ཉིད་ཀྱིས་འཆི་བར་མི་བྱེད་གནས། 79

ཀླུ་བ་དྲུག་ཏུ་ཉལ་གྱུར་པའི། ཁ་རྒྱུ་ཡི་ནི་དཔག་ཚད་ཁྲུབ།
ལྟོགས་པས་གདུངས་ནས་ཀླུ་དྲུག་ནི། གཉིད་དང་བྲལ་བས་རྒྱུང་བར་གྱུར། 80

འོད་མའི་ཙ་བ་རྩོས་བསྐམས་ཕྱུག། རབ་ཏུ་ཕྱེ་བས་དྲི་དང་ལྡན།
ཉིན་དང་མཚན་དུ་རབ་འབར་བ། མིག་སྨན་དུ་འོས་སྨན་ཐོབ་འགྱུར། 81

སྣང་མེད་ཅེས་པ་སངས་རྒྱས་ཀྱི། རིག་པ་བཟླས་པས་སྦྲུམ་ཆེན་ནི།
འཇིགས་རུང་དེ་དང་གཟི་བརྗིད་ཆེ། གཞན་གྱིས་ཀྱང་ནི་འཇིགས་མི་འགྱུར 82

तत्रौषधिममोघाख्यां रक्षत्याशीविषः सदा।
दृष्टिनिःश्वाससंस्पर्शदंष्ट्रोत्सृजद्विषानलः ॥ ७५ ॥

उपोषधव्रतवता मैत्रेण करुणात्मना।
लभ्यते सा समुत्सार्य्य कृष्णसर्पं महौषधिः ॥ ७६ ॥

तं रक्षःशकटं शैलं निष्फलश्लक्ष्णकन्दरम्।
तामञ्जने शिखायाञ्च कृत्वा तरति पुण्यवान् ॥ ७७ ॥

अथ वरम्भनामाद्रिः पारे यस्योत्तरा तटे।
घोरा ताम्राटवी नाम महाशालवनान्तरा ॥ ७८ ॥

महानजगरस्तत्र ताम्राक्षो नाम दुःसहः।
आस्ते यस्योग्रगन्धेन वायुनैव न जीव्यते ॥ ७९ ॥

षण्मासान् स्वपतो यस्य लाला व्याप्नोति योजनम्।
क्षुत्सन्ततस्य षण्मासानल्पीभवति जाग्रतः ॥ ८० ॥

वेणुगुल्मशिलाबद्धां गुहामुत्पाद्य मेदिनीम्।
प्राप्यौषधीं दिवारात्रं ज्वलन्तीमञ्जनोचिताम् ॥ ८१ ॥

तस्मादजगराद्घोरादन्यतो[1] वा महौजसः।
अवैराख्यां बुद्धविद्यां जपतो न भवेद्भयम्[2] ॥ ८२ ॥

१ Orig. घोरान्यतः। २ Orig. भवेर्भयः।

དེ་ནས་རི་ནི་ཆེ་བ་བདུན། འོད་མའི་ཚོར་མས་གདམས་གྱུར་པ།
ཟངས་གླིགས་ཀྱིས་མཚན་ཀང་པ་ཡིས། བརྩོན་འགྲུས་ལྡན་པས་ཐར་པར་འགྱུར། 83

དེ་རྗེས་ཤལ་མ་ལི་ནགས་དང་། འགྱུར་བྱེད་ཀྱུ་སྐྱུང་ནམ་བདུན་དག།
བགོལ་ནས་རྩེ་གསུམ་ཞེས་པའི་རི། རབ་ཏུ་མཐོ་བ་དག་ཏུ་སླེབས། 84

དེ་ན་རྩེ་གསུམ་ཞེས་པ་ཡིས། ཚོར་མ་རྡོ་རྗེ་འབིགས་བྱེད་ཡོད།
ཟངས་ཀྱི་གླིགས་བུ་ངེས་སྦྲུར་བའི། ཀང་པ་དག་ལ་མི་འཛུག་གོ། 85

ཀྱུ་སྐྱུང་རྩེ་གསུམ་ཞེས་པ་དང་། དེ་ན་ལྕགས་ཀྱི་རྩེ་ཡི་རི།
ཀྱུ་སྐྱུང་ངོས་དང་ལྕགས་ཐུར་གྱི། རི་བོ་དེ་ནས་དེ་ལྟའི་སྐྱུང་། 86

དེ་ནས་བཙོ་བསྐྱེད་འཁྱོག་ཅེས་པའི། རི་བོ་བསྐྱོད་པར་དཀའ་བ་དང་།
དེ་ནས་དེ་དང་མིང་མཚུངས་སྐྱུང་། དེ་རྗེས་ཐྲ་མོ་ཞེས་པའི་རི། 87

དེ་ནས་དུ་བའི་མིག་ཅེས་རི། ཕྱོགས་ངོས་དུ་བས་ཚིག་གྱུར་པ།
མ་རུང་སྤྲུལ་གདུག་དཀྱིལ་འཁོར་གྱི། མཐོང་བ་རེག་པའི་དུག་གིས་ཁྱབ། 88

དེ་ཡི་རྩེ་ན་རྫིང་བུའི་མཐའ། རྡོ་བས་བཅིངས་པའི་ཕུག་ཆེན་པོ།
ཕུག་ནང་ནོར་བུ་འོད་ཁྱེང་དང་། སྨན་ཆེན་འཚོ་བྱེད་ཅེས་པ་ཡོད། 89

དེ་ཕྱི་དེ་ཡིས་མགོ་དང་ནི། ཀང་ལག་ལྟོ་ལ་མངོན་པར་བྲུགས།
གསང་སྔགས་སྟོབས་དང་བཅས་བགྲོད་ན། མ་རུང་སྤྲུལ་གྱིས་གནོད་མི་འགྱུར། 90

ततः सप्त महाशैला वेणुकण्टकसङ्कटाः।
ताम्रपट्टाङ्कपादेन तीर्य्यन्ते वीर्य्यशालिनः ॥ ८३ ॥

ततश्च शाल्मलीवनं सप्त क्षारतरङ्गिणीः।
उत्तीर्य्यासाद्यते प्राङ्गुस्त्रिशङ्कुर्नाम पर्व्वतः ॥ ८४ ॥

तत्र त्रिशङ्कवो नाम कण्टका वज्रभेदिनः।
पादयोर्न विशन्त्येव ताम्रपट्टावनद्धयोः ॥ ८५ ॥

त्रिशङ्कुर्नाम तटिनी तत्रायःशङ्कुपर्व्वतः।
उपस्कीलनदी तत्र ततो द्विधा द्विधा सरित्[१] ॥ ८६ ॥

अथाष्टादशवक्राख्यः पर्व्वतो निरवग्रहः।
तत्तुल्यसंज्ञाथ नदी श्लक्ष्णो नाम गिरिस्ततः ॥ ८७ ॥

अथाद्रिधूमनेत्राख्यो धूमनिर्द्दिग्धदिक्तटः।
दृष्टिस्पर्शविषैर्व्याप्तः क्रूराशीविषमण्डलैः ॥ ८८ ॥

तन्मूर्ध्नि पल्वलस्यान्तः शिलाबद्धा महागुहा।
ज्योतीरसो मणिर्यस्यां जीवनी च महौषधिः ॥ ८९ ॥

भित्त्वा गुहां तदभ्यक्तशिरःपादकरोदरः।
व्रजन्मन्त्रबलोपेतः क्रूरसर्पैर्न बाध्यते ॥ ९० ॥

---

१ Orig. नदी तदुपस्कीलः ततोद्विस्त्राद्विधा सरित्।

དེ་ནས་སྦྲུལ་གདུག་རི་བོང་བདུན། སེམས་ཅན་དྲག་པོས་ཀུན་དུ་ཁེངས།
དེ་ལྟའི་ཆུ་ཀླུང་དག་ཀྱང་སྐེ། ཆུ་ཡི་ཕྱུན་ཚོགས་པ་མཐའ་མེད། 91

དེ་དག་མ་ལུས་རབ་བཀོལ་ཏེ། གཞན་ཕན་བརྩོན་པ་བསོད་ནམས་ཀྱིས།
རྩེ་མོ་མཁའ་ལ་རེག་གྱུར་པ། དཀར་བའི་རི་ལ་འཛེག་པར་འགྱུར། 92

དེ་ནས་དེ་ཡི་ངོས་གཞན་ལ། རོ་ཧི་ད་ཀི་ཞེས་གྲོང་ཁྱེར།
དཔག་བསམ་ཤིང་གིས་ཉེ་བར་མཛེས། མཐོ་རིས་དང་མཚུངས་མཐོང་བར་འགྱུར། 93

དེ་ན་དེད་དཔོན་སྙིང་སྟོབས་ནི། ཆེན་པོ་མ་ག་ཞེས་པ་ཡོད།
ད
སེམས་ཅན་ཀུན་ལ་ཕན་པར་དགྱེས། བརྒྱ་བྱིན་བཞིན་དུ་ནམ་པར་གྲགས། 94

ཞེས་བཟང་བློ་གྲོས་སྐྱོན་མེད་ངེས། པ་ད་ར་ཡི་གླིང་དག་ཏུ།
འགྲོ་བར་བརྩོན་པ་ཁྱོད་ཀྱིས་ནི། ལམ་གྱི་གདམས་ངག་ཀུན་བྱེད་འགྱུར། 95

འདི་བརྗོད་བདུད་རྩིའི་རླན་གྱིས་བཞིན། འོས་པའི་ཚིག་གིས་ཤིན་ཏུ་དགའ།
མང་དུ་སྨྲ་བ་བསྐྱེད་བྱས་ནས། ལྷ་མོ་འཕྲུལ་ལ་མི་སྣང་གྱུར། 96

ཤིན་ཏུ་དགའ་ནི་རབ་སད་ནས། ཐམས་ཅད་དེ་དེ་བཞིན་ཞེས་བསམས།
རང་གི་སྨྲ་བ་སྟོན་བཏང་ནས། སྙིང་སྟོབས་ལ་ནི་ཞོན་ཏེ་ཆས། 97

དེ་ཡིས་བསྟན་པའི་ལམ་ལས་ནི། ངལ་བ་ནམ་བཅོམ་ངེས་བགྲོད་པས།
ལོ་ནི་བཅུ་གཉིས་རྫོགས་པ་ནི། རོ་ཧི་ད་ཀའི་གྲོང་ཁྱེར་སླེབ། 98

अथोग्रसत्त्वसङ्कीर्णाः समाशीविषपर्व्वताः।
नद्यश्च तद्विधा यासामपारवारिसम्पदः ॥ ९१ ॥

एतदुत्तीर्य्य निखिलं पुण्यैः परहितोद्यतः।
आरोहति सुधाशैलं शृङ्गैरालिङ्गिताम्बरम् ॥ ९२ ॥

ततस्तस्यापरे पार्श्वे कल्पवृक्षोपशोभितम्।
पुरं रोहितकं नाम दृश्यते स्वर्गसन्निभम् ॥ ९३ ॥

अस्ति तत्र मघोनाम मघवानिव विश्रुतः।
सार्थवाहो महासत्त्वः सर्व्वसत्त्वहिते रतः ॥ ९४ ॥

वदरद्वीपयात्रायामुद्यतस्यानवद्यधीः।
मार्गोपदेशं देशज्ञः स ते सर्व्वं करिष्यति ॥ ९५ ॥

इत्युक्तोत्साह्य बहुशः सुभद्रैरिव सुप्रियम्।
वचोभिरुचितैर्देवी सहसान्तरधीयत ॥ ९६ ॥

प्रबुद्धः सुप्रियः सर्व्वं तत्तथेति विचिन्तयन्।
प्रतस्थे सत्त्वमारुह्य निजोत्साहपुरःसरः ॥ ९७ ॥

स व्रजन् विजितायासस्तेन निर्द्दिष्टवर्त्मना।
पुण्यैर्द्वादशभिर्वर्षैः प्राप रोहितकं पुरम् ॥ ९८ ॥

སྐབས་འདིར་དེར་ནི་དོན་མཐུན་བདག། མ་བླ་ལས་ཀྱི་སྦྱོར་བ་ལས།
གསོ་བ་དཀའ་བའི་ནད་ཀྱིས་ནི། ལུས་ནི་ནོལ་དུ་མི་ནགས་གྱུར། 99

དེ་ནས་གྱོལ་པོའི་ཁབ་ལྟའི་ཁྲིམ། ནང་དུ་འཇུག་པ་མ་ཐོབ་ནས།
དེ་ཡི་སྒོ་ན་ཤིན་དུ་དགའ། བྲུ་བ་བསྐུབ་སྐད་འདུག་པར་གྱུར། 100

དེ་ནས་སྨན་པའི་ཟོལ་གྱིས་ནི། དེ་ནི་ནང་དུ་འཇུག་པ་ཐོབ།
ཉེ་བར་རིགས་པའི་གདམ་ཞེས་པ། སྨུ་ཡི་གསུས་པའི་ས་མ་ཡིན། 101

ཚེ་ཡི་རིག་བྱེད་སྐྱབ་ཞེས་ཞིང་།· འཆི་བའི་མཚན་ཉིད་ཞེས་པ་དེས།
ཟླ་དྲུག་མཇུག་ཉིད་དེ་ཡི་ཚོར། ཞེས་ནས་བསམ་པ་འཁྲུགས་པར་གྱུར། 102

དགའ་ཞིང་ཕན་པའི་སྨན་མང་དང་། དེ་ཡི་རིམ་གྲོ་ལེགས་བྱས་པ།
དུས་ནི་ཤིན་དུ་ཐུང་བ་ཡིས། ཤིན་དུ་དགའ་དང་མཛའ་བོར་གྱུར། 103

དེ་ལ་མཛའ་བས་སྨན་སྦྱར་ནམས། དེ་ཡིས་འདོད་པ་བྲ་བར་གྱུར།
མཛའ་བོས་ཙུང་ཟད་བྱིན་པ་གང་། དེ་དག་ཀུན་ལ་ཡིད་དགའ་འོ། 104

དེ་ནས་བདེ་བའི་རིམ་གྲོས་དེའི། ནད་ནི་ཆུང་བ་ཉིད་དུ་གྱུར།
དམ་པའི་གྲོངས་ལས་སྡུག་བསྔལ་ཞི། དེ་ལས་ནད་དང་བྲལ་བར་གྱུར། 105

དེ་ནས་མ་བླ་མཛད་པ་ལས། ཡིད་ཕེབས་སྐྱེས་ལ་ཤིན་དུ་དགའ།
སྨད་ནས་རང་གི་གདམ་གྱི་ཚེ། སྤྱོད་ཚུལ་མཐའ་ནི་རིག་པར་བྱས། 106

अत्रान्तरे कर्म्मयोगात् तत्र सार्थपतिर्मघः ।
व्याधिना दुश्चिकित्सेन बभूवास्वस्थविग्रहः ॥ ९९ ॥

अलब्धान्तःप्रवेशोऽथ गृहे राजगृहोपमे ।
तस्य व्यलम्बत द्वारं सुप्रियः कार्य्यसिद्धये ॥ १०० ॥

ततो वैद्योपदेशेन स प्रवेशमवाप्तवान् ।
उपयोगकथाप्रज्ञा न कस्यादरभूमयः ॥ १०१ ॥

आयुर्व्वेदविधानज्ञः स तस्यारिष्टलक्षणैः ।
षण्मासशेषमेवायुर्ज्ञात्वा चिन्तान्तरोऽभवत् ॥ १०२ ॥

तस्य प्रियहितप्रायोभैषज्यपरिचर्य्यया ।
अत्यल्पेनैव कालेन सुप्रियः प्रियतां ययौ ॥ १०३ ॥

भैषज्ययुक्तिस्तत्प्रीत्या तस्य वल्लभतां ययौ ।
प्रियोपनीतं यत्किञ्चित् तत्सर्व्वं मनसः प्रियम् ॥ १०४ ॥

प्रियोपचारैस्तस्याथ व्याधिरार्द्रवमाययौ ।
आधिः शाम्यति सत्सङ्गात् ततो व्याधिर्विशीर्य्यते ॥ १०५ ॥

ततः सञ्जातविस्रम्भः सुप्रियः प्रणयान्मघम् ।
चक्रे विदितवृत्तान्तं पश्चान्निजकथाक्षणे ॥ १०६ ॥

བ་ད་ར་ཡི་གླིང་བགྲོད་ལ། བདག་ཉིད་ཆེ་དེའི་སློ་བ་དག།
གཞན་དོན་གཡོ་མེད་ཞེས་གྱུར་ནས། མ་ཕྱགས་ཡ་མཚན་དེ་ལ་སྨྲས། 107

ཀྱེ་མ་སྙིང་པོ་མེད་པ་ཡི། འཁོར་བ་འདི་ནི་སྙིང་པོའི་གཟུགས།
གཞན་གྱི་བསམ་པའི་དཔུང་གཉེན་ནི། ནོར་བུ་འགའ་ཞིག་ཡོད་པ་ཡིན། 108

ན་ཚོད་གཞོན་ཞིང་མཛེས་པའི་གཟུགས། གཞན་གྱི་དོན་ལ་གཅགས་པའི་ཡིད།
ཡོན་དན་ཕུན་ཚོགས་བསོད་ནམས་ལྡན། གནས་འདི་ཁྱོད་ཉིད་ཁོ་ནའི་ཡིན། 109

འདི་སྐྱིད་ས་འདི་རབ་འདས་ནས། ཁྱོད་ནི་གཞན་གྱི་དོན་དུ་འོངས།
ཁྱོད་ཀྱི་སྡོང་གྲོགས་བགྱིད་པ་ལ། འོན་ཀྱང་བདག་ནི་མཆོག་ཏུ་གཟིར། 110

མཚམས་ནི་ངེས་པ་ལུས་ཅན་གྱི། སྲོག་ནི་ངེས་པར་འགྲོ་བ་ཉིད།
ཁྱོད་ཀྱི་འདོད་པའི་རྒྱུ་ཉིད་དུ། བདག་གི་དེ་མཐར་གྱུར་ཀྱང་སླའི། 111

ད་ལྟ་ཉིད་དུ་ཟད་པ་གང་། དེ་ནི་ཟད་པར་ཡོངས་སུ་བགྱང་།
གཞན་གྱི་དོན་དུ་སྲོག་དག་ཀྱང་། ཟད་པ་རྐྱེན་པ་བགྱི་དང་མཉམ། 112

བདག་གི་བ་ད་ར་ཡི་གླིང་། མ་མཐོང་འོན་ཀྱང་བདག་གིས་ཐོས།
རྒྱ་གཏེར་ཆེན་པོ་ཕྱོགས་ལྷུང་སྟོན། དེ་དང་དེ་ཡི་མཚན་མ་ཞེས། 113

དེ་སྐད་བརྗོད་ནས་ས་བདག་གིས། གྲོགས་བཟང་མཉེན་པའི་ཚིག་ཀྱང་དོར།
དེ་ཡིས་བཀྲ་ཤིས་གྲུ་གཟིངས་ནི། ཤིན་དུ་དགའ་དང་ལྡན་ཅིག་བཟུང་། 114

वदरद्वीपयाचायां तस्योत्साहं महात्मनः।
परार्थे निश्चलं ज्ञात्वा तमूचे विस्मयान्मघः॥ १०७॥

अहो वतास्मिन् संसारे निःसारे साररूपिणः।
जायन्ते मणयः केचित् परचिन्तापरायणाः॥ १०८॥

नवं वयः प्रिया मूर्त्तिः परार्थप्रवणं मनः।
पुण्योचितस्तथैवायं[1] स्थाने गुणसमागमः॥ १०९॥

इयतीं भूमिमुल्लङ्घ्य परार्थे त्वमुपागतः।
करोमि तव साहाय्यं किन्त्वहं भृशमातुरः॥ ११०॥

निबद्धावधयः प्राणाः प्रयान्त्येव शरीरिणाम्।
ते व्रजन्तु ममान्तेऽपि त्वत्समीहितहेतुताम्॥ १११॥

एवमेव व्ययो यस्तु व्ययः स परिगण्यते।
परार्थे जीवितस्यापि व्ययो लाभशतैः समः॥ ११२॥

न मया वदरद्वीपं दृष्टं किन्तु श्रुतं मया।
महाब्धौ दिक्समुद्देशं तैस्तैर्जानामि लक्षणैः॥ ११३॥

इत्युक्त्वा भूपतिं सुहृद्बन्धुवाक्येऽप्यनादरः।
स मङ्गलप्रवहणं सुप्रियेण सहाददे॥ ११४॥

---

१ Orig. पुण्योचितस्था च वयम्।

དེ་ནས་བསམ་པ་ཡངས་པ་ནི། དེ་དག་གཟིངས་ལ་ཞོན་གྱུར་ཏེ།
རྗེས་སུ་མཐུན་པའི་རླུང་དག་གིས། དཔག་ཚད་བརྒྱར་ཡང་འགྲོ་བར་བྱེད། 115

གནས་དང་གནས་སུ་རྒྱ་གཏེར་ཆེའི། རྒྱ་ནི་ཁ་དོག་སྣ་ཚོགས་མཐོང་།
འདི་དག་ཅི་ཞེས་ལྟད་མོའི་སྐད། ཤིན་ཏུ་དགས་དྲིས་མ་ཟླ་ལའོ།། 116

གྱི་མཚོ་འདི་ཡི་རྒྱ་ལ་ནི། ལྕགས་ཀྱི་རི་བོ་ལྤ་དག་ཡོད།
གཞན་ཡང་ཟངས་དང་དངུལ་རང་བཞིན། གཞན་ནི་རིན་ཅེན་གསེར་རང་བཞིན། 117

དེ་རྣམས་གྲིབ་མའི་བྱེ་བྲག་གིས། ཁ་དོག་སྣ་ཚོགས་གནས་དང་གནས།
ཁོངས་གནས་རབ་འབར་སྐུན་དག་གིས། རྒྱ་གཏེར་འདི་ནི་འབར་བར་མཐོང་། 118

འདི་བཀྲོད་མ་ཟླ་དུས་ཀྱི་འཚམས། ཐོབ་ཅིང་ནད་ཀྱིས་ཐེབས་པར་གྱུར།
སྲོག་བཏང་དམ་པའི་གྲགས་པ་དག། བརྟན་པའི་འཚོ་བ་རྣམ་པར་བཙུགས། 119

ཇི་ལྟར་བདག་ཉིད་ཆེ་སྙིང་སྟོབས། རྡོ་རྗེ་ཐུགས་པ་པས་ཀྱང་བརྟན།
དེ་ལྟར་གལ་ཏེ་འཚོ་གྱུར་ན། སྲིད་ན་བསྐྱབ་བྱར་ཅེས་མི་འགྱུར། 120

གཟིངས་ནི་དོགས་ཕྱིན་ཤིན་ཏུ་དོགས། དེ་དང་བྲལ་བ་ལམ་སྐྱེས་པའི།
ཀུ་ངན་བསལ་ནས་གྲོགས་པོ་ཡིས། ལུས་ནི་ལེགས་པར་བྱ་བ་བསྐྱབས། 121

ཇེན་ནི་རྣམ་པར་ཆད་པའི་ཚེ། གང་ཞིག་གྲུ་ལ་བརྟེན་པའི་ཡིད།
འདི་ཉིད་བདག་ཉིད་ཆེ་ནམས་ཀྱིས། སྙིང་སྟོབས་སྤྲོ་བས་མཐོ་བའི་རྟགས། 122

ततः प्रवहणारूढौ तौ योजनशतान्यपि ।
पवनस्यानुलोम्येन जग्मतुर्विपुलाशयौ ॥ ११५ ॥

स्थाने स्थाने जलं दृष्ट्वा नानावर्णं महोदधेः ।
किमेतदिति पप्रच्छ सुप्रियः कौतुकान्मघम् ॥ ११६ ॥

जले लोहाचलाः पञ्च सन्त्यस्य पयसां निधेः ।
ताम्ररूप्यमयाश्चान्ये हेमरत्नमयाः परे ॥ ११७ ॥

तेषां छायाविशेषेण नानावर्णः पदे पदे ।
दृश्यतेऽब्धिरयं दीप्तः प्राप्तान्तरोऽङ्गतौषधिः ॥ ११८ ॥

इत्युक्त्वा व्याधिनाक्रान्तः प्राप्तकालावधिर्मघः ।
प्राणान्मुमोच सत्कीर्त्तिविन्यस्तस्थिरजीवितः ॥ ११९ ॥

वज्रलेपादपि दृढं यथा सत्त्वं महात्मनाम् ।
तथा यदि भवेदायुः[१] किमसाध्यं भवे भवेत् ॥ १२० ॥

कूलावाप्तप्रवहणः सुप्रियस्तद्वियोगजम् ।
शुचं संस्तभ्य विदधे सुहृदस्तनुसत्क्रियाम् ॥ १२१ ॥

एतदेवोन्नतं लक्ष्म सत्त्वोत्साहमहात्मनाम् ।
विच्छिन्नालम्बने काले यत्कर्त्तव्यदृढं मनः ॥ १२२ ॥

---

१ Orig. तत्रेदायुः ।

ཡང་ནི་གཟིངས་ལ་ཞོན་བྱས་ཏེ། ཆུ་བོའི་གཏེར་ནི་ཡང་དག་བསྒྲལ།
རིན་ཅེན་རི་བོའི་ངོས་ནས་ནི། ནགས་ཚལ་སྟུག་པོའི་ནང་དུ་ཞུགས། 123

བདག་ཉིད་ཆེན་པོའི་བློ་གྲོས་ནི། སྨན་པ་འབྲལ་བས་མ་ཡིན་ཞིང་།
གདུང་དང་དགྲ་ཚོམས་མཐོང་སྤྱོར་དང་། ནད་དང་ཉོན་མོངས་སྤྱོད་པས་མིན། 124

དེར་ནི་ནམ་མཁར་སོན་པའི་རི། ཕྱོགས་ངོས་མ་ལུས་བཀག་གྱུར་པས།
མདུན་དུ་བགེགས་ནི་གཟུགས་ཅན་བཞིན། བགྲོད་པར་དཀའ་བ་དེ་ཡིས་མཐོང་། 125

སྔོངས་པ་བཞིན་དུ་སྤྱོར་བའི་རི། དེ་མཐོང་ཐབས་ནི་དམན་གྱུར་ཅིང་།
ཞབས་སུ་ཡལ་འདབ་མལ་སྟན་ལ། ཉལ་ནས་དེ་ཡི་སྐད་ཅིག་བསམས། 126

ཀྱེ་མ་བདག་ནི་ཞུགས་གྱུར་ནས། ཇི་སྲིད་དུས་ནི་རབ་ཏུ་འདས།
གང་དུའང་བ་ད་ར་ཡི་གླིང་། མིང་ཡང་ངེས་པར་མ་ཐོས་སོ།། 127

བསོད་ནམས་ཟློང་གི་བདག་གི་ནི། བརྩོན་པའི་གྲོགས་མཆོག་གྱུར་པ་གང་།
དེ་ཡང་ལས་ཀྱི་བོ་རླབས་ཀྱིས། དུས་མིན་གདོས་པ་ཆག་པ་བཞིན། 128

ཐབས་ཉམས་ཐབས་ནི་འདི་ལ་ཡང་། ཤིན་ཏུ་ཆེ་བའི་འབད་རྩོལ་གྱིས།
བདག་ནི་ངེས་པར་ནམ་མི་ལྡོག། གྲུབ་པའམ་ཡང་ན་ཤི་བར་འགྱུར། 129

འགྲོ་བ་གསུམ་པོ་འདིར་སྐྱེས་པ། གཞན་ལ་ཕན་ཕྱིར་སྲོག་དག་ནི།
ཟད་པར་གྱུར་པ་དེ་གཅིག་སྟེ། སྐྱེ་འགྲོ་རྣམས་སུ་མཆོད་པར་འོས། 130

पुनः प्रवहणारूढः स[1] समुत्तीर्य्य वारिधिम् ।
रत्नपर्व्वतपार्श्वेन विवेश विकटाटवीम् ॥ १२३ ॥

न वियोगैर्नचोद्वेगैर्नाभियोगैर्द्विषामपि ।
न रोगैः क्लेशभोगैर्व्वा ह्रीयते महतां मतिः ॥ १२४ ॥

स तत्राक्रान्तगगनं निरुद्धाशेषदिक्तटम् ।
दुरारोहं ददर्शाग्रे मूर्त्तं विघ्नमिवाचलम् ॥ १२५ ॥

उपायहीनस्तं दृष्ट्वा गिरिं मूर्द्धमिवोद्धतम् ।
अधःपल्लवशय्यायां सुप्तः सोऽचिन्तयत् क्षणम् ॥ १२६ ॥

अहो वत कियान् कालः प्रयातः प्रस्थितस्य मे ।
वदरद्वीपनामापि न नाम श्रूयते क्वचित् ॥ १२७ ॥

व्यवसायसहायो मे योऽभूत्पुण्यपणैः परम् ।
भग्नप्लव इवाकाले सोऽपि कर्म्मोर्म्मिविप्लवैः ॥ १२८ ॥

नष्टोपायेऽप्युपायेऽस्मिन् व्यवसायान्महीयसः ।
न नाम विनिवर्त्तेऽहं सिद्धिर्निधनमस्तु वा ॥ १२९ ॥

तदेकं जन्मयात्रासु पूज्यं जन्म जगत्त्रये ।
यस्मिन् परोपकाराय जायते जीवितव्ययः ॥ १३० ॥

---

१ Orig. omits सः ।

དེར་ནི་དེ་ལྟར་བསམ་འཁྲུགས་ཏེ། སྙིང་སྟོབས་ཀྱི་མཆོར་ཤེས་གྱུར་ནས།
རི་ལ་གནས་པའི་གནོད་སྦྱིན་ནི། སྐྱོན་པོ་ཞེས་པ་འོངས་ནས་སྨྲས། 131

ཤར་དུ་དཔག་ཚད་ཕྱིན་གྱུར་ནས། ས་འཛིན་རྩེ་མོ་གསུམ་པ་ནི།
ས་ལ་བྲུས་པའི་ཐེམ་སྐས་ལ། འཛེགས་ལ་དེ་ནས་འགྲོ་བར་གྱིས། 132

དེ་སྐད་གནོད་སྦྱིན་གདམས་ངག་གིས། རི་ཆེན་དེ་ཡི་རྣམ་བགོལ་བས།
རྩེ་མོ་ཤིན་ཏུ་མཐོ་བ་ཡི། ཤེལ་གྱི་ས་འཛིན་མདུན་དུ་མཐོང་། 133

བྱ་རྣམས་ཀྱིས་ཀྱང་བགྲོད་དཀའ་བ། འཛམ་པའི་བྲག་ནི་གཅིག་པུ་དེར།
དེ་ཡི་ཡིད་ལ་རེ་བ་ནི། ཡུད་ཙམ་བྱ་བ་མེད་པར་གྱུར། 134

ཤིན་ཏུ་མཐོ་ཞིང་རྩེན་དང་བྲལ། རང་གི་རྟོག་བཞིན་གཡོ་མེད་པར།
དེ་ལ་རྣམ་དཔྱད་ཡུན་རིང་དེ། རི་མོ་བཀོད་པ་བཞིན་དུ་གྱུར། 135

དེ་ནས་ཟླ་འོད་ཅེས་པ་ཡི། གནོད་སྦྱིན་བྲག་གི་ཕུག་གནས་པ།
སྙིང་སྟོབས་ལྡན་ཚོགས་དེ་ལ་ནི། མངོན་ཕྱོགས་ཡ་མཚན་ལྡན་པས་སྨྲས། 136

འདི་ནས་ཤར་དུ་རྒྱང་གྲགས་ཙམ། སོང་བས་ཙན་དན་ནགས་ཚལ་ནི།
ལྗོང་བཞོན་གྱིས་བསྐྱོད་འཁྲི་ཤིང་ལྷག། སྐྱོན་མེད་རྣམ་འཕྲུལ་མཐོང་བར་འགྱུར། 137

དེ་ནི་རབ་གསལ་བྱེད་ཅེས་པ། ཕུག་ན་གདམས་པའི་སྨན་ཆེན་པོ།
ལུས་ཅན་བསྲུང་ཕྱིར་རིན་ཆེན་ལ། རབ་དུ་བདུས་པས་ཐོབ་པར་འགྱུར། 138

इति चिन्ताकुलं तत्र तं ज्ञात्वा सत्यसागरम्।
नीलो नाम समभ्येत्य यक्षः प्राहाचलाश्रयः॥ १३१॥

पूर्व्वेण योजनं गत्वा चीणि शृङ्गाणि भूभृतः।
वेत्रसोपाननिश्रेण्या समारुह्याथ[1] गम्यताम्॥ १३२॥

इति यक्षोपदेशेन स विलङ्घ्य महाचलम्।
ददर्शाग्रे समुत्तुङ्गशृङ्गं स्फटिकभूधरम्॥ १३३॥

तस्मिन्नेकशिलाश्लक्ष्णे दुर्गमे पक्षिणामपि।
मुहूर्त्तमभवत्तस्य निर्व्यापारो मनोरथः॥ १३४॥

अभ्युन्नतं निरालम्बं स्वसङ्कल्पमिवाचलम्।
स तं विचार्य्य सुचिरं चित्रन्यस्त इवाभवत्॥ १३५॥

अथ चन्द्रप्रभो नाम यक्षः शैलगुहाश्रयः।
अभ्येत्य सत्त्वसम्पन्नं तमभाषत विस्मितः॥ १३६॥

क्रोशमात्रमितो गत्वा पूर्व्वेणापूर्व्वविभ्रमम्।
दृश्यते चन्दनवनं बालानिलचलल्लतम्॥ १३७॥

तत्रास्ते प्रसरा[2] नाम गुहालीना महौषधिः।
लभ्यते देहरक्षायै समुत्तोल्य महाशिलाम्॥ १३८॥

१ Orig. स्वमातुन्याथ। २ Orig. तत्र प्रसरा।

དེ་ཡི་འོད་ཀྱིས་སྣང་བྱས་པའི། སྐྱས་ཀྱི་ཞལ་གྱི་རི་ལ་ནི།
འཕྲུལ་ཉིད་དུ་ནི་ཡང་དག་འཛོགས། འདོད་པ་ཐོབ་ཕྱིར་འགྲོ་བ་གྲོས། 139

སྤྲིན་ཆེན་དེ་ནི་དོན་བྱས་བཞིན། སྐད་ཅིག་གིས་ནི་འགྲོ་བར་འགྱུར།
འདོད་པ་ཐོབ་བ་གློག་ལྟར་གཡོ། དེ་ཕྱིར་མྱ་ངན་བྱ་བ་མིན། 140

དེ་ལྟར་སྒྲུབ་བྱེད་གཞོན་སྤྲིན་གྱིས། བསྟན་པས་དེ་ཡིས་ས་འཛིན་དག།
ཡང་དག་འཛོགས་པས་མདུན་དུ་ནི། གསེར་གྱི་ཁང་ལྡན་གྲོང་ཁྱེར་མཐོང་། 141

ལྷུན་པོ་བརྩིགས་པས་བྱས་པ་བཞིན། རབ་གསལ་ནོམས་ཀྱི་སྤྲུལ་པ་བཞིན།
ངོ་མཚར་ཀུན་གྱིས་བྱས་པ་བཞིན། དེ་མཐོང་ཡ་མཚན་ལྡན་པར་གྱུར། 142

གྲོང་ཁྱེར་ལམ་གྱི་མི་མེད་ཅིང་། གསེར་གྱི་སྒོ་གླེགས་ཆེན་པོ་ཡིས།
དེ་ཡི་སྒོ་ནི་བཅད་མཐོང་ནས། དེ་ནི་ནགས་ཀྱི་མཐའ་ན་གནས། 143

སྐབས་འདིར་ཉིན་མོའི་མཐར་གྱུར་ཏེ། མཐའ་མེད་མཁའ་ཡི་ལམ་བགྲོད་པས།
ཚ་ཟེར་ཅན་ནི་ཡོངས་ངལ་བཞིན། ནུབ་ཀྱི་རི་དང་ཉེ་བར་སླེབ། 144

འོད་སྟོང་ནུབ་པར་གྱུར་པའི་ཚེ། མངོན་པར་འགྲོ་བ་སྣུན་ཅན་མ།
ཀྱི་སྐར་བདག་པོ་འདོད་གྱུར་ནས། དལ་བུས་རབ་ཏུ་འགྲོ་བ་བཞིན། 145

དེ་ནས་རབ་གསལ་འཁྱོར་པ་ཡིས། ཕྱོགས་ཀུན་ཡོངས་རྫོགས་གྱེན་དུ་ཕྱོགས།
དྲི་མེད་བྱང་ཆུབ་སེམས་དཔའ་བཞིན། བདུད་རྩིའི་འོད་དེ་ཤར་བར་གྱུར། 146

तत्प्रभावकृतालोकं सोपानैः स्फटिकाचलम् ।
सहसैव समारुह्य गम्यतामीप्सितासये ॥ १३९ ॥

तत्क्षणात् कृतकार्य्यैव[1] सा प्रयाति महौषधिः ।
न खेदस्तत्कृते कार्य्यस्तडिल्लोलाः प्रियाप्तयः ॥ १४० ॥

इति यक्षोपदिष्टेन विधानेन स भूधरम् ।
समुत्क्रम्य ददर्शाग्रे नगरं हेममन्दिरम् ॥ १४१ ॥

मेरुकूटैरिवाकीर्णं प्रकाशैरिव निर्म्मितम् ।
सर्व्वाश्चर्य्यैरिव कृतं तद् दृष्ट्वा विस्मितोऽभवत् ॥ १४२ ॥

महाहेमकपाटाभ्यां रुद्धद्वारं विलोक्य तत् ।
निर्जनं वारसञ्चारं वनान्ते निषसाद सः ॥ १४३ ॥

अत्रान्तरे दिनस्यान्ते व्योमानन्तपथाध्वगः ।
अवापास्ताचलोपान्तं परिश्रान्त इवांशुमान् ॥ १४४ ॥

अस्तङ्गते सहस्रांशौ रजनीरमणी शनैः ।
तारापतिमिवान्वेष्टुं प्रससाराभिसारिका ॥ १४५ ॥

अथ प्रकाशविभवैः सर्व्वाशापूरणोन्मुखः ।
बोधिसत्त्व इव स्वच्छः सुधादीधितिरुद्ययौ ॥ १४६ ॥

---

१ Orig. क्षणात् कृतकार्य्येवा ।

སྨིན་པའི་ཚོགས་ནི་མ་ལུས་པ། རབ་ཏུ་ཞི་བར་ནུས་ཤིང་གྱིས།
ཡིད་ནི་དངས་བྱེད་ཟླ་བའི་འོད། སྙིང་སྟོབས་སྤྱོད་ཚུལ་བཞིན་དུ་མཛེས། 147

ཉིན་བྲལ་ལས་སྐྱེས་ཕྱོགས་རྣམས་ཀྱིས། སྨིན་པའི་རྨོངས་པ་ཟླ་བས་ཕྲོགས།
གང་ཕྱིར་རིང་ན་བཞུགས་པ་ཡི། བདག་ཉིད་ཆེ་རྣམས་གཞན་ཕན་མཆོག། 148

ཟླ་བའི་ཟེར་གྱིས་ཤིན་ཏུ་དགའ། སྐད་ཅིག་ལུས་ནི་ཁེངས་གྱུར་ནས།
ཐྲུ་བའི་རྒྱ་མཚོ་བོ་རླབས་དག། འཁྲུག་པའི་རྒྱ་ནི་གཉིད་ཐོབ་གྱུར། 149

མཚན་མོ་ཟད་པར་གྱུར་པའི་ཚེ། ཡོན་དན་ཡོན་གྱིས་གུས་བཅས་པ།
མཐུ་ཆེན་ལྷ་ཡི་མི་ལམ་དུ། དེ་ལ་མངོན་པར་ཕྱོགས་ནས་སྨྲས། 150

ཨེ་མ་ཀྭ་ཡེ་སྙིང་སྟོབས་ཅན། དེ་ཉིད་དམ་པའི་མངོན་ཞེན་པ།
ལེགས་བྱས་ཁྱོད་ཀྱི་ངལ་དུབ་ནི། གཞན་གྱི་དོན་དུ་རྒྱ་ཆེན་བྱས། 151

ཉོན་མོངས་ལྷག་མ་ཆུང་ངུ་འདིར། ཡིད་ནི་འབྱུང་བར་མི་འོས་སོ།
སྙིང་སྟོབས་དམན་པ་མེད་རྣམས་ཀྱིས། རང་དབང་ཉིད་དུ་ཐམས་ཅད་གྲུབ། 152

གསེར་གྱི་གྲོང་ཁྱེར་གང་འདི་དང་། གསུམ་ནི་ཕ་རོལ་གཞན་དང་གཞན།
གོང་ནས་གོང་དུ་རྣམ་པར་བཀྲ། འདི་ན་རིན་ཅན་གྲོང་ཁྱེར་ཡོད། 153

ཁྱོད་ཀྱི་སྐྲ་ནི་བརྡུངས་པ་ན། དེ་དག་ལས་ནི་མི་འཁམ་ཏེ།
བཞི་དང་བརྒྱད་དང་བཅུ་དྲུག་དང་། སོ་གཉིས་རིམ་པས་ཕྱིར་འབྱུང་འགྱུར། 154

स्फीता तमःसमूहस्य निःशेषप्रशमोचिता।
मानसोल्लासिनी ज्योत्स्ना सत्त्ववृत्तिरिवाबभौ ॥ १४७ ॥

तमोमोहं जहारेन्दुर्दिशां दिनवियोगजम्।
परोपकारे हि परो दूरारोहो महात्मनाम् ॥ १४८ ॥

सुप्रियश्चन्द्रकिरणैः पूर्य्यमाणतनुः क्षणम्।
निद्रां कार्य्यसमुद्रोर्म्मिक्षोभमुद्रा[1]मवाप्तवान् ॥ १४९ ॥

क्षपायां क्षीयमाणायां[2] गुणदाक्षिण्यसादरा।
जगाद देवता स्वप्ने महेशाख्या समेत्य तम् ॥ १५० ॥

अहोऽवत महासत्त्व सत्तत्त्वाभिनिवेशिना।
परार्थे विपुलः क्लेशः कृतः सुकृतिना त्वया ॥ १५१ ॥

अल्पशेषे प्रयासेऽस्मिन् नोद्वेगं कर्त्तुमर्हसि।
अपर्य्युषितसत्त्वानां स्वाधीनाः सर्व्वसिद्धयः ॥ १५२ ॥

हैमं यदेतन्नगरं चीर्णि चान्यान्यतः[3] परम्।
सन्ति रत्नपुराण्यत्र विचित्राण्युत्तरोत्तरम् ॥ १५३ ॥

तेभ्यो निर्यान्ति किन्नर्य्यश्चतस्रोऽष्टौ च षोड़श।
द्वात्रिंशच्च[4] क्रमेणैव त्वया द्वारि विघट्टिते ॥ १५४ ॥

---

१ Orig. कार्य्यसमूहोर्म्मिफेनमुद्राम्।
२ क्षमायां क्षियमानायाम्।
३ Orig. चीर्णि चान्यतः।
४ Orig. द्वात्रींश्च।

ཁྱོད་ཀྱི་དབང་པོ་ཐུལ་བ་ཡིས། དེ་ཡི་བག་མེད་རིག་པར་བྱ།
རིང་པོ་མིན་པར་འདོད་པ་དག། མཐོང་བར་གྱུར་དེ་གཞན་པ་ཅི། 155

ལྷ་མོས་གུས་བཅས་འདི་བརྗོད་ལ། དེ་ནས་རབ་སད་ཤིན་ཏུ་དགས།
གྲོང་ཁྱེར་སྒོ་ལ་མངོན་ཕྱོགས་ཏེ། ལག་པ་ཡིས་ནི་ལན་གསུམ་བརྡུངས། 156

དེ་ནས་མི་འམ་ཅི་མོ་བཞི། གཡོ་བའི་མིག་ཅན་འཐོན་གྱུར་ཏེ།
གཡོ་བའི་རླུང་གིས་བསྐྱོད་པ་ཡིས། ངོ་མཚར་ལྗོན་པའི་སྐྱེ་མ་བཞིན། 157

ཡིད་ནི་རིངས་པར་བྱེད་གྱུར་ཅིང་། འདྲེན་བྱེད་དག་གི་བདུད་རྩིའི་ཆར།
བཞིན་རས་ཟླ་བའི་འོད་ཟེར་གྱིས། ཉིན་མོར་ཟླ་འོད་ལྡན་པར་བྱས། 158

དགའ་བས་མཐོང་ངེས་ཤིན་ཏུ་དགའ། འདོད་པ་ཀྱི་ཆེར་ཡང་དག་མཆོད།
དེ་ནི་མངོན་པར་འདོད་པ་ཡིས། མཛའ་བས་མགྲོན་གཅིག་བཞིན་དུ་བྱས། 159

ཟླ་བ་ཆུ་ཤེལ་སྟན་འཁོད་པ། དེ་ལ་དྲན་པ་འཚོ་བའི་སྨན།
ལུས་དང་བཅས་པར་སྐྱེས་པ་བཞིན། སྨན་ནི་བཟུང་བྱས་དེ་དག་གིས། 160

རྗེ་དགའ་དགོད་པའི་འོད་ཟེར་དག། ཡང་དག་གྱིས་པར་གྱུར་པ་ནི།
མཛའ་བའི་ཕྲད་སྐྱེས་ག་བུར་དག། སྔོན་དུ་སྟེར་བ་བཞིན་དུ་སྨྲས། 161

ཡོན་ཏན་དམ་པས་བརྒྱན་པའི་དབྱིབས། ཁྱོད་ཅན་འོང་བར་འོས་པ་ཡང་།
གང་གིས་ཁྱིམ་དུ་རང་ཉིད་འོངས། ཀྱེ་མ་བདག་ཅག་བསོད་ནམས་ཅན། 162

जितेन्द्रियस्य भवतस्तत्प्रमादमवेदिनः।
किमन्यदचिरेणैव वाञ्छिताप्तिर्भविष्यति ॥ १५५ ॥

इत्युक्तः सादरं देव्या प्रतिबुद्धोऽथ सुप्रियः।
जघान नगरद्वारं त्रिः समभ्येत्य[1] पाणिना ॥ १५६ ॥

ततस्ततः किन्नर्यो निर्ययुस्तरलेक्षणाः।
आश्चर्यतरुमञ्जर्य्य इव लीलानिलाकुलाः ॥ १५७ ॥

मानसोल्लासकारिण्यो नयनामृतवृष्टयः।
वदनेन्दुसमुद्योतैर्दिवापि कृतचन्द्रिकाः ॥ १५८ ॥

ताः सम्पूज्य स्मरोदारं सुप्रियं प्रियदर्शनाः।
तस्याभिलाषप्रणयैरातिथ्यमिव चक्रिरे ॥ १५९ ॥

चन्द्रकान्तसमासीनं कृतासनपरिग्रहाः।
जीवनौषधयो जाताः स्मरस्येव सविग्रहाः ॥ १६० ॥

तास्तमूचुः समुन्मीलद्विलासहसितत्विषः।
ददत्य इव कर्पूरं प्रेमोपायनतां पुरः ॥ १६१ ॥

अहो धन्या वयं यासां सद्गुणालङ्कृताकृतिः।
स्वयमेवाभिगम्योऽपि भवानद्यागतो गृहम् ॥ १६२ ॥

---

१ Orig. त्रिजघान नगरद्वारमभ्येत्य।

བདུད་རྩི་ལ་ནི་སྲུ་ཞིག་སྣང༌། ཙན་དན་ལ་ནི་སྲུ་མི་སྲིད།
ཟླ་བ་ལ་ནི་སྲུ་གུས་དམན། དམ་པ་ཚོམས་ལ་སྲུ་མི་འདོད། 163

གང་ཡང་བུད་མེད་རང་ཉིད་ནི། གླིང་བ་སྐལ་བཟང་ཉམས་པའི་རྒྱུ།
དེ་ལྟ་ན་ཡང་ཁྱོད་མཐོང་བ། ཉིད་ཀྱི་སྒྲ་ཅོར་བྲུས་ཕྱིར་སྨྲ། 164

མི་ནམ་ཅི་ཡི་གྲོང་ཁྱེར་འདི། བདག་ཅག་དང་བཅས་མཛའ་ནས་སྟེར།
ལེགས་པར་བཟོད་ལྡན་རིན་ཆེན་ཁང༌། དགེ་བ་ཁྱོད་ཀྱི་རང་དབང་ཉིད། 165

དེ་སྐད་དེ་དག་ཚོམས་ཀྱི་ཚིག། མཛའ་བར་འོས་ཐོས་ཤིན་དུ་དགས།
སོ་ཡི་ཟླ་འོད་སྙིང་སྟོབས་ལྷུར། རབ་དུ་དགར་བ་སྤྲོ་ཞིང་སྨྲ། 166

ཐེབས་པར་སྨྲ་བའི་བདུད་རྩི་འདི། སྲུ་ཡི་གུས་མང་གནས་མ་ཡིན།
ཁྱེད་ཚོམས་བདག་གིས་གུས་བྱས་པ། བདག་གི་ཡང་ནི་གུས་པའི་གནས། 167

འདི་མཐོང་ཉིད་ནི་བསྟུགས་པར་འོས། དེ་ཡང་རྗེས་སུ་འཛིན་པ་འདི།
ལུ་དིག་འཁྲི་ཤིང་གདུང་སེལ་ལ། ཙན་དན་གྱིས་ཀྱང་བྲུགས་སམ་ཅི། 168

ཉམ་པ་འདི་ལྟའི་དྲི་མེད་དག། ཟླ་བའི་འོད་བཞིན་གྱུར་པ་དང༌།
ཉམ་པ་འཛིག་རྟེན་སྤྱོད་ཚུལ་ནི། ཡང་དག་རིགས་ཤིང་མཛེས་པ་ཡིན། 169

རིགས་ཤིང་མཛེས་པའི་སྤྱོད་པ་དང༌། རབ་དུ་དང་ཞིང་དྲི་མེད་ཡིད།
མཉེས་ག་ཤིན་པ་དང་འཛམ་པའི་ཚིག། སྲུ་ཡི་གུས་པའི་ས་མ་ཡིན། 170

विद्वेषः कस्य पीयूषे चन्दने कस्य चारुचिः।
इन्दौ मन्दादरः को वा साधुः कस्य न सम्मतः॥ १६३ ॥

स्त्रीणां यद्यपि सौभाग्यभङ्गाय प्रणयः स्वयम्।
क्रमस्त्वद्दर्शनेनैव तथापि मुखरीकृताः॥ १६४ ॥

इदञ्च किन्नरपुरं वयञ्च प्रणयार्पिताः।
रतञ्च सौभाषणिकं साधो स्वाधीनमेव ते॥ १६५ ॥

इति तासां वचः श्रुत्वा सुप्रियः प्रणयोचितम्।
उवाच सत्त्वधवलां दिशन् दशनचन्द्रिकाम्॥ १६६ ॥

बहुमानास्पदं कस्य नेदं सम्भाषणामृतम्।
आत्मनोऽप्यादरस्थानं भवतीभिः कृतादरः॥ १६७ ॥

श्लाघ्यं दर्शनमेवेदं तत्राप्ययमनुग्रहः।
मुक्तालतास्तापहराः किं पुनश्चन्दनोक्षिताः॥ १६८ ॥

एवंविधानां स्वच्छानामैन्दवीनामिवामूषाम्[१]।
आकृतीनां समुचिता रुचिरा लोकवृत्तयः॥ १६९ ॥

औचित्यचारुचरितं प्रसादविशदं मनः।
वात्सल्यपेशला वाणी न कस्यादरभूमयः॥ १७० ॥

१ Orig. ०वाधीषाम्।

མཆོད་པའི་ཡོ་བྱད་འོས་གྱུར་པའི། ཀུན་སྤྱོད་འདི་ནི་བདག་གིས་བླངས།
བྲིད་མེད་གཞན་དབང་ཡིན་པའི་སྐད། ཁྱེད་ཀྱང་བདག་ཉིད་སྤྱིན་མི་འོས། 171

གཞོན་ནུ་མ་དངོས་ལས་འདས་པས། ཁྱོད་ནི་གཞན་གྱིས་ཡོངས་སུ་བཟུང་།
བྲམས་ཤིང་གུས་པས་ན་དང་ནི། ཕེབས་པས་བདག་གི་སྲིང་མོ་ཡིན། 172

གང་ཞིག་གཞན་གྱི་འབྱོར་པ་དག། གཞན་གྱི་བྲིད་མེད་མ་དང་ནི།
གཞན་འཚེ་བདག་ཉིད་འཚེ་བ་ཉིད། དེ་དག་ཕྱོགས་ནི་གནོད་པ་མེད། 173

ཕྲ་མ་རྫོན་དང་ཚིག་རྩུབ་དང་། ཀྱལ་པ་སྨྲ་བ་སྤངས་པའི་ཚིག།*
གང་གི་ཁ་ན་རྟག་པ་ཉིད། དེ་དག་ཕྱོགས་རྣམས་ཀུན་དུ་ཞིམ། 174

གང་ཞིག་བརྣབ་སེམས་བྲལ་བའི་སེམས། གནོད་སེམས་དག་ནི་ཡོངས་སུ་སྤངས།
ལོག་པར་ལྟ་བས་དམན་གྱུར་པ། དེ་དག་ལེགས་པའི་ལམ་ལ་བརྟེན། 175

མི་དགེ་བཅུ་ཡི་ལམ་དག་ལས། ངེས་པར་ལོག་པའི་རང་བཞིན་ཅན།
དེ་དག་དགེ་བའི་སྒོ་རྣམས་ཀྱིས། བཀག་པ་མེད་པའི་མཐོ་རིས་ལམ། 176

ནོར་གྱིས་མཐོ་བ་རྣམས་ཀྱི་ནོར་ནི་བློ་གྲོས་ཉིད།
དབང་པོ་རྣམ་གྲོལ་རྣམས་ཀྱི་མིག་ནི་རིག་པ་ཉིད།
སྐྱེས་བུ་མཆོག་གྱུར་རྣམས་ཀྱི་བསོད་ནམས་བརྩེ་བ་ཉིད།
ཡིད་ནི་གཙང་བ་རྣམས་ཀྱི་འཇུག་ངོགས་བདག་ཉིད་དོ། 177

* སྤྲལ་ཀ།

गृहीतोऽस्माभिराचारः पूजापरिकरोचितः ।
आत्मार्पणं कुलान्तं वः[1] परायत्ता हि योषितः ॥ १७१ ॥

कन्याभावादपक्रान्ता यूयं परपरिग्रहाः ।
विश्रम्भेण भगिन्यो मे जनन्यः स्नेहगौरवात् ॥ १७२ ॥

परवित्तं विषं येषां जनन्यश्चान्ययोषितः ।
परहिंसात्महिंसैव पक्षास्तेषां निरत्ययाः ॥ १७३ ॥

पैशुन्यासत्यपारुष्यभिन्नवादोज्झितं वचः ।
सदैव वदने येषां तेषां सर्व्वाशिषा दिशः ॥ १७४ ॥

अभिध्यारहितं चेतः व्यापारपरिवर्ज्जितम् ।
मिथ्यादृष्टिविहीनञ्च येषान्ते सत्पथं श्रिताः ॥ १७५ ॥

दशाकुशलमार्गेभ्यो निर्गतानां निसर्गतः ।
एते कुशलवर्गस्य मार्गाः स्वर्गे निरर्गलाः ॥ १७६ ॥

धीरेव धन्यं धनमुन्नतानां
विद्यैव चक्षुर्विजितेन्द्रियाणाम् ।
दयैव पुण्यं पुरुषोत्तमानां[2]
आत्मैव तीर्थं शुचिमानसानाम् ॥ १७७ ॥

---

१ कुलान्तवः । २ दयैव पुरुषोत्तमा पुण्यानाम् ।

སྐྱེས་བུ་ནོམས་ཀྱི་ནོམ་པ་དེ་ལྟའི་ཡོན་དན་དག།
ལེགས་གནས་འདི་ནི་ཁྲིམས་ཀྱི་དྲི་མ་མེད་པར་གྱུར།
རིན་ཆེན་སྨྲ་རིག་དམ་པའི་ཚོགས་ལས་ཤིན་དུ་ལྷག།
ཚུལ་ཁྲིམས་དག་ནི་དམ་པ་ནོམས་ཀྱི་རྒྱན་དུ་བརྗོད། 178

སེམས་ཅན་དོན་གཉེར་དབང་པོ་ཐུལ་བ་དེ་ཡིས་ནི།
ཡོན་དན་རྗེས་མཐུན་དེ་སྐད་བརྗོད་པ་ཐོས་གྱུར་ནས།
ཚིམས་པར་གྱུར་ཅིང་ལྟད་མོའི་དོན་བཞིན་མཁའ་ལས་ནི།
ཟླ་བ་འཇིག་རྟེན་ཞི་ལ་སྤྲོ་ཞིང་དེ་ཡིས་སྨྲས། 179

ནོར་བུ་བཞིན་དུ་ཡོན་དན་རབ་འབར་རིན་ཐང་མེད།
དགེ་བ་ཁྱོད་ཀྱི་མཛེས་པའི་འོད་ནི་མཐོང་གྱུར་པ།
གང་ཞིག་མགོ་དང་ནོ་བ་སྙིང་ཁ་ཉིད་ལ་ཡང་།
དྲག་པར་དམ་པ་ནོམས་ཀྱི་རྒྱན་དུ་ཁྱོད་ཉིད་བགྱིད། 180

བདག་ཉིད་དང་མཉམ་གྲགས་པའི་མཐུ་ལྡན་རིན་ཐང་ཆེ།
ནོར་བུ་འདི་ནི་ཁྱོད་ཀྱི་རབ་དུ་བསྲུང་བར་མཛོད།
གང་ཞིག་རྒྱལ་མཚན་ལ་བཞུགས་དཔག་ཚད་སྟོང་ཕྲག་དུ།
སྣང་བ་ནོམས་ཀྱི་འདོད་པ་ཆར་དུ་བབ་པར་འགྱུར། 181

एवंविधोऽयं गुणसन्निवेशः
शीलेन वैमल्यमुपैति पुंसाम् ।
सद्रत्नमुक्तानिकरातिरिक्तं
शीलं सतामाभरणं वदन्ति ॥ १७८ ॥

इत्युक्तमाकर्ण्य गुणानुरूपं
सत्त्वार्थिना तेन[१] जितेन्द्रियेण ।
तुष्टास्तमूचुर्भुवि चन्द्रलोकं
ताः कौतुकायेव मुखैः सृजन्त्यः ॥ १७९ ॥

मणेरिवानर्घगुणोज्ज्वलस्य
दृष्टैव साधोरुचिता रुचिस्ते[२] ।
ययैव मौलौ हृदये श्रुतौ च
सद्भिः सदैवाभरणीकृतोऽसि ॥ १८० ॥

मणिर्महार्हः प्रथितप्रभावः
प्रगृह्यतामात्मसमस्त्वयायम् ।
ध्वजार्पितो वर्षति योजनानां
सहस्रमेवार्थिसमाहितं यः ॥ १८१ ॥

१ Orig. Omits तेन ।   २ साधो रुचोचारुचिस्ते ।

དེ་སྐད་བརྗོད་པས་རིན་ཅེན་རབ་མཆོག་གཞོན་ནུ་མས།
རབ་དུ་དང་བ་གཟུགས་ཅན་བཞིན་དུ་དེ་ལ་ཕྱིན།
དེས་ཀྱང་དེ་ནི་མཛའ་བའི་ཉེ་བར་སྦྱོར་བས་བླངས།
དངུལ་ལས་བྱས་པའི་གྲོང་ཁྱེར་དག་ནི་གཉིས་པར་ཕྱིན། 182

དེར་ནི་གུས་པས་དེ་ཡིས་ཉིས་འགྱུར་དག་གི་ནི།
མི་འམ་ཅི་མོ་རྣམས་ཀྱིས་དེ་ལ་མཆོད་པ་བྱས།
རིམ་པ་དེ་དག་ཉིད་ཀྱི་ཉམས་དག་བློ་གྲོས་ཀྱིས།
དེ་ཡི་ཉིས་འགྱུར་མཐུ་ལྡན་ནོར་བུ་ཐོབ་པར་འགྱུར། 183

དེ་ནས་གསུམ་པའི་གྲོང་ཁྱེར་བི་དྲུ་ཡ་རང་བཞིན།
མཛེས་པའི་མིག་ཅན་བཅུ་དྲུག་དེ་དག་དེ་ཡིས་མཐོང་།
དེ་དག་ཉམས་ལ་དེ་བཞིན་རིམ་བཞིན་བགྲོད་ནས་ནི།
དེ་ཡི་ཉིས་འགྱུར་མཐུ་ལྡན་རིམ་གྲོ་དམ་པ་ཐོབ།* 184

དེ་ནས་མདུན་དུ་རིན་ཅེན་བཞི་ཡི་རང་བཞིན་གྱི།
གྲོང་ཁྱེར་གྲོང་ཁྱེར་ཀུན་ལས་ལྷག་པའི་དཔལ་ལྡན་པ།
བཞི་པར་ཕྱིན་དེ་མི་འམ་ཅི་ནི་མཛེས་མ་དེའི།
གཉིས་འགྱུར་དག་གི་ཡོན་དན་ལྷག་པས་དེ་དོན་གཉེར། 185

---

* ཤློ་ཀ་གཅིག་གི་སྐད་དོད་སྐབས་སྦྱོར་ལེ་དབང་རྡོ་རྗེ་ཡོད་པ་འདི། ཉ་ཚེར་པན་དེས་
ཁ་བཤད་པ་མཁས་པ་རྣམས་ཀྱིས་དཔྱད་པ་ཞུ།

उक्तेति रत्नप्रवरं तरुण्य-
स्तस्मै ददुर्मूर्त्तमिव प्रसादम्।
आदाय तच्च प्रणयोपचारं
सोऽपि द्वितीयं पुरमाप रौप्यम्॥ १८२॥

तत्रादरात्तद्द्विगुणाभिरेव
स पूजितः किन्नरकामिनीभिः।
क्रमेण तेनैव विशुद्धबुद्धिः
लेभे मणिं तद्द्विगुणप्रभावम्॥*१८३॥

* * * *

* * * *

* * * *

* * * *

प्राप्तश्च तं रत्नमयं चतुर्थं
पुरं ततः सर्व्वपुराधिकश्रि।
सोऽभ्यर्थितस्तद्द्विगुणाभिरग्रे
गुणाधिकः किन्नरसुन्दरीभिः॥ १८५॥

* This S'loka was lost. An attempt was made to reproduce it from its Tibetan version by a *Bande* of Sahor.

ལེགས་གདམས་དེ་ཡི་དེ་བཞིན་ཉིད་དུ་དམ་ཆོས་ཀྱི།
གདམ་ངག་ཞོར་ལ་བྱུང་བས་ཚིམ་གྱུར་དེ་དག་ནི།
རབ་ཀྱིས་ཨུཏྤལ་སྔོན་པོའི་ཕྲེང་བ་ལྟར་རིང་བའི།
ཐུར་མིག་གིས་འཕངས་འོད་དང་ལྡན་པས་དེ་ལ་སྨྲས། 186

རིན་ཆེན་འབྱུང་གནས་ཟླ་བ་བ་ད་ར་ཞེས་པ།
ངེད་ཀྱི་མིང་པོ་མི་འམ་ཅི་ཡི་རྒྱལ་རིགས་ཡོད།
རྫུ་འཕྲུལ་ཡོངས་ཀྱིས་རང་གི་མིང་གི་མཚན་གྱུར་པ།
རིན་ཐང་ཆེ་བའི་གླིང་འདི་དེ་ཡི་བཞུགས་གནས་ཡིན། 187

འོད་ཟེར་ཚོགས་ནི་གསལ་ལྡན་རིན་ཆེན་འདི་ཡང་བསོད་ནམས་བརྟེན་ནམས་ཀྱིས།
གསོ་སྦྱོང་ཞེས་བྱའི་བརྟུལ་ཞུགས་ངེས་པའི་ཆོ་གས་རྒྱལ་མཚན་ལ་བཀོད་ན།
ཛམྦུའི་གླིང་དུ་མཐའ་དག་འགྲོ་ཚོགས་མངོན་འདོད་དོན་རྣམས་ཆར་ཉིད་འབེབས།
གཞན་དོན་བརྟན་པར་གྱུར་པས་ཁྱབ་པར་བཀྲིད་སྐད་དེ་ནི་བཟུང་བར་མཛོད། 188

དེ་ལྟར་མཛེས་མ་རྣམས་ཀྱིས་འཆི་མེད་ཤིང་འབྲས་ལེགས་བདུས་གུས་
བཅས་ཤིང་།

ལྷག་པར་མཛའ་སྨུག་ལྡན་པས་སྐལ་བཟང་ནོར་བུ་བྲིན་པ་སླངས་བྱས་ནས།
མགྲོགས་འགྲོ་རབ་དགའ་སྤྲིན་ཤུགས་ཞེས་བྱ་རླུང་ལས་རྒྱལ་བ་ལ་ཞོན་ཏེ།
དེ་ཡི་ལམ་གྱི་གདམས་ངག་ཐོབ་པས་དེ་ཡང་རང་གི་གྲོང་ཁྱེར་སོང་། 189

तथैव सद्धर्म्मकथाप्रसङ्गै-
स्तास्तोषितास्तेन सुसंयतेन।
उत्फुल्लनीलोत्पलदामदीर्घ-
कटाक्षविक्षिप्तकरास्तमूचुः ॥ १८६ ॥

भ्रातास्ति नः किन्नरराजवंश-
रत्नाकरेन्दुर्वरदाभिधानः।
तस्यास्पदं द्वीपमिदं महार्हं
स्वनामचिह्नं प्रथितं समृद्ध्या[1] ॥ १८७ ॥

रत्नञ्चेदं नियमविधिना पोषधाख्यव्रतेन
न्यस्तं भास्वत्किरणनिकरं पुण्यभाजां ध्वजाग्रे।
जम्बुद्वीपे किल जनगणाभीप्सितार्थान् प्रयत्नात्
वर्षत्येव स्थिरपरहितव्याप्तये गृह्यतां तत् ॥ १८८ ॥

इत्युत्पाद्यामरतरुफलं सादरं सुन्दरीभिः
प्रेमोद्दामप्रणयसुभगं दत्तमासाद्य रत्नम्।
वालाहाख्यं विजितपवनन्तं प्रकृष्टं तुरङ्गं
सोऽप्यारुह्य स्वनगरमगाल्लब्धमार्गोपदेशः ॥ १८९ ॥

---

१ Orig. वर्धितऋद्धि।

དུས་ཚོད་དེར་ནི་དྲི་མེད་གྲངས་ལྡན་ས་ཡི་བདག་པོ་ཚངས་པས་བྱིན།
ཡངས་པའི་དགེ་བས་མཐོ་རིས་ལམ་དུ་རབ་བཤགས་བཱ་ར་ཎ་སི་རུ།
དཔལ་ལྡན་འཇིག་རྟེན་བསྐྱབ་བློ་ནོམ་བསྐྱུན་སྐྱོང་བ་ཀུན་གྱི་འབྲས་བུ་སྟེར།
ཞིན་དུ་དགའ་ནི་གྲོང་ཁྱེར་གཙོ་བོས་ཆོས་ཀྱི་རྒྱལ་སྲིད་ལ་དབང་བསྐུར། 190

དེ་ནས་མགོ་བཀྲུ་ཚོ་གའི་རིམ་པ་ཡིས།
གསོ་སྦྱོང་དག་ལ་ཉར་གནས་བཅོ་ལྔ་ལ།
རིན་པོ་ཆེ་དེ་རྒྱལ་མཚན་རྩེར་བཏགས་ནས།
སྣ་ཚོགས་འདོད་པས་ཡོངས་སུ་གང་བར་བྱས། 191

གཞན་ལ་ཕན་པས་འབྲས་བུ་ལྡན་པར་གཤེགས་བགྲོད་བྱས་ཤིང་ལོ་བཀྲུར་ནི།
རྒྱལ་སྲིད་ཆེན་པོ་ལ་གནས་འཇིག་རྟེན་མཐའ་དག་ཁྱེངས་བྱས་མི་བདག་གི།
གནས་ལ་སྨྲས་བཞག་ཉེ་བར་ཞི་བ་ཐམས་ཅད་ཐོབ་ཅིང་དེ་ཉིད་ཤེས།
གང་ཡང་འདི་ནི་ཚངས་པའི་དངོས་པོ་རྣམ་པ་དག་དུ་གཤེགས་པར་གྱུར། 192

རིན་ཅེན་གླིང་དུ་མངོན་བགྲོད་པ། ཞིན་དུ་དགའ་ཡི་སྐྱེ་བ་དེར།
གང་སྟོན་བདག་གིས་ཁྱེངས་བྱས་པ། ཆོས་ཀུན་དེ་ཀུན་འདི་དག་གོ། 193

དེ་སྐད་སྟོན་པ་གཙོ་བོ་ཡིས། རང་གི་སྤྱོད་ཚུལ་མཐའ་ཡི་གཏམ།
སྦྱིན་དང་བརྩོན་འགྲུས་མན་ངག་གིས། དགེ་སློང་རྣམས་ལ་རྗེས་བསྟན་བསྐྱབས། 194

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བ་ད་རའི་གླིང་དུ་འགྲོ་བའི་ཡལ་འདབ་སྟེ་དྲུག་པའོ།།

तस्मिन् काले विपुलकुशलैः स्वर्गमार्गं प्रयाते
वाराणस्यां विशदयशसि क्ष्मापतौ ब्रह्मदत्ते।
श्रीमान् सर्व्वप्रणयिफलदः सुप्रियः पौरमुख्यै-
र्लोकत्राणे विनिहितमतिर्धर्म्मराज्येऽभिषिक्तः॥ १९०॥

ततः शिरःस्नानविधिक्रमेण
तत्पञ्चदश्यां ध्वजमूर्ध्नि रत्नम्।
स पोषधैः पोषित एव धृत्वा
चकार विश्वं परिपूर्णकामम्॥ १९१॥

कृत्वा यात्रां परहितफलां वत्सराणां शतेन
स्थित्वा राज्ये महति निखिलं पूरयित्वा च लोकम्।
पुत्रं धृत्वा नरपतिपदे प्राप्य सर्व्वोपशान्तिं
तत्त्वज्ञोऽसौ किमपि परमं ब्रह्मभावं जगाम॥ १९२॥

स्युरेते दस्यवः सर्व्वे पूर्व्वं ये पूरिता मया।
रत्नद्वीपाभिगमने तस्मिन् सुप्रियजन्मनि॥ १९३॥

इति शास्ता स्ववृत्तान्तकथया विदधे विभुः।
दानवीर्य्योपदेशेन भिक्षूणामनुशासनम्॥ १९४॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां बदरद्वीपयात्रावदानं नाम षष्ठः पल्लवः।

Chapter VII.

ཡལ་འདབ་བདུན་པ།

སྒྲ་དེབ་འཁྲི་ཤིང་གི་རྟོགས་བརྗོད་ནི།

༄༅། །དགེ་བའི་སྨོན་ལམ་དག་པའི་གཟི་བརྗིད་དང་།
དབེན་པ་དྲི་མེད་སྣང་བའི་རྟོགས་བྱེད་ལྡན།
གང་ཞིག་ཡོངས་སུ་བསྒྲགས་པ་ཙམ་ཉིད་ན།
སྲིད་པའི་སྐྱོངས་འཁྱོག་དེ་ཉིད་བསྐྱུགས་པར་འོས། 1

གྲོང་ཁྱེར་སེར་སྐྱ་ཞེས་པར་ནི། ནྱ་གྲོ་དྷ་ཡི་ནགས་ཚལ་གནས།
སྨོན་ཆེ་འཁོར་ནི་སྟོང་ཕྲག་ལ། བཅོམ་ལྡན་འདས་ཀྱིས་ཆོས་བསྟན་མཛད། 2

མི་དམན་ཀུན་དགའ་ཚོགས་ཀྱི་བཅུད། ཙན་དན་ལྗང་བསིལ་དེ་ཡི་ནི།
གསུང་གི་བདུད་རྩི་གསན་པ་ཡི། སྐྱིམས་པས་བསོད་ནམས་ལྡན་པས་འགྲུངས། 3

ཆོས་ནི་ཉན་པའི་ཚོགས་པ་དེར། རྒྱལ་པོ་ཟས་ནི་གཙང་མ་ཡིས།
བསོད་ནམས་ཉེ་བར་བསྟན་པའི་ཚུལ། དྲི་མ་དང་བྲལ་དགའ་བ་ཐོབ། 4

དེ་ནས་རྒྱལ་རིགས་ལས་སྐྱེས་པ། ཤཱཀྱ་མིང་ཆེན་དག་གིས་དེར།
ཆོས་ཀྱི་གདམས་ངག་ཐོས་གྱུར་ནས། རང་གི་ཁྱིམ་དུ་ཕྱིན་དེ་སྨྲས། 5

सप्तमः पल्लवः।

मुक्तालतावदानम्।

कुशलप्रणिधानशुद्धधाम्नां
विमलालोकविवेकबोधकानाम्।
परिकीर्त्तनमात्रमेव येषां
भवमोहापहर्त्तारस्त एव धन्याः ॥ १ ॥

पुरा पर्षत्सहस्राणां न्यग्रोधोपवनस्थितिः।
कपिलाख्ये पुरे चक्रे भगवान् धर्म्मदेशनाम् ॥ २ ॥

अमन्दानन्दसन्दोहस्यन्दि चन्दनशीतलम्।
तस्य वागमृतं धन्याः कृताञ्जलिपुटाः[1] पपुः ॥ ३ ॥

राजा शुद्धोदनस्तत्र धर्म्मश्रवणसङ्गमे।
पुण्योपदेशसलिलैर्लेभे[2] वैमल्यनिर्वृतिम्[3] ॥ ४ ॥

अथ तत्र महानामा शाक्यराजकुलोद्भवः।
धर्म्मोपदेशमाकर्ण्य प्राप्तः स्वगृहमब्रवीत् ॥ ५ ॥

---

१ Orig. श्रुताञ्जलिपुटैः। २ Orig. लोभे। ३ Orig. वैमल्य०।

ཀྱེ་མ་སངས་རྒྱས་འབྱུང་བ་འདི། བདག་ཅག་གི་ནི་དོན་ཆེན་ལ།
བཅོམ་ལྡན་སངས་རྒྱས་ཆོས་དང་ནི། དགེ་འདུན་གཟུགས་དང་གསུང་འདའི་སྐད། 6

དེ་ཡི་ཚིག་དེ་ཐོས་གྱུར་ནས། ཁྲིམ་ཐབ་ཟླ་འོད་གདམས་ངག་གི།
ཁྲིད་པར་ཐོས་པས་དགའ་བ་དང་། དོན་དུ་གཅེར་ལས་དེ་ལ་སྨྲས། 7

སྐྱེས་བུ་བསོད་ནམས་སྐལ་ལྡན་རྣམས། བཅོམ་ལྡན་འདས་ཀྱིས་རྗེས་བཟུང་འོས།
བདག་ཅག་བུད་མེད་སྨད་འོས་རྣམས། དེ་ཡི་མན་ངག་འོས་མ་ཡིན། 8

དེ་སྐད་ཁྲིམ་ཐབ་ཚིག་ཐོས་ནས། དེས་སྨྲས་བཟང་མོ་བཅོམ་ལྡན་འདས།
འགྲོ་བའི་བླ་མ་སྙིང་རྗེ་ཡིས། གཟིགས་པ་དག་ལ་དབྱེ་བ་མེད། 9

ཀུན་ལ་ཉི་མའི་འོད་ཟེར་སྙོམས། ཆུ་འཛིན་དག་གི་ཆར་པ་སྙོམས།
སེམས་ཅན་ཀུན་ལ་ཐུགས་བརྩེ་བ། བཅོམ་ལྡན་འདས་ཀྱིས་གཟིགས་པ་སྙོམས། 10

སྐྱེ་རྒུའི་བདག་མོ་ཆེན་མོ་ཡིས། ཚིག་གིས་ཕྱི་དྲོ་ཁྱོད་ཀྱི་སྐབས།
བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་ནི། རྒྱལ་པོ་ཟས་གཙང་བྱེད་པ་ཉིད། 11

དེ་སྐད་བདག་པོའི་ཚིག་སྟན་གྱིས། ཤཱཀྱའི་བུ་མོའི་ཚོགས་ཀྱིས་བསྐོར།
བཅོམ་ལྡན་འདས་ཀྱི་བསོད་ནམས་ནགས། གཙང་མ་དེར་ནི་དེ་སོང་གྱུར། 12

དེར་ནི་སྙིང་རྗེའི་དཔག་བསམ་ཤིང་། སྙིང་སྟོབས་མི་རྟོག་འབྲས་བུ་ཆེ།
རབ་དུ་ཞི་བའི་བདུད་རྩི་ཡིས། ཡང་དག་བྲན་པ་དེ་ཡིས་མཐོང་། 13

अहो नु भगवान् बुद्धो धर्म्मः सङ्घश्च सिद्धये ।
बुद्धोत्पादोऽयमस्माकं निर्व्वाणाय महाफलः ॥ ६ ॥

उपदेशविशेषात्तनिर्वृतेस्तस्य तद्वचः ।
श्रुत्वा शशिप्रभा पत्नी[1] प्रणयात्तमभाषत ॥ ७ ॥

अनुग्राह्या भगवतः पुरुषाः पुण्यभागिनः ।
निन्द्यास्तदुपदेशानामनर्हा योषितो वयम् ॥ ८ ॥

इति जायावचः श्रुत्वा स जगाद जगद्गुरोः ।
भद्रे भगवतो नास्ति भेदः कारुण्यदर्शने[2] ॥ ९ ॥

समा सर्व्वत्र भा भानोः समा वृष्टिः[3] पयोमुचः ।
समा भगवतो दृष्टिः सर्व्वसत्त्वानुकम्पिनः ॥ १० ॥

महाप्रजापतेर्वाक्याद्‌पराह्लक्षणं तपः ।
शुद्धोदनः करोत्येव राजा भगवतोऽन्तिके ॥ ११ ॥

इति पत्युः प्रियगिरा वृता शाक्याङ्गनागणैः ।
याचने[4] तद्भगवतः सा पुण्योपवनं ययौ ॥ १२ ॥

सा सत्त्वकुसुमं तत्र तं ददर्श महाफलम् ।
प्रशमामृतसंसिक्तं करुणाकल्पपादपम् ॥ १३ ॥

---

१ Orig. यत्नी । २ Orig. भेदवारुण्यदर्शने । ३ Orig. वृष्ठिः ।
४ Orig. याचन ।

རླུང་གི་དུང་བའི་འཁྲི་ཤིང་བཞིན། དེ་ཡིས་རིང་ནས་དེར་ཁྲུག་འཚོལ།
རྣ་རྒྱན་གཡོ་བའི་ཟློལ་གྱིས་ནི། རྨོངས་པ་ཡོངས་སུ་གཏོང་བ་བཞིན། 14

གསེར་འོད་རིན་ཅན་རྒྱན་ཚོམས་ཀྱིས། བརྒྱན་པ་དག་ནི་མཐོང་གྱུར་ནས།
དགེ་སློང་ཀུན་དགའ་བོ་ཞེས་པས། ཤིན་ཏུ་ཕན་བརྩོན་དེ་ལ་སྨྲས། 15

མ་མ་ཁྱོད་ཀྱི་ཆ་ལུགས་འདི། དྲེགས་པས་རྒྱགས་ཤིང་རབ་ཞེས་སྒྲོང་།
ཐུབ་པའི་དཀའ་ཐུབ་ནགས་སུ་ནི། མི་རིགས་འདི་ནི་ཆགས་བྲལ་གནས། 16

ཡོན་ཏན་གྱིས་གདམས་ཆགས་པ་ཡི། སྨུ་ཚོར་རྒྱན་ཚོམས་ཀྱི་མ་འདིར།
བདག་ཅག་བཟུང་བར་མི་འོས་ཞེས། ཁྱོད་ལ་ཉེ་བར་འདོམས་པ་བཞིན། 17

དེ་ཡི་འདི་བརྗོད་གཟུགས་བཟང་དེའི། སྐྱེངས་པའི་གདོང་ནི་དམན་པ་ཡིས།
རྒྱན་ཚོམས་ཐམས་ཅད་དགྲོལ་ནས་ནི། རང་གི་ཁྱིམ་དུ་བསྐྱུར་བར་གྱུར། 18

དེ་ནས་ཐམས་ཅད་འཁོར་པ་ལ། དགེ་བ་སྟོན་མཛད་བཅོམ་ལྡན་འདས།
དངོས་པོ་མི་རྟག་པ་ཉིད་དུ། ཉེ་བར་སྟོན་པའི་རྩོམ་པ་མཛད། 19

གང་གི་རྟག་ཏུ་མི་རྟག་ཉིད། རྟག་པ་ཉིད་བཞིན་འགྲོ་བར་ནི།
སྲོག་ཆགས་རྨོངས་པས་འཛིན་བྱེད་པ། འདི་ནི་རྨོངས་པའི་མཐུ་ཆེན་པོ། 20

བདེན་པར་ཡིད་ཆེས་རྨོངས་པ་ཡིས། འཇིག་རྟེན་མི་བདེན་པ་ལ་དགའ།
དངོས་པོ་ཀུན་གྱི་དངོས་མེད་ནི། ཉམས་སྨྱོང་གནས་པ་རིག་པ་མེད། 21

लतेव पवनानम्रा तं दूरात् प्रणनाम[1] सा ।
लोभेनेव परित्यक्ता च्युतकर्णोत्पलच्छलात् ॥ १४ ॥

विलोक्य काञ्चनरुचिं रत्नभूषणभूषिताम् ।
आनन्दनामा भिक्षुस्तामुवाच प्रहितोद्यतः ॥ १५ ॥

वेशः प्रशमशून्योऽयं मातर्मुनितपोवने ।
दर्पोत्सक्तो न युक्तस्ते विरक्तानामिदं पदम् ॥ १६ ॥

गुणसंयमसिक्तानि मुखराभरणान्यहो ।
नेहास्मत्ग्रहणं युक्तमितीवोपदिशन्ति ते ॥ १७ ॥

इत्युक्ता तेन सा तन्वी वैलक्ष्यविनतानना ।
उन्मुच्याभरणं सर्व्वं प्राहिणोन्निजमन्दिरम् ॥ १८ ॥

उपविष्टेषु सर्व्वेषु निर्द्दिष्टकुशलस्ततः ।
अनित्यतैवं भगवानुपदेशं प्रचक्रमे ॥ १९ ॥

महामोहप्रभावोऽयं येन नित्यमनित्यताम् ।
नित्यतामिव मन्यन्ते मूढा जगति जन्तवः ॥ २० ॥

असत्ये रमते लोकः सत्यप्रत्ययमोहितः ।
न वेत्ति सर्व्वभावानामभावानुभवां स्थितिम् ॥ २१ ॥

१ Orig. दूराग्रे ननाम ।

སྐྱེ་བ་ཐོས་པའི་ལམ་དུ་ཡང་དག་ཆགས་ལྡན་ཁ་ཅིག་སྐྲ་ཡིས་བསྟན་བཅོས་
དག་དང་ནི།
གཞན་ནི་རིག་བྱེད་ལམ་དང་རྟོག་གེ་རྩོད་པས་གཞན་དེ་ཁ་ཅིག་རྒྱུད་ནི་ཡོངས་
འཛིན་དང་།
གཞན་དག་ཉོམ་མང་སྐྲུ་ཅོལ་མཁས་དང་ལྷན་ཅིག་ཉིད་དུ་འཇིག་པར་སྐད་ཅིག་
གནས།
དེ་ལ་ཡང་ནི་མི་འཇིགས་པ་བཞིན་རོལ་རྩེད་དག་གིས་རྨོངས་ཉོམས་དགའ་བ་
རབ་ཏུ་འཛིན། 22

མི་བཟད་ཡུལ་གྱི་གནོད་པའི་ལུས་ནི་ཉོན་མོངས་ཕུང་པོ་དག་གི་གནས།
རབ་རྨོངས་ལས་བྱུང་སྲིད་པ་རབ་ཚུབ་རླུ་ངམ་ཐང་གི་ཉམ་པར་གསལ།
མཐའ་དང་བྲལ་བའི་སྲིད་པའི་ནད་འདི་ཇི་ལྟར་ཉམ་པར་ལྡོག་འགྱུར་བ།
དེ་ལྟར་བྲ་དང་བྲ་མིན་ཕན་པའི་ས་ལ་ཉམ་དགྱོད་ལྡན་པས་དཔྱད། 23

བཅོམ་ལྡན་རང་ཉིད་འདི་ལ་སོགས། འདུ་བྱེད་མི་རྟག་ཡང་དག་ལྡན།
ཆོས་ཀྱི་གདམས་ངག་དགེ་བ་ནི། རིགས་པར་གསུང་བར་བསྟོན་པ་ཆེ། 24

དེར་ནི་ཤཱཀྱའི་བུ་མོ་གཅིག། བུ་མོ་གཞོན་ནུ་མ་ཡི་མཚམས།
བཟོད་དཀའི་ལང་ཚོ་ལ་གནས་པ། གཟུགས་དང་སྐལ་བཟང་ཉིད་ཀྱིས་དྲིགས། 25

ནུ་མའི་ངོས་སྲུ་སྲུ་ཏིག་གི། ངོ་ཤལ་དགའ་མའི་བདག་པོ་ཡི།
གྲགས་པའི་སྙིང་པོ་གསལ་འདྲ་ལ། ཟུར་མིག་གཡོ་བས་ཡང་ཡང་བལྟས། 26

केचित् व्याकरणैः परे श्रुतिपथैस्तर्कप्रवादैः परे
केचित्तन्त्रपरिग्रहैर्बहुविधैरन्यैः कलाकौशलैः ।
संसक्ताः पुनरुक्तजन्मशरणा याताः सदैव क्षयं
तत्राप्यक्षयलीलया क्षणपदं मुग्धैर्निबद्धा धृतिः ॥ २२ ॥

विषयविषमापायः कायः प्रपञ्चयाश्रया
खरतरमरुस्फाराकारो मोहभवो भवः ।
हितभूमि तथाकार्य्यं कार्य्यं विवेकिना[१] तथा
निरवधिरयं दृष्ट्वा व्याधिर्यथा निवर्त्तते[२] ॥ २३ ॥

इत्याद्यनित्यसंस्कारसंयुक्तं युक्तमुच्यते ।
धर्म्मोपदेशकुशलं वक्तुं भगवति स्वयम् ॥ २४ ॥

एका शाक्यवधूस्तत्र रूपसौभाग्यगर्व्विता ।
स्थिता शैशवतारुण्यसन्धौ[३] वयसि दुःसहे ॥ २५ ॥

मुक्ताहारं स्तनतटे लोलापाङ्गैर्मुहुर्मुहुः ।
आलुलोके यशस्फारसारं रतिपतेरिव ॥ २६ ॥

१ Orig. विवेकिनी । २ Orig. निरवर्त्तते ।
३ Orig. ॰तारुण्यबन्धो ।

མིང་ཆེན་ཆུང་མ་ཟླ་འོད་ཀྱིས། ཚེ་གཅིག་མིན་པའི་སེམས་ལྡན་དེ།
དོ་ཤལ་ནོམ་པར་བལྟ་བ་དག། མཐོང་ནས་ཆགས་བྲལ་བཞིན་དུ་བསམས། 27

ཆོས་ནི་ཉེ་བར་སྟོན་ཚེ་ཡང་། གཡོ་བའི་དོ་ཤལ་འདི་ལ་ལྟ།
དངོས་པོ་རྣམས་ཀྱི་སྐད་ཅིག་མ། འདི་དག་མྱོང་བས་མི་ཉན་ཉིད། 28

རང་གི་དོ་ཤལ་བསྟན་ནས་འདི། དོ་ཤལ་སྦྱོ་བ་བདག་གིས་དགྲོག།
ལྷག་པ་མཐོང་བ་ཁོ་ན་ཡིས། ལུས་ཅན་དྲེགས་པ་ཞི་བར་གྱུར། 29

འདི་བསམས་དེ་ཡིས་འབངས་མོ་ནི། རོ་ཧི་ཏ་ཞེས་བྱ་ལ་སྨྲས།
རོ་ཧི་ཏ་སོང་བདག་གི་ནི། དོ་ཤལ་ཁྱིམ་ནས་མགྱོགས་སུ་ལོངས། 30

དེ་ཡིས་དེ་སྐད་བརྗོད་པས་དེ། དེར་ནི་ཆོས་ཉན་ལ་ཞུགས་པ།
དུས་མིན་འགྲོ་བས་ཡིད་བྱུང་ནས། ཤུགས་དང་བཅས་པས་སྐད་ཅིག་བསམས། 31

ཀྱེ་མ་བདག་གི་དགེ་བ་འདིར། བར་ཆོད་འདི་ནི་ཡང་དག་སྐྱེས།
གང་ཕྱིར་གཞན་དབང་འཚོ་གྱུར་པ། བདག་གིས་ཆོས་ཉན་མི་འཐོབ་པོ། 32

བསོད་ནམས་དྲི་བཟང་གྱིས་གྱུར་ཅིང་། སྙིང་རྗེའི་གེ་སར་འཁྲིགས་གྱུར་པ།
བཅོམ་ལྡན་ཞལ་གྱི་པདྨོ་ལས། གསུང་གི་སྦྲང་རྩི་མཆོག་གིས་ཐོབ། 33

ཀྱེ་མ་རང་དབང་ནོམ་པར་བཅད། ལུས་འཇིག་བདེ་བ་ཉམས་བྱེད་པ།
སྡུག་བསྔལ་འགྲོ་བར་སྲོག་ཆགས་རྣམས། གཡོག་ནི་སྡུག་བསྔལ་བརྒྱུད་མ་ཡིན། 34

हारावलोकिनीं दृष्ट्वा तामनेकाग्रहादसौ।
अचिन्तयद्विरक्तेव महत्यन्तौ शशिप्रभा॥ २७॥

इयं धर्मोपदेशेऽपि चपला हारमीक्षते।
भावानां न शृणोत्येव मूढा क्षणिकतामिमाम्[1]॥ २८॥

स्वं हारं दर्शयित्वास्या हारोत्साहं हराम्यहम्।
अधिकालोकनेनैव दर्पः शाम्यति देहिनाम्॥ २९॥

इति सञ्चिन्त्य सा[2] दासीं रोहिकाख्यामभाषत
रोहिके गच्छ मे हारं गृहात् सत्वरमाहर॥ ३०॥

इत्युक्ता सा तया तत्र प्रवृत्ते धर्मसंश्रवे।
अकालगमनोद्विग्ना निश्वस्याचिन्तयत्[3] क्षणम्॥ ३१॥

अहो वतान्तरायोऽयं सञ्जातः कुशले मम।
नास्मिन् श्रोतुं लभे धर्मं यत्परायत्तजीविता॥ ३२॥

पुण्यसौरभसम्भारात् कीर्णकारुण्यकेसरात्।
मुखपद्माद् भगवतो धन्यः प्राप्नोति वाङ्मधु॥ ३३॥

अहो स्वाच्छन्द्यविच्छेद[4]स्तनुभङ्गः सुखक्षयः।
सेवा जगति जन्तूनां दुःखे दुःखपरम्परा॥ ३४॥

---

१ Orig. मूढ्दाणिकनामिमाम्। ३ Orig. निश्वाचिन्तयत्।
२ Orig. omits सा। ४ Orig. ०विच्छद०।

གཡོག་གི་ངལ་དུབ་ཀྱིས་འཁྲོབ་པ། ཟླ་ཏོན་བྲ་དགའི་ཀྱུ་ཡི་ཐེགས།
ཤུགས་རིངས་ཞིན་དུ་ཚ་བས་བསྐོལ། ཀྱི་མ་དཀའ་སྡུད་དག་གིས་འཐུངས། 35

དཔོན་པོ་མཐོང་ན་ཁངས་ཉམས་ཞིང་། ཡོན་དན་ཉམས་དང་གཟི་བརྗིད་མཆོད།
ཞི་ཞིང་ངལ་བ་འདི་དག་ནི། གཡོག་བྱེད་དག་གི་དང་པོའི་འབྲས། 36

གཡོག་ནི་ཀོང་པ་འཆིང་བའི་ལྷུགས་ཀྱི་ལྷུགས་སྐྲོགས་ཞུམ་ཞིང་ང་གྲོལ་ཆགས་
པའི་ས།
རྟག་དུ་ངེས་པར་རང་གི་བྲ་བ་འགོག་ཅིང་གཉིད་དང་བདེ་བ་འཇོམས་པར་བྱེད།
རེ་བའི་ཆགས་ཞེན་ཚོགས་ཀྱི་ལམ་དང་ལེགས་འགྲོགས་ལོངས་སྤྱོད་ཀྱི་ནི་རྡོ་རྗེ་
དང་།
སྨོངས་པ་ནམས་ནི་རི་དགས་སྐོམ་བསྐྱེད་སྨྱུ་ངན་ས་གཞི་ལུས་ནི་ཟད་བྱེད་ཡིན། 37

དེ་ལྟར་ཡུན་རིང་བསམས་ནས་ནི། དེ་ཡི་བཀའ་ཡིས་དེ་སོང་སྟེ།
ལུས་ནི་གཡོག་དུ་བཙོངས་ནམས་ལ། རང་དགར་གནས་པ་ག་ལ་ཡོད། 38

གཞན་གྱིས་བསྐུལ་བས་དམན་གྱུར་ཅིང་། འགྲོ་བ་དེ་ནི་བཙོམ་ལྡན་འདས།
སྙིང་རྗེ་གྱིས་པའི་ལྷ་ཡིས་ནི། སྤྱན་གྱིས་གཟིགས་ནས་སྐད་ཅིག་བསམས། 39

སྐྱེ་བ་འདི་ལ་འདི་ཡིས་ནི། འཚོ་བའི་མཚམས་ལྷག་ཡོངས་སུ་རྫོགས།
སྡུག་མ་འདི་ནི་འཁོར་བ་ལས། བདག་རང་ཉིད་ཀྱིས་གདོན་པར་བྱ། 40

དེ་ནས་ལས་ཀྱི་སྦྱོར་བ་ཡིས། ལམ་དུ་འཁྲུལ་ལ་བགྲོད་དེ་ལ།
བཙུ་ལ་ཆགས་སྨོངས་བཅས་པའི། བ་ཡི་རྩ་ཡིས་བདུངས་པར་གྱུར། 41

सेवाप्रयाससंप्राप्तं धनमानकणोदयम्।
तप्तमत्युष्णनिश्वासैरहो कृच्छ्रेण पीयते ॥ ३५ ॥

मानम्लानिर्गुणम्लानिरोजःपूजश्रमः श्रमः।
प्रथमं सेवकस्यैतत् फलमीश्वरदर्शने ॥ ३६ ॥

लौही बन्धनशृङ्खला चरणयोर्हेलावमानावनी[1]
स्वव्यापारनिषेधनित्यनियती निद्रासुखद्रोहिणी।
आशास्यस्य विशालजालसरणिः सत्सङ्गभोगाशनिः
मुग्धानां मृगतृष्णिकामरुमही सेवा शरीरक्षयः ॥ ३७ ॥

इति सञ्चिन्त्य सुचिरं सा जगाम तदाज्ञया[2]।
सेवाविक्रीतकायानां स्वेच्छाविहरणं कुतः ॥ ३८ ॥

व्रजन्तीं तां परप्रेष्यां कृपणां[3] करुणाकुलः।
निरीक्ष्य भगवान् दिव्यचक्षुषाचिन्तयत् क्षणम् ॥ ३९ ॥

अस्मिन् जन्मनि शेषोऽस्याः सम्पूर्णो जीवितावधिः।
इयं वराकी संसारादुद्धर्त्तव्या स्वयं मया ॥ ४० ॥

अथ तां कर्म्मयोगेन व्रजन्तीं सहसा पथि।
वत्सवात्सल्यविवशा शृङ्गाभ्यामाजघान गौः ॥ ४१ ॥

---

१ Orig. हेन्यावमानावनीः। २ Orig. खजगाम तराजया।
३ Orig. व्रजन्ती वरप्रेष्यकृपणाम्।

སྐྱེ་བ་གཞན་གྱི་ལྟག་གནས་ཀྱིས། ཡིད་ནི་སངས་རྒྱས་ལ་དམིགས་ཞིང་།
བཅོམ་ལྡན་འདས་ཀྱིས་བཀའ་དྲིན་ལས། དེ་ཡི་རང་བཞིན་དྲན་ངེས་བསམས། 42

འཁོར་བ་ཆུ་སྲིན་འབྱུང་གནས་ཀྱི། སྐྱེ་བའི་འཁོར་མོར་སྒྲོག་ཆགས་རྣམས།
ལས་ཀྱི་བོ་རླབས་ཀྱིས་དཀྲུགས་པས། ཀྱི་མ་འཁྲིད་ཞིང་འབྱུང་བའི་རིམ། 43

སྐྱེས་བུ་རྣམས་ཀྱི་དཔྲལ་བ་ཡངས་པའི་རྡོ་ཡི་གླིགས་བུ་ལ།
བདེ་མེད་ལས་ཀྱི་སྨྱུལ་པ་བསལ་བའི་རྟགས་ཅན་བཟྲོང་དག་གིས།
སྐྱེ་དང་འཆི་བར་རབ་སྦྱོས་ཡི་གེ་དག་དུ་བཀོད་གྱུར་པ།
འདི་དག་རྣམས་ནི་ལག་པས་ཡོངས་སུ་ཕྱིས་པས་བསྐྱོད་པ་མིན། 44

གང་གིས་མངལ་ནས་བཅོམས་དེ་རིམ་གྱིས་ལྷུང་དང་གོ་དང་འཛིག་པའི་དུས་རྣམས་དག།
གང་དུ་ཡང་ནི་ལུས་ཀྱི་རྩིས་རིས་གཞན་པ་ཉིད་དུ་འགྱུར་བ་མ་ཡིན་པ།
ལས་ཀྱི་དབང་གིས་མི་རྣམས་དག་གི་རབ་མང་སྤྱོད་པས་རྣམ་པར་བཀྲ་བ་དག།
བཀོད་པ་འདི་ནི་མི་བུའི་སྒྲ་ཡི་ཚོགས་དང་མཚུངས་པར་ཡོངས་སུ་སྨིན་པར་འགྱུར། 45

དེ་ལྟར་བསམས་དེ་སྔོན་དུ་ཉེ་བར་གནས་སྐབས་བཟང་པོ་དང་པོའི་རྣམ་གཞག་རབ་གནས་པ།
མི་བཟད་འབང་མོའི་དངོས་པོ་བཅག་པས་སྐྱེངས་པར་གྱུར་པ་བཞིན་དུ་གཡོ་བ་མེད་ཉིད་གྱུར།
སྔོན་ལམ་ཁང་པ་དཀར་པོ་དམ་པའི་ཆོས་ཀྱིས་དག་པའི་བློ་ནི་ཡོངས་སུ་བཟུང་བྱས་ནས།
འཁོར་བ་དག་ཏུ་སྨོངས་པར་བྱེད་པས་དྲི་མ་ཅན་བཞིན་དེ་ཡི་སྒྲོག་ནི་བཅད་བར་གྱུར། 46

सा प्रदध्यौ भगवतः प्रसादात् तन्मयस्मृतिः ।
जन्मान्तराधिवासेन बुद्धालम्बनमानसा ॥ ४२ ॥

अहो कर्म्मोर्म्मिभिः क्षीणैः[१] संसारमकराकरे ।
जन्मावर्त्तेषु जन्तूनां मज्जनोन्मज्जनक्रमः ॥ ४३ ॥

पुंसां ललाटविपुलोपलपट्टिकासु
निःशर्मकर्म्मघटितप्रकटाक्षटङ्कैः ।
न्यस्तानि जन्ममरणप्रसराक्षराणि
नैतानि पाणिपरिमार्ज्जनया चलन्ति ॥ ४४ ॥

इयं कर्म्मायत्ता प्रचुरचित्रवैचित्र्यरचना
नराणां मायूरच्छदपटलतुल्या परिणतिः ।
यया गर्भारम्भे क्रमनिपतने वृद्धिसमये
क्षये वा नान्यत् प्राभजत[२] तनुलेखाच्छविरपि ॥ ४५ ॥

सञ्चिन्त्याथ पुरः प्रवृत्तसुदशासन्नावसन्नस्थितिं
प्राप्तेवासमदासभावकलनावैलक्ष्यनिस्पन्दताम् ।
आधाय प्रणिधानधाम्नि धवले सद्धर्म्ममुद्रां धियं
संसारे विचिकित्स्य एव मलिनं तत्याज सा जीवितम् ॥४६॥

---

32 — १ Orig. अहो कर्म्मोर्यिनर्मीनैः ।
२ Orig. नान्यवजति ।

དེ་ནས་མཐོ་རིས་ཕུན་ཚོགས་ཏེ། སིང་ག་ལ་ཡི་གླིང་དུ་དེར།
འོ་མའི་རྒྱ་མཚོར་ཟླ་བ་ཡི། རི་མོ་བཞིན་དུ་རབ་གསལ་སྐྱེས། 47

དེ་ནི་མངལ་ཞུགས་སྐྱེས་པའི་དུས། མཁའ་ལ་མུ་ཏིག་ཆར་པ་གཡོས།
སིང་ག་ལ་བདག་བུ་མོ་དེ། མུ་ཏིག་འཁྲི་ཤིང་ཞེས་པར་གྱུར། 48

དེ་ནི་ཆེ་བར་སྐྱེས་པ་ཡིས། བསོད་ནམས་བཞིན་དུ་འཛོ་སྒེག་འཛིན།
ཡན་ལག་རྣམས་ཀྱི་རྣམ་འགྱུར་གྱིས། ཚིག་ཤེས་བཞིན་དུ་ལང་ཚོ་ཐོབ། 49

དེ་ནས་ནམ་ཞིག་མཚན་ཡོད་ཀྱི། གྲོང་ཁྱེར་པ་ཡི་ཚོང་པ་རྣམས།
ཆུ་སྲིན་འབྱུང་གནས་རབ་བསྒྲལ་ནས། སིང་ག་ལ་ཡི་གླིང་དུ་སོང་། 50

དེ་ནི་དེ་དག་མཚན་མོའི་མཐར། རབ་སད་ངལ་བསོས་དགའ་བ་ཡིས།
ཆོས་དོན་ཚོགས་བཅད་ཀྱིས་བཅིངས་པ་སངས་རྒྱས་ཀྱིས་གསུངས་གླུ་རུ་བླངས། 51

ཐོ་རངས་བ་གམ་ལ་གནས་པ། མི་བདག་བུ་མོས་ཉ་བ་ཡིས།
བདུད་རྩི་དེ་ཐོས་དེ་དག་རྣམས། བཀུག་སྟེ་འདི་དག་ཅི་ཞེས་དྲིས། 52

རབ་དགའ་ལྡན་མས་དེ་ལ་དེས། འདི་ནི་སངས་རྒྱས་བཅོམ་ལྡན་འདས།
སེམས་ཅན་ཀུན་ལ་ཐུགས་བརྩེ་བས། རང་བཞིན་དུ་འོས་གསུང་ཞེས་སྨྲས། 53

སངས་རྒྱས་མངོན་བརྗོད་ཐོས་ཉིད་ཀྱིས། དེ་ནི་སྤུ་ལོང་གིས་བརྒྱན་ལུས།
ཡང་དག་རིག་པ་ལེགས་ལྡན་མཐུ། རབ་ཏུ་བསྐྱེད་པའི་ས་གཞིར་གྱུར། 54

ततः सा सिंहलद्वीपे समीपे स्वर्गसम्पदाम्।
चन्द्रलेखेव दुग्धाब्धौ दिव्यद्युतिरजायत ॥ ४७ ॥

आधानजन्मनस्तस्य[१] मुक्तावर्षे दिवश्च्युते।
साभूत् मुक्तालता नाम सिंहलाधिपतेः सुता ॥ ४८ ॥

सा पुण्यमिव लावण्यं वहन्ती वृद्धिमागता।
लेभे विवेकेनाङ्गानां सन्तोषमिव यौवनम् ॥ ४९ ॥

ततः कदाचिद्वणिजः श्रावस्तीपुरवासिनः।
मकराकरमुत्तीर्य्य सिंहलद्वीपमाययुः ॥ ५० ॥

ते तत्र रात्रिपर्य्यन्ते विश्रान्तिसुखमाजगुः।
धर्म्मार्थगाथासन्नद्धप्रबुद्धबुद्धभाषितम् ॥ ५१ ॥

तदन्तःपुरहर्म्यस्था श्रुत्वैव श्रवणामृतम्।
किमेतदिति पप्रच्छ तानानाय्य नृपात्मजा ॥ ५२ ॥

ते तामूचुः प्रमुदितामिदं बुद्धस्य भाषितम्।
स्वभावार्हं भगवतः सर्व्वसत्त्वानुकम्पिनः ॥ ५३ ॥

बुद्धाभिधानं श्रुत्वैव पुलकालङ्कृताकृतिः।
सा बभूव समुद्भूतसम्बिद्भव्यानुभावभूः ॥ ५४ ॥

१ Is it आधाने जन्मनस्तस्याः ?

སྒྲ་ནི་སྤྲིན་གྱི་ལྷ་བུ་ཡིས། མི་བྲ་བཞིན་དུ་དེ་རངས་ནས།
སངས་རྒྱས་བཅོམ་ལྡན་ཞེས་པ་འདི། སུ་ཞེས་ཡང་ནི་དེ་ལ་སྨྲས། 55

དེ་ནས་དེ་ལ་དད་པ་དག། སྐྱེས་པར་གྱུར་པ་དེ་དག་གིས།
བསོད་ནམས་རང་བཞིན་བཅོམ་ལྡན་གྱིས། སྤྱོད་པའི་ལུགས་ནི་མ་ལུས་སྨྲས། 56

དེ་ནས་དེ་ཡི་གདམ་གྱིས་དེ། སྔར་སྐྱེས་དགེ་བ་གྱིས་པ་ཐོབ།
བཅོམ་ལྡན་སྔར་དུ་གསོལ་བ་ཡི། སྤྲིངས་ཡིག་དེ་དག་ཚམས་ལ་བསྐུར། 57

དུས་ཀྱི་རྒྱ་གཏེར་ཡང་དག་བསྐལ། རང་གི་གྲོང་ཁྱེར་ཐོབ་ནས་དེས།
བདག་ཉིད་ཆེ་ལ་ཕྱག་འཚལ་ཏེ། དེ་ཡི་གདམ་བཤད་སྤྲིང་ཡིག་ཕུལ། 58

ཐམས་ཅད་མཁྱེན་པ་བཅོམ་ལྡན་གྱིས། དེ་ནི་མངོན་ཉིད་མཁྱེན་གྱུར་ཀྱང་།
སྒྲ་རིག་འཕྲི་ཤིང་ལ་བཙེ་བས། རང་ཉིད་ཀྱིས་ནི་སྤྲིངས་ཡིག་བཀླགས། 59

ཀྱི་མ་བསོད་ནམས་ཚོང་ཟོང་དག་གི་རྙེད་པར་གྱུར་པ་ཁྱོད་ནི་དྲན་པ་ཉིད།
གོད་དང་གདུང་བ་དང་ནི་སྲིད་པ་འཇོམས་པའི་སྲིད་པའི་སྨན་བཟང་ཅི་ཡང་ཡིན།
བཅོཾ་ལྡན་ལས་བྱུང་གཏཾ་གྱི་རིམ་པས་ཉེར་བསྟན་ཡང་དག་རིག་པ་སྐྱོང་བའི་ས།
བཅོཾ་ལྡན་འདི་དེ་བདག་གི་བདུད་རྩི་ཡང་དག་བགོ་སྐལ་ཆེན་པོར་གྱུར་པ་ཡིན། 60

དེ་ལྟར་མདོར་བསྡུས་སྤྲིངས་ཡིག་དོན། བཅོམ་ལྡན་རང་གིས་རྟོགས་གྱུར་ནས།
ཅུང་ཟད་འཛུམ་པའི་འོད་ཟེར་གྱིས། ཕྱོགས་ཀྱི་སེམས་ཅན་རབ་གསལ་མཛད། 61

उन्मुखी सा मयूरीव शब्दैरेव पयोमुचः।
क एष भगवान् बुद्ध इति पप्रच्छ तान् पुनः॥ ५५॥

ततस्ते निखिलं तस्यै श्रद्धासम्बर्द्धितादराः।
न्यवेदयन् पुण्यमयीं भगवच्चरितस्थितिम्॥ ५६॥

अथ सा तत्कथावाप्तप्राग्जन्मकुशलोदया।
विज्ञप्तिलेखं प्रददौ तेषां भगवतः कृते॥ ५७॥

कालेन सिन्धुमुत्तीर्य्य सम्प्राप्तास्ते[1] निजां पुरिम्।
प्रणम्यावेद्य तद्वृत्तं ददुर्लेखं महात्मने॥ ५८॥

भगवानपि सर्व्वज्ञः पूर्व्वमेव विभाव्य तत्।
मुक्तालतायाः कृपया स्वयं लेखमवाचयत्॥ ५९॥

अहो स्मरणमेव ते किमपि पुण्यपथ्यं सतां[2]
भवति भवभैषजं व्यसनतापतृष्णापहम्।
भवन्मयकथाक्रमोपनतसम्विदास्वादभूः
स एष भगवन् महानमृतसंविभागो मम॥ ६०॥

इति संक्षिप्तलेखार्थं विभाव्य भगवान् स्वयम्।
ईषत्स्मितत्विषा सत्त्वप्रकाशमदिशद्दिशाम्[3]॥ ६१॥

---

१ Orig. कालेनौपन्धसमुत्तीर्य्यं प्राप्तस्ते। २ Orig. पुण्य अत्पतम्।
३ Orig. प्रकाशमदशधिशम्।

དེ་ནས་འོད་ཚོགས་རྗེས་གྲུས་ཤིང་། རི་མོ་མཁན་གྱིས་མི་ནུས་པའི།
རང་གི་སྐུ་གཟུགས་རས་ལ་བཀོད། བཅོམ་ལྡན་གྱིས་ནི་དེ་ལ་སྤྲིངས། 62

དེ་ཡི་བཀའ་ཡིས་ཕྱི་ནས་ཡང་། ཚོང་པ་དེ་དག་གཟིངས་ལ་ཞོན།
སིང་ག་ལ་ཡི་གླིང་ཕྱིན་ནས། དེ་ལ་ཐང་སྐུ་རབ་ཏུ་བསྟན། 63

གསེར་གྱི་སེང་གེའི་ཁྲི་བཀོད་པའི། རས་ལ་དེ་བཞིན་གཤེགས་མཐོང་ནས།
དེ་ལས་བྱུང་བའི་བསམ་གཏན་གྱིས། སྐྱེ་བོ་དགོངས་པ་གཅིག་བཞིན་གྱུར། 64

དེ་ཡི་འོག་ན་ཁྲིམས་པ་ནི། ལྷོད་ནམས་ཀྱིས་འཐོབ་མཐོང་གྱུར་པ།
སྐྱབས་སུ་འགྲོ་བ་གསུམ་དག་དང་། བསླབ་པའི་གནས་ནི་ལྔ་ཡང་ངོ། 65

ལུགས་ལས་འབྱུང་དང་ལྡོག་བཅས་པའི། རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་དང་བཅས།
དེ་བཞིན་འཕགས་ལམ་ཡན་ལག་བརྒྱད། མཆོག་གི་བདུད་རྩིས་རྫོགས་གྱུར་པའོ། 66

དེ་ཡི་སྟེང་དུ་ལེགས་བཤད་ནི། གསེར་གྱི་ཡི་གེ་རབ་མཛེས་པར།
དགོངས་པ་མཉམ་གཞག་བཅོམ་ལྡན་འདས། རང་གི་བཀོད་པས་མཛེས་གྱུར་པ། 67

སྐྱེ་དང་འཆི་བའི་ཉོན་མོངས་ཀྱིས་བདབ་གདུང་བ་དྲག་པོ་རབ་གྱིས་དག།
མི་བཟད་ཡུལ་ནི་གཡོ་བའི་སྦྲུལ་གྱི་འཕྲེང་བས་དཀྲིས་ཤིང་དཀྲུགས་གྱུར་པ།
རབ་རིབ་རབ་གྱིས་རབ་རྨོངས་ཕྱུག་གི་ཁང་པ་འདི་ལས་ཕྱིར་ཐོན་ལ།
སངས་རྒྱས་ཆོས་ལ་སྐྱབས་སུ་སོང་ཞིག་དེར་ནི་སྲིད་ལ་འཇིགས་པ་མེད། 68

ततश्चित्रकराशक्यां प्रभावैरनुपूरिताम् ।
भगवान् प्राहिणोत् तस्यै न्यस्तां स्वप्रतिमां पटे ॥ ६२ ॥

पुनः प्रवहणारूढ़ा वणिजस्ते तदाज्ञया ।
अवाप्य सिंहलद्वीपं तस्यै पटमदर्शयन् ॥ ६३ ॥

हेमसिंहासनन्यस्ते पटे दृष्ट्वा तथागतम् ।
जनस्तन्मयताध्यानादेकीभावमिवाययौ ॥ ६४ ॥

अधस्तात् लिखितं तस्मिन् पुण्यप्राप्तमदृश्यत ।
तिस्रः शरण्या गतयः पञ्च शिक्षापदानि च ॥ ६५ ॥

सप्रतीत्य[1]समुत्पादः सानुलोमविपर्य्ययः ।
आर्य्याष्टाङ्गस्तथामार्गः परमामृतनिर्भरः ॥ ६६ ॥

स्वयं भगवता न्यस्तं तस्योपरि सुभाषितम् ।
शोभते भावनालीनं भ्राजिष्णुकनकाक्षरम् ॥ ६७ ॥

विषमविषयालोलव्यालावलीवलयाकुलात्
तरुणतिमिरान्निष्क्रम्यास्मात् प्रमोहाद्गृहात् ।
जननमरणक्लेशावेशप्रवृत्तपृथुव्यथा
व्रजत शरणं बौद्धं धर्म्मं नाथ भवाद्भयम् ॥ ६८ ॥

१ Orig. वप्रतीत्य०।

དག་བྱེད་རྒྱལ་བའི་སྐུ་གཟུགས་ལ། སུ་ཡི་བདག་པོའི་བུ་མོས་བལྟས།
ཐོགས་མེད་དུས་ནས་བསགས་པ་ཡི། མི་ཤེས་བག་ཆགས་བཏང་བར་གྱུར། 69

རབ་མཐོ་གསེར་ཞུན་ལྟ་བུར་མཛེས་པའི་སྐུ།
ཕྱག་མཛེས་དཔུང་པ་བྲུས་མོའི་བར་མདོན་དགའ།
བསམ་གཏན་ལ་ཆགས་ཕྱེད་ནི་ཟུམ་པའི་སྤྱན།
མཛེས་སྨུག་རྒྱུན་བཞིན་རབ་ཏུ་མཐོ་བའི་ཤངས། 70

ཟི་བོ་ཉིད་ཀྱི་མཛེས་པར་རྟོགས་བྱ་བ།
རྒྱུན་མེད་སྐྱན་གྱི་ཞགས་པ་རིང་དུ་འཕྱུང་།
ཐུན་མཚམས་སྤྲིན་ཆགས་ལྷ་ཡི་རི་བོ་བཞིན།
ལོ་འདབ་གསར་པའི་ལྟད་དམར་ན་བཟས་མཚན། 71

འོད་ཀྱིས་ཕྱོགས་ལ་ཚུལ་ཁྲིམས་སྟོན་པ་བཞིན།
ཞལ་གྱི་ཟླ་བས་ཀུན་དགའ་སྤྲིན་པར་བརྩོན།
བཟོད་པའི་ཡོན་ཏན་ས་ལ་སློབ་པ་བཞིན།
བསོད་ནམས་ལས་སྐྱེས་སྐལ་བཟང་ལན་གསུམ་དུ། 72

བསྐོར་ནས་བདུད་པས་ནི་བའི་ཨུཏྤལ་དག
འཕྱུང་བ་མཁར་ཆོས་ལ་རིག་དེས་མཐོང་ནས།
སྙིང་པོ་མེད་པའི་ལུས་ལ་བལྟ་བ་སྤངས།
བདེན་པའི་མཐུ་ནི་དམ་པ་སྐྱེས་པར་གྱུར།། 73

जिनप्रतिकृतिं पुण्यां पश्यन्ती पार्थिवात्मजा।
अनादिकालोपचितां मुमोचाज्ञानवासनाम्॥ ६९॥

प्रांशुं रुवतकाञ्चनकान्तकायं
सुस्कन्धमाजानुभुजाभिरामम्।
ध्यानावधानार्थनिमीलिताक्षं
लावण्यधारायिततुङ्गनासम्॥ ७०॥

स्वभावभव्यं प्रविभासमानं
प्रलम्बनिर्भूषणकर्णपाशम्।
बालप्रवालारुणवल्कलाङ्कं
संसक्तसन्ध्याभ्रमिवामराद्रिम्[1]॥ ७१॥

त्विषा दिशां शीलमिवादिशन्तं
आनन्ददानोद्यतवक्त्रचन्द्रम्।
क्षमागुणं क्ष्मामिव शिक्षयन्तं
पुण्योचिता सा सुभगं विलोक्य॥ ७२॥

प्रणामपर्य्यन्तकपोलचुम्बि-
कर्णोत्पलानां परिवर्त्तनेन।
निरस्य निःसारशरीरतृप्तिं
सत्यानुभावं परमं प्रपेदे॥ ७३॥

---

१ Orig. ॰मिवाद्रिम्।

ཀུན་དུ་ཡང་དག་ཞུགས་པའི་འབྲས་བུ་དག།
རབ་དུ་གསལ་བྱས་དེ་ཚེ་བྱུང་ཆུབ་ཐོབ།
དེ་ཡིས་བདེ་གཤེགས་མཐུར་ནི་ནམ་བསམས་ཤིང་།
ཡ་མཚན་དགའ་བའི་ས་ཡིས་མངོན་པར་སྨྲས། 74

ཀྱེ་མ་རྨོངས་པའི་མུན་ཆེན་འཇོམ་བྱེད་པའི།
དེ་བཞིན་གཤེགས་པ་འོད་དང་ལྡན་པའི་སྐུ།
རིང་དུ་གནས་ཀྱང་ནམ་པར་གྱིས་པ་ཡི།
དཔལ་འདི་དགེ་བའི་རྒྱུ་སྐྱེས་དག་ལ་སྟེར། 75

སྐད་ཅིག་གིས་ནི་སྲིད་བསྐལ་དམ་པ་ཡིས།
སྨོན་ལམ་ཐོབ་ཅིང་ནང་གི་བྱེད་རབ་དང་།
ཀྱེ་མ་སྲིད་པའི་ཡོངས་གདུང་ཞི་བའི་སྐད།
ཞི་བའི་བདུད་རྩིའི་རྒྱ་བོ་རབ་འཕྲུར་བཞིན། 76

འདི་བརྗོད་དེ་ཡིས་བཅོམ་ལྡན་ལ། མུ་དིག་རིན་ཅེན་ནམས་ཀྱི་སྐྱེས།
དགེ་འདུན་མཆོད་སྣོད་ཚོང་པ་ཡི། སྐྱེ་བོ་ལ་བསྐུར་བདང་བར་གྱུར། 77

དེ་དག་རྒྱ་གཏེར་ཆེ་སྒྲོལ་ནས། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་སྦྱིན།
དེ་ཡི་མུ་ཏིག་རིན་ཅེན་ཚོགས། ཕྱག་འཚལ་ནས་ནི་དེ་ལ་ཕུལ། 78

དེར་ནི་ཚོང་པས་དེ་ཡི་གཏམ། བ་ཤད་པ་ཐོས་ནས་དགེ་སློང་ནི།
ཀུར་དགའ་བོ་ཞེས་བྱ་བས་དྲིས། དེ་ནས་བཅོམ་ལྡན་རྒྱལ་བས་གསུངས། 79

स्रोतःसमापत्तिफलप्रकाशं
सासाद्य तत्र क्षणलब्धबोधिः।
विचिन्तयन्ती सुगतप्रभावं
समभ्यधाद्विस्मयहर्षभूमिः ॥ ७४ ॥

अहो महामोहतमोहरेण
दूरस्थितेनापि तथागतेन।
प्रसह्य भास्वद्वपुषार्पितेयं
विकाशलक्ष्मीः कुशलाम्बुजस्य ॥ ७५ ॥

तीर्णो भवः सत्प्रणिधानमात्तं
प्रसन्नमन्तःकरणं[1] क्षणेन।
अहो नु तृष्णापरितापशान्त्यै
समुच्छलन्तीव शमामृतौघाः ॥ ७६ ॥

इत्युक्त्वा सा भगवते मुक्तारत्नान्युपायनम्।
वितीर्य्य सङ्घपूजायां विससर्ज वणिग्जनम् ॥ ७७ ॥

ते महोदधिमुत्तीर्य्य प्राप्ता भगवतोऽन्तिकम्।
तन्मुक्तारत्ननिकरं प्रणम्यास्मै न्यवेदयन् ॥ ७८ ॥

वणिग्भिः कथितां श्रुत्वा तत्कथां तत्र भिक्षुणा।
आनन्दनाम्ना पृष्टोऽथ बभाषे भगवान् जिनः ॥ ७९ ॥

---

१ Orig. प्रदयन्तःकरणम्।

གང་འདི་ཤཱཀྱའི་ཁྲིམ་དུ་ཐོན། རོ་ཧི་ཏ་ཞེས་འབབ་མོར་གྱུར།
དེ་ཉིད་ལྷུ་རིག་འཁྲི་ཤིང་དུ། སྨོན་ལམ་དམ་པའི་ལས་ཀྱིས་སྐྱེས། 80

ཉེར་ཆེན་ཞེས་པའི་ཚོང་པ་ནི། པ་ར་ཏ་སེར་སྦྱོན་བྱུང་གྱུར།
དེ་ཡི་ཁྲིམ་ཐབས་བསོད་ནམས་ཅན། རིན་ཅན་ལྡན་ཞེས་བྱ་བར་གྱུར། 81

བདག་པོ་ལྷ་པ་ཉིད་གྱུར་ཚེ། བྲད་མེད་དེ་ཡིས་མཆོད་རྟེན་ཙེར།
དོ་ཤལ་ཆེན་པོ་གུས་ལྡན་པས། མཆོད་པ་བྱས་ནས་ཕུལ་བར་གྱུར། 82

བསོད་ནམས་ནོམ་སྨིན་དེས་དེ་ཉིད། སེང་ག་ལ་ཡི་བདག་པོ་ཡིས།
བུ་མོ་ལྷུ་རིག་འཁྲི་ཤིང་གྱུར། ཡོངས་སུ་མྱ་ངན་འདས་པ་ཐོབ། 83

དེ་ཉིད་སྐྱེ་བ་གཞན་ལ་ནི། ཕྱུག་པས་རྒྱགས་ཤིང་རྨོངས་གྱུར་ནས།
མཆོད་ལ་སྨོད་ཅིང་སྐྲིན་གྱུར་པ། དེ་ཡིས་ཡུན་རིང་འབབ་མོར་གྱུར། 84

དགེ་དང་མི་དགེའི་ལས་གང་གང་། སྐྱེ་བའི་ཞིང་ལ་སྐྱེ་བོས་བདབ།
དེ་དང་དེ་ཡི་རང་བཞིན་དེ། ཡོངས་སུ་སྨིན་པའི་འབྲས་བུ་སྤྱོད། 85

དགེ་བ་གྲགས་པའི་མེ་ཏོག་དཔལ་རབ་འབར།
ལེགས་དཔྱད་འགྲོ་ཡི་ཚོགས་བསྐྱེད་ཆོས་ཀྱི་འཁྲི་ཤིང་མི་ཉམས་ཀྱིས།
སྡིག་དང་ཉོན་མོངས་ཚ་བ་འཁྲུལ་ཞིང་ལྷུང་དང་རྨོངས་པ་དང་།
མཐར་ཡས་ཡོངས་སུ་གདུངས་གྱུར་དུག་གི་འཁྲི་ཤིང་དག་ཀྱང་ཡིན། 86

यासौ पुरा रोहिताख्या दासी शाक्यगृहेऽभवत्।
सैव मुक्तालता जाता सत्कर्म्मप्रणिधानतः॥ ८०॥

अभून्महाधनो नाम वाराणस्यां वणिक् पुरा।
तस्य रत्नवती नाम पत्नी पुण्योचिताभवत्॥ ८१॥

सा पत्यौ पञ्चतां याते निःपुत्रा स्तूपशेखरे।
पूजां कृत्वा महाहारं भक्तियुक्ता न्यवेदयत्॥ ८२॥

तेन पुण्यविपाकेन सिंहलाधिपतेः सुता।
जाता मुक्तालता सैव प्राप्ता च परिनिर्वृतिम्॥ ८३॥

सैव जन्मनि चान्यस्मिन्नैश्वर्य्यमदमोहिता।
पूजाधिक्षेपदक्षाभूत् दासी तेनातिवत्सरम्॥ ८४॥

जन्मभूमौ[१] जनेनाप्तं यद्यत्कर्म्म शुभाशुभम्।
तस्य तस्य स तद्रूपं भुङ्क्ते परिणतं फलम्॥ ८५॥

निखिलकुशलमूला कीर्त्तिपुष्पोज्ज्वलश्रीः
शुभफलभरहृतिर्धर्म्मवल्ली नराणाम्।
भवति च विषवल्ली किल्विषक्लेशमूल-
भ्रमनिपतनमोहानन्तसन्तापहेतुः॥ ८६॥

---

१ Orig. जन्मते।

རབ་ཚུབ་ཀུ་ངམ་དུ་གསལ་འཁོར་བའི་ལམ་ནི་ཤིན་དུ་གདུང་བ་འདིར། །
དྲག་པོར་རྫེས་སྲུ་གདུང་ལྡན་སྡིག་པ་སྡིག་པ་བོར་ཅིག་སྐྱེ་བོ་དག །
རྟག་ཏུ་བསོད་ནམས་བསོད་ནམས་མཛོད་ཅིག་བསོད་ནམས་ཉིས་བསྟེན་པ་ཉི་དག་གི །
བསོད་ནམས་བདུད་རྩིས་བྲན་པའི་བསོད་ནམས་གྲིབ་བསིལ་ཞིང་གི་ས་གཞི་
བསིལ། 87

དེ་ལྟར་སྨོན་ལམ་དམ་པའི་འབྲས། །བཤད་པ་ཡིས་ནི་གདམས་ངག་འདི། །
དགེ་སློང་ཉོམས་ནི་གུས་པའི་སྐད། །བཅོམ་ལྡན་རང་གིས་མཛད་པ་ཡིན། ། 88

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་འཁྲི་ཤིང་ལས་སྨྲ་དེག་འཁྲི་ཤིང་གི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བདུན་པའོ།།

सन्तप्तेऽस्मिन् खरतरमहस्फारसंसारमार्गे
पापं पापं त्यजत जनताः सक्ततीव्रानुतापम् ।
पुण्यं पुण्यं कुरुत सततं पुण्यपीयूषसिक्ताः
पुण्यच्छायातरुतलभुवः शीतलाः पुण्यभाजाम् ॥ ८७ ॥

इति सत्प्रणिधानस्य फलं कथयता स्वयम् ।
भिक्षूणामुपदेशोऽयं भक्त्यै भगवता कृतः ॥ ८८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां मुक्तालतावदानं नाम सप्तमः पल्लवः ॥

Chapter VIII.

ཡལ་འདབ་བརྒྱད་པ།

དཔལ་སྨྲས་ཀྱི་རྟོགས་བརྗོད་ནི།

༄༅། །བསམ་པ་རིག་པ་ཉམས་ཀྱི་ཐུགས་དག་ནི།
གཞོན་པ་བྱེད་པ་ལ་ཡང་སྙིང་རྗེ་གྱུས།
དྲག་པོར་གྱུར་པ་ལ་ཡང་འདབ་ལྷུར་མཉེན།
ཞི་སྡང་ཚ་གདུང་ལ་ཡང་ཤིན་ཏུ་བསིལ། 1

གྲོང་ཁྱེར་རྒྱལ་པོའི་ཁབ་ཅེས་པ། ལྷ་ཡི་གྲོང་ལྟར་གྱི་ཆེར་སྤྱོན།
ཁྲིམ་བདག་དཔལ་སྨྲས་ཞེས་བྱ་བ། ནོར་སྦྱིན་ལྟ་བུ་བྱུང་བར་གྱུར། 2

སྐྱེ་བོ་ལེགས་ལ་སྡང་ཞིང་དྲེགས། ཡོན་དན་ཉམས་ལ་གུས་པ་བཏང་།
རྟག་ཏུ་ནོར་གྱི་རྒྱགས་སྨྱོས་ཏེ། དམ་པ་ཉམས་ཀྱི་བློ་ལ་གནོད། 3

སྲ་ཞིང་ཤིན་ཏུ་འཁྲོག་པ་དང་། སྡོང་ཞིང་སྲུ་ཅེར་སྒྲོག་པ་ཡི།
དྲང་ཉིད་ལ་བཞིན་མི་བསྡུན་ལ། དཔལ་འབྱོར་ཡོན་དུ་སྨིན་པར་བྱེད། 4

དེ་ལ་ནམ་ཞིག་ཟད་བྱེད་པ། ཟླ་མ་ནི་བསྡུན་གཉེར་གྱི་བུས།
དབེན་པར་དམན་པའི་གདམ་ལ་ཆགས། བསོད་ནམས་དག་ལ་སྡང་ལམ་སྨྲས། 5

अष्टमः पल्लवः ।

श्रीगुप्तावदानम् ।

कृतापकारेऽपि कृपाकुलानि
क्रूरेऽप्यलं पल्लवकोमलानि ।
द्वेषोष्मतप्तेऽप्यतिशीतलानि
भवन्ति चित्तानि सदाशयानाम् ॥ १ ॥

पुरा सुरपुरोदारे पुरे राजगृहाभिधे ।
श्रीगुप्ताख्यो गृहपतिर्बभूव धनदोपमः ॥ २ ॥

दृप्तः सुजनविद्वेषी गुणेषु विरतादरः ।
सदा धनमदाध्मातः स जहास मतिं सताम् ॥ ३ ॥

कठिनेष्वतिवक्रेषु शून्येषु मुखरेषु च ।
शङ्खेष्विव खलेष्वेव लक्ष्मीर्दाक्षिण्यमाश्रिता ॥ ४ ॥

तं कदाचित् गुरुर्ज्ञातिपुचः क्षपणकः खलः ।
मिथः स्वैरकथासक्तः पुण्यद्वेषादभाषत ॥ ५ ॥

གང་འདི་བྱ་རྒོད་སྤུངས་ཞེས་པའི། རི་ལ་དགེ་སློང་ལྔ་བརྒྱས་བསྐོར།
བདེ་གཤེགས་ཀུན་མཁྱེན་ཞེས་གྲགས་ཤིང་། འགྲོ་གསུམ་མཆོད་བྱ་ཉིད་གྱུར་པ། 6

འདི་ཡི་རྫུ་འཕྲུལ་མཆོག་དག་ནི། ཅི་ཡང་བདག་གིས་མ་དམིགས་ཏེ།
འོན་ཀྱང་བློན་པོས་བཅོམ་ལྡན་འདས། བཅོམ་ལྡན་འདས་ཞེས་མགྲོ་བ་ཐོབ། 7

རྟག་ཏུ་ཉོམ་པར་མ་དཔྱད་ཉིད། ཕ་རོལ་བཟློད་པའི་རྗེས་སུ་བཟློད།
སྐྱེ་བོ་ཕལ་ཆེར་གྲགས་པ་ཡི། ལམ་དུ་སོང་བའི་རྗེས་སུ་འགྲོ། 8

དེ་ཡི་བརྡུལ་ཞུགས་ལ་སོགས་ཀྱིས། ངེས་པ་ཚུལ་འཆོས་ཉིད་དུ་རྟོགས།
ཆུ་སྐྱུར་མི་སྨྲ་ཀང་གཅིག་གིས། བརྡུལ་ཞུགས་བཟུང་ནས་ཉ་རྣམས་ཟ། 9

དེས་ན་ཉེ་བར་བཀག་པའི་སྐད། དེ་ལ་སྨྲ་བ་འགའ་ཞིག་བགྱི།
གཡོ་སྒྱུ་ཅན་རྣམས་སྒྱུ་མ་ཡིས། སྨོངས་ནས་གཞན་ཡང་ཡོངས་སམ་འགྱུར། 10

དེ་ཡིས་དེ་སྐད་བརྗོད་ཐོས་ནས། ལས་ཀྱིས་སྨོངས་པའི་དཔལ་སྤྲས་ནི།
སྡིག་པའི་གསང་ལ་མཆོང་བའི་སྐད། དེ་ཡིས་བསྟན་པའི་རིག་པ་ཡིས། 11

ཁྲིམ་དུ་གསང་རྫོང་སེང་ལྡིང་གིས། སོལ་བ་རབ་འབར་གྱིས་ཁྱིངས་དང་།
དུག་ལྡན་ཟས་ཀྱང་བྱས་ནས་ནི། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་སོང་། 12

བརྫུན་གྱིས་བསྐྱུན་པའི་གུས་པ་ཡིས། དེ་ཡི་ཟས་ལ་མགྲོན་དུ་སོང་།
ཐམས་ཅད་རྣམས་རིག་ཀུན་མཁྱེན་གྱིས། དེ་བཞིན་ནོ་ཞེས་འཛུམ་བཅས་གསུངས། 13

य एष गृध्रकूटाख्ये गिरौ भिक्षुशतैर्वृतः।
सर्व्वज्ञकीर्त्तिः सुगतस्त्रिजगत्पूज्यतां गतः ॥ ६ ॥

नैवास्य प्रतिभां काञ्चित् भव्यामुपलभामहे।
नीतः किन्तून्नतिं मूर्खैर्भगवान् भगवानिति ॥ ७ ॥

अविचार्य्यैव सततं परोक्तमनुभाषते।
गतानुगतिकः प्रायः प्रसिद्धसरणौ जनः ॥ ८ ॥

व्रतादिनियमस्तस्य दम्भ एव विभाव्यते।
अश्नाति मौनव्रत् मत्स्यानेकपद्व्रतो वकः ॥ ९ ॥

तस्मात् तस्योपहासाय क्रियतां कापि वञ्चना।
मायामोहितो धूर्त्तानां परोऽपि परितुष्यति ॥ १० ॥

इति तेनोक्तमाकर्ण्य श्रीगुप्तः कर्म्ममोहितः।
पतितुं पापश्वभ्रेषु युक्त्या तदुपदिष्टया ॥ ११ ॥

प्रदीप्तखदिराङ्गारपूर्णां गूढ़ां खदां गृहे।
कृत्वा सविषमन्नञ्च ययौ भगवतोऽन्तिकम् ॥ १२ ॥

तेन मिथ्याविहितया भक्त्या भोक्तुं निमन्त्रितः।
विज्ञाय सर्व्वं सर्व्वज्ञस्तथेति प्राह सस्मितः ॥ १३ ॥

དུག་དང་མེ་སྦྲོར་ལ་བྲོས་པའི། ཁྲིམ་ཐབས་ཆོས་ནི་སྨྲ་བ་མོ།
གྲོས་ནི་ཟགས་སུ་དོགས་པ་ཡིས། དཔལ་སྤྲས་ཀྱིས་ནི་ཁྲིམ་དུ་བཅིངས། 14

དེ་ནས་སྤྲོད་ཡུལ་མཁྱེན་གྱུར་ཀྱང་། འགྲོ་བས་ཕྱུག་འོས་གདོང་བཞི་སོགས།
ལྷ་ནམས་ཀྱིས་ནི་ཕྱག་འཚལ་ཞིང་། བཅོམ་ལྡན་རང་ཉིད་གཤེགས་པར་གྱུར། 15

དཔལ་སྤྲས་ཀྱིས་ནི་བཙོམས་པ་དེ། གྲོང་ཁྱེར་དག་དུ་སྐྱེ་བོས་རིག།
སྡིག་ཅན་ནམས་ཀྱི་སྡིག་པ་ནི། ཤིན་དུ་སྤྲས་ཀྱང་ཕྱོགས་ནམས་གྱུག། 16

དེ་ནས་དགེ་བསྙེན་དག་ཅིག་ནི། བཅོམ་ལྡན་འདས་ལ་མངོན་ཕྱོགས་དེ།
མི་དང་དུག་ལ་སེམས་བྱེད་ཅིང་། ཞབས་ལ་རབ་དུ་གདུགས་ནས་སྨྲས། 17

རྫོན་གྱིས་ཕྱག་འཚལ་སྨྲན་པར་སྨྲས། གསང་ནས་མི་དང་དུག་ཟས་སྦྱེར།
བཅོམ་ལྡན་རབ་དུ་འབད་པ་ཡིས། སྐྱེ་བོ་ངན་འདི་ཡོངས་བདྲང་འོས། 18

དོགས་པས་སྨྲན་སྨྲ་ལ་བརྟེན་ནས། འཕགས་པ་མིན་ནམས་དབུགས་འབྱིན་བྱེད།
གང་ཕྱིར་སྤྲང་རྩིས་ཁ་བྲུགས་པའི། སྨྲ་གྲི་མང་ན་གྱུ་མ་གཙོད། 19

ཡོན་དན་ལ་སྣང་མི་བསྲུན་པས། ཡོན་དན་ཅན་གཞན་བསྟོད་མི་བཟོད།
གང་གིས་དམ་པ་དགེས་འགྱུར་ཉིད། དེ་ཡི་སྐྱེ་བོ་ངན་པ་གྲོ། 20

འཇིག་རྟེན་གསུམ་གྱི་མིག་དག་ནི། འདབ་བགྱི་ནམ་པར་གྲུས་བྱེད་ཁྱོད།
སྨྲ་གཙན་འདི་ཡི་གནས་ཐོབ་ན། འགྲོ་བ་འོང་བ་མིན་པ་ཅི། 21

विषाग्नियोगकुपितां पत्नीं सद्धर्म्मवादिनीम्।
गृहे बबन्ध श्रीगुप्तः शङ्कितो मन्त्रविस्रवात्॥ १४॥

अथ विज्ञातवृत्तोऽपि भगवान् स्वयमाययौ।
वन्द्यमानो जगद्वन्द्यैश्चतुर्मुखमुखैः सुरैः॥ १५॥

श्रीगुप्तस्य तमारम्भं विवेद नगरे जनः।
दिक्षु धावति पापानां सुगुप्तमपि पातकम्॥ १६॥

ततः कश्चित् समभ्येत्य भगवन्तमुपासकः।
उवाच चरणालीनश्चिन्तयन् दहनं विषम्॥ १७॥

मिथ्यानम्रः प्रियालापी गूढवह्निविषान्नदः।
परिहार्य्यः प्रयत्नेन भगवन्नेष दुर्ज्जनः॥ १८॥

कुर्य्यादनार्य्ये नाश्वासि कार्य्यं माधुर्य्यमाश्रिते[1]।
अन्तश्छदी विशीर्णो हि मधुदिग्धमुखः क्षुरः॥ १९॥

नान्यस्तुतिं गुणद्वेषी सहते गुणिनां खलः।
सन्तस्तुष्यन्ति येनैव तेन कुप्यन्ति दुर्जनाः॥ २०॥

त्वयि लोकत्रये नेत्रशतपत्रविकाशिनि।
अस्य राहोः पदं प्राप्ते नान्धीभवति किं जगत्॥ २१॥

---

१ Orig. कुर्य्यादनार्य्येनाश्वासि कार्य्यन्मधुर्य्याश्रीते।

དེ་ནས་བཅོམ་ལྡན་ཅུང་ཟད་ནི། འཛུམ་པའི་ཟེར་དཀར་དག་གིས་དེའི།
གནོད་པ་མི་བཟད་རབ་རིབ་དག། རིང་ནས་ཡོངས་སུ་སེལ་བཞིན་གསུངས། 22

བདག་གི་ལུས་ལ་སེམས་རེག་དང་། དུག་གིས་ཀྱང་ནི་ཚུགས་པ་མིན།
གཞན་ལ་སྡང་བས་དབུལ་རྣམས་ལ། སྨོན་གྱིས་ཀྱང་ནི་ཉེར་འཚེ་མེད། 23

གང་གིས་སེམས་ནི་མི་ཁྲོ་བསིལ། ཞི་བའི་བདུད་རྩིས་བྲན་གྱུར་པ།
དེ་ལ་མེ་ཡིས་ཅི་བྱ་སྟེ། ཡུལ་གྱི་དགྲ་ལ་དུག་གིས་ཀྱང་། 24

ཞེ་སྡང་སྨོན་གྱིས་གཟིར་པ་ལ། བདུད་རྩི་དུག་ཉིད་བཞིན་དུ་སྤྱོད།
མེ་ཏོག་རྡོ་རྗེ་བཞིན་དུ་སྤྱོད། ཙན་དན་སྲེག་བྱེད་བཞིན་དུ་སྤྱོད། 25

བྱང་ཆུབ་སེམས་དཔའི་གོ་འཕང་གནས། སྙིང་རྗེ་བྱམས་པ་དག་དང་ལྡན།
དུད་འགྲོའི་སྐྱེ་གནས་སོང་གྱུར་ཀྱང་། ལུས་ནི་མེ་ཡིས་མི་འཚིག་གོ། 26

ཀ་ལིང་ཀ་ཡི་མི་བདག་སྔོན། རི་དྭགས་ཚོགས་རྣམས་འཇོམས་པ་ལ།
ཡང་དག་བསྟོན་པས་དུམ་བུའི་གླིང་། ཞེས་པའི་ནགས་ཚལ་བསྲེགས་པར་གྱུར། 27

ནགས་ཚལ་རབ་དུ་འབར་བ་དེར། བྲི་ཝུ་ཏི་ཏི་རི་གཅིག་བུ།
བྱམས་པའི་བྱང་ཆུབ་ལ་དམིགས་པས། སྲེག་བྱེད་རབ་དུ་ཞི་བར་བསྒྲུབས། 28

དེ་ལས་འཁྲུ་མེད་ཡིད་ལྡན་རྣམས། གང་དུ་ཡང་ནི་འཇིགས་པ་མེད།
སྙིང་སྟོབས་ཕུན་སུམ་ཚོགས་པ་ཡིས། དགེ་མཚན་འདི་དང་གཞན་ཡང་ཉེར། 29

तच्छ्रुत्वा भगवानूचे किञ्चित् स्मितसितांशुभिः।
तन्निकारोग्रतिमिरं दूरात् परिहरन्निव ॥ २२ ॥

न ममाङ्गं स्पृशत्यग्निः प्रभवत्यपि वा विषम्।
परद्वेषदरिद्राणां दोषोऽपि निरुपद्रवः ॥ २३ ॥

अरोषशीतलं चेतः सिक्तं यस्य शमामृतैः।
किं करोत्यनलस्तस्य विषं वा विषयद्विषः ॥ २४ ॥

विषायते तु पीयूषं कुसुमं कुलिशायते।
द्वेषदोषोत्तरस्यैव चन्दनं दहनायते ॥ २५ ॥

तिर्यग्योनिगतस्यापि बोधिसत्त्वपदस्थितेः।
कारुण्यमैत्रीयुक्तस्य नाग्निर्दहति विग्रहम् ॥ २६ ॥

पुरा कलिङ्गनृपतिः खण्डद्वीपाभिधावनीम्।
ददाह मृगसङ्घानां संक्षेपे स समुद्यतः ॥ २७ ॥

कानने ज्वलिते तस्मिन्नेकस्तित्तिरिशावकः।
मैत्र्या बोधिं समालम्ब्य दहनप्रशमं व्यधात्[१] ॥ २८ ॥

तस्मादद्रोहमनसां न भयं विद्यते क्वचित्।
श्रूयतां सत्त्वसम्पत्तेरिदमन्यच्च कौतुकम् ॥ २९ ॥

---

१ Orig. प्रशममव्यपात्।

ཆར་མེད་མི་བཟད་དུས་སུ་ནི། ཐུབ་པ་འགའ་ཡི་བསྟི་གནས་ན།
མི་དང་འདྲ་བར་བརྗོད་པ་ཡི། རི་བོང་ཞིག་ནི་ཡུན་རིང་གནས། 30

འབྲས་བུ་ཙ་བ་ཡོངས་ཟད་པས། ལྟོགས་རིད་ཐུབ་པ་མགྲོན་གྱུར་ནས།
བསམ་པ་དེ་ཡི་གདུང་བས་གཟིར། གཡོ་མེད་ཀུན་དུ་རྟོག་པར་སྨྲས། 31

བཅོམ་ལྡན་བདག་གི་ཤ་དག་གིས། ད་ནི་སྲོག་གི་རྟེན་པོ་དག།
མཛོད་ཅིག་ཆོས་ནི་བསྒྲུབ་བགྱིད་པ། ཁྱོད་ཀྱི་ལུས་ནི་བསྲུང་བར་འོས། 32

འདི་བརྗོད་ནགས་སྲེག་མཇུག་གི་མེར། ཐུབ་པས་བྲུམས་པས་ཡང་ཡང་དུ།
འབད་པ་ཡིས་ནི་བཟློག་གྱུར་ཀྱང་། རི་བོང་གི་ནི་ལུས་པོ་འཕངས། 33

དེ་ཡི་སྙིང་སྟོབས་མཐུ་ཡིས་ནི། འབར་བའི་ཚོགས་ཀྱིས་དཀྲིགས་པའི་མེ།
འཇམ་པའི་སྒྲ་སྒྲོགས་བུང་བ་ཅན། སྦྱོང་འདི་རྫིང་བུར་རབ་ཏུ་གྱུར། 34

དེ་ཡང་ལྷ་ཡི་ལུས་ཀྱིས་དེར། སྣང་ཆེན་པོ་དག་ལ་གནས།
ཐུབ་པས་ཕྱག་འཚལ་ལྡན་པ་ལ། ཆོས་ནོམས་རབ་ཏུ་བསྟན་པ་བྱས། 35

དེ་ལྟར་བྱང་ཆུབ་ཞུགས་པ་རྣམས། འཇིགས་པ་སེམས་མེད་དག་གིས་མིན།
དེ་སྐད་གསུངས་ནས་བཅོམ་ལྡན་འདས། དཔལ་སྤྲས་ཀྱི་ནི་ཁང་པར་གཤེགས། 36

དེས་ནི་དེ་རུ་ཞུགས་ཉིད་ན། ཞབས་ནི་གཡས་པ་བཞག་པ་ཡིས།
མེ་ཡི་དོང་ནི་མཚོ་སྐྱེས་ཅན། བུང་བ་འཇམ་སྒྲོགས་ལྡན་པར་གྱུར། 37

अवृष्टिविषमे काले मुनेः कस्यचिदाश्रमे ।
मनुष्यसदृशालापः शशकः सुचिरं स्थितः ॥ ३० ॥

क्षुत्क्षामं मुनिमालोक्य फलमूलपरिक्षयात् ।
उवाचाचलसङ्कल्पस्तद्व्यथाव्यथिताशयः ॥ ३१ ॥

भगवन् मम मांसानां संप्रति प्राणवर्त्तनम् ।
क्रियतां रक्षणीयं तत् शरीरं धर्म्मसाधनम् ॥ ३२ ॥

इत्युक्त्वा दावशेषाग्नौ चिक्षेप शशकस्तनुम् ।
वार्य्यमाणोऽपि यत्नेन प्रणयान्मुनिना मुहुः ॥ ३३ ॥

तस्य सत्त्वप्रभावेण ज्वलज्ज्वालाकुलोऽनलः ।
प्रययौ मञ्जुशिञ्जानभ्रमराम्भोजखण्डताम् ॥ ३४ ॥

सोऽपि दिव्यवपुस्तत्र कमले महति स्थितः ।
प्रणम्यमानो मुनिभिर्विदधे धर्म्मदेशनाम् ॥ ३५ ॥

इति बोधिप्रवृत्तानां न वह्नेर्न विषाद्भयम् ।
भगवान् कथयित्वेति श्रीगुप्तभवनं ययौ ॥ ३६ ॥

तत्र तेन प्रविष्टैव निक्षिप्ते दक्षिणे पदे ।
बभूवाग्निखदा मञ्जुगुञ्जद्भृङ्गसरोजिनी ॥ ३७ ॥

མཆོ་སྐྱེས་ཁྲི་ལ་བཞུགས་པ་དེ། དཔལ་སྦས་ཀྱིས་ནི་མཐོང་གྱུར་ནས།
དེ་མཐོང་སྡིག་པ་ཉམས་པ་ཡིས། ཞབས་ལ་བཏུད་དེ་རབ་ཏུ་སྨྲས། 38

བཅོམ་ལྡན་བདག་ནི་སྡིག་ཅན་གྱིས། རིམ་ལས་འདས་འདི་བཟོད་པར་བགྱི།
གཏི་རྨུག་གིས་ལོང་ལྷུང་ཆགས་ལ། དམ་པ་ནམས་ནི་ཐུགས་རྗེས་ལྷག། 39

བདག་ནི་མི་དགེའི་བཤེས་གཉེན་དག། རབ་ཏུ་སྟོངས་པས་སྡིག་པ་ཡི།
ལམ་ལ་ཉེ་བར་གནམས་པ་བྱས། དེ་ལ་ཁྱོད་ཉིད་དྲན་པ་སྐྱབས། 40

ཁྱོད་ཀྱི་ཟས་དང་བཏུང་བ་ཀུན། བདག་གི་དུག་གིས་བསྒོས་པ་བྱས།
ཕྱི་ནས་གཏུང་བའི་རང་བཞིན་དུག། ཀྱི་མ་བདག་ཉིད་རང་ལ་འབོ། 41

འདི་བརྗོད་དཔལ་སྦས་མཆི་མ་དང་། བཅས་པའི་མིག་ལ་སྙིང་རྗེའི་གཏེར།
བཅོམ་ལྡན་འདས་ཀྱིས་གཟིགས་ནས་གསུངས། དགེ་སློང་དག་འདུན་ཉན་པར་བྱེད། 42

ལེགས་པ་ཡི་ཐུག་མ་བྱེད་ཅིག། བདག་ཅག་ཁྱོད་ལ་ཕྱིར་མ་ཕྱོགས།
འཇིགས་རུང་ཁོན་གྱི་དུག་སྤངས་པས། ངེད་ལ་དུག་གི་གནོད་པ་མེད། 43

ཁྱོད་ནི་བ་ར་ཊ་སེར་སྟོན། དཔལ་ལྡན་མི་བདག་ཚངས་བྱིན་གྱུར།
དེ་ཡི་སྲོག་དང་མཉམ་པ་ཡི། དགའ་མ་དཔེ་མེད་མ་ཞེས་པའོ། 44

དེ་ནས་དེ་ཡི་གྲོང་ཁྱེར་མཐའི། ནགས་གནས་མི་བྱུའི་རྒྱལ་མོ་ནི།
གསེར་དུ་སྣང་བ་ཞེས་པའི་སྟ། དེ་ཡིས་ནམ་ཞིག་ཐོས་པར་གྱུར། 45

दृष्ट्वोपविष्टं श्रीगुप्तस्तं सरोरुहविस्तरे[1]।
तद्दृष्टिनष्टकालुष्यः प्रोवाच चरणानतः ॥ ३८ ॥

भगवन् मम पापस्य क्षन्तव्योऽयं व्यतिक्रमः।
मोहान्धपतिते रुच्यं कारुण्यमधिकं सताम् ॥ ३९ ॥

ममाकल्याणमित्रेण योऽयं पापपथे कृतः।
उपदेशः प्रमोहेण तत्र त्राणं भवत्स्मृतिः ॥ ४० ॥

विषदिग्धरसं सर्व्वं भोज्यन्ते कल्पितं मया।
अहो ममैव संक्रान्तं पश्चात्तापमयं विषम् ॥ ४१ ॥

इति ब्रुवाणं श्रीगुप्तं साश्रुनेत्रं कृपानिधिः।
दृष्ट्वा बभाषे भगवान् भिक्षुसङ्घस्य शृन्वतः ॥ ४२ ॥

विषादं मा कृथाः साधो न वयं विमुखास्त्वयि।
घोरवैरविषत्यागान्नैवास्मान् तपते विषम् ॥ ४३ ॥

वाराणस्यां पुरा श्रीमान् ब्रह्मदत्तोऽभवन्नृपः।
अभूदनुपमा नाम तस्य प्राणसमाश्रया ॥ ४४ ॥

सुवर्णभाससंज्ञस्य तत्पुरान्तवनस्थितेः।
रवं मयूरराजस्य सा कदाचिदथाशृणोत् ॥ ४५ ॥

---

१ Orig. सरोरुहवस्तिरे।

སླིང་བུ་པི་ཝང་གདངས་ལྷ་བུ། དེ་ཡི་སྒྲ་ནི་ཐོས་གྱུར་ནས།
དགེ་མཚན་ལྡན་པས་འདི་ཅི་ཞེས། མི་ཡི་མགོན་ལ་དེ་ཡིས་དྲིས། 46

རྒྱལ་པོས་སྨྲས་པ་ནགས་མཐའ་འདིར། རིན་ཆེན་སྒྲ་ལྡན་མི་བྱ་ཡོད།
གང་གིས་མགྲིན་ནས་བསྒྲགས་པ་འདིས། འཇིག་རྟེན་ཉམས་ནི་སྙན་པས་ཁྱབ། 47

དེ་སྐད་སྨྲས་པའི་མི་བདག་གིས། ཤིན་ཏུ་མཛའ་སྨྲུག་རབ་འབད་པས།
དེ་མཐོང་དོན་དུ་གཉེར་བ་ལ། རབ་ཏུ་དགོད་ཅིང་ཡང་སྨྲས་པ། 48

དེ་ལྟའི་ངོ་མཚར་གཟུགས་ཅན་ཉམས། མཛེས་མ་མཐོང་བ་རྙེད་པ་དཀའ།
དེ་ལྟ་ན་ཡང་འབད་པ་ན། དེ་ལ་ཡོངས་སུ་ངལ་བ་བྱ། 49

དེ་སྐད་བརྗོད་ནས་མི་བདག་གིས། རྒྱ་ཡིས་འཚོ་བ་དེ་གཟུང་ཕྱིར།
མ་ཐོབ་ན་ནི་གསོད་པ་དག། ཡང་དག་རིག་པར་བྱས་ནས་བཏང་། 50

ཡོངས་སུ་སྤྱོད་པའི་མིག་སྔོངས་པས། དབང་དུ་བྱས་པ་མི་ཤེས་ཉིད།
བྱད་མེད་རྗེས་ཆགས་ཀྱིས་བཅོམ་པས། བྱ་བ་མིན་པ་ཉམས་ཀྱང་བྱེད། 51

མཛའ་ལས་མ་རུངས་ཁྲིམ་ཐབ་ཀྱི། ཀོང་པའི་སྡེགས་སུ་གྱུར་ཉམས་ཀྱི།
བློ་དང་དགའ་བྲན་གྲགས་པ་ཉམས། ཕྲག་དོག་གིས་བཞིན་ཉམ་པར་ཞམས། 52

དེ་འོག་བྱ་པས་གནས་གནས་སུ། ཞགས་པས་བཅིང་པ་བཀོད་པ་ཉམས།
མ་བྱའི་རྒྱལ་མོའི་མཐུ་ཡིས་ནི། ཀུན་དུ་ཉམ་པར་ཆད་པར་གྱུར། 53

सा तस्य शब्दमाकर्ण्य वेणुवीणास्वनोपमम्।
किमेतदिति पप्रच्छ नरनाथं सकौतुका॥ ४६॥

राजोवाच वनान्तेऽस्मिन्नस्ति रत्नच्छदः शिखी।
मधुरं योजनव्यापि यस्यैतत् कण्ठकूजितम्॥ ४७॥

इति ब्रुवाणो नृपतिस्तत्सन्दर्शनमर्थितः।
प्रेमप्रयत्नैः प्रेयस्या प्रहसन् पुनरब्रवीत्॥ ४८॥

दर्शनं दुर्लभं मुग्धे तद्विधाद्भुतरूपिणः।
तथापि यदि निर्बन्धः क्रियते तत्परिश्रमः॥ ४९॥

इत्युक्त्वा नृपतिस्तस्य ग्रहणे जालजीविनः।
व्यसृजत् तस्य सम्प्राप्त्यै विधाय वधसंविदम्॥ ५०॥

वशीकृतो न वेत्त्येव मोहादक्षिपरीक्षया।
अनुरागाहतः स्त्रीभिरकर्म्माण्यपि कार्य्यते॥ ५१॥

प्राप्तानां प्रणयात् पत्न्याः प्रौढायाः पादपीठताम्।
ईर्ष्ययैव विनश्यन्ति धी-धृति-स्मृति कीर्त्तयः॥ ५२॥

ततः शाकुनिकैर्न्यस्ताः पाशबन्धाः पदे पदे।
प्रभावाद्बर्हिराजस्य व्यशीर्य्यन्तैव सन्ततम्॥ ५३॥

འབད་འབྲས་མེད་ལས་སྡུག་བསྔལ་ཞིང་། མི་བདག་བཀའ་ཡིས་འཇིགས་གྱུར་ཏེ།
མཐོང་ནས་མི་བུའི་རྒྱལ་མོ་ནི། སྙིང་རྗེ་འཁྲུགས་པ་ཉིད་དུ་གྱུར། 54

དེ་ཡིས་བསམས་པ་ཁོ་མོ་དག། འཆིངས་པར་མ་གྱུར་ས་བདག་གི།
བཀའ་ནི་དྲག་པོའི་འཇིགས་གྱུར་པ། ཀྱེ་མ་སྡུག་པ་ཀྱུ་ཡིས་འཚོ། 55

དེ་ལྟར་བསམས་ནས་སྙིང་རྗེ་ཡིས། གསལ་བས་སྨྲས་ཏེ་དེ་བདང་ནས།
མི་བདག་བཞུག་སྟེ་དེའི་ཁྱིམ་དུ། དེ་ཉིད་དང་ནི་ལྷན་ཅིག་སོང་། 56

ཕོ་བྲང་ནང་དེར་རིག་དུ་ནི། ས་བདག་བཙུན་མོར་བཅས་པ་ཡིས།
མཆོད་ཅིང་ཡོངས་སུ་འདྲིས་པ་ལས། གུས་པ་ཆེས་པར་སྤྲོ་ཞིང་གནས། 57

མཐོན་མཐིང་ནོར་བུའི་ཁང་པ་ནི། འཛམ་ལྷན་ཆུ་འཛིན་འོད་དེ་ལ།
འདབ་མ་མཛེས་བཀྲ་དབང་པོའི་གཞུ། ཆགས་པ་ལྟ་བུར་འཁྲུལ་པ་བྲིས། 58

དེ་ནས་དེ་ཡི་རིམ་གྲོ་ལ། གུས་དང་བཅས་པས་ལྷ་མོ་བསྐོས།
ཕྱོགས་ལས་རྒྱལ་བའི་བགྲོད་པ་ལ། ནམ་ཞིག་ས་ཡི་བདག་པོ་སོང་། 59

དེ་ནས་ལྷ་མོ་དཔེ་མེད་མ། བདག་པོ་སོང་བས་བག་མེད་ཅིང་།
གཟུགས་དང་ལང་ཚོའི་དྲེགས་པས་ལོང་། རིགས་ཀྱི་ལུགས་ནི་མཐོང་མ་གྱུར། 60

གཞོན་ནུ་འབང་ལ་ཆགས་ལྡན་མ། འདོད་པས་ཉམ་པར་བསྐྱེད་ས་དེའི།
ངོ་ཚ་ཤིན་དུ་རིང་སོང་སྟེ། ཡང་ཡང་དམིགས་པས་འཇིགས་པ་བཞིན། 61

दुःखितान् यत्नवैफल्याद्भीतान् नृपतिशासनात्।
मयूरराजस्तान् दृष्ट्वा करुणाकुलतां ययौ ॥ ५४ ॥

सोऽचिन्तयदहो भीताः क्ष्मापतेः क्रूरशासनात्।
मद्बन्धने विसम्वादाद्वराका जालजीविनः ॥ ५५ ॥

इति सञ्चिन्त्य कृपया स्पष्टवाग्भिर्विसृज्य तान्।
नृपमानाय्य तद्वेश्म तेनैव सहितो ययौ ॥ ५६ ॥

स तत्रान्तःपुरे नित्यं सभार्य्येण महीभुजा।
पूज्यमानः परिचयादुवास विहितादरः[1] ॥ ५७ ॥

स्निग्धश्यामाम्बुदत्विषा सुनील[2]मणिवेश्मसु।
चित्रपत्ररुचा चक्रे संसक्तेन्द्रायुधभ्रमम् ॥ ५८ ॥

अथ दिग्जययात्रायां कदाचिद्वसुधाधिपः।
ययौ तदुपचाराय देवीमादिश्य सादरः ॥ ५९ ॥

ततश्चानुपमा देवी पत्यौ याते प्रमादिनी।
रूपयौवनदर्पान्धा नालुलोके कुलस्थितिम् ॥ ६० ॥

तरुणं प्रेक्ष्य रागिण्यास्तस्याः कन्दर्पविप्लवे।
भूयः प्रलम्भभीतेव लज्जा दूरतरं ययौ ॥ ६१ ॥

---

१ Orig. विहता॰ ; २ स्निग्धश्यामाम्बुदतषु वानील॰।

དྲི་མ་ལྡན་ཞིང་གྲུ་གྲུ་ཉོ། ཉེ་བ་དག་ལ་རིག་པར་བཟོད།
གཡོ་བ་གཡོ་བའི་མིག་ཅན་དང་། མིག་ནི་ལེགས་པ་རིམ་པ་མཚུངས། 62

འཁོར་བ་རྒྱ་སྐྱིན་འབྲུང་གནས་སུ། ཉམ་པ་མང་པོས་གྲོས་བྱེད་ཅིང་།
སྨྲོག་འཕྲོག་ནག་པོ་བརྩེགས་པ་ཡི། རི་མོ་བྲུད་མེད་ཉམ་པ་གྲུ། 63

མི་དོག་པས་ཀྱང་ཞིན་དུ་འཛུམ། སོག་ལེ་བས་ཀྱང་ཞིན་དུ་རྩུབ།
བྲུད་མེད་སེམས་ནི་བཀྲ་བ་དག། སྲུ་ཡིས་ཡོངས་སུ་གཅོད་པ་ཤེས། 64

མང་ཆགས་དགའ་མས་མགུ་བྱས་ནས། གང་གི་དགའ་བར་བགྲོད་བྱེད་དེ།
བསིལ་ཞིང་དྲི་མེད་འཛམ་པ་ཡིས། རལ་གྲིའི་ཉོ་གྲིན་འཕྲུང་བར་བྱེད། 65

དེས་བསམས་བདག་གི་ཕོ་བྲང་ན། མི་བུའི་གྲོལ་མོ་ཚུལ་ཁྲིམས་ཤེས།
སྐྲེས་བུའི་ལུགས་བཞིན་ཀུན་བརྗོད་པ། ཟུག་རྔུ་འདི་ནི་གནས་པར་གྱུར། 66

བདག་གི་སྤྱོད་འདི་ས་བདག་ལ། གདོན་མི་ཟ་བར་འཆད་པར་འགྱུར།
ལས་ནི་སྨད་འོས་རེ་ཞིག་བྱས། ད་ནི་བདག་གི་ཅི་ཞིག་བྱ། 67

འདི་ནི་གནས་ཤེས་མཆོག་གི་སྒོ། ཕ་རོལ་ཟུར་གྱིས་འཛིན་ལྟ་ཞིག།
བདག་གིས་བྱས་པའི་སྡིག་པ་ཡིས། དོགས་པ་སེམས་མེད་ཉམས་ལའང་སྐྱེ། 68

དེ་ལྟར་བསམས་ནས་དེ་ཡིས་ནི། དེ་ལ་དུག་ལྡན་བཟའ་བ་བྱིན།
ཆགས་རྗེས་མི་བསྲུན་དབང་གྱུར་པའི། བུ་མེད་ཅི་དང་ཅི་མི་བྱེད། 69

मलिनः कुटिलस्तीक्ष्णः कर्णसंस्पर्शनोचितः।
चपलश्चपलाक्षीणां सुदृशां सदृशः क्रमः॥ ६२॥

विविधोन्मादकारिण्यः संसारमकराकरे।
चरन्ति प्राणहारिण्यः कालकूटच्छदाः स्त्रियः॥ ६३॥

कुसुमात् सुकुमारस्य क्रूरस्य क्रकचादपि।
को जानाति परिच्छेदं स्त्रीणां चित्तस्य चेतसः॥ ६४॥

प्रचरन्तीं प्रियां कण्ठे कृत्वा ये यान्ति निर्वृतिम्।
शीतलां विमलां स्निग्धां खड्गधारां पिबन्ति ते॥ ६५॥

साचिन्तयत् स्थितः शल्यमयमन्तःपुरे मम।
मयूरराजः शीलज्ञः पुरुषालापवेष्टितः॥ ६६॥

कथयिष्यत्यवश्यं मे वृत्तमेष महीपतेः।
निन्द्यं कर्म्म कृतं तावदधुना किं करोम्यहम्॥ ६७॥

आस्तां परिज्ञाततत्त्वो मर्मज्ञोऽसौ विदग्धधीः।
जाता मे कृतपापायाः शङ्का निश्चेतनेष्वपि॥ ६८॥

इति सञ्चिन्त्य सा तस्य सविषं भोजनं ददौ।
रागमत्ताः खलायत्ताः किं किं कुर्व्वन्ति न स्त्रियः॥ ६९॥

དེ་ཡིས་ཉེ་བར་སྤྱོད་པ་ཡི། བཟའ་དང་བཏུང་བ་དུག་ལྡན་གྱིས།
མི་བུའི་གྱོལ་མོ་ནམ་གྱིས་ཤིང་། མདངས་བཟང་ཡིད་འོང་མཛེས་པར་གྱུར། 70

ལྷ་མོས་ནོལ་གནས་དེ་མཐོང་ནས། གསང་བ་རབ་མཆེད་དོགས་པ་ཡིས།
དཔལ་བུ་དཔལ་བུས་སྦྱ་ངན་གྱི། ནད་ཀྱིས་བཟུང་ནས་སྲོག་བཏང་གྱུར། 71

དེ་ལྟར་དེ་ཡི་དུག་གིས་ཀྱང་། ནད་དང་ལྡན་པ་ཉིད་མ་གྱུར།
ཆེན་པོ་རྣམས་ཀྱི་སེམས་ཡངས་པ། དུག་གིས་དུག་མེད་ཉིད་དུ་འགྱུར། 72

འདོད་ཆགས་དུག་ཡིན་གཏི་མུག་དུག ། ཞེ་སྡང་དག་ཀྱང་མི་བཟད་དུག །
སངས་རྒྱས་ཆོས་དང་དེ་བཞིན་དུ། དགེ་འདུན་བདེན་པ་བདུད་རྩིའི་མཆོག ། 73

གཏི་མུག་ཆུ་ཚོགས་ཆེན་པོ་འཇིགས་སུ་རུང་བའི་དུག་རྣམས་སྦྱོ།
ཆགས་པའི་ལྟོས་འགྲོ་ཆེན་པོ་འཇིགས་སུ་རུང་བའི་དུག་རྣམས་སྦྱོ།
སྡང་བའི་ནགས་ཀྱི་ཁྲིང་བ་འཇིགས་སུ་རུང་བའི་དུག་རྣམས་སྦྱོ།
མི་བཟད་དུག་རྣམས་སྦྱོ་བའི་རིམ་པ་གཞན་ནི་ཡོད་མ་ཡིན། 74

འདི་བཞིན་སྦྱོ་བ་གཞན་ལ་ཡང་། དཔལ་སྤྲས་ཀྱིས་ནི་མི་ཡི་དོང་།
ཆོས་ནི་འདོད་མ་དེ་ལ་བྲུས། དེ་ཡང་འཕྲུལ་ལ་པད་ལྡན་གྱུར། 75

དེ་སྐད་བརྗོད་ནས་བཅོམ་ལྡན་འདས། ཡང་དག་སྙིང་རྗེས་གཟིགས་པའི་ཚུལ།
བསྟན་པ་དག་ལ་མངོན་ཕྱོགས་པའི། དཔལ་སྤྲས་རྡོལ་དང་བྲལ་བ་བྲུས། 76

तयोपाचर्य्यमाणस्य सविषैः पानभोजनैः।
विष्टब्धा बर्हिराजस्य रुरुचे रुचिरा रुचिः॥ ७० ॥

स्वस्थमालोक्य तं देवी रहस्योद्भेदशङ्किता[1]।
शनैः शोकामयग्रस्ता त्रस्ता तत्याज जीवितम्॥ ७१ ॥

एवं तस्य विषेणापि नैव ग्लानिरजायत।
महतां चित्तवैमल्यं निर्विषं कुरुते विषम्॥ ७२ ॥

रागो विषं विषं मोहो द्वेषश्च विषमं विषम्।
बुद्धो धर्म्मस्तथा सङ्घः सत्यञ्च परमामृतम्॥ ७३ ॥

घोरं विषं सृजति मोहमहाम्बुराशिः
घोरं विषं सृजति रागमहोरगश्च।
घोरं विषं सृजति वैरवनावनिश्च
जन्मक्रमोऽस्ति विषमस्य विषस्य नान्यः॥ ७४ ॥

अधर्म्मकामः कृतवानेवमेवान्यजन्मनि।
श्रीगुप्तोऽग्निखदां सापि तस्याभूत् सहधर्म्मिणी[2]॥ ७५ ॥

इत्युक्त्वा भगवान् सम्यक् करुणालोकनाम्बुभिः।
चकार वीतरजसं श्रीगुप्तशासनोन्मुखम्॥ ७६ ॥

---

[1] Orig. रहस्योद्भेदता। [2] Orig. सहस्रक्रिणी।

དེ་ནས་དཔལ་སྦྱིན་དགེ་བ་ཞེས་པས་རབ་ཏུ་གསལ་བའི་གནས་ཐོབ་ཕྱིར།
དྲི་མེད་དྲན་པས་སྐྱབསུ་འགྲོ་བ་གསུམ་ཉིད་དྲན་གྱིས་གཞན་མ་ཡིན།
ཀྱིལ་དང་ཡོངསུ་འདྲིས་པས་བསོད་ནམས་འཕྲོབ་སྟེ་གང་ཕྱིར་དེ་པ་རྣམས།
མཐོང་བར་གྱུར་པ་དགེ་བ་ཆེ་དང་རབ་ཏུ་དགའ་དང་བདེ་བའི་སྐད། 77

མི་ཞེས་སྔོངས་པ་སེལ་བའི་བཅོམ་ལྡན་འདས་ནི་སྙིང་རྗེ་བསོད་ནམས་ལ་བརྩོན་པས།
གནོད་བྱེད་སྡིག་པ་བསྟེན་པའི་དཔལ་སྦྱིན་ཀྱང་ནི་འབད་པས་རྗེས་སུ་བཟུང་བྱས་ནས།
འཆིང་བའི་ཁང་པར་ཡང་སྲིད་འདུད་པ་འདི་དག་རྣམས་སུ་གང་གིས་མི་འགྱུར་བ།
སྲིད་པ་ཡང་དག་གཞི་ལ་སྐད་དགེ་སློང་རྣམས་ལ་ཁྲོན་དང་བྲལ་བའི་བསྟན་པ་བསྒྲུབས། 78

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དཔལ་སྦྱིན་གྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱད་པའོ།།

कलितकुशलः श्रीगुप्तोऽथ प्रकाशपदाप्तये
शरणगमनान्येव चीर्णि स्मरन् विमलस्मृतिः।
जिनपरिचयात् पुण्यं लेभे सतां हि विलोकनं
भवति महते कल्याणाय प्रमोदसुखाय च ॥ ७७ ॥

श्रीगुप्तस्य निकारकिल्बिषजुषोऽप्यज्ञानमोहापहः
कृत्वावश्यमनुग्रहेण[१] भगवान् कारुण्यपुण्योद्यतः[२]।
भिक्षूणां भवसंक्षयाय विदधे निर्वैरताशासनं
येनैते न भवन्ति बन्धभवने भूयो भवग्रन्थये ॥ ७८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां श्रीगुप्तावदानं नाम अष्टमः पल्लवः ॥

---

१ The xylograph remarks that अवश्यमनुग्रहेण was substituted by *H*dar Locháva, the original being lost.
२ Orig. कारुण्योद्यतः।

CHAPTER IX.

ཡལ་འདབ་དགུ་པ།

མི་སྐྱེས་ཀྱི་རྟོགས་བརྗོད་ནི།

༄༅ །སྐལ་ལྡན་རྣམས་ལ་མི་ཤེས་པ་ཅི་ལེགས་པའི་རང་བཞིན་ལས་བྱུང་
དགེ་ཉིད་གྱུར།
སྨོངས་པ་རྣམས་ལ་དགེ་བ་མ་ཕན་ཉིད་འགྱུར་འདི་ནི་རིམ་པ་འདི་
ཡིས་མཚོན།
མཚན་བྱེད་སྐག་རྩམ་སྤུན་པ་སྐན་གྱི་ནགས་ལ་མཆོག་དུ་མཛེས་པ་
རབ་དུ་སྤྱིར།
གང་ཡང་ཉི་མའི་གཟི་བྱིན་ཞུག་པའི་རིགས་ཀྱི་མིག་ནི་ཀུན་དུ་
ཉམས་པར་བྱེད། 1

ས་བདག་གཟུགས་ཅན་སྙིང་པོ་ཡི། གྲོང་ཁྱེར་སྐྱོལ་པོའི་ཁབ་ཅེས་པ།
རབ་བཟང་ཞེས་པའི་གྲོང་ཁྱེར་པ། ཡོངས་རྫོགས་ཁྲིམ་ན་གནས་པ་བྱུང་། 2

ལྷ་བ་ཀུན་ལ་ནོམ་སྣང་ཞིང་། གཏི་མུག་རབ་དུ་གྱུས་པ་དེས།
སྨོངས་ལས་ཟད་བྱེད་པ་ཉིད་ལ། མངོན་པར་གུས་པ་ལྷག་པར་གྱུར། 3

དེ་ཡི་ཆུང་མ་ཆོ་རིགས་ཅན། བདེན་ལྡན་མ་ཞེས་བྱ་བ་ཡིས།
མངལ་བཟུང་ཟླ་བ་ཉ་བ་ཡི། དཀྱིལ་འཁོར་ཤར་གྱི་ཕྱོགས་ཀྱིས་བཞིན། 4

नवमः पल्लवः ।

ज्योतिष्कावदानम् ।

धन्यानामशिवं विभर्त्ति शुभतां भव्यस्वभावोद्भवं
मूर्खाणां कुशलं प्रयात्यहिततामित्येष लक्ष्यः क्रमः ।
निशीथतिमिरान्ध्यमौषधिवनस्यात्यन्तकान्तिप्रदं
एतच्चौलुककूलदृष्टहृतये सर्व्वं च मैचम्महः ॥ १ ॥

पुरा राजगृहाभिख्ये विम्बिसारस्य भूपतेः ।
अभूत् पौरसुभद्राख्यः परिपूर्णगृहस्थितेः ॥ २ ॥

मौर्ख्यात् मोहप्रपन्नस्य सर्व्वदर्शनविद्विषः ।
तस्य क्षपणकेष्वेव बभूवाभ्यधिकादरः ॥ ३ ॥

तस्य सत्यवती नाम जायाभिजनशालिनी ।
गर्भमाधत्त पूर्णेन्दुविम्बं पौरन्दरीव दिक् ॥ ४ ॥

ཀ་ལན་ད་ཀའི་གནས་ཞེས་པ། འོད་མའི་ཚལ་དུ་ཡང་དག་གནས།
སངས་རྒྱས་བཅོམ་ལྡན་བསོད་སྙོམས་ལ། ནམ་ཞིག་དེ་ཡི་ཁང་པར་གཤེགས། 5

དེ་ནི་ཚུར་མར་བཅས་པ་ཡིས། དེ་ལ་མཆོད་བྱས་གུས་བཅས་པས།
བུ་ནི་མངལ་དུ་གནས་གང་དེ། ཅི་ཡི་གཟུགས་འགྱུར་དེ་ལ་དྲིས། 6

དེ་ཡིས་བཀའ་སྩལ་ཁྱོད་ཀྱིས་བྲ། ལྷ་མིའི་ཕུན་སུམ་ཚོགས་སྤྱད་ནས།
ང་ཡི་བསྟན་ལ་རབ་བྱུང་ནས། ཡང་དག་ལྡན་པས་གྲོལ་བར་འགྱུར། 7

དེ་སྐད་གསལ་བར་བཀའ་སྩལ་ནས། བཅོམ་ལྡན་རང་གི་གནས་སུ་གཤེགས།
ཁྱིམ་བདག་ཁང་པར་ཟད་བྱེད་པ། བྷཱུ་རི་ཀ་ནི་མངོན་པར་འོངས། 8

བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས་པ་དེ། རབ་བཟང་གིས་ནི་སླུས་པར་གྱུར།
ཟད་བྱེད་པས་ཐོས་གྱུར་བར་ནི། ཁོང་ཁྲོའི་དུག་གིས་འཁྲུགས་པར་གྱུར། 9

ཤིན་དུ་ཡུན་རིང་དེས་བརྩིས་ནས། ངལ་བས་གཟའ་ནི་ཤེས་བྱས་དེ།
དྲིས་ལན་བཅོམ་ལྡན་གྱིས་གསུངས་གང་། དེ་ལྟའི་ཙེམ་པ་ཁོ་ནར་མཐོང་། 10

ངེས་བསམས་ཀྱི་མ་ཐེ་ཆོས་དག། མེད་པར་དེ་ཡིས་བདེན་པར་བརྗོད།
འོན་ཀྱང་དེ་ཡིས་སླུས་པའི་དངོས། གཞན་སླད་བདག་ནི་མི་བདེན་བརྗོད། 11

བདག་གི་ཚིག་གིས་རབ་བཟང་གིས། གལ་ཏེ་ཀུན་མཁྱེན་དེ་རིགན།
དེ་ལས་དགེ་སློང་ལ་གུས་འདེམས། ཟད་བྱེད་ལ་དད་གཏོང་བར་འགྱུར། 12

कलन्दकनिवासाख्यः वेणुकाननसंश्रयः।
कदाचित् भगवान् बुद्धः प्राप्तः पिण्डाय तद्गृहम्॥ ५॥

पूजां सभार्य्यः कृत्वास्मै तं स पप्रच्छ सादरः।
गर्भस्थितमपत्यं यत् किं रूपं तद्भविष्यति॥ ६॥

सोऽवदत् सम्पदं भुक्त्वा[1] पुत्रस्ते दिव्यमानुषीम्।
प्रव्रज्यया शासने मे संयुक्तो मुक्तिमेष्यति॥ ७॥

याति भगवति स्पष्टमित्यादिश्य निजाश्रयम्।
अभ्याययौ गृहपतेर्भूरिकः क्षपणो गृहम्॥ ८॥

भगवद्भाषितं तत्तु सुभद्रेण निवेदितम्।
श्रुत्वा क्षपणकः क्षिप्रमभूद् द्वेषविषाकुलः॥ ९॥

गणयित्वा स सुचिरं ग्रहज्ञानकृतश्रमः।
यद्देवोक्तं भगवता प्रश्नेऽपश्यत्तथाविधम्॥ १०॥

सोऽचिन्तयदहो सत्यमुक्तन्तेन न संशयः।
तत्प्रभावोपमादाय किं स्वसत्यं वदाम्यहम्॥ ११॥

तस्य सर्व्वज्ञतां वेत्ति सुभद्रो यदि मन्दिरा।
तदैष क्षपणश्रद्धां त्यक्ष्यति श्रमणादरात्॥ १२॥

१ Orig. भुञ्ज।

དེ་ལྟར་བསམས་ནས་ཁྲོ་ལྡན་པ། དེ་ཡིས་རབ་བཟང་དག་ལ་སྨྲས།
ཀུན་མཁྱེན་ང་རྒྱལ་ཅན་དེ་ཡིས། འདི་དག་མི་བདེན་པ་ཉིད་བརྗོད། 13

ལྷ་ཡིས་ཕུན་ཚོགས་ལྷ་ལ་འོས། མི་ཡིས་ཇི་ལྟར་ཐོབ་པར་འགྱུར།
འོན་ཏེ་རབ་བྱུང་བདེན་ཉིད་ན། དེ་ཡི་འདི་ནི་བསམ་པར་བྱ། 14

དབྱུལ་དང་ལྟོགས་པས་གདུངས་པ་འམ། གང་ལ་འཚོ་ཐབས་གཞན་མེད་པ།
སྐྲ་གྲོལ་འོས་པ་དེ་དེ་ཡིས། སྐྱབས་ནི་དགེ་སློང་བརྟུལ་ཞུགས་ཡིན། 15

ཁྱིམ་བདག་བདག་གིས་མཐོང་བ་ནི། གལ་ཏེ་བདག་གི་ཚིག་ཚད་ན།
བཟློག་པར་ཁྱིམ་པ་འདི་སྐྱེས་པས། རིགས་ནི་ཡོངས་སུ་གདུང་བར་འགྱུར། 16

འདི་བརྗོད་ཟད་བྱེད་པ་སོང་ཚེ། ཁྱིམ་བདག་གིས་ནི་ཡུན་རིང་དུ།
ཉམས་པར་དཔྱད་ནས་མངལ་ལྷུང་སྐད། སྦྱོར་བ་དེ་དང་དེ་དག་བསྒྲུབས། 17

གང་ཚེ་རྫས་ཀྱི་སྦྱོར་བ་ཡིས། མངལ་ནི་ཡོངས་སུ་མ་གཡོས་ཉིད།
དེ་ཚེ་འདི་ཡིས་བདེན་པར་ནི། ཆུང་མ་དྲག་པོས་མཉེས་ཏེ་བསད། 18

དེ་ནས་སྡིག་ཅན་དེ་ཡིས་དེ། བསིལ་བའི་ཚལ་གྱི་དུར་ཁྲོད་དུ།
རབ་ཏུ་བསྐྱལ་ཚེ་ཟད་བྱེད་པ། དེ་ཡིས་གཏམ་ཐོས་དགའ་ནས་སྨྲས། 19

ཨ་ཧོ་ཀྱི་མ་ཀུན་མཁྱེན་འདིས། ཁྱིམ་པ་ལ་བརྗོད་དེ་བདེན་ལྡན།
བུ་ནི་མ་སྐྱེས་མ་དག་ནི། ལྟུ་པ་ཉིད་གྱུར་འདི་དེ་ཡིན། 20

इति सञ्चिन्त्य सामर्शः स सुभद्रमभाषत ।
असत्यमेतत् कथितं तेन सर्व्वज्ञमानिना ॥ १३ ॥

मनुष्यः कथमाप्नोति देवार्हां दिव्यसम्पदम् ।
प्रव्रज्या किन्तु सत्येव कथन्तेनास्य चिन्तिता ॥ १४ ॥

क्षीणः क्षुदुपसन्तप्तो यस्य नास्त्यन्यतो गतिः ।
तस्य तस्य सुभिक्षार्हं शरणं श्रमणव्रतम् ॥ १५ ॥

पश्याम्यहं गृहपते प्रमाणं यदि मद्वचः ।
प्रत्युतायं शिशुर्जातः कुलं सन्तापयिष्यति ॥ १६ ॥

इत्युदीर्य्य क्षपणके याते गृहपतिश्चिरम् ।
विचार्य्य विदधे तां तां युक्तिं गर्भनिपातने ॥ १७ ॥

यदा द्रव्यप्रयोगेऽपि नैव गर्भः परिच्युतः ।
तदास्य पत्नीमवधीदेकान्ते हठमर्द्दनैः ॥ १८ ॥

ततः शीतवनं तस्यां श्मशानं तेन पापिना ।
प्रापितायां क्षपणकास्तद्वार्त्तां नन्दिता जगुः ॥ १९ ॥

अहो बताहो सर्व्वज्ञः शिशोः सत्यं तदुक्तवान् ।
सेयं स्तनावजातेऽस्य जननी पञ्चतां गता[1] ॥ २० ॥

---

१ Orig. सैयं स्तनोऽदेजातेस्या जननीपञ्चतन्मता ।

དེ་ཡིས་བརྗོད་པའི་ཚིགས་པ་ཡིས། ལྷ་མིའི་དཔལ་མཆོག་དེ་ནི་འདི།
འདི་ཡི་རབ་བྱུང་དེ་ཡང་འདི། གང་ཞིག་དཀར་ནི་ཤི་གྱུར་པའོ། 21

དེ་སྐད་དེ་དག་རབ་སྨྲ་ཞིང་། ཉེ་བར་དགོད་པས་ཐམས་ཅད་ནི།
དུར་ཁྲོད་བལྟ་བ་ཁོ་ནའི་ཕྱིར། སྐྱེ་བོ་ཡང་དག་འདུས་པར་གྱུར། 22

སྐབས་དེར་སངས་རྒྱས་བཅོམ་ལྡན་འདས། འབྱུང་པོ་དགོངས་པས་ལྷ་ཡི་ནི།
སྤྱན་གྱིས་དེ་སྐད་ཀུན་མཁྱེན་ནས། འཛུམ་པ་དང་ལྡན་སྐད་ཅིག་བསམས། 23

ཀྱེ་མ་གཏི་མུག་གིས་བཅིངས་པས། སྡོངས་པ་རིང་དུ་གནས་པས་ཀྱང་།
ལུས་ཅན་རྣམས་ལ་སྣང་བ་སྒྲིབ། སྤྲིན་གྱི་རྣམ་པར་འགྱུར་བས་བཞིན། 24

ཀྱེ་མ་དགེ་བ་ཟད་བྱེད་པའི། ཟད་བྱེད་པ་དེ་སྡིག་པ་ལས།
ཁྱིམ་བདག་དམན་པའི་བློ་ཅན་ལས། བྱ་བ་མིན་པ་བྱེད་དུ་བཅུག 25

ཅེས་བསམས་སྙིང་རྗེ་རབ་གྱུར་པའི། བཅོམ་ལྡན་རང་ཉིད་དགེ་སློང་གི།
ཚོགས་ཀྱིས་བསྐོར་ནས་མྱུར་བར་ནི། བསིལ་བའི་ཚལ་གྱི་དུར་ཁྲོད་གཤེགས། 26

བཅོམ་ལྡན་རང་ཉིད་དུར་ཁྲོད་ན། གྱི་བ་ཤེས་ནས་རྒྱལ་པོ་ནི།
གཟུགས་ཅན་སྙིང་པོ་བློན་དང་བཅས། ས་དེ་ཉིད་དུ་འོངས་པར་གྱུར། 27

དེ་འོག་རབ་བཟང་ཆུང་མ་ནི། སྡིག་པའི་མི་ལ་བཅུག་པ་དང་།
ཆུ་སྐྱེས་ལ་གནས་བྱིས་པ་དག། དཀུ་བརྗོལ་ཉི་མ་བཞིན་དུ་འཐོན། 28

इयं सा श्रीः शिशोर्दिव्या सोक्ता दिव्यमनुष्यता।
इयञ्च सास्य प्रव्रज्या यत् कुक्षौ निधनं गतः॥ २१॥

इति तेषां प्रवादेन सोपहासेन सर्व्वतः।
श्मशानदर्शनायैव बभूव जनसङ्गमः॥ २२॥

अत्रान्तरे दिव्यदृशा भगवान् भूतभावनः।
सर्व्वं विज्ञाय तद्वृत्तः प्रदध्यौ सस्मितः क्षणम्॥ १३॥

अहो मोहानुबन्धेन दूरस्थैरपि देहिनाम्।
आलोकश्छाद्यते मूर्खैर्मेघैरिव विकारिभिः॥ २४॥

शुभं क्षपयता[1] तेन क्षपणेन स मुग्धधीः।
अहो गृहपतिः पापादकार्य्यमपि कारितः॥ २५॥

इति सञ्चिन्त्य भगवान् स्वयं भिक्षुगणैर्वृतः।
ययौ शीतवनं क्षिप्रं श्मशानं करुणाकुलः॥ २६॥

श्मशानचारिकां ज्ञात्वा राजा भगवतः स्वयम्।
बिम्बिसारः सहामात्यैस्तामेव भुवमाययौ॥ २७॥

ततः सुभद्रजायायां प्रक्षिप्तायां चितानले।
कुक्षिं भित्त्वाम्बुजासीनः शिशुः सूर्य्य इवोद्ययौ॥ २८॥

---

१ Orig. क्षयपयता।

མི་འབར་དབུས་ན་གནས་པ་དེ། གང་ཚེ་སུས་ཀྱང་མ་སྣངས་པ།
དེ་ཚེ་སྐྱེ་བོའི་ཚོགས་རྣམས་ཀྱིས། ཧཱ་ཧཱ་ཞེས་པ་ཆེན་པོར་གྱུར། 29

དེ་ནས་བདེ་བར་གཤེགས་པའི་བཀས། འཚོ་བྱེད་ཅེས་པའི་གཞོན་ནུ་བསོས།
སྨོངས་པ་ལྷ་བུ་རང་འགྲོ་ཡིས། གཞོན་ནུ་འོད་ལྡན་དེ་སྣངས་གྱུར། 30

ཀྱོལ་བས་གཟིགས་པ་ཉིད་ཀྱིས་ནི། བྲིས་པ་རབ་ཏུ་ལེན་པའི་ཚེ།
རོ་སྲེག་མི་དག་དེ་ལ་ནི། ཧ་རི་ཙན་དན་ལྷར་བསིལ་གྱུར། 31

བྲིས་པ་འཚོ་ཞིང་མི་ལས་གྲོལ། རབ་ཏུ་མཛེས་པ་མཐོང་གྱུར་ནས།
སྐྱེངས་པས་ཟད་བྱེད་པ་རྣམས་ནི། སྐད་ཅིག་ཤི་བ་བཞིན་དུ་གནས། 32

དེ་ནས་རབ་བཟང་ཡ་མཚན་གྱིས། ཆོས་པར་འཕྲུལ་ལ་བཅོམ་ལྡན་འདས།
འབྱུང་པོ་ཀུན་ཕན་ལ་དགྲེས་པས། བུ་འདི་སྐྱོང་བར་གྱིས་ཞེས་གསུངས། 33

དེ་ཡང་ཕྱི་ཆོས་དག་ལས་བློ། ཏི་བྲ་སྨྲ་པའི་ཕྱོགས་ལ་འབྱུང་།
ཟད་བྱེད་རྣམས་ཀྱིས་བཞིན་དག་ལ། བསླབ་པའི་སྐད་དུ་སྐད་ཅིག་བསྒྲུས། 34

དེ་ལ་རིས་སྨས་དུར་ཁྲོད་ཀྱིས། མི་སྐྱེས་བྲིས་པ་འདི་མི་སྣངས།
གསལ་བར་གང་དུ་འདི་གནས་པ། དེ་ཁྲིམ་བརྟག་པ་ཉིད་དུ་འགྱུར། 35

དེ་སྐད་དེ་དག་ཚིག་གིས་དེ། སྨོངས་པས་གང་ཚེ་དེ་མ་སྣངས།
དེ་ཚེ་ཀྱོལ་བའི་བཀའ་ཡིས་ནི། ས་ཡི་བདག་པོས་བྲིས་པ་སྣངས། 36

ज्वालितानलमध्यस्थं तं कश्चिन्नाग्रहीद्यदा ।
तदा जनसमूहस्य हाहाकारो महानभूत् ॥ २९ ॥

ततस्त सम्भ्रमाद्दृद्धगतिः सुगतशासनात् ।
कुमारभृत्यो जग्राह जीवकाख्यः कुमारकम्[1] ॥ ३० ॥

जिनावलोकनेनैव बालकग्रहणक्षणे ।
अभूच्चितानलस्तस्य हरिचन्दनशीतलः ॥ ३१ ॥

जीवन्तं ज्वलनान्मुक्तं रुचिरं वीक्ष्य दारकम् ।
वैलक्ष्येण क्षपणकाः क्षणं तस्थुर्मृता इव ॥ ३२ ॥

ततः सुभद्रं भगवान् सर्व्वभूतहिते रतः ।
बभाषे विस्मयोद्भ्रान्तं पुत्रोऽयं गृह्यतामिति ॥ ३३ ॥

स तु दोलाकुलमतिः किं करोमीति संशयात् ।
क्षपणानां मुखान्येव शिक्षार्थी क्षणमैक्षत ॥ ३४ ॥

ते तमूचुः न बालोऽयं ग्राह्यः श्मशानवह्निजः ।
यत्रायं तिष्ठति व्यक्तं न भवत्येव तद्गृहम् ॥ ३५ ॥

इति तेषां गिरा मूर्खः स जग्राह न तं यदा ।
तदा क्षितिपतिर्बालमाददे जिनशासनात् ॥ ३६ ॥

१ Orig. जीवाख्यकुमारम् ।

མི་དང་མཚུངས་པའི་འོད་ལྡན་པ། གསལ་བས་དེ་ཉམས་བར་ཁྲབ་པས།
དེ་ཡི་མིང་ནི་མི་སྐྱེས་ཞེས། བཅོམ་ལྡན་ཉིད་ཀྱིས་མཛད་པར་གྱུར། 37

ས་སྐྱོང་ཁང་པར་བྲིས་པ་ནི། རབ་ཏུ་བསྐྱེད་པར་གྱུར་པ་དེའི།
ཞང་པོ་ཡུལ་གཞན་སོང་བ་དག། དུས་ཀྱིས་ཡང་དག་འོངས་པར་གྱུར། 38

དེ་ཡིས་སྲིང་མོ་ཤི་བ་དང་། བུ་སྐྱེས་སྤྱོད་ཚུལ་རིག་གྱུར་ནས།
ཁྲོ་བས་འདར་ཞིང་མངོན་ཕྱོགས་ཏེ། རབ་བཟང་ལ་ནི་ཡང་དག་སྨྲས། 39

རྨོངས་པ་ཟད་བྱེད་ལ་གུས་ཤིང་། དེ་ཡི་ཚིག་གིས་ཆུང་མ་བསད།
ཁྲོད་ཀྱིས་རང་གི་བུ་དེར་ན། ཡིགས་བྱས་མིང་ནི་ཅི་ཞིག་བྱས། 40

རང་བཞིན་གྱིས་ནི་སེམས་མེད་ཅིང་། གཞན་གྱི་སྟུགས་ཀྱིས་ཀུན་ཏུ་སླད།
སྐྱེ་བོ་ངན་པ་དགོད་ན་ཡང་། ཉམ་པར་འཛེམས་བྱེད་རོ་ལངས་བཞིན། 41

གལ་ཏེ་རྒྱལ་པོའི་ཁབ་ནས་བྲུ། ད་ལྟ་ཉིད་དུ་མི་ལེན་ན།
བྲུ་མེད་བསད་པ་བསྒྲགས་ནས་དེ། ཁྱོད་ནོར་ཆད་པས་གཅོད་ཏུ་འཇུག། 42

དེ་ཡིས་དེ་སྐད་བརྗོད་པ་དེས། འཇིགས་ནས་ས་བདག་ཁབ་ནས་བྲུ།
ལེན་དུ་བཙུག་པས་ས་བདག་ནི། འདོད་དང་ལྡན་པས་རིང་ནས་གཏད། 43

དེ་ནས་རབ་བཟང་དུས་ཀྱིས་ནི། དུས་ཀྱི་དབང་དུ་སོང་བར་གྱུར།
མི་སྐྱེས་ཉམ་པར་འགྱུར་པའི་གཏེར། འོད་ཀྱིས་ཉི་མ་བཞིན་དུ་གྱུར། 44

ज्योतिर्मध्यादवाप्तस्य ज्योतिष्कसदृशत्विषः[१]।
ज्योतिष्क इति नामास्य चकार भगवान् स्वयम् ॥ ३७ ॥

तस्य प्रवर्द्धमानस्य भूपालभवने शिशोः।
देशान्तरगतः काले मातुलः समुपाययौ ॥ ३८ ॥

स विदित्वा स्वसुर्वृत्तं निधनं पुत्रजन्मनि।
कोपात् सुभद्रमभ्येत्य कम्पमानः समभ्यधात् ॥ ३९ ॥

मूर्ख क्षपणभक्तेन तद्गिरा हतयोषिता।
त्वया त्यक्तस्वपुत्रेण किं नाम सुकृता कृतम् ॥ ४० ॥

निश्चेतनाः स्वभावेन परमन्त्रसमुत्थिताः।
हसन्तोऽपि विनिघ्नन्ति वेताडा इव दुर्जनाः ॥ ४१ ॥

अधुनैव न गृह्णासि यदि राजगृहात् सुतम्।
तत्ते स्त्रीवधमुद्घुष्य कारयाम्यर्थनिग्रहम् ॥ ४२ ॥

इत्युक्तस्तेन तद्गीत्या स भूपतिगृहात् सुतम्।
आनिनाय चिरात् मुक्तमकामेन महीभुजा ॥ ४३ ॥

ततः सुभद्रे कालेन कालस्य वशमागते।
अभूत् निधिर्विभूतीनां ज्योतिष्कोऽर्क इव त्विषाम् ॥ ४४ ॥

१ The text and the translation of the last half of this line were lost. The former was supplied by a Bande of Sahor.

སྐྱོང་བ་རྣམས་ཀྱི་དཔག་བསམ་ཤིང་། ལྷ་མིའི་ཕུན་སུམ་ཚོགས་པ་ཐོབ།
སངས་རྒྱས་ཆོས་དང་དགེ་འདུན་གྱི། སྐྱབས་ལ་དེ་ཡི་བློ་གྲོས་བྱས། 45

དེ་ལ་གུས་པས་ཉེར་བསྙེན་པ། མིད་བྱུང་ལྷ་ཡི་རིན་ཆེན་ཚོགས།
བསོད་ནམས་རིན་ཆེན་སྒྲུབ་བརྩོན་དེས། དགེ་སློང་དགེ་འདུན་རྣམས་ལ་ཕུལ། 46

ཆུ་གཏེར་ཆེར་ནི་ཆུ་བོ་བཞིན། དེ་ལྟའི་ཁྱིམ་དུ་ལྷའི་རིས་ལས།
ནོམ་མང་ཕུན་ཚོགས་ངོ་མཚར་ཅན། རང་ཉིད་ཁོ་ན་འོངས་པར་གྱུར། 47

དེ་ཡི་ཁྱིམ་དུ་བཅོམ་ལྡན་འདས། ཙྭོ་དང་རིན་ཆེན་མཚུངས་གློས་ཀྱང་།
དེ་ཡི་ངོར་ནི་རིན་པོ་ཆེའི། སྣོད་ནི་ཡོངས་སུ་བཟུང་བར་མཛོད། 48

དེས་ནི་ལྷ་ཡི་གོས་བཟང་དག། རང་གི་ཁྱིམ་བཞིན་དྲི་མ་མེད།
གྲགས་པ་རྣམས་ཀྱི་དཔེར་བརྗོད་པ། བསོད་ནམས་སྟོང་གིས་གྱོས་ནས་ཐོབ། 49

དེ་ནས་ནམ་ཞིག་དེ་ཡིས་གོས། བཀུས་ནས་བརྒྱན་པ་ཉི་འོད་བཀོད།
ཡང་དག་གཡོ་བས་རབ་བསྐྱོད་ནས། ས་ཡི་བདག་པོའི་སྤྱི་བོར་ལྷུང་། 50

མི་སྐྱེས་དེ་ཡི་གོས་དག་ནི། སྐྱོན་མེད་རབ་མཛེས་མཐོང་གྱུར་ནས།
ལྷ་ཡི་དཔལ་ལ་ཡ་མཚན་པའི། རྒྱལ་པོ་རང་དཔལ་ཅི་བཞིན་སེམས། 51

ཟས་ལ་མགྲོན་གཉེར་མི་ཡི་བདག། མི་སྐྱེས་ཁྱིམ་ན་གནས་པས་དེའི།
རིན་ཆེན་རང་བཞིན་ཁང་པ་དག། མཐོང་ནས་མཐོ་རིས་ཡིན་པར་སེམས། 52

अर्थिकल्पद्रुमः प्राप्य सम्पदं दिव्यमानुषीम्।
स बुद्धधर्म्मसङ्घेषु शरण्येष्वकरोन्मतिम्॥ ४५ ॥

तद्भक्त्युपनतं दिव्यरत्नसञ्चयमद्भुतम्।
प्रददौ भिक्षुसङ्घेभ्यः पुण्यरत्नार्जनोद्यतः॥ ४६ ॥

तस्य देवनिकायेभ्यः साश्चर्य्या विविधर्द्धयः।
स्वयमेवाययुर्वेश्म महोदधिमिवापगाः॥ ४७ ॥

तृणे रत्ने च समधीर्भगवानपि तद्गृहे।
चक्रे तदनुरोधेन रत्नपात्रपरिग्रहम्॥ ४८ ॥

स दिव्यवस्त्रयुगलं यशसामुपमाक्षमम्।
प्राप पुण्यपणक्रीतं निजं गृहमिवामलम्॥ ४९ ॥

कदाचिदथ तद्वस्त्रं स्नानार्द्रं न्यस्तमातपे।
समीरणेनापहृतं न्यपतन्मूर्द्ध्नि भूपतेः॥ ५० ॥

विलोक्यापूर्व्वरुचिरं ज्योतिष्कस्य तदंशुकम्।
दिव्यश्रीविस्मितो राजा तृणं मेने निजश्रियम्॥ ५१ ॥

भोक्तुं निमन्त्रितः प्राप्य तस्य रत्नमयं गृहम्।
नृपतिः स्वर्गमज्ञासीत् ज्योतिष्कभवनस्थितः॥ ५२ ॥

དེ་ནས་དུས་ཀྱི་ས་སྐྱོང་ནི། ཆོས་ཀྱི་ངང་ཚུལ་མ་སྐྱེས་དགྲ།
བུ་ནི་རྒྱལ་སྲིད་ལ་ཆགས་པའི། གཡོ་ཡིས་ངེས་པར་བཀྲོངས་པར་གྱུར། 53

རྒྱལ་པོ་ཡོན་ཏན་དམ་པ་ཅན། རྫོགས་ལྡན་ལྷ་བུ་དེ་འདས་ཚེ།
རྒྱལ་པོ་མཆོག་གི་བུ་དེ་ཡིས། ཆོས་མིན་བཞིན་དུ་རྒྱལ་སྲིད་ཐོབ། 54

མི་སྐྱེས་དག་གིས་ཁྲིམས་ཀྱི་དཔལ། ས་བདག་ལ་དགོན་དེས་མཐོང་ནས།
ཡང་དག་མངོན་པར་སོང་སྟེ་སྨྲས། ཁྱོད་ནི་ཕ་མས་ཉམ་པར་བསོས། 55

ཁྱོད་དང་ང་སྤུན་ཆོས་དག་གིས། འབྱོར་པ་ཕྱེད་ནི་བདག་ལ་སྩོལ།
གལ་ཏེ་མིན་ན་ནོར་སྐལ་ལ། འཁྲུ་ལས་རྩོད་པ་ཉིད་རབ་སྐྱེ། 56

གྲུ་གྲུས་སྤང་བར་བྱེད་པ་དེས། དེ་སྐད་བརྗོད་པས་མི་སྐྱེས་ནི།
ཁང་པ་རིན་ཅན་གྱིས་གང་བ། དེ་ལ་བྱིན་ནས་ཁྲིམས་གཞན་སོང་། 57

ལྷ་ཡི་རིན་ཅན་ཡིད་འཕྲོག་གྱིས། འཇིག་རྟེན་ཕན་བྱེད་དཔལ་འབྱོར་དེ།
མི་སྐྱེས་ཁོ་ནའི་རྗེས་སུ་འབྲང་། ཉིན་མོར་བྱེད་ལ་འོད་ཟེར་བཞིན། 58

ཡང་ཡང་མི་སྐྱེས་ཀྱིས་སྤྲངས་ཀྱང་། ཕྱུན་ཚོགས་དེ་ནི་ལན་བདུན་དུ།
མི་སྐྱེས་ཅན་སོང་མི་བདག་གིས། མ་རིག་ཆུང་མ་ཁྲོ་ཅན་བཞིན། 59

ཆོས་ཀུན་ལ་སོགས་རིགས་པ་ཡིས། ཉམ་པ་ཀུན་དུ་འཕྲོག་བརྩོན་ཅིང་།
ཁྲིམས་པར་ཤེས་ནས་མི་སྐྱེས་ནི། ཡིད་བྱུང་གྱུར་པས་ཡང་དག་བསམས། 60

अथ कालेन भूपालः पुत्रेणाजातशत्रुणा।
छद्मना राज्यलुब्धेन धर्म्मशीलो निपातितः ॥ ५३ ॥

अतीते सद्गुणे राज्ञि तस्मिन् कृतयुगोपमे।
अधर्म्म इव स प्राप राज्यं राजवरात्मजः ॥ ५४ ॥

स भूभृद्दुर्लभां दृष्ट्वा ज्योतिष्कस्य गृहे श्रियम्।
तमुवाच समभ्येत्य मत्पिचा त्वं विवर्द्धितः ॥ ५५ ॥

भ्राता तवाहं धर्म्मेण विभवार्द्धं प्रयच्छ मे।
न चेत् भागधनद्रोहात् कलिरेव प्रजायते ॥ ५६ ॥

इत्युक्तस्तेन कौटिल्यात् ज्योतिष्कः क्रूरकारिणा।
रत्नपूर्णं गृहं तस्मै दत्त्वा प्रायात् परं गृहम् ॥ ५७ ॥

सा दिव्यरत्नरुचिरस्फीता लोकोपकारिणी।
ज्योतिष्कमेवानुययौ श्रीः प्रभेव[1] दिवाकरम् ॥ ५८ ॥

पुनस्त्यक्तापि सा सम्पत् सप्तकृत्वः प्रभावती।
ज्योतिष्कमस्पृष्टरूपा साध्वी पतिमिवाययौ ॥ ५९ ॥

सर्व्वथा हरणोद्युक्तं दस्युचौरादियुक्तिभिः।
ज्योतिष्कः कुपितं ज्ञात्वा निर्व्विघ्नः समचिन्तयत् ॥ ६० ॥

---

१ Orig. प्रतिभेव।

སྐྱེ་སྒོའི་བསོད་ནམས་མ་ཡིན་པ། ཡོངས་སུ་སྨིན་པས་ཕ་ལྟ་བུ།
རྒྱལ་པོ་མཉེས་ག་ཤིན་ཡངས་པ་ནི། དྲན་པའི་ལྷག་མ་ཉིད་དུ་གྱུར། 61

འདི་ན་ཟློལ་མེད་དྲང་པོ་ལ། སྐྱེ་སྒོ་དབུགས་ཕྱུང་ཕ་མ་བཞིན།
མཚན་མོ་བདེ་བར་ཉལ་བྱེད་པ། དེ་དང་མཚུངས་པ་གཞན་པ་སུ། 62

ནོར་ལྡན་ཙ་བཞིན་བསྒྲུབ་པར་བྱ། ཀློ་གྲོས་རིན་ཆེན་བཞིན་དུ་ཐོབ།
སྐྱེ་བོ་དམ་པ་དྲང་པོ་ནི། བདུད་རྩི་བས་ཀྱང་རྙེད་པ་དཀའ། 63

ཟློལ་མིན་མཁས་པས་བསྟེན་པ་དང༌། སྙོངས་མིན་དྲང་པོའི་བདག་ཉིད་དང༌།
མ་བསྟིགས་མཐོན་པོ་ཉིད་དག་ཀྱང༌། དེ་ལྟར་སྐྱེས་པ་ཤིན་དུ་ཉུང༌། 64

དེ་ནི་མི་བདག་ཞེ་སྡང་གིས། ཚུལ་ངན་གནོད་བྱེད་ལ་རབ་ཞུགས།
འཇིག་རྟེན་རྣམས་ཀྱི་སྡིག་སྨིན་གནས། དུས་མིན་དོག་ཏུ་ཐོད་ལྡན་འོངས། 65

འགྲོ་བར་ས་བདག་འོད་ལྡན་པ། བཤེས་གཉེན་དེ་ནི་ནུབ་པའི་ཚེ།
དེ་སྨས་སྐྲོན་སྐྱེད་མཚན་མོ་ནི། མུན་པའི་སྐྱད་དུ་རབ་དུ་གྱུར། 66

མི་བསྟུན་དམ་པ་འདས་ནམས་ཀྱིས། རྒྱུ་མེད་སྙིང་སྡུག་ཡིན་ནམ་སྙམ།
གང་ཞིང་སྤྱོད་ཚུལ་གཞན་ཆ་ལས། གྲགས་པ་དེ་དག་རབ་གསལ་བྱེད། 67

དེ་སྐད་མི་བདག་ངན་པ་ཡིས། བྱིན་བརླབས་ས་འདི་ཡོངས་གཏོང་ངེས།
རྩོད་ལྡན་དུས་ཀྱི་ས་དབང་ལ། སྐྱེ་བོ་ནམས་ནི་ག་ལ་འཚོ། 68

अपुण्यपरिपाकेण प्रजानां जनकोपमः।
संयातः स्मृतिशेषत्वं राजा वात्सल्यपेशलः॥ ६१॥

कोऽन्यस्त्वत्सदृशो यस्मिन् निर्व्याजशरले प्रजाः।
पितरीव कृताश्वासाः सुखं रात्रिषु शेरते॥ ६२॥

धनिनस्तृणवत् प्राप्याः प्राप्यन्ते रत्नवद्बुधाः।
अमृतादपि दुष्प्राप्यः सौजन्यशरलो जनः॥ ६३॥

निर्व्याजवैदग्ध्यजुषाममुग्धशरलात्मनाम्।
अनुद्धतोन्नतानाञ्च विरलं जन्म तादृशाम्॥ ६४॥

अधुना द्वेषदुर्वृत्तः प्रवृत्तनिकृतिर्नृपः।
पापपाकेन लोकानां अकाले कलिरागतः॥ ६५॥

मित्रे जगति यातेऽस्तं तस्मिन् भास्वति भूपतौ।
दोषोदयः प्रवृद्धोऽयमन्धकाराय तत्सुतः॥ ६६॥

नूनं सतामतीतानां निष्कारणसुहृत् खलः।
यद्वृत्तपरभागेण यशस्तेषां प्रकाशते॥ ६७॥

तस्मादियं परित्यज्या नृपत्यधिष्ठिता मही।
काले कलौ क्षितीशे च जनानां जीवितं कुतः॥ ६८॥

མཆོག་ཏུ་ཡོངས་འདྲིས་ཡིད་འོང་ཆུང་མ་དམ་པ་རྣམས་ཀྱི་རབ་སྦྱངས་ཡོན་དང་།
འཚོལ་པ་མིན་པའི་རིགས་དང་ལེགས་ལྡན་ས་བདག་རི་བོང་ཅན་མཚུངས་གྲགས་
པ་དང་།
ལུགས་ལ་ཡང་དག་འོས་པའི་སྤྱོད་ཚུལ་དག་དང་ཕོངས་མེད་གྱུ་ཡི་ནོར་རྣམས་དེ།
མི་བདག་ཡོན་ཏན་ལྡན་ན་སྐྱེས་བུ་རྣམས་ཀྱི་ཐམས་ཅད་ཉམ་བསླད་མིན་པར་འགྱུར། 69

ཆོས་ཀྱི་ཙ་བ་ནོར་གྱི་ལྷོན་པས་ཡང་དག་བསྐྱེད་གྱུར་པ།
སྐྱོན་མེད་འདོད་པ་རྣམས་ཀྱིས་མི་དོག་གྲོས་ཤིང་རབ་འབར་བ།
བསོད་ནམས་འབྲས་བུ་བདེ་བ་ངེས་པར་འཛིག་རྟེན་ཡོངས་སྤྱོད་དེ།
ནམ་པར་ལྷུང་བྱེད་གྱོལ་ངན་ཆྲུང་གིས་གཞལ་དུ་མ་བཅོམ་ནའོ། 70

རྩོད་ལྡན་དུས་དང་བདག་པོ་བྲིས། དེ་ཡིས་རབ་གདུང་བསྒྲེག་པའི་མི།
དུས་མིན་ནོར་བསླད་རབ་ཏུ་དྲག། མི་བསྲུན་རོ་ལངས་ཚོགས་ཀྱིས་གང་། 71

དགའ་བ་ཡིད་བྱུང་བློ་གྲོས་བསྐྱོད། བདེ་བའི་དཔལ་གྱི་ལང་ཚོ་སོང་།
ད་ནི་འབྱོར་པ་ལོངས་སྤྱོད་རྣམས། སྤྱོད་དང་ལྡན་ལ་བདག་མི་སྤྲིད། 72

ནོར་དང་ཁྲིམ་དང་ཆུང་མ་དང་། བུ་དང་གཡོག་པོ་ཡོ་བྱད་རྣམས།
མཐའ་མེད་ནད་དང་གདུང་བ་སྟེ། ཀྱེ་མ་སྐྱེས་བུའི་ཡོངས་འཛིན་ནོ། 73

སོ་གའི་ཚ་བ་མི་བཟང་དཔལ། ཇི་ལྟ་ཇི་ལྟར་ནམ་འཕེལ་བ།
དེ་ལྟ་དེ་ལྟར་ལུས་ཅན་རྣམས། སྲེད་པའི་ཡོངས་སུ་གདུང་བ་འཕེལ། 74

वरपरिचयोदारा दाराः सतां गुणानां गुणाः
कुलमविकलं भव्या भूतिर्यशः शशिसन्निभम् ।
स्थितिसमुचितं वृत्तं वित्तमनिमित्तमनापदम्
गुणवति नृपे सर्व्वं भवत्यपांशुलं प्रजाकुलम् ॥ ६९ ॥

धर्म्मद्रुमस्य धनमूलसमुन्नतस्य
निर्द्दोषकामकुसुमप्रवरोज्ज्वलस्य ।
लोकः सुखानि किल पुण्यफलानि भुङ्क्ते
हतो न चेत् कुनृपतेर्विनिपातवातैः ॥ ७० ॥

कलिः कालः पतिर्बालस्तत्प्रतापश्शितानलः ।
अकालविप्लवोत्ताल-खलवेताल-सङ्कुलः ॥ ७१ ॥

प्रीतिर्विषमा खिन्ना धीः सुखश्रीर्गतयौवना ।
अधुना विभवाभोगे भोगयोगे न मे रुचिः ॥ ७२ ॥

धनं भूमिर्गृहं दाराः सुता भृत्याः परिच्छदाः ।
अहो निरवधिः पुंसामाधिव्याधिपरिग्रहः ॥ ७३ ॥

यथा यथा विवर्द्धन्ते ग्रीष्मोष्मविषमाः श्रियः ।
तथा तथा ज्वलत्येव तृष्णातापः शरीरिणाम् ॥ ७४ ॥

སྐྱེ་བ་ཀུན་ཏུ་ཉེར་བསྐྱབས་པས། ནོར་གྱི་ཚོགས་པ་རབ་རྒྱས་ཀྱང་།
ལན་ཚྭའི་མཚོ་ཡི་ཆུ་ཡིས་བཞིན། མི་ནོམས་སྲིད་བྲལ་ཉིད་མ་ཡིན། 75

གང་ཞིག་ནོར་ལྡན་ཚོག་མི་ཤེས། མེད་དོ་མེད་དོ་ཞེས་བཟློས་པ།
གལ་ཏེ་དེ་ཡིས་རབ་ཞི་ན། ཡང་སྲིད་དག་ཏུ་སུ་ཞིག་འགྱུར། 76

རྩོད་དང་འཐབ་མོ་རྨོངས་དང་ཆགས་པ་ཆེན་པོ་རྗེས་སུ་འབྲང་བའི་ལྟས་ངན་ནོར་གྱིས་ཏེ།

གྱོད་པ་བགྱིར་ལྟུང་ཡང་དག་ཆགས་པས་ནད་སྐྱིད་འབྲལ་བར་འགྱུར་བའི་ལོངས་སྤྱོད་དག་གིས་ཏེ།

ཡིད་ཉམས་གཡོག་ལ་མི་བདག་ཁེངས་པ་ཐོབ་པའི་མངོན་པའི་ང་རྒྱལ་དག་གིས་ཏེ།

འདིར་ནི་ཆགས་བྲལ་ཁོ་ན་འཇིག་དུས་འཇིགས་པར་ནད་མེད་ལོངས་སྤྱོད་དག་ཏུ་འོས་པ་ཡིན། 77

རང་གི་སྐྱེ་བོ་སྙིང་སྡུག་དྲི་མེད་སྣང་བའི་དུས་ནི་འདས་གྱུར་ཅིང་།
ལྷག་པར་མི་བསྲུན་ཐེག་པས་བཀྲིས་པའི་རྨོངས་པ་ཡང་དག་འོངས་པ་ན།
ངལ་དུབ་ཡོངས་བདང་སྐྱེ་བོ་མེད་པའི་ནགས་ཀྱི་གནས་ལ་ཡོངས་འདྲིས་པས།
ཡིད་ནི་རབ་ཞིའི་ཆུས་བཀུས་སྐྱེས་བུ་རྣམས་ཀྱི་བདེ་བའི་དབུགས་འབྱིན་ཡིན། 78

དེ་ལྟར་ཡུན་རིང་དེ་བསམས་ནས། མཆོག་ཏུ་འདོད་ཆགས་བྲལ་བར་གྱུར།
སྡུག་བསྔལ་རྨོངས་པའི་གཏི་སྨུག་དང་། བློ་ལྡན་རྣམས་ཀྱིས་རྣམ་འབྱེད་སླད། 79

प्रवृद्धैरपि वित्तौघैराजन्मोपार्ज्जितैर्नृणाम्।
लवणाब्धेरिव जलैर्विनृष्णा नैव जायते ॥ ७५ ॥

नास्ति नास्तीत्यसन्तोषाद् य एव धनिनां जपः।
पुनर्भवे भवेत् को वा स एव प्रशमो यदि ॥ ७६ ॥

किं वित्तैर्दुर्निमित्तैः कलिकलहमोहलोभानुवृत्तैः
किं भोगैर्विप्रयोगैर्व्यसनशतपतनाभ्याससंसक्तरोगैः।
किं वा मिथ्याभिमानैर्नरपतिसदनप्राप्तसेवावमानैः
अस्मिन् वैराग्यमेव क्षयसमयभये भोग्यमारोग्ययोग्यम्॥७७॥

अतिक्रान्ते काले स्वजनसुहृदालोकविमले
समापन्ने मोहप्रबलकालुष्यमलिने।
सुखाश्वासः पुंसां प्रशमसलिलस्नातमनसां
परित्यक्तायासे विजनवनवासे परिचयः ॥ ७८ ॥

इति सञ्चिन्त्य स चिरं परं वैराग्यमाययौ।
दुःखं मोहाय मूर्खाणां विवेकाय च धीमताम् ॥ ७९ ॥

སྐྱོང་ཉམས་ལ་དེས་ཀུན་བྲིན་ནས། བདེ་ག་ཤེགས་གནས་སུ་རབ་ཏུ་སོང་།
གང་ཕྱིར་བདེན་པའི་བདེར་མངོན་ཕྱོགས། དཔལ་གྱི་ལྕགས་སྒྲོག་གིས་མི་ཁེགས། 80

གང་ཚེ་ངང་པའི་རྒྱལ་པོ་ནི། རྫིང་བུ་གཙང་མ་དྲན་པ་ན།
དེ་ཚེ་ནོར་གྱི་བློ་གྲོས་མ། རོ་ལྡན་ལ་ཡང་དེ་མི་སྲིད། 81

ལོངས་སྤྱོད་དག་ལ་རྗེས་ཆགས་མེ་ནི་བཟོད་དཀའ་མྱོངས་པའི་དུ་བ་འཁྲིམས་གྱུར་པ།
ཚིག་ཤེས་བདུད་རྩིའི་རྒྱུན་གྱིས་ཡིད་ལ་བསིལ་བ་ཉིད་ནི་དལ་བུས་ཐོབ་གྱུར་ན།
བདུང་བས་སྐྱོས་ཤིང་རབ་རྒྱུག་ཉམ་པར་གཡོ་རྒྱུན་ན་ཆུང་གཡོ་བའི་མིན་འཁྲུག་ཅན།
སྐད་ཅིག་འགྲོགས་པའི་དཔལ་མོ་འདི་དག་ཞི་ལྡན་རྣམས་ཀྱི་བགེགས་ནི་བྱེད་མ་ཡིན། 82

སྲིད་པའི་ལམ་གྱི་སྡུག་བསྔལ་ཉམ་ཉམས་ཐམས་ཅད་མཁྱེན་པའི་བཀའ།
བྲི་མེད་ཉིད་ཀྱི་གནས་སུ་རབ་དུ་བྱུང་བས་རབ་དུ་ཞུགས།
ཞི་བ་ཉིད་ནི་ཐམས་ཅད་ཐོབ་ནས་མཉམ་མེད་རབ་གསལ་ཞིང་།
མཆོན་བྲལ་ཐར་པར་འགྲོ་བའི་སླད་དུ་ཐབ་པར་དེ་གྱུར་ཏོ། 83

མི་སྐྱེས་བྱང་ཆུབ་གྲུབ་པ་དེ། མཐོང་ནས་ཡ་མཚན་ལྡན་པ་ཡི།
དགེ་སློང་གིས་དྲིས་བཙོམ་ལྡན་གྱིས། སྔོན་གྱི་སྤྱོད་པའི་མཐའ་རྣམས་གསུངས། 84

སྐྱེ་བའི་ཞིང་བརྒྱ་ལ་བདབ་པའི། ས་བོན་ལྟ་བུའི་ལས་རྣམས་ཀྱིས།
འབྲས་བུ་ཕུན་ཚོགས་སྐྱེ་བོ་རྣམས། འཚོལ་བ་མེད་པར་སྤྱོད་པར་གྱུར། 85

स दत्त्वा सर्व्वमर्थिभ्यः प्रययौ सुगताश्रमम् ।
श्रीशृङ्खलाकृष्टमतिः न हि सत्यसुखोन्मुखः ॥ ८० ॥

यदैव राजहंसेन स्मर्य्यते शुचि मानसम् ।
तदैवास्मै वसुमती सरसीव न रोचते ॥ ८१ ॥

याते दुःसहमोहधूममलिने भोगानुरागानले
सन्तोषामृतनिर्झरेण मनसि प्राप्ते शनैः शीतताम् ।
नैताः पानमदोत्तरङ्गविचलद्वाराङ्गनाभङ्गुर-
भ्रूभङ्गक्षणसङ्गमाः शमवतां कुर्व्वन्ति विघ्नं श्रियः ॥ ८२ ॥

सर्व्वज्ञशासनविनष्टभवाध्वकष्टः
प्रव्रज्यया विमलमेव पदं प्रविष्टः ।
संप्राप्य सर्व्वसमतामसमप्रकाशः
निर्लक्ष्यमोक्षगमनाय मुनिर्बभूव ॥ ८३ ॥

तां बोधिसिद्धिमालोक्य ज्योतिष्कस्य सविस्मयैः ।
भिक्षुभिर्भगवान् पृष्टः प्राग्वृत्तान्तमभाषत ॥ ८४ ॥

जन्मक्षेत्रशतोप्तानां वीजानामिव कर्म्मणाम् ।
भुज्यते फलसम्पत्तिरविसम्वादिनी जनैः ॥ ८५ ॥

རྒྱལ་པོ་གཉིན་དང་ལྡན་པ་ཡིས། གྲོང་ཁྱེར་གཉིན་ལྡན་དག་ཏུ་སྤྲོན།
ཁྲིམ་བདག་བསམ་པ་ཆེན་པོ་ནི། དཔལ་ལྡན་མ་བསྡམས་ཞེས་བྱ་བྱུང་། 86

དེ་ནས་སྟོན་པ་རྫོགས་སངས་རྒྱས། ནོར་གཟིགས་ཞེས་པ་གྲོང་ཁྱེར་དེར།
དེ་དག་ཉམས་ཀྱིས་ལེགས་བྱས་ཀྱིས། ནམ་ཞིག་ལྗོངས་ནི་རྒྱུ་ཞིང་གཤེགས། 87

དེ་ནི་དགེ་སློང་སྟོང་ཕྲག་དག། དྲུག་ཅུ་གཉིས་ཀྱིས་ཡོངས་བསྐོར་བར།
མ་བསྡམས་པ་ཡིས་དད་ནས་ཕྱིན། ཕྱག་འཚལ་ནས་ནི་མགྲོན་དུ་གཉེར། 88

དེ་ཡི་ཡོ་བྱད་ཐམས་ཅད་ཀྱིས། ཟླ་གསུམ་རིམ་གྲོ་བགྱིད་པ་ཉིད།
ཇི་ལྟ་དེ་ལྟར་རྒྱལ་པོས་ཀྱང་། ཕྱག་འཚལ་བས་ནི་མགྲོན་དུ་གཉེར། 89

གྲོང་པ་ལ་འོས་མ་བསྡམས་པས། ས་སྐྱོང་ལ་འོས་ས་བདག་གིས།
དེ་དག་འགྲན་པས་རྗེས་བསྐྱབས་པའི། ཡོངས་སྤྱོད་ཀྱིས་དེ་ལྷག་གནས་བྱས། 90

གླང་པོ་རྒྱལ་མཚན་ནོར་བུ་གདུགས། ངོ་ཡབ་རྒྱ་ཆེའི་དཔལ་འབྱོར་གྱིས།
རྒྱལ་པོས་མཆོད་པ་དེ་མཐོང་ནས། མ་བསྡམས་བསམ་པ་འཁྲུགས་པར་གྱུར། 91

སྙིང་སྟོབས་དཀར་བར་གྱུར་པ་དེའི། རྒྱལ་བ་མཆོད་ལ་སྟོང་གྲོགས་ནི།
ཕྱོགས་བདག་མཆོད་སྦྱིན་བགྱི་བ་ཡིས། ལྷ་ཡི་དཔལ་འབྱོར་ཉམས་ཀྱིས་བྱས། 92

དེ་ཡིས་ལྷ་ཡི་འབྱོར་པ་དེས། བཅོམ་ལྡན་འདས་ནི་མཆོད་གྱུར་པ།
གང་མདུན་འཁོར་ལོ་སྐྱུར་བའི་དཔལ། ངོ་ཚ་ཡིས་ནི་སྣོད་ཉིད་གྱུར། 93

राज्ञो बन्धुमतः पुर्य्यां बन्धुमत्यां महायशाः ।
अभूदनङ्गनो नाम श्रीमान् गृहपतिः पुरा ॥ ८६ ॥

शास्ताथ सम्यक् सम्बुद्धो विपश्यी नाम तां पुरीम् ।
जनचारिकया प्राप्तः कदाचित् सुकृतैः सताम् ॥ ८७ ॥

द्वाषष्टिभिः स भिक्षूणां सहस्रैः परिवारितः ।
अद्वयानङ्गनेनैत्य प्रणम्योपनिमन्त्रितः ॥ ८८ ॥

सर्व्वोपकरणैस्तेन त्रैमासं परिवारितः ।
यथा तथैव राज्ञापि प्रणिपत्य निमन्त्रितः ॥ ८९ ॥

भोगैः स्पर्द्धानुबन्धेन स ताभ्यामधिवासितः ।
अनङ्गनेन पौरार्हैर्भूपालार्हैश्च भूभुजा ॥ ९० ॥

गजध्वजमणिच्छत्रचामरोदारया श्रिया ।
तं दृष्ट्वा पूजितं राज्ञा चिन्तार्त्तोऽभूदनङ्गनः ॥ ९१ ॥

तस्य सत्त्वावदातस्य पक्षपाती शतक्रतुः ।
चकार दिव्यया लक्ष्म्या साहाय्यं जिनपूजने ॥ ९२ ॥

स तया दिव्यया भूत्या भगवन्तमपूजयत् ।
यदग्र चक्रवर्त्तिश्रीर्लज्जाभाजनतां ययौ ॥ ९३ ॥

ཉི་ཟླའི་འོད་ཟེར་ཉམས་བྱེད་རིན་ཅེན་ཚོམས་དང་ས་སྲུང་འོད་ལྡན་གླང་པོ་དང་།
དྲི་མེད་གོས་དང་སྤྲོས་འཕྲེང་ཁྲུས་དང་དཔག་བསམ་ཤིང་གི་འབྲས་བུ་ཚོམ་དག་གིས།
བདེ་སོགས་གསུམ་བདུད་རོལ་པས་གཡོ་ཞིང་དལ་བྱུས་ཅེ་ཡབ་དག་ནི་རབ་བསྐྱོད་པར།
དེ་ཡིས་བདེ་གཤེགས་མངོན་མཆོད་མཐོང་ནས་མི་ཡི་བདག་པོ་ངོ་ཚས་དམན་པར་གྱུར། 94

དེ་ལྟར་སྟོན་པ་ལ་གུས་དགེ་བ་ཡོངས་སྨིན་འབྲས་བུ་རང་མང་དག།
གང་ཞིག་བསོད་ནམས་ཀྱི་ཆེན་མ་བསྔམས་པས་སྟོན་ཡང་དག་ཐོབ་གྱུར་ཅིང་།
དྲི་མེད་ཡིད་ལྡན་དེ་ཡིས་སྐད་ཅིག་སྨོན་ལམ་ཉིད་ལས་དེ་ཉིད་ནི།
མཆོག་གི་ཉི་མ་བཞིན་དུ་དཔལ་འབྱོར་གྱི་གནས་མི་སྐྱེས་འདིར་གྱུར་ཏོ། 95

འགྲོ་གསུམ་དྲི་མེད་ཡེ་ཤེས་ཀྱིས། རབ་དུ་གསལ་མཛད་བཅོམ་ལྡན་འདས།
རྒྱལ་བས་དགེ་སློང་ཚོམས་ལ་ནི། སྨོན་ལམ་གདམས་ངག་དེ་སྐད་གསུངས། 96

ཞེས་པ་དགེ་བའི་དབང་པོས་ཞུས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མི་སྐྱེས་ཀྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དགུ་པའོ།།

रत्नैर्व्यक्तचन्द्रसूर्यभानराकं कौरगौरावणाभै-*
र्म्लानाम्बरगन्धमाल्यशवलैः कल्पद्रुमाणां फलैः ।
भक्तिप्रह्वशचीविलासचलनाहेलोच्छसच्चामरं
तेनाभ्यर्च्चितमाकलय्य सुगतं लज्जानतोऽभून्नृपः ॥ ९४ ॥

इति बहुतरं भक्त्या शास्तुः फलं तदनङ्गनः
शुभपरिणतेः पुण्योदारः पुरा समवाप्तवान् ।
विमलमनसस्तस्यैवासौ क्षणप्रणिधानतः
पर इव रविर्ज्योतिष्कोऽभूत् स एव पदाश्रितः ॥ ९५ ॥

इत्याह विमलज्ञानप्रकाशितजगत्त्रयः ।
प्रणिधानोपदेशाय भिक्षूणां भगवान् जिनः ॥ ९६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां ज्योतिष्कावदानं नाम नवमः पल्लवः ॥

---

* This line was lost. It was replaced by *H*dar Locháva.

Chapter X.

ཡལ་འདབ་བཅུ་པ།

མཛེས་དགའ་བོའི་རྟོགས་བརྗོད།

གང་ཞིག་མཆིས་གཤིན་བྱམས་པའི་བློ་ཡིས་དགེ་བའི་སྐད་དུ་ནི།
སྲིད་པའི་འཇིག་རྟེན་སྐྱེས་བུ་རྣམས་ཀྱིས་མཆོད་དུ་རྗེས་འཛིན་དག།
འབད་པས་མཛད་པ་དེ་དག་སེམས་ཅན་རྣམས་ལ་སྙིང་རྗེ་དང་།
རྗེས་སུ་བརྩེ་བས་ཉེ་བར་གནས་པའི་ལེགས་ལྡན་སུ་ཞིག་ལགས། 1

སེར་སྐྱའི་གཞི་ལ་ནྱ་གྲོ་དྷའི། ཀུན་དགའ་ར་བ་བཞུགས་བཅོམ་ལྡན་འདས།
བལྟ་ཕྱིར་ཤཱཀྱའི་རྒྱལ་པོའི་བུ། དགའ་བོ་སོང་བར་གྱུར་དེ་སྐྱོན། 2

ངེས་འབྱུང་གདམ་དང་གྲོས་དག་གིས། གདམ་མཐར་མདུན་ན་གནས་པ་ལ།
རབ་ཏུ་བྱུང་བ་མཛོད་ཅིག་ཅེས། བཅོམ་ལྡན་དགྱེས་པས་བཀའ་སྩལ་ཏོ། 3

དེ་ཡི་དྲིན་ལ་མངོན་དགའ་ནས། དགའ་བོས་དེ་ལ་ལན་གསོལ་པ།
བཅོམ་ལྡན་བསོད་ནམས་འཕྲོབ་མེད་ཀྱང་། རབ་བྱུང་བདག་ནི་མངོན་མི་འདོད། 4

ཁྱོད་ཀྱི་ཉེ་གནས་སུ་གྱུར་ནས། ཡོ་བྱད་ཅི་ལྟར་བཞེད་ཀུན་གྱིས།
རེ་ཞིག་དགེ་སློང་དགེ་འདུན་ལ། གུས་པས་བདག་ནི་རིམ་གྲོ་བགྱིའོ། 5

दशमः पल्लवः।

सुन्दरीनन्दावदानम्।

ते केऽपि सत्त्वहितसन्निहितानुकम्पा
भव्या भवन्ति भुवने भवभीतिभाजाम्।
वात्सल्यपेशलधियः कुशलाय पुंसाम्
कुर्व्वन्ति ये वरमनुग्रहमाग्रहेण॥ १॥

न्यग्रोधारामनिरतं द्रष्टुं कपिलवास्तुनि।
भगवन्तं ययौ नन्दः शाक्यराजसुतः पुरा॥ २॥

नैष्क्रम्यदेशनामन्त्रकथान्ते स पुरस्थितम्।
उवाच भगवान् प्रीत्या प्रव्रज्या गृह्यतामिति॥ ३॥

प्रसाद्याभिनिवेद्यास्य तं नन्दः प्रत्यभाषत।
भगवन् पुण्यलाभापि प्रव्रज्याभिमता न मे॥ ४॥

सर्व्वोपस्थायको भूत्वा भिक्षुसङ्घं यथेप्सितैः।
सर्व्वोपकरणैस्तावत् भैक्ष्यं परिचराम्यहम्॥ ५॥

འདི་བརྗོད་རིན་ཅེན་ཅོད་པན་གྱིས། དེ་ཡི་ཞབས་པད་ལ་རེག་ནས།
གྱོལ་པོའི་བུ་ནི་བཙུན་མོ་ལ། ཆགས་པས་རང་གི་ཁྱིམ་དུ་སོང་། 6

དེ་ནི་མཇེས་མ་ཡིད་འོང་མ། དགའ་ཞིང་མཇེས་དང་ཡང་དག་ལྡན།
ཡུད་ཙམ་འབྲལ་བར་མི་བཟོད་པས། སྐྱེ་ཚལ་མཆོག་ཏུ་ཉམ་པར་རོལ། 7

དེ་ནས་ནམ་ཞིག་རང་བཞིན་གྱིས། ཡོན་དན་ལྡན་དགྲེས་བཅོམ་ལྡན་འདས།
དགེ་སློང་ཚོགས་དང་བཅས་པ་དག། དགའ་བོའི་ཁྱིམ་དུ་རང་ཉིད་གཤེགས། 8

ཀུན་དགའི་བཞིན་ལྡན་དགའ་བོ་ཡིས། དེ་ཡི་ཞབས་ལ་ཕྱག་འཚལ་ཞིང་།
ཆེར་འོས་སྟན་ལ་བཞུགས་དེ་ལ། མཆོད་པ་བྱས་ནས་རིམ་གྲོ་བསྐྱེད། 9

གང་ཞིག་བཅོམ་ལྡན་རང་ཉིད་ཀྱིས། གཟིགས་པས་རྗེས་སུ་བཟུང་བྱས་པ།
འདི་འདྲ་བསོད་ནམས་སྨུ་གུ་ཉམས། གང་ཞིག་ཡོངས་སུ་སྨིན་པའི་འབྲས། 10

བདག་ཉིད་ཆེན་པོ་ཉམས་དྲན་ནས། ཐོས་པ་དང་ནི་མཐོང་གྱུར་པ།
འདི་དེ་དགེ་བའི་འཁྲི་ཤིང་གི། འབྲས་བུ་ཆེན་པོ་དག་གི་རྒྱུན། 11

ཁྱོད་ཀྱི་སྣང་བ་བྱམས་པ་ནི། ཆེན་པོར་གྱུར་པ་འདི་མཐོང་ནས།
སྙིང་གི་ཆུ་སྐྱེས་རྒྱས་པའི་དཔལ། སུ་ཞིག་གིས་ནི་མི་བསྐྱེད་འགྱུར། 12

བདག་ཉིད་ཆེ་ཉམས་མཐོང་བ་ནི། སྦྱིན་པ་བས་ཀྱང་ཤིན་ཏུ་དགའ།
བསོད་ནམས་པས་ཀྱང་འབྲས་བུ་ཆེ། སྤྱོད་བཟང་བས་ཀྱང་བསྔགས་པར་འོས། 13

इत्युक्त्वा रत्नमुकुटैः स्पृष्टतत्पादपङ्कजः ।
राजपुत्त्रः स्वभवनं ययौ जायासमुत्सुकः ॥ ६ ॥

स सुन्दरीं समासाद्य दयितां रतिसुन्दरीम् ।
विजहार वरोद्यानं मुहूर्त्तविरहासहः ॥ ७ ॥

ततः कदाचिद् भगवान् प्रकृत्यैव गुणिप्रियः ।
स्वयं नन्दस्य भवनं भिक्षुसङ्घैः सहाययौ ॥ ८ ॥

सानन्दवदनः कृत्वा नन्दस्तत्पादवन्दनाम् ।
तं महार्हासनासीनं पूजयित्वा व्यजिज्ञपत् ॥ ९ ॥

केषां पुण्यप्ररोहाणां परिपाकोऽयमीदृशः ।
कृतोऽयं यद् भगवता दर्शनानुग्रहः स्वयम् ॥ १० ।

स्मरणं श्रवणं वापि दर्शनं वा महात्मनाम् ।
सेयं कुशलवल्लीनां महती फलसन्ततिः ॥ ११ ॥

अस्य मैत्रस्य महतस्तदालोकस्य दर्शनात् ।
हृदयस्य विकाशश्रीः कस्य नाम न जायते ॥ १२ ॥

दानादपि प्रियतरं पुण्यादपि महाफलम् ।
सदाचारादपि श्लाघ्यं महतां किल दर्शनम् ॥ १३ ॥

དེ་སྐད་བརྗོད་དེའི་གུས་པ་དང་། མཛའ་ཞིང་བྱམས་པ་ཉིད་དག་དང་།
སྔོན་དུ་མཆོད་ལ་མངོན་དགྱེས་ནས། བཅོམ་ལྡན་འདས་ནི་གཤེགས་པར་བསྐོན། 14

དགའ་བོ་དེ་ཡི་རྗེས་འབྲང་བ། རང་གི་གསེར་གྱི་སྣོད་དུ་ནི།
མཆོག་གི་ཉེར་སྤྱོད་དངར་པོ་དག། རང་གི་བསམ་པ་བཞིན་དུ་བླངས། 15

བཅོམ་ལྡན་འདས་ཀྱི་རྗེས་བཞིན་དུ། གུས་པས་བདག་པོ་བགྲོད་མཐོང་ནས།
འབྲལ་བ་མི་བཟོད་མཛེས་མ་ཡིས། ཟུར་མིག་གིས་ནི་ངེས་པར་བལྟས། 16

ཟླ་མ་ཉམས་མདུན་མིག་གི་འགྲོས་ནི་དྲང་ཞིང་རབ་ཏུ་གཡོ་བ་དག།
ཡངས་པ་ཉིད་ཀྱིས་ཟུར་མིག་རབ་མཛེས་ཙུང་ཟད་བྱེ་བས་མཛེས་པའི་མཆོག།
བལྟ་བྱ་བལྟས་ནས་གང་ཞིག་སྐད་ཅིག་ཏུ་གྱུར་དེ་ཕྱིར་ལྷག་པར་ནི།
འགྲོ་བར་མི་བྱ་མགོན་པོ་ཞེས་ནི་ཐུབ་པ་ཚིག་མེད་གསུངས་པ་བཞིན། 17

མཛའ་མོ་ཤུགས་རིང་ལྡན་པ་ལ། དགའ་བོ་བཞིན་ནི་ཕྱིར་ཕྱོགས་ནས།
བདག་ནི་རིང་པོ་མི་ཐོགས་པར། འོང་པ་འདི་ཉིད་ཅེས་རབ་སྨྲས། 18

དེ་ནས་བཅོམ་ལྡན་རང་ཉིད་ཀྱི། གནས་སུ་བྱོན་ལ་ཐལ་སྦྱར་ནས།
རེ་ཞིག་རང་ཁྱིམ་མཆིའོ་ཞེས། འབྲལ་བ་བཟོད་པ་མེད་པས་སྨྲས། 19

དེ་ནས་ཁྲིར་བཞུགས་བཅོམ་ལྡན་གྱི། མདུན་དུ་རབ་ཏུ་བཏུད་དེ་ལ།
འཛུམ་དང་བཅས་གསུངས་ད་ལྟ་ཉིད། མྱུར་བར་འགྲོ་བ་འདི་ཅི་ཞིག། 20

इति तस्य ब्रुवाणस्य भक्तिप्रणयपेशलम् ।
अभिनन्द्य पुरः पूजां भगवान् गन्तुमुद्ययौ ॥ १४ ॥

अनुवव्राज तं नन्दः स्वच्छे कनकभाजने ।
वरोपचारमादाय मधुरं स्वमिवाशयम् ॥ १५ ॥

पश्चाद् व्रजन्तमालोक्य भक्त्या भगवतः पथि ।
निरैक्षत कटाक्षेण सुन्दरी विरहासहा ॥ १६ ॥

गुरूणामग्रे सा सरलतरलालोचनगतिम्
विहायैव चासाञ्चितमुकुलिताक्षी प्रियतमा ।
निरीक्ष्यालक्ष्यं यत् क्षणमवनताभूत्तदधिकम्
न गन्तव्यं नाथेत्यवददिव मौनादवचनम् ॥ १७ ॥

नन्दः प्रणयिणीं दृष्ट्वा सोच्छ्वासं चलितान‌नाम् ।
अयमागत एवाहमचिरादित्यभाषत ॥ १८ ॥

ततः स्वमाश्रमं प्राप्तं भगवन्तं कृताञ्जलिः ।
व्रजामि सम्प्रहन्तावदित्याह विरहासहः ॥ १९ ॥

ततस्तमासनासीनः प्रणतं भगवान् पुरः ।
उवाच सस्मितं केयं गमने सम्प्रति त्वरा ॥ २० ॥

ཡུལ་གྱི་རོ་ལ་གཙགས་པ་ཡི། ཀུན་སྨོངས་ཀྱིས་གཟིར་སེམས་ལྡན་རྣམས།
ཀྱེ་མ་ཁྲིམ་གྱི་བདེ་ཉིད་ལ། ཡིད་འབྱུང་ལས་ནི་ཕྱིར་ཕྱོགས་སློ། 21

ཚེ་ཡི་རྒྱན་ནི་ཡོན་ཏན་ཏེ། ཡོན་ཏན་རྒྱན་ནི་དབེན་པའོ།
འདི་ཡི་རྒྱན་ནི་རབ་ཞི་སྟེ། ཞི་བའི་རྒྱན་ནི་ཆགས་བྲལ་ལོ། 22

སྙིང་སྡུག་སེམས་ལ་བཀོད་པའི་བླུན་པོ་དེ་དང་བཟློད་དཀའི་ཟུང་ངུའི་དུས་བུ་སྟེ།
བློ་ལྡན་རྣམས་ཀྱིས་དེ་ནི་རྣམ་པར་དཔྱད་ཚེ་ཚེ་ནི་འབྲས་བྲལ་ཉིད་དུ་བརྩིས།
གང་ཡིད་ཕྱུགས་བཞིན་ཆགས་བྲལ་དབེན་པ་ཡིས་སྟོང་མཚན་ཉིད་མེད་པ་རྣམས་
དག་གིས།
སྐད་ཅིག་འདི་དག་འོང་དང་འགྲོ་བ་ཡང་ནི་འཁོར་ལོའི་སྦུ་ཁྲུད་གཡོ་བ་བཞིན། 23

སྙིང་སྟོབས་ལྡན་པའི་བསོད་ནམས་བློ་ལྡན་གྱིས་ཐོས་རིག་བྱེད་ལྡན་པའི་ཚུལ་
ཁྲིམས་དང་།
སྐལ་ལྡན་དག་གི་ཐམས་ཅད་ཞི་ལྡན་རྣམས་ཀྱི་བདེ་བ་འགྱུར་ཡང་རྟེད་དཀའི་མིན།
མཐའ་དག་དངོས་པོའི་རྟེན་གྱུར་ཚེ་ནི་ཤིན་ཏུ་ཆུང་བའི་ཆ་ཡང་རྟེད་དཀའ་སྟེ།
འབྲས་མེད་ཉིད་ཀྱིས་གང་གིས་ཟད་འགྱུར་སྐྱ་ངན་འདིས་པ་དེ་ལ་ཕྱག་འཚལ་ལོ། 24

ཡུལ་གྱི་ཆུ་གཏེར་གཡོན་མའི་སློང་འཁྲིལ་འཛེ་སྐྱེག་ཆུ་ཡིས་གང་གྱུར་པ།
དྲེགས་པ་མི་བཟད་ཆུ་སྲིན་རབ་ལངས་མཚན་མ་འཁྲུགས་པ་རབ་བསྐྱེད་ཅིང་།
ལྷག་པར་འཕྲལ་བའི་རྟ་གདོང་མེ་ནི་རབ་འབར་རྟག་ཏུ་གནས་པ་ལ།
སྐྱེས་བུ་རྣམས་ནི་སྒྲོལ་ལས་ཆགས་བྲལ་དྲག་པོ་ཁོ་ན་བརྟེམས་པའི་སྟེགས། 25

विषयास्वादसौहार्द-सम्मोहाहितचेतसाम्।
अहो गृहसुखेष्वेव निर्वेदविमुखा मतिः॥ २१॥

गुणाभरणमेवायुर्विवेकाभरणो गुणः।
प्रशमाभरणश्चासौ वैराग्याभरणः शमः॥ २२॥

तज्जाड्यं तदसह्यशल्यशलकं न्यस्तं सुहृच्चेतसि
प्राज्ञैस्तद्गणितं विचारसमयैर्वैफल्यमेवायुषः।
यद्वैराग्यविवेकशून्यमनसामेते पशूनां यथा
यान्त्यायान्ति च चक्रनेमिचलनैर्निर्लक्षणानां क्षणाः॥ २३॥

पुण्यं सत्त्ववतां श्रुतम्मतिमतां शीलञ्च विद्यावताम्
सर्व्वं भाग्यवतां सुखं शमवतां नैव क्वचित् दुर्लभम्।
दुष्प्रापस्तु समस्तवस्तुवसतेः स्वल्पांशकोऽप्यायुषः
तद्यस्य क्षयमेति निष्फलतया शोच्याय तस्मै नमः॥ २४॥

वामावर्त्ते विषयजलधौ पूर्णलावण्यसारे
दर्पोत्सर्पद्विषममकराङ्कोद्भवक्षोभमाणे।
नित्यासन्नप्रबलविरह-प्रज्वलद्दाड़वाग्नौ
पुंसां सेतुस्तरणशरणे तीव्रवैराग्यमेव॥ २५॥

དེ་སྐད་རབ་བྱུང་གཟུང་བར་མཛོད། ཀྱོལ་བོའི་སྨྲས་ནི་དབང་པོ་ཐུལ།
བྲིད་མེད་བདེ་དང་དཔལ་འབྱོར་འདི། ཀྱུར་དུ་ཡང་དག་འགྲོགས་པ་བཞིན། 26

དགེ་བ་ཉིད་སྐད་ཚངས་པ་ཡི། སྤྱོད་པ་ཡོངས་སུ་བཟུང་བར་མཛོད།
འཁོར་བ་སྙིང་པོ་མེད་པའི་ཁྱིམ། གདོན་ངན་འདི་ནི་གཏང་བར་མཛོད། 27

བཅོམ་ལྡན་གསུང་ནི་སྙིང་རྗེ་ཡིས། བཀྱོད་པ་འདི་སྐད་ཐོས་གྱུར་ནས།
དོན་གཉིས་མཆོད་འོས་ཀྱིས་གདམས་པའི། དགའ་བོས་དེ་ལ་ལན་གསོལ་བ། 28

དོག་དུ་ཁྱོད་ཉིད་བསྙེན་པ་ཉིད། བཅོམ་ལྡན་བདག་གི་རབ་བྱུང་ཡིན།
དགེ་སློང་དགེ་འདུན་རིམ་གྲོར་ནི། འོས་པའི་ཁྱིམ་ལ་མཆོག་དུ་གུས། 29

དེ་སྐད་སྨྲས་ནས་བཅོམ་ལྡན་གསུང་། བསྒོམ་བྱའི་དབང་ཕྱུག་མིན་པ་དང་།
དགའ་མ་ལ་དགས་དྲང་པས་འདིའི། བསམ་པ་ཁྱོགས་ལ་ཕྱུང་མོ་ཕྱུག། 30

ཡང་དང་ཡང་དུ་བཅོམ་ལྡན་གྱིས། འདི་ལ་བརྟུལ་ཞུགས་ཉེར་བསྟན་མཛད།
ཕན་པར་བརྩོན་པའི་དམ་པ་རྣམས། མི་འོས་པ་ཉིད་མ་བསམ་མོ། 31

དབང་པོ་མ་ཐུལ་དགའ་བ་ནི། གང་ཚེ་རབ་བྱུང་མི་འདོད་པ།
དེ་ཚེ་དེ་ཡིས་ལུས་ལ་དེ། བཅོམ་ལྡན་གསུང་གིས་རང་ཉིད་ལྷུང་། 32

དེར་ནི་དེ་ཚེ་དུར་སྐྲིག་གོས། མགོ་ཟླུམ་ལག་ན་ལྷུང་བཟེད་ཅན།
སྐྱེས་བུ་ཆེན་པོའི་མཚན་རྣམས་ཀྱིས། གསེར་གྱི་འོད་ཟེར་ལྟ་བུར་མཛེས། 33

तस्मात् गृहाण प्रव्रज्यां राजपुत्त्र जितेन्द्रियः।
एताः स्त्रिय इव क्षिप्रं समागमसुखाः श्रियः॥ २६॥

क्रियतां कुशलायैव ब्रह्मचर्य्यपरिग्रहः।
त्यज्यतामेष निःसारगृहसंसारदुर्ग्रहः॥ २७॥

इति श्रुत्वा भगवतः करुणाभरणं वचः।
प्रत्यभाषत तं नन्दः पूर्व्वप्रणययन्त्रितः॥ २८॥

सदा भवदुपायैव प्रव्रज्या भगवन् मम।
भिक्षुसङ्घोपकारार्थे गृह एवादरः परम्॥ २९॥

इत्युक्त्वा भगवद्वाक्यमतिक्रान्तुमनीश्वरः।
क्षिप्यमाणः प्रियाप्रेम्णा सोऽभूद्दोलाकुलाशयः॥ ३०॥

पुनः पुनश्चकारास्य भगवान् व्रतदेशनाम्।
उपकारोद्यताः सन्तश्चिन्तयन्ति न योग्यताम्॥ ३१॥

यदा नेच्छति नन्दस्तां प्रव्रज्यामजितेन्द्रियः।
तदास्य भगवद्वाक्यमपतद्वपुषि स्वयम्॥ ३२॥

नन्दः काषायावरणः पात्रपाणिः स तत्क्षणम्।
बभौ चामीकररुचिर्महापुरुषलक्षणैः॥ ३३॥

དགོན་པ་པ་དང་བསོད་སྙོམས་པར། གྱུལ་བའི་བཀའ་ཡིས་རེར་གྱུར་དོ།
ཁྲིམ་ལས་ཁྲིམ་ནི་མེད་ཉིད་དང་། ཕྲུག་དང་ཁྲོད་པ་ཉིད་དུ་གྱུར། 34

དེ་ནི་རབ་ཏུ་བྱུང་གྱུར་ཀྱང་། སྙིང་ལ་ཡང་དག་གཙགས་པ་ཡིས།
སྤོ་བསངས་དགའ་མ་རྟག་ཏུ་འཛིན། ཟླ་བའི་མཚན་མ་མཛེས་པ་བཞིན། 35

གང་ཡང་སེམས་ཀྱི་ཆགས་པ་དག། བཀྲུས་ཀྱང་འདག་པ་མིན་པ་གང་།
ལམ་ནི་གང་ནས་ལམ་དུ་ཞུགས། ཤེལ་གྱི་བཞིན་དུ་མི་ཤེས་སོ། 36

བྲལ་བས་སྐྱ་བོར་གྱུར་པའི་འོད། ཆོས་གོས་དམར་པོ་ཡང་དག་ཆགས།
དེ་ནི་ཐུན་འཚམས་སྨིན་དུས་ཀྱིས། མཚན་པའི་ཟླ་བའི་དཔལ་འཕྲོག་གྱུར། 37

ནགས་ན་རྒྱུ་ཞིང་རོལ་བྱེད་ལ། རིད་ཅིང་འཛིན་པ་བཟོད་པ་དེ།
ལུས་མེད་སྐྱེ་བའི་རིག་བྱེད་ཀྱིས། མཛེས་མ་དག་ནི་བརྗེད་མ་གྱུར། 38

རྗེ་བའི་གཞི་ལ་བསྟད་ནས་ནི། ཡོངས་རྫོགས་ཟླ་བའི་བཞིན་རས་ཀྱི།
བཞིན་ལ་བསམ་གཏན་གཡོ་མེད་ཀྱི། ཡུན་རིང་དག་ཏུ་དེ་དེ་བསམས། 39

ཀྱེ་མ་བཅོམ་ལྡན་འདས་ཀྱིས་ནི། འབད་པས་རྗེས་བཟླང་འདི་དག་ཀྱང་།
ཆགས་པས་བྱིན་བརླབས་བདག་གི་སེམས། དྲི་མ་དང་བྲལ་ཉིད་མི་འགྱུར། 40

འཁོར་བའི་སྤྱོད་ཚུལ་ཐོས་གྱུར་ཅིང་། གྲོགས་མེད་བརྟུལ་ཞུགས་བསྟེན་མོད་ཀྱང་།
རི་དགས་གཞོན་ནུའི་མིག་ཅན་མ། བདག་གི་ཡིད་ལ་བརྗེད་པ་མེད། 41

स शासनाज्जिनस्याभूदारण्यपिण्डपातिकः।
आकारादनगर्य्यतां प्रयातः पांशुकूलिकः॥ ३४॥

प्रियामुवाह सततं श्यामां प्रव्रजितोऽपि सः।
शशाङ्क इव संव्यक्तां हृदये लाञ्छनच्छविम्॥ ३५॥

मनसः स्फटिकस्येव न विद्मः केन वर्त्मना।
रागः कोऽपि विशत्यन्तर्नापैति क्षालितोऽपि यः॥ ३६॥

विरहापाण्डुररुचिः संसक्तारुणचीवरः।
स संन्ध्याभ्रकलङ्कस्य जहार शशिनः श्रियम्॥ ३७॥

विचरन् विरहाक्षमः स विस्मृतधृतिर्वने।
जन्मविद्यामनङ्गस्य न विसस्मार सुन्दरीम्॥ ३८॥

सम्पूर्णचन्द्रवदनावदनध्याननिश्चलः।
अचिन्तयच्चिरं तत्तदुपविश्य शिलातले॥ ३९॥

अहो भगवताप्येष कृतो यत्नादनुग्रहः।
नायाति मम वैमल्यं रागाधिष्ठितचेतसः॥ ४०॥

श्रुतं संसारचरितं निःसङ्गव्रतमास्थितम्।
तथापि मृगशावाक्षीं न विस्मरति मे मनः॥ ४१॥

མཛེས་མའི་གུར་གུམ་གྱིས་རེག་ཆགས་པའི་སྐལ་བཟང་ལུས་ལ་ནོམ་སྦྱར་ལེགས་པར་དགོས།
དེ་ཡི་ནུ་གྲུས་དཀྱིལ་འཁོར་རབ་ཏུ་ཉིད་པའི་ལག་པས་ལྷུང་བཟེད་ལེགས་པར་བཟུང་།
གང་ཞིག་བྱང་ཆུབ་གཤེགས་སུ་གྱུར་པ་དེ་ཡི་དམིགས་པའི་ཉིན་མཚན་བསམ་གཏན་ཅན།
བདག་གི་ཆགས་པ་དག་ནི་གལ་ཏེ་འཕེལ་ན་མཆོག་ཏུ་རིགས་པ་ཉིད་དུ་འཕེལ། 42

མཛེས་མ་སྐད་ཅིག་གིས་ནི་བ་དག་འོང་ཞེས།
སྨོན་ནི་དེ་ལ་དེ་ལྟར་འོང་བར་བཟོད།
ཀྱེ་མ་ཐྲད་པའི་བགེགས་གྱུར་བརྟུལ་ཞུགས་འདི།
བྱས་པ་མི་བཟོ་བདག་གིས་ཕྱིན་ས་བླངས། 43

གང་དེའི་རབ་ཏུ་འདར་ཞིང་གཡོ་བའི་ཚིག་གིས་འགྲོ་བར་མི་བྱ་ཞེས་སྨྲས་ཤིང་།
བླ་མའི་སྐྱེ་བོ་གནས་ཚོགས་ཞིག་ལྷུང་ཡབ་དོར་ཏེ་ཐུབ་ནས་ཀྱང་བཟུང་།
གང་ཞིག་ཀོང་པས་ས་ལ་འབྲི་ཞིང་མཐོང་བ་མིན་ཡང་བདག་ལ་རྒྱུར་མིག་མཆོན།
དགག་པ་མཆོག་ཏུ་མཛེས་པའི་རིམ་པ་དེ་ཡིས་བདག་གི་ཡིད་ནི་དེ་ཡིས་བསྡམས། 44

བདག་བྲལ་རི་དགས་མིག་ཅན་དེ། འཇུག་ངོགས་ངུར་པ་མོ་བཞིན་དུ།
བ་གམ་ཅན་ན་སྦྲུ་ངན་དག། སྒྲོག་ཅིང་མི་ཉལ་ཡོད་དམ་སྙམ། 45

कान्ताकुङ्कुमलग्नरागसुभगे गात्रे कृतं चीवरं
तत्पीनस्तनमण्डलप्रणयिना पात्रं धृतं पाणिना।
रागोऽयं मम वर्द्धतेऽस्य यदिवान्यस्येव वृद्धिः परम्
यद्बोधिव्यवधानभूतमनिशं ध्यानं तदालम्बनम्॥ ४२॥

क्षणेन मां प्राप्तमवेहि मुग्धे
तामेवमुक्त्वा गमने पुरस्तात्।
अहो मया दर्शनविघ्नभूतम्
पश्चात् कृतघ्नव्रतमेतदात्तम्॥ ४३॥

नो गन्तव्यमिति प्रकम्पतरला वाक्यं यदूचे न सा
सन्त्यज्य व्यजनं स्थिते गुरुजने जग्राह पाण्यञ्चलम्।
यत्पादेन लिखन्त्यपि क्षितितलं मामैक्षतालक्षिता
तेनात्यन्तनिषेधमुग्धविधिना बद्धन्तया मे मनः॥ ४४॥

मद्वियुक्ता न सा नूनं शेते शोकप्रलापिनी।
पुलिने चक्रवाकीव हर्म्ये हरिणलोचना॥ ४५॥

ཀྱི་ཧུད་དགའ་མ་གཡོ་ཅན་གྱིས། འབའ་ཞིག་པ་བཞིན་བདེན་པ་བཏང་།
ཁྱོད་ཀྱི་སེམས་ཀྱི་ཆོས་ཀུན་ངས། རྫོན་གྱི་བརྡུལ་ཞུགས་འདི་ལ་བརྟེན། 46

རེ་ཞིག་བརྡུལ་ཞུགས་འདི་བཏང་ནས། མཛེས་མའི་གན་དུ་འགྲོ་བར་བྱ།
གང་ཕྱིར་ཆགས་པའི་མིས་གདུངས་པའི། དཀའ་ཐུབ་གདུང་བ་བཟོད་པར་དཀའ། 47

སྡིག་ཅན་ཡུན་རིང་ནས་འོངས་པ། བདག་མཐོང་གྱོལ་བོའི་བུ་མོ་དེ།
གསར་དུ་སྐྱེས་པའི་ཁྲོ་བ་ཡིས། ཅི་བྱེད་པར་འགྱུར་ཡོངས་མི་ཤེས། 48

མཛའ་ལ་ཆགས་པའི་རྡུལ་གྱི་ཆ། གཉོད་ཅིང་དགའ་མེད་བཟོད་དགའ་བ།
ངེས་པར་ཟློག་པ་དཀའ་བ་ཉིད། ཀུན་དུ་ནོམ་འགྱུར་ཉིད་ཀྱིས་བསྣད། 49

གང་གི་དུས་ན་བཅོམ་ལྡན་གྱིས། ནགས་འདི་བཏང་བར་མཐོང་གྱུར་པ།
དེ་ཚེ་ཁོ་ན་བདག་ཁྲིམ་དུ། འགྲོ་བར་བྱ་ཞེས་འདི་ངེས་སོ། 50

ད་ནི་དགའ་བའི་དམིགས་རྟེན་དུ། རྗེ་ཡི་གླིགས་བུ་འདི་ཉིད་ལ།
རི་ཡི་ཁམས་ནི་ཡིད་འོང་གི། ཟླ་བཞིན་མ་དེ་བདག་གིས་བྲིས། 51

ཡང་ན་གང་གིས་མཛེས་སྡུག་ཐིགས། བདུད་རྩིའི་ཨུ་ཏྤལ་ཟླ་བ་འདྲ།
མཛེས་མ་དེ་ནི་རི་མོ་ཡི། ཡུལ་དུ་ཇི་ལྟར་འགྲོ་བར་འགྱུར། 52

ཡིད་འཕྲོག་རི་དགས་མིག་ནི་བུང་བ་གཡོ་བས་ཁྱབ་པའི་ཨུ་ཏྤལ་འཁྱིལ་བ་བཞིན།
འཛེ་སྤྲིས་ཆུ་གཏེར་འགྲམ་དུ་བྱུ་རུའི་ནགས་ལྟར་མཆུ་ནི་བིམ་པའི་འོད་རབ་གསལ།
གང་ཡང་ཁ་ཡི་འོད་དེ་སྐྱོན་མེད་བདུད་རྩིའི་ཟེར་གྱི་དོན་མཐུན་དག་གི་ལམ།
མཛེས་མ་ལུས་ནི་ངོ་མཚར་སྙིང་པོ་རི་མོའི་ལམ་དུ་ཇི་ལྟར་འགྲོ་བར་འགྱུར། 53

हा प्रिये त्यक्तसत्येन कितवेनेव केवलम् ।
श्रितं तच्चित्तचौरेण मिथ्याव्रतमिदं मया ॥ ४६ ॥

त्यक्त्वा व्रतमिदं तावद् गच्छामि दयितान्तिकम् ।
अनुरागाग्नितप्तानां तपस्तापो हि दुःसहः ॥ ४७ ॥

राजपुत्री चिरायातं नृशंसमवलोक्य मां ।
मन्युना नवलग्नेन न जाने किं करिष्यति ॥ ४८ ॥

न सर्व्वत्र विकाराय निकारः प्रेमदुःसहः ।
दुर्निवारो भवत्येव स्नेहलीनो रजःकणः ॥ ४९ ॥

यस्मिन् क्षणे भगवता पश्यामि रहितं वनम् ।
मया तदैव गन्तव्यं गृहमित्येष निश्चयः ॥ ५० ॥

अस्मिन्नेव शिलापट्टे रुचिरैर्गिरिधातुभिः ।
लिखामि तां शशिमुखीं सम्प्राप्यालम्बनं धृतेः ॥ ५१ ॥

अथवा कथमालेख्यविषयं याति सा प्रिया ।
सौन्दर्य्यबिन्दवो यस्याः सुधाकुवलयेन्दवः ॥ ५२ ॥

दृष्टिर्मुग्धकुरङ्गसञ्चलदलिव्याप्तोत्पलोद्वर्त्तिनी-
लावण्योदधिकूलविद्रुमवनं बिम्बाधराग्रत्विषः ।
निर्द्दोषामृतरश्मिसार्थशरणिः सा कापि वक्त्रद्युतिः
सौन्दर्य्यं कथमेति चित्रपदवीमाश्चर्य्यसारं वपुः ॥ ५३ ॥

42

འདི་བསམས་དེ་ཡིས་རྗེ་གཞི་ལ། མཆི་མས་བཀྲུས་ཤིང་འདར་བ་ཡིས།
འཁྲུགས་པའི་སོར་མོས་ཐེ་ལྷུར་ཡང་། མཛེས་མ་དག་ནི་དལ་བུས་བྲིས། 54

དེ་ཡིས་རྟོག་པས་གསལ་བྱས་པའི། གཟུགས་བརྙན་ལྷ་བུ་ལ་བརྟེན་པར།
སྔོན་དུ་བྱས་ནས་མཛེས་མ་ལ། མཆི་མས་འཛེར་འཛེར་སྐད་དུ་སྨྲས། 55

མིག་གཉིས་མ་ལུས་བདེ་བའི་ཚད་ཀྱུན་སྔོན་ཀའི་ཟླ་བའི་བཞིན་རས་ཅན།
མཛེས་མ་བདག་གིས་བྲིས་དེ་མིག་ཆུས་ཀྱིས་པས་སྐད་ཅིག་ཀྱང་མ་མཐོང་།
གཟུར་ཅན་མ་དང་བྲལ་ལ་ལྟོས་མེད་བརྟུལ་ཞུགས་ལྡན་པ་བདག་ལ་ནི།
སྡིག་ལས་ཅི་ཡང་གདུང་བ་རབ་བསྐྱེད་དམོད་པ་ཟུག་པ་མ་ཡིན་ནམ། 56

ཀྱིས་པའི་ཆུ་སྐྱེས་ནགས་ཀྱི་འོད་འདྲ་དགའ་བའི་མི་གིས་རྫེས་ཚར་པའི་ལུས།
དེ་ཡི་དུས་ན་ཉེ་བར་གྱུར་པའི་བར་ཆད་ཀྱིས་བསྐུན་ཁྲོ་བ་ཡང་དག་མཐོང་།
ཀྭ་ཡེ་མཛེས་མ་བདག་ལ་ཚིག་ལན་བྱིན་ཅིག་མི་སྨྲ་བར་ནི་ཅི་ལ་འདུག།
བདེན་པར་བདག་ཀྱང་ཁྲོད་ལ་ཆགས་པའི་ཆོས་གོས་འདི་བཙཾ་བརྟུལ་ཞུར་བརྟུལ་
བཞུར་སོ། 57

དེ་སྐད་སྨྲ་ཞིང་བུ་མེད་དག། བྲིས་པ་རིང་ནས་མཐོང་གྱུར་ནས།
ཁྲོ་ལྡན་དགེ་སློང་ཉམས་ཀྱིས་ནི། བཅོམ་ལྡན་འདས་ལ་མངོན་ཕྱོགས་སྨྲས། 58

བཅོམ་ལྡན་ཁྱེད་ཀྱིས་མ་དུལ་ལ། མཉེས་གཤིན་འབབ་ཞིག་པ་ཉིད་ལས།
རབ་ཏུ་བྱུང་བ་འདི་བྱིན་ཏེ། ཁྲི་ལ་མི་རྟོག་འཕྲེང་བ་བཞིན། 59

इति सञ्चिन्त्य स शनैरालिलेख शिलातले।
सुन्दरीं मुखमुक्ताश्रु-लातकम्पाकुलाङ्गुलिः ॥ ५४ ॥

स सङ्कल्पसमुत्तीर्णां प्रतिबिम्बमिवाश्रिताम्।
कृत्वा पुरः प्रियतमामूचेऽदर्वाष्पगद्गदः ॥ ५५ ॥

प्रियामालिख्याहं निखिलसुखदृष्टिं नयनयोः
न पश्याम्युद्वाष्पः क्षणमपि शरच्चन्द्रवदनाम्।
अयं नूनं तन्वीविरहनिरपेक्षव्रतवतः
स्फुरत्तापः शापः किमपि मम पापादुपनतः ॥ ५६ ॥

फुल्लाम्भोजवनत्विषा [1]स्पृहावशासक्ताश्रुतोयं वपु-
स्तत्कालोपगतान्तरायजनितः कोपः समुत्सृज्यताम्।
हंहो सुन्दरि देहि मे प्रतिवचः किं मौनमालम्बसे
सत्यं त्वन्मयरागचीवरमिदं चित्तव्रतं मे व्रतम् ॥ ५७ ॥

इति ब्रुवाणं तं दृष्ट्वा दूरादालिखितञ्च तत्।
सासूया भिक्षवोऽभ्येत्य भगवन्तं बभाषिरे ॥ ५८ ॥

भगवन् दुर्विनीतस्य वात्सल्यादेव केवलम्।
शुनः कुसुममालेव प्रव्रज्येयं त्वयार्पिता ॥ ५९ ॥

---

१ Orig. स्पृहादशासक्ताद्रुलायं वपुः।

མཛེས་མ་བྲིས་ནས་དགའ་བོ་ནི། །ཇོ་བའི་གཞི་ལ་དལ་བུ་ཡིས།
དེ་བརྗོད་བརླམས་པ་ལ་ཆགས་ཞིང་། བསམ་གཏན་ལ་ནི་དམིགས་པར་འགྱུར། 60

དེ་དག་ཐོས་ནས་བཅོམ་ལྡན་གྱིས། དགའ་མ་བྲལ་བའི་སྨོངས་གྱུར་པའི།
དགའ་བོ་ནགས་ནས་བོས་ནས་ནི། འདི་དག་ཅི་ཞེས་རབ་ཏུ་བྲིས། 61

དེ་སྐུས་བཅོམ་ལྡན་བདེན་པར་ནི། མཆོག་ཏུ་མཛེས་མ་ལ་ཆགས་བདག།
དགེ་སློང་རྣམས་ནི་འདོད་གྱུར་ཀྱང་། ནགས་ཚལ་འདི་ལ་བློ་མི་དགའ། 62

དེ་སྐད་དགའ་བོའི་ཚིག་ཐོས་ནས། ཞལ་གྱི་ཟླ་བའི་འོད་ཟེར་གྱིས།
འདོད་ཆགས་རྩ་སྐྱེས་འཇོམས་པ་བཞིན། བཅོམ་ལྡན་གྱིལ་བས་དེ་ལ་གསུངས། 63

ཀུན་ཏུ་ཆགས་ལས་མི་རིགས་བློ། དམ་པ་ཁྲོད་ཀྱི་རིགས་མ་ཡིན།
དགེ་ལ་མངོན་པར་དགའ་རྣམས་ཀྱིས། སེམས་ནི་བགེགས་རྣམས་ཀྱིས་མི་ཁྲུགས། 64

ལོངས་སྤྱོད་ཙྭ་ཡི་གཟེགས་མ་དང་མཚུངས་བདང་ལ་མངོན་སྤྱོར་རེ་ཊ་པ་འདི་ནི་གང་།
སྐད་ཅིག་བདེ་བའི་ཆ་ཡི་རོ་སྤྱོང་ཚོགས་དང་འགྲོགས་པ་སྨད་འོས་འདི་ནི་གང་།
ཆགས་བས་ལོང་བ་རྣམས་ནི་གང་དུ་འཕྲལ་ལ་ལྷུང་བྱེད་བཟོད་དཀའ་གྱུར་པ་ཡི།
བསྐྱལ་དཀའ་བདུད་ཀྱི་ལམ་འདི་རིགས་ཉིད་ཀྱིས་ནི་དགེ་བ་འཕྲོག་པར་བྱེད་པ་ཡིན། 65

དེ་སྐད་དེ་ལ་ཆགས་བྲལ་དག། ཡུན་རིང་བསྟན་པར་མཛད་ནས་ནི།
འདུག་བུ་ཞེས་བརྗོད་བཅོམ་ལྡན་རང་། རང་གི་བུ་བའི་སྐད་དུ་གཤེགས། 66

आलिख्य सुन्दरीमुखं नन्दः स्वैरं शिलातले।
तत्प्रलापजपासक्तो ध्यानालम्बनतां गतः॥ ६० ॥

एतदाकर्ण्य भगवान् नन्दमाहूय काननात्।
किमेतदिति पप्रच्छ प्रियाविरहमोहितम्॥ ६१ ॥

सोऽब्रवीद् भगवन् सत्यं कान्तासक्तस्य मे परम्।
भिक्षूणां सम्मतेऽप्यस्मिन् वने न रमते मतिः॥ ६२ ॥

इति नन्दवचः श्रुत्वा तमूचे भगवान् जिनः।
मीलयन्नेव वक्त्रेन्दुकान्त्या रागसरोरुहम्॥ ६३ ॥

साधो तावन्न युक्ता ते संरागानुगता मतिः[१]।
विघ्नैर्नाकृष्यते चेतः कल्याणाभिनिवेशिनाम्॥ ६४ ॥

क्वायं योगस्तनुतृणतुलात्यक्तभोगाभियोगः
क्वायं निन्द्यः क्षणसुखलवास्वादसम्वाद एषः।
जात्यैवायं हरति कुशलं दुस्तरो मारमार्गः
प्रेमान्धानां भवति सहसा दुःसहो योऽन्तजातः॥ ६५ ॥

इत्यस्य भगवान् कृत्वा चिरं वैराग्यदेशनाम्।
संस्थातव्यमिहेत्युक्त्वा स्वकृत्याय स्वयं ययौ॥ ६६ ॥

---

१ Orig. साधो भवनयुक्तो संरागादनुचितामतिः।

མཛེས་མ་ལྷ་ལ་ཆགས་པ་ཡི། དགའ་ལྡན་དགའ་བོའི་གནས་སྐབས་དེར།
འགྲོ་བར་འོས་པར་བསམས་ནས་ནི། རང་གི་ཁྱིམ་དུ་ཆས་པར་གྱུར། 67

གཙུག་ལག་ཁང་ནི་མང་པོ་ཡི། སྒོ་རྣམས་བཅད་པས་ཡུན་རིང་ན།
གྲོང་ཁྱེར་མངོན་ཕྱོགས་ལམ་དག་ནི། ཇི་ཞིག་ལྟར་སྟེས་ཐོབ་ནས་འགྲོ། 68

དེ་ནས་ཆགས་ལས་འགྲོ་བརྩོན་དེ། ཐམས་ཅད་མཁྱེན་པ་བཅོམ་ལྡན་གྱིས།
མཁྱེན་ནས་མངོན་ཕྱོགས་བཀའ་སྩལ་པ། དགའ་བོ་མགྱོགས་པར་གང་དུ་འགྲོ། 69

དེ་ནས་བཅོམ་ལྡན་རེ་ཞིག་ནི། ནགས་ནི་བདག་ལ་དགའ་བ་མེད།
སེམས་ནི་ངལ་བསོས་མིན་ནམས་ཀྱིས། བྱ་བ་གང་ཡང་དག་པ་མིན། 70

དཔལ་ནི་ཛཱ་ཡབ་བཞད་ལྡན་དེ་དང་ནོར་བུའི་རང་བཞིན་དགའ་བའི་བ་གཱ་
འཕྲེང་ལྡན་དེ།
ཨ་སྨྲའི་འཁྲི་ཤིང་རླུང་བཞོན་གྱིས་བསྒྱོད་སྐྱེད་ཚལ་གསར་པའི་ས་གཞི
མཛེས་པ་དེ་དང་ནི།
མེ་ཏོག་མདའ་ཅན་གཞུ་ཡི་འཁྲི་ཤིང་གཟུགས་བཟང་ལྟོ་བ་ཕྲ་བའི་མཛེས
མ་དེ་དག་ལྷ།
སྐྱེ་བ་གཞན་གྱི་བག་ཆགས་བཞིན་དུ་བདག་གི་ཡིད་ནི་ཆགས་ལས་ནམ
པར་མི་གྲོལ་ལོ། 71

ཡིད་ནི་ཆགས་བཅས་ཁོ་ན་ཡིས། ཚངས་པར་སྤྱོད་པ་བདག་གིས་སྤྱད།
བརྟུལ་ཞུགས་འཆིང་བའི་གཟེབ་དག་གིས། མཁའ་ལ་འགྲོ་བ་བསྡམས་པ་བཞིན། 72

तमेवावसरं नन्दः सञ्चिन्त्य गमनोचितम् ।
प्रतस्थे स्वगृहं हृष्टः सुन्दरीदर्शनोत्सुकः ॥ ६७ ॥

व्रजन् द्वारि पिधानास्तैर्विहारैर्बहुभिश्चिरात् ।
नगराभिमुखं मार्गं स कथञ्चिदवाप्तवान् ॥ ६८ ॥

अथ विज्ञाय सर्व्वज्ञस्तं रागाद् गन्तुमुद्यतम् ।
उवाचाभ्येत्य भगवान् नन्द तूर्णं क्व गम्यते ॥ ६९ ॥

स जगाद वने तावत् भगवन् नास्ति मे रतिः ।
न ह्यविश्रान्तचित्तानां क्रिया काचित् प्रसीदति ॥ ७० ॥

सा श्रीश्चामरहासिनी मणिमयी सा रम्यहर्म्यावली
सा बालानिललोलचारुलतिका कान्ता नवोद्यानभूः ।
सा तन्वी कुसुमेषुकार्म्मुकलताश्यामोदरी सुन्दरी
नो जन्मान्तरवासना इव मनः सक्तं विमुञ्चन्ति मे ॥ ७१ ॥

सरागेणैव मनसा ब्रह्मचर्य्यं चराम्यहम् ।
व्रतपञ्जरबन्धेन विहङ्ग इव यन्त्रितः ॥ ७२ ॥

གོས་ནི་ཚོན་གྱིས་དམར་བ་ཡིས། འདོད་ཆགས་བྲལ་བ་ཉིད་མི་འགྱུར།
རབ་བྱུང་བཏང་ནས་བདག་འགྲོའོ། བདག་གི་དམྱལ་བ་ཟད་གྱུར་ཅིག། 73

དེ་སྐད་ལན་གཅིག་མིན་སྨྲ་ཞིང་། རང་གནས་འགྲོ་བར་བརྩོན་དེ་ལ།
ལྷོག་ཅིང་རྗེས་བཟུང་བློ་གྲོས་ཀྱིས། བཅོམ་ལྡན་གྲོལ་བས་བཀའ་སྩལ་པ། 74

ཞེས་ལྡན་སྐྱེ་བོ་ཉིད་སྟེན་ལ། སོ་སོའི་སྐྱེ་བོར་མི་འགྱུར་བཞིན།
དགའ་བ་ཐོས་པས་ཉམ་པར་གྲུགས། སྐད་ཅིང་བསྐྱད་པ་མ་ཕྱེད་ཅིག། 75

ཉམ་པར་རིག་པས་སྐྱོན་བཞིག་ཅིང་། ཚུལ་ཁྲིམས་ལྡན་པ་མཁས་རྣམས་བློ།
སྙིང་པོ་མེད་པའི་བདེ་བ་ལ། ཆགས་པས་བྲ་མིན་ལ་མི་འཇུག། 76

མཆོག་དུ་སྨད་པའི་ཁང་པར་ནི། ངན་པའི་ལས་ལ་ཀུན་དུ་ཆགས།
གྱུ་ཆེན་འདོད་ཆགས་འཛིན་པ་ཁྲིད། ངོ་ཚ་སྐྱེ་བ་མིན་པ་ཅི། 77

སྐྱེ་གནས་ལས་སྐྱེས་སྐྱེ་གནས་ཆགས། ནུམ་འཐུངས་པ་ནུམ་ཉིད།
ཀྱེ་མ་ངོ་ཚ་མི་བྱེད་པ། སྐྱེ་བ་ཉིད་ལ་བརླག་པར་འགྱུར། 78

རྟག་དུ་དམས་པའི་སྐྱེ་བོ་སྤྲངས། མ་ཡི་སྒྲོམ་ལ་ཆགས་གྱུར་པ།
སེམས་ནི་ཀུན་རྨོངས་ཀྱིས་བཅོམ་པའི། ཕྱུགས་རྣམས་ཉིད་ལ་མཐོང་བ་ཡིན། 79

བྱད་མེད་སྐྱེས་པའི་ང་རྒྱལ་འདི། ཁྲིད་ཀྱིས་དགའ་དང་བྲལ་ནས་ཐོང་།
སྲིད་པའི་ཁང་བུར་ལག་འགྲོ་རྣམས། ལོངས་སྤྱོད་དང་བཅས་འཇིག་པ་ཐོང་། 80

त्यक्त्वा व्रजामि प्रव्रज्यामस्तु मे नरकोऽक्षयः ।
न वीतरागतामेति मञ्जिष्ठारक्तमंशुकम्[1] ॥ ७३ ॥

इति ब्रुवाणमसकृत् स्वपदं गन्तुमुद्यतम् ।
निवार्य्यानुग्रहधिया तमूचे भगवान् जिनः ॥ ७४ ॥

मा कृथा विप्लवं नन्द निन्दितं हि श्रुताश्रुतम् ।
विद्वज्जनोपदिष्टेन[2] यथायाति पृथक्जनः ॥ ७५ ॥

विवेकव्यस्तदोषाणां विदुषां शीलशालिनाम् ।
निःसारसुखलाभेन नाकार्य्ये धीः प्रवर्त्तते ॥ ७६ ॥

गाढ़रागगृहीतस्य जुगुप्सायतने परम् ।
जघन्यकर्म्मण्यासक्तिः किं लज्जाजनने न ते ॥ ७७ ॥

योनिजयोनिसंसक्ताः स्तनपस्तनमर्द्दिनः ।
अहो वत न लज्जन्ते जन्मन्येव लयं गताः ॥ ७८ ॥

सदा सज्जनवर्ज्जिता जननीजघनासक्तिः ।
सम्मोहाहतचित्तानां पशूनामेव दृश्यते ॥ ७९ ॥

रामारमणमानोऽयं विरम्य त्यज्यतां त्वया ।
भोगैः सह भुजङ्गानां दृष्टो मन्त्रविदे क्षयः ॥ ८० ॥

१ Orig. अंशुकः । २ Orig. तुष्टेन ।

སྒྲོམ་ལས་སྐྱེས་པའི་དགའ་བ་དག། སྲུ་ཡི་ཡིད་འབྱུང་སྐྱེད་མི་བསྐྱེད།
གང་གི་མཇུག་ཏུ་ཁྲི་ཉོམས་ཀྱང་། ངེས་པར་ཁ་ནི་ཕྱིར་ཕྱོགས་འགྱུར། 81

ཁྱིམ་གྱི་རྒྱ་ལས་ནམ་གྲོལ་ཁྱོད། དེ་ཉིད་དུ་མངོན་རྒྱུག་པ་ཅི།
གང་ཕྱིར་རི་དགས་ཐར་གྱུར་པ། སླར་ཡང་གྱུར་ནི་འཛུག་པ་མིན། 82

དེ་སྐད་བཅོམ་ལྡན་གྱིས་གསུངས་པའི། བཀའ་ཡིས་ངེས་པར་གདམས་པ་ཡི།
དགའ་བོ་མཛེས་མ་སེམས་བྱེད་ཅིང་། སླར་ཡང་གནས་སུ་རབ་ཏུ་ཞུགས། 83

དེ་ནས་ནམ་ཞིག་དགའ་བོ་ལ། གནས་ཁང་ཕྱུག་དར་བསྐོས་ནས་ནི།
ལོངས་པའི་རྗེས་འཛིན་ལ་བརྩོན་པའི། བཅོམ་ལྡན་སླར་ཡང་རབ་ཏུ་གཤེགས། 84

དེ་ཡི་བཀའ་ཡིས་གནས་ཁང་དག། སྤྱོད་ལ་རབ་ཞུགས་དགའ་བོ་ཡིས།
བསམས་པ་ལས་ནི་འདོད་ཆགས་བཞིན། ས་ལས་ཏུལ་ཉམས་ཡོངས་མ་སོང་། 85

ཡོངས་སུ་སྤྱོད་པའི་ཆུ་དག་ནི། ལེན་དུ་སོང་བར་གྱུར་པ་དེའི།
ཡང་ཡང་བཀང་ཞིང་རབ་བླངས་ཆེ། བུམ་པ་སྟོང་པ་ཉིད་དུ་གྱུར། 86

བགེགས་ནི་དེ་ཡིས་ཡིད་དག་ནི། ཤིན་ཏུ་སྐྱོ་ནས་འགྲོ་བའི་སླད།
མཛེས་མ་བལྟ་བར་འདོད་པ་འདི། དགའ་བོས་བདང་ནས་རབ་ཏུ་སོང་། 87

དེ་ནས་རེ་བ་བརྟན་པ་ཡིས། འགྲོ་བ་དེ་ནི་ཀུན་མཁྱེན་གྱི།
ལྷ་ཡི་སྤྱན་གྱིས་མཁྱེན་གྱུར་ནས། འཕྲལ་ལ་མངོན་ཕྱོགས་བཀའ་སྩལ་པ། 88

जघन्या जनयत्येव न कस्य विरतिं रतिः ।
यस्यां भवति पर्य्यन्तेऽपि नैव[1] पराङ्मुखः ॥ ८१ ॥

गृहजालविमुक्तस्त्वं किन्तचैवाभिधावसि ।
न हि निर्गत्य सारङ्गः पुनर्विशति वागुराम् ॥ ८२ ॥

इति वाक्याद् भगवतः शासनेन नियन्त्रितः ।
चिन्तयन् सुन्दरीं नन्दः प्रविवेशाश्रमं पुनः ॥ ८३ ॥

ततः कदाचिदादिश्य नन्दमाश्रममार्ज्जने ।
आसनानुग्रहव्यग्रः प्रययौ भगवान् पुनः ॥ ८४ ॥

तच्छासनात् प्रवृत्तस्य नन्दस्याश्रमशोधने ।
नो भूतलादपययौ रजो राग इवाशयात् ॥ ८५ ॥

तस्याहर्त्तुं गतस्याथ सलिलं पारभागिकम् ।
मुहुः पूर्णसमुत्क्षिप्तः शून्य एवाभवद्घटः ॥ ८६ ॥

तेन विघ्नेन गमने सुतरां खिन्नमानसः ।
त्यक्त्वा तु प्रययौ नन्दः सुन्दरीदर्शनोत्सुकः ॥ ८७ ॥

अथ विज्ञाय सर्व्वज्ञस्तं यान्तं दिव्यचक्षुषा ।
बभाषे सहसाभ्येत्य स्तम्भमानमनोरथः ॥ ८८ ॥

---

1 Orig. नाम ।

ཀྱི་མ་མཛའ་བའི་སྐུམ་གྱི་དྲི། སྣོད་དུ་སྦྱར་བས་ཚྭ་བྱེད་ཅིང་།
ཁྱོད་ཀྱི་ཆགས་པ་མཚན་མོའི་འོད། མར་མེ་བཞིན་དུ་ཞི་མི་འགྱུར། 89

གཡོན་མ་མཆོག་ཏུ་མཐོན་འདོད་པས། ཅི་ཡང་ཁྱོད་སྙིང་ལ་ཆགས་འདི།
ད་དུང་ཡང་ནི་མི་འབྲལ་དེ། གང་ཞིག་རམ་གྱིས་ཚོན་བཞིན་ནོ། 90

ཆགས་པ་རབ་ཏུ་བཅོམས་པའི་ཚེ། དེ་དུས་འཇིགས་ཤིང་ལོང་བར་བྱེད།
ཡན་ལག་གཅོར་བགྲོད་རབ་ཤུགས་ཚེ། སྨད་པ་ཉིད་ཀྱིས་ཀུན་ཏུ་འཁྲུད། 91

ཡུལ་གྱི་ཉམས་སྤྱོད་དང་འགྲོགས་པ། སྡིག་པའི་གྲོགས་ལྟའི་དབང་པོ་ཡིས།
སྡུག་བསྔལ་བཟོད་དཀའ་འཁྲིལ་བ་ཡིས། དམྱལ་བར་མི་ཉམས་འཕེན་པར་བྱེད། 92

གྲོགས་ན་རིག་པའི་ཚ་ཡིས་ཀྱང་། ལྷག་པར་རབ་ཏུ་སྐྲོ་བར་བྱེད།
ཉ་དང་རོ་ནི་རྩུལ་པ་ཡིས། དྲི་ང་རབ་ཏུ་ལྡང་བ་བཞིན། 93

དགེ་བའི་གྲོགས་ཀྱིས་རིག་གྱུར་པ། ཉམས་པ་ཀུན་ཏུ་དགེ་བ་འཛིན།
དགེ་བའི་དྲི་བཟང་གིས་ཁྱབ་བཞིན། གང་ཞིག་རི་ནི་ཆེན་པོར་བྱེད། 94

འདི་བརྗོད་དེ་ལ་བཅོམ་ལྡན་གྱིས། དམ་པ་དམ་པ་མིན་པའི་ལམ།
མངོན་དུ་རིག་པས་དྲི་བསྟན་ནས། གྲོགས་ནི་དེ་དག་བསྟན་པ་མཛད། 95

དེ་ནས་དགའ་བོ་བཅོམ་ལྡན་གྱིས། ཁྲིད་ནས་རི་ཡི་དབང་པོ་ནི།
སྤོས་ངད་ལྡང་བའི་རི་དགས་ཀྱི། ཇོ་མའི་ཀླུང་ཡབ་གཡོབ་པར་གཤེགས། 96

पात्रयोगेन तप्तस्य श्यामरक्तरुचेः परम् ।
अहो स्नेहकलङ्कस्ते दीपस्येव न शाम्यति ॥ ८९ ॥

अलं वामाभिलाषेण नीलीराग इवैष ते ।
संसक्तः कोऽपि हृदये यन्नाद्यापि विरज्यसे ॥ ९० ॥

अन्धीकरोति प्रारम्भे रतिस्तत्कालकातरम् ।
आलिङ्गति जुगुप्सेव वृत्ते मुख्याङ्गसङ्गमे[1] ॥ ९१ ॥

विषयास्वादसङ्गेन पापमित्रैरिवेन्द्रियैः ।
दुःसहव्यसनावर्त्ते पात्यते नरके नरः ॥ ९२ ॥

अधिवासयति स्पर्शलेशेनापि कुसङ्गमः ।
प्रक्लिन्नमत्स्यकुणपात् पूतिगन्ध इवोद्गतः ॥ ९३ ॥

कल्याणमित्रसम्पर्कः सर्व्वथा कुशलावहः ।
शुभामोद इव व्याप्तो यः करोति महार्हताम् ॥ ९४ ॥

इत्युक्तो तस्य भगवान् साक्षात् सदसतोः पथि ।
घ्राणस्पर्शेन सन्दर्श्य चक्रे तत्सङ्गदेशनाम् ॥ ९५ ॥

अथ नन्दं समादाय भगवान् गन्धमादने ।
ययौ विरिञ्चिचमरीबालव्यजनवीजितः ॥ ९६ ॥

---

१ Orig. प्रवृत्ते मुख्याङ्गसङ्गमे ।

དེར་ནི་ནགས་མེས་ཚིག་གྱུར་ཅིང་། མི་སྡུག་ཤིན་དུ་རིད་པའི་ལུས།
སྤྲ་མོ་ཞར་མ་དེ་ལ་ནི། བསྟན་ནས་ཀྱིལ་བས་བཀའ་སྩལ་པ། 97

དགའ་བོ་འདི་ནི་མཐོང་ངམ་ཅི། དམན་པས་ཤིན་དུ་སྨད་པའི་ཡིད།
འདི་ལའང་སྲུ་ཞིག་འོས་པ་ཡི། དགའ་མར་མཐོང་ནས་སྐྱིད་པ་ཡིན། 98

ཞིགས་དང་མི་ཞིགས་ཡོད་ཉིད་མིན། དགའ་བ་ཉིད་དུ་ཆགས་པས་ལྟ།
འཇིག་རྟེན་ན་ནི་སྐྱེ་བོ་གང་། གང་གི་དགའ་དེ་དེ་ཡིས་དགའ། 99

འདི་དང་མཛེས་མ་དེ་ཡི་ནི། མཛེས་པའི་བར་ན་ཅི་ཞིག་ཡོད།
དགའ་བོ་ཁྱོད་ཀྱི་ཕྱོགས་ལྷུང་དག། རབ་ཏུ་ཐོང་ལ་བདེན་པར་སྨྲོས། 100

བདག་གིས་དོན་དུ་མ་གཉེར་སླད། མཛེས་པའི་ཁྱད་ཉིད་རིག་པ་མེད།
དོན་དུ་གཉེར་ན་དགའ་བར་འགྱུར། དགའ་བ་ཉིད་ན་མཛེས་པ་ཉིད། 101

འདི་དང་དེ་ལ་ཁྱད་པར་དག། ངས་ནི་ཅུང་ཟད་མ་མཐོང་སྟེ།
ཤ་པགས་རུས་པའི་འཁྲུལ་འཁོར་ལ། དགའ་བར་དམ་ཚིག་བྱས་ཙམ་ཉིད། 102

དེ་སྐད་བཅོམ་ལྡན་གྱིས་དྲི་བ། ཤིན་དུ་རིགས་མིན་དྲིས་གྱུར་ཅིང་།
གང་ཡང་ཐ་མས་གདམས་གྱུར་པའི། དགའ་བོས་དེ་ལ་ལན་གསོལ་པ། 103

བཅོམ་ལྡན་དེ་སྐད་ཅི་ལ་གསུངས། གང་འདི་ཀྱུ་ངན་ལ་ཅོ་འདྲི།
ཀུན་གྱི་ལྷ་མ་གཙོ་བོར་ནི། གྱུར་པ་སྲུ་ཡིས་ནོམ་པར་དུལ། 104

तत्र दावानलप्लुष्टामनिष्टक्लिष्टविग्रहाम्।
काणां मर्कटिकामस्मै दर्शयित्वावदज्जिनः॥ ९७॥

इमां पश्यसि किं नन्द मान्द्यनिन्द्यतराकृतिम्।
कस्मैचिदुचिता चेयं रोचते प्रियदर्शना॥ ९८॥

सत्ता सदसतोर्नास्ति रागः पश्यति रम्यताम्।
स तस्य ललितो लोके यो यस्य दयितो जनः॥ ९९॥

पक्षपातं समुत्सृज्य सत्यं नन्द त्वयोच्यताम्।
अस्यास्तस्याश्च सुन्दर्या लावण्यस्य किमन्तरम्॥ १००॥

अनर्थित्वाद्वयं नैव सौन्दर्यान्तरवेदिनः।
अर्थिप्रियत्वमायाति प्रार्थितं[1] तच्च चारुताम्॥ १०१॥

पश्याम्यहं विशेषन्तु तस्या नास्याश्च कञ्चन।
रम्यत्वं मांसचर्म्मास्थियन्त्रे समयमात्रकम्॥ १०२॥

इति पृष्टो भगवता नन्दस्तं प्रत्यभाषत।
अत्यन्तानुचितः प्रश्नः कोऽपि गौरवयन्त्रितः[2]॥ १०३॥

किमेतद् भगवान् वक्ति केयं श्लोके विडम्बना।
क्वापि वा विश्वगुरवो विनेयाः प्रभविष्णवः॥ १०४॥

---

१ Orig. omits प्रार्थितं। २ Orig. कौरव०।

མཛེས་མ་ཡི་ནི་དགའ་བ་དེ། མཆོག་གི་ཆ་ལ་མཛེས་པ་སྟེ།
འགྲོ་ལས་རྒྱལ་བའི་དྲན་པ་ཡང་། གང་མཐོང་དགའ་མ་མི་དྲན་ནོ། 105

དེ་ཡི་མཛེས་པས་ཀུ་མུད་ཚལ། དགའ་བཞིན་ཟླ་བའི་འོད་ཀྱིས་མིན།
གྲགས་པའི་ལམ་འགྲོ་ཐྲུན་པོ་ཡིས། ཡོན་ཏན་ཁྲུད་པར་ཡོངས་མི་ཤེས། 106

དེ་ཡིས་མེ་ཏོག་ཚོགས་ནམས་བཞིན་གྱི་དྲི་བཟང་ནོར་ལ་ནི།
བཀུས་པར་མཐོང་ནས་རབ་ཏུ་གྱུར་པའི་སྦྲ་ཚོགས་དག་ལ་བཅིངས།
འཛེ་སྐྱིག་འཁྲོས་དང་མིག་གིས་མཛེས་པ་དག་ལ་བཀུས་གྱུར་པའི།
ངང་པ་རི་དགས་འཇིགས་བཞིན་ནགས་ཉིད་དུ་ནི་བྲོས་སམ་སྙམ། 107

རི་དགས་མིན་ཅན་དཔེ་མེད་མ་དེ་ཡོངས་འདྲིས་བརྟག་པ་མི་ཉུང་ཞིང་།
ཉམས་མང་ཉམས་པར་རྟོག་པས་ཀྱང་ནི་དྲི་བར་ནུས་པ་ཉིད་མ་ཡིན།
གང་གི་བཞིན་མཛེས་དག་དང་སྲུང་ལ་གཞལ་ཚོ་ཡང་པ་ཉིད་ཀྱི་ན།
རྒྱ་སྐར་བདག་པོ་དེ་ནི་མཁའ་ལ་ལྷག་པར་འཛེག་པ་མ་ཡིན་ནམ། 108

བསོད་ནམས་ཀྱིས་འཐོབ་ཡིད་འོང་སྨིན་མའི་འཁྲི་ཤིང་གཡོ་ལྡན་སྐྱིག་ཅིང་རོལ།
དེ་ཡི་བཞིན་ནི་ཡིད་འཕྲོག་དགའ་དང་ལྡན་དེ་གལ་ཏེ་མི་འཐོབ་ན།
རབ་བྱུང་འདྲིས་བདག་ལེགས་བྱས་ལྷག་པར་ཅི་ཞིག་བགྱིད་འགྱུར་འདི་ཡི་སྐད།
བརྟུལ་ཞུགས་པོ་བྱད་ཁུར་དུ་གྱུར་པ་འདི་དག་ཅི་སྐད་བདག་འཁུར་ལགས། 109

रतिः साधिकसुन्दर्य्याः परभागेण रज्यते ।
यां दृष्ट्वा जगतां जेता न रतिं स्मरति स्मरः ॥ १०५ ॥

ज्योत्स्नयेव न तत्कान्त्या मोदते कुमुदाकरः ।
गुणान्तरं न जानाति प्रसिद्धिशरणो जनः ॥ १०६ ॥

बद्धन्तया वदनसौरभसारहार-[1]
मालोक्य पुष्पनिचयं पृथुकेशपाशे ।
मन्ये विलासगतिलोचनकान्तिचौरैः
भीत्येव हंसहरिणैर्वनमेव यातम् ॥ १०७ ॥

अनल्पैः संकल्पैर्बहुविधविकल्पैरनुपमा
न सा सारङ्गाक्षी लिखितुमपि शक्या परिचितैः ।
तुलारोहे यस्या वदनपरभागे लघुतरः
स नूनं ताराणां गगनमधिरूढः परिदृढः ॥ १०८ ॥

पुण्यप्रह्वं ललितललितभ्रूलतालास्यलीला-
रम्यं तस्या यदि न वदनं नन्दनं लभ्यते तत् ।
प्रव्रज्येयं सुकृतमधिकं किङ्करी किङ्करी मे[2]
कस्मादेतं व्रतपरिकरं भारभूतं वहामि ॥ १०९ ॥

[1] Orig. omits हार० ।   [2] Orig. किङ्करीकिङ्करीष्यतो मे ।

དེ་སྐད་དགའ་བའི་ཚིག་ཐོས་ནས། ཆགས་པ་རབ་ཏུ་གྱུར་པ་དེ།
བཅོམ་ལྡན་རང་གི་མཐུས་བླངས་ནས། ལྷ་ཡི་གནས་སུ་ཁྲིད་པར་གྱུར། 110

བགྱི་ཁྲིན་དགའ་ཚལ་དེ་རུ་ནི། བདུད་རྩི་བསྒྲུབས་ལས་རབ་འཁྲུངས་པའི།
ལྷ་ཡི་བུ་མོ་མཛེས་པ་དག། དེ་ལ་རབ་ཏུ་བསྟན་པར་གྱུར། 111

ཀྲང་པ་པད་ཚལ་ལས་འཁྲུངས་པ། མཛེས་པའི་ཀྱུད་ནི་དམར་པོ་ཡིས།
རྒྱ་གཏེར་ངོགས་ཀྱི་བྱུ་རུ་ཡིས། ནགས་ཀྱི་ཇེས་སུ་འབྲིད་པ་བཞིན། 112

ཡོངས་འདུ་ལྡན་ཅིག་སྐྱེས་པ་ཡིས། ཡལ་འདབ་ཆགས་པ་ལྟར་གྱུར་པ།
རོལ་ཞིང་སྒེག་པའི་གྲོགས་པོ་ཡིས། ལག་པས་རྒྱ་སྐྱེས་དག་ལས་གྲོལ། 113

མཛེས་ཞིང་ཡིད་འོང་རོལ་པ་དང་། འདོད་པ་ཀུན་དུ་དགའ་བའི་གྲོགས།
རྒྱ་སྐྱེས་བདེ་བླག་ཉིད་དུ་ནི། འཛུམ་བྱེད་ཟླ་བའི་འགྲན་ཟླ་དང་། 114

ཀྲི་ཥྞ་སུ་རའི་མིག་དག་དང་། ཀུན་སྨོངས་གསོ་བས་ནག་མོ་ནི།
བརྟེགས་པའི་རི་མོས་རེག་པ་ཡིས། བདུད་རྩིའི་ཚོགས་ཀྱིས་བསྐོར་བ་བཞིན། 115

མཛེས་སྤྲུག་ལང་ཚོ་རྫོགས་གྱུར་པ། དེ་དག་མཐོང་ནས་འཕྲལ་ཉིད་དུ།
ཀུན་དགའི་བཞིན་ལྡན་དགའ་བོ་ནི། རྡུལ་གྱིས་བཀུས་པ་བཞིན་དུ་གྱུར། 116

པ་དྨོའི་བཞིན་རས་དང་ནི་ཨུཏྤལ་གྱིས་པའི་མིག།
ཀུན་དའི་འཛུམ་དང་མེ་ཏོག་ཚོམ་བུའི་ནུ་གྱིས་ཅན།
དེ་དག་ཉམས་ལ་དགའ་བའི་སྙིང་ནི་ཅིག་ཅར་དུ།
འཕྲོགས་ལྡང་བུང་བ་རོལ་ཅིང་གཡོ་བ་དང་མཚུངས་ཐོབ། 117

इति नन्दवचः श्रुत्वा भगवान् रागनिर्भरम्।
उपक्षिप्य प्रभावेण तं निनाय सुरालयम् ॥ ११० ॥

अदर्शयच्च तत्रास्य लीलोद्याने शतक्रतोः।
सुधामन्थसमुद्भूताः कान्तास्त्रिदशयोषितः ॥ १११ ॥

अरुणैः कान्तिसन्तानैः पादपद्मवनोदितैः।
अनुयाता इवाम्भोधिकूलविद्रुमकाननैः ॥ ११२ ॥

विशाललास्यसचिवैः पाणिभिर्विजिताम्बुजैः।
संसक्तैः सहजस्येव पारिजातस्य पल्लवैः ॥ ११३ ॥

कान्तिमाधुर्य्यललितैर्मदनानन्दबान्धवैः।
हेलानिमीलिताम्भोजवदनैश्चन्द्रसुन्दरैः ॥ ११४ ॥

सम्मोहनैर्जीवनैश्च कृष्णसारैर्विलोकनैः।
कालकूटच्छदस्पृष्टैरमृतौघैरिवावृताः ॥ ११५ ॥

पूर्णयौवनलावण्याः सहसैव विलोक्य ताः।
नन्दः सानन्दवदनः स्वेदस्नात इवाभवत् ॥ ११६ ॥

पद्माननासु विपुलोत्पललोचनासु
कुन्दस्मितासु निविडस्तवकस्तनीषु।
नन्दस्य तासु हृदयं युगपत् निपत्य
दोलाविलासतरलालितुलामवाप ॥ ११७ ॥

དེ་ལ་ཡིད་སོང་དགའ་བོ་ལ། དེ་ནས་བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས།
དགའ་བོ་འདི་དག་མཐོང་བ་དང་། ཆགས་པས་ཁྱོད་བློ་དགའ་འམ་ཅི། 118

འདི་རྣམས་དག་དང་མཛེས་དེའི། མཛེས་སྡུག་ཁྱད་པར་ཇི་སྙེད་ཅིག།
གཞན་གྱི་ཆ་ལས་རབ་གྱུར་པ། གསལ་པ་ཁོ་ནར་རྟོགས་པར་བྱ། 119

གལ་ཏེ་ལྷ་མོ་རྣམས་ཀྱི་གཟུགས། མཛེས་མའི་གཟུགས་པས་ལྷག་པ་ན།
དེ་ཕྱིར་དེ་དག་ཁོ་ན་ཉིད། དུས་ཀྱིས་ཁྱོད་ལ་བརྙེན་པར་བྱས། 120

རེ་ཞིག་རབ་ཏུ་དང་བའི་བློ། ཡིད་ནི་ཆགས་བྲལ་ཁོ་ན་ཡིས།
ཚངས་སྤྱོད་སྤྱོད་ཅིག་དེ་ནས་ངས། ལྷ་མོའི་ཚོགས་ནི་ཁྱོད་ལ་བྱིན། 121

དེ་ལྟར་བཅོམ་ལྡན་གསུང་གི་ནི། ངེས་པ་སྐྱེས་བའི་དགའ་བོ་ཡིས།
དེ་བཞིན་ཞེས་བརྗོད་བརྟུལ་ཞུགས་སེམས། མཐོ་རིས་བུ་མོའི་བསམ་པས་བྱས། 122

དེ་དང་འགྲོགས་འདོད་གྱུར་པས་དེས། རང་གི་ཆུང་མ་ལ་གུས་དམན།
ཡོན་དན་ཟིང་མཚུངས་དགའ་བ་ཡིས། མཛའ་བ་བདེན་པ་ཉིད་མ་ཡིན། 123

སྐྱེས་བུའི་གོམས་སྐྱེས་མཛའ་བ་ནི། གཞན་དུ་ཡོངས་སུ་དམན་པ་ཡིས།
ཀུ་མ་གནས་ནི་བརྗོད་གྱུར་ནས། འཕྲལ་ལ་གཞན་དུ་གྱུར་པ་ཉིད། 124

སྐད་ཅིག་ལང་ཚོ་དགའ་བོ་ཡིས། མཛའ་བ་གཙུགས་པ་ཉམས་པ་ཡིས།
བདེན་པ་མ་ཡིན་རྟག་མིན་ཏེ། ལུས་ཅན་རྣམས་ཀྱི་བདེ་བ་བཞིན། 125

ततः प्रोवाच भगवान् नन्दं तद्गतमानसम्।
आसां[1] सन्दर्शने नन्द प्रीत्या ते रमते मतिः॥ ११८॥

आसां तस्याश्च सुन्दर्य्या लावण्ये कियदन्तरम्।
उत्कर्षः परभागेण स्फुटमेवाभिभाव्यते॥ ११९॥

निरस्तसुन्दरीरूपं रूपमप्सरसां यदि।
तदेता एव कालेन करिष्यामि त्वदाश्रयाः॥ १२०॥

अरोगेणैव मनसा ब्रह्मचर्य्यं प्रसन्नधीः।
चर तावत्ततस्तेऽहं[2] दास्याम्यप्सरसां गणम्॥ १२१॥

एवं भगवतो वाक्यान्नन्दः सञ्जातनिश्चयः।
तथेत्युक्त्वा व्रते चेतश्चक्रे स्वर्गाङ्गनाशया॥ १२२॥

मन्दादरः स्वदारेषु सोऽभूत् तत्सङ्गमेच्छया।
गुणपण्यतुलावृत्तेर्नास्ति स्नेहस्य सत्यता॥ १२३॥

अहो विस्मृतसंवासप्रवासपरिशोषिता।
पुंसामाभ्यासिकी प्रीतिः सहसान्यत्र धावति॥ १२४॥

क्षणयौवनरम्याणि प्रेमाणि प्रणयव्ययैः।
न सत्यानि न नित्यानि न सुखानि[3] शरीरिणाम्॥ १२५॥

---

१ Orig. अस्याः। २ Orig. स्नेहं। ३ Orig. न सभाणि।

དེ་ནས་དགའ་བོ་བཅོམ་ལྡན་གྱིས། སྐད་ཅིག་གིས་ནི་རང་གནས་ཁྲིར།
ངེས་པ་དེ་ཡིས་ཚངས་སྤྱོད་ནི། དུལ་བ་ཉིད་ཀྱིས་བརྟུལ་ཞུགས་སྤྲད། 126

མཛེས་མའི་མཛེས་སྡུག་ཕུན་ཚོགས་པ། གཞན་གྱི་བློ་རེས་བརྗེད་པར་གྱུར།
སྐད་ཅིག་རབ་ཉམས་དགའ་བ་ནི། ཡོན་དན་ལའང་དམན་པར་གྱུར། 127

དེ་ནས་ནམ་ཞིག་དགའ་བོ་ནི། གྱི་བས་རབ་འཇིགས་དམྱལ་བའི་ཚོགས།
འཇིགས་རུང་ཟངས་ཆེན་འཇོན་པ་ཡང་། འགའ་ཞིག་དག་དུ་མཐོང་བར་གྱུར། 128

དེ་མཐོང་ཉིད་ལ་སྡུག་བསྔལ་ཞིང་། འདར་བར་གྱུར་པས་འདི་ཅི་ཞེས།
དེ་ཡིས་དེ་ནས་ཚོགས་པ་ཡི། འཇིགས་རུང་དམྱལ་སྲུང་རྣམས་ལ་དྲིས། 129

དེ་ལ་དེས་སྨྲས་ཚ་བའི་ས། ཟངས་ཆེན་གྱི་ནི་རྫོགས་པ་འདི།
ཤིན་དུ་ཆགས་ལྡན་གྱིས་པོའི་བུ། དགའ་བོ་ལ་ནི་བྲིས་པ་ཡིན། 130

ཆགས་བྲལ་ཉིད་ནི་ད་དུང་ཡང་། བརྟུལ་ཞུགས་ལོག་པ་དེ་མི་སྟེན།
མཐོ་རིས་བུད་མེད་འགྲོགས་བསམ་པས། ཚངས་པར་སྤྱོད་པ་སྤྱོད་པ་ཉིད། 131

བཀོམ་ཆགས་ལོག་པའི་བརྟུལ་ཞུགས་ཅན། ཆགས་སྣང་སྡིགས་མ་ཅན་རྣམས་ཀྱི།
རྟག་དུ་ཚ་བའི་ཟངས་ཆེན་ནི། འདི་དག་འཇིག་པ་མེད་པའི་གནས། 132

དེ་ལྟར་དགའ་བོས་ཡང་དག་ཐོས། སྒྲ་ལོང་གོས་ལྟར་གྱིས་གྱུར་ཅིང་།
དེར་ནི་རྗེས་སུ་གདུང་བ་ཡིས། ལུས་པོ་དུམ་བུར་གྱུར་བཞིན་སེམས། 133

ततो भगवता नन्दः क्षणान्नीतः स्वमाश्रमम्।
तन्निश्चयात् ब्रह्मचर्य्यं चचार नियतव्रतः॥ १२६॥

स विसस्मार सुन्दर्य्याः कान्तिसम्पदमन्यधीः।
क्षणप्रमुषिता प्रीतिः मलं याति गुणेष्वपि॥ १२७॥

ततः कदाचिद्विचरन् नन्दः क्वापि व्यलोकयत्।
करालनरकासक्तां धीमान् कुम्भीभृतां भुवम्॥ १२८॥

तां विलोक्यैव साकम्पः किमेतदिति दुःखितः।
स पप्रच्छ तदासक्तान् घोरनरककारणम्॥ १२९॥

ते तमूचुरियं भूमिस्तप्तकुम्भीशताचिता।
कल्पिता राजपुत्रस्य नन्दस्यानन्दरागिणः॥ १३०॥

मिथ्याव्रतः स नाद्यापि भजते वीतरागताम्।
ब्रह्मचर्य्यं चरत्येव स्वर्गस्त्रीसङ्गमाशया॥ १३१॥

मिथ्याव्रतानां लुब्धानां रागद्वेषकषायिणाम्।
एतासु नित्यतप्तासु कुम्भीष्वेवाक्षयः क्षयः॥ १३२॥

इति नन्दः समाकर्ण्य जातरोमाञ्चकञ्चुकः।
तच्च्युतामिव तनूं पश्चात्तापादमन्यत॥ १३३॥

གནས་སུ་མངོན་སོང་འདོད་ཆགས་ཀྱིས། བག་ཆགས་ཞེན་པ་བདང་བྲུས་ནས།
ཁྲ་མེད་ཚངས་པར་སྤྱོད་པ་ནི། ཡོངས་སུ་རྫོགས་ཤིང་དུལ་བར་གྱུར། 134

ནང་དུ་ཐེ་ཚོམ་ནོམ་གྲོལ་ཅིང་། སྡུག་པོའི་རྨོངས་པ་ཟད་ལས་དེའི།
ཡིད་ནི་རབ་དང་ཐོབ་གྱུར་དེ། སྟོན་ཀའི་སྐྱུང་གི་ཆུ་བཞིན་ནོ། 135

འདོད་པ་མེད་ཅིང་རབ་ཞི་ཐོབ། མཆོག་ཏུ་ངེས་པར་དེར་ཞུགས་པ།
དག་པའི་བློ་ཡི་བཅོམ་ལྡན་ལ། ཡང་དག་མངོན་དུ་ཕྱོགས་དེ་སྨྲས། 136

བཅོམ་ལྡན་བདག་ལ་བྲུ་བ་ནི། ལྷ་མིས་ཡོད་མིན་མཛེས་མས་མིན།
གནོད་པ་དང་བཅས་ཡུལ་གྱི་དཔལ། འདི་དག་མཇུག་ནི་མཛེས་དང་བྲལ། 137

ཇི་ལྟ་ཇི་ལྟར་དངོས་རྣམས་ཀྱི། ངོ་བོ་ཉིད་མེད་འདི་བསྒོམས་པ།
དེ་ལྟ་དེ་ལྟར་སྒྲིབ་པ་དང་། བྲལ་བའི་སྤྱོད་ཚུལ་རབ་གསལ་གྱུར། 138

དེ་སྐད་སྨྲས་པའི་དགའ་བོ་དག། རིམ་གྱིས་དགྲ་བཅོམ་གནས་ཐོབ་པ།
ཡོངས་སུ་མྱ་ངན་འདས་པ་དག། འགྲུས་པར་བཅོམ་ལྡན་འདས་ཀྱིས་དགོངས། 139

དགེ་བའི་ཙ་བ་གང་དག་གི། འབྲས་བུ་དགའ་བོས་ཐོབ་གྱུར་ཅེས།
དགེ་སློང་རྣམས་ཀྱིས་མངོན་ཕྱོགས་དྲིས། རྒྱལ་བས་དེ་ལ་བཀའ་སྩལ་པ། 140

སྐྱེ་བ་གཞན་བསྐྱབས་བསོད་ནམས་ཀྱིས། ལེགས་བྱས་གོམས་པར་བྱས་གྱུར་པ།
དགའ་བོས་དགེ་བའི་ཙ་བ་ཡི། འབྲས་བུ་ཕུན་སུམ་ཚོགས་པ་ཐོབ། 141

समभ्येत्य त्यक्तरागसंवासवासनः स्वयम् ।
बभूवानुत्तरब्रह्मचर्य्यपर्य्याप्तसंयमः ॥ १३४ ॥

घनमोहक्षयात्तस्य विमुक्ते संशये ततः ।
मनः प्रसादमापेदे शरदीवोदधेः पयः ॥ १३५ ॥

निष्कामः प्रशमं प्राप्तः परां निष्ठामुपागतः ।
शुद्धधीः स समभ्येत्य भगवन्तमभाषत ॥ १३६ ॥

नाप्सरोभिर्न सुन्दर्य्या भगवन् कृत्यमस्ति मे ।
एताः पर्य्यन्तविच्छायाः सपाता[१] विषयश्रियः ॥ १३७ ॥

यथा यथेयम्भावानां भाव्यते निःस्वभावता ।
तथा तथा प्रसीदन्ति निरावरणवृत्तयः ॥ १३८ ॥

इति नन्दस्य वदतः प्राप्तस्यार्त्तपदं शनैः ।
भगवान् निर्व्वाणमुद्रामस्य सिद्धिममन्यत ॥ १३९ ॥

केषां कुशलमूलानां नन्देनासादितं फलम् ।
इति भिक्षुभिरभ्येत्य पृष्टस्तानवदज्जिनः ॥ १४० ॥

जन्मान्तरार्ज्जितैः पुण्यैः सुकृताभ्यासकारिणा ।
प्राप्ताः कुशलमूलानां नन्देन फलसम्पदः ॥ १४१ ॥

१ Orig. सापया ।

དྲི་མེད་ཡངས་པའི་རིགས་སུ་སྐྱེས་ཤིང་དྲན་པའི་གཟུགས་བརྙན་ལྷ་བུའི་ལུས།
དཔལ་འབྱོར་སྐྱེ་བོ་བདེ་བའི་གྲོགས་མོ་སྤྱོད་ཚུལ་དམ་པ་རྟག་ཏུ་དགའ།
སེམས་ནི་རབ་ཏུ་ཞི་བའི་ཆུས་བཀུས་རང་བཞིན་ལུགས་ཀྱི་འགྲོས་ལྡན་འདི།
སྐྱེས་བུ་ཉམས་ཀྱི་དགེ་བའི་མེ་ཏོག་དག་གི་འབྲས་བུ་ཆེར་འཕྲུངས་ཡིན། 142

ཨ་རུ་ཎ་ལྡན་གྲོང་ཁྱེར་དུ། སྟོན་ཆོས་བདག་ཨ་རུ་ཎས།
དགྲ་བཅོམ་ཡང་དག་རྫོགས་སངས་རྒྱས། །ཉམ་པར་གཟིགས་ཀྱི་མཆོད་རྟེན་ནི། 143

ནོར་བུའི་རང་བཞིན་བྱེད་པ་ལ། བྲམས་ལྡན་ཞེས་པ་བྲམ་ཟེའི་བུ།
བསོད་ནམས་ཆེན་པོའི་བགོ་སྐལ་གྱིས། སྐལ་ལྡན་བྱེད་པོ་ཉིད་དུ་གྱུར། 144

དེ་ཉིད་ཀྱིས་ནི་དགེ་སློང་གི། དགེ་འདུན་བསྒོ་ཁང་སྦྱིན་ཁྲུས་བྱས།
དེ་ཡི་བསོད་ནམས་སྨོན་ལམ་གྱིས། ཁྱིམ་བདག་གི་ནི་རིགས་སུ་སྐྱེས། 145

བསོད་ནམས་དང་ཚུལ་དེ་ནི་སྟོན། རང་སངས་རྒྱས་ཀྱིས་ཀྱི་ཉེ་གནས་གྱུར།
མཛེས་ལྡན་འཕྲེང་བས་མངོན་བསྒྲུན་པའི། རབ་འབར་མཆོད་རྟེན་དག་ཀྱང་བྱས།
146

དེ་ཡི་བསོད་ནམས་སྨོན་ལམ་གྱིས། དེ་ནི་ལེགས་སྐྱེས་ཞེས་བྱ་བ།
ཀ་ཤིའི་བདག་པོ་ཀྲི་ཀའི་བུ། གསལ་བའི་མཚན་གྱིས་མཚན་པར་གྱུར། 147

དགྲ་བཅོམ་ཡང་དག་རྫོགས་སངས་རྒྱས། འོད་སྲུང་མྱ་ངན་འདས་པའི་མཐར།
མཆོད་རྟེན་རིན་ཅེན་བདུན་རང་བཞིན། ཀ་ཤིའི་ས་ཡི་བདག་པོའི་བྱས། 148

विपुलविमलवंशे जन्म स्मरप्रतिमा तनुः
सुखजनसखी लक्ष्मी वृत्तिः प्रिया सततं सताम्।
प्रशमसलिलस्नातं चेतः स्वभावगतिर्गतिः
कुशलकुसुमस्येयं पुंसां विशालफलोन्नतिः॥ १४२॥

स्तूपे विपश्यिनः सम्यक्सम्बुद्धस्यादरः पुरा।
नगर्यामरुणावत्यामरुणेन महीभुजा॥ १४३॥

क्रियमाणे मणिमये मैत्रो नाम द्विजन्मजः।
महतः पुण्यभोगस्य भागी कारकतां ययौ॥ १४४॥

तत्पुण्यप्रणिधानेन जातो गृहपतेः कुले।
स एव भिक्षुसङ्घस्य जन्तुकास्थानमचकृत्॥ १४५॥

स पुण्यशीलः प्रत्येकबुद्धोपस्थायकः पुरा।
स्तूपञ्चक्रे शोभनस्तं मालाभिवर्णोज्ज्वलम्॥ १४६॥

तत्पुण्यप्रणिधानेन कृकेः काशीपतेः सुतः।
सोऽभवद्द्युतिमान् नाम दिव्यलक्षणलक्षितः॥ १४७॥

काश्यपस्यार्हतः सम्यक्सम्बुद्धस्यान्तनिर्वृत्तौ।
सप्तरत्नमये स्तूपे कृते काशीमहीभुजा॥ १४८॥

དེ་ཡི་བུ་ནི་ལེགས་སྐྱེས་ཀྱིས། འོད་གསལ་གསེར་གྱི་གདུགས་དག་བརྒྱུགས།
དགའ་བོ་དེ་ཡི་སྨོན་ལམ་གྱིས། ད་ལྟ་ཤཱཀྱའི་རིགས་སུ་སྐྱེས། 149

དེ་ལྟར་སྔོན་སྐྱེའི་རིམ་པས་ཐོབ་པ་ལེགས་བྱས་ཀྱིས་བསྐྱང་བའི།
གང་ཡང་ཡངས་པའི་བསོད་ནམས་ཁྲོ་ནས་དྲི་མེད་རིགས་དང་ནི།
ཡིད་འོང་གཟུགས་དང་ལོངས་སྤྱོད་མཆོག་དང་ཞི་བ་ཡོངས་འདྲིས་མཐར།
དམ་པའི་གནས་སུ་ལེགས་པར་འགྲོ་བ་དག་ཀྱང་དགའ་བོས་ཐོབ། 150

དགའ་བོ་དགེ་བར་མཛད་པ་ལ། དེ་སྐད་གསུངས་ནས་བཅོམ་ལྡན་གྱིས།
དགེ་སློང་གི་ནི་དགེ་འདུན་ལ། ལེགས་བྱས་དེ་དེ་བསྟན་པར་མཛད། 151

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་པའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མཛེས་དགའ་བོའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཅུ་པའོ།།

तत्स्वनुर्द्युतिमान् हैमच्छत्रमारोप्य भास्वरम् ।
जातस्तत्प्रणिधानेन नन्दः शाक्यकुलेऽधुना ॥ १४९ ॥

इति सुकृतसमुत्थैः पूर्व्वजन्मक्रमाप्तैः
किमपि विपुलपुण्यैरेव नन्दः प्रपेदे ।
कुलममलमुदारं रूपमग्रञ्च भोगं
शमपरिचितमन्ते सत्पदं[1] सौगतञ्च ॥ १५० ॥

कथयित्वेति भगवान् नन्दकल्याणकारणम् ।
चकार भिक्षुसङ्घस्य तां तां सुकृतदेशनाम् ॥ १५१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां सुन्दरीनन्दावदानं नाम दशमः पल्लवः ॥

१ Orig. सत्पदसौगतम् ।

CHAPTER XI.

འཕགས་སྐྱེས་བུའི།

རྟོགས་བརྗོད་ནི།

གོང་ན་མེད་པའི་གནས་སུ་དྲི་མེད་བློ། དྲི་མ་དང་བྲལ་དགེ་བའི་སྐབས་ལ་འཛེགས།
བློ་གྲོས་དྲི་མ་ཅན་ནི་དམྱལ་བའི་ཁུང་། འཛིགས་རྟང་སྨུན་པ་འཐིབས་པ་དག་ཏུ་ལྷུང་། 1

ཤཱཀྱ་རྣམས་ཀྱི་གྲོང་ཁྱེར་སྔོན། སེར་སྐྱའི་གཞི་ནི་རབ་གྲགས་པར།
ཤཱཀྱའི་གཙོ་བོ་ཆེན་པོ་ཡིས། འབང་གི་བུ་མོ་བཞིན་བཟང་མ། 2

བསྟུན་བཙོས་དག་ལ་ངལ་བ་བྱས། སྒྱུ་རྩོལ་ཀུན་ལ་མཁས་དང་ལྡན།
ཡོན་ཏན་རིགས་ལྡན་འཕྲེང་ཅན་མ། ཞེས་པ་འདོད་པའི་འཕྲེང་བ་བཞིན། 3

སྐྱིད་ཚལ་མཆོག་ན་ཛྫ་བོ་ཡི། ཆོག་གིས་མེ་ཏོག་འཐུ་བརྩོན་པ།
དེ་ཡི་མདུན་དུ་བདེ་གཤེགས་ནི། འཆག་ཅིང་ཡང་དག་འོང་བ་མཐོང་། 4

དེ་མཐོང་ཉིད་ན་དེ་ཡི་ཡིད། རབ་ཏུ་དང་བ་དག་དང་གྱུར།
སྔོན་ཀའི་དུས་ནི་དྲི་མེད་ཀྱིས། ཡིད་ནི་རབ་ཏུ་དང་བ་བཞིན། 5

དེ་མཐོང་ལས་བསྐྱུབས་དགའ་བ་དག། གནས་པར་བྱས་པ་དེས་བསམས་པ།
བདག་གི་བསོད་སྙོམས་ལེགས་བྱས་ཀྱིས། བཅོམ་ལྡན་ལེན་པར་འགྱུར་ན་ཞེས། 6

एकादशः पल्लवः ।

विरूढकावदानम् ।

आरोहति पदमुन्नतममलमतिर्विमलकुशलसोपानैः ।
नरककुहरेषु निपतति मलिनमतिर्घोरतिमिरेषु ॥ १ ॥

शाक्यानां नगरे पूर्व्वं स्फीते कपिलवास्तुनि ।
महतः शाक्यमुख्यस्य सुमुखी दासकन्यका ॥ २ ॥

शास्त्रे कृतश्रमा सर्व्वकलाकौशलशालिनी ।
मालिका नाम कामस्य मालिकेव गुणोचिता ॥ ३ ॥

प्रभोर्गिरा वरोद्याने कुसुमावचयोद्यता ।
भ्रमन्तन्तं समायान्तं ददर्श सुगतं पुरः ॥ ४ ॥

तस्यान्तेऽस्यास्तमालोक्य[1] प्रसन्नमभवन्मनः ।
शरत्काल इव स्वच्छः प्रसादयति मानसम् ॥ ५ ॥

साचिन्तयत्तदा लोकप्रीत्या हढीकृतास्पदा ।
सुकृतैः पिण्डपातं मे गृह्णीयाद्भगवानपि ॥ ६ ॥

---

१ Orig. तस्यन्ते मालोक्यत० ।

སྙིང་རྗེ་གྲོས་པའི་ཀུན་མཁྱེན་གྱིས། དེ་ཡི་བཙོག་པ་ཀུན་མཁྱེན་ནས།
ལྷུང་བཟེད་བསྣུན་ནས་བཅོམ་ལྡན་གྱིས། བཟང་མོ་བྱིན་ཞེས་དེ་ལ་གསུངས། 7

རེ་བ་ཡོངས་སུ་རྫོགས་པ་དེ། དེ་ལ་ཕྱག་བྱས་ཕྱུལ་ནས་ནི།
འབང་མོའི་སྡུག་བསྔལ་ཟློག་པའི་སྐད། སྨོན་ལམ་དག་ནི་བྱས་པར་གྱུར། 8

དེ་ནས་དེ་ཡི་ཕ་ཡི་གྲོགས། གཉིས་སྐྱེས་ནས་ཞིག་འོང་བ་ཡིས།
མཚན་མ་ལྡན་པའི་ཕྱོགས་མཐོང་ནས། ཡ་མཚན་གྱུས་པས་དེ་ལ་སྨྲས། 9

ཀྱེ་མ་དཔལ་ལྡན་ཁྱིམ་བདག་དེའི། བུ་མོ་གཉེན་དང་བྲལ་གྱུར་ཅིང་།
ནོར་དང་ལོངས་སྤྱོད་སྤངས་ནས་ནི། བུ་མོ་ཁྱོད་ནི་འབང་མོར་གྱུར། 10

ཀྱེ་མ་གདི་སྨུག་སྤྲིན་དག་གིས། བཅོམས་པའི་སྐད་ཅིག་གསལ་བའི་གློག།
འཁོར་བ་སྒྱུལ་གྱི་ལྟོ་དག་གིས། རོལ་པ་བཞིན་དུ་དཔལ་འགྱོར་གཡོ། 11

དགེ་མ་རྟོགས་པ་མ་བྱེད་ཅིག། ངེས་ཤེས་ལག་པའི་མཚན་ཉིད་ཀྱིས།
རིང་པོ་མིན་པ་ཉིད་ན་ཁྱོད། ས་ཡི་བདག་པོའི་དགའ་མར་འགྱུར། 12

ཁྱོད་ཀྱི་ལག་པ་དཔལ་མོ་ཡི། པད་ལྷུར་མཉེན་པའི་འཕྲེང་བ་དག།
འཁོར་ལོ་ལྷུགས་ཀྱུའི་དབྱིབས་འདི་མཐོང་། དེ་སྐད་བརྗོད་ནས་གཉིས་སྐྱེས་སོང་། 13

དེ་ནས་ཡིད་བསྲུབས་ལོངས་སྤྱོད་གྲོགས། སྤྲང་ཙི་འཕྲངས་པ་ནོམས་ཀྱི་གཉེན།
སྐལ་བཟང་འཁྲི་ཤིང་འཁྲུད་བྱེད་པ། ལེགས་ལྡན་དཔྱིད་ནི་མཐོང་བར་གྱུར། 14

विज्ञाय तस्याः सर्व्वज्ञः सङ्कल्पं करुणाकुलः ।
प्रसार्य्य पाणिं भगवान् भद्रे देहीत्युवाच ताम् ॥ ७ ॥

दत्त्वा प्रणम्य सा तस्मै परिपूर्णमनोरथा ।
प्रणिधानं प्रविदधे दास्यदुःखनिवृत्तये ॥ ८ ॥

ततः कदाचिदायातः पितुस्तस्याः सखा द्विजः ।
नैमित्तिकस्तं प्रदेशं दृष्ट्वा तां विस्मितोऽवदत् ॥ ९ ॥

अहो गृहपतेस्तस्य पुत्री त्वं श्रीमतः सुता ।
बन्धुहीना गता दास्यं धनभोगविवर्जिता ॥ १० ॥

अहो मोहघनारम्भक्षणोद्योतनविद्युतः ।
संसारसर्परसनाविलासचपलाः श्रियः ॥ ११ ॥

गम्यानां मा कृथाश्चिन्तां जानेऽहं हस्तलक्षणैः ।
अचिरेणैव भूभर्त्तुर्वल्लभा त्वं भविष्यसि ॥ १२ ॥

इदं पश्यामि ते पाणौ लक्ष्मीकमलकोमले ।
मालाचक्राङ्कुशाकारमित्युक्त्वा प्रययौ द्विजः ॥ १३ ॥

अथ मन्मथसम्भोगसुहृन्मधुपबान्धवः ।
लतालिङ्गनसौभाग्यभव्योऽदृश्यत माधवः ॥ १४ ॥

མཛེས་མའི་ང་གྲོལ་གཉིས་འབྱུང་དག། དཔྱིད་ནི་རལ་པ་ལྡན་པ་དག།
གླལ་པར་བྱེད་པའི་ལྕེ་བཞིན་དུ། མྱ་ངན་མེད་པའི་དོག་པ་མཛེས། 15

གཞོན་ནུའི་འགྲམ་པ་མཛེས་པ་ཡིས། ཀུན་པོ་ཙམ་པ་ཀ་ཡི་ཚོགས།
མིག་བཟང་མ་ཡི་སྐྲ་ཞགས་ལ། བཅིངས་པར་འོས་པ་ཉིད་དུ་གྱུར། 16

དཔྱིད་ཀྱི་ཨ་མྲའི་མེ་ཏོག་གིས། ཁྲོ་དང་བྲལ་ཉམས་ཕ་རོལ་བསྐྲལ།
མཐུ་ལྡན་ཉམ་པར་མ་ཐུལ་བ། གཞན་དག་འཇོམས་ལ་ལྟོས་པ་མེད། 17

སྦྲང་རྩི་འབྱུང་བས་ཨ་མྲ་ཡི། འཁྲི་ཤིང་མཆོག་ཏུ་སྨྱོད་བྱར་གྱུར།
ཡིད་འོང་ལོངས་སྤྱོད་མཁས་ཉམས་ཀྱིས། འཕྲུལ་ཉིད་གཅད་པར་བྱ་བ་བཞིན། 18

ཨ་མྲའི་འཁྲི་ཤིང་གཞུ་ལ་མདའ། བཀོད་པ་ཨ་མྲའི་མཚོན་དང་ལྡན།
གྲོལ་གྱུར་ཅིག་ཅེས་བདག་དྲེགས་ལ། སྨོང་མོ་པ་བཞིན་ཁ་བྲུག་སྒྲོགས། 19

སྐབས་འདིར་ཀོ་ས་ལ་ཡི་དབང་། དཔལ་དང་ལྡན་པ་གསལ་རྒྱལ་ནི།
རི་དྭགས་འདེད་དུ་སོང་བ་དག། རྟ་ཡིས་ཁྲིད་ནས་ཡུལ་དེར་འོངས། 20

གཞུ་ལྡན་ཡིད་འབྱུང་ཉམ་པ་ཅན། རྟ་ལས་བབས་པར་གྱུར་པ་དེས།
མཛེས་མ་དགའ་མ་གཞན་པ་བཞིན། མཛེས་སྡུག་གཞན་ཡོད་མིན་པ་མཐོང་། 21

མིག་གི་ལམ་ནས་ཡ་མཚན་ལས། ཡིད་འབྱུང་རབ་ཏུ་ཞུགས་གྱུར་ཏེ།
བདག་ཉིད་ཆེན་པོ་དེ་ཡི་ཡིད། དེ་ལ་ལྷ་འདོད་ཉམ་པར་གྱུར། 22

मधोः केशरिणस्तस्य कान्तामानद्विपद्विषः ।
विबभौ जिह्ममानस्य जिह्वेवाशोकमञ्जरी ॥ १५ ॥

बालाकपोललावण्यचौरश्चम्पकसञ्चयः ।
सुदृशां केशपाशेषु ययौ बन्धनयोग्यताम् ॥ १६ ॥

सहकारैर्विरहिणीनिधनं विदधे मधुः ।
निरपेक्षापरवधे विधुराः प्रभविष्णवः ॥ १७ ॥

ययुर्मधुलिहां चूतलता निर्भरभोग्यताम् ।
सहसैव विदग्धानामिव मुग्धविभूतयः ॥ १८ ॥

चूतायुधश्चूतलताचापन्यस्तशिलीमुखः ।
जयतीति जगौ वन्दी कन्दर्पस्येव कोकिलः ॥ १९ ॥

अस्मिन्नवसरे श्रीमान् कोशलेन्द्रः प्रसेनजित् ।
मृगयानिर्गतोऽश्वेन हृतस्तं देशमाययौ ॥ २० ॥

धन्विमनोभवाकारः सोऽवतीर्य्य तुरङ्गमात् ।
ददर्शानन्यलावण्यां[१] कन्यां रतिमिवापराम् ॥ २१ ॥

तद्विलोकनविस्तीर्णं मनस्तस्य महात्मनः ।
विस्मयादृष्टिमार्गेण प्रविवेश मनोभवः ॥ २२ ॥

१ Orig. ०नन्यलावण्यरतिमिवापराम् ।

འཕྲུལ་ལ་འཛིགས་པ་རབ་གྱུར་ཅིང༌། ངོ་ཚས་གདོང་བཏུད་དེ་མཐོང་ནས།
མཛེས་མའི་རླབས་ཅན་གྱིས་སྦྲོགས་པའི། མི་ཡི་བདག་པོས་བསམས་པར་གྱུར། 23

གང་གི་མཛེས་པར་ཉིན་མཚན་དུ། མིག་གི་འདབ་བརྒྱ་རྣམ་གྱིས་བྱེད།
གཞོན་ནུ་ཟླ་བཞིན་སྒོ་བསངས་མ། མིག་འབྲས་གཡོ་ལྡན་མ་འདི་སུ། 24

ཕུ་ར་ལ་མཆུ་བ་ཀུ་ལའི། ཏྲི་བཟང་ལ་ནི་བྱུང་བ་བཞིན།
འདི་ཡི་བཞིན་ལ་མི་ཏོག་མཆོད། དཔྱིད་དང་མཛེས་པ་མཐོང་བར་གྱུར། 25

ཀྱེ་མ་མཛེས་སྡུག་མི་དམན་ཞིང༌། ལང་ཚོས་རྣམ་པར་བརྒྱན་པའི་ལུས།
བརྟན་ལྡན་བདག་གི་འང་བརྟན་པ་ནི། གང་གིས་བཀུས་བ་བཞིན་དུ་དོགས། 26

ཀྱེ་མ་སྦྲང་རྩིའི་དོག་པ་དག། སྨད་བྱུང་ཡོན་ཏན་རྩོམ་པས་ཀྱང༌།
ཀོང་དྲུག་པས་ཀྱང་ཀོང་ལས་ཀོང༌། གང་གིས་འགྲོ་བ་འཆང་མ་ནུས་སོ། 27

དེ་ལྟར་བསམས་ནས་ས་སྐྱོང་གིས། དེ་མཐོང་ནགས་ཀྱི་ལྷ་རུ་ཤེས།
དེ་ཡིས་རིམ་གྱིས་བཤད་པ་ཡིས། དེ་ཡི་སྤྱོད་ཚུལ་རྣམ་པར་རིག། 28

དེ་རྗེས་དེར་ནི་གུས་བྱས་ཏེ། དེ་ཡིས་ཡལ་འདབ་རླུང་ཡབ་དང༌།
གཙང་ཞིང་བསིལ་བའི་ཆུ་ཡིས་ཀྱང༌། མི་བདག་བདེ་བ་ཐོབ་པར་གྱུར། 29

དེ་ཡི་ཞབས་ཀྱི་པདྨོ་དག། དེ་ཡིས་མཉེས་ཤིང་ལག་པ་ཡི།
ཆུ་སྐྱེས་རེག་པས་ངལ་བ་དེ། འཕྲུལ་ལ་གཉིད་དག་ཐོབ་པར་གྱུར། 30

तां लज्जावनतां दृष्ट्वा सहसोद्भूतसाध्वसाम् ।
अचिन्तयन्नरपतिः कान्तिकल्लोलिनीहृतः ॥ २३ ॥

केयं नवा शशिमुखी श्यामा तरलतारका ।
यत्कान्तिरनिशं नेत्रशतपत्रविकाशिनी ॥ २४ ॥

वकुलामोदविभ्रान्तभ्रमरे पाटलाधरे ।
कान्तं वसन्तं पश्यामि मुखेऽस्याः कुसुमायुधम् ॥ २५ ॥

अहो लावण्यमम्लानं तारुण्याभरणं तनोः ।
धीरस्यापि धृतिर्येन शङ्के सङ्खलितेव मे ॥ २६ ॥

अहो नु मधुमञ्जर्याः प्रारम्भेऽप्यद्भुतो गुणः ।
येन गन्तुं न शक्नोति षट्पदोऽपि पदात्पदम् ॥ २७ ॥

इति सञ्चिन्त्य भूपालस्तां मत्वा वनदेवताम् ।
पृष्ट्वा विवेद तद्वृत्तं क्रमेण कथितन्तया ॥ २८ ॥

ततस्तत्र कृतातिथ्यस्तया पल्लववीजनैः ।
शुचिशीतैश्च सलिलैः प्राप्तवान् निर्वृतिं नृपः ॥ २९ ॥

श्रान्तः सम्वाहने तस्य तया चरणपद्मयोः ।
कृते करान्तसंस्पर्शे स निद्रां सहसा ययौ ॥ ३० ॥

དེ་ནས་སྐད་ཅིག་གིས་རབ་སད། རི་དགས་བདས་པའི་ངལ་བ་བསོས།
དེ་ནི་ལྷ་ཡིས་རིག་པ་ཡིས། དགའ་མ་གཟུགས་གཞན་གྱུར་པར་ཤེས། 31

དེ་ནས་ཤཱཀྱ་ཆེན་པོས་ཀྱང་། ཀོ་ས་ལ་དབང་འོངས་པ་དག།
ཐོས་ནས་དེ་ལ་མངོན་ཕྱོགས་ཏེ། མཆོད་པར་འོས་པ་དེ་ལ་མཆོད། 32

གུས་བཅས་བླངས་པའི་འཁོར་ཅན་མ། འདོད་པའི་བཀྲ་ཤིས་མེ་ཏོག་འཕྲེང་།
དེ་ཡིས་རང་གི་བུ་མོ་བཞིན། རིན་ཅན་འོས་པ་དེ་ལ་ཕྱིན། 33

འཛུམ་དཀར་ཡིད་ལས་སྐྱེས་པ་ཡི། བ་དན་དེ་ནི་བླངས་ཕྲུས་ནས།
ས་ཡི་བདག་པོ་གླང་པོ་ལ། ཞོན་ནས་རང་གི་གྲོང་ཁྱེར་སོང་། 34

གླང་པོ་རི་བོའི་སྟེང་དེ་ན། ལན་བུ་གཡོ་བའི་སྤུང་བ་ཅན།
རྒྱལ་པོ་དཔྱིད་དང་འགྲོགས་པ་ཡི། གསར་པ་འཕྲེང་ཅན་མ་དེ་མཛེས། 35

མཛེས་མ་དེ་དང་ལྷན་ཅིག་ཏུ། རྒྱལ་པོའི་ཕོ་བྲང་ཕྱིན་ནས་དེ།
རིན་ཅེན་བ་གམ་འོད་ཟེར་ཅན། ཡིད་འོང་ཁང་པར་རྣམ་པར་རོལ། 36

རྒྱལ་པོའི་བཙུན་མོ་སྔོན་མ་ནི། ལྷ་མོ་དབྲར་གྱིས་རྣམ་པའི་མིང་།
སྤྱོད་ཚུལ་ཐ་དད་ཉིད་མིན་སེམས། རྒྱལ་པོའི་དཔལ་མོ་ས་གཞི་བཞིན། 37

དེ་ནི་དེ་ཡིས་རིག་པས་དང་། དེ་དང་དེ་ཡི་གཟུགས་བཟང་གིས།
ཕན་ཚུན་ཡོན་ཏན་ཕུལ་བྱུང་བས། མཆོག་ཏུ་ཡ་མཚན་ལྡན་པར་གྱུར། 38

क्षणेन प्रतिबुद्धोऽथ विश्रान्तमृगयाश्रमः ।
दिव्यस्पर्शेन तां मेने रतिं रूपान्तरागताम् ॥ ३१ ॥

महानपि ततः शाक्यः सम्प्राप्तं कोशलेश्वरम् ।
श्रुत्वा तं देशमभ्येत्य पूजार्हं तमपूजयत् ॥ ३२ ॥

सादरेणार्थितां तेन स्वसुतामिव मालिकाम् ।
रत्नार्हाय ददौ तस्मै स्मरमङ्गलमालिकाम् ॥ ३३ ॥

तामादाय मनोजन्मवैजयन्तीं सितस्मिताम् ।
निजं जगाम नगरं गजमारुह्य भूपतिः ॥ ३४ ॥

तस्मिन्नागनगोत्सङ्गे सा लोलालकषट्पदा ।
बभौ राजवसन्तेन सङ्गता नवमालिका ॥ ३५ ॥

राजधानीं समासाद्य सुन्दर्य्या सहितस्तया ।
रत्नहर्म्यकरोदारमन्दिरे विजहार सः ॥ ३६ ॥

वर्षाकाराभिधा देवी राज्ञः प्रथमवल्लभा ।
अभिन्नवृत्तिं तां मेने राजलक्ष्मीमिव क्षितिः ॥ ३७ ॥

दिव्यस्पर्शेन सा तस्याः साचास्या रूपसम्पदा ।
परस्परगुणोत्कर्षात् परं[१] विस्मयमापतुः ॥ ३८ ॥

१ Orig. omits परं ।

སྔོན་མ་ལྷ་ཡི་གཟུགས་ལྡན་དང་། ཕྱི་མ་ལྷ་ཡི་རིག་ལྡན་ཞེས།
ངོ་མཚར་ལྡན་པ་དེ་དག་གཏམ། འཇིག་རྟེན་དག་ཏུ་རབ་ཏུ་གྲགས། 39

བར་དེར་དེ་དག་ལྷ་ཡི་ནི། གཟུགས་དང་ཡང་དག་རིག་པའི་སྒྲ།
གནས་སུ་དགེ་སློང་རྣམས་ཀྱིས་དྲིས། བཅོམ་ལྡན་རྒྱལ་བས་རབ་ཏུ་གསུངས། 40

སྔོན་ཚེ་ཐོས་མཆོག་ཅེས་བྱ་བ། གཉིས་སྐྱེས་ཁྱིམ་པར་གྱུར་པ་ཡི།
ཆུང་མ་མཛའ་བོ་མཛེས་མ་དང་། ཤཱ་རི་ཁ་ཀ་ཞེས་པར་གྱུར། 41

དེ་ནས་ནམ་ཞིག་མཛེས་མ་ཡི། མིང་པོ་རབ་བྱུང་ཁྱད་ཀྱིས་ནི།
ཉི་ཚེའི་སངས་རྒྱས་ཉིད་གྱུར་པ། སྤྱིང་མོའི་ཁང་པར་འོངས་པར་གྱུར། 42

བདག་པོའི་བཀའ་ཡིས་དེ་ཡི་དེ། ཟླ་བ་གསུམ་གྱི་རིམ་གྲོ་ཡིས།
ཀུས་པས་མགྲོན་དུ་གཉེར་དེ་གནས། དེ་ཡི་ཆུན་མ་ཡིས་ཀྱང་མཆོད། 43

མཛེས་འཛམ་འོངས་སྤྱོད་དག་གིས་དེ། དེ་དག་གིས་མཆོད་སྐྱེ་བ་ནི།
ད་ལྟ་ལྷ་ཡི་གཟུགས་མཛེས་དང་། རིག་པ་ཡང་དག་ལྡན་པར་སྐྱེས། 44

དང་པོ་འདུལ་བ་དག་དང་རབ་ལྡན་ཕུན་སུམ་ཚོགས་པའི་གོ་བཟུང་སྨོས་བྱས་ཤིང་།
དཀའ་ཐུབ་དག་གིས་རབ་གདུངས་ལུས་ཀྱི་ཞིང་བཟང་ཤིན་ཏུ་ག་ཤིན་པར་གྱུར་པ་ལ།
གང་གི་དུས་སུ་དགེ་བའི་ས་བོན་རིགས་བདབ་དེ་ནི་སྨིན་ཅིང་རབ་འབར་བའི།
འབྲས་བུ་ཕུན་ཚོགས་མཆོག་ཏུ་དམ་པའི་ལས་ལ་ཆགས་པའི་བློ་བཟང་རྣམས་ཀྱིས་སྤྱོད། 45

दिव्यरूपवती ज्येष्ठा दिव्यस्पर्शवती परा ।
इति प्रवादः साश्चर्य्यस्तयोर्लोकेषु पप्रथे ॥ ३९ ॥

अत्रान्तरे तयोर्हिव्यरूपसंस्पर्शकारणम् ।
आश्रमे भिक्षुभिः पृष्टः प्रोवाच भगवान् जिनः ॥ ४० ॥

पुरा श्रुतवराख्यस्य द्विजस्य गृहमेधिनः ।
कान्ता शिरीषिका चेति प्रिये भार्य्ये बभूवतुः ॥ ४१ ॥

स कदाचिदयो कान्ताभ्राता प्रव्रज्यया शनैः ।
प्रत्येकबुद्धतां यातः स्वसुर्भवनमाययौ ॥ ४२ ॥

त्रैमासिकोपचारेण स तया पत्युराज्ञया ।
भक्त्या निमन्त्रितस्तस्थौ तत्सपत्न्यावपूजितः ॥ ४३ ॥

ते चारुमृदुभिर्भोगैस्तमभ्यर्च्यान्यजन्मनि ।
जातेऽधुना चारुरूपदिव्यसंस्पर्शसंयुते ॥ ४४ ॥

कृष्टेषु प्रथमं प्रयुक्तविनयामादाय गोसम्पदं
सत्क्षेत्रेषु तपःप्रतप्ततनुषु प्राप्तेष्वतिस्वादुताम् ।
यत्काले शुभबीजमुप्तमुचितं सत्कर्म्मशक्तेः परं
भुज्यन्ते फलसम्पदः सुमतिभिस्तस्यैव पाकोज्ज्वलाः ॥ ४५ ॥

དེ་སྐད་ཐམས་ཅད་མཁྱེན་པའི་གསུང་། བདེན་པ་དགེ་སློང་རྣམས་ཀྱིས་ཐོས།
དེ་དེ་བཞིན་ཞེས་ངེས་བྱས་ནས། ཞི་བ་ལ་ནི་བརྟེན་པར་གྱུར། 46

དེ་ནས་དུས་ཀྱིས་ས་བདག་གི། སྲས་ནི་འཁྲིང་ཅན་མ་ལ་གྱུར།
འཕགས་སྐྱེས་པོ་ཞེས་བྱ་བ་སྟེ། རིག་དང་སྒྱུ་རྩལ་རབ་སྦྱངས་པའོ། 47

དེ་ཡི་མདུན་ན་འདོན་གྱི་བུ། མ་ཡིས་སྡུག་བསྔལ་གྱིས་བཙས་པས།
མ་ལ་གནོད་ཅེས་རྣམ་གྲགས་པ། ན་ཚོད་མཚུངས་པ་མཛའ་བོར་གྱུར། 48

ནམ་ཞིག་དེ་དང་ལྷན་ཅིག་ཏུ། འཕགས་སྐྱེས་པོ་ནི་རྟ་ལ་ཞོན།
རྩེ་ཞིང་སྲོན་ལ་སོང་བ་དག། ཤཱཀྱའི་གྲོང་གི་སྐྱིད་ཚལ་ཕྱིན། 49

འདི་ནི་ངེད་ཀྱི་འབང་མོ་ཡི། བུ་ཞེས་དྲེགས་པ་རབ་སྨྲ་བས།
ཤཱཀྱ་རྣམས་ཀྱིས་མཆོད་བཟུང་ནས། དེར་ནི་དེ་ལ་མཐོ་འཚམས་བྱས། 50

རང་གི་གྲོང་ཁྱེར་སོང་ནས་དེས། དེ་ནི་ཁོན་ལན་བསམ་པར་གྱུར།
རིགས་ཀྱི་དྲེགས་པས་སྨད་པ་ནི། ལུས་ཅན་ཟུག་རྔུ་ལྕགས་ཀྱུ་ཡིན། 51

དེ་ལ་ལན་བྱའི་བསམ་པ་ཡིས། ཡིད་ནི་ངེས་པར་བསྒྲིགས་པ་དེ།
ཡབ་ནི་འཚོ་ཡང་རྒྱལ་སྲིད་ལ། མཆོག་ཏུ་འདོད་པ་སྐྱེས་པར་གྱུར། 52

དེ་ཡིས་རིང་སྤྱོད་ལ་སོགས་པའི། བློན་པོ་བརྒྱ་ཕྲག་ལྔ་དག་ནི།
ཕ་ལས་སྤྱད་ནས་དབྱེ་བ་ཡིས། རིགས་པ་རྣམས་ཀྱིས་རང་དབང་བྱས། 53

इति सर्व्वज्ञवचनं तथ्यमाकर्ण्य भिक्षवः।
तत्तथेति विनिश्चित्य बभूवुः शान्तिसंश्रयाः ॥ ४६ ॥

अथ कालेन भूभर्त्तुर्मालिकायामभूत् सुतः।
विरूढकेतिमुख्याख्यो विद्यासु च कृतश्रमः ॥ ४७ ॥

प्रियस्तुल्यवयास्तस्य पुरोहितसुतोऽभवत्।
मातुर्दुःखेन जातत्वाद्विश्रुतो दुःखमाचिकः ॥ ४८ ॥

कदाचित् सहितस्तेन हयारूढो विरूढकः।
प्राप शाक्यवरोद्यानं मृगयायां विनिर्गतः ॥ ४९ ॥

न्यक्कारञ्चक्रिरे तत्र शाक्यास्तस्योद्यतायुधाः।
अयं दासीसुतोऽस्माकमिति दर्पप्रवादिनः ॥ ५० ॥

गत्वासौ स्वपुरन्तेषां वैरं दर्प्यमचिन्तयत्।
कुलदर्पापवादो हि शल्यतोदः शरीरिणाम् ॥ ५१ ॥

तस्य निर्दह्यमानस्य तत्प्रतीकारचिन्तया।
राज्याय जाता जनके जीवत्यपि परा स्पृहा ॥ ५२ ॥

स चारायणमुख्यानां मन्त्रिणां शतपञ्चकम्।
स्ववशं पितुराकृष्य विदधे भेदयुक्तिभिः ॥ ५३ ॥

དེ་ནས་ནམ་ཞིག་ས་ཡི་བདག། གསལ་རྒྱལ་ནོམ་རིག་ཡང་དག་སྐྱེས།
ཆོས་ཀྱི་གདམས་ངག་མཉན་པ་ལ། གུས་པ་མཆོག་འཕེལ་ལེགས་བཟླམས་པས། 54

རིང་སྦྱོར་ཀྱིས་ནི་རྟ་བཟུང་བའི། ཤིང་རྟ་དག་ལ་ཞོན་ནས་ནི།
ཐམས་ཅད་མཁྱེན་པ་བཅོམ་ལྡན་འདས། བལྟ་བའི་སླད་དུ་སོང་བར་གྱུར། 55

བཅོམ་ལྡན་འདས་ཀྱི་གནས་ཕྱིན་དེ། ཞབས་ལ་མངོན་པར་ཕྱག་འཚལ་ནས།
དེ་ཡི་དྲིན་གྱིས་དང་པའི་བློས། ཆོས་ཀྱི་རྗེས་འགྲོ་དེ་ཡིས་ཐོས། 56

མགྲོགས་པ་ཉིད་དུ་རིང་སྦྱོར་ཀྱང་། ཤིང་རྟ་གྲོང་ཁྱེར་སྦུར་སོང་ནས།
སྐབས་དེར་རྒྱལ་པོའི་བུ་དག་ནི། མངོན་པར་དབང་ནི་བསྐུར་བར་བྱས། 57

དེ་ནས་བཅོམ་ལྡན་ལ་ཞུས་ནས། མི་ཡི་བདག་པོ་འགྲོ་བརྩོན་པས།
མདུན་དུ་རྗེས་འབྲང་མཐོང་མ་ཡིན། ཤིང་རྟ་མ་ཡིན་བློན་པོའང་མེད། 58

རྐང་པ་ཉིད་ཀྱིས་ས་བདག་དེ། དལ་བུས་རབ་ཏུ་འགྲོ་བ་ཡིས།
དབྱར་གྱི་ནོམ་པ་འཕྲིང་ཅན་མར། བཅས་པ་རིང་ནས་འོང་བ་མཐོང་། 59

འཕགས་སྐྱེས་པོ་ནི་དབང་བསྐུར་བ། དེར་དྲིས་དེ་ཡིས་ཚིག་གིས་ཞུས།
བུ་ཡི་དཔལ་འབྱོར་ཡོངས་སྤྱད་སླད། འཕྲིང་ཅན་མ་ནི་དེ་ཡིས་བཏང་། 60

དེ་ཡིས་དབྱར་གྱི་ནོམ་པ་བཟུང་། གྲོགས་པོ་ས་ཡི་བདག་པོ་དག།
མ་སྐྱེས་དགྲ་ཡི་གྲོང་ཁྱེར་ནི། རྒྱལ་པོའི་ཁབ་ཅེས་བརྗོད་པར་ཕྱིན། 61

ततः कदाचित् संजातविवेकः पृथिवीपतिः ।
धर्म्मोपदेशश्रवणे वर्द्धमानादरः परम् ॥ ५४ ॥

चारायणगृहीताश्वं रथमारुह्य संयतः ।
द्रष्टुं जगाम सर्व्वज्ञं भगवन्तं प्रसेनजित् ॥ ५५ ॥

प्राप्याश्रमं भगवतः कृत्वा पादाभिवन्दनम् ।
धर्म्मान्वयं स शुश्राव तत्प्रसादप्रसन्नधीः ॥ ५६ ॥

चारायणोऽप्याशु गत्वा रथेन नगरं जवात् ।
अकरोदन्तरे तस्मिन् राजपुत्राभिषेचनम् ॥ ५७ ॥

भगवन्तमथामन्त्र्य नृपतिर्गन्तुमुद्यतः ।
ददर्श नानुगानग्रे न रथं न च मन्त्रिणम् ॥ ५८ ॥

स पद्भ्यामेव शनकैः प्रस्थितां पृथिवीपतिः ।
दूरादपश्यदायान्तीं वर्षाकारां समालिकाम् ॥ ५९ ॥

ते पृष्ट्वा तद्गिरा ज्ञात्वा सोऽभिषिक्तं विरूढकम् ।
विससर्ज सुतैश्वर्य्यपरिभोगाय मालिकाम् ॥ ६० ॥

वर्षाकारां समादाय स मित्रस्य महीपतेः ।
अजातशत्रोर्नगरं प्राप राजगृहाभिधम् ॥ ६१ ॥

གདུགས་དང་བྲལ་བས་དེ་གདུང་ཞིང་། བཀྲེས་སྐོམ་ངལ་བ་དང་ལྡན་པ།
རྔ་ཡབ་རླུང་དག་རིང་པོ་ཡིས། ཤུགས་ནི་བཏོང་བ་བཞིན་དུ་གྱུར། 62

འཇིགས་མེད་བདེ་བ་སུ་ཡིས་ཐོབ། ཚེ་ནི་སུ་ཡི་དབང་དུ་གྱུར།
སུ་ལ་ཕུན་སུམ་ཚོགས་པ་ནི། གྱུར་པར་རྗེས་སུ་ཉམས་མ་མཐོང་། 63

དེ་ཡིས་ལས་ཀྱི་ཚ་བ་བཞིན། རིང་བའི་ལ་ཕུག་སྙིང་པ་ཟློས།
ཆུ་ཡང་འགྱུར་བྱེད་འཐུངས་པ་ཡིས། གནོད་པ་ཀུན་གྱི་ཚོགས་གྱུར་པ། 64

ལུས་ཀྱི་ཐབས་ལ་སྤྱོད་པ་ཡིས། མི་རྟག་པ་ཉིད་མི་ཤེས་པར།
རྨོངས་པའི་སྐད་དུ་སྐྱ་བོ་འབབ། མ་ཞུའི་ནད་ཀྱིས་ཐེབས་ནས་འགྱེལ། 65

མ་སྐྱེས་དགྲ་ཡིས་ཀོ་ས་ལའི། དབང་པོ་འོངས་པ་ཐོས་གྱུར་ནས།
སོང་ནས་རྡུལ་གྱིས་ཁ་གང་ཞིང་། སྡིག་དང་བྲལ་བ་དེ་མཐོང་གྱུར། 66

བཙུན་མོ་རྗེས་སུ་ཞུགས་པ་དེའི། ལུས་ནི་ལེགས་པར་བྲུ་བ་བྲུས།
སྡུག་བསྔལ་ཞི་བའི་སྐད་དུ་ནི། བཅོམ་ལྡན་བདེ་གཤེགས་ལྷ་རུ་སོང་། 67

དེ་ཡིས་དེ་ལ་བཏུད་ནས་སྨྲས། བཅོམ་ལྡན་ཀོ་ས་ལ་ཡི་དབང་།
གྲོགས་པོ་བདག་གི་གྲོང་ཁྱེར་དུ། འོངས་ནས་ནོར་མེད་གུམ་པར་གྱུར། 68

གང་གི་གྲོགས་ལ་ཕན་པ་དག། བྱས་པ་མིན་པའི་དཔལ་འབྱོར་འདི།
བདག་དང་ཕུན་ཚོགས་སྐད་ཅིང་སྡིག། རྨོངས་ལས་གྲགས་པ་མིན་པའི་སྐད། 69

स ततस्तच्चविरहात् क्षुत्पिपासाश्रमान्वितः ।
ययौ वमन्निव श्वासं दीर्घैश्वासमरमारुतैः ॥ ६२ ॥

सुखमस्खलितं केन प्राप्तं कस्यायुरायतम्[1] ।
न कस्यानुपदं दृष्टः क्षयः[2] सपदि सम्पदः ॥ ६३ ॥

स जीर्णमूलकं भुक्त्वा कर्म्ममूलमिवायतम् ।
क्षणं पीत्वा च पानीयं पपातात्तविषूचिकः ॥ ६४ ॥

अनित्यतामविज्ञाय मोहाय पतते जनः ।
स चापायनिकायस्य कायस्योपायतृष्णया ॥ ६५ ॥

अजातशत्रुः श्रुत्वैव कोशलेश्वरमागतम् ।
अभ्येत्य पांशुपूर्णास्यं विगतासुं ददर्श तम् ॥ ६६ ॥

तस्य जायानुयातस्य स कृत्वा देहसत्क्रियाम् ।
भगवन्तं ययौ द्रष्टुं सुगतं दुःखशान्तये ॥ ६७ ॥

स तं प्रणम्य प्रोवाच भगवन् कोशलेश्वरः ।
पुरं मे सुहृदः प्राप्य निर्धनो निधनं गतः ॥ ६८ ॥

धिग्धामसम्पदं पापं मोहादयशसः पदम् ।
विभवो येन नैवायं मित्रोपकरणीकृतः ॥ ६९ ॥

---

१ Orig. रायनं ।   २ Orig. omits क्षयः ।

གཏུད་ཆོ་སྙིང་ལ་རེ་བ་དག། ནམ་པར་བཀོད་ནས་གྲོགས་ཐོབ་པའི།
གྲོགས་པོ་འབྲས་མེད་ཉིད་གྱུར་ཏེ། གང་ཞིག་འཚོ་བ་དེ་ཡིས་ཅི། 70

གྲོགས་ལ་ཕན་པའི་དཔལ་དང་ནི། ཕོངས་ལ་ཕན་པའི་ནོར་དག་དང་།
འཇིགས་ལ་ཕན་པའི་སྲོག་གང་ཡིན། དེ་དག་འཚོ་བ་ལེགས་པ་ཡིན། 71

བཙོམ་ལྡན་སྐྱེ་བ་སྟོ་མ་ལ། དེ་ཡིས་ལས་ངན་ཅི་ཞིག་བགྱིས།
གང་ཞིག་སྨིན་ནས་མཇུག་ཏུ་ནི། དེས་ཀྱང་གནས་སྐབས་ངན་པ་ཐོབ། 72

ས་བདག་མིག་ནི་མཆི་མ་དང་། བཅས་པས་འདི་དྲིས་བཙོམ་ལྡན་གྱིས།
གདུང་བ་ཞི་བྱེད་ཚིམས་ཀྱིས་ནི། ཟླ་འོད་སྤྲོ་ཞིང་དེར་བཀའ་སྩལ།
ས་སྐྱོང་ཤྲུ་ངན་མ་བྱེད་འདི། སྲིད་པར་གནས་པའི་རང་བཞིན་ནོ།
ཉམ་པ་འདི་ལྟར་དངོས་པོ་ནི། བདེན་པ་མིན་ཉམས་མི་རྟག་ཉིད། 74

འཁོར་བའི་ནགས་ནང་ཉམ་པར་ཡངས་པ་འདིར།
རང་བཞིན་གྱིས་གཡོ་དུས་ཀྱི་སྦུང་བ་དག།
རང་དགར་འབབ་པས་འགྲོ་སྲོག་མི་རྟག་གི།
གེ་སེར་ཚོགས་ལ་ཁམས་ཟས་བྱེད་པ་ཉིད། 57

ལོངས་སྤྱོད་བོ་ རླབས་དག་དང་མཚུངས་ཤིང་རི་དྭགས་འཛིགས་པའི་མིག་ལྟར་གཡོ།
དཔལ་འབྱོར་སྐད་ཅིག་མཆོད་བྲ་སྐྱེ་བའི་རྒྱ་གཏེར་ཉམ་པར་གསལ་བའི་གློག།
ལུས་ཀྱི་སྣྨདར་ལང་ཚོགསར་པའི་ཉི་འོད་གཞོན་ནུ་དམར་བ་གཡོ།
སྲོག་གི་ཐིགས་པ་སྲིད་པའི་ཤུ་ངམ་ཐང་ལ་ཤུར་དུ་འཛིག་པར་གྱུར། 76

हृदये विनिवेश्याशां प्राप्तः सुहृदमापदि ।
सुहृन्नैष्फल्यमायाति यस्य किन्तेन जीवता ॥ ७० ॥

मित्रोपकरणं लक्ष्मीर्देहो नोपकरणं धनम् ।
भीतोपकरणं प्राणा येषां तेषां सुजीवितम् ॥ ७१ ॥

कुकर्म्म किं कृतं तेन भगवन् पूर्व्वजन्मनि ।
यस्य पाकेन पर्य्यन्ते प्रपेदे सोऽतिदुर्द्दशाम् ॥ ७२ ॥

इति पृष्टः क्षितीशेन भगवान् साश्रुचक्षुषा ।
तमूचे तापशमनीं दिशन् दशनचन्द्रिकाम् ॥ ७३ ॥

मा शुचः पृथिवीपाल स्वभावोऽयं भवस्थितः ।
एवम्विधैव भावानामसत्यानामनित्यता ॥ ७४ ॥

विसारिसंसारवनान्तरेऽस्मिन्[१]
निसर्गलोलः किल कालभृङ्गः ।
स्वच्छन्दजातजनपुष्करजीवपुञ्ज-
किञ्जल्कपुञ्जमनिशं कवलीकरोति ॥ ७५ ॥

तरङ्गन्तो भोगाश्चकितहरिणीलोचनचलाः
क्षणोऽलक्ष्या लक्ष्मीर्जनजलदविद्योतनतड़ित् ।
शरीराब्जे बालातपचपलरागं नववयः
क्षयं याति क्षिप्रं भवमरुतटे जीवितकणः ॥ ७६ ॥

---

१ Original. विसारि संसारवनान्तेऽस्मिन्
नैस्वर्गलोलः किल कालभृङ्गः ।
स्वच्छन्दयातिजनपुष्पजीव-
किञ्जल्कपुञ्जं कवलीकरोतु ॥

ཡིད་ནི་བྱམས་པའི་སློད་གྱུར་གཞན་ལ་ཕན་པས་དགྱེས་ཤིང་ཆོས་ཀྱི་ནོར།
ཀྱིགས་པའི་ཚོགས་ཉམས་རབ་བཟོད་གཙོད་ཅིང་ཉམ་པར་སྤྱོད་ལ་ཡོངས་སུ་འདྲིས།
འདི་ནི་ཡུལ་གྱི་བདེ་ལས་ཕྱིར་ཕྱོགས་བདེ་ལྡན་དེ་ཉིད་ཚོལ་ཉམས་ཀྱི།
སྙིང་པོ་མེད་པའི་འཁོར་བར་ཉམ་འགྱུར་དག་དང་བྲལ་བའི་ཡོ་བྱད་མིན། 77

རྡོ་ཡིས་སྐྱུར་དུ་བཙོམ་པ་བཞིན། སྐྱེ་བོ་སྡུག་ལ་སྐྱ་ངན་བྱེད།
ཕོངས་པ་དྲག་པོ་དེ་ཐྲོག་པའི། བྱ་བ་སླར་ཡང་མི་བྱེད་དོ། 78

སྲིད་པའི་ངལ་དུབ་མཐོང་གྱུར་ཀྱང་། ཉམ་ཀུན་དབེན་པ་མེད་པ་ཡི།
སྐྱེ་བོ་འདི་དག་སྨོངས་པ་ལས། མི་དགོར་འདོད་པར་བྱེད་པ་ཅི། 79

བྲམ་ཟེ་རབ་བདེ་ཞེས་པས་སྨོན། འབད་ཞིག་ལས་རྟེན་ལ་ཕྲུག་དག།
མ་ཡི་ལག་ཏུ་བཞག་ནས་ནི། ཁྲུས་ལ་ཀླུང་གི་ངོགས་སུ་སོང་། 80

སྐབས་དེར་མ་དག་འོངས་པ་ཡིས། ཕྲུག་ན་ལྷུང་བཟེད་རང་སངས་གྱིས།
དེ་ཉིད་མདོན་པར་བཞེད་གྱུར་པ། དེས་ཀྱང་རབ་ཏུ་བཏུད་ནས་བྱིན། 81

དེ་ནས་དེ་ཡི་བུ་བཀྲིས་ནས། རིངས་པར་ཁྲུས་བྱས་ཡང་དག་འོངས།
ཟས་ནི་སྫོམ་པར་བྱེད་པའི་ཚེ། མ་ལ་རང་གི་ལ་ཕྲུག་གླངས། 82

བདག་གིས་མགྲོན་ལ་དེ་བྱིན་བུ། དགེ་ལ་རྗེས་སུ་ཡི་རང་བྱོས།
དེ་སྐད་མ་ཡི་ཚིག་ཐོས་ནས། དེ་ནི་མདའ་ཡིས་ཕྲུག་བཞིན་གྱུར། 83

मनो मैत्रीपात्रं परहितरतिर्धर्म्मधनता
मदोद्भेदच्छेदक्षमशमविचारे परिचयः।
अयं तत्त्वान्वेषो विषयसुखवैमुख्यसुखिना-
मसारे संसारे परिहृतविकारः परिभवः॥ ७७॥

जनः शोचति दुःखेषु क्षिप्रं हत इवात्मना।
न करोति पुनस्तीव्रतदापातप्रतिक्रियाम्॥ ७८॥

पश्यतोऽपि भवायासं निर्व्विवेकस्य सर्व्वथा।
क्रियते किं जनस्यास्य मोहादकुशलस्पृशः॥ ७९॥

पुरा विप्रः सुशर्म्माख्यः कुतश्चित् प्राप्य मूलकम्।
निधाय[१] जननीहस्ते ययौ स्नातुं नदीतटम्॥ ८०॥

सापि प्रत्येकबुद्धाय तां प्राप्ताय तदन्तरे।
प्रणता पात्रहस्ताय तद्देवाभिमुखी ददौ॥ ८१॥

अथ स्नात्वा समायातस्तत्सुतस्त्वरितं क्षुधा।
जननीं भोजनारम्भे ययाचे निजमूलकम्॥ ८२॥

पुण्यं पुत्रानुमोदस्व तन्मयातिथयेऽर्पितम्।
इति मातुर्वचः श्रुत्वा सोऽभूद्दिग्ध इवेषुणा॥ ८३॥

१ Orig. विधाय।

མགྲོན་ཁྱོད་འཕྲལ་ལ་མ་ཞུ་བས། གཟིར་ཅིང་དགུ་ནི་ཕྲུག་གྱུར་ནས།
མི་རྐྱང་བདག་གི་ལ་ཕྲུག་དག། སྲོག་དང་ལྡན་ཅིག་ཕྱིར་འབྱུང་ཤོག། 84

དེ་སྐད་སྨིག་པ་ཐོབ་པ་དེའི། ཤིན་ཏུ་རྩུབ་པའི་ཚིག་དེ་ཡིས།
མཇུག་ཏུ་མ་ཞུའི་ནད་ཉིད་ནི། སྐྱེ་བ་གཞན་བ་ཚམས་སུ་འགྱུར། 85

དེ་ཉིད་ད་ལྟ་གསལ་རྒྱལ་དེ། སྔ་མའི་བསོད་ནམས་གཞན་སྨིན་པས།
རྒྱལ་སྲིད་ཡངས་པ་ཐོབ་གྱུར་ནས། མཇུག་ཏུ་དེ་ཉིད་ཀྱིས་ཞིག་གྱུར། 86

འཁོར་བའི་ལམ་གྱི་མགྲོན་པོ་ལ། དགེ་དང་མི་དགེའི་ལས་ཁོ་ན།
ལོངས་སྤྱོད་སླད་དུ་ཉེར་བསྒྲུབས་པའི། ལམ་བརྒྱགས་བཞིན་དུ་ལག་ན་གནས། 87

དེ་སྐད་བཅོམ་ལྡན་དེ་ཡི་གསུང་། ཐམས་ཅད་བདེན་པ་ཐོས་ནས་ནི།
དེ་དེ་བཞིན་ཞེས་སེམས་བྱེད་ཅིང་། དེར་ཕྲུག་འཚལ་ནས་མི་བདག་སོང་། 88

སྐབས་འདིར་རྒྱལ་སྲིད་ཐོབ་པ་ཡི། འཕགས་སྐྱེས་པོ་ནི་ཤཱཀྱའི་ཁོན།
མདུན་ན་འདོན་གྱི་བུ་སོང་ནས། སྨྲན་པས་དེ་དག་བཀྲག་བཙོན་པ། 89

གླང་པོ་ཤིང་རྡོ་རྡོ་རྡུལ་གྱིས། རྨོངས་པས་བློ་བཞིན་ཕྱོགས་རྣམས་ནི།
ཉམ་དགྲེ་མེད་པ་ཉིད་བྱེད་ཅིང་། ཤཱཀྱའི་གྲོང་དུ་རབ་ཏུ་སོང་། 90

དེ་ཡི་སྤྱོད་ཚུལ་མ་བཟང་དེ། བཅོམ་ལྡན་ཀུན་མཁྱེན་གྱིས་མཁྱེན་ནས།
ཤཱཀྱའི་གྲོང་དང་ཉེ་བར་ནི། ག་ཤིགས་ནས་ཤིང་སྐམ་འོག་ཏུ་བཞུགས། 91

सद्यो विहूचिकार्त्तस्य मन्मूलकमनल्पकम्।
कुक्षिं भित्वा विनिर्यातु प्राणैः सह तवातिथेः॥ ८४॥

इति तस्याप्तपापस्य वाक्पारुष्येण भूयसा।
विहूचिकैव पर्य्यन्ते बभूवापरजन्मनि॥ ८५॥

प्राक्पुण्यान्तरपाकेन स एवाद्य प्रसेनजित्।
विपुलं राज्यमासाद्य तथैवान्ते क्षयं गतः॥ ८६॥

संसारपथपान्थानामेवं कर्म्म शुभाशुभम्।
पाथेयमिव हस्तस्थं भोगायैवोपपद्यते॥ ८७॥

इति श्रुत्वा भगवतस्तथ्यं पथ्यञ्च तद्वचः।
एवमेतदिति ध्यात्वा तं प्रणम्य ययौ नृपः॥ ८८॥

अत्रान्तरे प्राप्तराज्यः शाक्यवैरं विरूढकः।
पुरोहितसुतेनैत्य स्मारितस्तत्क्षयोद्यतः॥ ८९॥

प्रययौ शाक्यनगरं गजाश्वरथरेणुना।
[1]मोहेनेव दिशां कुर्व्वन् निर्व्विवेकं धियामिव॥ ९०॥

सर्व्वज्ञो भगवान् ज्ञात्वा तस्य तद् दुष्टचेष्टितम्।
गत्वा शाक्यपुरोपान्ते तस्थौ शुष्कतरोरधः॥ ९१॥

१ Original. मोहेनैव दिशामकुर्व्वन् धियामिव निर्व्विवेकताम्॥

རིང་ནས་དེ་ན་བཞུགས་པ་དེ། འཕགས་སྐྱེས་པོ་ནི་འོངས་པས་མཐོང་།
ཤིན་ཏེ་ལ་བབས་མདུན་དུ་ནི། མངོན་ཕྱོགས་རབ་ཏུ་བཏུད་ནས་སྨྲས། 92

འདབ་མ་སྟུམ་པའི་ཡལ་ག་ཅན། གྲིབ་མ་སྟུག་ནོམས་ཡོད་པ་ལ།
དེར་ནི་བཅོམ་ལྡན་མི་བཞུགས་པར། ཤིང་སྐམ་འོག་ཏུ་ཅི་ཞིག་མཛད། 93

ས་སྐྱོང་གིས་ནི་འདི་བརྗོད་ཚེ། བཅོམ་ལྡན་གྱོལ་བས་དེར་བཀའ་སྩལ།
མི་བདག་གཉེན་གྱི་གྲིབ་མ་ནི། ཙན་དན་པས་ཀྱང་ཤིན་ཏུ་བསིལ། 94

གཉེན་དང་མཚུངས་པའི་ནོར་རྫས་མེད། གཉེན་དང་མཚུངས་པའི་དགའ་བ་མེད།
གཉེན་དང་མཚུངས་པའི་མཛེས་མ་མེད། གཉེན་དང་ཚུངས་པའི་མཛའ་བོ་མེད། 95

ས་བདག་ཤཱཀྱ་འདི་དག་གཉེན། དེ་ལ་དགའ་བས་དེ་དག་གིས།
གྲོང་འགྲམ་འདབ་མ་བསྐམས་པ་ཡི། གང་འཕུང་འདི་ལ་དགའ་བ་སྐྱེས། 96

དེ་དག་ཐོས་ནས་བཅོམ་ལྡན་འདས། ཤཱཀྱའི་ཕྱོགས་སུ་ལྷུང་བར་ནི།
རིག་ནས་ཁྲོ་དང་བྲལ་བ་ཡི། འཕགས་སྐྱེས་པོ་ནི་ལོག་པར་གྱུར། 97

དེ་ནས་བཅོམ་ལྡན་འདས་ཀྱིས་ཀྱང་། ཤཱཀྱར་འཇིགས་པ་འབྱུང་མཁྱེན་ནས།
སེམས་ཅན་དག་པ་ནོམ་དག་ལ། དགེ་ལེགས་སྐད་དུ་ཆོས་བསྟན་མཛད། 98

ཁ་ཅིག་གིས་ནི་རྒྱུན་ཞུགས་འབྲས། གཞན་གྱིས་ལྷན་ཅིག་ཕྱིར་འོང་དང་།
ཕྱིར་མི་འོང་འབྲས་གཞན་གྱིས་ནི། དེ་ཡི་བཀའ་ཡིས་ཡང་དག་ཐོབ། 99

दूरात्तच स्थितं दृष्ट्वा तमागच्छन् विरूढकः।
अवतीर्य्य रथादग्रमभ्येत्य प्रणतोऽवदत् ॥ ९२ ॥

सत्सु स्निग्धपलाशेषु घनच्छायेषु शाखिषु।
भगवन्नच विश्रान्तिः किमु शुष्कतरोरधः ॥ ९३ ॥

इत्युक्तः क्षितिपालेन तं प्राह भगवान् जिनः।
ज्ञातिच्छाया नरपते चन्दनादपि शीतला ॥ ९४ ॥

नास्ति ज्ञातिसमं वित्तं नास्ति ज्ञातिसमा धृतिः।
नास्ति ज्ञातिसमा च्छाया नास्ति ज्ञातिसमः प्रियः ॥ ९५ ॥

ममैते भूपते शाक्या ज्ञातयस्तत्पुरान्तिके।
जातः प्रियोऽयं तत्प्रीत्या शुष्कशाखोऽपि पादपः ॥ ९६ ॥

श्रुत्वैतद्विरतामर्षः शाक्यानां पक्षपातिनम्।
भगवन्तं विदित्वैव न्यवर्त्तत विरूढकः ॥ ९७ ॥

भगवानपि शाक्यानां ज्ञात्वागामि भयन्ततः।
श्रेयसे शुद्धसत्त्वानां विदधे धर्म्मदेशनाम् ॥ ९८ ॥

स्रोतापत्तिफलं कैश्चित् सकृदागामि चापरैः।
अनागामिफलं चान्यैः सम्प्राप्तं तस्य शासनात् ॥ ९९ ॥

ལྷག་མ་བློ་གྲོས་བརྟན་པོ་ཡིས། ཀླུས་གནས་དེ་མ་ཐོབ་སྟེ།
གང་ཞིག་ཉིན་བར་རབ་རིབ་དག། འབྱུང་བའི་བྱ་ནི་འགའ་ཞིག་ཡོད། 100

དེ་ནས་མི་བདག་ལོག་པ་ཡིས། ཁྲོན་གྱི་སྦྲུལ་དག་ཉལ་བ་དག།
མདུན་ན་འདོན་གྱི་བུ་ཡིས་ནི། རབ་ཏུ་སད་པ་ཉམ་པར་བསྐུལ་བས། 101

དེ་ཡིས་བསྐུལ་བས་ཀླུའི་རིགས། གཞོམ་པའི་བློ་གྲོས་དེ་ཡིས་བྱས།
ཁྲོན་གྱི་མེ་ནི་རབ་འབར་བར། ཐྲ་མ་ཡི་ནི་རླུང་གིས་བྱེད། 102

འཇིགས་རུང་སྐྱེ་བོ་ངན་པ་ཡིས། སྔགས་ཀྱིས་འཕྲུལ་བསླད་མི་བསྲུན་པའི།
རོ་ལངས་དང་ནི་ས་སྲུང་དག། སྲུ་ཡི་སྒྲོག་ནི་འཕྲོག་བྱེད་མིན། 103

དེ་ནས་དེ་ཡི་དམག་དཔུང་ནི། གླང་པོ་ཤིང་རྟའི་མཆོག་རབ་དཀྲིགས།
ལམ་བཀག་ཀླུ་རྣམས་ཀྱི་ནི། གྲོང་ཁྱེར་ཡང་དག་འཁྲུགས་པར་གྱུར། 104

དེར་ནི་བཙོམ་ལྡན་འདས་ཀྱིས་ཀྱང་། ཀླུ་བསྲུང་སླད་ཕྱོགས་ལྷུང་ཞིང་།
ཡང་དག་བརྟོན་པ་མི་གཡལ་ལ། ཆེན་པོ་དག་ལ་བཀའ་སྩལ་པ། 105

ཀླུ་རྣམས་ཀྱི་ལས་ཀྱི་སྐྱོན། ཉམ་ཀུན་ནས་འདི་ཉེ་བར་གནས།
དེ་ལ་བསྲུང་བ་སྐྱབ་བྱེད་པ། ནམ་མཁའ་ལ་ནི་བགྲོད་སྟེགས་བརྟོགས། 106

སྐྱེས་བུ་རྣམས་ཀྱི་བསམ་ཡས་འཁོར་པ་དགེ་དང་མི་དགེ་དག།
འོང་དང་རབ་ཏུ་འགྲོ་ཡང་ཡུད་ཙམ་རང་དབང་མེད་པ་ནི།
ལས་ཀྱི་ཡི་གེ་རང་གི་སྐྱེ་བའི་གནས་ལ་རང་ལག་གིས།
བཀོད་པ་དག་ནི་ངེས་པར་དོན་མེད་ཅན་དུ་འགྱུར་བ་མིན། 107

शेषास्तु मूढ़मतयः शाक्याः प्रापुर्न तत्पदम्।
सन्ति केऽपि खगा येषां वासरे तिमिरोद्भवः ॥ १०० ॥

निवृत्तस्याथ नृपतेः पुरोहितसुतस्ततः।
वैरसर्पस्य सुप्तस्य विदधे प्रतिबोधनम् ॥ १०१ ॥

स तेन प्रेरितश्चक्रे मतिं शाक्यकुलक्षये।
वैरानलं प्रचलनं करोति पिशुनानिलः ॥ १०२ ॥

घोरदुर्जनमन्त्रेण सहसोत्थापिताः खलाः।
वेतालाः क्षितिपालाश्च न कस्य प्राणहारिणः ॥ १०३ ॥

सैन्ये गजरथोदग्रे ततस्तस्मिन् प्रसर्पति।
बभूव पुरसंक्षोभः शाक्यानां हृद्ववर्त्मनाम् ॥ १०४ ॥

तस्मिन् भगवान् रक्षार्थं शाक्यानां पक्षपातिनम्।
समुद्यतं तत्र महामौद्गल्यायनमब्रवीत् ॥ १०५ ॥

शाक्यानां कर्म्मदोषोऽयं सर्व्वथा समुपस्थितः।
तत्र रक्षाविधानन्ते गगने सेतुबन्धनम् ॥ १०६ ॥

पुंसामचिन्त्यविभवानि शुभाशुभानि
आयान्ति यान्ति च मुहुर्निरवग्रहाणि।
कर्म्माक्षराणि निजजन्मपदस्वहस्त-
न्यस्तानि नाम न भवन्ति निरर्थकानि ॥ १०७ ॥

དེ་སྐད་བཅོམ་ལྡན་གསུང་གིས་ནི། དེ་ལ་ཕྱག་འཚལ་དེར་ཕྱིན་ཏེ།
འཕགས་སྐྱེས་པོ་ནི་ཉེར་ལྷགས་པས། ཤཱཀྱ་རྣམས་ཀྱིས་འགྲོ་བ་བྱས། 108

སྒྲོག་དང་ལྡན་ཅམ་སྲུ་ལ་ཡང་། ཡུ་ཅག་འཚེ་བར་མི་བྱེད།
དགྲ་ཡིས་རབ་ཏུ་འཕངས་པའི་མདའ། ཡུ་ཅག་ལུས་ལ་འཛུགས་སུ་བས། 109

དེ་དག་དེ་ལྟར་གྲོས་བཟུང་སྟེ། ཁྲོ་བས་ལམ་ན་མདུང་བཟུང་སྟེ།
གཞུ་ནི་རབ་ཏུ་གདུངས་བྱས་ནས། ཕ་རོལ་འཛུག་ལ་བརྟེན་པས་གནས། 110

སྐབས་དེར་དོན་གྱི་སྦྱོར་བ་ལས། རང་གི་ཡུལ་ན་མི་གནས་པ།
ཤཱཀྱ་ཤམ་པ་ཀ་ཡིས་གྲོས། མི་ཤེས་པ་ནི་ཡང་དག་འོངས། 111

དེ་ཡིས་ས་བདག་གོ་བགོས་པས། གྲོང་ཁྱེར་བརླམས་པ་མཐོང་ནས་ནི།
ཁྲོས་ཏེ་གཅིག་པུས་གཡུལ་དུ་ཕྱིན། དེ་ཡི་དཔལ་རྣམས་བརླག་པར་བྱས། 112

གཡུལ་དུ་སྐྱེས་བུ་སེང་གེ་ཡིས། དཔའ་བོ་གླང་པོ་དེ་དག་བསད།
ཀླུ་རིག་གིས་བཞིན་གྲགས་པ་ཡིས། དགའ་བར་བྱས་པ་ཉིད་དུ་གྱུར། 113

གཞན་ལ་ཁྲོས་པར་གྱུར་པ་དེའི། རལ་གྲི་དེ་ནི་ཅི་ཡང་འབར།
གང་གིས་རབ་ཏུ་གདུང་བས་དེས། དགྲ་ཡི་རྒྱ་བོ་ཡངས་པར་སོད། 114

འཕགས་སྐྱེས་པོ་ནི་སྤྲོ་བ་ཉམས། འཕམ་ནས་རང་གི་གྲོང་ཁྱེར་སོང་།
དགྲ་ནི་བསད་པས་ཤམ་པ་ཀ། ཤཱཀྱས་ནང་དུ་འཇུག་མ་སྟེར། 115

इति वाक्याद् भगवतस्तस्मिन् याते प्रणम्य तम् ।
चक्रिरे सम्विदं शाक्याः प्रत्यासन्ने विरूढके ॥ १०८ ॥

हिंसास्माभिर्न कर्त्तव्या प्राणिमात्रस्य कस्यचित् ।
शराः शरीरमस्माकं विशन्त्वरिसमीरिताः ॥ १०९ ॥

इति सम्विदमाधाय ते वियष्टिकपाणयः ।
धीराः परीयमे तस्थुरवारयितकार्म्मुकाः ॥ ११० ॥

अत्रान्तरे कर्म्मयोगान्निजदेशानवस्थितः ।
अज्ञात्वा सम्विदं शाक्यः शम्पाकः समुपाययौ ॥ १११ ॥

स दृष्ट्वा नगरे बद्धसन्नाहं[1] वसुधाधिपम् ।
कोपादेकश्चकारास्य रणे सुभटसंक्षयम् ॥ ११२ ॥

युद्धे पुरुषसिंहेन हतास्ते वीरकुञ्जराः ।
प्रययुः स्पृहणीयत्वं यशोभिर्मौक्तिकैरिव ॥ ११३ ॥

स कोऽपि तस्य जज्वाल कोपितस्य परैरसिः ।
स ययौ यत्प्रतापेन विपुलां रिपुवाहिणीम् ॥ ११४ ॥

प्रवेशं न ददुः शाक्याः शम्पाकस्य द्विषां वधात् ।
स्वजनोऽपि परित्यक्तः स तैर्निस्त्रिंशकर्म्मणा ॥ ११५ ॥

---

१ Orig. बद्धसन्नद्धं ।

སྡིག་ལས་ཀྱིས་དེ་དེ་དག་གིས། ནང་མི་ཡིན་ཡང་ཡོངས་སུ་བཏང་།
དམ་པ་ཆོས་ཀྱི་གཉེན་ལྡན་རྣམས། རང་གིའང་མ་རུངས་ལ་ཕྱིར་ཕྱོགས། 116

དམ་པ་འོས་ཉིད་རྟག་པ་རྣམས། ནོར་རྫས་ལས་ཀྱང་གཏོང་ཕོད་དང་།
ཉང་མི་བས་ཀྱང་ལེགས་བྱས་དང་། ཚེ་སྲོག་བས་ཀྱང་གྲགས་པ་དགའ། 117

དེ་དག་གིས་ནི་བསྐྱེད་པ་དེ། མཐར་གྱིས་བཅོམ་ལྡན་དྲུང་དུ་ཕྱིན།
དེ་ལ་དགེ་ལེགས་སྐད་ཉིད་དུ། རང་གི་མཚན་མ་ཅུང་ཟད་བླངས། 118

བཅོམ་ལྡན་འདས་ཀྱི་རྫུ་འཕྲུལ་གྱིས། རང་གི་དབུ་སྐྲ་སེན་ཆ་བྱིན།
དེ་ཡིས་བླངས་ནས་བ་ཀུ་ར། ཞེས་པའི་དཀྱིལ་འཁོར་དག་ཏུ་སོང་། 119

དེར་ནི་ཤེས་རབ་མཐུ་དག་དང་། རྩལ་ཕོད་སྤྲོ་བ་ཡོན་ཏན་གྱིས།
དེ་ཡིས་རྒྱལ་སྲིད་ཐོབ་སྟེ་དཔལ། བློ་ལྡན་རྣམས་ལ་ཀུན་དུ་མོད། 120

དཔལ་འབྱོར་གྱུང་བོའི་མཚན་ཉིད་དེ། གྲགས་པ་མཁས་པའི་ལྷན་སྐྱེས་ཡིན།
གྲུབ་པ་ཐམས་ཅད་ཆུང་མ་ནི། རྟག་འགྲུས་ལྡན་པ་རྣམས་ཀྱི་ཡིན། 121

དེ་ནས་དེར་ནི་དེར་གནས་ཏེ། བཅོམ་ལྡན་དབུ་སྐྲ་སེན་ཆ་ལ།
རིན་ཆེན་མཆོག་གི་རབ་མཛེས་པའི། མཆོད་རྟེན་རབ་ཏུ་གནས་པར་བྱས། 122

འཕགས་སྐྱེས་པོའང་ཁྲོན་གྱིས་ནི། ཕ་རོལ་བསྒྲལ་འདོད་སྐད་ནས་ཡང་།
སྐོ་དབྱེའི་རིགས་པས་འཕྲུལ་ཉིད་ལ། ཤཱཀྱ་རྣམས་ཀྱི་གྲོང་དུ་ཞུགས། 123

निर्जेऽपि विमुखाः[१] क्रूरे साधवो धर्म्मबन्धवः।
धनादपि वदान्यत्वं सुकृतं स्वजनादपि॥ ११६॥

* * * *

शतमौचित्यनित्यानामायुषोऽपि यशः प्रियम्॥ ११७॥

निर्व्वासितः स तैः प्राप्तः शनैर्भगवतोऽन्तिकम्।
ययाचेऽभ्युदयायैव तं किञ्चिन्निजलाञ्छनम्॥ ११८॥

कट्टं भगवता दत्तं निजकेशनखांशकम्।
स जगाम समादाय वाकुड़ं नाम मण्डलम्॥ ११९॥

तत्र प्रज्ञाप्रभावेण शौर्य्योत्साहगुणेन च।
स प्राप राज्यं धीराणां सर्व्वत्र सुलभाः श्रियः॥ १२०॥

दक्षाणां लक्षणं लक्ष्मीः सहजं विदुषां यशः।
व्यवसायसहायानां कलत्रं सर्व्वसिद्धयः॥ १२१॥

तत्र स्थिते भगवतः सोऽथ केशनखांशके।
स्तूपप्रतिष्ठामकरोद्दररत्नविराजिताम्॥ १२२॥

विरूढकोऽपि शाक्यानां वैरपारतितीर्षया।
पुनर्युक्त्या पुरद्वारभेदेन सहसाविशत्॥ १२३॥

---

१ Original निर्जिते विमुखाः।

དེར་ནི་ཤཱཀྱ་སྟོང་ཕྲག་དག། བདུན་ཅུ་ཙ་བདུན་རབ་ཏུ་བསད།
དེ་ནས་བུ་མོ་གཞོན་ནུ་རྣམས། སྟོང་ཕྲག་དེ་ཡིས་བཅིངས་ནས་ཁྲིད། 124

ཤཱཀྱ་བརྒྱ་ཕྲག་ལྔ་རྣམས་ནི། ལྷུགས་དང་སླང་བོའི་འཇོམས་བྱེད་ཀྱི།
རབ་ཏུ་བཅོམ་ནས་གྲོང་ཁྱེར་ནི། མཐར་བྱེད་གྲོང་ཁྱེར་བཞིན་དུ་བྱས། 125

བཅོམ་ལྡན་གྱིས་ཀྱང་ཤཱཀྱ་རྣམས། དགྲ་རྣམས་ཀྱིས་ནི་བརླག་བྱས་པ།
ལས་ཀྱིས་རྗེས་སུ་བཅིངས་མཁྱེན་ནས། སྐད་ཅིག་ཐུགས་ནི་འབྱུང་བར་མཛད། 126

སྐྱིར་རྗེ་གྲུས་པའི་དགེ་སློང་རྣམས། དེ་ལ་མངོན་དུ་ཕྱོགས་ཏེ་དྲིས།
ཤཱཀྱ་རྣམས་ཀྱིས་ལས་ཅི་བསྐྱབས། འཇིགས་རུང་གང་གི་འབྲས་འདི་གང་། 127

དེ་སྐད་དྲིས་དྲིས་བཅོམ་ལྡན་འདས། ཐམས་ཅད་མཁྱེན་པས་དེར་བཀའ་སྩལ།
རང་གི་ལས་ཀྱི་རྣམ་སྨིན་གྱིས། ཤཱཀྱ་རྣམས་ནི་བརླག་པ་འདི། 128

ཉ་པ་རྣམས་ཀྱིས་ཆུ་ནང་ནས། སྔོན་ཚེ་ཉ་ཆེན་གཉིས་ཞིག་བྲངས།
ཉ་ནི་ཧྲིག་ཏུ་རབ་བཅད་པའི། གདུང་བ་ཆེན་པོ་དག་གིས་བསད། 129

དུས་ཀྱིས་སྐྱེ་བ་གཞན་ལ་ནི། དེ་རྣམས་ཆོས་ཀུན་ཉིད་གྱུར་པ།
ནོར་ནི་འཕྲོག་པས་དེ་དག་ཉིད། ཆོས་ཀུན་དུ་གྱུར་བསྒྲིགས་ནས་བསད། 130

ཉ་དེ་དག་དང་ཁྲིམ་བདག་དེ། འཕགས་སྐྱེས་པོ་དང་མདུན་ན་འདོན།
ཉ་པ་དང་ནི་ཆོས་ཀུན་པའི། ཤཱཀྱ་རྣམས་ཀྱིས་བསད་པར་གྱུར། 131

हत्वा तत्र सहस्राणि शाक्यानां सप्तसप्तति ।
बद्ध्वा कन्याकुमाराणां स सहस्रमथाहरत् ॥ १२४ ॥

शतानि पञ्च शाक्यानां गजैर्लोहैश्च मर्द्दनैः ।
सम्प्रमृज्य पुरीञ्चक्रे कृतान्तनगरीमिव ॥ १२५ ॥

भगवानपि शाक्यानां[1] शत्रुणा भेदनं कृतम् ।
कर्म्मानुबद्धं विज्ञाय बभूव विमनाः क्षणम् ॥ १२६ ॥

पप्रच्छुस्तं समभ्येत्य भिक्षवः करुणाकुलाः ।
किं कर्म्म विहितं शाक्यैर्घोरं यस्येदृशं फलम् ॥ १२७ ॥

भगवानिति तैः पृष्टः सर्व्वज्ञस्तानभाषत ।
निजकर्म्मविपाकेन शाक्यानामेष संक्षयः ॥ १२८ ॥

कृष्टौ पुरा महामत्स्यौ धीवरैः सरितोऽन्तरात् ।
तदा निकृत्तौ शल्येन भूयोऽप्यव्यथयन् धृतौ ॥ १२९ ॥

कालेन चारुतां यातैस्तैरेव परजन्मनि ।
हतौ गृहपती दग्ध्वा तावेव धनहारिभिः ॥ १३० ॥

तौ मत्स्यौ तौ गृहस्थौ च विरूढकपुरोहितौ ।
दासानां तस्कराणाञ्च शाक्यानां मृत्युतां गतौ ॥ १३१ ॥

---

१ Orig. शत्रूणां ।

བཅོམ་ལྡན་འདས་ཀྱི་འདི་ཐོས་ནས། དགེ་སློང་རྣམས་ཀྱིས་ལས་རྣམས་ཀྱི།
འབྲས་བུའི་རྒྱུ་ནི་བསྒྲུབ་བ་དག མེད་པ་ཉིད་དུ་ངེས་པར་གྱུར། 132

དེ་ནས་རྒྱལ་བས་ངན་གྲགས་པའི། འཕགས་སྐྱེས་པོ་ནི་རང་གྲོང་སོང་།
བུ་ནི་རྒྱལ་བྱེད་ཅེས་བྱ་བའི། བྱིས་པ་རྩེ་བས་མཛོད་ལ་སྨྲས། 133

ཀླུ་གཅིག་ཤཱཀྱ་ཙི་ལ་གསོད། དེས་ནི་ཡུལ་ལ་གནོད་མ་བགྱིས།
དེ་སྐད་བརྗོད་པའི་རང་གི་བུ། འཕགས་སྐྱེས་པོ་ཡིས་བསད་པར་གྱུར། 134

ཁྲོས་ཁྲོབ་གནོད་པ་གོམས་པ་ལས། གླང་པོ་བཞིན་དུ་སྨྱོ་བོ་ངན།
ངེས་པར་སྣང་དང་ཉིད་པ་དང་། འཛོམས་པ་ཉིད་དུ་ཅི་མི་བྱེད། 135

རང་གི་དཔུང་པ་ལྷ་བྱེད་ཅིང་། མདུན་སར་འདུག་ནས་དེས་སྨྲས་པ།
ཀྱེ་མ་བདག་གི་གཟི་བྱིན་མེར། དགྲ་རྣམས་ཕྱི་མ་ལེབ་ལྷར་བཅོམ། 136

བདག་གི་དཔུང་སྟོབས་འདི་གཉིས་ནི། མཐར་བྱེད་རྟ་བབས་ཀ་བ་སྟེ།
ཤཱཀྱ་རྣམས་ནི་མ་ལུས་པ། གསོད་པ་གདམས་བྱེད་བླ་མར་གྱུར། 137

དེ་ཡི་ཚལ་ལ་བསྟགས་པ་དེ། ཤཱཀྱའི་བུ་མོ་བཟུང་བ་དེས།
ཐོས་ནས་ཡིད་འབྱུང་དྲག་པོ་ཡིས། གདོང་པ་བདུད་ནས་རབ་སྨྲས་པ། 138

ལས་ཀྱི་ཞགས་པས་བཅིངས་པ་ཡི། ལུས་ཅན་རྣམས་ལ་བྱ་བཞིན་དུ།
འཆི་བ་བསྒོམ་པའི་ནུས་པ་དག གཤོག་པ་ལྡན་ཡང་ཡོད་མ་ཡིན། 139

इति श्रुत्वा भगवतः कर्म्मणां फलसन्ततिम्।
अविसम्वादिनीमेव मेनिरे सर्व्वभिक्षवः॥ १३२ ॥

विरूढकोऽथ स्वपुरं प्राप्य विजयदुर्म्मदः।
जेतानाम्ना सुतेनोक्तः प्रणयाद्बाललीलया॥ १३३ ॥

देव किं निहताः शाक्या न तेऽस्माकं कृतागसः।
इति ब्रुवाणमवधीन्निजसूनुं विरूढकः॥ १३४ ॥

निपातमतिमत्ततानि निर्हन्ति न करोति किम्।
मदलब्धवधायासो मातङ्ग इव दुर्जनः॥ १३५ ॥

स जगाद सभासीनः स्वभुजाववलोकयन्।
अहो नु मम तापाग्नौ द्विषद्भिः शलभायितम्॥ १३६ ॥

कृतान्ततोरणस्तम्भौ प्राज्यौ मम भुजाविमौ।
निःशेषवधदीक्षायां शाक्यानां गुरुतां गतौ॥ १३७ ॥

तं तस्य विक्रमं श्लाघ्यं हृतास्ताः शाक्यकन्यकाः।
श्रुत्वा बभाषिरे तीव्रमुद्वेगनमिताननाः॥ १३८ ॥

कर्म्मपाशनिबद्धानां खगानामिव देहिनाम्।
निधनोल्लङ्घने शक्तिर्नास्ति पक्षवतामपि॥ १३९ ॥

གང་གི་མི་ནི་ཞི་བར་བྱེད་པའི་རྒྱུ་དེ་དག་ནི་རྟ་གདོང་གིས་ཟ་ལོ།
འབད་རྩོལ་ཆུང་དུས་ཟ་བའི་སྲུན་པ་དུས་སུ་ཚ་ཟེར་ལྡན་པ་འཛིན་པར་བྱེད།
ཡོངས་སུ་བལྟ་བའི་ལམ་གྱི་ཡུལ་མིན་ངོ་མཚར་དང་བཅས་སྤྱོད་པ་དག་གི་གནས།
ལས་དང་ལྡན་པའི་རྒྱུད་ཀྱི་གདམས་པ་འདི་ཀུན་སུ་ཡི་བྱ་བར་བཟོད། 140

དེ་དག་ཐོས་ནས་མི་ཡི་བདག། ཀྱང་པས་བཅོམ་པའི་ལྟོས་འགྲོ་བཞིན།
འཇིགས་རུང་ཁྲོ་བའི་དུག་གྱིས་ནས། འདི་ཡི་ལག་པ་ཆོད་ཅེས་བསྒོས། 141

གང་གི་འགྲམ་དུ་དེ་ཡིས་ནི། ལག་པ་གཅོད་པའི་སྡིག་ལས་བྱས།
རྫིང་བུ་ལག་པའི་སྙིང་པོ་ཞེས། ད་ལྟ་ཡང་ནི་ས་ལ་གྲགས། 142

འཁྲི་ཤིང་ལ་ཡང་ལྗོ་སྙིང་མེ། པད་ལྡན་ལ་ཡང་སོག་ལེའི་སོ།
འཕྲེང་བ་ལ་ཡང་རྡོ་རྗེའི་ཚར། བརྩེ་མེད་འབེབས་སུ་འཇུག་པ་ཉིད། 143

ལག་པའི་པདྨོ་བཅད་དེ་ནམས། དེར་ནི་གདུང་བ་དྲག་པོས་གཟིར།
བཅོམ་ལྡན་སྐྱབས་འོས་བློ་ཡིས་ནི། བསྒོམས་ནས་སྐྱབས་སུ་སོང་བར་གྱུར། 144

དེ་དག་གནད་བསྣུན་གདུང་བ་ནི། དྲག་པོ་ཀུན་མཁྱེན་གྱིས་མཁྱེན་ནས།
དེ་དག་ཡང་དག་དབུགས་འབྱིན་པར། འོས་པ་བདེ་སོགས་ལྷ་མོར་བསམས། 145

དེ་ཡིས་རིག་པས་ལག་པར་སྐྲེས། དེ་ཡིས་ལྷ་ཡི་གོས་ཀྱིས་གཡོགས།
དེ་དག་སེམས་ནི་རབ་དང་བཅས། ལུས་བདང་མཐོ་རིས་སོང་བར་གྱུར། 146

येनाग्निः शममेति तत्किल जलं प्राप्नोत्यलं वाड़वः
तीग्मांशुग्रहणं करोति समये हेलावलेह्यं तमः ।
पर्य्यालोचनवर्त्मनामविषयं साश्चर्य्यचर्य्यास्पदं
सर्व्वं कार्म्मिकतन्त्रयन्त्रितमिदं कः कस्य कर्त्तुं क्षमः ॥१४०॥

एतदाकर्ण्य नृपतिः पदान्तर इवोरगः ।
करच्छेदं दिदेशासां घोरामर्षविषोत्कटः ॥ १४१ ॥

तीरे यस्याः कृतं तासां पाणिच्छेदनवैशसम् ।
साद्यापि हस्तगर्भेति ख्याता पुष्करिणी भुवि ॥ १४२ ॥

लतास्वपि कुकूलाग्निं क्रकचं नलिनीष्वपि ।
[1]मालास्वपि शिलावर्षं पातयन्त्येव निर्घृणाः ॥ १४३ ॥

ताश्छिन्नपाणिकमलास्तत्र तीव्रव्यथातुराः ।
भगवन्तं धिया ध्यात्वा शरणं शरणं ययुः ॥ १४४ ॥

तासां विज्ञाय सर्व्वज्ञस्तीव्रां मर्म्माहतिं व्यथाम् ।
शचीमचिन्तयद्देवीं तत्समाश्वासनोचिताम् ॥ १४५ ॥

तत्स्पर्शजातहस्ताभास्ता दिव्यवसनावृताः ।
ययुश्चित्तप्रसादेन ताः स्वर्गं त्यक्तविग्रहाः ॥ १४६ ॥

१ Original मालासु विशिलापर्जं ।

ལྷ་པད་ཨུཏྤལ་གྱིས་མཚན་ལུས། ལྷ་ཡི་བུ་མོ་ཉིད་ཐོབ་ནས།
སྟོན་པས་ཆོས་འདི་བསྟན་པ་ཡིས། དེ་དག་ཡངས་པའི་གནས་སུ་སོང་། 147

དགེ་སློང་གིས་དྲིས་བཅོམ་ལྡན་གྱིས། དེ་དག་ལས་འབྲས་མངོན་པར་གསུངས།
འདི་དག་ལག་པ་གཡོ་བཞིན་དུ། དགེ་སློང་དག་ལ་མཐོ་འཚམས་བྱས། 148

དེ་ཡི་ལས་ཀྱི་རྣམ་སྨིན་གྱིས། མི་འདོད་པར་ནི་རབ་ཏུ་ལྷུང་།
ང་ལ་སེམས་ནི་དད་པ་ཡིས། འདི་དག་དགེ་བའི་འགྲོ་བ་ཐོབ། 149

ལས་འབྲས་སྨིན་པ་རྣམ་བརྒྱ་ཉིད། དེ་སྐད་བརྗོད་ནས་བཅོམ་ལྡན་གྱིས།
དེ་ཡི་ཞར་ལ་དགེ་སློང་དག། རྣམས་ལ་ཆོས་ནི་བསྟན་པར་མཛད། 150

སྐབས་འདིར་རྒྱལ་པོས་བཏང་བ་ཡི། གསང་གནས་སྤྱོད་པའི་ཉན་ནོ་ཡིས།
བཅོམ་ལྡན་འདས་ཀྱི་སྤྱོད་ཤེས་ནས། འཕགས་སྐྱེས་པོ་དང་ཉེ་བར་སོང་། 151

དེ་སྐྱས་ལྷ་གཅིག་དགེ་སློང་རྣམས། མདུན་དུ་དེ་ཡིས་འདི་སྐད་གསུང་།
ས་བདག་དེ་ཡི་རང་ལས་ཀྱི། འབྲས་བུ་ཉེ་བར་བདག་གིས་མཐོང་། 152

སྔོན་པོ་མདུན་ན་འདོན་བཅས་དེ། ཞག་བདུན་ན་ནི་མེས་ཚིག་ནས།
དམྱལ་བ་མནར་མེད་ཅེས་བྱ་བ། བརྗོད་དཀའ་དག་ཏུ་ལྷུང་བར་འགྱུར། 153

དེ་སྐད་དེ་ཡི་ཚིག་ཐོས་ནས། མི་བདག་མདུན་ན་འདོན་དང་བཅས།
ཆུ་ཡི་འཁྲུལ་འཁོར་ཁང་ནང་དུ། ཞག་བདུན་འབད་པས་གནས་པར་བྱས། 154

देवकल्पास्तमासाद्य दिव्यपद्मोत्पलाङ्किताः ।
धर्म्मदेशनया शास्तुस्ताः प्रापुर्विपुलं पदम् ॥ १४७ ॥

भिक्षुभिर्भगवान् पृष्टस्तं कर्म्मफलमभ्यधात् ।
पाणिचापल्यमेताभिः कृतं भिक्षुविडम्बने ॥ १४८ ॥

कर्म्मणस्तस्य पाकेन विशसे पतिताः परम् ।
मयि चित्तप्रसादेन प्राप्ताश्चैताः शुभां गतिम् ॥ १४९ ॥

इत्युक्त्वा भगवान् कर्म्मफलपाकविचित्रताम् ।
भिक्षूणां तत्प्रसङ्गेन विदधे धर्म्मदेशनाम् ॥ १५० ॥

अत्रान्तरे गूढचारी राज्ञा प्रणिहितश्चरः ।
भगवच्चरितं ज्ञात्वा विरूढकमुपाययौ ॥ १५१ ॥

सोऽवदद्देव भिक्षूणां तेनेदं कथितं पुरः ।
स्वकर्म्मफलमासन्नं तस्य पश्यामि भूपतेः ॥ १५२ ॥

सप्ताहेनाग्निना दग्धः स पापात्मा पुरोहितः ।
अवीचिनाम्निनरके दुःसहे निपतिष्यति ॥ १५३ ॥

इति तद्वचनं श्रुत्वा नृपतिः सपुरोहितः ।
यत्नादुवास सप्ताहं जलान्वितगृहान्तरे ॥ १५४ ॥

ཞག་བདུན་མཇུག་ན་སྐད་ཅིག་ལ། ཕོ་བྲང་འཁོར་དུ་སོང་བ་དེས།
མི་ཤེལ་ཉི་མའི་འོད་དག་གི། སྦྱོར་བས་མེ་ནི་རབ་ཏུ་འབར། 155

འཇིག་པའི་རླུང་གིས་གཙུབས་པ་ལྟ་བུར་རབ་ཏུ་འབར་བ་རྩེ་མོ་ཅན།
རྫིག་ཅེས་སྒྲོགས་པས་དེ་ནི་ཧུར་བས་ངེས་བསྒྲིགས་དཀྱུལ་བའི་མེ་དག་ཐོབ།
སྡིག་ཅན་ཚོམས་ལ་འཇིག་རྟེན་འདི་དང་གཞན་དུའང་སྤྱོད་ཀུན་འབར་བས་ཁེངས།
བསོད་ནམས་བསྟེན་ལ་ཐམས་ཅད་ཁོ་ནར་བརྟན་ཞིང་གདུང་བའི་ས་བཞི་བསིལ། 156

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་འཕགས་སྐྱེས་པོའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཅུ་གཅིག་པའོ།།

क्षणावशेषे सप्ताहे तस्मिन्नन्तःपुरं गते।
सूर्य्यकान्तार्कसन्तापयोगाज्जज्वाल पावकः॥ १५५॥

उद्भूतेन प्रलयपवनावर्त्तिनेवाशु[1] वेगा-
न्निर्दग्धोऽसौ धगिति शिखिना नारकं प्राप वह्निम्।
अस्मिन् लोके ज्वलनजटिलाः पापिनां प्रेत्य रागाः
सर्व्वैवैव स्थिरसुखभुवः शीतलाः पुण्यभाजाम्॥ १५६॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां विरूढकावदानं नाम एकादशः पल्लवः॥

CHAPTER XII.

ཡལ་འདབ་བཅུ་གཉིས་པ།

འཕྲོག་མའི་རྟོགས་བརྗོད་ནི།

དམ་པ་བདུད་རྩིའི་བརྟན་པའི་ཞལ་དང་རི་བོང་ཅན་ཟེར་དག།
སྡུག་བསྔལ་ཞི་བྱེད་བདེ་བ་ཕུན་སུམ་ཚོགས་པ་སྦྱིན་པར་བྱེད།
སྐྱེ་བོ་རྣམས་ནི་ཡང་དག་འཚོ་བྱེད་རབ་རིབ་འཕྲོག་པར་བྱེད།
དམ་པའི་ཡིད་ཀྱི་ཚོ་ནི་ཉམ་པར་གྱུར་ཞིང་དགོད་པར་བྱེད། 1

གྲོང་ཁྱེར་རྒྱལ་པོའི་ཁབ་ཅེས་པ། ས་ཡི་སྙིང་པོར་གཟུགས་ཅན་སྙིང་།
མཐའ་དག་ས་བདག་སྙིང་པོ་ནི། ས་ཡི་བརྒྱ་བྱིན་བྱུང་བར་གྱུར། 2

གང་གིས་དཔུང་པ་ས་ཡིས་རྟེན། སེམས་ནི་བཟོད་པའི་རྟེན་དག་ལ།
ཁུར་ནི་བཀོད་པའི་སྐྱེ་བོ་རྣམས། བསམ་པ་མཐའ་དག་ཕྱི་རོལ་གྱུར། 3

གང་གི་གདོང་དང་རྡུལ་ཕོད་ཀྱིས། རི་ཕྱོགས་ཡོངས་སུ་རྫོགས་བྱེད་ཅིང་།
ལག་པ་རིན་ཅན་ཚོགས་ལ་ཡང་། རལ་གྲི་འཛིན་ལ་དམ་པར་གྱུར། 4

ནམ་ཞིག་དེ་ཡི་གྲོང་ཁྱེར་དུ། ཉེ་བར་འཚོ་བ་ལྷི་བ་བྱུང་།
མི་བསྒྲུན་གསར་དུ་མངོན་དང་བས། ཀུན་དུ་རྡིགས་སྐྱེས་བཞིན་དུ་འཁྲུགས། 5

द्वादशः पल्लवः ।

हारीतिकादमनावदानम् ।

दुःखं नुदन्ति सुखसम्पदमादिशन्ति
सञ्जीवयन्ति जनतां तिमिरं हरन्ति ।
सन्मानसस्य कलयन्ति विकाशहासम्
सन्तः सुधार्द्रवदनाः शशिनः कराश्च ॥ १ ॥

विम्बिसारः क्षितेः सारे पुरे राजगृहाभिधे ।
सारः समस्तभूपानामभूद्भूमिपुरन्दरः ॥ २ ॥

क्षमाधारे भुजे यस्य क्षमाधारे च चेतसि ।
बाह्यः समस्तचित्तानामाशु न्यस्तकरो जनः ॥ ३ ॥

कुर्वतस्त्यागशौर्याभ्यामाशायाः परिपूरणम् ।
पाणौ विमुक्तरत्नौघे सुबद्धोऽभूदसिग्रहः ॥ ४ ॥

कदाचिदभवत्तस्य विप्लवो नगरे गुरुः ।
न वाभ्युदयसञ्जातदर्पकाल इवाकुलः ॥ ५ ॥

སྐྱེ་བོའི་བསམ་པའི་སྐབས་ཕྱེ་སྟེ། མདུན་སར་ཡང་དག་བཞུགས་པ་ནི།
སྐྱེ་རྒུའི་ཕ་ལྟར་གྱུར་དེ་ལ། གྲོང་ཁྱེར་པ་ཡིས་སྐྱེ་བོས་ཞུས། 6

ལྷ་གཅིག་ལྷ་ཡི་མཐུ་ལྡན་པ། ཁྱོད་ཀྱི་བཀའ་ཡིས་དུལ་བ་ཡི།
སྐྱེ་བོ་དྲག་དུ་གྱོ་ལྡན་འདི། ལུགས་ལ་རབ་ཏུ་མི་འདོད། 7

དམ་པའི་ལམ་ནས་རང་བཞིན་གྱིས། རབ་ཞུགས་སྐྱེ་བོ་འདི་དག་ལ།
ཉེ་བར་འཚེ་བ་རབ་གྱིས་འདི། གློ་བུར་དག་ཏུ་ག་ནས་འོངས། 8

རང་གི་ཆོས་ལ་ཞུགས་དགའ་བའི། ལས་དང་རྒྱལ་པོ་བཟང་པོས་ཀྱང་།
སྨྲས་པར་གྱུར་པའི་མི་རྣམས་ནི། ཀོད་པ་དག་ཏུ་ལྡང་བ་མིན། 9

བདག་ཅག་རྣམས་ཀྱི་ཁྱིམ་ཁྱིམ་དུ། སྦྲམ་མ་བཙས་པའི་བུ་ཚ་རྣམས།
བྲུ་བ་ལེགས་པའི་འབྲས་བུ་དག། མ་བསྨམས་པ་ལས་བཞིན་དུ་འཕྲོག། 10

དེ་ཅི་མི་ཤེས་འབྱུང་པོ་འམ། ཡང་ན་ཤིན་ཏུ་ཆེ་བའི་རྒྱུ།
གང་གི་མཐུ་ཡིས་རིགས་དག་ནི། བུ་བརྒྱུད་བྲལ་བ་ཉིད་དུ་བྱེད། 11

དེ་དག་ཚིག་ངེས་ས་བདག་ལ། དེ་ཡི་གདུང་བ་འཕོས་པར་གྱུར།
དམ་པའི་ནང་དུ་ཕ་རོལ་གྱི། སྡུག་བསྔལ་ཞིང་ལ་ཆུ་བཞིན་འཇུག། 12

ཡན་ལག་ཀུན་ལ་ཁྱབ་བྱེད་པ། སྐྱེ་བོའི་སྡུག་བསྔལ་ཆེན་པོ་དེས།
དུག་གི་བཞིན་དུ་བསྒྲུབས་པས་དེ། སྐད་ཅིག་སྙིང་ནི་རབ་འཁྲུམ་གྱུར། 13

तमास्थानसमासीनं जनचिन्ताङ्कितक्षणम् ।
व्यजिज्ञपत सौराजं प्रजानां जनकोपमम् ॥ ६ ॥

देव दिव्यप्रभावस्य नियतः शासनेन ते ।
जनः सदा समुद्रोऽयं मर्य्यादां नातिवर्त्तते ॥ ७ ॥

येनास्य कृतवृत्तस्य सन्मार्गेण प्रसर्पतः ।
उपसर्गोऽगमः कस्मादकस्मादयमागतः ॥ ॥ ८ ॥

स्वधर्म्मसम्वृत्तेन हि कर्म्मणा शर्मणा नृणाम् ।
सुनृपे न च गुह्यानामापतन्ति विपत्तयः ॥ ९ ॥

ह्रियन्ते नः प्रसूतीनां गृहिणीनां गृहे कथा ।
अपत्यानि फलानीव सत्क्रियाणामसंयमात् ॥ १० ॥

किन्तु भूतान् न विद्मस्तान् मायाञ्चापि महीपते ।
यत्प्रभावेण नीयन्ते कुलानि निरपत्यताम् ॥ ११ ॥

इति तेषां गिरा भूभृदभूत् संक्रान्ततद्व्यथः ।
परं दुःखं विशत्यन्तः सतां केदारवारिवत् ॥ १२ ॥

सर्व्वाङ्गव्यापिना तेन जनदुःखेन भूयसा ।
विषेणेवावृतः सोऽभूदुद्भ्रान्तहृदयः क्षणम् ॥ १३ ॥

དེ་སྐྲུས་དཔུང་པའི་དབང་དང་ནི། སྐྱེས་བུ་མིན་པ་འདིར་ཅི་བྱ།
མི་མཆོད་པ་དེ་ཕྱིར་བཅོས་པ། ཇི་ལྟར་ཁྲོ་ནར་བཅོམ་པར་བྱ། 14

ཁྱོད་རྣམས་དེ་རིང་ཉིམ་གཅིག། རང་རང་གནས་སུ་འགྲོ་བར་བྱོས།
ཁྱོད་ཀྱི་བུ་ཚ་འཛིག་བསྐྱང་བ། བརྡུལ་ཞུགས་བཅས་པས་ངེས་པར་བསམས། 15

དེ་སྐད་ཀྲོལ་བའི་གསུང་ཐོས་ནས། གྲོང་པ་ཆེན་པོ་མགུ་རྣམས་ཀྱིས།
མཆོད་པ་གསལ་བྱེད་ཐལ་མོ་དག། ཡང་དག་སྦྱར་ནས་དེ་ལ་སྨྲས། 16

ལྷ་གཅིག་ཁྱོད་ཀྱི་ངེས་འཛིན་དང་། བྲམས་དང་རྗེས་སུ་ཐོས་པས་ཀྱང་།
ཁྱོད་ལ་བསམས་པ་ནམ་བཀོད་པ། བདག་ཅག་ད་ནི་ངལ་བ་མེད། 17

ཁྱོད་ཀྱི་བཀའ་དྲིན་མི་རྩུབ་ཅིང་། ཡིད་དུ་འོང་བས་རབ་གཟིགས་པ།
འདི་ཉིད་སྐྱེ་བོ་འདི་དག་ནི། འཚོ་བ་ཉིད་ཀྱིས་ཆད་འདག་བཞིན། 18

ཅི་ཡང་ཁྱོད་ཀྱི་བསྒྲུང་འདི་དག། བདུད་རྩི་དག་དང་མཚུངས་ཤིང་དགའ།
གདུང་བ་འཕྲོག་བྱེད་འཇམ་ཞིང་མཉེན། ངེད་ཀྱིས་ཅི་དང་ཅི་མི་སྒྲུབ། 19

མཁས་ཤིང་བྲུས་ཤེས་སྙིང་རྗེའི་གཏེར། མཐོང་བ་རྟེད་སྣ་དྲང་པོར་གྱུར།
སྐྱེ་བོ་ལེགས་པའི་རྗེ་བོ་ནི། སྐལ་བ་སྐྱིད་པ་དག་གིས་ཐོབ། 20

དམ་པའི་སེམས་ལ་གནས་པའི་དམ་པ་རྣམས་ཀྱིས་ཡོངས་འདྲིས་བདུད་རྩི་དག་པས་ཀྱང་།
ཤིན་ཏུ་མཉེས་ག་ཤིན་ཆོག་ནི་ལྷ་པ་བས་ཀྱང་མཚན་འོས་སྟོན་ཟླའི་འོད་ཚོགས་པས།
སྤྱོད་པའི་ཀུན་དགའི་ཚོགས་སྟེར་གཞན་པ་ཅི་ཞིག་ཡོད་ནི་མི་རྟོག་པས་ཀྱང་འཇམ།
སྐྱེ་བོ་ལེགས་པ་ཧ་རི་ཙན་དན་པས་ཀྱང་ཡོངས་གདུང་མཆོག་ཏུ་ཟློག་པར་བྱེད། 21

सोऽब्रवीत् किं करोम्यन्याभुजाधीने विपौरुषे ।
कथं नाम प्रवर्त्तन्ते दुर्लंघ्येषु प्रतिक्रिया ॥ १४ ॥

दिनमेकं व्रजन्त्वद्य भवन्तो निजमास्पदम् ।
सन्ततश्चिन्तयाम्येव रक्षां वः प्रसवक्षये ॥ १५ ॥

इति राजवचः श्रुत्वा हृष्टाः पौरमहत्तमाः ।
जगदुस्तं समावर्ज्य पूजाव्यञ्जनमञ्जलिम् ॥ १६ ॥

देव त्वदवधानेन प्रणयाकर्णनेन च ।
त्वयि विन्यस्तचिन्तानां नास्माकमधुना श्रमः ॥ १७ ॥

अनुद्धतमुदारञ्च त्वत्प्रसादावलोकनम् ।
इदमेव जनस्यास्य जीवितानीव वर्षति ॥ १८ ॥

किं पुनः प्रियमेतत्ते पीयूषसदृशं वचः ।
तापापहं मृदु स्वादु किं किं न विदधाति नः ॥ १९ ॥

कृती कृतज्ञः कारुण्यनिधिः सुलभदर्शनः ।
लभ्यते भाग्यभोग्येन सौजन्यसरलः प्रभुः ॥ २० ॥

पीयूषादतिपेशलः परिचयः श्राव्यं वचः पञ्चम-
माचारः शरदिन्दुवृन्दमहसोऽस्यानन्दसन्दोहदः ।
सच्चित्ते वसतां सतां किमपरं पुष्प्यान्मनः कोमलम्
सौजन्यं हरिचन्दनादपि परं सन्तापनिर्व्वापणम् ॥ २१ ॥

ཅེས་བརྗོད་དྲིན་དང་ལྡན་དེ་ལ། ཕྱག་འཚལ་དེ་ཡི་ཡོན་དན་ནི།
ཡིད་འོང་མེ་ཏོག་འཕྲེང་བ་དག། ཕྱོགས་སུ་འགྲིམས་ཤིང་གྲོང་པ་སོང་། 22

རྒྱལ་པོ་ཡིས་ཀྱང་གྲོང་ཁྱེར་དུ། འབྱུང་པོ་མཆོད་པའི་ཆོ་གའི་རིམ།
ཁྲུས་ནས་ཞི་དང་ཤེས་པ་ཡི། ཚོགས་ཀྱིས་ངེས་པའི་བརྟུལ་ཞུགས་ཁྲུས། 23

འཕྲོག་མ་ཞེས་པའི་གནོད་སྦྱིན་མོ། གྲོང་ཁྱེར་གནས་པའི་བྲིས་པ་ཉམས།
འཕྲོག་ཅེས་གྲོང་ཁྱེར་ལྷ་དག་གིས། བརྗོད་པ་དེ་ཡིས་ཐོས་པར་གྱུར། 24

དེ་ནས་ས་བདག་བློན་དང་བཅས། གྲོང་ཁྱེར་སྐྱེ་བོས་ལྷན་ཅིག་ཏུ།
ཀ་ལན་ད་ཀའི་གནས་ཞེས་པ། འོད་མའི་ཚལ་གྱི་གནས་བཞུགས་པ། 25

སྡུག་བསྔལ་རིམ་གྱིས་གདུང་བ་དག། བསྟེན་པ་ཀུན་གྱི་མི་ཚའི་སྨན།
བདེ་བར་གཤེགས་པ་བཅོམ་ལྡན་འདས། སྐྱོན་ཉམས་ཞི་སླད་བལྟ་རུ་སོང་། 26

མཐོང་བ་དགའ་སྟེ་མི་བདག་གིས། རིང་ནས་མཐོང་ནས་ཕྱག་འཚལ་དེ།
མདུན་དུ་འཁོད་ནས་དེ་ལ་ནི། གྲོང་ཁྱེར་པ་ཡི་སྡུག་བསྔལ་སྨྲས། 27

གྲོང་ཁྱེར་པ་ཡི་བརྒྱུད་དག་ནི། ཉམས་པ་མཁྱེན་ནས་སྙིང་རྗེའི་གཏེར།
བཅོམ་ལྡན་འདས་ཀྱང་སྒྱུར་བར་ནི། ཐུགས་ནི་གཡོ་བ་མེད་ཉིད་འཛིན། 28

འགྲོ་བའི་དཀྱིལ་འཁོར་མི་བདག་དང་། བཅས་པས་བསྐུལ་ནས་འགྲོ་བའི་གཉེན།
དེ་ནི་ལྷུང་བཟེད་ཆོས་གོས་བཟུང་། གནོད་སྦྱིན་མོ་ཡི་ཁང་བར་གཤེགས། 29

इत्युक्त्वा प्रययुः पौरास्तं प्रणम्य प्रसादिनम्।
किरन्तस्तद्गुणोदारामाशाकुसुममालिकाम्॥ २२ ॥

राजापि नगरे कृत्वा भूतपूजाविधिक्रमम्।
शान्तिस्वस्तिकसम्भारञ्चकार नियतव्रतः॥ २३ ॥

यक्षी हारीतिका नाम बालकान् पुरवासिनी।
हरतीति स शुश्राव पुरदेवतयोदितम्॥ २४ ॥

ततः पौरजनैः सार्द्धं सामात्यः पृथिवीपतिः।
कलन्दकनिवासाख्ये स्थितं वेणुवनाश्रमे॥ २५ ॥

भगवन्तं ययौ द्रष्टुं सुगतं दोषशान्तये।
सर्व्वदुःखज्वरायासजुषामकटुकौषधम्॥ २६ ॥

तं दृष्ट्वा नृपतिर्दूरात् प्रणम्य प्रियदर्शनम्।
उपविश्याग्रतस्तस्मै पौरदुःखं न्यवेदयत्॥ २७ ॥

भगवानपि विज्ञाय पौराणां सन्ततिक्षयम्।
चिन्तानिश्चञ्चलः क्षिप्रमुवाच करुणानिधिः॥ २८ ॥

स विसृज्य जगद्बन्धुः सनृपं पौरमण्डलम्।
पात्रचीवरमादाय ययौ यक्षीनिकेतनम्॥ २९ ॥

དེ་ཡིས་དབེན་པ་དེ་ཡི་ནི། ཁྱིམ་དུ་བཅོམ་ལྡན་རྒྱལ་བས་བྱོན།
དགའ་བྱེད་ཅེས་པ་དེ་ཡི་བུ། གཅིག་ནི་སྣང་བ་མིན་པར་མཛད། 30

བཅོམ་ལྡན་གཤེགས་ནས་གནོད་སྦྱིན་མོ། སྲུར་བར་རང་ཁྱིམ་འོངས་པ་ཡིས།
རབ་མང་བུ་ལས་དགའ་བའི་བུ། དགའ་བྱེད་དག་ནི་མཐོང་མ་གྱུར། 31

དེ་ནི་འཚོལ་ཞིང་སྨོངས་བཅས་པས། སྨྱུས་མ་བཞུ་སྦྱོར་བ་བཞིན།
འཇིག་རྟེན་དང་ནི་ནགས་ཚམས་ཀྱང་། རིངས་པ་རབ་འཁྲུལ་དེ་ཡིས་བསྐོར། 32

ཀྱི་ཧུད་དགའ་བྱེད་ཀྱི་ཧུད་བུ། ཁྱོད་ཀྱི་བཞིན་ནི་གར་མཐོང་ན།
ཞེས་པ་ཆེ་བར་རབ་སྒྲོགས་ཤིང་། དེ་ནི་མ་ལུས་ཕྱོགས་སུ་སོང་། 33

དེ་ཡིས་ཕྱོགས་ཀུན་མགྱོགས་བཙལ་ནས། བུ་ནི་མཐོང་རེ་མེད་པ་ཡི།
མྱ་ངན་བྱེད་ཅིང་རི་དང་གླིང་། རྒྱ་མཚོའི་དཀྱིལ་འཁོར་དག་ཏུ་སོང་། 34

མི་ཡིས་ལས་འདས་ནས་ནི། འཇིགས་སུ་རུང་བའི་གྲོང་ཁྱེར་དང་།
མཐོ་རིས་ཕྱོགས་ནི་མ་ལུས་པ། གཞལ་ཡས་ཁང་དང་སྐྱེད་ཚལ་གནས། 35

འཇིག་རྟེན་སྐྱོང་བའི་གྲོང་ཁྱེར་དུའང་། ངལ་ཞིང་གང་དུའང་ངལ་མི་གསོ།
ཕྱོགས་ནི་འཚོལ་ཞིང་རབ་སོང་སྟེ། བཙལ་ཡང་བུ་ནི་རྙེད་མ་གྱུར། 36

དེ་ནས་ལུས་ཅན་ཚིག་གིས་ནི། བདེ་བར་གཤེགས་པའི་གནས་སོང་སྟེ།
བཅོམ་ལྡན་སྐྱབས་སུ་འོས་པ་ལ། འབྲལ་བས་གཟིར་བ་སྐྱབས་སུ་སོང་། 37

तया विरहितम्प्राप्य तद्गृहं भगवान् जिनः ।
प्रियङ्कराख्यं तत्पुत्त्रं निनायैकमदर्शनम् ॥ ३० ॥

याते भगवति क्षिप्रं यक्षी स्वगृहमागता ।
प्रभूतपुत्त्रा नापश्यत् प्रियं पुत्त्रं प्रियङ्करम् ॥ ३१ ॥

तमीक्षमाणा विवशा हृतवत्सेव धेनुका ।
बभ्राम संभ्रमोद्भ्रान्ता सा जनेषु वनेषु च ॥ ३२ ॥

हा प्रियङ्कर हा पुत्त्र क्व नु पश्यामि ते मुखम् ।
इति प्रलापिनी तारं निःशेषाः सा ययौ दिशः ॥ ३३ ॥

सा विचित्याशु सर्व्वाशा निराशा पुत्त्रदर्शने ।
क्रोशन्ती पर्व्वतद्वीपं समुद्रवलयं ययौ ॥ ३४ ॥

मर्त्त्यभूमिमतिक्रम्य घोरेषु नगरेषु सा ।
स्वर्गोद्देशेष्वशेषेषु विमानोद्यानशालिषु ॥ ३५ ॥

श्रान्ता क्वचिन्न विश्रान्ता यक्षिणी प्राणिघातिनी ।
पुत्त्रमन्विष्य नापश्यल्लोकपालपुरेषु च ॥ ३६ ॥

कुवेरस्याथ वचसा गत्वा च सुगताश्रमम् ।
भगवन्तं वियोगार्त्ता शरण्यं शरणं ययौ ॥ ३७ ॥

དེར་ནི་དེ་ཡིས་རང་སྤྱོད་མཐའ། ངེས་པར་བཤད་པ་དེས་གསན་ནས།
ཙུང་ཟུད་འཛུམ་གྱི་དཀར་བའི་མཆུས། མྱ་ངན་ཅན་མ་དེར་བཀའ་སྩལ། 38

འཕྲོག་མ་ཁྱོད་ལ་བུ་དག་ནི། ཀྱེ་མ་བརྒྱ་ཕྲག་ལྔ་དག་ཡོད།
གཅིག་ཉིད་ཁོ་ན་སྟོར་བ་ལ། འདི་སྙིང་བྲལ་བའི་སྡུག་བསྔལ་ཅི། 39

ཞེས་དེས་བཀའ་སྩལ་སྡུག་བསྔལ་གྱིས། ཉམས་པ་གནོད་སྦྱིན་མོས་ཐོས་སྨྲས།
བུ་འབུམ་ཡོད་ཀྱང་བཅོམ་ལྡན་འདས། བུ་གཅིག་བརླག་པ་ཡོངས་མི་བཟོད། 40

བུ་ལས་མཆོག་དགའ་གཞན་ན་མེད། བུ་ཆགས་དུག་གིས་གདུང་བ་ནི།
དེ་བརླག་ལས་གཞན་སྡུག་བསྔལ་ཅི། བུ་དང་ལྡན་པ་ཁོ་ནས་ཤེས། 41

གྲི་མེད་ངེས་པར་གདམས་པ་ཡི། བུ་ཡིས་དགའ་བ་ལྷན་སྐྱེས་ཉིད།
མ་ཚང་རིད་དང་དྲི་མ་ཅན། སྨུ་ཡི་བུ་ནི་ཟླ་མི་མཚུངས། 42

དེ་སྐད་གནོད་སྦྱིན་ཚུང་མའི་ཚིག། མཉེས་ག་ཤིན་གྱིས་འགྲུགས་གསན་གྱུར་ནས།
བཅོམ་ལྡན་འབྱུང་པོ་ལ་བརྩེ་བས། འཛུམ་བཅས་དེ་ལ་བཀའ་སྩལ་པ། 43

ཁྱོད་ཀྱི་བུ་ནི་མང་པོ་ལས། གལ་དེ་གཅིག་བྲལ་མྱ་ངན་འདི།
བུ་གཅིག་རྣམས་ཀྱི་བུ་ཁྱོད་ཀྱིས། ཕྲོགས་པའི་གདུང་བ་ཅི་ཞིག་འདྲ། 44

རྟག་ཏུ་ཁྱིམ་དུ་མ་མཐོང་བར། ཁྱོད་ཞུགས་བུད་མེད་རྣམས་ཀྱི་བུ།
བུ་ཡི་མས་ཀྱང་སྡུག་མོ་ཡིས། རི་དགས་རྣམས་ཀྱི་བུ་བཞིན་ཟོས། 45

तया तद्दुःखवृत्तान्तं स निशम्य निवेदितम् ।
तामवोचत शोचन्तीं किञ्चित् स्मितसिताधरः ॥ ३८ ॥

हारीति तव पुत्राणां सन्ति पञ्चशतान्यहो ।
इति तेनोक्तमाकर्ण्य यक्षी दुःखक्षतावदत् ॥ ३९ ॥

पुत्रलक्षेऽपि भगवन् सह्या नैकसुतक्षतिः ।
पुत्रात् प्रियतरं नान्यत् किं दुःखं तत्क्षयात् परम् ॥ ४० ॥

पुत्रवानेव जानाति पुत्रस्नेहविषव्यथाम् ।
सहजैव सुतप्रीतिरकारणनिबन्धना ॥ ४१ ॥

* * *

मलिनो विकलः क्षीणः कस्य नेन्दुसमः सुतः ॥ ४२ ॥

इति यक्षवधूवाक्यं श्रुत्वा वात्सल्यविह्वलम् ।
भूतानुकम्पी भगवान् सस्मितस्तामभाषत ॥ ४३ ॥

शोकोऽयं बहुपुत्राया यद्येकविरहे तव ।
हृते त्वयैकवत्सानां पुत्रैके कीदृशी व्यथा ॥ ४४ ॥

त्वं प्रविश्य सदा गेहं स्त्रीणां पुत्रमलक्षिता ।
अश्नास पुत्रमातापि व्याघ्रीव मृगशावकान् ॥ ४५ ॥

རང་གི་ལུས་ལ་གང་གང་གི། སྡུག་བསྔལ་ཉེར་སྤྱོད་ཉིད་འགྱུར་བ།
རྒྱུ་ངན་ཉམས་སྤྱོང་མཚུངས་པས་ན། དེ་ནི་གཞན་ལ་བྱ་བ་མིན། 46

སངས་རྒྱས་ཆོས་དང་དགེ་འདུན་གྱི། བསླབ་པའི་གཞི་གསུམ་གལ་དེ་ཁྱོད།
འཛིན་ཅིང་འཚོ་ལས་ཕྱིར་ལྡོག་ན། དགའ་བའི་བུ་དེ་ཁྱོད་ཀྱིས་འཐོབ། 47

དེ་སྐད་བཅོམ་ལྡན་གྱིས་བཀའ་སྩལ། དེ་ཡིས་བསླབ་གཞི་བཟུང་དེ་ནས།
འཚོ་བ་སྤངས་ལས་དགའ་བྱེད་བུ། དེ་ཡིས་བྱིན་ནས་ཐོབ་པར་གྱུར། 48

དེ་ཡི་སྐྱེ་བ་སྔ་མ་ཡི། སྤྱོད་མཐའ་ལས་ཀྱི་རྗེས་འགྲོ་དེ།
དགེ་སློང་གིས་དྲིས་བཅོམ་ལྡན་གྱིས། སྤྱོད་པའི་མཐའ་དེ་བཀའ་སྩལ་པ། 49

སྔོན་ཆེ་གྲོང་ཁྱེར་འདི་ཉིད་དུ། གྲོང་པ་ཁ་ཅིག་ལོངས་སྤྱོད་ཅན།
རི་དང་སྐྱིད་མོས་ཚལ་འགྲོ་ཞིང་། གར་དང་རོལ་མོས་ཉམ་པར་རྩེ། 50

དེ་ནས་ལམ་དེར་བ་ཛྲ་ཡི། མཛེས་མ་སྤུ་ཞིག་ནུ་གྲུས་ཤིང་།
རི་དགས་མིག་ལྡན་དེར་བ་དག། ཁྱེར་ནས་འཚོང་དུ་ཡང་དག་འོངས། 51

རང་བཞིན་གྱིས་ནི་གླང་པོའི་འགྲོས། མངལ་ཁྲར་ལི་ལོར་བགྲོད་ལྡན་མ།
དེ་ཡི་དཔལ་བུས་ཉེར་བགྲོད་ཅིང་། ཆགས་བཅས་དེ་དག་ཉམས་ལ་བལྟས། 52

ནགས་ཀྱི་རི་དགས་ལྟར་མཛེས་མ། ཡིད་འོང་མ་དེའི་ལྟ་ཚུལ་ནི།
མངོན་འདོད་མ་བསྐྱིབས་བརྟན་པ་དེས། དེ་དག་ཉམས་ཀྱང་སྲིད་ལྡན་གྱུར། 53

येन येन स्वदेहस्य दुःखं यात्युपभोगताम्।
न तत् परस्य कुर्व्वीत समानोऽनुभवः शुचाम्॥ ४६ ॥

त्वं बुद्धधर्म्मसङ्घानां त्रीणि शिक्षापदानि चेत्।
गृह्णासि हिंसाविमुखी तत्प्राप्नोषि प्रियं सुतम्॥ ४७ ॥

इत्युक्ता सा भगवता प्राप्तशिक्षापदा ततः।
हिंसाविरामात् तज्ज्ञत्वा पुत्रं प्राप प्रियङ्करम्॥ ४८ ॥

तस्याः प्राग्जन्मवृत्तान्तं तस्याः कर्म्मफलान्वयम्।
भिक्षुभिर्भगवान् पृष्टस्तद्वृत्तान्तमभाषत॥ ४९ ॥

पुरास्मिन्नेव नगरे पौराः केऽप्युपभोगिनः।
पर्व्वतोद्यानमालायां विजह्रुः नर्त्तनादिना॥ ५० ॥

अथ तेन पथा कापि गोपकान्ता घनस्तनी।
मथितं पण्यमादाय हरिणाक्षी समाययौ॥ ५१ ॥

गर्भभारालसगतिः प्रत्युप्ता गजगामिनी।
सा शनैरुपसर्पन्ती सस्पृहन्तान् व्यलोकयत्॥ ५२ ॥

तस्या वनमृगीमुग्धैरवदग्धा विलोकनैः।
असम्वृत्ता विलासाद्रैस्तेऽपि सोत्कण्ठतां ययुः॥ ५३ ॥

འདོད་པས་སྨྱོས་པ་ཉིད་གྱུར་ཅིང་། ངང་ཚུལ་འཕྲུལ་ལ་ཉམས་པ་དག།
མ་རིག་བག་མེད་མ་དེ་ནི། དེ་དག་རྣམས་ཀྱིས་དེར་དོན་གཉེར། 54

དེ་ནས་དེ་དག་རབ་སྨོང་ཆོ། ཆགས་པས་ངལ་ནས་དེ་ཡི་མངལ།
ཁྲོས་པས་དམར་པོར་གྱུར་པ་བཞིན། བརྟན་པ་དང་ནི་ལྷན་ཅིག་ལྷུང་། 55

སྐབས་དེར་དེ་ཡི་བསོད་ནམས་ཀྱིས། ལམ་དེ་ནས་ནི་རང་སངས་རྒྱས།
ལུས་དང་སེམས་ནི་རབ་དང་བ། ལེགས་པར་འོང་བ་དེ་ཡིས་མཐོང་། 56

དར་བའི་རིན་གྱིས་ཐོབ་པ་ཡི། ཨ་སྲ་ལྷ་བརྒྱ་དེ་ཡིས་ནི།
རིང་ནས་ཕྱག་འཚལ་རྣམ་བཏུད་ནས། ཡིད་ཉིད་ཀྱིས་ནི་དེ་ལ་ཕུལ། 57

བསོད་ནམས་དེ་ལས་གནོད་སྦྱིན་རིགས། རྫོ་འཕྲུལ་ལྡན་འདིར་ད་ལྷ་སྐྱེས།
ཨ་སྲ་ཕུལ་བས་འདི་ལ་བྱ། ལྷ་བརྒྱ་དག་ནི་སྐྱེས་པར་གྱུར། 58

ངང་ཚུལ་བརྗིད་ནས་བདག་པོ་དག། བཏང་བས་འཚོ་བ་ལྡན་གྱུར་སྤྱོན།
རང་སངས་རྒྱས་ལ་ཕྱག་འཚལ་བས། དེ་ཡིས་བསླབ་གཞི་དེ་རིང་ཐོབ། 59

དེ་སྐད་དེར་ནི་གནོད་སྦྱིན་མ་ཡིས་ལས་ཀྱི་རྒྱུད་ཅི་ཡང་།
རྣམ་མང་རྣམ་སྨིན་རྣམ་པར་བཀྲ་བ་དག་ནི་བཀའ་སྩལ་ནས།
འཇིག་རྟེན་ཀུན་གྱི་ལེགས་བྱས་བསམས་བྱས་སྟོན་པ་དེ་ཡིས་ནི།
སྐྱེ་བོ་རྣམས་ཀྱི་སྲིད་པའི་མཚོ་ལ་དགེ་བའི་ཟམ་སྟེགས་མཛད། 60

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་པའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་འཕྲོག་མའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཅུ་གསུམ་པའོ།།

सा तैर्निमन्त्रिता तत्र मदनक्षीवतां गता।
हारितं सहसा शीलं न विवेद प्रमादिनी ॥ ५४ ॥

ततस्तेषु प्रयातेषु तदा तस्या रतिश्रमात्।
पपात सह धैर्य्येण गर्भः कोपादिवारुणः ॥ ५५ ॥

अत्रान्तरे समायातं तत्पुण्यैस्तेन वर्त्मना।
प्रत्येकबुद्धं साद्राक्षीत् कायचित्तप्रसादनम् ॥ ५६ ॥

सास्मै मथितमूल्याप्तमाम्राणां शतपञ्चकम्।
दूरात् प्रणामविनता मनसैव न्यवेदयत् ॥ ५७ ॥

ततः पुण्यर्द्धिमत्यस्मिन् जाता यक्षकुलेऽधुना।
जातमाम्रार्पणेनास्याः पुत्राणां शतपञ्चकम् ॥ ५८ ॥

हिंसावती पापत्यागात् शीलविस्मरणात् परम्।
प्रत्येकबुद्धप्रणतेः प्राप्तशिक्षापदाद्य सा ॥ ५९ ॥

इति विविधविपाकं कर्म्मतन्त्रं विचित्रं
किमपि स कथयित्वा तत्र यक्षाङ्गनायाः।
कलितकुशलसेतुः सम्भवाब्धौ जनाना-
मकृत सुकृतचित्तं सर्व्वलोकस्य शास्ता ॥ ६० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां हारीतिकादमनावदानं नाम द्वादशः पल्लवः ॥

Chapter XIII.

ཡལ་འདབ་བཅུ་གསུམ་པ།

ཆོ་འཕྲུལ་གྱི་རྟོགས་པ་བརྗོད་པ་ནི།

གང་ཞིག་རྟོག་པའི་ལམ་དུ་འང་རྒྱུ་བ་ཉིད་མིན་མོད་བྱུང་རབ་ཏུ་འཕེལ་དང་ལྡན།
རྨི་ལམ་གྱིས་ཀྱང་གང་དང་འགྲོགས་མིན་གང་ལ་ཡོངས་འདྲིས་སྤྱོན་ཆད་མེད་པའི་རིམ།
གང་ལ་མི་ཉམས་ཚིག་ནི་མི་སྨྲ་ཉིད་དང་གང་ཞིག་ཉེ་བ་མིག་གི་མགྲོན།
རྒྱུ་མེད་སྐྱེ་བོའི་མཐུ་ནི་འབྱོར་པ་ཚད་ཀྱིས་གཞལ་བྱ་མིན་པ་དེ་ལ་བསྟོད། 1

གྲོང་ཁྱེར་རྒྱལ་པོའི་ཁབ་ཅེས་ལ། ས་བདག་གཟུགས་ཅན་སྙིང་པོ་ཡིས།
འོད་མའི་ཚལ་ན་བཞུགས་པ་ཡི། རྒྱལ་བ་མཆོད་པ་མཐོང་གྱུར་ནས། 2

སྨོངས་པ་ཀུན་མཁྱེན་ང་རྒྱལ་ཅན། ཕྲག་དོག་དུག་གིས་རབ་གདུངས་པས།
དེ་ཡི་ཁྱད་འཕགས་མ་བཟོད་དེ། ཀཽ་ཤི་ཀས་སྣང་བ་བཞིན། 3

ནུབ་མོར་གྱུར་པའི་རབ་རིབ་ཚོགས། དྲི་མ་ཅན་ནི་ཤར་ཆ་ནས།
འཆར་བར་རྟག་ཏུ་ཉིན་བར་ལ། རང་ཉམས་བྲ་སྐྱད་འགྲན་པར་བྱེད། 4

གནག་ལས་བུ་དང་ཡང་དག་རྒྱལ། མི་ཕམ་ནོག་ཅན་དེ་བཞིན་དུ།
རྫོགས་བྱེད་གཉེན་གྱི་བུ་ལ་སོགས། སྨོངས་པ་ཟད་བྱེད་གཞན་དག་ཀྱང་། 5

त्रयोदशः पल्लवः ।

प्रातिहार्य्यावदानम् ।

यः सङ्कल्पपथा सदैव चरति प्रोज्जृम्भमाणाद्भुतं
स्वप्नैर्यस्य न सङ्गतिः परिचयो यस्मिन्नपूर्व्वक्रमः ।
वाणी मौनवती च यत्र हि नृणां यः श्रोत्रनेत्रातिथि-
स्तं निर्व्याजजनप्रभावविभवं मानैरमेयं नुमः ॥ १ ॥

पुरे राजगृहाभिख्ये विम्बिसारेण भूभुजा ।
पूज्यमानं जिनं दृष्ट्वा स्थितं वेणुवनाश्रमे ॥ २ ॥

मात्सर्य्यविषसन्तप्ता मूर्खाः सर्व्वज्ञमानिनः ।
न सेहिरे तदुत्कर्षं प्रकाशमिव कौशिकाः ॥ ३ ॥

मलिनैः स्वविनाशाय परभागोदितैः सदा ।
क्रियते वासरस्पर्द्धा शार्व्वरैस्तिमिरोत्करैः ॥ ४ ॥

मस्करी सञ्जयी वैरैरजितः ककुदस्तथा ।
पूरणज्ञातिपुत्राद्या मूर्खाः क्षपणकाः परे ॥ ५ ॥

བདུད་ཀྱི་སྒྱུ་མས་རྨོངས་བྱས་ཅིང་། འགྲན་འདོད་ཞེ་སྡང་སྦྲོན་གྱིས་ནི།
དུ་བས་བཞིན་དུ་སྤྲུན་གཏིབས་པས། མི་བདག་ལ་མངོན་ཕྱོགས་ནས་སྨྲས། 6

ནགས་ན་འདུག་པའི་དགེ་སློང་གང་། འདི་ནི་ཀུན་མཁྱེན་ང་རྒྱལ་ཅན།
ཁྱོད་ཀྱིས་དེ་དང་ངེད་རྣམས་ཀྱི། རྫུ་འཕྲུལ་མཐུ་ནི་བལྟ་བར་ཁྱིས། 7

རྫུ་འཕྲུལ་མཐུ་ལས་གང་ཅུང་ཟད། སྐྱེ་བོ་མགུ་བར་རབ་སྤྲོལ་བ།
ངོ་མཚར་ཆེ་བ་མཐོང་གྱུར་པ། དེ་དག་ཆོ་འཕྲུལ་ཞེས་སུ་བརྗོད། 8

རྒྱལ་པོ་བདག་ཅག་གམ་དང་དེ། མདུན་སར་ཆོ་འཕྲུལ་སྟོན་པ་ཡི།
ནུས་པ་གང་ལ་ཡོད་གྱུར་དེ། འགྲོ་བ་གསུམ་དུ་མཆོད་འོས་འགྱུར། 9

ཞེས་པ་དེ་དག་ཚིག་ཐོས་ནས། མིང་བདག་དེ་དྲིགས་ལས་ཕྱིར་ཕྱོགས།
སྨྲས་པ་ཁྱེད་བསམ་འདི་ཅི་ཞིག། འཕྱེ་བོ་རི་ལ་འཛེགས་པར་འདོད། 10

འདི་ནི་རིགས་མིན་ཁྲེ་མ་ལེབ། རྣམས་ཀྱིས་ནི་ཁ་འགྲན་ནས་ཅི།
འདི་ནི་སྨྲ་བར་མི་བྱ་ཡང་། སྨྲ་ན་བདག་གིས་གྲོང་ལས་འབྲིན། 11

རྒྱལ་པོ་ཡོན་ཏན་ཤེས་པ་ཡིས། དེ་སྐད་སྨྲ་ཞིང་བཤད་པས་ན།
མི་བསྒྱུན་དེ་དག་མཁའ་ལ་བཞིན། རྙེད་མེད་པར་ནི་སོང་བར་གྱུར། 12

མི་བདག་གཟུགས་ཅན་སྙིང་པོ་འདི། རྨོངས་ལས་ཕྱོགས་སུ་ལྡང་གྱུར་པས།
ས་སྐྱོང་གཞན་དག་འགྲོ་བྱ་ཞེས། དེ་དག་རྣམས་ཀྱིས་བསམས་པར་གྱུར། 13

ऊचुर्नृपतिमभ्येत्य मारमायाविमोहिताः।
संघर्षद्वेषदोषेण धूमेनेवान्धकारिताः॥ ६॥

एष सर्व्वज्ञतामानी वने यः श्रमणः स्थितः।
ऋद्धिप्रभावो भवता तस्यास्माकञ्च दृश्यताम्॥ ७॥

ऋद्धिप्रभावाद्यत् किञ्चित् जनव्यावर्जनोर्ज्जितम्।
दर्श्यते महदाश्चर्य्यं प्रातिहार्य्यं तदुच्यते॥ ८॥

शक्तिः संसदि यस्यास्ति प्रतिहार्य्यस्य दर्शने।
अस्माकं तस्य वा राजन् पूजाः सन्तु जगत्त्रये॥ ९॥

इति तेषां वचः श्रुत्वा तद्दर्पविमुखो नृपः।
उवाच वाञ्छा केयं वः पङ्गूनां गिरिलङ्घने॥ १०॥

असमञ्जसमेवैतत् का स्पर्द्धाग्नेः पतङ्गकैः।
नैतद्वाच्यं पुनर्वादी मया निष्कास्यते पुरात्॥ ११॥

इति राज्ञा गुणज्ञेन प्रत्याख्यातोद्यमाः खलाः।
प्रययुस्ते निरालम्बे लम्बमाना इवाम्बरे॥ १२॥

विम्बिसारो नरपतिर्मूर्खतापक्षपातवान्।
अन्यं व्रजामो भूपालमिति ते समचिन्तयन्॥ १३॥

སྐབས་དེར་བཅོམ་ལྡན་མཉན་ཡོད་ཀྱི། གྲོང་ཁྱེར་དང་ཉེ་རྒྱལ་བྱེད་ཚལ།
ཀུན་དགའ་ར་བར་བྱོན་པར་གྱུར། ཕྱོགས་དེ་ཉིད་དུ་དེ་དག་སོང་། 14

དེ་དག་དེར་ཕྱིན་ཀོ་ས་ལའི། ས་ཡི་བདག་པོ་ས་རྒྱལ་ལ།
ཆོ་འཕྲུལ་མེད་བྱུང་འགྲན་པ་ན། དེ་ཉིད་ཁོ་ན་དེ་ལ་བརྗོད། 15

ཡོན་དན་ཁྱད་ཤེས་མི་བདག་ནི། དེ་དག་དྲེགས་པ་གཞོམ་འདོད་པས།
རྫུ་འཕྲུལ་ལྟ་བར་སྤྲོ་བའི་སྐད། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་སོང་། 16

མངོན་དུ་ཕྱིན་དེ་དུལ་བ་ཡིས། ཕྱག་འཚལ་ནས་ནི་རབ་གསོལ་པ།
བཅོམ་ལྡན་མུ་སྟེགས་རྣམས་ཀྱི་ནི། དྲེགས་པ་ཞི་བར་མཛད་པར་ཞུས། 17

རྫུ་འཕྲུལ་འགྲན་པའི་ཉེ་སྦྱོར་གྱིས། ཁྱེད་ཀྱི་མཐུ་ནི་བལྟ་བར་འདོད།
དེ་དག་རང་གི་ཡོན་བསྔགས། བདག་ཅག་རྣ་བ་ཞེན་པར་བྱེད། 18

གཙོ་བོ་དམ་པ་མགུ་བ་ཡིས། རང་གི་གཟི་བརྗིད་རབ་གསལ་མཛོད།
མུ་སྟེགས་ཞེས་པ་མ་ལུས་པའི། མུན་པ་བརླག་པར་རབ་ཏུ་སྤོང་། 19

དེ་སྐད་རྒྱལ་པོའི་ཚིག་ཐོས་ནས། བསམས་པ་ཆེན་པོ་རྣམ་འགྱུར་མེད།
འགྲན་བཞེད་ཁྲོ་བ་དང་བྲལ་བ། བཅོམ་ལྡན་འདས་ཀྱིས་དེར་བཀའ་སྩལ། 20

རྒྱལ་པོ་གཞན་དག་ཉེར་གཞོམ་དང་། རྩོད་དང་རྒྱུགས་པའི་ཕྱིར་ཡང་མེད།
རྣམ་དབེན་ཀྱིན་ཏུ་ཞེས་པ་ཡང་། ཡོན་དན་འདི་ནི་གཟུང་བར་བྱ། 21

अत्रान्तरे भगवति श्रावस्तीमभितः पुरीम्।
प्राप्ते जेतवनारामं दिगन्तानेव ते ययुः ॥ १४ ॥

ते प्रसेनजितं तत्र प्राप्य कोशलभूपतिम्।
प्रातिहार्य्यकृतस्पर्द्धां तामेवास्मै न्यवेदयन् ॥ १५ ॥

गुणान्तरज्ञो नृपतिस्तेषां दर्पक्षयेच्छया।
ऋद्धिसन्दर्शनोत्साहाद् ययौ भगवतोऽन्तिकम् ॥ १६ ॥

स समभ्येत्य विनयात् प्रणिपत्य तमब्रवीत्।
भगवन् दर्पदलनं तीर्थ्यानां कर्त्तुमर्हसि ॥ १७ ॥

ऋद्धिस्पर्द्धानुबन्धेन त्वत्प्रभावदिदृक्षया।
स्वगुणश्लाघयास्माकं तैः कर्णौ बधिरीकृतौ ॥ १८ ॥

प्रकाशय निजं तेजः सज्जनावर्ज्जनं विभो।
तीर्थ्याभिधानामखिलं प्रयातु प्रलयं तमः ॥ १९ ॥

इति राजवचः श्रुत्वा निर्विकारो महाशयः।
भगवान् विरतामर्षः सहर्षस्तमभाषत ॥ २० ॥

राजन्नान्योपमर्द्दाय विवादाय मदाय वा।
विवेकाभरणार्होऽयं क्रियते गुणसंग्रहः ॥ २१ ॥

འགྲན་པའི་ཁྲོ་ཡིས་རབ་བསྐྱབས་གང་། ཕ་རོལ་བསྔགས་འཕྲོག་ཡོན་ཏན་ནི།
སྨྲ་རྟོག་དག་གི་དྲི་མ་ཅན། ཉམས་དཔྱད་ཡོན་ཏན་བྲལ་དེས་ཅི། 22

གང་ཞིག་རང་གི་ཡོན་ཏན་གྱིས། གཞན་གྱི་ཡོན་ཏན་སྒྲིབ་བྱེད་པ།
བསྔགས་པར་འོས་པ་མིན་པ་དེས། རང་ཉིད་ཁོ་ནས་ཆོས་རྒྱུད་གསོན། 23

ཡོན་ཏན་དམ་པ་ཡོངས་བརྟག་ཉིད། མཆོག་ཏུ་སྐྱེངས་པར་བྱེད་པ་ཡིན།
གང་ཕྱིར་དག་པ་སྣང་ལ་ནི། གཞལ་བའི་མཐོ་འཚམས་རིགས་པ་མིན། 24

གང་ཞིག་ཡོན་ཏན་ལྡན་ན་ཡང་། གཞན་ལ་རབ་དངས་ཉིད་མི་འགྱུར།
ལག་ན་མར་མེ་ཐོགས་དེ་དེའི། སྡོང་ཀྱི་གྲིབ་མས་མུན་པར་བྱེད། 25

དེ་ཉིད་འཇིག་རྟེན་ན་ཀུན་མཁྱེན། བདག་གིས་ལྷག་པ་ཅི་ཞིག་རིག།
ཕ་རོལ་མངོན་ཁེངས་ཟིལ་གནོན་པར། རྟུལ་བ་བརྟན་པས་རང་ཟིལ་གནོན། 26

དེ་སྐད་བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས། རབ་ཞི་མངོན་པར་བཞེད་ཐོས་ནས།
རྒྱལ་པོས་ངོ་མཚར་བསྟན་པ་ལ། མཆོག་ཏུ་མངོན་པར་ཞུ་བ་བྱས། 27

དེ་ནས་ཚོགས་ཀྱི་བཅོམ་ལྡན་གྱིས། ཞལ་བཞིན་མཛེད་པས་མི་ཡི་བདག
མགུ་ནས་ཞག་བདུན་དུས་བསྐུབ་སྟེ། རྒྱལ་པོའི་ཕོ་བྲང་སོང་བར་གྱུར། 28

སྐབས་དེར་ས་ཡི་བདག་པོ་ཡིས། མ་གཅིག་མིན་པའི་སྤྲུན་ཟླ་ཞིག
ཕོ་བྲང་འཁོར་དང་ཉེ་བ་ཡིས། ཁང་བཟང་གཞི་ཡི་ལམ་ནས་སྤྲུས། 29

मात्सर्य्यमलिनैः किन्तैर्विचारविगुणैर्गुणैः ।
ये हरन्ति परोत्कर्षं स्पर्द्धाबन्धप्रसारिताः ॥ २२ ॥

गुणाच्छादनमन्यस्य स्वगुणेन करोति यः ।
धर्म्मस्तेनाप्रशस्तेन स्वयमेव निघातितः ॥ २३ ॥

सद्गुणानां परीक्षैव परवैलक्ष्यकारिणी ।
उचिता न हि शुद्धानां तुलारोहविडम्बना ॥ २४ ॥

गुणवानपि नायाति यः परेषु प्रसन्नताम् ।
स दीपहस्तस्तत्पाचच्छायया मलिनीकृतः ॥ २५ ॥

लोके त एव सर्व्वज्ञा विद्मः किमधिकं वयम् ।
पराभिमानाभिभवप्रागल्भ्यं स्वपराभवः ॥ २६ ॥

इति श्रुत्वा भगवतः प्रशमाभिमतं वचः ।
भृशमभ्यर्त्थनां राजा चकाराश्चर्य्यदर्शने ॥ २७ ॥

ततः कृच्छ्रात् भगवता कृताभ्युपगमो नृपः ।
राजधानीं ययौ हृष्टः सप्ताहावधिसम्विदा ॥ २८ ॥

अस्मिन्नवसरे भ्राता भूमिभर्त्तुरसोदरः ।
चचारान्तःपुरोपान्ते प्रासादतलवर्त्मना ॥ २९ ॥

ལས་ཀྱི་རླུང་གིས་བསྐྱོད་པ་བཞིན། རྒྱལ་པོའི་བཙུན་མོའི་ལག་ནས་འཐོས།
རྟེ་དགའ་དང་བཅས་འགྲོ་བ་དེའི། ཐུག་པར་མི་རྟོག་འཕྲེང་བ་ལྷུང་། 30

སྐྱོན་ནི་རིག་པར་གྱུར་པ་དེའི། སྐྱོན་རྣམས་དཔང་པོས་བསལ་བྱས་ནས།
ཕྲ་མ་མཁན་གྱིས་གདམས་དེ་དག། རྒྱལ་པོ་ཡིས་ནི་རྟོགས་པར་བྱས། 31

ཇོ་བོའི་བསམ་པ་སྟོང་པར་ནི། ཆུང་ཡང་བྲུ་གུ་རྟེད་པར་གྱུར།
གནོད་པ་ཀུན་བྱེད་ལྟེ་གཉིས་པ། ཕྲ་མ་རབ་ཏུ་འཇུག་པ་ཉིད། 32

རྒྱལ་པོ་ཕྲ་མས་བསླུལ་བ་ཡིས། ཕྲ་རྟོག་དུག་གྱིས་རྒྱལ་གྱུར་པས།
སྤྱན་ལྡའི་ལག་པ་གང་པ་དག། སྦྱར་དུ་ཆོད་ཅེས་ཡང་དག་བསྒོས། 33

ལག་པ་གང་པ་རྣམས་བཅད་པའི། གཞོན་ནུ་ལས་ཀྱི་རྣམ་བསྣད་པས།
གསོད་པའི་ནོར་འཛིན་ལ་ཞལ་དེ། མི་བཟད་གདུང་བར་ཞུགས་པར་གྱུར། 34

མ་དང་གཉེན་ནི་མྱ་ངན་ཅན། གདུང་བ་དྲག་པོས་ཡོངས་བསྐོར་དེ།
སྐད་ཅིག་མིག་ནི་གཡོ་བ་ཡི། ཟད་བྱེད་རྣམས་ཀྱིས་མཐོང་བར་གྱུར། 35

དེ་ནི་ཡོངས་བསྐྱབས་ལ་ཆགས་ཤིང་། ཀུན་ལ་ཕྱག་འཚལ་མྱ་ངན་གྱིས།
གཟིར་བའི་རྒྱལ་བུ་གཉེན་དེ་རྣམས། དེ་དག་ལ་མངོན་ཕྱོགས་ནས་སྨྲས། 36

ཀ་ལ་ཞེས་པ་མི་བདག་བུ། སྐྱོན་མེད་འདི་ནི་ཆད་པས་བཅད།
ཁྱེད་རྣམས་ཀུན་མཁྱེན་སྨྲ་བ་པོ། འདི་ལ་བཀའ་དྲིན་བསྐྱབ་པར་མཛོད། 37

सलीलं व्रजतस्तस्य कर्म्मवातैरिवेरिता ।
कुसुमस्रक् पपातांसे राजपत्नीकराच्युता ॥ ३० ॥

तस्य विज्ञातदोषस्य दोषं सम्भाव्य साक्षिभिः ।
पिशुनाः किम्वदन्तीन्तां चक्रिरे राजगामिनीम् ॥ ३१ ॥

छिद्रमल्पमपि प्राप्य क्षुद्राः सर्व्वापकारिणः ।
द्विजिह्वाः प्रविशन्त्याशु प्रभूनां शून्यमाशयम् ॥ ३२ ॥

पिशुनप्रेरितो राजा भ्रातुरीर्षाविषोल्वणः ।
छेदमस्यादिदेशाशु पाणिपादस्य मूर्च्छितः ॥ ३३ ॥

निकृत्तपाणिचरणः कुमारः कर्म्मविप्लवात् ।
स वध्यवसुधाशायी विवेश विषमापदम ॥ ३४ ॥

तीव्रव्यथापरिवृतं शोचद्भिर्मातृबन्धुभिः ।
ददृशुस्तं क्षपणकाः क्षणं नयनचालने ॥ ३५ ॥

तान् समभ्येत्य शोकार्त्तास्ते राजसुतबान्धवाः ।
जगदुस्तत्परित्राणसंलिप्ताः सर्व्वप्राणिनः ॥ ३६ ॥

अदोषं निगृहीतोऽयं कालनामा नृपात्मजः ।
सर्व्वज्ञवादिनो यूयं प्रसादोऽस्य विधीयताम् ॥ ३७ ॥

དེ་སྐད་མཆི་མ་རབ་ཟགས་ཤིང་། རབ་སྨྲས་དེ་ཡིས་གསོལ་བཏབ་པས།
མཐུ་མེད་དེ་དག་མི་སྨྲ་ཞིང་། སྐྱེངས་ནས་གཞན་དུ་སོང་བར་གྱུར། 38

དེ་ནས་དགེ་སློང་ཀུན་དགའ་བོ། བདེ་གཤེགས་བཀའ་ཡིས་ལམ་དེ་ནས།
འོངས་དེ་བདེན་པའི་བྱིན་རླབས་ཀྱིས། དེ་ཡི་ལུས་ནི་རྣམ་པར་བསྐྱབས། 39

རྐང་ལག་ཡང་དག་སྐྱེས་པ་ཡིས། རྒྱལ་པོའི་བུ་ཡང་དང་བའི་བློས།
རྒྱལ་ལ་སྐྱབས་སུ་མཆོད་སོང་སྟེ། དེ་ཡི་ཉེ་གནས་དག་ཏུ་གྱུར། 40

དེ་ནས་ཞག་བདུན་བཟླས་པའི་ཚེ། བཅོམ་ལྡན་འདས་ཀྱི་རྫུ་འཕྲུལ་གྱི།
ཚོ་འཕྲུལ་བལྟ་འདོད་ས་བདག་གིས། ཁང་པ་ཆེན་པོ་བྱེད་དུ་བཅུག། 41

དེར་ནི་ཟད་བྱེད་པ་སོགས་དང་། ལྷན་ཅིག་མི་བདག་བཞུགས་པ་ལ།
བདེ་གཤེགས་བཞེད་པས་ས་གཞི་དག། དཔག་བསམ་ཤིང་གིས་བརྒྱན་པར་གྱུར། 42

དེ་ནས་བཅོམ་ལྡན་འདས་ཀྱིས་མཐུ། ལྷ་རུ་ལྷ་རྣམས་འོངས་པའི་ཚེ།
བཅོམ་ལྡན་འདས་ཀྱི་སེང་གེའི་ཁྲི། རིན་ཆེན་རབ་འབར་ཆེ་བ་བསྟེན། 43

མི་ཡི་ཁམས་ལ་རབ་ཞུགས་པ། དེ་ཡི་འགྲམ་པ་ལས་འཁྲུངས་པའི།
མི་ཡི་ཚོགས་ཀྱིས་སྲིད་པ་ཡི། དཀྱིལ་འཁོར་དག་ནི་ཁྱབ་པར་གྱུར། 44

སྲིད་པར་གནས་པ་མཐའ་དག་འཇིག་པའི་འཇིགས་པས་དལ་བུ་ཡིས།
པདྨའི་ཚལ་དང་མཚུངས་པའི་མེ་ནི་ཞི་བར་གྱུར་པ་ལ།
དེ་རྗེས་བཅོམ་ལྡན་སྐུ་ནི་སྙིང་རྗེའི་ཆུ་ཡི་ཕུང་པོ་ལས།
བདུད་རྩིས་གང་བའི་སེ་རླབས་དྲི་མེད་འོད་ཟེར་རབ་ཏུ་འཕྲོས། 45

इति तैः प्रसरद्बाष्पैरर्थ्यमानाः प्रलापिभिः ।
ते मौनिनो निष्प्रतिभा वैलक्ष्यादन्यतो ययुः ॥ ३८ ॥

अथ तेन पथा यातो भिक्षुः सुगतशासनात् ।
आनन्दो विदधेऽङ्गानि तस्य सत्योपयाचनात् ॥ ३९ ॥

राजपुत्रस्तु सञ्जातपाणिपादः प्रसन्नधीः ।
जिनं शरणमभ्येत्य तदुपस्थायकोऽभवत् ॥ ४० ॥

सप्तरात्रे व्यतीतेऽथ श्रान्तिहार्य्यं गृहं महत् ।
ऋद्धिं भगवतो द्रष्टुं महीपतिरकारयत् ॥ ४१ ॥

उपविष्टे नृपे तत्र सह क्षपणकादिभिः ।
कल्पवृक्षीकृता भूमिरभवत् सुगतेच्छया ॥ ४२ ॥

ततः प्राप्तेषु देवेषु द्रष्टुं भगवतः प्रभाम् ।
रत्नप्रदीपं भगवान् भेजे सिंहासनं महत् ॥ ४३ ॥

तेजोधातुं प्रपन्नस्य तस्य गण्डसमुद्गतैः ।
व्याप्तं पावकसङ्घातैरभूद्भुवनमण्डलम् ॥ ४४ ॥

शान्ते शनैः कमलकाननसन्निकाशे
वह्नौ समस्तभुवनस्थितिभङ्गभीत्या ।
देहात्ततो भगवतः करुणाम्बुराशेः
पूर्णामृतोर्म्मिविमलारुणयः प्रसस्रुः ॥ ४५ ॥

སྟོང་ཕྲག་ཟླ་བའི་མཛེས་པ་ལས་རྒྱལ་མཛེས་པས་ཁྱེངས་གྱུར་ཅིང་།
གཟི་བརྗིད་རབ་ཏུ་རྒྱས་པས་ཉི་མའི་འཁོར་ལོ་འབྲས་མེད་མཛད།
འདྲེན་པ་དེ་ནི་སྐྱེ་བོའི་ཚོགས་ཀྱི་ནོར་པར་ལྷ་བྱེད་ཀྱིས།
ལེགས་བྱས་ཀྱིས་ཐོབ་སྟོན་མེད་མགུ་ཞིང་དགའ་བས་འཕྲུངས་པར་གྱུར། 46

ཆུ་བ་བེ་རྡུརྻ་ལྡན་རིན་ཅན་དམར་པོའི་འདབ་མ་ཡངས།
མཛེས་ཤིང་རབ་ཏུ་འབར་བའི་གསེར་གྱི་གེ་སར་ཟེ་འབྲུ་ཅན།
ཀང་དྲུག་པ་རྣམས་ཟི་བཟང་ཚོགས་ཀྱིས་འབོད་པའི་པདྨ་ནི།
དེ་ནས་དེ་ཡི་དྲུང་དུ་ས་གཞི་དག་ལས་མངོན་འཕྲུངས་གྱུར། 47

དེ་དག་རྣམས་ལ་ཉེ་བར་བཞུགས་པའི་བདེ་གཤེགས་འཁོར་ལོ་ནི།
གསེར་འོད་མཛེས་པའི་འཇམ་པའི་ཀྱུན་ལྡན་དེ་ནས་ཉེ་བར་མཐོང་།
བདུད་རྩི་མཉེས་གཤེན་རི་བོང་ཅན་འོད་བསིལ་བར་གྱུར་པ་དག།
གང་ཞིག་ཤར་བས་འཛིག་རྟེན་དག་གིས་འཕྲལ་ལ་བདེ་ཐོབ་གྱུར། 48

དེ་དག་དབུས་ན་བཅོམ་ལྡན་འདས་ནི་མཐུ་ཡི་འབྱོར་པ་དག།
རི་རྣམས་དག་ལས་གསེར་གྱི་རི་བོ་བཞིན་དུ་ལྷག་པར་འཛོན།
ཕྲག་པ་ལེགས་མཐོ་སྨུག་ཅིང་མཛེས་པར་ཡང་དག་གནས་པ་ནི།
ལྷ་ཡི་སར་སྐྱེས་རྣམས་ལས་ཡོངས་འདུ་བཞིན་དུ་རབ་ཏུ་མཐོ། 49

लावण्यसारमतिचन्द्रसहस्रकान्तिं
तेजःप्रतानविफलीकृतसूर्य्यचक्रम् ।
तं नागनायकनिकायविलोचनानि
प्रीत्या पपुः सुकृतलब्धमपूर्व्वहर्षम् ॥ ४६ ॥

वैदूर्य्यनालविपुलारुणरत्नपात्र-
कान्तोल्लसत्कनककेशरकर्णिकानि ।
अभ्युद्ययुः क्षितितलादथ तत्समीपे
पद्मानि सौरभभराहृतषट्पदानि ॥ ४७ ॥

तेषूपविष्टमथ काञ्चनचारुकान्तिं
स्निग्धेक्षणं सुगतचक्रमदृश्यताराात् ।
पीयूषपेशलशशिद्युतिशीतलेन
यस्योदयेन सहसा सुखमाप लोकः ॥ ४८ ॥

तेषां प्रभावविभवं भगवान् बभार
मध्येऽधिकं कनकशैल इवाचलानाम् ।
सुस्कन्धबन्धुरघनद्युतिसन्निवेशः
प्रांशुः सुरक्षितिरुहामिव पारिजातः ॥ ४९॥

མཐོ་རིས་བུ་མོའི་ལག་པས་མེ་ཏོག་རྣམས་ནི་གཏོར་གྱུར་པའི།
མི་དམན་འཕྲེང་བའི་ཚོགས་ཀྱིས་ཡན་ལག་མཆོག་རྣམས་གྱིས་གྱུར་ཅིང་།
དེ་ཞལ་ཆུ་སྐྱེས་རྣམ་པར་བལྟ་ལ་མིག་ནི་འཛུམ་གྲོལ་བས།
མི་རྣམས་དགའ་ཀྱང་སྐད་ཅིག་མི་ཡི་དངོས་མིན་ཐོབ་པར་འགྱུར། 50

དེ་ནས་ལྷ་ཡི་རྔ་ཆེན་དུང་དང་རྔ་སྒྲས་ཁྱབ་གྱུར་ཅིང་།
མེ་ཏོག་ཆར་པ་གད་རྒྱངས་ཆེར་བཞད་ནམ་མཁའི་དོ་རར་ནི།
དྲི་ཟ་མི་འམ་ཅི་དང་ཐུབ་པའི་དབང་ཕྱུག་སྤྱོད་རྣམས་ཀྱིས།
བཅོམ་ལྡན་བསྟོད་པའི་ཚིག་གི་སྒྲ་ནི་བསྒྲགས་པར་གྱུར། 51

དེར་ནི་བཅོམ་ལྡན་ཞལ་གྱི་པདྨ་མཆུ་ཡི་འདབ་དམར་ཞིང་།
འོད་ཟེར་དཀར་བས་ཀུན་དཀྲིས་སོ་ཡི་གེ་སར་རྫོགས་པ་ལས།
བསོད་ནམས་ཀྱིས་གཙང་ཤིན་ཏུ་དངར་བའི་གསུང་གི་སྦྲང་རྩི་ནི།
རང་ཉམས་དང་མཐུན་དམ་པའི་དྲི་བཟང་སྐལ་དང་ལྡན་པས་འཐུངས། 52

སྡིག་པའི་ཐར་པ་ཐོང་ལ་བསོད་ནམས་དག་གིས་ས་བོན་ཐོབ།
ཁོན་ནི་ཡོངས་སུ་དོར་ལ་ཞི་བའི་བདེ།
འཆི་བའི་དུག་ནི་ཉམས་བྱེད་ཡེ་ཤེས་བདུད་རྩི་འཐུངས་ཤིག་དང་།
དགེ་བའི་གྲོགས་པོར་གྱུར་པའི་ལུས་འདི་རིང་པོ་མི་གནས་སོ། 53

स्वर्गाङ्गनाकरकुशेशयकीर्य्यमाणै-
रम्लानमाल्यवलयैः कलितोत्तमाङ्गाः।
तस्याननाम्बुजविलोकननिर्निमेषे
मर्त्या अपि क्षणमवापुरमर्त्त्यभावम् ॥ ५० ॥

व्योमाङ्गनेषु सुरदुन्दुभिशङ्खतूर्य्य-
घोषावृतः कुसुमवर्षमहाट्टहासः।
गन्धर्व्वकिन्नरमुनीश्वरचारणानां
स्फीतश्चचार भगवत्स्तुतिवादनादः ॥ ५१ ॥

तच्चारुणाधरदलाद्दशनांशुशुभ्राद्
व्याकीर्णकेशरकुलाद्दशनारविन्दात्।
सत्सौरभं भगवतः स्वरसन्निवृत्तं
धन्याः पपुर्मधुरवाङ्मधु पुण्यस्तम् ॥ ५२ ॥

पापं विमुञ्चत निषिञ्चत पुण्यवीजं
वैरं परित्यजत शाम्यसुखं भजध्वम्।
ज्ञानामृतं पिवत मृत्युविषापहारि
नेयं तनुः कुशलकर्म्मसखी चिराय ॥ ५३ ॥

དཔལ་འབྱོར་གཡོ་ཞིང་ཡང་ཚོ་ཉིད་ཀྱང་གོ་བར་རྗེས་སུ་འགྲོ།
ལུས་ཀྱང་གནོད་པའི་ཚོགས་རྣམས་དག་གི་གནས་ཉིད་གྱུར་པ་ཡིན།
སྲོག་ནི་ངན་པའི་ལུས་ཀྱི་ཁྱིམ་གྱི་ཡུད་ཙམ་མགྲོན་ཡིན་པས།
ཆོས་ཀྱི་རང་བཞིན་རྟག་ཏུ་སྙིང་ལ་རབ་ཏུ་འབད་པར་མཛོད། 54

དེ་ལ་སོགས་པའི་བཅོམ་ལྡན་འདས་ཀྱིས་ཉེར་བསྟན་ཡེ་ཤེས་ཀྱི།
སྣང་བ་དྲི་མ་མེད་པ་དབེན་ཞིང་དགེ་བའི་མཐུ་སྟོབས་ཀྱིས།
སྐྱེ་བོའི་ངར་འཛིན་འཇིག་ཚོགས་ལྟ་བའི་རི་བོའི་རྩེ་མོ་ནི།
ཉི་ཤུ་རྡོ་རྗེས་བཞིན་དུ་ཤུར་བཅོམ་རབ་ཏུ་ཞི་བར་གྱུར། 55

ཧཱུྃ་འཕྲུལ་འོད་ལྡན་བཅོམ་ལྡན་འདས་ཀྱི་མཐུ་སྟོབས་སྣ་སྟེགས་རྣམས།
ཐུགས་ཀྱིས་བཅོམ་པའི་དུག་འཛིན་བཞིན་དྲེགས་པ་ཉམས་གྱུར་ཅིང་།
ཉི་མའི་འོད་ཀྱི་མཐུ་ཡིས་མར་མེ་བཞིན་དུ་ཟིལ་གྱིས་མནན།
ཡུན་རིང་གཡོ་བ་མེད་པའི་མོ་བཀོད་པ་བཞིན་གྱུར། 56

སྐབས་དེར་གནོད་སྦྱིན་ལག་ན་རྡོ་རྗེས་ཟད་བྱེད་པ་རྣམས་ནི།
བདག་ཉིད་ཀུན་གྱིས་རྟག་ཏུ་བཅོམ་ལྡན་འདས་ཀྱི་མི་མཐུན་ཕྱོགས།
ཡིན་པར་ཤེས་ནས་དྲག་པོའི་རླུང་གིས་དཀྲིས་པའི་ཚར་དག་སྦྲོས།
ཉམ་པར་རྫོངས་ནས་ས་ཡི་ཁུང་བུད་བསྐྱབས་པ་དག་ཏུ་བྲུས། 57

लक्ष्मीश्चला तरुणता च जरानुजाता
कायोऽप्यपायनिचयस्य निवास एव ।
प्राणाः शरीरककुटीषु मुहूर्त्तपान्था
नित्योदये कुरुत धर्म्ममये प्रयत्नम् ॥ ५४ ॥

इत्यादिभिर्भगवतः प्रविभक्तदीप्त-
ज्ञानैर्विवेकविमलैः कुशलोपदेशैः ।
वज्रैरिवाशु दलनं प्रययौ जनानां
सत्कायदृष्टिसमविंशतिशृङ्गशैलः ॥ ५५ ॥

ऋद्धिप्रभा भगवतः प्रविभाव्य तीर्थ्या
मन्त्राहता विषधरा इव भग्नदर्पाः ।
दीपा इवार्ककिरणप्रतिभाभिभूता
श्चित्रार्पिता इव ययुश्चिरनिश्चलत्वम् ॥ ५६ ॥

अत्रान्तरे भगवतः सततं विपक्षः
सर्व्वात्मना क्षपणको नवधर्म्मयक्षः ।
क्षिप्तश्रवान् स हतवर्षवरैश्चकार
विद्राव्य रन्ध्रशरणान् भुवि वज्रपाणिः ॥ ५७ ॥

དེ་ནས་དེ་དག་ལ་མཆོད་བཅོམ་ལྡན་སྐྱབས་འོས་སྙིང་རྗེ་ཡིས།
བརྙན་པར་གྱུར་པས་ཉེ་བར་བསྟན་པ་ཀུན་གྱི་ཡུལ་བཀའ་སྩལ།
རི་དང་ནགས་དང་ས་དང་ཀླུང་དང་ཁུངས་ལ་སོགས།
འདི་ཀུན་ངེས་པར་སྤྲང་མ་རྣམས་ཀྱི་འཇིགས་ལ་སྐྱབས་མི་འགྱུར། 58

རབ་དུ་སང་བའི་རང་བཞིན་གནས་ལ་བློ་གྲོས་བསྐྱེད་བྱས་ནས།
སངས་རྒྱས་ཆོས་དང་དགེ་འདུན་བཅས་ལ་གང་ཞིག་སྐྱབས་སོང་བ།
དེ་དག་འགྲོ་བ་འཇིགས་པས་འཇིག་པ་ལ་ཡང་འཇིགས་པ་མེད།
དམན་པ་ཡོངས་འཛིན་སྐྱབས་ནི་གཞན་ན་ཡོད་པ་ཉིད་མ་ཡིན། 59

འཇིག་རྟེན་པ་རོལ་མི་བཟད་སྲུན་པ་ཀློག་དཀར་ཆོས་ནི་རབ་གྲོས་ཚ་ཟེར་ཅན།
བཟོད་དཀར་སྡིག་པའི་གདུང་བ་ཞོངས་པས་མངོན་པར་བསྐྱེད་པ་སྨིན་པ་རྒྱ་གཏེར་ཡིན།
མི་བཟད་གཏི་མུག་གཡང་ས་ཆེན་པོའི་གཅོང་ལ་ཤེས་རབ་ལག་པས་འཆེལ་བ་སྟེ།
ཀུན་དུ་མི་རྣམས་ཀྱི་ནི་བསོད་ནམས་ཁོ་ན་དམན་དང་ཚོ་ངེ་བྲལ་བའི་སྐྱབས། 60

དེ་ལྟར་རབ་རིབ་ཀྱིས་བསྒྲིབས་མིག་ཅན་རྣམས་ཀྱི་མིག་ནི་དབྱེར་འོས་ཤིང་།
ཆོམས་ཀྱི་ནོར་བུའི་འོད་ཟེར་དག་ནི་རབ་གསལ་ལྡན་པས་གསལ་བྱས་ནས།
མདུན་སར་བདེ་གཤེགས་ཟླ་བས་དག་པའི་ཆོས་ནི་ཉེ་བར་བསྟན་པ་དག།
བདེན་པར་གྱུར་པའི་གནས་བཞིན་མཇེད་ནས་རང་གི་ནགས་སུ་གཤེགས་པར་གྱུར། 61

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཆོ་འཕྲུལ་གྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཅུ་བཞི་པའོ།།

उद्दिश्य तानथ कृपार्द्रभयाशरण्यः
सर्व्वोपदेशविषयान् भगवान् बभाषे ।
भूभृद्वनावनिमणिविवरादि सर्व्वं
तेने भयेषु शरणं किल कातराणाम् ॥ ५८ ॥

बुद्धं प्रबोध मम धाम्नि निधाय बुद्धिं
धर्म्मं ससङ्घमपि ये शरणम्प्रपन्नाः ।
तेषां जगत्क्षयभयेष्वपि निर्भयाणां
नैवान्यतः शरणदैन्यपरिग्रहोऽस्ति ॥ ५९ ॥

दुर्वारे परलोकतीव्रतिमिरे धर्म्मः प्रवृद्धोऽंशुमान्
दानं दुःसहपापतापविपदामभ्युद्गमे वारिदः ।
प्रज्ञा मोहमहाप्रपातविषमश्वभ्रे करालम्बनं
दैन्याक्रान्तमहीनमेव शरणं सर्व्वंच पुण्यं नृणाम् ॥ ६० ॥

इति तिमिरहताक्ष्णां चक्षुरुन्मीलनार्हं
दशनमणिमरीचिव्यज्यमानप्रकाशम् ।
सदसि सुगतचन्द्रः शुद्धधर्म्मोपदेशं
स्थिरपदमिव कृत्वा काननं स्वं जगाम ॥ ६१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां प्रातिहार्य्यावदानं नाम त्रयोदशः पल्लवः ॥

CHAPTER XIV.

ཡལ་འདབ་བཅུ་བཞི་པ།

ལྷ་ལས་བབས་པའི་རྟོགས་བརྗོད།

རྗེས་དང་མདུན་དང་མདོན་དུ་གྱུར་པར་ཡང་།
སྐྱེ་བོའི་དགེ་བའི་ལས་ཀྱི་ལམ་དག་ནི།
གསལ་བར་བྱེད་པ་བདག་ཉིད་ཆེན་པོའི་མཐུ།
རིན་ཅེན་སྒྲོན་མ་ལྷ་བུར་གྱུལ་གྱུར་ཅིག། 1

སྔོན་ཆེ་ལྷ་ཡི་གྲོང་ཁྱེར་དུ། ཡོངས་འདུ་ཀོ་བི་ད་རའི་དྲུང་།
ལ་བ་དཀར་པོ་ཞེས་བྱ་བ། འོད་བཟང་རྡོ་ལེབ་སྟེང་དུ་ནི། 2

བཅོམ་ལྡན་འདས་ཀྱིས་སྐབས་གསུམ་པའི། ཚོགས་ལ་ཆོས་ནི་བསྟན་མཛད་ནས།
མི་རྣམས་རྗེས་སུ་གཟུང་བའི་སླད། འཛམ་བུའི་གླིང་དུ་བབས་པར་གྱུར། 3

ས་ལ་བབས་པར་གྱུར་པ་དེའི། རྗེས་སུ་འཆི་མེད་རྣམས་འབྲངས་པས།
གཞལ་ཡས་ཁང་གི་ཚོགས་ཀྱིས་ནི། ས་གཞི་མཉམ་པ་ཁེངས་པར་གྱུར། 4

ཟླ་བའི་འོད་ལྡན་ཊེ་ཡབ་ནི། དེ་ཡི་ཚོམས་ཀྱི་འོད་རྒྱུན་གྱིས།
གྲོས་པའི་ཉེ་བར་བསྟན་པ་བཞིན། གདོང་བཞི་པ་ཡིས་བླངས་པར་གྱུར། 5

चतुर्द्दशः पल्लवः ।

देवावतारावदानम् ।

जयतु महतां प्रभावः
पश्चादग्रे च वर्त्तमानो यः ।
जनकुशलकर्म्मसरणिः
प्रकाशरत्नदीपो वः ॥ १ ॥

पुरा सुरपुरे पाण्डुकम्बलाख्ये शिलातले ।
समीपे पारिजातस्य कोविदारस्य सुप्रभे ॥ २ ॥

कृत्वा त्रिदशसङ्घानां भगवान् धर्म्मदेशनाम् ।
अनुग्रहाय मर्त्त्यानां जम्बूद्वीपमवातरत् ॥ ३ ॥

अमरैरनुयातस्य तस्यावतरतो भुवम् ।
विमानकाननाकीर्णं बभूव भुवनाङ्गनम् ॥ ४ ॥

तस्य दन्तांशुसन्तानैरुपदेशमिवार्चितम् ।
जग्राह चन्द्ररुचिरं चामरं चतुराननः ॥ ५ ॥

ཐུར་མ་བརྒྱ་ཡིས་མཚན་པའི་གདུགས། མཚན་མེད་རི་དགས་མཚན་ལྷར་དཀར།
དེ་ཡི་བཀའ་དྲིན་རྣམ་བཅས་བཞིན། བརྒྱ་བྱིན་གྱིས་ནི་བླངས་པར་གྱུར། 6

གྲོང་ཁྱེར་ཤང་ཀཱ་ཤྱ་ཡི་འགྲམ། ཨུ་དུམ་བ་རའི་གནས་དྲུང་དུ།
འབབས་པ་དེ་ལ་ལེགས་བྱས་ལྷན། ཀུན་དགའ་བཅས་པས་ཕྱག་འཚལ་གྱུར། 7

སྐྱེ་བོའི་ཚོགས་དེར་དགེ་སློང་མ། ཨུཏྤལ་མདོག་མ་ཞེས་པ་ཡིས།
བལྟ་བའི་གནས་སྐབས་མ་ཐོབ་ནས། མི་བདག་གཟུགས་ནི་ཉེ་བར་བླངས། 8

རིན་ཆེན་ཅོད་པན་རབ་གསལ་ཞིང་། རྣ་རྒྱན་འགྲམ་པར་རབ་མཛེས་པ།
དེ་ཡི་གཟུགས་གསར་མཐོང་གྱུར་ནས། གཙུག་ཏོར་ཡལ་འདབ་དགོད་པ་བཞིན། 9

དེ་ཡིས་བསམས་པ་ཤིན་ཏུ་ཡང་། སྐྱེ་བོའི་མདུན་འདི་བར་མཚམས་མེད།
བདག་གི་རྒྱལ་པོའི་གཟུགས་མཐོང་ནས། གུས་བཅས་སྐབས་ནི་སྟེར་བར་འགྱུར། 10

འདི་ལས་གཞན་ཡང་བཅོམ་ལྡན་ལ། ཕྱག་འཚལ་བདག་གིས་སྙེད་པར་དཀའ།
དབང་ཕྱུག་ལ་དགའ་སྐྱེ་བོ་ཡིས། ཡོན་ཏན་ཞེས་པའི་གནས་མ་ཡིན། 11

ཀྱེ་མ་ཙྭ་མཚུངས་གཡོ་བའི་ནོར། རོ་བྲལ་སྙིང་པོ་མེད་པ་ཡིས།
བག་ཆགས་གོམས་པར་གྱུར་བ་ལས། མ་དཔྱད་ཉིད་ཀྱིས་སྐྱེ་བོ་འཁྱོག 12

འཕྲུལ་ལ་སྐྱེ་བོའི་མི་བདག་ལ། ཞེ་སར་བྱས་ནས་སྐབས་བྱིན་དེས།
དོ་ཤལ་གཡོ་བས་བཅོམ་ལྡན་ལ། མདུན་དུ་ཕྱག་ཀྱང་བྱས་པར་གྱུར། 13

छत्रं शतशलाकाङ्कमनङ्कं रङ्कुपाण्डुरम् ।
प्रसादमिव साकारमाददेऽस्य पुरन्दरः ॥ ६ ॥

सङ्काश्यनगरोपान्ते काननोदुम्बरान्तिके ।
अवतीर्णं सुकृतिनः सानन्दास्तं ववन्दिरे ॥ ७ ॥

तस्मिन्नुत्पलवर्णाख्या भिक्षुकी जनसङ्कमे ।
अलब्धावसरा द्रष्टुं नृपरूपमुपाददे ॥ ८ ॥

प्रदीप्तरत्नमुकुटं गण्डताण्डविकुण्डलम् ।
दृष्ट्वैवास्य नवं रूपं जहासोष्णीषपल्लवः ॥ ९ ॥

सा चिन्तयन्ती को वायं जनैर्निर्व्विवरः पुरः ।
अन्तरं नृपरूपं मे दृष्ट्वा दास्यति सादरः ॥ १० ॥

अतोऽन्यथा तु भगवत्प्रणतिर्मम दुर्लभा ।
न गुणं गौरवस्थानमैश्वर्य्यप्रणयी जनः ॥ ११ ॥

अहो तृणतुलालोलैर्निःसारविरसैर्धनैः ।
ह्रियते वासनाभ्यासात् निर्विचारतया जनः ॥ १२ ॥

दत्तान्तरा सा सहसा जनेन नृपगौरवात् ।
लोलहारं भगवतः प्रणाममकरोत् पुरः ॥ १३ ॥

གནས་སྐབས་དེར་ནི་མདུན་ས་རུ། འཆར་དཀའ་ཞེས་པའི་དགེ་སློང་གིས།
དེ་ལྟའི་གཟུགས་དེ་མཐོང་གྱུར་ནས། བཞིན་ནི་འཛུམ་པ་དང་བཅས་སྨྲས། 14

མི་བདག་གཟུགས་ཅན་དགེ་སློང་མ། ཨུ་དྤལ་མདོག་མ་སྐྱེ་བོ་ཡིས།
ཕྲུག་བྲུས་མ་འདི་རྫུ་འཕྲུལ་གྱིས། བཅོམ་ལྡན་ཞབས་ལ་ཕྱག་འཚལ་བྱེད། 15

ཨུ་དྤལ་དྲི་དང་མདོག་དག་གིས། བདག་གིས་འདི་ནི་མདུན་དུ་ཞེས།
དེ་སྐད་བརྗོད་ནས་འདུག་པའི་ཚེ། བཅོམ་ལྡན་གྱིས་ཀྱང་བཀའ་སྩལ་པ། 16

ཁྲིགས་ལས་རྫུ་འཕྲུལ་རབ་སྟོན་པ། དགེ་སློང་མ་ཡི་རིགས་མིན་ཉིད།
མཛོད་པའི་ང་རྒྱལ་རིམས་གསར་གྱིས། རབ་དུ་ཞི་བ་ནད་པར་བྱེད། 17

དེ་སྐད་བརྗོད་ནས་བཅོམ་ལྡན་གྱིས། དགེ་བ་དེ་དེ་བསྟན་མཛད་ནས།
ལྷ་རྣམས་བཀློག་སྟེ་དགེ་སློང་དང་། ལྷན་ཅིག་རང་གི་གནས་སུ་གཤེགས། 18

དེ་ནི་ཉེར་བཞུགས་དེ་དག་གིས། རབ་དུ་དྲིས་ཤིང་ཀུན་མཁྱེན་གྱིས།
སྔར་སྐྱེས་ལས་ཀྱི་ཡང་དག་བསྒྲགས། དགེ་སློང་མ་དེའི་གཏམ་གསུངས་པ། 19

བྲ་ཧྨ་ཁ་སེར་སྟོན་བྱུང་བ། དེར་དཔོན་ནོར་ནི་ཆེན་པོ་ཡི།
ཆུང་མ་ནོར་ལྡན་མ་ཞེས་པ། དེ་ཡི་སྒྲོག་དང་མཚུངས་པར་གྱུར། 20

གཟུགས་བཟང་ལག་པའི་ཡལ་འདབ་ལྡན། ལང་ཚོ་སྐྱིད་ཚལ་སྐྱེ་མ་དང་།
འབྲས་བུ་མེ་དོག་ལྡན་དུས་སུ། དེ་ཡིས་དེ་ལ་མངལ་བཟུང་གྱུར། 21

अस्मिन्नवसरे भिक्षुहृदयी नाम संसदि ।
तां विलोक्य तथारूपामवदत् सस्मिताननः ॥ १४ ॥

इयमुत्पलवर्णाख्या भिक्षुकी नृपरूपिणी ।
ऋद्धा भगवतः पादौ वन्दते जनवन्दिता ॥ १५ ॥

उत्पलामोदवर्णाभ्यां विज्ञातेयं मया पुरा ।
इत्युक्ता विरते तस्मिन् भगवानप्यभाषत ॥ १६ ॥

अयुक्तमेव भिक्षुक्या दर्पाद्दृद्धिप्रकाशनम् ।
करोति प्रशमम्लानिमभिमानेन च ज्वरः ॥ १७ ॥

इत्युक्ता भगवान् कृत्वा तां तां शुभोपदेशनाम् ।
विसृज्य देवान् प्रययौ स्वपदं सह भिक्षुभिः ॥ १८ ॥

तत्रोपविष्टः पृष्टस्तैः प्रणतैर्भिक्षुकीकथाम् ।
प्राग्जन्मकर्म्मसम्बद्धां सर्व्वज्ञस्तानभाषत ॥ १९ ॥

वाराणस्यामभूत् पूर्व्वं सार्थवाहो महाधनः ।
पत्नी धनवती नाम तस्य प्राणसमाभवत् ॥ २० ॥

पाणिपल्लविनी तन्वी यौवनोद्यानमञ्जरी ।
फलपुष्पवती काले सा तस्मात् गर्भमादधे ॥ २१ ॥

སྐབས་དེར་རྒྱ་གཏེར་གླིང་ལ་ནི། རྫིས་སུ་འགྲོ་བར་བརྩོན་པ་ཡི།
ཁྲོ་ལ་རབ་ཏུ་ཉེ་བ་དག། འབྲལ་བས་གཟིར་བ་དེ་ཡིས་སྨྲས། 22

ཛི་སྙིང་ནོར་ནི་ཕུན་ཚོགས་ཤིང་། ད་ལྟ་ཡང་ནི་འཕེལ་བ་ཐོབ།
གང་གི་ཆེད་དུ་འཇིགས་རུང་བའི། ཆུ་སྲིན་འབྱུང་གནས་ཟབ་མོ་བགོལ། 23

ནོར་ནི་འཇོན་པ་གནོད་པ་མང་། ཡོན་ཏན་སྒྲུབ་པ་གནོད་པ་མེད།
ནོར་ནི་དོན་གཉེར་རང་ཕུལ་ནས། འཇིག་རྟེན་པ་རོལ་དག་ཏུ་འགྲོ། 24

ཁ་ཅིག་རིང་དུ་སོང་ནས་ཀྱང་། སྡུག་བསྔལ་ལས་ནི་འབྲས་མེད་ལྡོག།
གཞན་ནི་གཡོ་མེད་ནོར་དང་ལྡན། འདི་ཡི་ངེས་པ་ལས་ཉམས་སོ། 25

དེ་སྐད་དགའ་མའི་ཚིག་ཐོས་ནས། དོན་མཐུན་བདག་པོས་དེ་ལ་སྨྲས།
མཛེས་མ་ནོར་དག་བསྒྲུབས་པ་ནི། བསྔགས་པའི་སྙིང་ཉིད་ཁོ་ན་ཡིན། 26

བདེར་གནས་ནོར་སྒྲུབ་ཀྱིས་དམན་རྣམས། ཙ་བ་ཟོས་པའི་འབྲུ་བོ་བཞིན།
དེ་རིང་སང་ལ་ལོངས་སྤྱོད་དང་། ལྷན་ཅིག་ཡོངས་སུ་ཟད་པར་འགྱུར། 27

རང་ཁྱིམ་དུ་ཡང་དབུལ་རྣམས་ལ། སྐྱེ་བོ་སོག་ལེ་བཞིན་དུ་ཇུབ།
འཇིག་རྟེན་གཞན་དུའང་ནོར་ལྡན་ནི། སྐྱེ་བོ་རྣམས་ཀྱི་མཛའ་སྡུག་ས། 28

འཕེལ་བར་རྩོམ་སྐྱད་ཟླ་ཚེས་ནི། ཕྲ་མོ་ལ་ཡང་སྐྱེ་བོ་འདུད།
མཐར་ནི་ཡོངས་འཛད་རབ་ཉེ་བས། ཡོངས་སུ་རྫོགས་པ་ལ་ཡང་མིན། 29

अत्रान्तरे जलनिधिद्वीपानुगमनोद्यतम् ।
प्रत्यासन्नवियोगार्त्ता सा वल्लभमभाषत ॥ २२ ॥

कियती धनसम्पत्तिर्वृद्धिमद्यापि नीयते ।
यत्कृते घोरगम्भीरस्तीर्य्यते मकराकरः ॥ २३ ॥

बह्वपायं धनादानं निरपायं गुणार्ज्जनम् ।
स्वदेशात् परदेशं हि गच्छन्ति द्रविणार्थिनः ॥ २४ ॥

केचिद्दुःखान्निवर्त्तन्ते दूरं गत्वापि निष्फलाः ।
निश्चला धनिनश्चान्ये कर्म्मणामेष निश्चयः ॥ २५ ॥

इति प्रियावचः श्रुत्वा सार्थवाहस्ततोऽभ्यधात् ।
मुग्धे सम्भावनापात्रो भवत्येवं धनोद्यतः ॥ २६ ॥

धनार्ज्जनविहीनानां पङ्गुवत् मूलभक्षणात् ।
अद्य श्वोवा सुखस्थानां भोगैः सह परिक्षयः ॥ २७ ॥

स्वगृहेऽपि दरिद्राणां जनः क्रकचनिष्ठुरः ।
धनिनां परलोकोऽपि प्रेमस्निग्धजनम्भुवः ॥ २८ ॥

क्षीणमप्युद्यतं वृद्धौ न वेणुं बध्नते जनः ।
न तु स पूर्णतां याति प्रत्यासन्नपरिक्षयः ॥ २९ ॥

སྐྱེ་བོ་མངོན་པར་དར་ལ་ཉེ། མྱོང་བའང་མཁས་པས་ཕྲུག་བྲར་ཡོད།
གོན་ཡང་མོ་ཡི་ཡིད་དུ་འོང་། མ་ཉིང་ཡིན་ཡང་དཔའ་བསྟེན་འོས། 30

མཁས་ཀྱང་བཀྲིས་དང་སྐོམ་པ་ལ། སྒྲ་ཡི་བསྡུན་བཅོས་ཟློས་པ་འདས།
སྙན་ངག་བདད་རྩི་འཐུངས་པས་ནི། སྐད་ཅིག་སྲུ་ཡིས་ཉམ་པར་གྱུལ། 31

གང་ལ་ནོར་ཡོད་དེ་ནི་ཡོན་ཏན་གྱིས་མགོ་བསྟོད་བྱས་ཡོན་ཏན་དག་ཀྱང་ཅིས་མི་འཛིན།
དབུལ་ལས་ཉམས་པའི་སྐྱོན་གྱིས་གཟི་བྱིན་སྲུན་ཕྱུང་ཡོན་ཏན་མེ་ཏོག་སྐྱིང་མཚུངས་ནོར་གྱིས་ནི།
ཡོན་ཏན་ཉིད་དེ་ཡོན་ཏན་ལ་ནི་ནོར་མིན་ནོར་ལྡན་བསྔགས་འོས་ཡོན་ཏན་ལྡན་པ་མིན།
སློང་བའི་ངན་བྱས་ཚོགས་རྣམས་ཞི་བ་དག་ལས་ནོར་ནི་ཡོན་ཏན་རྣམས་ཀྱི་ཚེ་སྲོག་ཡིན། 32

དེ་སྐད་སྲོག་ལས་ནོར་ལྷག་པ། དེ་ཡིས་བདག་པོའི་ཚིག་ཐོས་ནས།
འཁྲི་ཤིང་ཀྱང་དུག་པས་བསྒྲུན་བཞིན། མིག་དམན་དང་བཅས་མཆི་ཐིགས་ཀྱིས། 33

དེ་ནས་དེ་དང་ལྷན་ཅིག་དུ། དོན་མཐུན་མགོན་གྱི་གྲུ་གཟིངས་བསྟེན།
སྲིད་པ་དྲག་པོ་འཛིན་རྣམས་ཀྱིས། ཆུ་གཏེར་ཆེན་པོ་ལག་པའི་སྣོན། 34

ལས་ཀྱི་རླུང་གི་རྗེས་ཞུགས་པ། ཆུང་མའི་གྲོགས་ལྡན་དེ་ཡི་གཟིངས།
ཡིད་ལ་རེ་བ་སྲོག་དང་བཅས། ཆུ་གཏེར་དུ་ནི་ཞིག་པར་གྱུར། 35

དེ་ནས་ལས་ཀྱི་ལོངས་སྤྱོད་ཀྱི། ལྷག་མས་ཤིང་དུམ་བཟུང་གྱུར་པས།
ཀ་སེ་རུ་ཡི་གླིང་ཕྱིན་ནས། དེ་ཡི་ཆུང་མ་ཤི་མ་གྱུར། 36

मूर्खोऽपि विदुषां वन्द्यः स्त्रीणां वृद्धोऽपि वल्लभः।
क्लीवोऽपि सेव्यः शूराणामासन्नाभ्युदयो जनः ॥ ३० ॥

केनान्यकरणं भुक्त्वा पीत्वा काव्यामृतानि वा।
क्षणं विचक्षणेनापि क्षुत्पिपासे विवर्जिते ॥ ३१ ॥

यस्यार्थः स गुणोन्नतैः कृतनुतिः कस्वा न धत्ते गुणं
दारिद्र्योदयदोषदूषितरुचां निर्माल्यतुल्या गुणाः।
वित्तेनैव गुणा गुणी न तु धनी धन्यो धनी नो गुणी
कायाद्दुष्कृतसन्निपातशमनादायुर्गुणानां धनम् ॥ ३२ ॥

इति प्राणाधिकार्थस्य पत्युराकर्ण्य सा वचः।
साञ्जनाश्रुकणोत्कीर्णा लतेवाभ्रुतषट्पदा ॥ ३३ ॥

अथ प्रवहणं भेजे सार्थनाथस्तया सह।
तीव्रतृष्णागृहीतानां हस्तपाचं महोदधिः ॥ ३४ ॥

तस्य जायासखस्यासौ कर्म्मवातानुवर्त्तिनः।
अभज्यत प्रवहणं समनोरथजीवितम् ॥ ३५ ॥

ततः फलकमासाद्य भागशेषाच्च कर्म्मणः।
कशेरुद्वीपमासाद्य तत्पतिर्विपदं गतः ॥ ३६ ॥

དེར་ནི་བསམ་པ་ཉམས་གྱུར་ཅིང༌། མགོན་མེད་སྡུ་ངན་བྱེད་དེ་དང༌།
འདབ་བཟང་རིགས་ལས་སྐྱེས་པའི་བྱ། སྐྱེས་བུའི་དབྱིབས་ཅན་ཕྲད་པར་གྱུར། 37

མཐོང་པས་ཐྲོགས་པ་བཞིན་བཟང་མིང༌། དེ་ཡིས་མཐོང་མ་དེ་ལ་སྨྲས།
མིག་ནི་གཡོ་མ་ཡིད་བརྟན་མཛོད། གནས་འདིར་ཁྱོད་ལ་འཇིགས་པ་མེད། 38

འདི་ནི་སྐལ་བཟང་མཆོག་གིས། བདག་ནི་ཁྱོད་ཀྱི་འདོད་པ་འཚོལ།
རྒྱ་སྲིན་འབྱུང་གནས་འདི་འཇིགས་རུངས། དགེ་མ་ཁྱོད་ནི་ཡང་སྐྱེས་སོ། 39

དེ་ཡིས་འདི་བརྗོད་དལ་བུ་ཡིས། རིན་ཅེན་རང་བཞིན་ཁང་པར་ཁྲིད།
མངལ་ནི་ཡོངས་སུ་རྫོགས་དེ་ལ། གཟུགས་མཛེས་བུ་དག་བཙས་པར་གྱུར། 40

ཁྲིམས་པ་དེ་ནི་ཆེར་སྐྱེས་ཚེ། རིམ་གྱིས་སློན་པར་སྨྲ་བྱེད་པ།
མཁས་པ་དེ་ཡིས་མཐོང་མ་དེ། ལོངས་སྤྱོད་དག་ལ་མངོན་ཕྱོགས་བྱས། 41

དྲང་ཉིད་ཕྱིར་དང་འཇམ་ཉིད་ཕྱིར། མཛའ་གཙུགས་ཉེ་བའི་སྐྱེ་བོ་ལ།
བྲུད་མེད་རང་ཉིད་འཁྲུད་གྱུར་དེ། ཤིང་འཕྲང་དག་ལ་འཁྲི་ཤིང་བཞིན། 42

དེ་ཡིས་མཆོག་གི་སྐྱེད་ཚལ་དུ། ནུ་གྲིས་དེ་ལ་རོལ་པ་ལས།
གཞོན་ནུ་མཛེས་པའི་ནམ་པ་ཅན། ཕ་དང་མཚུངས་པ་བཙས་པར་གྱུར། 43

པདྨའི་བཞིན་ཞེས་བྱ་བ་དེ། ལང་ཚོའི་རྒྱན་གྱིས་བརྒྱན་པ་ཡིས།
དུས་སུ་འདབ་ཆགས་རྒྱལ་པོ་ནི། བཞིན་བཟང་འཇིག་རྟེན་གཞན་དུ་སོང༌། 44

अनाथां तत्र शोचन्तीं विहङ्गः पुरुषाकृतिः।
तामाप पादपीर्णाशां सुवर्णकुलसम्भवः॥ ३७॥

स कान्तां सुमुखो नाम तामुवाच कृपाकृतः।
समाश्वसिहि लोलाक्षि निर्भयोऽयं तवाश्रयः॥ ३८॥

दिव्येयं सुभगा भूमिः वयन्त्वत्प्रणयैषिणः।
पुण्यायातासि कल्याणि घोरोऽयं मकराकरः॥ ३९॥

इत्युक्ता तेन शनकैर्नीता रत्नालयं गृहम्।
सम्पूर्णगर्भा तनयं चारुरूपमसूत सा॥ ४०॥

वर्द्धमाने शिशौ तस्मिन् सा शनैः प्रियवादिना।
मुग्धा तेन विदग्धेन सम्भोगाभिमुखीकृता॥ ४१॥

सरलत्वान्मृदुत्वाच्च समीपप्रणयी जनः।
स्वयमालिङ्ग्यते स्त्रीभिर्लताभिरिव पादपाः॥ ४२॥

दिव्योद्यानेषु सा तेन रममाणा घनस्तनी।
कुमारं रुचिराकारं सुषुवे सदृशं पितुः॥ ४३॥

तस्मिन् पद्ममुखाभिख्ये यौवनालङ्कृताकृतौ।
सुमुखः पक्षिणां राजा काले लोकान्तरं ययौ॥ ४४॥

དེ་རྗེས་དཔལ་ལྡན་པདྨའི་བཞིན། ཕ་ཡི་གནས་ནི་ཐོབ་གྱུར་ཏེ།
ཡོན་ཏན་ཅན་ལ་རྩོད་མེད་དུ། རིགས་ཀྱི་ཕུན་ཚོགས་རང་དབང་འགྱུར། 45

ཀུན་དུ་དེ་ཡི་མཐུ་དག་ནི། གཙོ་བོའི་ནུས་ལྡན་ཉིད་ཤེས་ནས།
དབང་ཕྱུག་ཐོབ་པའི་བུ་དེ་ལ། སྐྱོ་བོ་མེད་པར་མ་ཡིས་སྨྲས། 46

བུ་གཅིག་རང་རིགས་ལ་འོས་པའི། དཔལ་འབྱོར་འདི་ནི་ཁྱོད་ཀྱིས་ཐོབ།
དེད་དཔོན་ལས་སྐྱེས་བདག་གི་བུ། འདི་ལ་སྐལ་པ་ཡོད་མ་ཡིན། 47

བ་ར་ཎཱ་སིར་རང་སྤོབས་ཀྱིས། ཁྱོད་ཀྱི་འདི་ནི་རྒྱལ་པོར་གྱིས།
རང་ཡུལ་ཉིད་དུ་ཕུན་ཚོགས་པ། དགའ་བ་ཉམས་མྱོང་རོ་དང་བཅས། 48

དེ་སྐད་མ་ཡི་ཚིག་གིས་བྲུས། གཞོག་རླབས་ཤིན་ཏུ་ཆེ་བ་ཡིས།
སྤྱན་ལྷ་ཕྲག་པ་ལ་ཁྱེར་ནས། མཁའ་ལས་བ་ར་ཎཱ་སིར་སོང་། 49

དེ་ནས་ས་བདག་ཚངས་པས་བྱིན། སེང་གེའི་ཁྲི་ལ་བཞུགས་པ་དག
དྲག་ནོ་ནོ་རྗེའི་སྤྲེར་མོ་རྣམས། དེ་ཡིས་ལན་གཅིག་བསྐུན་ནས་བསད། 50

རྒྱལ་པོའི་སྟན་ནི་དེ་ཉིད་ལ། ཕུ་བོ་རྫོགས་པར་དབང་བསྐུར་ནས།
བློན་པོ་འཇིགས་པའི་ཚོགས་རྣམས་ལ། ཚུལ་མཆོག་ལྡན་པ་དེས་སྨྲས་པ། 51

བདག་གིས་རྒྱལ་པོར་དབང་བསྐུར་འདི། གང་གིས་རབ་ཏུ་སྐྱོང་བྱེད་ན།
དེ་ཡང་རྗེ་ལ་གུས་པ་ཡིས། འདས་པ་དེ་རྗེས་འགྲོ་བར་འགྱུར། 52

ततः पद्ममुखः श्रीमानाससाद पदं पितुः ।
गुणिनामविवादेन स्वाधीनाः कुलसम्पदः ॥ ४५ ॥

प्राप्तैश्वर्य्यं तमवदत् विजने जननी सुतम् ।
तत्प्रभावस्य सम्भाव्य सर्व्वंच प्रभविष्णुताम् ॥ ४६ ॥

पुत्र प्राप्ता त्वया लक्ष्मीरियं निजकुलोचिता ।
अयं तु सार्थवाहान्मे जातः पुत्रो निरंशकः ॥ ४७ ॥

वाराणस्यामयं राजा स्वशक्त्या क्रियतां त्वया ।
प्रीतिसंवादसास्वादः स्वदेशे सेव सम्पदः ॥ ४८ ॥

इति मातुर्गिरा पक्षी पक्षपातेन भूयसा ।
स्कन्धे भ्रातरमारोप्य व्योम्ना वाराणसीं ययौ ॥ ४९ ॥

तत्र सिंहासनासीनं ब्रह्मदत्तं महीपतिम् ।
संजघानैकदैनं स वज्राग्रनखरैः खरैः ॥ ५० ॥

अभिषिच्याग्रजं पूर्णं तस्मिन्नेव नृपासने ।
अमात्यान् सोऽवदत् भीतान् समग्रानग्रविक्रमः ॥ ५१ ॥

यस्य राज्ञोऽभिषिक्तस्य मया यः प्रचलीकरः [?] ।
सोप्यतीतः प्रभो भक्त्या तमेवानुगमिष्यति ॥ ५२ ॥

རབ་མཆོག་བློན་ལ་དཔལ་བྲུ་ཡིས། འདི་སྨྲས་བྲ་ཡི་གང་ཟག་ནི།
སྨྲུན་ལ་ཕྱིས་ཀྱང་ཕྲད་པ་ཡི། འགྲོ་བ་ཞུས་ནས་སོང་བར་གྱུར།། 53

ཚངས་བྱིན་དེ་ཉིད་འདི་འོ་ཞེས། བློན་པོ་རྣམས་ཀྱི་བགྲོས་པ་ལས།
རང་གི་སྐྱེ་བོ་གཞན་ལ་ཡང་། མི་བདག་དེ་ནི་གྲགས་པ་ཐོབ།། 54

སྐབས་དེར་ནགས་ནས་གླངས་པ་ཡི། མངལ་དང་བཅས་པའི་གླང་མོ་ཞིག།
མངལ་ནི་ནང་ནས་བཀག་པ་བཞིན། ཕྱིད་ནི་ཕྱིར་བྱུང་གྲོལ་མ་གྱུར།། 55

བྱད་མེད་དག་པའི་ལག་རྩེ་ཡིས། རེག་བས་མངལ་ནི་གྲོལ་བར་གྱུར།
ཅེས་པ་རྩིས་པས་བསྟན་པ་ནི། བློན་པོ་རྣམས་ཀྱིས་རྒྱལ་ལ་སྨྲས།། 56

དེ་ནས་ས་ཡི་བདག་པོའི་བཀས། ཕོ་བྲང་འཁོར་གྱི་བྱད་མེད་ཀྱིས།
ལག་པས་གླང་མོ་ལ་རེག་ནས། དེར་ནི་བདེན་པའི་བྱིན་བརླབས་བྱས།། 57

གང་ཚེ་དེ་དག་བདེན་ཚིག་གིས། གླང་མོའི་མངལ་ནི་མ་གྲོལ་བ།
དེ་ཚེ་རྒྱལ་པོའི་ཕོ་བྲང་གི། སྐྱེ་བོ་ཐམས་ཅད་སྐྱེངས་པར་གྱུར།། 58

དེ་ནས་བ་གླང་རྫི་མོ་ཞིག། མདོང་ཕྱོགས་ངང་ཚུལ་བདེན་པའི་ཚིག།
སྨྲས་ནས་གླང་མོ་ལ་རེག་པ། གང་གིས་མངལ་འདི་གྲོལ་བར་གྱུར།། 59

དེ་ཡ ་བོའི་ངང་རང་གི་བཙུན་མོ་རྣམས། ཚུལ་ཁྲིམས་ཀྱིས་དབུལ་ཉིད་ཞེས་ནས།
ཱི་མོ་དེ་ཉིད་ནི། འགྲོ་བ་གསུམ་ན་དག་པར་སེམས།། 60

इत्युक्त्वा प्रवरामात्यान् स्वैरं विहङ्गपुङ्गवः ।
ययौ भ्रातरमामन्त्र्य पुनर्दर्शनसंविदा ॥ ५३ ॥

स एव ब्रह्मदत्तोऽयमिति मन्त्रित मन्त्रिणाम् [?] ।
स नृपः ख्यातिमायातः स्वजनेषु परेषु च ॥ ५४ ॥

अत्रान्तरे समानीता सगर्भा हस्तिनी वनात् ।
न मुमोचार्धनिर्य्यातगर्भं रुद्धमिवान्तरे ॥ ५५ ॥

साध्वीकराग्रसंस्पर्शादियं गर्भं विमुञ्चति ।
इति मौहूर्तिकादिष्टं राज्ञे मन्त्री न्यवेदयत् ॥ ५६ ॥

शासनादथ भूभर्त्तुः स्पृष्ट्वा हस्तेन हस्तिनीम् ।
अन्तःपुराङ्गनाश्चक्रुस्तत्र सत्योपयाचनम् ॥ ५७ ॥

तासां सत्यगिरा गर्भं नात्यजत् करिणी यदा ॥
तदा विलक्ष्यः सर्व्वोऽभूत् भूपस्यान्तःपुरे जनः ॥ ५८ ॥

अथ गोपाङ्गनाभ्येत्य शीलसत्योपयाचनम् ।
कृत्वा पस्पर्श करिणीं येनासौ गर्भमत्यजत् ॥ ५९ ॥

राजापि निजजायानां ज्ञात्वा शीलदरिद्रताम् ।
मेने गोपां मनःस्वेव तां जगत्त्वितये सतीम् ॥ ६० ॥

དགེ་པའི་རིགས་ལ་ཆགས་པ་དེས། དེ་ཡི་བུ་མོ་སོ་ཤུམ་བ།
ཞེས་པ་མདུན་དུ་ཡོངས་བླངས་པ། ལྷ་མོ་འི་སྒྲ་ཡི་སྙོད་ཉིད་གྱུར།།

བུད་མེད་གཡོ་བ་ཉིད་དག་དང། དེ་ཡི་མཛེས་པ་བསམས་པ་ལས།
རྟོགས་པའི་ཀུན་དུ་བགྲོ་བ་ཡིས། གཉིད་ཀྱང་དེ་ཡིས་བཏང་བར་གྱུར།། 61

བར་སྐབས་དེར་ནི་སྤྲིན་བླ་ལ། མཛའ་ལས་ཤིན་དུ་གཙགས་པ་ཡི།
བྱ་ཡི་བདག་པོ་པདྨོ་འི་བཞིན། དེ་ལ་བལྟ་རུ་འོངས་པར་གྱུར།། 62

ས་བདག་གིས་ཀྱང་དེ་ལ་འཁྲུད། དགའ་བ་ཡིས་ནི་བཀུར་སྟི་བསྐྱབས།
སྐྱེ་བོ་མེད་སར་དེ་ལ་ནི། རང་གདམ་བ་ཤད་ནས་ཡང་སྨྲས་པ།། 63

ངང་ཚུལ་བདེན་པའི་སྐྱང་གཞལ་བས། བུད་མེད་རྣམས་ཀྱི་སྐྱོན་མཐོང་ནས།
བདག་ནི་བཙུན་མོ་འི་ཚོགས་ལས་ཕྱིར། ཕྱོགས་དེ་བག་མ་གཞན་གསར་བླང་།།
64

གཟུགས་དང་ལང་ཚོ་འགྲོ་ལྡན་མ། དེ་ལ་འང་བདག་ནི་མི་སྟོན་དེ།
གཅིག་ལ་སྐྱོན་ནི་མཐོང་བ་རྣམས། ཀུན་ལ་ཡིད་ནི་དོགས་པ་སྐྱེ།། 65

དེ་སྐད་སྤྲིན་བླ་ཁྱོད་ཀྱིས་ནི། གྲོང་ཁྱེར་མི་མེད་དག་དུ་བཟུང་།
ངང་ཚུལ་ལ་ནི་དོགས་བཏང་ནས། བདག་ནི་རིམས་དང་བྲལ་བར་འགྱུར།། 66

དེ་ལས་དེ་ནི་མཚན་དེ་བཞིན། ཁྱོད་ཀྱི་བཀའ་ལས་འདབ་ཆགས་ཀྱིས།
དཔལ་ལུས་ཁྱེར་ནས་བདག་ཁྱིམ་དུ། འོངས་པར་འགྱུར་བ་འདི་བདག་འདོད།། 67

स सती जातिलोभेन सोऽमुम्बां नाम तत्सुताम् ।
परिणीयानिनायाग्रे देवीशब्दस्य पात्रताम् ।

तस्याः सञ्चिन्त्य लावण्यं चपलत्वं च योषिताम् ।
स सर्व्वंगामिनीं निद्रामपि तत्याज शङ्किताम् ॥ ६१ ॥

अस्मिन्नवसरे द्रष्टुं भ्रातरं विहगाधिपः ।
ययौ पद्ममुख स्तत्र स्नेहादतिशयोत्सुकः ॥ ६२ ॥

भूपालोऽपि तमालिंग्य प्रीत्या विहितसत्कृतिः ।
विजने स्वकथामस्मै निवेद्य पुनरब्रवीत् ॥ ६३ ॥

शीलसत्यतुलारोहात् दृष्टदोषेण योषिताम् ।
ममान्तःपुरवैमुख्यात् विवाहोऽभिनवः कृतः ॥ ६४ ॥

रूपयौवनगामिन्यां तस्यामपि न मे धृतिः ।
एकत्र दृष्टदोषाणां सर्व्वत्राशङ्कते मनः ॥ ६५ ॥

तस्मात्तव पुरे भ्रातर्निर्मानुष्ये निधीयताम् ।
शीलशङ्कां परित्यज्य भवामि विगतज्वरः ॥ ६६ ॥

तस्मात् प्रतिनिशं पक्षी शासनात् तव मद्गृहम् ।
प्रापयिष्यति तां स्वैरमित्ययं मे मनोरथः ॥ ६७ ॥

དེ་སྐད་ཕུ་བོ་འདི་ཚིག་ཐོས་ནས། མཁའ་ལ་འགྲོ་བས་དེ་ལ་སྨྲས།
དོགས་པའི་དྲི་མས་ཕྲག་དོག་ནི། རྒྱལ་པོ་རྫུན་པ་ཉིད་མ་བྱེད།། 68

ཕྲག་དོག་དུག་གིས་དྲག་གཟིར་བ། དགའ་བར་བྱ་བ་དེས་མི་དགའ།
བཟའ་བ་རྣམས་ཀྱི་རོ་མི་རིག། བལྟ་བ་མ་ཡིན་གཉིད་མ་ཡིན།། 69

མ་ཉིང་འདོད་ལྡན་བདེ་ལྡན་མཁས། ནོར་ལྡན་དྲུང་པ་རྗེ་བཟོད་ལྡན།
སྙིང་བ་ཁེངས་པ་མི་བསྲུན་དེས། བུད་མེད་དག་ཅེས་གདམ་ཉིད་ཅི།། 70

དྲང་པོ་ལ་ཡང་གྲུ་གྲུ་ཅན། གནས་པ་ན་ཡང་ཤིན་ཏུ་གཡོ།
རིགས་ལྡན་ཡིན་ཡང་ལོག་གནས་པའི། བུད་མེད་འཁྲི་ཤིང་འཁྱུད་པར་བྱེད།། 71

མིག་གཡོ་མཆུ་ནི་ཆགས་དང་བཅས། སྨིན་མ་འཁྱོག་ཅིང་ནུ་མ་སྨ།
བུད་མེད་རྣམས་ཀྱི་ཤས་ལ་འདང། སྐྱོན་མེད་མཐོང་བ་ཉིད་ཡོད་མིན།། 72

མཁས་པས་གཡོ་ལྡན་བྱུང་བ་ཡི། རྣམ་པར་རོལ་བས་བུད་མེད་སྤྲད།
མཚོ་སྐྱེས་རྩ་བ་བཅལ་བ་ན། འདམ་གྱིས་ཉེ་བར་གོས་པ་ཉིད།། 73

འཛུམ་བཅས་ཡ་མཚན་དག་གི་ས། གཙང་སྦྲ་ངང་ཚུལ་དག་དང་བྲལ།
བུད་མེད་རྣམས་ནི་ངེས་བརླམས་པའི། དགའ་བ་གཅིག་ལ་བློ་མ་ཡིན།། 74

དེ་ལྟ་ན་ཡང་གལ་ཏེ་འབབ། གང་ཞིག་མངོན་པར་བཞེད་པར་མཛོད།
ཉིན་རེ་བདག་གྲོང་སྐྱུད་མོས་ཚལ། སྐྱེ་བོ་མེད་ས་དེ་གཞུག་བྱ།། 75

इति भ्रातुर्वचः श्रुत्वा तमुवाच विहङ्गमः ।
ईर्ष्याशङ्काकलङ्केन राजन्मिथ्यैव मा कृथाः ॥ ६८ ॥

न नाम रमते रम्ये नास्वादं वेत्ति भोजने ।
न पश्यति न निद्राति नित्यमीर्ष्यावशातुरः ॥ ६९ ॥

क्लीवः कामी सुखी विद्वान् धनी नम्रः प्रभुः क्षमी ।
अर्थी मान्यः खलः स्निग्धः स्त्री सतीति कथैव का ॥ ७० ॥

सरलत्वेऽपि कुटिलाः स्थायिन्योऽप्यतिचञ्चलाः ।
कुलीना अपि पार्श्वस्थमालिङ्गन्त्यवलालताः ॥ ७१ ॥

दृष्टिर्लोलाधरो रागी भ्रूर्वक्रा कठिनौ स्तनौ ।
दृश्यते नैव निर्दोषः स्त्रीणामवयवेष्वपि ॥ ७२ ॥

भुज्यन्ते कुशलैः श्यामा भ्रमद्भ्रमरविभ्रमैः ।
मूलान्वेषी सरोजिन्याः पङ्केनैवावलिप्यते ॥ ७३ ॥

नैकस्मिन् विस्मयभुवां सस्मितानां नियन्त्रिते ।
शुचिशीलविरामाणां रामाणां रमणे मतिः ॥ ७४ ॥

तथापि यदि निर्बन्धः क्रियतां यदभीप्सितम् ।
प्रत्यहं मत्पुरोद्याने निर्जने सा निधीयताम् ॥ ७५ ॥

སྤྲིན་ཟླ་འདབ་ཆགས་ཀྱིས་དེ་སྨྲས། ཀ་སེ་རུ་ཀའི་གླིང་དུ་ན།
དེ་དང་མཛེས་མ་མི་བདག་གིས། གུས་བཅས་བསྙེན་བཀུར་བྱས་ཏེ་བཏང་།། 76

དེ་ཡང་གླིང་དུ་སྐྱེས་པ་ཡི། དྲི་མཆོག་རང་བཞིན་འཕྲེང་བ་བླངས།
བྱ་ལ་ཞོན་ནས་མཚན་རེ་ཞིང་། ནམ་མཁའ་ལས་ནི་འོངས་པར་གྱུར།། 77

ཡོངས་འདུའི་རྗེས་འགྲོ་ལྡོན་པ་ཡི། མི་རྟོག་དེ་དག་དེ་ཡིས་ཐོབ།
བྱུང་བ་གསོ་བའི་སྨན་གཏིབས་པས། གྲགས་པ་ཡི་ནི་རབ་རིབ་བཞིན།། 78

དེ་ནས་ནམ་ཞིག་མཱ་ན་བ། ཞེས་པ་གཉིས་སྐྱེས་གཞོན་ནུ་ནི།
བཱ་རཱ་ཎ་སིར་གནས་པ་གཅིག། ནགས་ནས་ཡམ་ཤིང་ལེན་དུ་སོང་།། 79

དེར་ནི་མིའམ་ཅི་མོ་ཡིས། ཡིད་བསྲུབས་གསལ་བ་དེ་མཐོང་གྱུར།
གང་ཞིག་མཐོང་བ་ཉིད་ཀྱིས་དེ། དྲན་པ་རྣམ་པར་བརྗེད་པར་གྱུར།། 80

གསར་དུ་མངོན་པར་འདོད་པ་ཡིས། ཕས་བཞིན་དེ་ལ་དེ་གཏད་ནས།
མཛེས་ལྡན་ཞེས་པའི་མཛེས་མ་དང་། ཕྱུག་གི་ཁང་པར་རྣམ་པར་རོལ།། 81

རིན་ཅན་རྒྱན་གྱི་འོད་ཟེར་གྱིས། རབ་རིབ་ཚོགས་ནི་དེས་བསལ་ཏེ།
དེ་དང་ཡུན་རིང་རྩེས་པ་ལས། དུས་སུ་བུ་ནི་དེ་ཡིས་ཐོབ།། 82

བུ་དེ་བྱིས་པ་ཉིད་ལ་ཡང་། གང་ཆེ་སྤོབས་ལྡན་རླུང་ལྟར་མགྱོགས།
དེ་ཚེ་མ་ཡིས་དེ་ཡི་མིང་། རླུང་འགྲོ་ཞེས་པར་བསྒྲུབས་པར་གྱུར།། 83

इत्युक्तः पक्षिणा भ्राता नृपतिर्विससर्ज ताम् ।
कान्तां कशेरुकद्वीपे तत्र सत्कृत्य सादरः ॥ ७६ ॥

सापि प्रतिनिशं व्योम्नः खगारूढ़ा समाययौ ।
दिव्यगन्धमयीं मालामादाय द्वीपसम्भवाम् ॥ ७७ ॥

पारिजातान्वयतरोस्तानि पुष्पाण्यवाप सा ।
ख्यातानि तिमिराणीव भ्रमद्भृङ्गान्धकारतः ॥ ७८ ॥

अथ वाराणसीवासी कदाचिन्मानवाभिधः ।
प्रययौ समिधाहारी द्विजन्मा काननं युवा ॥ ७९ ॥

तत्र किन्नरकामिन्या स दृष्टः स्पष्टमन्मथः ।
यस्य सन्दर्शनेनैव साभवत् विस्मृतस्मृतिः ॥ ८० ॥

असौ नवाभिलाषिणा जनकेनेव सार्पिता ।
कान्ता कान्तिमयी नाम विजहार गुहागृहे ॥ ८१ ॥

तत्राभरणरत्नांशुः प्रतीततिमिरोत्करे ।
रममाणा चिरन्तेन काले पुत्रमवाप सा ॥ ८२ ॥

बलवान् मरुदुद्भवः स बाल्येऽपि यदा शिशुः ।
तदा माता तस्य संज्ञा शीघ्रग इत्यसाधयत् ॥ ८३ ॥

བགེགས་མེད་ལོངས་སྤྱོད་བདེ་བ་ཡིས། ངོམས་མེད་དེ་ཡང་ཕྱུག་གཞན་དུ།
མཛོད་བོ་བཞག་ནས་རྗེ་བ་ཡིས། ཕྱུག་ཉི་བསྐྲིབས་ཤིང་རྟག་ཏུ་འགྲོ།། 84

དེ་ནས་ནམ་ཞིག་པ་ཡིས་ནི། རང་གི་སྤྱོད་པའི་མཐའ་རྣམས་བཤད།
གྱུར་འགྲོ་ཡིས་ཐོས་བསམ་པ་ནི། ཡ་མཚན་དག་གི་རྒྱུས་པས་སྨྲས།། 85

ཁྲིམས་གཞན་སྐྲོ་ནི་རྗེ་བ་ཡིས། ལོང་བ་བཞིན་དུ་བསྒུམས་པ་འདིར།
ཀྱི་མ་ཡབ་ཁྲོད་མཛེས་པས་ཀྱང་། བཙིངས་པ་འདི་ཉིད་དག་ཏུ་གྱུར།། 86

ཚུར་ཤོག་ཁྲོད་ཀྱི་རང་གི་གནས། བཱ་རཱ་ཎ་སི་ཉིད་དུ་འདོད།
ཆེ་ཡང་འབད་པ་མེད་པར་ནི། རྗེ་བ་བདག་གིས་བསིལ་བར་བྱས།། 87

རང་ཡུལ་བྲལ་བའི་ཉོན་མོངས་ནི། བཟོད་པར་དཀའ་བ་ཇི་ལྟར་བཟོད།
རང་གི་ལུས་བཞིན་ཡུལ་དག་ནི། སུས་ཀྱང་གཏང་བར་མི་ནུས་སོ།། 88

རང་ཡུལ་བྲལ་བའི་སྐྱེ་བོ་རྣམས། ནོར་གྱི་ཚོགས་ནི་ཁྲེར་པོ་དང་།
ལོངས་སྤྱོད་ཉེ་བར་ལོངས་སྤྱོད་མིན། ཡོན་ཏན་ཐག་པའི་མདུད་པར་རིག།། 89

ཅེས་སྨྲས་ཕྱུག་གི་ཁང་པ་ནས། རྗེ་བ་ཆེན་པོ་དེས་བསལ་ནས།
ཁ་བླངས་པ་ཡི་ཕ་དང་ནི། ལྷན་ཅིག་མགྲོགས་པར་སོང་བར་གྱུར།། 90

དེ་དག་སྒྱུར་དུ་སོང་དེ་ནས། མིའམ་ཅི་མོ་མཐོང་པར་འོངས།
ཕྱུག་ཁྲིམས་སྟོང་པ་མཐོང་གྱུར་ནས། སྙིང་མི་དགའ་སྡེ་འདི་ལྟར་བསམས།། 91

सापि निर्विघ्नसम्भोगा सुखातृप्ता गुहान्तरे ।
प्रियं धृत्वा सदा याति विधाय शिलया गृहम् ॥ ८४ ॥

कदाचिदथ वृत्तान्तं निजपित्रा निवेदितम् ।
आकर्ण्य शीघ्रगश्चिन्ताविस्मयाकुलितोऽवदत् ॥ ८५ ॥

शिलानिबद्धद्वारेऽस्मिन्नन्धस्यैव गृहान्तरे ।
अहो स्नेहोऽप्ययं तात तव बन्धनतां गतः ॥ ८६ ॥

एहि वाराणसीमेव गच्छावस्ते निजास्पदम् ।
विपुलामप्ययत्नेन शिलामुत्सारयाम्यहम् ॥ ८७ ॥

स्वदेशविरहक्लेशं दुःसहं सहसे कथम् ।
त्यक्तुं न शक्यते कैश्चिद्देशो देह इव स्वकः ॥ ८८ ॥

भारं द्रविणसम्भारं वेत्ति ग्रन्थिगुणागुणः ।
भोगं निरुपभोगञ्च स्वदेशविरही जनः ॥ ८९ ॥

इत्युक्त्वा स गुहागेहादुत्पाद्य विपुलां शिलाम् ।
कृताभ्युपगमेनाशु जनकेन ययौ सह ॥ ९० ॥

प्रयातयोस्ततस्तूर्णं समभ्येत्याथ किन्नरी ।
शून्यं दृष्ट्वा गुहागेहं निर्वेदादित्यचिन्तयत् ॥ ९१ ॥

ཀྱེ་མ་བདག་ལ་གཟུགས་པ་བརྗོད། སྐྱེ་བོ་ངན་པ་དེ་གར་སོང་།
ལྟེ་གཉིས་པ་དང་ལག་འགྲོ་ཡིས། གྱ་གྱུ་ཉིད་ལའང་སྨད་བྱུང་ཅི།། 92

བདེ་ལ་ཆགས་ལྡན་མཐུག་དུ་ནི། དགའ་བར་མི་བྱེད་འགྲོས་པར་བྱེད།
རིང་དུ་གནས་ཀྱང་མཛའ་གཟུགས་མེད། སྐྱེ་གཉིས་ལྡན་པ་ནེ་ཙོ་བཞིན།། 93

དེ་ལྟར་བསམས་ནས་དེ་ཡིས་ནི། གནོད་ལས་ཁྲོ་ལ་དགའ་བ་བཏང་།
མི་དོག་ལྟ་བུ་མཛའ་བ་ཡིས། གནོད་པ་བཟོད་པ་མ་ཡིན་ནོ།། 94

བདག་གི་བུ་ནི་རིག་བྱེད་དང་། ཡོན་ཏན་གང་གིས་ལ་འཚོ།
ཞེས་བསམས་གྲོགས་མོ་འི་ལག་ཏུ་ནི། དེ་ལ་དེ་ཡི་རྒྱུད་མང་སྤྲིངས།། 95

ལོངས་སྤྱོད་བདེ་བའི་ཟློང་དག་གིས། བུད་མེད་རྣམས་ནི་ཁྲོ་ལ་དགའ།
མཉེས་གཞིན་ཡོངས་སུ་མ་ཉམས་པ། བུ་ལ་དགའ་བ་གཡོ་བ་མེད།། 96

དེ་དག་ཚུལ་ངན་ངོ་ཚ་ནས། མགྲོགས་པས་སྒྱུར་དུ་འགྲོ་བ་ལ།
དེ་ཡི་གྲོགས་མོ་མགྲོགས་འགྲོ་མས། སྒྱུར་འགྲོ་ལ་ནི་རྒྱུད་མང་བྱིན།། 97

འདི་ཡི་རྒྱུད་ནི་དང་པོ་འདྲིར། རིག་པར་མི་བྱ་གེགས་བྱེད་ཡིན།
དེ་སྐད་སྨྲས་ནས་དེ་བྱིན་པས། རྒྱུད་མང་བླངས་ནས་དེ་སོང་གྱུར།། 98

དེ་ནས་རང་ཡུལ་རང་ཁྱིམ་དུ། དེ་ཡི་ཕ་ནི་བཞག་བྱས་ནས།
རྒྱུད་མང་བསྒྲིངས་པ་མཁས་པ་ཡིས། ཀུན་དུ་རྟེན་དང་མཆོད་པ་ཐོབ།། 99

अहो मे विस्मृतस्नेहः स गतः क्वापि दुर्जनः ।
द्विजिह्वानां भुजङ्गानां कौटिल्यं वा किमद्भुतम् ॥ ९२ ॥

न रमन्ते पलायन्ते पर्य्यन्ते सुखरागिणः ।
चिरस्था अपि निःस्नेहाः शुक इव द्विजातयः ॥ ९३ ॥

इति सञ्चिन्त्य सा पत्युर्निकारात्प्रीतिमत्यजत् ।
पुष्पोपमानि प्रेमाणि न सहन्ते कदर्थनाम् ॥ ९४ ॥

विद्यागुणेन केनासौ पुत्रो मे भुवि जीवति ।
इति ध्यात्वा सखी-हस्ते तस्मै वीणां दिदेश सा ॥ ९५ ॥

सम्भोगसुखपर्य्यैव प्रीतिः पतिषु योषिताम् ।
अपर्युषितवात्सल्या पुत्रप्रीतिस्तु निश्चला ॥ ९६ ॥

जवेन व्रजतो स्तूर्णं तयोर्दौर्जन्यलज्जया ।
शीघ्रगाय ददौ वीणां तत्सखी वेगगामिनी ॥ ९७ ॥

आद्या तन्त्रिरियं नास्याः स्प्रष्टव्या विघ्नकारिणी ।
इत्याभाष्य तया दत्तां वीणां प्राप्य जगाम सः ॥ ९८ ॥

ततः स्वदेशे जनकं स्वगृहे विनिवेश्य सः ।
वीणाप्रवीणः सर्व्वत्र लाभपूजामवाप्तवान् ॥ ९९ ॥

དེ་ནས་ནམ་ཞིག་ཚོང་པ་དག། ཆུ་གཏེར་གླིང་དུ་འགྲོ་བ་རྣམས།
ཀླུ་ཡི་རྒྱུད་མང་ལ་ཆགས་པས། དེ་ནི་གཟིངས་ལ་སྒྲོན་པར་གྱུར།། 100

དེ་ཡི་རྒྱུད་མང་ཡིད་འཕྲོག་པ། ནུ་བའི་བདུད་རྩིའི་རྒྱུན་དག་གིས།
སྐད་ཅིག་སྐད་ཅིག་རྒྱ་མཚོ་ཡང་། རླབས་ནི་མེད་པ་བཞིན་དུ་གྱུར།། 101

དེ་ནས་དང་པོའི་རྒྱུད་དག་ལ། རེག་པས་ཉེར་འཚེ་རབ་བསྐྱེད་དེ།
གཟིངས་ནི་རབ་དུ་འཕར་ཞིང་ཆག། ཚོང་པ་ཐམས་ཅད་བརླག་པར་གྱུར།། 102

དེ་ནས་ལས་ཀྱི་ལྷག་མ་ཡིས། ཀླུར་འགྲོ་ཡིས་ནི་ཤིང་དུམ་ཐོག།
རླུང་གིས་བསྐྱོད་ནས་སྐད་ཅིག་གིས། ཀ་སེ་རུ་ཡི་གླིང་དུ་ཕྱིན།། 103

དེར་ནི་ཆུ་གཏེར་ངོགས་འགྲམ་གྱི། སྐྱེ་ཚལ་མཆོག་དུ་རབ་ཞུགས་དེས།
ནུ་མ་མེ་དོག་ཆུན་པོ་དག། རབ་རྒྱས་བུད་མེད་སོ་ཤུམ་བླ།། 104

མེ་དོག་དྲི་སར་ཞེས་བྱ་བའི། འཕྲེང་བ་རབ་འབར་རྒྱུད་བྱེད་ཅིང་།
སེམས་མེད་རྣམས་ཀྱང་ལུས་ཀྱི་ནི། ཡོན་དན་གྱིས་ངེས་འཆིང་བྱེད་མཐོང་།། 105

དེས་ཀྱང་མཛེས་པའི་རྣམ་པ་ཅན། བརྟན་པ་བྲིས་པ་ལང་ཚོ་ཡིས།
མཚམས་ཀྱི་དབུས་གནས་ཉིད་གྱུར་པ། དེ་མཐོང་ཨ་མཚན་དག་དུ་གྱུར།། 106

འདོད་པའི་རླུང་གིས་རབ་བསྐྱོད་པས། ལག་པའི་ཡལ་འདབ་གཡོ་ལྡན་ཞིང་།
ངང་ཚུལ་མེ་ཏོག་ལྷུང་བ་དེས། འཁྲི་ཤིང་བཞིན་དུ་དེ་རབ་བདུད།། 107

ततः कदाचिद्वणिजा अम्बुधिद्वीपगामिना ।
आरोपितः प्रवहणं दिव्यवीणानुरागिणा ॥ १०० ॥

वीणामूर्च्छनया तस्य श्रोत्रपीयूषधारया ।
क्षणे क्षणे समुद्रोऽपि निस्तरङ्ग इवाभवत् ॥ १०१ ॥

अथाद्यतन्त्रिसंस्पर्शादुत्पन्नोपप्लवोत्प्लुते ।
भग्ने प्रवहणे सर्व्ववणिजामभवत् क्षयः ॥ १०२ ॥

ततो वलाहकावाख्या पवनप्रेरितः क्षणात् ।
कशेरुद्वीपमासेदे कर्म्मशेषेण शीघ्रगः ॥ १०३ ॥

तत्राब्धिकूलसंलीनं दिव्योद्यानं प्रविश्य सः ।
श्यामां ददर्श सोऽशुम्बां मूर्द्धन्यस्तवकस्तनाम् ॥ १०४ ॥

ग्रथ्नन्तीन्तिमिराख्यानां पुष्पाणामुज्ज्वलस्रजम् ।
निबन्धनं तनुगुणैः कुर्व्वाणामप्यचेतसाम् ॥ १०५ ॥

सापि तं रुचिराकारं दृष्ट्वा विस्मयमाययौ ।
धीरं शैशवतारुण्यसन्धिमध्यस्थतां गतम् ॥ १०६ ॥

मारमारुतसञ्चालसकम्पकरपल्लवा ।
सा शीर्णशीलकुसुमा लतेव प्रणनाम तम् ॥ १०७ ॥

འཕྲུལ་ལ་ཡུན་རིང་འགྲོགས་པ་བཞིན། དེ་དག་མཆོག་ཏུ་མཛའ་བར་གྱུར།
སྐྱེ་བ་སྔ་མའི་མཛར་གཅནས་པ། ཡིད་ཀྱིས་ཡིད་ནི་མི་མཐོང་ངོ༎ 108

ཉིན་པར་དེ་དང་དགའ་བྱེད་ཅིང༌། མཚན་མོ་ཡང་ནི་ས་བདག་དང༌།
སྨྲས་པའི་འདོད་ལྡན་མཛའ་བོར་ནི། གཡོན་མའི་སྤྱོད་པ་ཉིད་ལ་བསམས༎ 109

སྤྱོད་ཚུལ་ཤེས་པ་དེས་དེ་ལ། བ་ར་ཎ་སིར་འགྲོ་དོན་གཉེར།
དེ་ཡི་ཚིག་གིས་མིག་བཙུམས་ནས། བྱ་ལ་ཞོན་ནས་དེ་ཡིས་ཕྱིན༎ 110

དེ་ཡིས་གློག་པར་གྱུར་མོད་ཀྱང༌། མཁའ་ལ་མིག་ནི་ཕྱེ་བ་ཡིས།
རྒྱ་གཏེར་གཡོ་བའི་བསྒྲིབས་པའི་མིག། དེ་ནི་འཕྲུལ་ཉིད་ལོང་བར་གྱུར༎ 111

ཕོ་བྲང་འཁོར་གྱི་སྐྱིད་ཚལ་དུ། དེ་ཡིས་དེ་བཞག་འཛིག་པ་ཡིས།
སྨག་ཅིང་སྒྲ་ངན་གྱིས་གདུངས་པས། ས་བདག་གཟིམས་པའི་ཁང་པར་ཞུགས༎
112

ཡིད་ནི་ཤིན་ཏུ་གདུང་བ་ཡིས། མཚན་མོ་དེ་ནི་འདས་བྱས་ནས།
ཐོ་རང་བསམ་པས་ཟིལ་ནོན་དེས། བགྲོད་དང་སྡོད་པར་ནུས་མ་གྱུར༎ 113

སྐབས་དེར་ཙུ་ཏ་རི་བཟང་གིས། ཚོགས་ནི་ཡང་དག་ཀྲུས་གྱུར་ཅིང༌།
མེ་ཏོག་གཞུ་ཅན་རྩེ་དགའ་ཡི། ལང་ཚོ་དཔྱིད་ཀྱི་ཟླ་བ་ནི༎ 114

ཁྲུ་ཀྲུག་(ཟུང་)སྲུང་བས་གནག་གྱུར་ཅིང༌། དུས་ཀྱི་བྲལ་བ་རྣམས་ཀྱི་དུས།
བཟོད་དཀའ་སྒྲ་ངན་འབྲེམས་བྱེད་པ། སྒྲ་ངན་མེད་གསར་རབ་ཏུ་མཐོང༎ 115

सहसा चिरारूढ़ेव प्रीतिः प्रौढ़ा तयोरभूत् ।
प्राग्जन्मस्नेहसंलीनं न मुञ्चति मनोमनः ॥ १०८ ॥

रममाणा दिवा तेन निशायां च महीभुजा ।
मेने बामाचरिचितां तां प्रियो गूढ़कामुकः ॥ १०९ ॥

तेन वाराणसीं गन्तुं ज्ञात्वा हृत्तं समर्थिता ।
तन्निनाय खगारूढ़ा तद्गिरा मीलितेक्षणम् ॥ ११० ॥

वारितोऽपि तदा व्योम्नि नयनोन्मीलने तया ।
सोऽभवत्सहसैवान्धश्चापलाद्विहितेक्षणः ॥ १११ ॥

सा तमन्तःपुरोद्याने निधाय भयकातरा ।
विवेश शोकसन्तप्ता शय्यावेश्म महीपतेः ॥ ११२ ॥

दूयमानेन मनसा रजनीमतिवाह्य ताम् ।
प्रातर्न गन्तुं न स्थातुं चिन्ताक्रान्ता शशाक सा ॥ ११३ ॥

अत्रान्तरे समुद्भूतश्रुतसौरभनिर्भरः ।
मधुमासो विलासानां यौवनं पुष्पधन्वनः ॥ ११४ ॥

कोकिलालिकुलैः कालः कालः कालो वियोगिनाम् ।
शीर्णशोकनवाशोकदुःसहः प्रतिदृश्यते ॥ ११५ ॥

འདོད་པས་སྨོངས་པའི་རྒྱལ་པོས་ཀྱང་། སྲིད་དང་མ་བྲལ་སྐྱིད་མོས་ཚལ།
བལྟ་བར་བརྩོན་པས་ཉི་མ་གཅིག། སོ་ཕྱམ་བཱ་ནི་བདང་མ་གྱུར།། 116

དེ་ནི་དེ་དང་ལྷན་ཅིག་ཏུ། ཆགས་དང་རྒྱགས་དང་འདོད་པ་ཡིས།
འཁོར་བ་བཞིན་དུ་ངལ་གསོའི་གནས། མི་དོག་གི་ནི་ནགས་སུ་སོང་།། 117

དེར་ནི་རླུང་བཞོན་གྱིས་བསྐྱོད་པའི། འཕྲི་ཤིང་སྐྱིངས་པར་བྱེད་པ་ཡི།
བཙུན་མོ་མཐོང་ནས་ས་ཡི་བདག། རབ་ཏུ་དགའ་བ་ཉིད་དུ་གྱུར།། 118

གཞན་ཆགས་དུག་གིས་ཟིལ་མནན་པས། དེ་ཡང་དྲན་པ་ཞུམས་པར་གྱུར།
བསམ་པའི་ཟུག་རྔུས་དཀྲུགས་པའི་ཡིད། བདེ་ལའང་བདེ་བ་མིན་པར་རིག།
119

ལག་འགྲོ་ནང་དུ་སོང་བ་ཡིས། བུད་མེད་ཀྱི་ནི་འཕྲེང་བ་བཞིན།
མགྲིན་པར་བྱས་པས་སྨོངས་བྱས་པའི། ཤིན་ཏུ་ཆགས་ལྡན་བྲོ་གར་བྱེད།། 120

དེར་ནི་དབེན་པར་འཕྲི་ཤིང་གི། ཚོགས་ཀྱིས་བསྐྲིབས་པར་གནས་བྱས་པ།
ལོང་བས་སོ་ཕྱམ་བཱ་ཡི་ནི། དྲི་སར་འཕྲེང་བའི་དྲི་བཟང་ཚོར།། 121

འཕྲལ་ལ་ཉིད་དུ་ཆགས་པ་ཡི། རྣམ་འགྱུར་ལས་ནི་སྤྲས་པ་བརྗིད།
སྨྲ་བླངས་འདོད་པས་ཕྱོས་པ་རྣམས། འཇིགས་པ་དག་གིས་ག་ལ་ཐི།། 122

དམན་པའི་རླུང་གིས་རོལ་པས་བསྐྱོད་པར་གྱུར་པའི་དགའ་མ་ཡིས།
བཞིན་ནི་ཕྱོས་ལྡན་པདྨའི་དྲི་བཟང་ཚོགས་པའི་སྙིང་པོ་ཅན།།

राजाप्यविरतौत्सुक्यादुद्यानं गन्तुमुद्यतः ।
दिनमेकं न तत्याज सौमुम्बां काममोहितः ॥ ११६ ॥

स तया सह रागस्य मदस्य मदनस्य च ।
संसारमिव विश्रान्तिपदपुष्पवनं ययौ ॥ ११७ ॥

तत्र बालानिलालोललतावैलक्ष्यकारिणीम् ।
पश्यन् प्रमोदमासेदे दयितामेव भूपतिः ॥ ११८ ॥

अन्यरागविषाक्रान्ता साप्यभून्मलिनस्मृतिः ।
सुखमप्यसुखं वेत्ति चिन्ताशल्याकुलम्मनः ॥ ११९ ॥

अन्तर्गतभुजङ्गाभिः स्त्रीभिरत्यन्तरागिणः ।
कण्ठे कृताभिर्न्नृत्यन्ति मालाभिरिव मोहिताः ॥ १२० ॥

तत्रैकान्तलताकुञ्जनिकुञ्जनिहितस्थितिः ।
अन्धः सौरभमाघ्राय सोमुम्बातिमिरस्रजः ॥ १२१ ॥

सहसैव विकारेण रागात् विस्मृतसंहृतिः ।
अगायन्मदनक्षीवा गणयन्ति भयं कुतः ॥ १२२ ॥

तनुपत्रनविलासैः कीर्य्यमाणः प्रियायाः
समदवदनपद्मामोदसम्भारसारः ।

ཧྲི་སྲར་མེ་ཏོག་ཧྲི་དེ་རིང་ནས་འོངས་པར་གྱུར་བ་འདི།
བྲང་བའི་ལམ་ནི་རྒྱུད་མང་འཁྲོལ་སྒྲ་ཡིས་དགའ་བར་འོས།། 123

ས་བདག་གིས་ནི་དེ་ཡི་སྐུ། སྙིང་ལ་འབབ་པ་དེ་ཐོས་ནས།
སྐྱིད་མོས་ཚལ་དག་བཙལ་བྲུས་པས། འཁྲི་ཤིང་ནང་དུ་དེ་མཐོང་གྱུར།། 124

ཆགས་པ་དྲག་པོས་སྨྱོས་དེ་ལ། དོགས་པར་གྱུར་བ་དེ་ཡིས་དྲིས།
སོ་ཤུམ་བླ་འམ་དེ་ཡིས་ནི། ལུས་ཀྱི་མཚན་ཉིད་ཁྱོད་ཤེས་སམ།། 125

དེ་སྐད་སོ་ཤུམ་བླ་དག་ནི། ཅི་ཕྱིར་མི་ཤེས་གང་གི་མཆུ།
བིམ་བ་དཀར་དམར་ཆགས་པ་ཡིས། རྒྱལ་སྲིད་ལ་ནི་ཡི་འབྱུང་ཞུགས།། 126

འདོད་པས་བཀོད་བཞིན་དེ་ཡི་བརླ་རྩ་ན།
རི་མོའི་རང་བཞིན་བཀྲ་ཤིས་མཛེས་པ་ཡོད།
འཁྲིལ་བ་སྦྲུག་གུ་མཛེས་པའི་འཁོར་ལོ་འདྲ།
དེ་ཡི་ནུ་མའི་དཀྱིལ་འཁོར་དག་ལའང་ཡོད།། 127

དེ་དག་ཐོས་ནས་མི་བདག་ནི། ཡོངས་སུ་གདུང་བ་དྲག་པོས་ཉིན།
ཡིད་ཀྱི་ཆགས་པ་མེ་ཏོག་ནི། སྙིང་པ་བཞིན་དུ་དོར་བར་གྱུར།། 128

དེ་ཡིས་སྨྲས་པ་མི་མོ་རྣམས། བསྲུང་བ་བརྒྱས་ཀྱང་ཚུལ་ཁྲིམས་མིན།
ནམ་མཁའི་མེ་ཏོག་འཕྲེང་བ་བཞིན། དག་པ་རྣམ་ཀུན་ཉིད་དུ་མེད།། 129

तिमिरकुसुमगन्धः सोऽयमायाति दूरात्
भ्रमरसरणिवीणाविभ्रमारावरम्यः ॥ १२३ ॥

श्रुत्वा हृदयसंवादगीतं तत् तस्य भूपतिः ।
उद्यानविचयं कृत्वा तं ददर्श लतान्तरे ॥ १२४ ॥

गाढ़रोचमदक्षीवं स तं पप्रच्छ शङ्कितः ।
अपि जानासि सोऽमुम्बां तस्य वा लक्षणं तनोः ॥ १२५ ॥

सोऽब्रवीत् किन्न जानामि सोऽमुम्बां विम्बपाटलाम् ।
उपविष्टोऽधरे यस्या रागराज्ये मनोभवः ॥ १२६ ॥

न्यस्तं स्मरेणेव तदूरुमूले
लेखीमयं स्वस्तिकमस्ति कान्तम् ।
आवर्त्तशोभा स्तनमण्डले वा
लावण्यकल्लोलनिभास्ति तस्याः ॥ १२७ ॥

एतदाकर्ण्य नृपतिः सद्यः सन्तापशोषितम् ।
मुमोच रागकुसुमं निर्माल्यमिव चेतसः ॥ १२८ ॥

सोऽब्रवीन्नास्ति नारीणां शीलरक्षा शतैरपि ।
खपुष्पमालेव सती सर्व्वथा नैव जायते ॥ १२९ ॥

རྒྱལ་པོས་འདི་བརྗོད་ཡོང་བ་དང་། ལྷན་ཅིག་དུར་ཁྲོད་ནགས་ལ་དེ།
གྲུར་དུ་བོང་བུ་ལ་བསྐྱོན་ནས། གྲོང་ཁྱེར་ལས་ནི་ཕྱིར་བཏོན་བྱུར།། 130

ངོ་ཚ་མེད་པར་དེ་དང་དེ། ལྷན་ཅིག་འགྲོ་བས་ཉིན་འདས་ཚེ།
ནགས་སུ་ཆོས་ཀུན་བདག་པོ་ཡིས། ཕུན་ཚོགས་དག་དང་བཅས་ཉིད་ཐོབ།། 131

འཕྲུལ་ལ་ཆོས་ཀུན་དཀྱིལ་འཁོར་དག། སྔོན་བྲིས་དེ་ཚེ་སྐྱེ་བོ་ཡིས།
ལོང་བ་ཉེས་པ་མེད་པ་ཉིད། ཆོས་ཀུན་དག་དུ་འཕྲུལ་ནས་བསད།། 132

སོ་ཤམ་བུ་དེ་ཀུན་པོས་ཀྱང་། སྐད་ཅིག་འགྲིགས་པས་མཚན་སྨྲུད་ནས།
དེ་ཡི་རྒྱན་རྣམས་བླངས་ནས་ནི། ཆུ་བོ་རབ་དུ་རྒལ་ནས་སོང་།། 133

ཆུ་ཀླུང་ཀ་རན་ད་བ་དེའི། འགྲམ་དུ་གོས་དང་བྲལ་བ་དེས།
མིག་སྨན་དང་བཅས་མཆི་མའི་ཆུ། ཉུ་མ་སྣོག་ཅིང་སྒྲ་ངན་བྱས།། 134

དེ་ཡི་དུས་ན་ཝ་སྐྱེས་ཤིག། ཁ་ཡི་ཤ་ནི་རབ་བཏང་ནས།
ཆུ་ལ་འཕར་བའི་ཉ་ལ་སོང་། དེ་ནི་མཁའ་ལ་འགྲོ་བས་ཁྱེར།། 135

ཉ་ནི་འཕྲུལ་ལ་གཏིང་དུ་སོང་། ཤ་ནི་བྱ་ཡིས་ཁྲོགས་པའི་ཚེ།
གཉིས་ཀ་ཉམས་པས་དེ་ཡིས་ནི། བསམས་པ་མིག་ནི་གཡོ་མེད་གྱུར།། 136

དེ་མཐོང་དེ་ཡིས་བཞིན་ལ་ནི། སྨུག་ཀྱང་འཛུམ་པ་མཐོང་བར་གྱུར།
གཞན་དག་གི་ནི་འཁྲུལ་བ་ལ། འཚེར་ཉེ་རྣམས་ཀྱང་དགོད་པ་ཡིན།། 137

इत्युक्तान्धेन तां राजा सह श्मशानकाननम् ।
गर्द्दभारोपितां तूर्णं तत्याज नगराद्बहिः ॥ १३० ॥

सा तेन सह निर्लज्जा व्रजन्ती दिनसंक्षये ।
अटव्यां चौरपतिना प्रापैव सह सम्पदा ॥ १३१ ॥

जनैरभिद्रुते तस्मिन् सहसा चौरमण्डले ।
निरपराध एवान्धश्चौरभ्रान्त्या निपातितः ॥ १३२ ॥

चौरोऽपि तां निशां भुक्त्वा सोऽशुम्बाक्षणसङ्गतः ।
गृहीत्वाभरणान्यस्या जगामोत्तीर्य्य निम्नगाम् ॥ १३३ ॥

कारण्डवायाः सरितस्तस्यास्तीरे निरम्बरा ।
शुशोच साञ्जनैरश्रुजलैः सा मलिनस्तनी ॥ १३४ ॥

तस्मिन् क्षणे मुखासक्तं मांसमुत्सृज्य जम्बुके ।
याते जलोत्प्लुतं मत्स्यं तद् जहार विहङ्गमः ॥ १३५ ॥

मत्स्ये निमग्ने सहसा खगेन पिशिते हृते ।
स बभूवोभयभ्रंशाच्चिन्तानिश्चललोचनः ॥ १३६ ॥

तस्यास्तं वीक्ष्य दुःखेऽपि मुखे स्मितमदृश्यत ।
हासः परस्य स्खलिते दुःस्थस्याप्युपजायते ॥ १३७ ॥

སྐྱེངས་པས་བྲིས་པ་དེ་ཡི་ནི། མི་འོས་འཛུམ་པ་དེ་ལ་སྨྲས།
ཀྱི་མ་འཇིག་རྟེན་གད་མོ་ཡི། གནས་གྱུར་ཁྱོད་ཉིད་བདག་ལ་དགོད།། 138

མི་བདག་བཏང་ནས་ལོང་བར་ཕྱིན། ལོང་བ་བཏང་ནས་ཚོམ་རྐུན་བསྟེན།
གསུམ་ཚར་ཉམས་པ་ཁྱོད་ཀྱིས་ནི། འཛུམ་པའི་གནས་ནི་གཉིས་ཉམ་ང་།། 139

ཡོངས་སུ་བགད་པ་འདི་ནི་ཚིག། བདག་ནི་རིགས་པས་ཁྱོད་ཕན་བསྐྱབ།
མི་བཟད་གནས་ལ་གང་ཞིག་ནི། ཚོ་འདྲིའི་མཁས་པ་དེ་མི་བསྲུན།། 140

འདི་བརྗོད་གྲོང་ཁྱེར་སོང་ནས་ནི། ཀླུང་གི་ངོགས་ནས་སོ་ཤུམ་བླ།
དཀའ་ཐུབ་རིག་པས་གནས་སོ་ཞེས། བློ་གྲོས་བཟང་མོས་རྒྱལ་ལ་སྨྲས།། 141

དེ་ནས་གོས་དང་རྒྱན་བསྒྱུར་ནས། དེ་ནི་རྒྱལ་པོས་ཁྲངས་པར་གྱུར།
ལུས་ཅན་རྣམས་ཀྱི་ཆགས་པ་ཡིས། ལྷག་མ་སྐྱོན་ནི་སྒྲིབ་པ་ཉིད།། 142

ད་ལྟའི་ཨུ་དཔལ་མདོག་འདི་དེ། འཆར་ཀ་འདི་ཡང་མྱུར་འགྲོད།
སྔོན་ཆེ་གཞན་གྱི་བསོད་ནམས་ཀྱིས། དགེ་སློང་བརྟུལ་ཞུགས་ཅེ་བར་ཐོབ།། 143

འདི་ཡི་ཡིད་ནི་གང་ཞིག་ཆགས་པས་སྦྱོར་ལ་ཉམས་ཀྱིས་རབ་བརླན་དང་།
རྒྱགས་པ་དང་ནི་འདོད་པའི་དབང་གྱུར་ཆགས་དང་ལྡན་པ་ཉིད་དུ་གྱུར།།
དེས་ན་དེ་ཚེ་ཕྱུད་ཙམ་ཞི་བ་རྣམ་པར་དཔྱོད་པ་དང་བྲལ་ནས།
མི་ཡི་བདག་པོའི་གཟུགས་བྱས་ཀུན་དགའ་ལྡན་པས་བདག་ལ་ཕྱག་འཚལ་གྱུར།།
144

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་འཁྲི་ཤིང་ལས་ལྷ་ལས་བབས་པའི་ཡལ་འདབ་སྟེ་བཅུ་བཞི་པའོ།།

स तां वैलक्ष्यकुपितः प्रोवाचानुचितस्मिताम् ।
अहो हससि मां लोके हास्यायतनतां गता ॥ १३८ ॥

नृपं त्यक्त्वागता ह्यन्धम् त्यक्त्वान्धं चौरमाश्रिता ।
तवाहमुभयभ्रष्टं चिभ्रष्टायाः स्मितास्पदम् ॥ १३९ ॥

आस्तां वः परिहासोऽयं तं युक्त्याहं करोमि ते ।
खलास्ते विषमस्थानां ये विडम्बनपण्डिताः ॥ १४० ॥

इत्युक्त्वा नगरीं गत्वा स नृपाय न्यवेदयत् ।
सोमुम्बा ते नदीतीरे तपोयुक्तेति सन्मतिः ॥ १४१ ॥

अथ निनाय तां राजा वितीर्याभरणाम्बरम् ।
दोषमाच्छादयत्येव रागशेषः शरीरिणाम् ॥ १४२ ॥

सैवाद्योत्पलवर्णेयमुदायी शीघ्रगोऽप्यसौ ।
प्राग्जन्मान्तरपुण्येन भिक्षुव्रतमुपागतौ ॥ १४३ ॥

अभवदतिरसार्द्रमानसं रागयोगे
यदु मदनविधेयं रागयुक्तं यदस्याः ।
विरतशमविचारा तेन तस्मिन् मुहूर्ते
कृतनरपतिरूपानन्दिनं मां ववन्दे ॥ १४४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
देवावतारावदानं नाम चतुर्दशः पल्लवः ॥

ཡལ་འདབ་བཅོ་ལྔ་པ།

གྲག་ངེས་པར་འཕངས་པའི་རྟོགས་བརྗོད་ནི།

མཐུ་ལྡན་རྣམས་ཀྱིས་མཚུངས་མེད་བརྟན་པ་དང་།
བརྩོན་འགྲུས་སྟོབས་ནི་ངོ་མཚར་བཅས་པ་ཡིན།།
ཆེན་པོ་ཉིད་ལ་བརྟེན་པའི་སྦྱོར་བ་ལས།
གང་ཕྱིར་ཐམས་ཅད་ཆེན་པོ་ཉིད་དུ་འགྱུར།། 1

སྔོན་ནི་སྟོབས་ལྡན་གྲུབ་ཀྱི་གནས།
ཀུ་ཤའི་གྲོང་ཁྱེར་དགའ་བརྩ།
རང་དབང་རོལ་པའི་བཅོམ་ལྡན་འདས།
བདེ་གཤེགས་རང་ཉིད་གཤེགས་པར་གྱུར།། 2

ལེགས་པར་བྱོན་པ་དེ་ཐོས་ནས། རིམ་གྲོ་དག་ལ་རབ་བརྩོན་པ།
དགེ་བ་འཚོལ་བ་དེ་དག་གིས། ལམ་ནི་ལེགས་པར་སྦྱང་བ་བྱས།། 3

རྩྭ་དང་ཚེར་མ་རྡོ་བ་དང་། སེག་མ་རྡུལ་དག་བསལ་བྱས་ནས།
ཙན་དན་ཆུ་ཡིས་ལེགས་སྦྲན་ཏེ། ཡུལ་ནི་མཛེས་པ་དེ་དག་གིས།། 4

དབུས་སུ་འབིགས་བྱེད་རྒྱུད་གྱུར་པའི། ཆུང་མ་གཉིད་དུ་ཞུམས་པ་བཞིན།
གཉིད་དུ་བྱིང་བའི་རྡོ་ཆེན་ནི། ས་ལས་ཡང་དག་བྱུང་བར་གྱུར།། 5

पञ्चदशः पल्लवः।

शिलानिक्षेपावदानम्।

बलमतुलधैर्य्यवीर्य्यं साश्चर्य्यं
भवति सप्रभावाणाम्।
महदाश्रययोगाद् यस्मै
सर्व्वं महिमत्वमायाति ॥ १ ॥

पुरा कुशीपुरीं रम्यां
मल्लानां बलशालिनाम्।
स्वेच्छाविहारी भगवान्
प्रतस्थे सुगतः स्वयम् ॥ २ ॥

ते तदागमनं श्रुत्वा कल्याणं कुशलैषिणः।
वर्त्मसंशोधनं चक्रुरुपचारपदोद्यताः ॥ ३ ॥

देशं भूषयतां तेषां संसिक्तं चन्दनोदकैः।
तृणकण्टकपाषाणशर्करारेणुवर्जितम् ॥ ४ ॥

मध्ये समाययौ भूमिनिमग्ना महती शिला।
अवसन्ना विसन्ना च वधूर्विन्ध्यगिरेरिव ॥ ५ ॥

འབྱོར་དང་དཔུང་པ་ཐག་པ་ཡིས། དེ་ནི་སོལ་ལ་དེ་དག་རྣམས།
ཀླུ་བ་སོང་ཡང་དེ་ཡིས་ནི། སྟོང་ཕྲག་ཆ་ཡང་ཟད་མ་གྱུར།། 6

དེ་ནས་འཁོར་བའི་ཡོངས་གདུངས་དག། རབ་ཏུ་ཞི་བྱེད་བདུད་རྩིའི་ཟེར།
ཀུན་གྱི་ཡིད་ནི་དགའ་བའི་གཉེན། བཅོམ་ལྡན་འདས་ནི་བྱོན་པར་གྱུར།། 7

སྟུག་པོའི་སྤུན་པ་དག་དང་བྲལ། གསལ་ཞིང་མཐོང་བ་འབྲས་དང་བཅས།
རབ་དང་ཕྱོགས་ནི་རྣམ་པ་ལྔ། རབ་ཏུ་གསལ་བ་སྟོན་ཉིད་བཞིན།། 8

འབྲས་མེད་ཉོན་མོངས་ཀྱིས་གདུངས་པ། ཡོངས་ངལ་དེ་དག་རེས་གཟིགས་ཤིང་།
དེ་དག་གདུངས་གྱུར་ཐོས་ནས་ཀྱང་། ཐུག་འཚལ་བཞིན་ལྡན་དེར་བཀའ་སྩལ།། 9

ངལ་དུབ་འབད་རྩོལ་ལྡན་པ་ཁྱེད། འཁོར་བ་ཡིས་ནི་ལས་ལ་བཞིན།
བྱ་བ་འདི་ལ་རབ་བརྩོན་པ། ཀྱི་མ་ཉོན་མོངས་འབྲས་བུ་རྩོམ།། 10

བརྩམས་ན་མི་བཟད་ཉོན་མོངས་དང་། བྱེད་པ་ན་ཡང་ཐེ་ཚོམ་བཅས།
གྲུབ་ཀྱང་ཉེར་མཁོ་མེད་པའི་ལས། ཤེས་རབ་ལྡན་རྣམས་ཡོངས་མི་བྱེད།། 11

དེ་སྐད་གསུངས་ནས་ཆེ་བའི་རྗེ། ཞབས་མཛུབ་ཀྱིས་ཕྱུང་གཡོན་པ་ཡི།
ཕྱག་གིས་གཡས་པའི་ཕྱག་ཏུ་ནི། བཅོམ་ལྡན་འདས་ཀྱི་བཀོད་མཛད་ནས།། 12

མཐའ་མེད་ཕ་རོལ་གནོན་པ་ཡིས། ཚངས་པའི་འཇིག་རྟེན་མཐར་བདང་སྟེ།
འཕྲོ་བ་གསུམ་དུ་ངོ་མཚར་གྱི། སྤྱོད་པ་སོ་ཙ་བཞིན་དུ་མཛད།། 13

तामुत्पातयतां तेषां कुद्दालभुजरज्जुभिः ।
मासो जगाम नत्वस्याः सहस्रांशेऽप्यभूत् क्षतिः ॥ ६ ॥

अथ संसारसन्तापप्रशमामृतदीधितिः ।
आययौ भगवान् सर्व्वमानसोल्लासबान्धवः ॥ ७ ॥

घनान्धकारविरतिव्यक्तसफलदर्शनः ।
प्रसादसंविभक्ताशः प्रकाश इव शारदः ॥ ८ ॥

स तान् दृष्ट्वा परिश्रान्तान् विफलक्लेशपीड़ितान् ।
श्रुत्वा च तद्व्यवसितं तानूचे प्रणताननान् ॥ ९ ॥

अहो क्लेशफलारम्भः प्रयासव्यवसायिनां ।
संसारकर्म्मणीवास्मिन् व्यापारे वः समुद्यमः ॥ १० ॥

प्रारम्भे विषमक्लेशं क्रियमाणं ससंशयं ।
सिद्धमप्यनुपादेयं न प्राज्ञाः कर्म्म कुर्व्वते ॥ ११ ॥

इत्युक्त्वा चरणाङ्गुष्ठघट्टितां वामपाणिना ।
विन्यस्य दक्षिणे पाणौ भगवान् विपुलां शिलाम् ॥ १२ ॥

विसृज्य ब्रह्मलोकान्तमपर्य्यन्तपराक्रमः ।
चचाराश्चर्य्यचर्य्यायां दूतमिव जगत्त्रये ॥ १३ ॥

ཤིན་ཏུ་རྨད་བྱུང་མཛད་པ་དེས། དེ་ནི་འཕངས་པའི་འཕྲུལ་ཉིད་ལ།
རླུང་ནི་རབ་ཏུ་ལྡངས་པ་བཞིན། སྐྱེ་བོ་ཁྲིབ་པའི་སྒྲ་རབ་བྱུང་། 14

འདུ་བྱེད་ཐམས་ཅད་མི་རྟག་ཉིད། འདི་ནི་འཁྲུལ་བ་མེད་པར་བྱེད།
ཆོས་རྣམས་ཐམས་ཅད་བདག་མེད་དང་། ཞི་བ་མྱང་འདས་ཁོ་ན་ཡོད།། 15

དེ་སྐད་གསལ་བའི་སྒྲ་བརྗོད་དེ། བཅོམ་ལྡན་ཕྱུག་ན་རྡོ་བ་ནི།
རི་དབང་རྩེ་མོ་འི་རྣམ་པ་ཅན། སླད་ནས་ཀྱང་ནི་གནས་པར་མཐོང་།། 16

སྐད་ཅིག་གིས་དེ་བཅོམ་ལྡན་གྱི། ཞལ་གྱི་རླུང་གིས་གཞིག་བྱས་དེ།
མཆོག་གི་ངོ་མཚར་བརྒྱུད་མ་ནི། ཕྱོགས་རྣམས་ཀུན་ཏུ་བཀྲམ་པ་བྱས།། 17

སླད་ནས་ཕྲ་རབ་རྡུལ་རྣམས་ནི། བཅོམ་ལྡན་འདས་ཀྱིས་གཅིག་ཉིད་བྱས།
གཞན་དུ་རྡོ་དང་འགྲོ་གསུམ་དུ། ཡ་མཚན་དག་ཀྱང་བཞག་པར་མཛད།། 18

དེ་ནས་བཅོམ་ལྡན་བརྩོན་འགྲུས་དང་། སྟོབས་ནི་རྫོགས་པས་གྲུད་རྣམས་དག།
ངོ་མཚར་མིག་ནི་མི་གཡོ་བས། མཐོང་ནས་ཕྱག་འཚལ་དེར་གསོལ་པ།། 19

ཀྱི་མ་ཁྱོད་ཀྱི་མཐུ་ཆེན་པོ། སྟོབས་དང་བརྩོན་འགྲུས་རྒྱས་པ་འདི།
གང་ཞིག་ངེས་པར་རྟོགས་པ་ཡིས། ནུས་པ་ལྷ་རྣམས་ལ་ཡང་མེད།། 20

ཁྱེད་ཀྱི་སྟོབས་དང་བླ་མ་ནི། རྫས་སུ་འཛིན་ལ་རབ་ཞུགས་པས།
རྡོ་བ་བྱིང་ཞིང་གཏིང་དག་ཏུ། སོང་འདི་སྐྱེ་བོ་བཞིན་དུ་བདོན། 21

क्षिप्तायां सहसा तस्यां तेनात्यद्भुतकारिणा ।
उदभूत् गगनोद्भूत इव व्याप्तजनः स्वनः ॥ १४ ॥

अनित्यः सर्व्वसंस्कार इत्यभ्रान्तविधायिनः ।
सर्व्वधर्म्मा निरात्मानः शान्तनिर्व्वाणमेव तत् ॥ १५ ॥

इति स्फुटोदिते शब्दे शिला भगवतः करे ।
गिरीन्द्रशीर्षकाकारा स्थिता पुनरदृश्यत ॥ १६ ॥

क्षणेन सा भगवता क्षिप्ता वदनमारुतैः ।
कृताविसारिणी दिक्षु परमाणुपरम्परा ॥ १७ ॥

पुनरेकीकृतामेव भगवान् परमाणुभिः ।
शिलामन्यच विदधे विस्मयं च जगत्त्रये ॥ १८ ॥

आश्चर्य्यनिश्चलदृशस्ततो मल्ला बलोर्ज्जितं ।
वीर्य्यं भगवतो वीक्ष्य प्रणतास्तं बभाषिरे ॥ १९ ॥

अहो महाप्रभावोऽयं बलवीर्य्योदयस्तव ।
निश्चयाधिगमे यस्य न प्रगल्भाः सुरा अपि ॥ २० ॥

अनुग्रहप्रवृत्तेन बलेन गुरुणा तव ।
अधोगतिनिमग्नेयं जनतेव धृता शिला ॥ २१ ॥

ངོ་མཚར་མཆོག་མཛད་ཁྱོད་ཀྱི་ནི། བརྩོན་འགྲུས་ཞེས་རབ་སྟོབས་སོགས་ཀྱི།
ཚད་ཀྱི་མཚམས་ནི་ངེས་པ་དག། སུ་ཞིག་གིས་ཀྱང་ཅང་ཞེས་སམ།། 22

དེ་སྐད་སྨྲས་ཤིང་ངོ་མཚར་ནི། གཡོ་མེད་དེ་རྣམས་ལ་གཟིགས་ནས།
རྗོ་བ་དེ་ལ་རབ་བཞུགས་ཏེ། བཅོམ་ལྡན་རྒྱལ་བས་བཀའ་སྩལ་པ།། 23

སྲིད་གསུམ་འབྱུང་པོ་རྣམས་ཀྱི་སྟོབས། གཅིག་ཉིད་དུ་ནི་གྱུར་བ་གང་།
བདེ་གཤེགས་གཅིག་གི་སྟོབས་དེ་དང་། འཇིག་རྟེན་ན་ནི་མཉམ་པ་མེད།། 24

ཆུ་གཏེར་ཆུ་ནི་བྲུམ་པ་དང་། འགྲོ་རྣམས་ཕྲ་རབ་རྡུལ་དག་ནི།
བགྲང་བ་རྡུ་ནི་ཞིན་ཏུ་ནུས། བདེ་གཤེགས་མཐུ་ནི་མ་ཡིན་ནོ།། 25

གང་གི་སྐྱང་གི་ཚད་ཀྱིས་ནི། ལྷུན་པོ་འི་རི་ཉིད་གྲངས་རིག་པ།
དེས་ཀྱང་བདེ་གཤེགས་ཡོན་ཏན་ནི། དམ་པའི་ལྟི་བ་ཉིད་མི་རྟོགས། 26

དེ་སྐད་གསུངས་ནས་བཅོམ་ལྡན་འདས། བརྒྱ་བྱིན་པདྨའི་གནས་དང་བཅས།
ལྷ་ཡི་དཀྱིལ་འཁོར་འོངས་པ་ལ། དགེ་བ་དག་ནི་བསྟན་པ་མཛད།། 27

དེ་ཡིས་དེ་དེ་ཉེར་བསྟན་པས། གྲུད་རྣམས་བྱང་ཆུབ་ལ་བརྟེན་ནས།
ཉན་ཐོས་ཞེས་བྱ་ཉི་ཚར་བཅས། ཡང་དག་རྫོགས་སངས་རྒྱས་ཉིད་གྱུར།། 28

འགའ་ཡིས་རྒྱུན་ཞུགས་འབྲས་བུ་ཐོབ། གཞན་གྱིས་ལན་གཅིག་ཕྱིར་འོང་ཡང་།
ཕྱིར་མི་འོང་འབྲས་གཞན་གྱིས་ཏེ། གཞན་གྱིས་དགྲ་བཅོམ་གནས་ཐོབ་གྱུར།། 29

वीर्य्यप्रज्ञाबलादीनां प्रमाणावधिनिश्चयं ।
अपि जानाति ते कश्चिदाश्चर्य्यतरकारिणः ॥ २२ ॥

इति ब्रुवानानाश्चर्य्यनिश्चलानवलोक्य तान् ।
तस्यां शिलासमासीनः प्रोवाच भगवान् जिनः ॥ २३ ॥

एकीभूतबलं यद्धि भूतानां भुवनत्रये ।
सुगतस्य तदेकस्य लोके नैव समं बलम् ॥ २४ ॥

अम्भांसि कुम्भैरम्भोधेर्जगन्ति परमाणुभिः ।
शक्यान्यलं लङ्घयितुं प्रभावो न तु सौगतः ॥ २५ ॥

सङ्ख्यां सुमेरोर्यो वेत्ति तूलमानेन तत्त्वतः ।
सुगतानां न जानाति सोऽपि सद्गुणगौरवम् ॥ २६ ॥

कथयित्वेति भगवान् संप्राप्ते सुरमण्डले ।
सशक्रपद्मनिलये चक्रे कुशलदेशनम् ॥ २७ ॥

मल्लास्तदुपदेशेन तत्तद् बोधिसमाश्रयात् ।
सश्रावकाख्यां प्रत्येकसम्यक्सम्बुद्धतां ययुः ॥ २८ ॥

स्रोतःप्राप्तिफलं कैश्चित् सकृदागामि चापरैः ।
अनागामिफलं चान्यैः प्राप्तमर्हत्पदं परैः ॥ २९ ॥

དེ་ལྟར་བསམ་པ་ཕྲ་རྒྱས་ཁམས་དང་འགྲོ་བ་གཟིགས་གྱུར་ཅིང་།
མཁྱེན་ནས་རང་བཞིན་དེ་ལྟར་མཚུངས་པ་མེད་པའི་གདམས་ངག་ནི།
འཕགས་པའི་བདེན་པ་བཞི་པོ་ཡང་དག་རབ་གསལ་དྲི་མེད་པ།
དེ་དག་རྣམས་ཀྱི་དགེ་བ་སྤེལ་སླད་བཅོམ་ལྡན་འདས་ཀྱིས་མཛད།། 30

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བྲག་ངེས་པར་འཕངས་པའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཅོ་ལྔ་པའོ།།

इत्याशयानुशयधातुगतिं निरीक्ष्य
ज्ञात्वा तथाप्रकृतिमप्रतिमोपदेशं ।
तेषां चकार भगवांश्चतुरार्य्यसत्य-
सम्यक्प्रकाशविशदं कुशलोदयाय ॥ ३० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शिलानिक्षेपावदानं पञ्चदशः पल्लवः ॥

ཡལ་འདབ་བཅུ་དྲུག་པ།

བྱམས་པ་ལུང་བསྟན་པའི་རྟོགས་བརྗོད་ནི།

ཆགས་པ་མེད་རྣམས་ངེས་པར་རྣམ་པར་དག་པའི་གནས།
དགེ་བ་མངོན་འདོད་འཁོར་བའི་གཡོན་དང་ལེགས་བྱས་ལ།
མངོན་པར་དགའ་ཞིང་ཡིད་ཀྱི་དྲི་མ་རྣམས་དག་གི།
ཁོན་གྱི་རྡུལ་དང་བྲལ་བ་དགེ་ལེགས་བསྐྱེད་པ་ཡིན།། 1

སྟོན་ཆོ་ཀླུ་རྣམས་གདེངས་ཀ་ཡིས། ཟམ་པས་གང་ག་ལེགས་པར་བསྒྲལ།
བཅོམ་ལྡན་བདེ་གཤེགས་ཤ་རི་ཀ་དྲ། བྱོན་ནས་དགེ་སློང་རྣམས་ལ་གསུངས།། 2

འདིར་སྟོན་རིན་ཆེན་རང་བཞིན་གྱི། མཆོད་སྡོང་སྐད་བྱུང་མཛེས་པ་བྱུང་།
གལ་ཏེ་དགེ་མཚན་ཁྱེད་བལྟ་ན། འདི་ཉིད་དུ་དེ་བདག་གིས་བསྟན། 3

ཞེས་གསུངས་ས་ལ་བཅོམ་ལྡན་གྱིས། མཚན་མཆོག་ལྡན་པའི་ཕྱག་དག་གིས།
རིག་པས་ཀླུ་ཡི་ཚོགས་རྣམས་ཀྱིས། རིན་ཆེན་མཆོད་སྡོང་བླངས་ནས་བསྟན། 4

དགེ་སློང་ཐམས་ཅད་དེ་མཐོང་ནས། ཡུན་རིང་མིག་ནི་མི་འཛུམ་ཞིང་།
ལུས་ནི་གཡོ་བ་མེད་པ་དག། རི་མོར་བྲིས་པ་བཞིན་དུ་གྱུར།། 5

དེ་དག་གིས་དྲིས་བཅོམ་ལྡན་གྱིས། དེ་གཏམ་སྔར་ཡང་རབ་གསུངས་ཏེ།
འདས་དང་མ་འོངས་མཁྱེན་པ་ནི། ཚོམས་ཀྱི་སྣང་བས་འགྲིམས་པ་བཞིན།། 6

षोड़शः पल्लवः ।

मैत्रेयव्याकरणावदानम् ।

असङ्गमो नाम विशुद्धिधाम
श्रेयांसि सूते कुशलाभिकामः ।
संसारवामः सुकृताभिरामः
मनोमलैर्वैररजोविरामः ॥ १ ॥

पुरा गङ्गां समुत्तीर्य्य नागानां फणसेतुना ।
भगवान् सुगतः पारं प्राप्य भिक्षूनभाषत ॥ २ ॥

इह रत्नमयः पूर्व्वं यूपोऽभूदद्भुतद्युतिः ।
दर्शयामि तमद्यैव द्रष्टुं वः कौतुकं यदि ॥ ३ ॥

इत्युक्त्वा भगवान् भूमौ पाणिना दिव्यलक्षणा ।
स्पृष्ट्वा नागगणोत्क्षिप्तं रत्नयूपमदर्शयत् ॥ ४ ॥

तं दृष्ट्वा भिक्षवः सर्व्वे निर्निमेषेक्षणाश्चिरं ।
बभूवुश्चित्रलिखित इव निश्चलविग्रहः ॥ ५ ॥

तत्कथामथ तैः पृष्टः प्रोवाच भगवान् पुनः ।
अतीतानागतज्ञानं दन्तालोकैः किरन्निव ॥ ६ ॥

སྔོན་ཚེ་ལྷ་ཡི་བུ་འགའ་ཞིག། དུས་ཀྱི་མཐོ་རིས་ལས་ཡོངས་འཕོས།
བརྒྱ་བྱིན་བཀའ་ལས་མི་ཡི་བདག། མང་པོས་བཀུར་བ་ཞེས་པར་གྱུར།། 7

ས་ཡི་གཞི་ལ་ཆོས་ཀྱི་ནི། སྤྱོད་པ་རྗེས་འཛུག་བྲན་པའི་སྐད།
དེ་ཡིས་མཆོད་སྦྱིན་བརྒྱ་པ་ལ། རིགས་པའི་མཚན་ཉིད་ཅུང་ཟད་བླངས།། 8

དེ་ནས་ལྷ་ཡི་བདག་པོ་འི་བཀས། བི་ཤྭ་ཀརྨས་དེ་གནས་སུ།
འོད་ལྡན་རིན་ཆེན་མཆོད་སྡོང་ནི། བསོད་ནམས་བཞིན་དུ་མཐོ་བ་བསྒྲུབས།། 9

དེ་ནས་དེ་ནི་བལྟ་ལ་ཆགས། སྐྱེ་བོ་དགེ་མཚན་གཡོ་བ་མེད།
རྨོངས་སོགས་ལས་རྣམས་རྒྱུན་ཆད་པས། རྒྱལ་པོ་འི་བང་མཛོད་ཟད་པར་གྱུར།། 10

དེ་ནས་ས་བདག་དེ་ཡིས་དེ། གང་གཱ་ཡི་ནི་རྒྱུ་ལ་འཕངས།
ད་ལྟ་ཡང་ནི་ས་འོག་ན། རིན་ཆེན་ཀྱིས་བརྒྱན་ཉི་མས་བཞིན།། 11

དུས་ཀྱིས་དེ་ནི་ཡོངས་ཆད་ནས། ཡོངས་སུ་འཛིགས་པར་འགྱུར་བ་ཡིན།
ཡོངས་སུ་གྱུར་པས་མི་འཛིག་གང་། འགྲོ་ན་ངེས་པར་དེ་ཡོད་མིན། 12

མ་འོངས་དུས་ན་སྐྱེ་རྒུ་ལོ། སྟོང་ཕྲག་བརྒྱད་ཅུ་པ་ཡི་ཚེ།
རྒྱལ་པོ་གྲགས་པ་དུང་ལྟར་དཀར། དུང་ཞེས་བྱ་བ་འབྱུང་བར་འགྱུར།། 13

མི་བདག་དཔག་བསམ་ཤིང་ལྟར་དེས། མཆོད་སྡོང་བསོད་ནམས་ཀྱིས་ཐོབ་འདི།
མདུན་ན་འདོན་གྱི་བུར་གྱུར་པ། བྱམས་པ་ལ་ནི་རབ་སྦྱིན་འགྱུར།། 14

देवपुत्रः पुरा कश्चित् काले स्वर्गपरिच्युतः ।
महाप्रणादनामाभूत् नृपतिः शक्रशासनात् ॥ ७ ॥

धर्म्मवृत्तानुसरणस्मरणाय महीतले ।
उचितं लक्षणं किञ्चित् स ययाचे शतक्रतुम् ॥ ८ ॥

ततः सुरपतेर्वाक्याद्विश्वकर्म्मा तदालये ।
भास्वरं विदधे रत्नयूपं पुण्यमिवोन्नतम् ॥ ९ ॥

ततस्तद्दर्शनसक्ते जने कौतुकनिश्चले ।
कृष्यादिकर्म्मण्युच्छिन्ने राज्ञः कोषक्षयोऽभवत् ॥ १० ॥

ततस्तेन क्षितिभुजा क्षिप्तोऽयं जाह्नवीजले ।
तिष्ठत्यद्यापि पाताले रत्नैः सूर्य्यैरिवाचितः ॥ ११ ॥

भविष्यत्यस्य कालेन परिच्छिन्नः परिक्षयः ।
न तज्जगति नामास्ति परिणामे यदक्षयम् ॥ १२ ॥

आगामिसमये पुंसां वर्षाशीतिसहस्रके ।
शङ्खशुभ्रयशाः शङ्खो नाम राजा भविष्यति ॥ १३ ॥

पुण्यलब्धमिमं यूपं नृपः कल्पद्रुमोपमः ।
स पुरोहितपुत्राय मैत्रेयाय प्रदास्यति ॥ १४ ॥

སྨོན་པའི་ཡིད་བཞིན་ནོར་གྱུར་པ། བྱམས་པ་ཡིས་ཀྱང་འདི་བླངས་ནས།
འཕྲུལ་ལ་དུམ་བུར་བྱས་ནས་ནི། འཛིག་རྟེན་དབུལ་པོ་མེད་བྱེད་འགྱུར།། 15

བྱམས་པས་མཆོད་སྡོང་བྱིན་དེ་ནས། ཡང་དག་རྫོགས་སངས་རྒྱས་ཉིད་འཐོབ།
བླ་ན་མེད་པའི་ཡེ་ཤེས་གཏེར། ལྷ་རྣམས་ཀྱིས་ནི་མཆོད་པར་འགྱུར།། 16

བཙུན་མོ་བློན་པོ་འི་ཚོགས་དང་བཅས། སྟོང་ཕྲག་བརྒྱད་ཅུ་དག་གིས་ནི།
ཡོངས་སུ་བསྐོར་ནས་དུང་ཞེས་པའི། རྒྱལ་པོ་འང་རབ་ཏུ་འབྱུང་བར་འགྱུར།། 17

སྐྱེ་བ་སྔ་མའི་སྨོན་ལམ་གྱིས། དུང་གི་དགེ་བ་རྒྱས་པ་དག།
ཁྲུས་པ་ངེས་པར་ལོངས་སྤྱོད་སྐད། འབྲས་བུ་ཡོངས་སུ་སྨིན་པར་འགྱུར།། 18

ཡུལ་དབུས་སུ་སྟོན་རྒྱལ་པོ་ནི། ནོར་ལྷའི་བུ་ལྟར་ནོར་ལྷའི་བུ།
བྱང་ཕྱོགས་སུ་ཡང་མི་བདག་ནི། ནོར་གྱིས་བཀུར་བ་ཞེས་པ་བྱུང་།། 19

འཁོར་བ་འགྲན་པ་ལས་འབྲུང་ས་པ། ཁོན་གྱི་མིས་གདུངས་དེ་དག་གི།
ཡིད་ནི་གསུམ་དག་སྟོམ་པ་ལ། ལྷག་པར་རབ་ཏུ་དགའ་བར་གྱུར།། 20

དེ་ནས་ནོར་གྱིས་བཀུར་བ་འོངས། གྲོང་ཁྱེར་དུ་ཡང་རབ་ཏུ་ཞུགས།
གླང་པོ་ཤིང་རྟའི་ཚོགས་རྣམས་ཀྱིས། གང་གཱའི་འགྲམ་ནི་བར་མེད་བྱས།། 21

དེར་ནི་རིན་ཅན་གཙུག་ཅེས་པ། ཡང་དག་རྫོགས་སངས་རྒྱས་ཉིད་ཐོབ།
བརྒྱ་བྱིན་ཚངས་སོགས་ལྷ་རྣམས་ཀྱིས། ཞབས་ལ་མཆོད་ལྷན་དེ་ཡིས་མཐོང་།། 22

मैत्रेयोऽप्ययमादाय कृत्वा सपदि खण्डशः ।
अर्थिचिन्तामणिर्लोकमदरिद्रं करिष्यति ॥ १५ ॥

यूपं दत्त्वाथ मैत्रेयः सम्यक्संबुद्धताङ्गतः ।
अनुत्तरज्ञाननिधिर्भविष्यति सुरार्चितः ॥ १६ ॥

शङ्खो राजा सहस्राणामशीत्या परिवारितः ।
सान्तःपुरामात्यगणो राजापि प्रव्रजिस्यति ॥ १७ ॥

प्राग्जन्मप्रणिधानेन शङ्खस्य कुशलोदयः ।
कृतस्यावश्यभोग्यत्वात् परिणामे फलिष्यति ॥ १८ ॥

मध्यदेशे पुरा राजा वासवो वासवोपमः ।
धनसम्मतनामा च नृपोऽभूदुत्तरापथे ॥ १९ ॥

तयोर्विभवसङ्घर्षो भूतो वैराग्नितस्तयोः ।
अभूद्युद्धसमारम्भसंभाररभसम्मनः ॥ २० ॥

नगरं च प्रविश्याथ समेत्य धनसम्मतः ।
चक्रे गजरथानीकैर्गङ्गातीरं निरन्तरम् ॥ २१ ॥

तत्र रत्नशिखी नाम सम्यक्संबुद्धतां गतः ।
दृष्टस्तेनार्च्यमानाङ्घ्रिः ब्रह्मशक्रादिभिः सुरैः ॥ २२ ॥

དེས་བསམས་རྒྱལ་པོ་ནོར་ལྷའི་བུ། ཀྱེ་མ་བསོད་ནམས་ཆེན་པོར་ལྡན།
གང་ལ་སྐབས་བསྒྲུམ་པས་ཕྱག་བྱས། འདི་ནི་ཡུལ་གྱི་ཁྲིང་ན་གནས།། 23

དེ་ནས་དེ་ཡི་མཐུ་ཡིས་ནི། དེར་ནི་ས་སྐྱོང་དེ་དག་གིས།
ཁྲོན་གྱི་རྡུལ་ནི་ཞི་བ་ཡིས། ལོག་པར་སྨོངས་པ་ཡོངས་ཟད་གྱུར།། 24

དེ་ནས་ས་བདག་ནོར་ལྷའི་བུས། ཕ་རོལ་དང་ནི་བསྡུམས་བྱས་ནས།
བཅོམ་ལྡན་འདས་ལ་མངོན་ཕྱོགས་ཏེ། ཡོངས་སྤྱོད་ཀུན་གྱིས་མཆོད་པ་བྱས།། 25

མཆོད་པའི་མཇུག་ཏུ་བདག་ཕྱག་འཚལ། དགེ་བའི་རྩ་བ་དེ་དག་གིས།
བདག་ནི་ཆེན་པོར་གྱུར་ཅིག་ཅེས། སྨོན་ལམ་དག་ཀྱང་བྱས་པར་གྱུར།། 26

སྐབས་འདིར་ཤིན་ཏུ་ཆེ་བའི་སྒྲ། དུང་ལས་ཡང་དག་འཁྲུངས་པའི་ཚེ།
ཕྱག་འཚལ་མདུན་དུ་གནས་དེ་ལ། རིན་ཆེན་གཙུག་གི་བཀའ་སྩལ་པ།། 27

དུང་ཞེས་བྱ་བའི་ས་སྐྱོང་ནི། འཁོར་ལོ་རྒྱུར་བར་ཁྱོད་འགྱུར་ཏེ།
མཇུག་ཏུ་བྱང་ཆུབ་ལྡན་པས་ཀྱང་། དགེ་བ་ཡང་དག་ཐོབ་པར་འགྱུར།། 28

དེ་ལྟར་དམ་པའི་སྨོན་ལམ་བསོད་ནམས་རྒྱས་པ་ལ་ནི་ས་བདག་ནོར་ལྷའི་བུ།
མི་ཡི་བདག་པོ་དུང་ཞེས་བྱ་བས་བློ་གྲོས་ཐོབ་འགྱུར་རིན་ཆེན་གཙུག་གིས་བསྟན།།

དེ་བཞིན་བྱང་ཆུབ་ཏུ་ནི་རྣམ་དག་བློ་གྲོས་བྱམས་པས་བྱམས་ལས་མཛད་པར་གྱུར།
གང་གི་དམ་པའི་གྲོགས་ནི་དགེ་ལ་མངོན་འཇུག་བསོད་ནམས་ལམ་གྱི་དང་པོ་ཡིན།།

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བྱམས་པ་ལུང་བསྟན་པའི་
ཨལ་འདབ་སྟེ་བཅུ་དྲུག་པའོ།།

सोऽचिन्तयदहो राजा वासवः पृथुपुण्यवान् ।
विषयान्ते वसत्येष यो हि त्रिदशवन्दितः ॥ २३ ॥

ततस्तस्यानुभावेन तत्र भूपालयोस्तयोः ।
ययौ वैररजःशान्त्या मिथ्यामोहपरिक्षयम् ॥ २४ ॥

कृतसन्धिः परेणाथ वासवः पृथिवीपतिः ।
भगवन्तं समभ्येत्य सर्व्वभोगैरपूजयत् ॥ २५ ॥

प्रणिधानं च विदधे पूजान्ते प्रणमामि तं ।
अहं कुशलमूलेन स्यामेतेन महानिति ॥ २६ ॥

अस्मिन्नवसरे घोरं शङ्खशब्दे समुन्नते ।
प्रोवाच तं रत्नशिखी प्रणतं पुरतः स्थितम् ॥ २७ ॥

शङ्खोनाम महीपालश्चक्रवर्त्ती भविष्यसि ।
पर्य्यन्ते बोधियुक्तश्च कुशलं समवाप्स्यसि ॥ २८ ॥

एवं सत्प्रणिधानतः क्षितिपतिः पुण्योदयाद् वासवः
शङ्खो नाम नृपः स रत्नशिखिनादिष्टः श्रियं प्राप्स्यति ।
मैत्रेयः प्रणयात् करिष्यति तथा बोधौ विशुद्धां धियं
कल्याणाभिनिवेशपुण्यतरणिराद्याहि सत्सङ्गमः ॥ २९ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मैत्रेयव्याकरणावदानं नाम षोड़शः पल्लवः ।

ཡལ་འདབ་བཅུ་བདུན་པ།

མི་ཡོང་བཞིན་གྱི་རྟོགས་བརྗོད་ནི།

སེམས་ནི་རབ་ཏུ་དངས་པའི་དྲི་མེད་མཉེས་ཀ་ཤིན་རབ་འབར་བ།
ཤིན་ཏུ་ཆུང་བའི་སྦྱིན་པའི་མེ་ཏོག་འབྲས་བུའི་ཆ་ཤས་ནི།
རི་དབང་གསེར་རི་རོ་ཧ་ཎ་དང་བདུད་རྩིའི་གཏེར་སྦྱིན་པ་ཡི།
འབྲས་བུ་ཕུན་ཚོགས་དག་དང་མཚུངས་པ་ཉིད་དུ་ཉེར་མི་འགྲོ།། 1

སྟོན་ནི་ཀུན་མཁྱེན་དགོངས་པ་ཆེ། ཡིད་འོང་མཉན་ཡོད་རྒྱལ་བྱེད་ཚལ།
མགོན་མེད་ཟས་སྦྱིན་དག་གི་ནི། ཀུན་དགའ་ར་བར་བཞུགས་པར་འགྱུར།། 2

དེ་ཡི་སློབ་མ་སྙིང་རྗེའི་གཏེར། འཕགས་པ་འོད་སྲུངས་ཆེ་ཞེས་བྱ།
གྲོང་ཁྱེར་ཉེ་བའི་ནགས་ཀྱི་མཐར། ལྷོངས་ནི་རྒྱུ་ཞིང་ག་ཤེགས་པར་གྱུར།། 3

དེར་ནི་གྲོང་ཁྱེར་མཐར་བརྟེན་པ། ཤིན་ཏུ་ངན་འགྲོའི་བུད་མེད་དག།
མཛེ་ཡིན་ནད་ཀྱིས་གཟིར་བ་ཡིས། འོད་སྲུངས་དེ་ནི་ཅི་འདོད་མཐོང་།། 4

དད་པ་དག་གིས་ཡང་དག་བསམས། དེ་ཡིས་དེ་མཐོང་རབ་དངས་ཞིང་།
འདི་སྣོད་བསོད་སྙོམས་སུ་འོས་པ། བསོད་ནམས་ལས་ནི་ཅི་མ་སྐྱེས།། 5

དེ་ཡི་འདོད་པ་ངོ་མཚར་ཅན། དད་པ་དང་ལྡན་རྣམ་མཁྱེན་ནས།
སྙིང་རྗེ་རྒྱས་པའི་ལྷུང་བཟེད་དག། རབ་ཏུ་བརྐྱངས་ནས་བསོད་སྙོམས་བླངས།། 6

सप्तदशः पल्लवः ।

आदर्शमुखावदानम् ।

चित्तप्रसादविमलप्रणयोज्ज्वलस्य
स्वल्पस्य दानकुसुमस्य फलांशकेन ।
हेमाद्रिरोहणनगेन्द्रसुधाब्धिदान-
सम्पत्फलं न हि तुलाकलनमुपैति ॥ १ ॥

पुरा मनोज्ञे सर्व्वज्ञः श्रावस्त्यां जेतकानने ।
अनाथपिण्डदारामे विजहार महाशयः ॥ २ ॥

आर्य्यो महाकाश्यपाख्यस्तच्छिष्यः करुणानिधिः ।
नगरोपवनस्यान्तं जनचारिकया ययौ ॥ ३ ॥

तत्र सुदुर्गतिर्योषित् नगराश्रवलम्बिका ।
अपश्यत् कुष्ठरोगार्त्ता काश्यपं तं यदृच्छया ॥ ४ ॥

सा तं दृष्ट्वा प्रसादिन्या श्रद्धया समचिन्तयत् ।
पात्रेऽस्य पिण्डपातार्हा किं न जातास्मि पुण्यतः ॥ ५ ॥

विज्ञाय तस्या आश्चर्य्यश्रद्धायुक्तं मनोरथम् ।
प्रसार्य्य पात्रं जग्राह पिण्डं तं करुणाकुलः ॥ ६ ॥

སེམས་ནི་དད་པ་དྲག་པོ་ཡིས། འབྲས་ཆེན་རབ་མང་ཕུལ་བའི་ཚེ།
མཛེ་མོ་དེ་ཡི་ལག་པ་ཡི། སོར་མོ་སྤྲུལ་ནས་སྟོད་དུ་ལྷུང་།། 7

དེ་འོག་དེ་ཡིས་སྨིག་པ་བཞིན། མི་རྟག་ལུས་དག་དོར་ནས་ནི།
དགའ་ལྡན་ཞེས་བྱ་ལྷ་རྣམས་ཀྱི། ནང་དུ་ཡང་དག་སྐྱེས་པར་གྱུར།། 8

རྨད་བྱུང་དེ་ཤེས་བརྒྱ་བྱིན་ནི། སྦྱིན་པའི་དགེ་ལ་གུས་རྒྱས་པས།
འབད་པའི་འོད་སྤྲུངས་དམ་པའི་སྣོད། བདུད་རྩི་དག་གིས་ཡོངས་སུ་བཀང་།། 9

དགེ་སློང་རབ་ཞིའི་བདུད་རྩི་ཡིས། ཁེངས་དེས་བདུད་རྩི་བྱིན་ལ་ཡང་།
དགའ་མེད་རྩྭ་ཡི་རྩེ་མོ་ཡིས། ལྷུང་བཟེ་ཕྱུར་དུ་ཁ་བསྟུན་གྱུར།། 10

དམ་པའི་སྙིང་རྗེ་རྒྱས་པ་རྣམས། དམན་ལ་མཛའ་གཙུགས་དགའ་བ་སྟེན།
ཕྱུན་སུམ་ཚོགས་པ་འབར་བ་ཡིས། བཞིན་ལ་གུས་པ་དམན་པར་གྱུར།། 11

དེ་ནི་དགའ་ལྡན་ལྷ་ཚོགས་ན། གནས་པ་ཐོས་ནས་མི་ཡི་བདག
གསལ་རྒྱལ་གྱིས་ནི་བཅོམ་ལྡན་གྱི། མཆོད་སྟོན་ལྷག་པར་གནས་པར་བྱས།། 12

རྒྱལ་པོ་དེ་ཡི་ཁང་པ་ན། དཔལ་འབྱོར་ངོ་མཚར་བྱེད་མཐོང་ནས།
འཕགས་པ་དགའ་བོས་བསོད་ནམས་དེ། དྲིས་ཤིང་བཅོམ་ལྡན་གྱིས་བཀའ་སྩལ།། 13

སྔོན་ནི་ཁྱིམ་བདག་ཅིག་གི་བུ། དབུལ་བ་ལས་ནི་འབང་ཉིད་གྱུར།
ཞིང་ལས་དག་ལ་ཡང་དག་ཆགས། ལྟོགས་ཤིང་རིད་པས་ངལ་བར་གྱུར།། 14

तीव्रचित्तप्रसादेन भक्तसारसमर्पणे ।
कुष्ठिन्या निपपातास्याः पात्रे शीर्णकराङ्गुलिः ॥ ७ ॥

ततः सा पातकमिव त्यक्त्वानित्यकलेवरं ।
देवानां तुषिताख्यानां निलये समजायत ॥ ८ ॥

शक्रस्तदद्भुतं ज्ञात्वा दानपुण्योदितादरः ।
यत्नात् काश्यपसत्पात्रं सुधया समपूरयत् ॥ ९ ॥

सुधार्पणेऽप्यसौ भिक्षुर्निस्पृहस्तृणलीलया ।
प्रशमामृतसम्पूर्णश्चक्रे पात्रमधोमुखम् ॥ १० ॥

भजन्ते प्रणयप्रीतिं कृपणेषु कृपाकुलाः ।
सन्तः सम्पत्समाध्मातवदने मीलितादराः ॥ ११ ॥

श्रुत्वा तां तुषिते देवनिकाये निरतां नृपः ।
प्रसेनजित् भगवतश्चक्रे भोज्याधिवासनाम् ॥ १२ ॥

राज्ञस्तस्य गृहे दृष्ट्वा लक्ष्मीमाश्चर्य्यकारिणः ।
आर्य्यानन्देन भगवान् पृष्टस्तत् पुण्यमभ्यधात् ॥ १३ ॥

पुरा गृहपतेः सूनुर्दारिद्र्याद् दासतां गतः ।
क्लेशकर्म्मणि संसक्तः क्षुत्क्षामः क्लान्तिमाययौ ॥ १४ ॥

ཡུན་རིང་ཞིག་ན་མ་ཡིས་ནི། སྣུམ་དང་རྩྭ་མེད་གཟན་ཚང་ཞིག།
ཁྲིར་ནས་འོངས་པ་དེས་ཐོབ་ནས། གུས་དང་བཅས་པས་ཟ་རུ་སོང་།། 15

ལག་པ་བཀུས་པ་དེ་ཡི་ཚེ། ཅི་དགར་ཡང་དག་འོངས་པ་ཡི།
རང་སངས་རྒྱས་ལ་དེ་ཉིད་ནི། རབ་ཏུ་དང་བའི་སེམས་ཀྱིས་བྱིན།། 16

དེ་ཉིད་དུས་ཀྱི་ས་སྐྱོང་ནི། གསལ་རྒྱལ་འདི་རུ་སྐྱེས་པར་གྱུར།
འབྱོར་པ་འདི་ནི་སྦྱིན་པ་ཡི། ཐིགས་པ་དེ་ཡི་དང་པོའི་འབྲས།། 17

དེ་སྐད་བཅོམ་ལྡན་གསུང་ཐོས་ནས། དགེ་སློང་དག་ནི་ཡ་མཚན་གྱུར།
རྒྱལ་པོ་ཡིས་ཀྱང་ཡངས་པ་ཡིས། མཆོད་པ་བཅོམ་ལྡན་མདུན་དུ་བྱས།། 18

རྒྱལ་པོས་ལོངས་སྤྱོད་མ་ལུས་པས། གུས་པས་ཞལ་ཟས་ཕུལ་བྱས་ནས།།
འབྲུ་མར་བུམ་པ་བྱེ་བ་ཡིས། མར་མེ་ཡི་ནི་འཕྲེང་བ་བྱས།། 19

དེར་ནི་དབུལ་མོས་མར་མེ་ནི། ཤིན་ཏུ་ཆུང་བ་དག་ཅིག་ཕུལ།
ཐམས་ཅད་སྣུམ་ནི་རབ་ཟད་ནས། རབ་ཏུ་བརླས་ཚེ་གང་མ་སོང་།། 20

དེ་ཡིས་སེམས་ནི་དྲི་མེད་ཀྱིས། སྨོན་ལམ་དེ་ཡིས་རྣམ་བསམས་པ།
ཤཱ་ཀྱ་ཐུབ་པ་ཉིད་དུ་ནི། འགྱུར་བར་ཀུན་མཁྱེན་གྱིས་བཀའ་སྩལ།། 21

བཅོམ་ལྡན་མདུན་དུ་རྒྱལ་པོས། རིན་ཅན་སྒྲོན་མེའི་འཕྲེང་ཕུལ་ནས།
ཕྱག་འཚལ་ནས་ནི་མདུན་བསྡད་དེ། གུས་པ་ཡིས་ནི་དེར་གསོལ་པ།། 22

स्वजनन्या समानीतां निःस्नेहलवणां चिरात् ।
कल्माषपिण्डिमासाद्य भोक्तुं सादरमाययौ ॥ १५ ॥

धौतहस्तक्षणे तस्मिन् संप्राप्ताय यदृच्छया ।
ददौ प्रत्येकबुद्धाय तां प्रसन्नेन चेतसा ॥ १६ ॥

जातः स एव कालेन भूपालोऽयं प्रसेनजित् ।
तस्य दानकणस्येयं विभूतिः प्रथमं फलम् ॥ १७ ॥

श्रुत्वेति भगवद्वाक्यं भिक्षुर्विस्मयमाययौ ।
राजापि विपुलां पूजां चक्रे भगवतः पुरः ॥ १८ ॥

राजार्हैरखिलैर्भोगैः कृत्वा भक्तिनिवेदनम् ।
स कोटीस्तैलकुम्भानां दीपमालामकल्पयत् ॥ १९ ॥

दीपमेकं ददौ तत्र स्वल्पकं दुर्गताङ्गना ।
स्नेहक्षयात् प्रयातेषु सर्व्वेषु न जगाम यः ॥ २० ॥

विचिन्त्य प्रणिधानेन तया विमलचेतसा ।
भाविनीं शाक्यमुनितां सर्व्वज्ञोऽस्याः समभ्यधात् ॥ २१ ॥

रत्नदीपावलिं दत्त्वा राजा भगवतः पुरः ।
उपविश्य प्रणम्याग्रे प्रणयार्त्तं व्यजिज्ञपत् ॥ २२ ॥

བསོད་ནམས་དེ་དེའི་མཐུ་དག་ལས། བཅོམ་ལྡན་འདས་ཀྱི་སྨོན་ལམ་གྱིས།།
བླ་མེད་ཡང་དག་རྫོགས་བྱང་ཆུབ། ཁྱོད་ཀྱིས་སུ་ལ་སྟེར་མི་བགྱིད། 23

ཁྱོད་ཀྱི་བཀའ་དྲིན་བརྩེ་བ་ལས། དེ་ནི་ཐོབ་པར་བདག་འཚལ་ལོ།
རྣམ་པར་མི་རྟོག་འབྲས་ཐོབ་སླད། དཔག་བསམ་ཤིང་འཕྲུང་བསྟན་པ་ལགས།། 24

དེ་སྐད་རྒྱལ་པོའི་ཚིག་ཐོས་ནས། བཅོམ་ལྡན་འདས་ཀྱིས་བཀའ་སྩལ་པ།
བླ་མེད་ཡང་དག་རྫོགས་པ་ཡི། བྱང་ཆུབ་ས་བདག་ཉིད་པར་དཀའ།། 25

པདྨའི་སྐྱུད་པ་བས་ཀྱང་ཕྲ། རི་བོ་ལས་ཀྱང་ཤིན་ཏུ་བརླིང་།
རྒྱ་མཚོ་བས་ཀྱང་ཟབ་པ་དེ། བདེ་བླག་ཏུ་ནི་འཐོབ་མ་ཡིན།། 26

བདག་གིས་སྐྱེ་བ་གཞན་རྣམས་སུ། སྦྱིན་པ་མང་པོས་ཐོབ་མ་གྱུར།
སེམས་ནི་རབ་དང་དྲི་མེད་ཀྱི། ཡེ་ཤེས་དེ་ཡི་རྒྱུ་རུ་གསུངས།། 27

ང་ལས་ནུ་ཡི་སྐྱེ་བ་ལ། བདག་གི་གླིང་བཞིའི་བདག་པོ་ཡིས།
ཡུན་རིང་སྦྱིན་པའི་འབྲས་བུ་སྤྱད། བྱང་ཆུབ་དེ་ནི་ཐོབ་མ་གྱུར།། 28

བལྟ་སྡུག་སྐྱེ་བར་སྦྱིན་པ་ཡིས། འཁོར་ལོས་སྒྱུར་བའི་དཔལ་དེ་ནི།
ཤིན་ཏུ་ཆེ་བ་བདག་གིས་སྤྱད། བྱང་ཆུབ་དེ་ནི་ཐོབ་མ་གྱུར།། 29

གཉིས་སྐྱེས་སྐྱེ་བ་བེ་ལ་མར། གླང་པོ་བརྒྱད་ནི་སྦྱིན་བྱིན་པས།
བསོད་ནམས་ཆེན་པོ་བདག་གིས་ཐོབ། བྱང་ཆུབ་དེ་ནི་ཐོབ་མ་གྱུར།། 30

भगवत्प्रणिधानेन तत्तत्पुण्यानुभावतः ।
न कस्यानुत्तरा सम्यक्संबोधिर्भवदर्पिता ॥ २३ ॥

भवत्प्रसादप्रणयात् प्राप्तुमिच्छामि तामहम् ।
निर्विकल्पफलावाप्त्यै सेव्यन्ते कल्पपादपाः ॥ २४ ॥

इति राजवचः श्रुत्वा भगवान् समभाषत ।
दुर्लभानुत्तरा सम्यक्संबोधिः पृथिवीपते ॥ २५ ॥

सूक्ष्मा मृणालतन्तुभ्यो गिरिभ्योऽपि गरीयसी ।
समुद्रेभ्योऽपि गम्भीरा सा सुखेन न लभ्यते ॥ २६ ॥

न दानैर्बहुभिर्लब्धं मयैवान्येषु जन्मसु ।
चित्तप्रसादविशदं ज्ञानं तत्कारणं जगुः ॥ २७ ॥

चतुर्द्वीपाधिपत्येन मया मान्धातृजन्मनि ।
चिरं दानफलं भुक्तं बोधिर्नाधिगता तु सा ॥ २८ ॥

दानेन चक्रवर्त्तिश्रीः सा सुदर्शनजन्मनि ।
भुक्ता मया महीयसी बोधिर्नाधिगता तु सा ॥ २९ ॥

पुरा दत्त्वा गजानष्टौ वेलामद्विजजन्मनि ।
मया प्राप्तमहत् पुण्यं बोधिर्नाधिगता तु सा ॥ ३० ॥

གང་ཞིག་རང་གི་ཚུང་མས་འདི། ཤ་ཟ་ཞིས་བརྗོད་ནམ་པར་སྤྲངས།
དགེ་བའི་བདག་ཉིད་རྒྱལ་པོ་འི་བུ། གཟུགས་ངན་དུ་ནི་སྤྲོན་བདག་གྱུར།། 31

དཔལ་ལ་དཔལ་དང་དབྱུང་པར་ས། གདོང་ལ་དགའ་བ་རྟག་གནས་གང་།
དེ་ནི་གཟུགས་དམན་སྡུག་བསྔལ་ལྡན། སུ་ཞིག་ཡོན་དན་ཐམས་ཅད་རྒྱས།། 32

གཟུགས་བྲལ་ལུས་ནི་གདོང་བ་ལ། ཞུགས་དེ་བདེ་སོགས་བདག་པོ་ཡིས།
ལྷ་ཡི་གཙུག་གི་ནོར་ཕྱིན་ནས། མའ་ལྡ་པ་དང་མཚུངས་པར་བྱས།། 33

མཆོད་སྦྱིན་བྱེད་དེའི་མཆོད་སྦྱིར་ལ། གྲོང་ཁྱེར་སྟོང་ཕྲག་དྲུག་ཅུ་ནི།
གསེར་གྱི་མཆོད་སྡོང་ལྟར་མདོན་གཟུགས། རི་བོ་ལྷུན་པོ་འི་དཔལ་ཐོབ་གྱུར།།34

དགེ་བའི་སྐྱེ་བ་དེ་ལ་ནི། བདག་གིས མཆོག་དུ་སྦྱིན་སོགས་བྱས།
བསོད་ནམས་དེ་དག་ནམས་ཀྱང་ཐོབ། བྱང་ཆུབ་དེ་ནི་ཐོབ་མ་གྱུར།། 35

རྩེ་གསུམ་རྒྱལ་པོའི་སྐྱེ་བ་ལ། བདག་གིས་བདེན་པའི་མཐུ་ཡིས་ནི།
ཆར་མེད་སུ་གི་དང་བཅས་བཅོམ། བྱང་ཆུབ་དེ་ནི་ཐོབ་མ་གྱུར།། 36

མི་ཕྱི་ལར་ནི་མཆོད་སྦྱིན་བྱེད། ལྷ་ཆེན་རྒྱལ་པོའི་སྐྱེ་བ་ལ།
བསོད་ནམས་ཕུན་ཚོགས་བདག་གིས་ཐོབ། བྱང་ཆུབ་དེ་ནི་ཐོབ་མ་གྱུར།། 37

ས་སྐྱོང་ནི་མིའི་སྐྱེ་བ་ལ། མི་ཕྱི་ལར་སྦྱོན་དཀའ་ཐུབ་སྦྱིན།
མཆོད་སྦྱིན་གྱིས་ནི་བསོད་ནམས་ཐོབ། བྱང་ཆུབ་དེ་ནི་ཐོབ་མ་གྱུར།། 38

कुरूपः कुशलात्माहं राजपुत्रः पुराभवम् ।
यः पिशाचोऽयमित्युक्ता निजपत्न्या विवर्जितः ॥ ३१ ॥

श्रियै श्रीस्कन्धो भूत्यागे प्रीतिर्यस्य सदा स्थिता ।
स दुःखी रूपवैकल्यात् क्व वा सर्व्वगुणोदयः ॥ ३२ ॥

तं रूपविरहे देहत्यागारूढं शचीपतिः ।
दिव्यचूडामणिं दत्त्वा चक्रे पञ्चशरोपमम् ॥ ३३ ॥

षष्टिपुरसहस्राणि तस्य यज्ञेषु यज्वनः ।
हेमयूपाभिरूपाणि प्रापुर्म्मेरुवलश्रियम् ॥ ३४ ॥

तस्मिन् मयातिदानाद्रिकृते कुशलजन्मनि ।
तानि पुण्यान्यवाप्तानि बोधिर्नाधिगता तु सा ॥ ३५ ॥

मया सत्यप्रभावेण त्रिशङ्कुन्टपजन्मनि ।
कृता वृष्टिः सदुर्भिक्षा बोधिर्नाधिगता तु सा ॥ ३६ ॥

मिथिलायां महादेवन्टपजन्मनि यज्वना ।
मयाप्ता पुण्यसम्पत्तिर्बोधिर्नाधिगता तु सा ॥ ३७ ॥

मिथिलायां पुरा पुण्यं निमिभूपालजन्मनि ।
प्राप्तं दानतपोयज्ञैर्बोधिर्नाधिगता तु सा ॥ ३८ ॥

སྨོན་ནི་མི་བདག་དགའ་བོ་ལ། ཕྲ་མ་ལྡན་པའི་བུ་བཞི་དང་།
ལྷ་པ་དག་ཀྱང་མི་ལོང་བཞིན། ཡོན་དན་ལྷག་པ་བྱུང་བར་གྱུར།། 39

དུས་ཀྱི་མཐར་ནི་ཉེ་བའི་ཚེ། ས་ཡི་བདག་པོ་དེ་ཡིས་བསམས།
བདག་གི་མཐར་ནི་རྒྱལ་སྲིད་ལ། རྒྱབ་མོ་འདི་བཞི་འོས་པ་མིན།། 40

བདག་གི་བུ་ནི་མེ་ལོང་བཞིན། ལེགས་སྤྱོད་ཤེས་རབ་དྲི་མེད་དང་།
ལྡན་པས་རྒྱལ་སྲིད་དག་གི་དཔལ། གཟུགས་བརྙན་མཛེས་པ་ཐོབ་པ་ཡིན།། 41

འདི་བསམས་དེ་ཡིས་བློན་ལ་སྨྲས། སྐྱེ་གནས་ཀྱིས་བསྐྱང་བཙུན་མོ་ཡི།
ཚོགས་ཀྱིས་མཆོད་པར་འགྱུར་བ་དང་། གང་གི་དབུ་རྒྱན་མི་གཡོ་ལ།། 42

ནོར་བུའི་ཀང་ཛེས་དག་ལའང་མཉམ། སྐྲོ་ཡི་ལྡོན་པའི་བང་སོ་ལ།
གཏེར་དྲུག་མཐོང་བར་གྱུར་པ་ནི། ཁྲིད་ཀྱིས་མི་ཡི་དབང་པོར་བྱ།། 43

ཞེས་བརྗོད་མི་བདག་མཐོ་རིས་སུ། གཤེགས་ཚེ་བློན་པོས་མེ་ལོང་བཞིན།
དེ་ཡིས་བརྗོད་པའི་མཚན་ཉིད་ཀྱིས། རིམ་པ་རྣམས་ཀྱི་དབང་པོར་བྱས།། 44

ཆོས་ནི་ངེས་པའི་བྲོ་བ་ལ། རྩོལ་དང་ཕྱིར་རྩོལ་རྣམས་ཀྱིས་གང་།
མཐོང་བ་རྣམས་ཀྱི་རང་ཉིད་ནི། རྒྱལ་ཕམ་རིགས་པ་དག་ལ་གནས།། 45

སྨོན་ནི་རྒྱུ་མཚན་མེད་པ་རྟ། མི་འདོད་སྡིག་པ་ཐོབ་གྱུར་པ།
བྲམ་ཟེ་དབྱུག་ཅན་ཞེས་པ་ལ། བརྩེ་བ་ལྡན་པའི་མདུན་དུ་ནི།། 46

पुरा नन्दस्य नृपतेश्चत्वारः पिशुनाः सुताः ।
बभूवुरादर्शमुखः पञ्चमश्च गुणाधिकः ॥ ३९ ॥

कालेनापन्नपर्य्यन्तः स भूपतिरचिन्तयत् ।
एते मदन्ते चत्वारो राज्यं नार्हन्ति कर्कशाः ॥ ४० ॥

पुत्रे ममादर्शमुखे राज्यश्रीः प्रतिबिम्बिता ।
सुवृत्ते लभते शोभां प्रज्ञावैमल्यशालिनि ॥ ४१ ॥

ध्यात्वेत्यमात्यान् सोऽवादीत् स भवद्भिर्नरेश्वरः ।
कृतोऽन्तःपुरवर्गेण योऽभ्युत्थानेन पूज्यते ॥ ४२ ॥

मौलिर्न कम्पते यस्य समेव मणिपादुकैः ।
द्वारद्रुमाद्रिवापीषु निधिषट्कं स पश्यति ॥ ४३ ॥

इत्युक्त्वा चिदिवं याते नृपतौ मन्त्रिणः क्रमात् ।
तदुक्तैर्लक्षणैश्चक्रुरादर्शमुखमीश्वरम् ॥ ४४ ॥

धर्म्मनिर्णयकार्य्येषु यं वादिप्रतिवादिनः ।
विलोक्यैव स्वयं तस्थुर्न्यायैर्जयपराजये ॥ ४५ ॥

पुरा निरभिसन्धेन प्राप्तवैशसकिल्बिषम् ।
ब्राह्मणं दण्डिनं नाम दयालुः प्रययौ पुरः ॥ ४६ ॥

པ་ཡང་ཟླུང་དོན་ཁྲིམ་བདག་གིས། ཀྲོད་མ་བསད་ལས་ཞིང་རྔ་པས།
སྤྲེའུ་ལྷུང་ལས་འཛོག་པོར་ནི། གནས་པའི་ཆུང་མས་རྣམ་པར་རྩོད།། 47

བྲ་ནི་བསད་ལས་ཆང་འཚོང་མས། རྩོད་ལ་མཚུངས་པའི་ཆགས་པ་ནི།
དེ་ཡི་མི་མཐུན་ཕྱོགས་འཇིག་སླད། བརྗོད་ནས་དེ་བཏང་རྣམ་པར་བཀྲོལ།། 48

ཕྲག་པའི་བསམ་པའི་ཁྱད་པར་ལས། སེམས་ཅན་མི་མ་ཡིན་རྣམས་ཀྱི།
སེམས་ཀྱི་རྗེས་སྦྱངས་ཐེ་ཚོམ་ནི། དེ་དང་དེ་དག་ངེས་པར་བྱས།། 49

གང་གིས་ཆར་མེད་ཀྱིས་དག་པའི། སྨུ་གེ་ལོ་ནི་བཅུ་གཉིས་ལ།
ཟས་ཀྱི་སེམས་ཅན་ཀུན་གྱི་སྲོག། རབ་ཏུ་འཚོ་བ་ཉིད་དུ་བསྐྱབས།། 50

དེ་ལྟར་མེ་ལོང་བཞིན་སྐྱེས་ཆེ། བདག་གིས་བསོད་ནམས་ཐོབ་པར་གྱུར།
ཆེ་རྒྱས་ཡང་དག་རྫོགས་བྱང་ཆུབ། དེ་ནི་ནམ་ཡང་མ་རྟོགས་སོ།། 51

འབད་རྩོལ་ཤིན་ཏུ་ཆེ་བར་ནི། སྐྱེ་བ་མང་པོ་བརྒྱར་གོམས་པའི།
དྲི་མེད་ཤེས་པའི་ཀུན་རྫོབ་ནི། བཅོམ་པས་ད་ལྟ་བདག་གིས་ཐོབ། 52

གང་ཡང་ཤིན་ཏུ་མཆོག་གྱུར་བླ་མེད་བདེན་པ་རིག་པའི་ཡང་དག་རྫོགས་པའི་
བྱང་ཆུབ་འདི་
མི་བདག་ཡེ་ཤེས་ཤེས་རབ་དག་གིས་རྟོགས་བྱ་ངེས་པར་སྨིན་པའི་བསོད་ནམས་
ཀྱིས་མི་འཐོབ།

गोयुगार्थं गृहस्थेन मृतेन वड़वाहृतेः ।
कुठारपाततः पत्न्या तक्षवासी विवादितः ॥ ४७ ॥

शौण्डिकेनात्मजवधाद्दीक्षितं तुल्यनिग्रहम् ।
तद्विपक्षभयेनोक्त्वा तत्संत्यक्तं व्यमोक्षयत् ॥ ४८ ॥

अमानुषाणां सत्त्वानामध्याशयविशेषतः ।
चकार चित्तशोधनं तत्तत्सन्देहनिर्णयम् ॥ ४९ ॥

अवृष्टिमृष्टे दुर्भिक्षे येन द्वादशवर्षके ।
विहितं सर्व्वसत्त्वानामशनप्राणवर्त्तनम् ॥ ५० ॥

इत्यभून्मम पुण्याप्तिरादर्शमुखजन्मनि ।
न तु सा सम्यक्संबोधिर्विबोधिता महोदया ॥ ५१ ॥

बहुजन्मशताभ्यासप्रयासेन महीयसा ।
अद्य तु ज्ञानवैमल्यं मयाप्तं लुप्तसंवृति ॥ ५२ ॥

ज्ञानप्रज्ञाधिगम्या किमपि परतरानुत्तरा सत्यसंवित्
सम्यक्संबोधिरेषा न च खलु नृपते लभ्यते दानपुण्यैः ।

སྐོངས་པའི་མཚན་མོ་དང་བྲལ་སྤྲིན་སོང་ནམ་མཁའ་རབ་གསལ་དྲི་མ་མེད་པ་
དག་གིས་བསྟེན།
ཟློལ་མེད་ཀུན་དགའི་ས་གཞི་དེ་ནི་སྲིད་པའི་མྱུན་པ་གཅོད་བྱེད་ཉིན་མོའི་དཔལ་
འགྱུར་ཡིན།། 53

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མེ་ལོང་གི་བཞིན་གྱི་རྟོགས་པ་བརྗོད་
པའི་གཡལ་འདབ་སྟེ་བཅོ་བདུན་པའོ།།

मोहश्यामाविरामे गतघनगगनव्यक्तवैमल्यभाजां
निर्व्याजानन्दभूमिर्भवति भवतमश्छेदिनी सा दिनश्रीः ॥
५३ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
आदर्शमुखावदानं नाम सप्तदशः पल्लवः ॥

ཡལ་འདབ་བཅོ་བརྒྱད་ནི།

ཤཱ་རིའི་བུ་རབ་ཏུ་བྱུང་བའི་རྟོགས་བརྗོད་ནི།

གང་ཡང་ཡེ་ཤེས་སློབ་དཔོན་དགེ་བའི་རྒྱུ།
འཁོར་བའི་ཆུ་གཉེར་ཟམ་པས་གང་བསྒྲུབས་པ།
འདི་ནི་གཅིག་དང་མཛའ་བ་ཤེས་སྤུན་ཟླ་དང་།
མ་དང་ཕ་དག་གིས་ཀྱང་བྱེད་པ་མིན། 1

རྒྱལ་པོའི་ཁབ་ཀྱི་གྲོང་ཁྱེར་གྱི། ཀ་ལན་ད་ཀའི་གནས་ཞེས་པ།
འོད་མའི་ཚལ་གནས་དགའ་བར་སྡོན། སངས་རྒྱས་བཅོམ་ལྡན་བཞུགས་པར་གྱུར།། 2

པང་ན་སྐྱེས་དང་ཉེ་རྒྱལ་དེ། ཀུན་ཏུ་རྒྱུ་ནི་གཉིས་པོ་སྡོན།
དགེ་སློང་དངོས་པོར་རབ་རྫོགས་པས། ཞི་བ་དག་ཏུ་ཞུགས་པར་གྱུར།། 3

དེ་ནས་ཡང་དག་བསྟན་མཛད་པས། དགེ་སློང་ཤཱ་རིའི་བུ་དག་ནི།
གང་གིས་དགྲ་བཅོམ་མངོན་བྱས་ཏེ། དེ་ནི་ཐར་པར་འགྲོ་བཟོད་གྱུར།། 4

དེ་ཡིས་རྨད་བྱུང་བསྔགས་འོས་ཏེ། དགེ་སློང་ཀུན་གྱིས་མཐོང་གྱུར་ནས།
དེ་ལ་སྔོན་གྱི་སྤྱོད་མཐའ་དྲིས། དེས་ཀྱང་དེ་དག་རྣམས་ལ་གསུངས།། 5

ཁྲམ་ཟེ་མི་ཡི་གྲོགས་པོ་ཡི། ཆུང་མ་ཡོན་ཏན་མཆོག་གྱུར་པ།
ཕ་ཡིས་རྩེད་མོར་མིང་དག་ཀྱང་། སྨུར་པི་ཀ་ཞེས་བཏག་པར་གྱུར།། 6

अष्टादशः पल्लवः ।

शारिपुत्रप्रव्रज्यावदानम् ।

नेदं बन्धुर्नो सुहृत् सोदरो वा
नेदम्माता पिता वा न करोति ।
यत् संसाराम्भोधिसेतुं विधत्ते
ज्ञानाचार्य्यः कोऽपि कल्याणहेतुः ॥ १ ॥

कलन्दकनिवासाख्ये रम्ये वेणुवनाश्रमे ।
भगवान् विहरन् बुद्धः पुरे राजगृहे पुरा ॥ २ ॥

कौलितं चोपतिष्यञ्च द्वौ परिव्राजकौ पुरा ।
प्रपन्नौ भिक्षुभावेन चकार शमसंवृतौ ॥ ३ ॥

ततश्च शारिपुत्रस्य भिक्षोः संदेशना व्यापात् ।
यया साक्षात् कृतार्हत्त्वे सोऽभूद् मोक्षगतिक्षमः ॥ ४ ॥

तस्य तदद्भुतं दृष्ट्वा धनार्हं सर्व्वभिक्षुभिः ।
पप्रच्छुः पूर्व्ववृत्तान्तं स च तेभ्यो व्यभाषत ॥ ५ ॥

ब्राह्मणस्याग्निमित्रस्य भार्य्या गुणवराभवत् ।
रूपिकेति कृतं पित्रा क्रीड़ानाम च बिभ्रती ॥ ६ ॥

དེ་ཡི་མིང་པོ་སུར་པཱ་པ། ཞེས་པ་རང་སངས་རྒྱལ་ཉིད་གྱུར།
དང་པོའི་ཚུལ་ཁྲིམས་ཞེས་བྱ་བ། ནམ་ཞིག་ཁྲིམ་དུ་འོངས་པར་གྱུར།། 7

དེ་ཡིས་ཁྲོ་ཡིས་བསྟན་པ་ལས། ཁྲིམ་པའི་གུས་པས་དེ་མགྲོན་གཉེར།
རབ་བདུད་གུས་པའི་སྤྱོད་པ་དང་། རིམ་གྲོ་དག་གིས་ཚིམ་པར་བྱས།། 8

ནམ་ཞིག་ཆོས་གོས་དབུབ་པ་ཡི། བྱ་བ་དག་ནི་བྱེད་པ་དེའི།
ཁབ་ཀྱི་ལས་དབང་མཐོང་གྱུར་ནས། སྨོན་ལམ་དག་ནི་གུས་བཅས་པས།། 9

ཇི་ལྟར་ཆན་པ་ནོ་འདི་དང་། ཇི་ལྟར་ཟབ་མོར་འགྲོ་བའི་ཁབ།
དེ་ལྟར་བདག་གི་ཤེས་རབ་ནི། མཆོག་ཏུ་གྱུར་ཅིས་ཡང་དག་བདབ།། 10

རང་སངས་རྒྱས་ལ་གུས་པ་དང་། སྨོན་ལམ་དག་ནི་དེ་ཡིས་ཀྱང་།
ཤེས་རབ་ལྡན་པ་པཱུ་རི་བུར། སྐྱེ་བ་འདི་ལ་དེ་གྱུར་ཏོ།། 11

དགེ་སློང་པཱུ་རིའི་བུ་འདི་ནི། ན་ལྟ་རབ་རྣོ་བློ་མཆོག་ལྡན།།
དགེ་བའི་སྣོད་གྱུར་གང་གི་ཕྱིར། དམ་པའི་བློ་ནི་དཔག་བསམ་ཤིང་།། 12

བཅོམ་ལྡན་འདས་ཀྱི་གསུང་ཐོས་ནས། དགེ་སློང་རྣམས་ཀྱིས་ཡང་ཞུས་པ།
མི་ལས་སྨད་པ་ཟློས་གར་མཁན། རིགས་སུ་པཱུ་རིའི་བུ་ཅིས་འཁྲུངས།། 13

དེ་ནས་བཅོམ་ལྡན་འདས་ཀྱིས་དེར། བཀའ་སྩལ་སྐྱེ་བ་སྔོན་ཉིད་ལ།
བློ་གྲོས་ཆེན་པོ་ཞེས་བྱ་བའི། རྒྱལ་བུ་དམ་པས་འདོད་པར་གྱུར།། 14

भ्राता प्रथमशीलाख्यः तस्य सूर्पसमाभिधः ।
प्रत्येकबुद्धतां यातः कदाचिद् गृहमाययौ ॥ ७ ॥

स तया भर्त्तुरादेशाद् गृहिभक्त्याधिवासितः ।
प्रणतिप्रणयाचारैः स्तोषितः परिचर्य्यया ॥ ८ ॥

कदाचिच्चीवरे तस्य कुर्व्वाणस्य विपाचणम् (?) ।
सूचीकर्म्मवशाद् दृष्ट्वा प्रणिधानं समादधे ॥ ९ ॥

यथेयं कर्त्तरी तीक्ष्णा यथा गम्भीरगामिनी ।
सूची तथापरा प्रज्ञा मम स्यादिति सादरा ॥ १० ॥

प्रत्येकबुद्धविनयात् प्रणिधानेन तेन च ।
गतास्मिन् जन्मनि सैव सप्रज्ञशारिपुत्रताम् ॥ ११ ॥

स एष शारिपुत्रोऽद्य भिक्षुस्तीक्ष्णतराग्रधीः ।
कल्याणपात्रतां यातः कल्पवल्ली हि सन्मतेः ॥ १२ ॥

वाक्यं भगवतः श्रुत्वा पप्रच्छुर्भिक्षवः पुनः ।
कस्मान्नाढ्यकुले जातः शारिपुत्रो नराधमे ॥ १३ ॥

ततस्तान् भगवानूचे पूर्व्वस्मिन्नेष जन्मनि ।
अभून्महामतिर्नाम राजपुत्रः सतां मतः ॥ १४ ॥

དཔལ་དང་ལྡན་ཡང་དེ་ཡི་བློ། རབ་ཏུ་བྱུང་ལ་ཕྱོགས་པར་གྱུར།
རབ་ཏུ་དང་བ་ཡོངས་སྨིན་ལ། ཕུན་སུམ་ཚོགས་པས་སྒྲིབ་མི་བྱེད།། 15

རྒྱལ་སྲས་གཞོན་ནུ་རྣམས་དག་ནི། རབ་བྱུང་རིགས་ལ་འོས་མིན་ཉིད།
ཅེས་བརྗོད་ཕ་ཡི་བྱམས་པ་ཡིས། འབད་པས་དེ་ནི་བཟློག་པར་གྱུར།། 16

ནམ་ཞིག་གླང་ཆེན་ལ་ཞོན་ནས། སྐྱེ་བོའི་ལམ་དུ་འགྲོ་བ་དེས།
ཀུན་པོ་དབུལ་པོ་མཐོང་གྱུར་ནས། སྙིང་རྗེ་ཡིས་ནི་འདི་དག་སྨྲས།། 17

སྐལ་མེད་ནོར་ལྡན་འཇིག་རྟེན་ན། གཉེན་གྱི་འཆིང་བས་བསྡམས་རྣམས་ཀྱིས།
རབ་བྱུང་ཐོབ་པ་མིན་པ་ཉིད། ཁྱོད་ཀྱང་སུ་ཡིས་རྣམ་པར་བཟློག།། 18

དེས་སྨྲས་དབུལ་པོ་བདག་ལ་ནི། ལྷུང་བཟེད་མེད་ཅིང་ཆོས་གོས་མེད།
ཞི་བའི་ཡོ་བྱད་དག་ལ་ཡང་། ནོར་ནི་ཉེ་བར་མཁོ་བ་ཉིད།། 19

རྒྱལ་པོའི་སྲས་ཀྱིས་དེ་ཐོས་ནས། ཐུབ་པའི་དཀའ་ཐུབ་ནགས་སོང་སྟེ།
དེ་ནི་རབ་ཏུ་འབྱུང་བཅུག་ནས། ལྷུང་བཟེད་ཆོས་གོས་རབ་ཏུ་བྱིན།། 20

ཡུན་རིང་མིན་པའི་དུས་ཀྱིས་དེ། རང་སངས་རྒྱས་ནི་ཉིད་གྱུར་ནས།
རྒྱལ་པོའི་སྲས་ལ་མངོན་ཕྱོགས་ཏེ། རྫུ་འཕྲུལ་མཆོག་རྣམས་བསྟན་པར་གྱུར།། 21

དེ་ཡི་མཐུ་རྣམས་མཐོང་གྱུར་ནས། མི་ཡི་བདག་པོའི་སྲས་དེས་བསམས།
ཀྱེ་མ་དར་བ་ཆེ་ཉིད་ཕྱིར། བདག་ལ་རབ་བྱུང་དཀོན་པར་གྱུར།། 22

श्रीमतोऽपि मतिस्तस्य प्रव्रज्यायामजायत ।
परिपाकप्रसन्नानां कालुष्याय न सम्पदः ॥ १५ ॥

प्रव्रज्या राजपुत्राणां यूनां नैव कुलोचिता ।
इत्युक्त्वा जनकः प्रीत्या तं यत्नेन न्यवारयत् ॥ १६ ॥

कदाचित् कुञ्जरारूढः स व्रजन् जनवर्त्मनि ।
दृष्ट्वा दरिद्रं स्थविरं कारुण्यादिदमब्रवीत् ॥ १७ ॥

अधन्या धनिनो लोके बन्धुबन्धनयन्त्रिताः ।
प्रव्रज्यां नाप्नुवन्त्येव त्वं तु केन निवारितः ॥ १८ ॥

स न्यवेदयन् मे दरिद्रस्य न पात्रं न च चीवरम् ।
धनोपकरणान्येव शमोपकरणान्यपि ॥ १९ ॥

राजसूनुरिति श्रुत्वा गत्वा मुनितपोवनम् ।
प्रव्रज्यां कारयित्वास्य प्रददौ पात्रचीवरम् ॥ २० ॥

सोऽचिरेणैव कालेन यातः प्रत्येकबुद्धताम् ।
राजपुत्रं समभ्येत्य दिव्यामृद्धिमदर्शयत् ॥ २१ ॥

तस्य प्रभावमालोक्य स प्रदध्यौ नृपात्मजः ।
अहो महोदयत्वान्मे प्रव्रज्या दुर्लभाभवत् ॥ २२ ॥

དབུལ་ཞིང་རྣམ་འབྱེད་མེད་ལས་ནི། དམན་རྣམས་ཀྱི་ཀྱང་རྟེན་པར་དཀའ།
དེས་ན་དམན་རིགས་རྣམ་འབྱེད་དང་། ལྡན་པར་པད་ཀ་ནི་སྐྱེ་བར་ཤོག། 23

དེ་ཡི་སྨོན་ལམ་དག་ལས་ནི། དེ་ཉིད་ཤཱ་རིའི་བུ་འདིར་སྐྱེས།
སྐྱེ་བ་གཞན་དུ་བཅོམ་ལྡན་འདས། འོད་སྲུངས་ཀྱིས་ནི་རབ་ཏུ་ཕྱུང་།། 24

བདེན་པའི་གཏེར་དེ་ངེས་པར་དགྱེས་པས་འདུལ་ལྡན་འདི་ནི་དགེ་བ་དག་གི་སྐད།
ཡང་དག་རབ་ཏུ་བདང་བ་གྲུས་པས་དུས་སུ་ཤེས་རབ་ལྡན་པ་རྣམས་ཀྱི་མཆོག །
ཤཱ་ཀྱ་ཐུབ་པའི་སློབ་མར་འོས་པ་དག་ལས་མཆོག་ཏུ་བཞེད་པར་འགྱུར་བར་བསྟན།
མཽ་གལ་བུ་འདི་ཞང་འདི་རུ་གསུངས་ཞེས་ཡང་དགཾ་རིག་པའི་རང་བཞིན་ལྡན་
རྣམས་སྨྲ།། 25

སྐྱེ་བ་གཞན་དུ་དབུལ་པོ་ལས་བྱེད་ལ། སྟོང་སྤྲོང་ཆེན་པོ་འགའ་ཞིག་བརྩེ་བ་ཡིས།
ལྷུང་བཟེད་ཆོས་གོས་དག་ནི་བྱིན་གྱུར་ནས། མཚུངས་མེད་རྫུ་འཕྲུལ་མཐུ་ཡང་
རབ་ཏུ་བསྟན།། 26

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཤཱ་རིའི་བུ་རབ་ཏུ་བྱུང་བའི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཅོ་བརྒྱད་པའོ།།

दारिद्र्याददविवेकाच्च नीचानामपि दुर्लभा ।
जायेयमधमे कुले तस्मादस्मि विवेकवान् ॥ २३ ॥

स एव शारिपुत्रोऽयं ज्ञातस्तत्प्रणिधानतः ।
प्रव्रजितो भगवता काश्यपेनान्यजन्मनि ॥ २४ ॥

तेनायं नियमप्रणयविनयी सम्यक्प्रसादोदया
दादिष्टः कुशलाय सत्यनिधिना प्रज्ञावतामग्रणीः ।
काले शाक्यमुनेर्भविष्यति मतः शिष्यत्वयोगाद् वरं
मौद्गल्यायन एष चात्र कथितः संविन्मयानां वदः ॥ २५ ॥

अन्यजन्मनि दरिद्रः कार्मिकः केनचिदपि दयया महर्षिणा।
दत्तपात्रचीवरो भवद्दर्शितर्द्धिरासीदतुलप्रभाववान् ॥ २६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शारिपुत्रप्रव्रज्यावदानं नामाष्टादशः पल्लवः ।

གྲོ་བཞིན་བྲི་བ་ཟླ་བའི་རྟོགས་བརྗོད་ནི།

ཡལ་འདབ་བརྒྱ་དགུ་པ།

གང་ཡང་མཆོག་ཏུ་མི་ཟད་མཐུ་ལྡན་གང་།
དེ་ནི་བསོད་ནམས་ཕུལ་བྱུང་དར་བའི་མཆོག།
མངོན་སུམ་གྱིས་མཆོད་དགེ་བའི་ཕྱོགས་ཀྱི་དཔང་།
སྐྱེ་གཞན་མཚན་ཉིད་ཉིད་དུ་ཉེ་བར་གྱུར།། 1

སྟོན་ཆེ་མཉན་ཡོད་རྒྱལ་བྱེད་ཚལ། དགའ་བར་མགོན་མེད་ཟས་སྦྱིན་གྱི།
ཀུན་དགའ་ར་བར་བཅོམ་ལྡན་འདས། དེ་བཞིན་གཤེགས་པ་བཞུགས་པར་གྱུར།། 2

ཁྱིམ་བདག་སྟོབས་ཀྱི་སྟེ་ཞེས་པ། གྲོང་ནི་ནོར་ལས་བྱུང་བར་གྱུར།
འབྲས་བུའི་ཚོགས་ཀྱིས་སྐྱོང་བ་ཡི། ཕྱོགས་རྫོགས་གྲིབ་བསིལ་ལྗོན་པ་བཞིན།། 3

དེ་ཡི་བཙུན་མོ་རྒྱལ་སྐྱེ་ལ། དུས་སུ་བདྨའི་མིག་ཅན་གྱི།
བུ་ཞིག་བསོད་ནམས་དག་གིས་བཙས། དགའ་བ་དག་ནི་གཟུགས་ཅན་བཞིན།། 4

ལྷན་སྐྱེས་རིན་ཅན་སྒྲོན་མའི་འོད། དེ་ཡི་ཟླ་བའི་ཟླ་རྒྱན་གྱུར།
གསེར་ནི་བྲི་བ་བརྒྱ་ཡིས་ཀྱང་། གང་གིས་རིན་ལ་མཚུངས་མ་གྱུར།། 5

འདི་ནི་རྒྱུ་སྐར་གྲོ་བཞིན་སྐྱེས། ཟླ་རྒྱན་རིན་ཅན་བྲི་བ་འདི།
གྲོ་བཞིན་བྲི་བ་ཟླ་ཞེས་དེ། གཞོན་ནུ་ཡོན་ཏན་ལྡན་བར་གྱུར།། 6

श्रोणकोटिकर्णावदानम् ।

ऊनविंशपल्लवः ।

स कोपि पुण्यातिशयोदयस्य
वरःप्रभावः परमाक्षयो यः ।
प्रत्यक्षलक्ष्यः शुभपक्षसाक्षी
जन्मान्तरे लक्षणतामुपैति ॥ १ ॥

रम्ये पुरा भगवति श्रावस्त्यां जेतकानने ।
अनाथपिण्डदारामे विहारिणि तथागते ॥ २ ॥

बभूव वासवग्रामे बलसेनाभिधो गृही ।
पूरिताशः फलभरैश्छायातरुरिवार्थिनाम् ॥ ३ ॥

जायायां जयसेनायां काले कमललोचनः ।
अजायत सुतस्तस्य पुण्यैर्मूर्त्त इवोत्सवः ॥ ४ ॥

सहजा रत्नदीपार्चिरभूत्कर्णस्य कर्णिका ।
नाभूत् मूल्यतुला यस्य हेमकोटिशतैरपि ॥ ५ ॥

श्रवणानक्षत्रजातोऽसौ रत्नकोट्यर्हकर्णिकः ।
स श्रोणकोटिकर्णाख्यः कुमारोऽभूद् गुणोचितः ॥ ६ ॥

དེ་ནི་དྲི་མེད་གསལ་ཞིང་མཛེས། ཆ་རྣམས་ཀྱིས་ནི་ཡོངས་སུ་རྫོགས།
མི་དམན་ཀུན་དགའ་རྒྱས་གྱུར་པ། སུ་ཡི་ཟླ་བ་བཞིན་མ་གྱུར།། 7

མིག་ནི་མཆི་མ་ལྡན་བའི་མ། མཆོག་དུ་རྒུབ་པའི་ཚིག་དག་གིས།
སྙན་སྙ་ཡིན་ཡང་སྐད་བྲ་སྟེ། ཟླ་བས་དུག་གི་ཆར་ཕབ་བཞིན།། 8

ནོར་སྦྱིན་ལྷ་བུར་ཕུན་ཚོགས་པའི། ཕ་ཡིས་བཟློག་ཀྱང་གཞོན་ནུ་དེ།
རིན་ཅེན་དོན་གཉེར་དོན་མཐུན་ནི། ཆེན་པོས་གླིང་གཞན་རིངས་པར་སོང་།། 9

ཆུ་སྲིན་འབྱུང་གནས་རབ་བསྒྲལ་ནས། སྐྱེ་བོ་མེད་པའི་ལམ་བགྲོད་དེ།
ལས་ཀྱི་རླབས་ཀྱིས་རྣམ་བསྐྱོད་པས། རང་གི་དོན་མཐུན་གྲོལ་བར་གྱུར།། 10

དོན་མཐུན་གྱིས་ཀྱང་དེ་མ་རྙེད། མྱ་ངན་གྱིས་ཟློག་དལ་བུ་ཡིས།
ཉོན་མོངས་བསྒྲུབས་ནས་རང་ཡུལ་དུ། འཆིང་དང་གྲོལ་བར་རབ་དུ་ཞུགས།། 11

དེ་ཡང་ངལ་ཞིང་ངལ་གསོ་དང་། རབ་དུ་གྲོལ་བས་རྒྱ་ཚོགས་བཀྲལ།
གདུང་བའི་མྱ་ངན་འཕྲེང་བ་ཡིས། མཚན་པ་ལྷོ་ཡི་ཕྱོགས་སུ་སོང་།། 12

དེས་བསམས་ནོར་ནི་ཆེན་པོ་དག། ཡོད་ལ་ནོར་སྒྲུབ་ལ་བརྩོན་པ།
ཉོན་མོངས་འབྲས་བུ་དར་བ་འདི། བདག་གི་ཚུལ་མིན་ཉིད་ཀྱིས་བསྐྱེད།། 13

མི་རྣམས་ཆོག་ཤེས་གྲོལ་བ་ལས། ཀྱི་མ་ནོར་སྒྲུབ་ལ་འཇུག་པ།
གནོད་པ་ཐམས་ཅད་འབྱུང་བ་ཡིས། སྐད་འདོས་རྒྱུད་པ་དག་གི་གནས།། 14

स निर्म्मलरुचिः कान्तः कलाभिः परिपूरितः ।
अमन्दानन्दनिष्यन्दी न कस्येन्दुरिवाभवत् ॥ ७ ॥

स युवा वार्य्यमाणोऽपि पित्रा धनदसम्पदा* ।
जननी साश्रुनयना परं परुषया गिरा ॥ ८ ॥

प्रियंवदोऽपि निर्भर्त्स्यो विषवर्षीव चन्द्रमाः* ।
महासार्थेन रत्नार्थी दूरद्वीपान्तरं ययौ ॥ ९ ॥

मकराकरमुत्तीर्य्य व्रजतस्तस्य निर्जने ।
कर्म्मोर्म्मिविप्लवेनाभूत् स्वसार्थविरहः पथि ॥ १० ॥

सार्थोऽपि तमनासाद्य विनिवृत्तः शुचा शनैः ।
स्वदेशमर्जितक्लेशः प्रविवेश विशृङ्खलः ॥ ११ ॥

सोऽपि तप्तमरुश्रेणीलक्षणां दक्षिणां दिशम् ।
श्रान्तः प्रशान्तविश्रान्तिर्वापिगाहं व्यगाहत ॥ १२ ॥

सोऽचिन्तयदहो वित्ते प्रतिवित्तार्ज्जनोद्यमः ।
ममायमनयेनैव जातक्लेशः फलोदयः ॥ १३ ॥

अहो धनार्जनावेशः सन्तोषविरहाद् नृणाम् ।
सर्व्वापवादसंवादो निन्द्यानां विपदां पदम् ॥ १४ ॥

---

* जननीं साश्रुनयनां परं परुषया गिरा ।
प्रियंवदोऽपि निर्भर्त्स्य विषवर्षीव चन्द्रमाः ॥
स युवा वार्य्यमाणोऽपि पित्रा धनदसम्पदा ।
महासार्थेन रत्नार्थी दूरद्वीपान्तरं ययौ ॥
Reading suggested by M. M.—H. Sastri.

འཁོར་བར་ནོར་ནི་སྒྲུབ་པ་ལ། བག་ཆགས་གོམས་ལས་ལུས་ཅན་རྣམས།
སྨོངས་པ་དེ་ནི་གསེར་གྱི་རི། ཐོབ་ཀྱང་ཡོངས་སུ་ཚིམས་པ་མེད།། 15

ངལ་དུབ་རབ་རྒྱས་རོ་དང་བྲལ། འོག་གི་རྒྱ་ངམ་ས་གཞི་འདི།
འབར་བའི་དཔལ་བཞིན་རིངས་པར་ནི། བདག་གི་སྲིད་པ་རབ་རྒྱས་བྱེད།། 16

ཀྱི་མ་གནས་དང་གནས་རྣམས་སུ། རི་དྭགས་སྐོམ་པས་ལོང་བ་བཞིན།
རྒྱ་ངམ་གྱི་ནི་སྨིག་རྒྱུ་ཡིས། བདག་ལ་སྨོངས་པ་བསྐྱེད་པ་ཉིད།། 17

སྐོམ་པ་འདི་དང་ངལ་བ་འདིས། ཆུ་ནི་མེད་པའི་ས་གཞི་ནི།
ཕྱོགས་ནི་འབར་བར་བདག་གིས་མཐོང་། ཅི་ཞིག་བྱ་ཞིང་གང་དུ་འགྲོ།། 18

དེ་ལྟར་བསམས་ཤིང་དལ་བུས་དེ། ཆུ་ཡི་བསམ་པས་སོང་ན།
ངལ་དུབ་རྣམ་པ་དང་བཅས་བཞིན། ལྕགས་ཀྱི་གྲོང་ཁྱེར་མཐོང་བར་གྱུར།། 19

ཤིན་ཏུ་སྐག་པའི་སྤྲིན་ལྷ་བཞིན། འཛིགས་སུ་རུང་བའི་སྐྱེས་བུ་ནི།
དུས་ལྟར་དྲག་ཅིང་མིག་དམར་བ། སྒོ་དེར་གནས་པ་མཐོང་བར་གྱུར།། 20

དེ་ཡིས་དེ་ལ་བཏུང་བ་དྲིས། གང་ཆོ་ཅི་ཡང་མི་སྨྲ་བ།
དེ་ཚེ་རང་ཉིད་ནང་ཞུགས་པས། ཡི་དྭགས་འཇིག་རྟེན་རྣམ་པར་མཐོང་།། 21

ཧྲུས་པ་ཆུ་རྒྱུས་ལྷག་ལུས་བསྐམས། གོས་མེད་རྡུལ་གྱི་འཕྲེང་བས་གོས།
ཤིང་བསྒྲིགས་ལྟ་བུའི་ཡི་དྭགས་རྣམས། མཐོང་བས་དེ་ནི་གདུང་བར་གྱུར།། 22

हेमाचलेऽपि संप्राप्ते न पर्य्याप्तिर्धनार्जने ।
संसारे वासनाभ्यासद्वेषमोहः शरीरिणाम् ॥ १५ ॥

पृथुप्रयासविरसा दीपिता श्रीरिवायता ।
तृष्णां तनोति नितरामियं मरुर्महीतले ॥ १६ ॥

अहोवत कुरङ्गाणां तृष्णान्धानां पदे पदे ।
ममापि जनयन्त्येव मोहं मरुमरीचिकाः ॥ १७ ॥

इयं तृष्णा श्रमश्चायमिमा निरुदका भुवः ।
किं करोमि क्व गच्छामि पश्यामि ज्वलिता दिशः ॥ १८ ॥

इति संचिन्त्य सः शनैः प्रसर्पन् सलिलाशया ।
आयासमिव साकारं ददर्श पुरमायसम् ॥ १९ ॥

घोरं द्वारिस्थितं तत्र संत्रासस्येव सोदरम् ।
ददर्श पुरुषं कालकरालं रक्तलोचनम् ॥ २० ॥

स तेन पृष्टः पानीयं यदा नोवाच किञ्चन ।
तदा स्वयं प्रविष्टेन प्रेतलोको विलोकितः ॥ २१ ॥

दग्धकाष्ठोपमान् धूलिमलिनान्निरम्बरान् ।
शुष्कास्थिस्नायुशेषाङ्गान् प्रेतान् दृष्ट्वा स विव्यथे ॥ २२ ॥

ཆུ་དང་བྲལ་བས་གཟིར་དེ་ཡ། དེ་དག་གིས་ནི་ཆུ་བསླངས་པས།
རང་གི་གདུང་བ་ཡོངས་བཏང་སྟེ། དེ་ཡི་སྡུག་བསྔལ་གྱི་གཟིར་གྱུར།། 23

གདུང་བ་རབ་སྨྲ་སྨྲོས་པ་ནི། དྲག་པོས་གཟིར་དེ་ལ་དེས་སྨྲས།
བརྩེ་མེད་བ་ར་ག་ལ་ཀྱུ་ངམ་གྱི། དགོན་པ་འདིར་ནི་ཆུ་གང་ལས། 24

ཁྱེད་སུ་ལས་ནི་ཅི་ཞིག་གིས། སྡུག་བསྔལ་བཟོད་དཀའ་འདི་ལ་བཀོད།
ཁྱེད་རྣམས་ཕྱིར་བཅོས་འབྲས་མེད་པས། འདི་ལས་བདག་ནི་མྱ་ངན་བྱེད། 25

གཟིར་བ་མ་མཐོང་མཐོང་ཡང་གང་། དེ་དག་ཉོན་མོངས་འཛེམས་བཟོད་པ།
ཟུག་རྔུ་མེད་པར་བཏུག་པ་དེའི། གཉིད་ནི་བདེ་བས་བྲན་པ་བཞིན།། 26

དེ་ལ་དེས་སྨྲས་བདག་ཅག་ནི། ཐར་མེད་མ་ཡིན་འགལ་བའི་ལས།
སྔོངས་པ་ལས་ནི་རབ་བསགས་པ། གདུང་བ་མི་བཟད་གནས་སུ་འཕངས།། 27

ལྷག་པར་སྨྲོད་ཅིང་སྨྲོད་པས་ གཞན་གྱི་ བརྟན་པ་ཉམས་བྱས་ ཀྱུགས་པ་ ཀྱུས་
པ་ལས།
འཕགས་ པ་མིན་ཞིང་ ཕྲག་དོག་དག་ གིས་ གདུང་ བ་ རྣམ་ པར་ བསྟོན་ པ་ མ་
བཟློག་པ།།
བདག་ཅག་རྣམས་ནི་བརྩེ་བ་མེད་པས་སྐྱེ་བོ་ལེགས་པའི་སྙིང་ལ་རྟག་ཏུ་ནི།
ཚིག་གིས་ ལྕགས་ མདའ་དུག་ གིས་ཡོངས་ སུ་བསྐྲོས་པས་ཟུག་རྔུ་རབ་ཏུ་
ཟུག་པར་བྱས།། 28

तैर्य्याचितः स पानीयं पानीयविरहार्दितः ॥
परित्यज्य निजामार्त्तिमभूत्तद्दुःखदुःखितः ॥ २३ ॥

तीव्रतृष्णातुरानूचे स तान् आर्त्तप्रलापिनः ॥
ममास्मिन्मरुकान्तारे निष्कृपस्य कुतः पयः ॥ २४ ॥

कृच्छ्रेऽस्मिन् दुःसहे न्यस्ताः के यूयं केन कर्म्मणा ।
युष्मदप्रक्रियाबन्धश्चातः कृच्छ्रश्चराम्यहम् ॥ २५ ॥

निद्रा निःशल्यकल्पस्य सुखसिक्तेव तस्य या ।
नार्त्तान्नपश्यति दृष्ट्वा तेषां क्लेशक्षये क्षमा ॥ २६ ॥

ते तमूचुर्विरुद्धेन कर्म्मणा मोहसञ्चयात् ।
अनिवर्त्त्यं वयं मर्त्याः क्षिप्ता व्यसनसंकटे ॥ २७ ॥

अधिक्षेपात् क्षेपक्षपितपरधैर्य्यैर्म्मदभरा-
दनार्य्यैर्मानव्यसनेर्ष्याभिरवार्य्यव्यतिकरैः ।
कृतास्माभिर्नित्यं सुजनहृदये निर्दयतया
वचोभिर्नाराचैर्विषपरिचितैः शल्यकलना ॥ २८ ॥

སྦྱིན་པ་མ་བྱིན་ནོར་ནི་ཐོགས་པ་ཉིད། འཆི་བའི་སྐད་དུ་སེམས་ནི་བྲེས་པ་ཉིད།
བདག་ཅག་ལུས་ཀྱིས་གཞན་གྱི་ཆུང་མ་དག། འཁྲིག་པའི་རྣམ་འགྱུར་རབ་
ཏུ་བྱེད་པ་བསྒྲུབས།། 29

དེ་དག་དམན་པ་ལ་ཆགས་ཤིང་། ངན་པའི་ལས་ལ་མཁས་གྱུར་པ།
ཡི་དྭགས་གྲོང་ཁྱེར་འཇིགས་རུངས་འདིར། བདག་ཅག་ཉོན་མོངས་སྨོད་ཉིད་གྱུར།།
30

དེ་དག་ཚིག་དེ་དེས་ཐོས་ཤིང་། གཞན་དུའང་རྣམ་པ་དེ་ལྟ་ཡི།
ཡི་དྭགས་མངོན་པར་ནི་འདོད་པ། མཐོང་ནས་སྙིང་རྗེ་རྒྱས་པར་གྱུར།། 31

ངན་འགྲོའི་གྲོང་ཁྱེར་དེ་ལས་ནི། བསོད་ནམས་སྟོབས་ཀྱིས་ཐོན་ནས་དེ།
དྲི་མེད་གྲིབ་མ་བསིལ་བ་ཡི། ནགས་ཀྱི་ནང་དུ་ཕྱིན་པར་གྱུར།། 32

དེ་ནས་ལམ་རིང་གི་དུབ་ཅིང་། ཡོངས་ངལ་དལ་བུ་དལ་བུ་ཡིས།
སྐོམ་པས་ཡོངས་གདུངས་ལོང་བ་བཞིན། འོད་བྱེད་རི་ལས་ལྷུང་བར་གྱུར།། 33

མ་ལུས་ཕྱོགས་རྣམས་གསལ་བྱེད་པའི། བསོད་ནམས་བཞིན་དུ་ཉིན་ཟད་ཚེ།
ཀུན་རྨོངས་ནག་པོའི་མུན་པ་དག། འཇིག་རྟེན་དུ་ནི་སྡིག་བཞིན་བྱུང་།། 34

བྱ་དང་བྱུང་བ་ཆགས་གྱུར་པ། པདྨོ་ཅན་གྱི་ཕུན་ཚོགས་རྒྱ།
རྣམ་རྒྱས་རབ་ཏུ་འགྲོགས་པ་ཡིས། གཉིད་བཞིན་ཡང་དག་བྱུང་བར་གྱུར།། 35

སྙིང་རྗེས་ལས་བཞིན་བསིལ་ཟེར་གྱི། ཟླ་འོད་བདུད་རྩིའི་ཕྲུར་མ་ཡིས།
ར་བ་གསལ་སྐར་མ་འགྲོ་བའི་མིག། དེ་ནས་རབ་རིབ་བྲལ་བར་བྱས། 36

दानं न दत्तं हृतमेव वित्तं
हिंसानिमित्तीकृतमेव चित्तम् ।
अस्माभिरङ्गैर्विहिता विकाराः
परस्य दारापहृतिप्रकाराः ॥ २९ ॥

ते वयं कुहकासक्ता दक्षाः क्षुद्रेषु कर्म्मसु ।
प्रयाताः प्रेतनगरे घोरेऽस्मिन् क्लेशपाचताम् ॥ ३० ॥

इति तेषां वचः श्रुत्वा सोऽन्यच्च च तथाविधान् ।
प्रेतान् दृष्ट्वा नाभिप्रेतान् करुणाकुलितोऽभवत् ॥ ३१ ॥

निर्गम्य दुर्गमात् तस्मात् पुरात् पुण्यबलेन सः ।
विमलं शीतलच्छायमाससाद वनान्तरम् ॥ ३२ ॥

अथ दुराध्वसंतप्तः परिश्रान्तः शनैः शनैः ।
निपपाताचलादन्धस्तृष्णार्त्त इव भास्करः ॥ ३३ ॥

दिने पुण्य इव क्षीणे निःशेषाशाप्रकाशके ।
संमोहमलिनं लोके तमः पापमिवोद्ययौ ॥ ३४ ॥

क्षीणभृङ्गविहङ्गानां नलिनीनां प्रसङ्गिनी ।
विकाशसम्पदा मुद्रा निद्रेव समजायत ॥ ३५ ॥

कारुण्यादिव शीतांशुर्ज्योत्स्नामृतशलाकया ।
स्फारतारं जगन्नेत्रं चक्रे वितिमिरं ततः ॥ ३६ ॥

འཁོར་བ་ཉིན་མོ་ནུབ་མོ་ཡི། འཆར་ནུབ་གཞན་དུ་གྱུར་པ་དག།
ཉམས་འཕྲུལ་དུ་མ་མཐོང་བ་ལས། བདུད་རྩིའི་འོད་ནི་རྒོད་པ་བཞིན།། 37

མིག་ནི་ཀུན་དགའི་བདུད་རྩིའི་ཚར། རིག་བདེ་མཚོན་བྱེད་ཕྱོགས་ཀྱི་ནི།
བུ་མོ་འི་བཞིན་གྱི་མེ་ལོང་དག། དགའ་བ་གཟུགས་ཅན་བཞིན་ཤར་ཚེ།། 38

ལྷུད་མོ་ལ་ནི་གཞན་གཟུགས་ཀྱིས། མཐོ་རིས་ས་ལ་འོངས་པ་ཡིས།
མཛེས་པའི་གདོང་བཞིན་གཞལ་ཡས་ཁང་། གྲོ་བཞིན་བྱེ་བས་མདུན་དུ་མཐོང་།། 39

དེར་ནི་ལྷ་ཡི་བུ་མོ་དག། རྒྱུགས་པ་དང་བཅས་བཞི་མཐོང་སྟེ།
ཟླ་བ་ཤར་བའི་ཀུན་དགའ་དང་། ཉམ་པར་རྩེ་ཕྱིར་འགྲོགས་པ་བཞིན།། 40

དེ་དབུས་མཆོག་གི་ཉམས་པ་ཅན། དགའ་བ་དང་ལྡན་མཐོང་གྱུར་ཏེ།
གཞོན་ནུའི་དགའ་བའི་ཚོགས་རྣམས་དག། ཉམ་བཅས་ཉིད་དུ་གྱུར་བ་བཞིན།། 41

རིན་ཅེན་ན་རྒྱན་དཔུང་གྱིན་དང་། ཟུར་ཕྱུད་འོད་ཟེར་རིང་པོ་ཡིས།
མཚམས་ལས་འདས་པའི་ངོ་མཚར་དག། ཕྱོགས་ཀྱི་གདོང་ལ་འདི་བ་བཞིན།། 42

དེར་ནི་ལེགས་བྱས་ལས་བྱུང་བའི། ལྗོན་ཤིང་གྱུས་པའི་འབྲས་བུའི་དཔལ།
ལོངས་སྤྱོད་བདེ་བ་ཕུན་སུམ་ཚོགས། མད་བྱུང་དེ་དག་མཐོང་བར་གྱུར།། 43

དེ་ནས་གྲོ་བཞིན་བྱེ་བ་ན། དེ་དག་དགའ་བས་མགྲོན་གཉེར་ཏེ།
ཞིམ་པའི་བཟའ་བཏུང་དག་ལ་ནི། མཚན་མོ་བདེ་བར་བོས་པར་གྱུར།། 44

क्षयोदयपरावृत्तिदर्शितानेकविभ्रमः ।
संसारदिनयामिन्योर्जहासेव सुधाकरः ॥ ३७ ॥

नेत्रानन्दसुधावर्षे सुखस्पर्शे निशाकरे ।
दिग्वधूवदनादर्शे हर्षे मूर्त्त इवोदिते ॥ ३८ ॥

श्रोणकोटिं ददर्शाग्रे विमानमाननद्युतिम् ।
कौतुकादन्यरूपेण स्वर्गाद्भुवमिवागताम् ॥ ३९ ॥

तस्मिन्नपश्यत्समदाश्चतस्रस्त्रिदशाङ्गनाः ।
दिशश्चन्द्रोदयानन्दविहारायेव संगताः ॥ ४० ॥

तासां मध्ये वराकारं रममाणं व्यलोकयत् ।
तरुणप्रेमसंभरमिव साकारतां गतः ॥ ४१ ॥

रत्नमण्डलकेयूरकिरीटिकाचिरांशुभिः ।
आलिखन्तमिवाश्चर्यममर्य्यादं दिशां मुखे ॥ ४२ ॥

तस्य तामद्भुतां दृष्ट्वा सम्भोगसुखसम्पदम् ।
मेने स सुकृताख्यस्य तरोः स्फीतां फलश्रियम् ॥ ४३ ॥

प्रीत्या तेन कृतातिथ्यः स्वादुपानाशनादिभिः ।
तां श्रोणकोटिकर्णोऽथ निनाय रजनीं सुखम् ॥ ४४ ॥

དེ་ནས་རྒྱུ་སྐར་མེ་དྲོག་གི། རླུང་ཆེན་གྲོ་རངས་འོད་དག་གིས།
མི་རྟག་པས་བཞིན་ཟླ་བ་ཡིས། དཔལ་འབྱོར་ཡོངས་སུ་ཉམས་པར་བྱས།། 45

མཚན་མོ་དག་ནི་ཟད་གྱུར་ཅིང་། སྲིད་པའི་མིག་ནི་ཉི་མ་དག།
འབྱུང་པོ་ཀུན་གྱི་བདེ་སྡུག་གི། དཔང་པོ་གཅིག་པོ་ཤར་བའི་ཚེ།། 46

གཞལ་ཡས་ཁང་དང་ལྷ་མོ་རྣམས། སྐད་ཅིག་གིས་ནི་མི་སྣང་གྱུར།
སྐྱེས་བུ་ཡང་ནི་མཛེས་པའི་བཞིན། རྣམ་པར་ཉམས་ནས་ས་ལ་ལྷུང་།། 47

དེ་ནས་དེ་ཡི་རྒྱབ་དུ་ནི། ཤིན་དུ་འཇིགས་རུངས་ཁྲོ་ཚོགས་བྱུང་།
འགྲོ་གསུམ་དམོད་ཚིག་གི་བསྣུང་བའི། ཉོན་མོངས་སྦྲང་པོ་མ་ལུས་བཞིན།། 48

ཁ་དང་མགྲིན་པ་ནས་བཙམས་ཤ། ཟ་ཞིང་དྲག་སྤྱོད་ཁྲག་གིས་སྦྱོས།
དེ་དག་རྣམས་ནི་ཚེ་དེ་ལྡན། དེ་ནི་ཟློས་ཤིང་ཟད་པར་གྱུར།། 49

ཉིན་མོའི་མཐར་ནི་སླད་ནས་ཡང་། གཞལ་ཡས་ཁང་དེ་བྱུང་བ་མཐོང་།
ལྷ་མོ་བཞི་པོ་དེ་དག་དང་། མཛེས་ལྡན་སྐྱེས་བུ་དེ་ཡང་ངོ་།། 50

དེ་ནས་གྲོ་བཞིན་བྲེ་བ་ནུ། ཤིན་ཏུ་ཡ་མཚན་ནས་དེ་ལ།
གྲོགས་པོ་ངོ་མཚར་འདི་དག་ནི། མཐོང་བ་ཅི་ཡིན་སྨྲོས་ཞེས་དྲིས།། 51

དེ་དྲིས་དེ་ཡིས་རབ་སྨྲས་པ། གྲོགས་པོ་འདི་ནི་མཉན་པར་གྱིས།
ཁྱོད་ནི་གྲོ་བཞིན་བྲེ་བ་ནུ། ངས་ཤེས་ལེགས་བྱས་ལྡན་པ་ཡིན།། 52

ताराकुसुमवाताळिप्रभा प्राभातिकी ततः ।
अनित्यतेव शशिनश्चक्रे लक्ष्मीपरिक्षयम् ॥ ४५ ॥

क्षयं क्षपायां यातायां भानौ भुवनचक्षुषि ।
उदिते सर्व्वभूतानां सुखदुःखैकसाक्षिणि ॥ ४६ ॥

विमानं सुरनार्य्यश्च क्षणाददृश्यतां ययुः ।
विनष्टवदनच्छायः पुरुषश्चापतत् क्षितौ ॥ ४७ ॥

ततस्तस्यापतत् पृष्ठे शुनां संघोऽतिभीषणः ।
त्रैलोक्यशापपापोत्थः क्लेशराशिरिवाखिलः ॥ ४८ ॥

स तैर्ग्रीवामुखारब्धमांसग्रासाग्रकर्षणैः ।
आक्रन्दिरुधिरक्षीरैर्भक्ष्यमाणः क्षयं ययौ ॥ ४९ ॥

दिनान्ते पुनरायान्तं तद्विमानमपश्यत (?) ।
चतस्रोऽप्सरसस्ताश्च पुरुषः स च कान्तिमान् ॥ ५० ॥

तं श्रोणकोटिकर्णोऽथ पप्रच्छात्यन्तविस्मितः ।
सखे किमेतदाश्चर्य्यं दृश्यते कथ्यतामिति ॥ ५१ ॥

स तेन पृष्टः प्रोवाच वयस्य श्रूयतामिदम् ।
त्वां श्रोणकोटिकर्णाख्यं जानामि सुकृतोचितम् ॥ ५२ ॥

ནོར་ལས་བྱུང་བའི་གྲོང་དུ་བདག། སྡིག་ཅན་ཕྱུགས་དག་སྐྱོང་བར་གྱུར།
རྟག་ཏུ་བདག་གིས་ཕྱུགས་རྣམས་ཀྱི། ཤ་ལ་རབ་ཏུ་བཅད་ནས་བཙོངས།། 53

ཀཱ་ཏྱཱ་ཡཱ་ན་ཞེས་འཕགས་པ། སྙིང་རྗེའི་གཏེར་ནི་བསོད་སྙོམས་ལ།
བྱོན་པས་བདག་ལ་རབ་གསུངས་པ། ལས་ངན་འདི་ལས་རྣམ་པར་ལོག།། 54

བབ་ཅོལ་ཚོལ་བའི་ཉོན་མོངས་རྣམས། འཆི་བའི་རང་བཞིན་བཟོད་དཀའ་འདི།
རྩ་བ་བཅད་པའི་ལྗོན་ཤིང་བཞིན། རང་གི་ལུས་ལ་ལྟུང་བ་ཉིད།། 55

དེ་ལྟར་བདག་ཉིད་བཟློག་གྱུར་ཀྱང་། གང་ཚེ་སྡིག་ལས་མ་ལོག་པ།
དེ་ཚེ་འཕགས་མིན་ལ་བརྩེ་བ། དེ་ཡིས་བདག་ལ་སླར་གསུངས་པ།། 56

གལ་ཏེ་རྣམ་ཀུན་བརྩེ་མེད་ཁྱོད། ཉིན་པར་དག་ནི་འཆི་བ་བྱོས།
མཚན་མོ་དག་གི་དམ་ཚིག་ལས། ཚུལ་ཁྲིམས་སྡོམ་པ་ཡང་དག་ལོང་།། 57

སེམས་ཅན་ཀུན་ལ་ཕན་བཞེད་པ། དེ་ཡིས་འབད་པས་དེ་བརྗོད་ནས།
ཚུལ་ཁྲིམས་བླང་བའི་རང་བཞིན་གྱིས། བསོད་ནམས་བློ་གྲོས་བདག་ལ་གནང་།། 58

དུས་ཀྱིས་དུས་ཀྱི་དབང་སོང་སྟེ། བདག་གིས་གནས་སྐབས་འདི་དག་ཐོབ།
སོལ་ཚན་བདུད་རྩིའི་ཆར་དག་གི། ཉིན་དང་མཚན་ནི་གདམས་པ་བཞིན།། 59

མཚན་མོ་ཚུལ་ཁྲིམས་བླངས་འབྲས་དང་། ཉིན་པར་དག་ནི་འཆི་བའི་འབྲས།
བདག་སྤྱོད་བསོད་ནམས་སྡིག་པ་ཡིས། བདེ་དང་སྡུག་བསྔལ་དག་ཏུ་དོར།། 60

अभवं वासवग्रामे दुष्कृती पशुपालकः।
पशूनां मांसमुत्कृत्य विक्रीतं सततं मया ॥ ५३ ॥

पिण्डपाताय संप्राप्तो मामार्य्यः करुणानिधिः।
कात्यायनाख्यः प्रोवाच विरमास्मात् कुकर्म्मणः ॥ ५४ ॥

हिंसामयो ह्ययं क्लेशः दुःसहः सहसैषिणाम्।
स्वशरीरे पतत्येव छिन्नमूल इव द्रुमः ॥ ५५ ॥

इत्यहं वार्य्यमाणोऽपि तेनानार्य्यः कृपात्मना।
यदा न विरतः पापात् तदा स प्राह मां पुनः ॥ ५६ ॥

दिवा त्वं कुरुषे हिंसां सर्व्वथा यदि निर्दयः।
रात्रौ शीलसमादानं गृहाण समयात् मम ॥ ५७ ॥

इत्युक्त्वा तेन यत्नेन सर्व्वसत्वहितैषिणा।
दत्ता शीलसमादानमयी पुण्यमतिर्मम ॥ ५८ ॥

कालेन कालवशगः प्राप्तः सोऽहमिमां दशाम्।
तप्ताङ्गारसुधावर्षैरिव कीर्णां दिवानिशम् ॥ ५९ ॥

रात्रौ शीलसमादानफलं हिंसाफलं दिने।
चर्य्या मत्पुण्यपापाभ्यां पतितः सुखदुःखयोः ॥ ६० ॥

བདག་ནི་སྡིག་པ་བྱེད་དེ་ལ། གྲོགས་པོ་ཡིས་ནི་སྙིང་རྗེ་མཛོད།
རང་ཡུལ་སོང་ནས་བདག་ཚིག་གིས། དབེན་པར་བདག་གི་བུ་ལ་སྨྲོས།། 61

བདག་གི་ཁང་པའི་ཟུར་མཐའ་ན། གསེར་གྱི་སྣོད་ནི་སྦས་ནས་ཡོད།
དེ་ནི་ཕྱུང་ལ་སྡིག་པ་དག། ཡོངས་སུ་གཏོང་བའི་བྱ་བ་བསྒྲུབས།། 62

འཕགས་པ་ཀཱ་ཏྱཱ་ཡ་ན་ནི། རྟག་ཏུ་བསོད་སྙོམས་དག་གིས་མཆོད།
དེ་ནི་དུལ་བས་དེ་བརྗོད་ཚེ། དེ་ཡི་དེ་བཞིན་ཞེས་སྨྲས་སོང་།། 63

དེ་ནས་སོང་བས་མདུན་དག་ཏུ། ལྷ་ཡི་གཞལ་ཡས་ཁང་པ་གཉན།
རིན་ཅེན་པ་དྨ་འཁྲི་ཤིང་མཛེས། དགའ་ཚལ་གཉིས་པ་ལྟ་བུ་མཐོང་།། 64

དེར་ནི་ཉིན་མོ་རྩེམ་པ་ནས། ལུས་མེད་དང་འགྲོགས་ལུས་ཅན་བཞིན།
ལྷ་མོ་དག་དང་སྐྱེས་བུ་ནི། རིན་པོ་ཆེ་ཡིས་བརྒྱན་པ་མཐོང་།། 65

དེ་ཡིས་བདེ་བའི་ལོ་བྱད་ཀྱིས། དེ་བཞིན་ཉིད་དུ་དེར་གུས་བྱས།
ལམ་རིང་ཉིན་མོངས་དབུགས་སུ་ནི། བདུད་རྩིའི་རང་བཞིན་ཉིན་མོ་བཟླས།། 66

དེ་ནས་ནམ་མཁའི་གཞལ་མེད་ཁང་། ཅི་ནས་པད་ལྡན་བདག་ལྷུང་ཚེ།
སྡུག་བསྔལ་གྱིས་བཞིན་འཇིགས་རུང་གིས། སྨྱན་པའི་ཁྲེར་གྱིས་འགྲོ་བ་ཁྱབ།།
67

དེ་ནས་མཚན་བདག་ཟླ་བའི་འོད། སྐྱུག་ཅིང་ཉམས་ལྷན་ཉིད་ཀྱི་བསིལ།
འོད་ཟེར་དཀར་ལྡན་རིམ་གྱིས་ནི། སྐྱ་བོའི་ནད་པ་བཞིན་དུ་མཐོང་།། 68

तस्य मे कुरु कारुण्यं सखे कलुषकारिणः।
गत्वा स्वदेशं मत्पुत्रं ब्रूहि मद्वचसा रहः ॥ ६१ ॥

अस्ति मे गृहकोटान्ते निखातं हेमभाजनम्।
तदुद्धृत्य परित्यक्तपापवृत्ति विधीयताम् ॥ ६२ ॥

आर्यकात्यायनो नित्यं पिण्डपातेन पूज्यताम्।
इत्युक्तस्तेन विनयात् तथेत्युक्त्वा जगाम सः ॥ ६३ ॥

स ददर्श व्रजन् दिव्यविमानमपरं पुनः।
रत्नपद्मलताकान्तं द्वितीयमिव नन्दनम् ॥ ६४ ॥

तस्मिन् साङ्गमिवानङ्गं संगतं दिव्ययोषिता।
अपश्यद् वासरारम्भे पुरुषं रत्नभूषितम् ॥ ६५ ॥

तेन प्रीत्युपचारेण कृतातिथ्यस्तथैव सः।
दिनं निनाय दीर्घञ्च क्लेशमध्ये सुधामयम् ॥ ६६ ॥

अथ व्योमविमानाग्रात् पतिते पद्मिनीपतौ।
अपूर्य्यत जगद् घोरैर्दुःखैरिव तमोभरैः ॥ ६७ ॥

ततः क्षपापतिर्ज्योत्स्नां वमन्नेव रमताजड़ः।
शनकैः पाण्डुरोगीव गौरद्युतिरदृश्यत ॥ ६८ ॥

ཉིན་མོའི་སྣང་བ་ཤིན་ཏུ་གཞོན། མཚན་མོ་སྤྲིན་པོའི་བུད་མེད་ཀྱིས།
ཟློས་པའི་གྲོད་པའི་དུམ་བུ་བཞིན། རི་བོང་ཅན་ནི་སྣང་བར་གྱུར།། 69

འཇིག་རྟེན་དུས་ཀྱི་ཙན་དན་གྱིས། བྱུགས་པ་ཟླ་འོད་དག་གིས་ཁྱབ།
གཞལ་ཡས་ཁང་དང་མཐོ་རིས་ཀྱི། རི་དྭགས་མིག་ནི་ག་ཤེད་སོང་།། 70

གཞལ་ཡས་ཁང་ནས་སྐྱེས་བུ་དེ། ལྷུང་བར་གྱུར་ཅིང་སྦྲུལ་གཟུགས་ཀྱི།
རྩེ་བརྒྱ་པས་ནི་རིམ་པ་ཡིས། ལན་བདུན་དཀྲིས་ཤིང་རྣམ་པར་བཅིངས།། 71

དེ་ཡི་སྤྱི་བོར་བུ་ག་དག། དེ་ཡིས་བྲུས་ནས་ཀླད་པ་ཁྲག།
ཟ་བར་བྱེད་ཅིང་རིམ་པ་ཡིས། མགོ་བོ་དག་ནི་ཚགས་མར་བྱས།། 72

དེ་ནས་སྐྱ་རེངས་ཟེར་གྱིས་བཀབ། ཉིན་མོ་ཡི་ནི་བཞིན་བསྒོས་ཤིང་།
འཇིགས་རུང་མཐོང་བའི་ཉིན་མོངས་ལས། སྐར་མ་རྣམས་ནི་མིག་ཟུམས་ཚེ།། 73

ཡང་ནི་ལྷ་ཡི་གཞལ་ཡས་ཁང་། ལྷ་མོ་དེ་དང་གཞོན་ནུ་རེའང་།
མ་ཟད་ལུས་ཅན་ལྷ་ཡི་ནི། རྒྱན་གྱིས་བརྒྱན་པ་རབ་ཏུ་བྱུང་།། 74

ཤིན་ཏུ་མཚར་ལ་དེས་དྲིས་ཤིང་། རང་གི་སྤྱོད་པ་དེ་ཡིས་བཤད།
ནོར་ལས་བྱུང་བའི་གྲོང་གནས་བའི། གཉིས་སྐྱེས་བདག་ནི་ཡིད་ཅེས་བྱ།། 75

ཁྲིམས་མཆོས་དག་གི་ཆུང་མ་ནི། གཞོན་ནུ་ཙན་དན་དོག་པ་མ།
གཡེམ་མ་ལག་འགྲོ་བདག་གི་ནི། ཤིན་ཏུ་ཡིད་དུ་འོང་བར་གྱུར།། 76

सुकुमारे दिनालोके रात्रौ राक्षसयोषिता ।
भक्षितेऽलक्ष्यत शशी कपालदलसन्निभः ॥ ६९ ॥

व्याप्ते चन्द्रिकया लोके कालचन्दनचर्चया ।
विमानमगमत् क्वापि सा च स्वर्गमृगेक्षणा ॥ ७० ॥

विमानपतितः सोऽपि पुरुषः सर्व्वरूपया ।
शनैः सप्तभिरावर्तैः शतपद्मा विवेष्टितः ॥ ७१ ॥

सा तस्य मूर्द्धविवरं कृत्वा मस्तिष्कशोणितम् ।
आस्वादयन्ती शनकैश्चकार शुषिरं शिरः ॥ ७२ ॥

अथारुणकरच्छन्ने सोच्छ्वासवदने दिने ।
बीभत्सदर्शनक्लेशादिव मीलिततारके ॥ ७३ ॥

प्रादुरासन् पुनर्दिव्यविमानं सा च कामिनी ।
युवा स चाद्भुततनुर्दिव्याभरणभूषितः ॥ ७४ ॥

पृष्टोऽतिविस्मयात् तेन स्ववृत्तान्तं जगाद सः ।
द्विजोऽहं वासवग्रामनिवासी मनसाभिधः ॥ ७५ ॥

तरुणी प्रातिवेश्यस्य पत्नी मलयमञ्जरी ।
अभूद् मम भुजङ्गस्य स्वैरिणी वल्लभा भृशम् ॥ ७६ ॥

གྲོང་དུ་གཞན་གྱི་ཚུང་མར་དགའ། ལུག་བློ་འཁྲུགས་པ་དག་གི་བློ།
མཐར་དག་ཡུལ་གྱི་གྲོང་དུ་ནི། ངེས་པར་བྱིངས་ཞིང་བརླག་པར་གྱུར།། 77

འཕགས་པ་ཀཱ་ཏྱཱ་ཡ་ནས་བདག། འདོད་པའི་ཆོས་ཀུན་སྡིག་ཞེས་ནས།
བརྗེ་བའི་དབང་གི་སྙིང་རྗེ་ལས། སྐྱེ་བོས་དེ་བཞིན་པར་དལ་བྱས་གསུངས།། 78

གླུན་པོ་གཟུགས་དགའ་གཞན་གྱི་ནི། བྱད་མེད་ལུས་འགྲོགས་དགའ་བ་ཡིས།
ལུས་མེད་མི་ལ་ཕྱི་མ་ཞེབ། འབབ་བཞིན་བརླག་པར་མ་འགོ་ཞིག།། 79

ཀྱེ་མ་འདོད་ཆགས་ལ་ཆགས་དང་། བག་མེད་རབ་ཏུ་སྤྱོང་བ་དག།
འདོད་ལྡན་འཚོ་བ་པོ་དག་ལས། གཞན་འཛེམས་ཚུང་མར་གུས་པ་མཆོག།། 80

སྤྱང་དང་ངལ་དུབ་ཆེ་བར་འདར་བས་རྣམ་པར་འཁྲུགས་གྱུར་ཅིང་།
བྲ་རྗོད་བྱད་མེད་ཀྱིས་ནི་སོས་སྐྱུགས་སེན་མོས་ཉམས་པར་བྱེད།
གཞན་གྱི་ཚུང་མར་དགའ་བསྐྱབ་རྣམས་ཀྱི་སྐྱུ་ཟིང་བྱེད་པ་ཡིས།
ཀུན་དུ་སྨོངས་པ་དང་ནི་དགྱལ་བའང་འདོད་པ་མཆོག།། 81

དེ་སྐད་མཉེས་གཞིན་ངན་པ་ཡི། ལས་འདི་ལས་ནི་ཕྱིར་ལོག་ཁྱོད།
མི་གཙང་སྤྲིག་པའི་རིག་པ་ལ། ཁྱི་རྣམས་ཁོ་ན་དགའ་བར་འགྱུར།། 82

དེ་སྐད་དེ་ཡིས་བརྗེ་བས་བདག། བགག་ཀྱང་རྣམ་པར་མ་དག་བློ།
མ་འགགས་པ་ཡི་ཆགས་པ་ཡིས། བསྒོམས་པས་དེ་ཉིད་བདང་མ་བྱས།། 83

परदाररतेर्ग्रामे व्यग्रा मेषमतेर्मतिः ।
निमग्ना विषयग्रामे समग्रामे क्षयं गता ॥ ७७ ॥

आर्य्यकात्यायनः पापं ज्ञात्वा मां चौर्य्यकामुकम् ।
दयाविधेयः कारुण्यात् प्रोवाच विजने शनैः ॥ ७८ ॥

पराङ्गनाङ्गसंसर्गप्रीत्या रूपरतेः क्षिवम् ।
अनङ्गाग्नौ पतन्नाशं पतङ्ग इव मा गमः ॥ ७९ ॥

अहो आसक्तरतानां संपतनप्रमादिनाम् ।
कामिनां हिंसकानां च परदारादरः परम् ॥ ८० ॥

पृथु प्रवेपथु स्वापश्रमविह्वलानां
मुग्धाङ्गनामुखनिखातनखक्षतानाम् ।
संमोहने परवधूविहितस्पृहाणां
रोमाञ्चकारिणीपरं नरके च कामः ॥ ८१ ॥

तस्मादस्मान्निवर्त्तस्व वत्स कुत्सितकर्म्मणः ।
जायते पातकं स्पर्शे शुनामेवाशुचौ रतिः ॥ ८२ ॥

इत्यहं कृपया तेन निषिद्धोऽप्यविशुद्धधीः ।
अनिरुद्धेन रागेण बद्धस्तमेव नात्यजम् ॥ ८३ ॥

དེ་ནས་བདག་གི་མ་གཏང་བ། མཁྲིན་ནས་ཀུ་ཎཱ་ཡ་ནས་ནི།
ཉིན་མོ་སྤྱོད་ལ་ཕན་བརྩོན་པས། བདག་ལ་ཚུལ་ཁྲིམས་བླང་བ་གནང་།། 84

ཚུལ་ཁྲིམས་ཡང་དག་བླངས་ལས་ཉིན། གཞན་གྱི་སྤྱད་མེད་བགྲོད་ལས་མཚན།
བསོད་ནམས་ཕྱིག་ལམ་བསྐྱེད་ནས་ནི། བདེ་སྡུག་རང་བཞིན་དེ་བདག་གནས།།
85

ནོར་ལས་བྱུང་བའི་གྲོང་དུ་ཁྲིད། སོང་ནས་བདག་གི་བུ་ལ་སྨྲོས།
མེ་ཡི་གནས་ན་བདག་གིས་ནི། གསེར་དག་སྦྲས་ཏེ་བཞག་ནས་ཡོད།། 86

དེ་བྱུང་འཚོ་བའི་བྲོ་བ་དང་། ཀུ་ཎཱ་ཡ་ན་དེ་ཡང་མཆོད།
དེ་ཡིས་གུས་པས་དེ་སྐད་བརྗོད། དེ་ནས་གྲོ་གཞིན་བྲེ་བ་སོང་།། 87

དེ་ཡིས་མདུན་དུ་ནོར་བུ་ཡི། གཞལ་མེད་ཁང་གནས་ལྷ་མོ་མཐོང་།
མཛེས་སྡུག་འོ་མའི་རྒྱ་མཚོ་ལས། ངལ་དུབ་མེད་བསྐྱུན་དཔལ་མོ་བཞིན།། 88

དེ་ཡི་གཞལ་ཡས་ཁང་པ་ཡི། ཀྲང་པ་བཞི་ལ་ཡི་དྭགས་བཞི།
བདགས་པ་ལྟ་ན་མི་སྡུག་ཅིང་། ཚ་རྒྱུས་ལྡན་པ་དེ་ཡིས་མཐོང་།། 89

དེས་ཀྱང་དེ་ནི་རབ་ཞེས་ནས། མཛའ་བའི་ཚིག་གིས་ཡང་དག་བཤད།
ལྷ་ལ་འོས་པའི་བཏུང་བ་དང་། རོ་ལྡན་བཟའ་བ་དེ་ལ་བྱིན།། 90

ཟ་ཆེ་ཡི་དྭགས་རྣམས་ཀྱི་བཟས། སྙིང་རྗེ་རྗེ་ཞིང་རིང་ནས་བསྐྱངས།
དེ་ཡི་བརྩེ་བས་དེ་རྣམས་ལ། བྱ་རོག་ལ་བཞིན་གཟན་ཚང་བྱིན།། 91

विज्ञाय मामविरतं ततः कात्यायनो ददौ ।
मह्यं शीलसमादानं दिनचर्य्याहितोद्यतः ॥ ८४ ॥

दिनशीलसमादानात् परस्त्रीगमनाद् निशि ।
इयम्मे पुण्यपापोत्था सुखदुःखमयी स्थितिः ॥ ८५ ॥

गतेन वासवग्रामं वाच्यः पुत्रो मम त्वया ।
सुवर्णमग्निशालायामस्ति गूढं धृतं मया ॥ ८६ ॥

वृत्तिः कार्य्या तदुद्धृत्य पूज्यः कात्यायनश्च सः ।
प्रणयादिति तेनोक्तः श्रोणकोटिर्ययौ ततः ॥ ८७ ॥

सोऽपश्यद् दिव्यललनामग्रमणिविमानगाम् ।
लक्ष्मीं लावण्यदुग्धाब्धेरनायासोद्गतामिव ॥ ८८ ॥

तस्य विमानपादेषु चतुर्षु स्नायुसंयुतम् ।
स ददर्शातिदुर्दर्शं बद्धप्रेतचतुष्टयम् ॥ ८९ ॥

सापि तं प्रत्यभिज्ञाय सम्भाष्य स्निग्धया गिरा ।
सुरोचितं ददौ तस्मै रसवत् पानभोजनम् ॥ ९० ॥

भुञ्जानसंज्ञया दूरात् प्रेतैर्दैन्येन याचितः ।
स ददौ कृपया तेभ्यः काकेभ्य इव पिण्डकाः ॥ ९१ ॥

གཅིག་གི་གཟན་ཆང་ཕྱིབ་མར་གྱུར། གཞན་གྱི་ལྷུགས་ཀྱི་ཐོ་ལུམ་དང་།
གསུམ་པ་ཡི་ནི་རང་ཤ་ཉིད། བཞི་པའི་ཁྲག་དང་རྣག་ཉིད་གྱུར།། 92

དེ་མཐོང་དེ་དག་སྡུག་བསྔལ་གྱི། སྨྲེད་པས་སྙིང་རྗེ་ལྡན་གྱུར་དེས།
བཞིན་གྱི་པདྨ་མཛེས་པ་དག། མཛེས་བྲལ་བྱས་པ་དེ་ལ་དྲིས།། 93

དེ་ཡིས་རྨད་བྱུང་དེ་དྲིས་པས། རི་དྭགས་མིག་ཅན་དེ་ཡིས་སྨྲས།
གྲོ་བཞིན་བྲེ་ན་འདི་དག་ལ། བྲིན་པས་ཚིམས་པའི་དོན་མི་འགྱུར།། 94

ནོར་ལས་བྱུང་བའི་གྲོང་གནས་པ། བྲམ་ཟེ་དགའ་བ་ཞེས་པ་ནི།
དང་པོ་ནི་ཁང་པ་ལ་བརྟེན་འདིའི། ཆུང་མ་རབ་དགའ་ཞེས་པ་བདག།། 95

གཉིས་པའི་ཁྱང་པ་ལ་བདགས་པ། བུ་ནི་གཙྷ་མེད་ཅེས་པ་ཡིན།
ཁྱང་པ་གཞན་ལ་བདགས་འདི་དག། བདག་གི་འབང་མོ་མནའ་མ་ཡིན།། 96

རྒྱུ་སྐར་སྨྲོར་བའི་མཆོད་པ་ལ། ཟས་ཀྱི་ཆེ་སྨྲོར་བདག་གི་སྦྱོན།
ལེགས་པར་བྱས་ཚེ་བདག་ཁྱིམ་དུ། འཕགས་པ་ཀུཎྜ་ཡ་ན་བྱོན།། 97

བདག་སེམས་རབ་ཏུ་དང་ལྡན་པས། བསོད་སྙོམས་ཀྱིས་ནི་དེ་ལ་མཆོད།
མཛེས་པས་ཕྱོགས་རྣམས་དྲིས་མེད་ཀྱིས། རྗེས་སུ་བཟུང་བ་མཛད་བཞིན་གཤེགས།། 98

དེ་ནས་བདག་གི་བདག་པོ་འདི། ཁྲུས་བྱས་མགྱོགས་པར་ཡང་དག་འོངས།
རབ་ཏུ་དགའ་སྣད་བདག་གིས་སྨྲས། བསོད་སྙོམས་ཕུལ་བ་དེ་ཐོས་ནས།། 99

पिण्डो वृषत्वमेकस्य प्रयातोऽन्यस्य लोहताम् ।
स्वमांसत्वं तृतीयस्य चतुर्थस्य प्रपूयताम् ॥ ९२ ॥

विलोक्य तत् कृपाविष्टः स तेषां कष्टचेष्टया ।
पप्रच्छ तद् मुखच्छायाविच्छायीकृतपङ्कजाम् ॥ ९३ ॥

पृष्टा तदद्भुतं तेन उवाच सा मृगेक्षणा ।
न श्रोणकोटिकर्णेषां दत्तं भवति तृप्तये ॥ ९४ ॥

ब्राह्मणस्यास्य भार्य्याहं पूर्व्वपादावलम्बिनः ।
नन्दनाम्नः सुनन्दाख्या वासवग्रामवासिनः ॥ ९५ ॥

द्वितीयपादसंसक्तः पुत्रो मे निष्ठुराभिधः ।
पश्चात्पादावलम्बिन्यौ दासी चेयं स्नुषा च मे ॥ ९६ ॥

नक्षत्रयोगपूजायां पुरा सज्जीकृते मया ।
भोक्ष्योपहारे मे गेहमार्य्यकात्यायनोऽविशत् ॥ ९७ ॥

मया चित्तप्रसादिन्या पिण्डपातेन सोऽर्च्चितः ।
कुर्व्वन्नेव ययौ कान्त्या वैमल्यानुग्रहं दिशाम् ॥ ९८ ॥

ततः स्नात्वा समायातस्तूर्णं पतिरयम्मम ।
तत्पिण्डपातमाकर्ण्य प्रमोदाय मयोदितम् ॥ ९९ ॥

ཁྲོ་ལས་བདག་སྐྱུས་མཆོད་འོས་རྣམས། མཆོད་པ་མེད་པར་དགེ་སློང་ནི།
སྐྲ་མེད་གཡོ་ལྡན་གྲོ་ཞུབ་འོས། ཁྱོད་ཀྱིས་ཅི་ཡི་ཕྱིར་དུ་མཆོད།། 100

རྨོངས་ཡས་འདི་ཡིས་དེ་བརྗོད་ཚེ། དེ་བཞིན་བྲུས་ཀྱང་བདག་ལ་སྨྲས།
ཚོས་པ་ཐོག་མར་ཟ་འོས་དེ། ལྕགས་ཀྱི་ཐོ་ལུམ་ཅིས་མི་ཟ།། 101

བདག་གི་མནའ་མ་འདི་རྟག་ཏུ། སྔོན་ལ་ཟས་ལ་ལོངས་སྤྱོད་ཅིང་།
བདག་གིས་བརྗོད་ལ་མནའ་བྱེད་པ། རང་ཤ་ཟ་ཞེས་སྨྲ་བ་མོ།། 102

འབང་མོ་འདི་ཡང་ཟས་དག་ལ། ཀུ་ཞིང་ཉམས་པ་དག་ཏུ་བྱེད།
སྨད་ཆེ་བདེན་པར་བྱེད་པ་ནི། རྣག་ཁྲག་ཟ་ཞེས་སྨྲ་བྱེད་ཡིན།། 103

དེ་དག་ཡི་དྭགས་འདི་དག་གྱུར། རང་གི་ངག་དང་མཚུངས་པ་ཟ།
བདག་ནི་འཕགས་པའི་བཀའ་དྲིན་གྱིས། ལྷ་ཡི་ལོངས་སྤྱོད་ཉེ་བར་སྤྱོད།། 104

ཁྱོད་ཀྱིས་རང་ཡུལ་ཕྱིན་ནས་ནི། བདག་གི་བུ་མོ་དག་ལ་སྨྲོས།
ཁྱོད་ཀྱི་ཕ་ཡི་ཁང་པ་ན། གསེར་གྱི་གཏེར་ནི་རྣམ་བཞི་ཡོད།། 105

དེ་དག་ཐོན་ལ་ཅི་རིགས་པར། རང་གི་སྐྱེ་བ་གནས་པ་བྱོས།
ཕ་དང་མིང་པོ་འི་མིང་དག་གིས། ཀཱ་ཏྱཱ་ཡ་ན་རྟག་ཏུ་མཆོད།། 106

གྲོ་བཞིན་བྱེ་བའི་རྣ་བ་ཁྱོད། རང་ཡུལ་དུ་སོང་ངལ་བ་ཐོང་།
ཁྱོད་ནི་རང་ཡུལ་ནས་འཐོན་ནས། ལོ་ནི་བཅུ་གཉིས་ཡོངས་སུ་རྫོགས།། 107

कोपादुवाच मां कस्माद् विशिखः श्रमणः शठः।
अपूजितेषु पूज्येषु वृषार्हः पूजितस्त्वया ॥ १०० ॥

इति मोहादनेनोक्ते पुत्रोऽप्येष जगाद माम्।
पाके पूर्व्वाशनायोग्यः स किन्नाश्नात्ययोगुड़ान् ॥ १०१ ॥

इयं स्नुषा मे सततं पूर्व्वभक्ष्यावभोगिना।
मयोक्ते शपथं चक्रे स्वमांसादनवादिनी ॥ १०२ ॥

इयं दासी च भोक्ष्याणां चौर्य्यात्तद्व्ययकारिणी।
आक्षिप्ता चाकरोत् सत्यं पूयशोणितवादिनी ॥ १०३ ॥

तत्र ते प्रेततां याताः स्ववाक्यसदृशाशनाः।
अहं त्वार्य्यप्रसादेन दिव्यभोगोपभोगिनी ॥ १०४ ॥

त्वया स्वदेशमास्तेन वक्तव्या दुहिता मम।
सन्ति हेमनिधानानि गृहे चत्वारि ते पितुः ॥ १०५ ॥

तान्युद्धृत्य यथायोगं भजस्व स्वजनिस्थितिम्।
पूजनीयः पितुर्भ्राता नाम्ना कात्यायनः सदा ॥ १०६ ॥

सः श्रोणकोटिकर्णस्त्वं गच्छ देशं त्यज श्रमम्।
वर्षा द्वादश सम्पूर्णाः स्वगृहान्निर्गतस्य ते ॥ १०७ ॥

དེ་སྐད་བརྗོད་ནས་དེ་ཡིས་ནི། ཡི་དྭགས་བཞི་པོ་ལ་བསྐོས་ཏེ།
ཉལ་བ་ཉིད་ན་ཡུད་ཙམ་གྱིས། དེ་ནི་རང་ཡུལ་ཕྱིན་པར་བྱས།། 108

དེ་ནས་འཕྲལ་ལ་རང་ཡུལ་གྱི། སྐྱིད་མོས་ཚལ་གྱི་ནགས་ལས་ལངས།
ཕ་མ་བྲལ་བའི་མྱ་ངན་གྱིས། ལོང་ལ་ཉེ་བར་གྱུར་བ་ཐོས།། 109

དགེ་སློང་གཉིས་སྐྱེས་མགྲོན་པོའི་ཚོགས། ལྷ་ཡི་གནས་རྣམས་མཆོད་བྱེད་པ།
རང་གི་ཕ་ཡི་ཁྱིམ་མཐོང་ནས། མཆོག་ཏུ་ཨ་མཚན་དགའ་དུ་གྱུར།། 110

སྐད་ཅིག་ཉིད་ཕྱིར་དངོས་པོ་ཀུན། མི་རྟག་ཉིད་དུ་ངེས་བྱས་ནས།
མཛའ་དང་ཆགས་པ་ཀུན་བཏང་སྟེ། དེར་ནི་གནས་པས་ཡང་དག་བསམས།། 111

ཀྱེ་མ་ཉིན་མཚན་མཐའ་མེད་པར། ཀུན་ཏུ་རྨོངས་པའི་གཉིད་འདི་ནི།
རྨི་ལམ་སྒྱུ་མའི་རོལ་རྩེད་ཀྱིས། རྨད་དུ་བྱུང་བའི་རྣམ་འཕྲུལ་བྱེད།། 112

སྐྱེ་བའི་ལམ་རབ་སྟེར་བའི་མ། ས་བོན་འདེབས་ནུས་བྱ་འདྲའི་ཕ།
མགྲོན་པོའི་མཆོད་དང་སྟོན་ལྟའི་ལུས། འདི་ལ་ངེས་པའི་ཚོགས་ནི་གང་།། 113

དཔལ་འབྱོར་འཁོར་བའི་སྤྲིན་རྡུལ་འཁྲུམས་པར་ཡོངས་འདྲིས་གསེར་གྱི་སྙིད་
པའི་འོད།
རི་བ་ཕྱོགས་རྣམས་རྫོགས་པར་འཆིང་བའི་སྐྲོག་བཞིན་རིག་པ་མེད་ཅིང་རབ་ཏུ་
གཡོ།
ལུས་ནི་གནོད་པ་ཀུན་དང་འཇིག་དང་འཇིགས་པའི་ཚོགས་དང་རྒ་དང་ན་བ་དང་།
སྡུག་བསྔལ་དག་གི་ཡོངས་སུ་འགྲོ་སྟེ་དེ་ལྟ་ན་ཡང་ལུས་འཛིན་ཡིད་མི་འབྱུང་།། 114

इत्युक्त्वा तं समादिश्य तस्य प्रेतचतुष्टयम् ।
सुप्तस्यैव मुहूर्त्तेन स्वदेशाप्तिमकारयत् ॥ १०८ ॥

उत्थितः सोऽपि सहसा स्वदेशोद्यानकाननात् ।
वियोगशोकात्पितरौ शुश्रावान्ध्यमुपागतौ ॥ १०९ ॥

भिक्षुद्विजातिथिगणे पूज्यमाने सुरालये ।
स्वकं पितृगृहं दृष्ट्वा परं विस्मयमाययौ ॥ ११० ॥

निश्चित्य सर्व्वं भावानां क्षणिकत्वादनित्यताम् ।
स्नेहरागं समुत्सृज्य तत्रस्थः समचिन्तयत् ॥ १११ ॥

अहो संमोहनिद्रेयं निरन्तरो दिवानिशम् ।
स्वप्नमायाविलसितैः करोत्यद्भुतविभ्रमम् ॥ ११२ ॥

जन्मवर्त्मप्रदा माता पिता बीजवपत्खगः ।
पान्थपूजासनं कायः कोऽयं नियमसङ्गमः ॥ ११३ ॥

श्रियः संसाराभ्रभ्रमपरिचिताः काञ्चनरुचा
आशा दिग्निबन्धास्ताड़ित इव निर्लेपचपलाः ।
वपुः सर्व्वापायैः क्षयभयनिकायैः परिगतं
जरारोगोद्वेगैस्तदपि न विरागस्तनुभृताम् ॥ ११४ ॥

དཔལ་འབྱོར་མཐར་དག་ཤིས་གྱུར་ཅིག། ཐལ་མོ་འདི་སྦྱར་ནང་ནི་ལ།
བྲུད་མེད་རྣམས་ལ་ཡོངས་བཟོད་མཛོད། བདག་ནི་རབ་བྱུང་ཁོ་ན་དགའ།། 115

འདི་བསམ་དེ་ཡིས་པ་མ་དག། ཡང་དག་དབུགས་ཕྱུང་མིག་དག་ཐོབ།
ཆོས་ལམ་དག་ཅིང་ཞི་བ་ཡི། གནས་ལ་བློ་ནི་བཀོད་པར་གྱུར།། 116

དོན་མཐུན་ཉམས་གྱུར་ཡུན་རིང་ན། འོང་ཞིང་རིད་ཀྱང་སྙིང་སྟོབས་འབྱོར།
མ་ཉམས་པས་ན་རང་མི་ཡང། བརྩེ་བའི་གནས་ཉིད་དུ་མ་གྱུར།། 117

འཁོར་བའི་ཉོན་མོངས་ཀྱིས་རྣམ་འཁྲུགས། དེ་དག་གལ་ཏེ་བརྩེ་བ་ན།
དམ་པ་སུ་ལ་རྗེས་མི་བརྩེ། དེ་དག་ཕུན་ཚོགས་ཐོབ་མི་འདོད།། 118

ཕྱུགས་སྐྱོང་བྲམ་ཟེ་བྲུད་མེད་ལ། གསེར་ཐོབ་མངོན་སུམ་མཚན་ཉིད་ཅན།
འཕྲིན་སོགས་ཇི་ལྟར་བརྗོད་པ་བཞིན། དེ་དག་རྣམས་ལ་བསླབས་བྱས་ཏེ།། 119

ཀ་དྲུ་ཡ་ན་དང་ཕྲད་ནས། ཞི་བ་དེ་ཡིས་རབ་བྱུང་བླངས།
བློན་པོ་རྣམས་ཀྱི་སྲིད་ལུགས་རྒྱུ། དེ་ནི་བློ་ལྡན་རབ་དང་རྒྱུ།། 120

དེ་ནས་དེ་ཡི་རྒྱུན་ཞུགས་ཀྱི། འབྲས་བུ་དྲི་མ་མེད་ཐོབ་ཅིང་།
ལན་ཅིག་ཕྱིར་འོང་ཕྱིར་མི་འོང་། འབྲས་དང་དེ་ཞིན་དགྲ་བཅོམ་འབྲས།། 121

ཁམས་གསུམ་དག་ལ་འདོད་ཆགས་བྲལ། གསེར་དང་བོང་བ་རྗེ་བར་མཚུངས།
ནམ་མཁའ་ལག་མཐིལ་མཚུངས་པ་དང་། རལ་གྲི་ཙན་དན་མཚུངས་པར་གྱུར།།
122

श्रिये स्वस्तिसमाप्तये स्वजनस्यायमञ्जलिः।
दाक्षिण्यैः क्षमतं स्त्रीषु प्रव्रज्यैव प्रिया मम॥ ११५॥

इति ध्यात्वा स पितरौ समाश्वास्याप्तलोचनौ।
बुद्धो धर्म्मपथे शुद्धे शमधाम्नि न्यवेशयत्॥ ११६॥

सार्थभ्रष्टश्चिरायातः क्लेशोऽपि स्वजनस्य च।
अलुप्तसत्वविभवान्नक्लपास्पदतां ययौ॥ ११७॥

अनुकम्पस्व यद्येतं संसारक्लेशविह्वलम्।
सतः कस्यानुकम्प्यास्ते सम्पत्सम्पर्कनिस्पृहाः॥ ११८॥

पशुपालकविप्रस्त्री संदेशादि यथोदितम्।
निगद्य तेभ्यः कनकप्राप्तिप्रत्ययलक्षणम्॥ ११९॥

शान्तः कात्यायनं प्राप्य प्रव्रज्यां स समाददे।
मुग्धानां यद् विषादाय तत् प्रसादाय धीमताम्॥ १२०॥

स समासाद्य विशदं स्रोतप्राप्तिफलं ततः।
सकृदागाम्यनागामि फलमर्हत्फलं तथा॥ १२१॥

त्रैधातुको वीतरागः समलोष्टाश्मकाञ्चनः।
आकाशपाणितुल्योऽभूदसिचन्दनयोः समः॥ १२२॥

དེ་ནས་མཉན་ཡོད་རྒྱལ་བྱེད་ཚལ། སྨིག་མའི་ནགས་ན་བཞུགས་པ་ཡི།
བཅོམ་ལྡན་རྒྱལ་བ་བལྟ་རུ་དེ། ཀཱ་ཏྱཱ་ཡ་ནའི་བཀའ་ཡི་སོང༌།། 123

ཕྱག་ནི་བྱས་ཞིང་བཅོམ་ལྡན་འདས། རང་ཉིད་དགྱེས་པས་དྲི་བ་བྱས།
དེ་ནི་བློ་བཞིན་བྱེ་བ་རྣ། དགའ་བ་རྒྱས་པས་དེ་ལ་སྨྲས།། 124

བཅོམ་ལྡན་ཆོས་ཀྱི་སྐུ་ཡིས་ནི། ཐོས་པའི་ལམ་ནས་མཐོང་བར་གྱུར།
ད་ལྟ་གཟུགས་ཀྱི་སྐུ་ཡིས་ནི། བསོད་ནམས་ཀྱིས་ནི་བདག་གི་མཐོང༌།། 125

མི་ཆུང་བསོད་ནམས་ཀྱིས་ཐོབ་བྱ། ཁྱོད་ནི་མཐོང་བའི་བདུད་རྩི་འདི།
འཐུངས་ན་ངོམས་པར་མ་གྱུར་པ། དེ་དག་མཆོག་ཏུ་བསླུས་པ་ཉིད།། 126

ཆགས་པ་མེད་ཀྱང་ཁྱོད་ཀྱི་གཟུགས། སུ་ཞིག་ཆགས་པར་མི་འགྱུར་ལགས།
བྱུགས་པ་མེད་ཀྱང་ཁྱོད་ཀྱི་སྤྱན། ཀྱི་མ་དགའ་བས་བྱུགས་པ་ལགས།། 127

ཁྱོད་ཀྱི་གདམ་དང་ཁྱོད་རྗེས་དྲན། ཁྱོད་དང་ཕྲད་པ་ཁྱོད་བསྟེན་པ།
འདི་དག་དགེ་བའི་རྩ་བ་ཡི། འབྲས་བུ་ཕུན་ཚོགས་རྒྱས་པ་ཡིན།། 128

ཞེས་པ་ཐོས་ནས་བཅོམ་ལྡན་གྱིས། རབ་ཏུ་དང་བས་དགའ་བར་བྱས།
དེས་བསྟན་ཀུན་དགའ་ར་བ་དང༌། མཉམ་པའི་གནས་ནི་དེ་ཡིས་ཐོབ།། 129

དེ་ཡི་གནས་སུ་བཅོམ་ལྡན་ཡང༌། བྱམས་པ་ཡིས་ནི་ཡང་དག་གཤེགས།
དེ་ཡི་ཆོས་ལ་ཁ་དོན་དག། སྟོན་པ་ཐོས་ནས་དེས་རབ་བསྒྲགས།། 130

श्रावस्त्यां वेणुगहने जिनं जेतवने स्थितम् ।
भगवन्तं ययौ द्रष्टुं सोऽथ कात्यायनाज्ञया ॥ १२३ ॥

प्रणिपातकृतातिथ्यः प्रीत्या भगवता स्वयम् ।
स श्रोणकोटिकर्णोऽथ बभाषे हर्षनिर्भरः ॥ १२४ ॥

भगवान् धर्म्मकायेन दृष्टो संश्रोचवर्त्मनि ।
अधुना रूपकायेन पुण्यैरालोक्योऽसि मया ॥ १२५ ॥

अनल्पसुकृतप्राप्यमिदं तद् दर्शनामृतम् ।
पीत्वा न तृप्तिमायान्ति वञ्चिता एव ते परम् ॥ १२६ ॥

अस्पृहस्यापि ते मूर्त्तिः कुरुते कस्य न स्पृहाम् ।
निर्लेपस्यापि ते दृष्टिरहो हर्षेण लिम्पति ॥ १२७ ॥

त्वत्कथा त्वदनुध्यानं त्वत्प्राप्तिस्त्वन्निषेवणम् ।
एताः कुशलमूलानां स्फीताः फलसमृद्धयः ॥ १२८ ॥

इति श्रुत्वा भगवता प्रसादेनातिनन्दितः ।
तदादिष्टं समारामं स विहारमवाप्तवान् ॥ १२९ ॥

तस्यास्पदं समभ्येत्य प्रणयात् भगवानपि ।
श्रुत्वास्य मधुरं धर्म्मं स्वाध्यायं प्रशशंस सः ॥ १३० ॥

གྲོ་བཞིན་བྲེ་བ་ཟླ་བ་ཡི། རབ་ཞི་ཕྲུན་ཚོགས་དེ་མཐོང་ནས།
སྨོན་གྱི་སྦྱོར་ཚུལ་དགེ་སློང་གིས། དྲི་ཤིང་བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས།། 131

བ་ར་ན་སིར་རྫོགས་པ་ཡི། སངས་རྒྱས་འོད་སྲུངས་ཞེས་པ་སྨོན།
མཛད་པ་རྫོགས་ནས་བྱུང་འདས་ཀྱི། དབྱིངས་སུ་ཡོངས་སུ་མྱ་ངན་འདས།། 132

མི་བདག་ཀྲི་ཀི་ཞེས་པས་དེའི། དེ་མཆོད་རྟེན་རིན་ཅན་རྣམ་པ་ཀྱིས་བྱས།
དེ་ཡི་བསོད་ནམས་ཚོགས་རྣམས་ནི། རང་ཉིད་མཐོ་རིས་བརྗོད་བཞིན་འཕགས།། 133

དེར་ནི་ནོར་བདག་བཟའ་བྱས་ནས། ཞིག་རལ་གསོ་བ་ལ་བཞུགས་པ།
དེ་ནས་དེ་སྲས་རྒྱལ་སྲིད་ཐོབ། ཆགས་དང་སྨོངས་པས་བྲིན་མ་གྱུར།། 134

དེ་ནས་བྱང་ཕྱོགས་ནས་འོངས་པའི། དེད་དཔོན་ནོར་སྦྱིན་ཞེས་པ་ཡིས།
དེ་ཡི་ཆེད་དུ་ཟླ་བའི་རྒྱན། ས་ཡི་རིན་དུ་རབ་ཏུ་ཕུལ།། 135

དུས་གཞན་ཞི་བར་འོངས་ནས་ཀྱང་། ནོར་ཆེན་གཞན་ཡང་ཕུལ་བྱས་ནས།
ཡང་དག་བསོད་ནམས་ལྡན་པར་བདག། གྱུར་ཅེས་དེ་ཡིས་སྨོན་ལམ་བཏབ།། 136

དེ་ནི་གྲོ་བཞིན་བྲེ་ཟླ་འདི། བསོད་ནམས་དག་གི་གནས་ཆེན་ཐོབ།
དེ་ལྷ་ཁོ་ནའི་ཟླ་བའི་རྒྱན། མཚན་ཉིད་དག་དང་ལྡན་པར་གྱུར།། 137

གང་ཕྱིར་འགྲོ་བའི་དུས་སུ་འདིས། མ་ཡི་ཚིག་ནི་རྟུབ་མོ་དག།
ཐོས་པར་བྱས་ནས་དེ་ཡིས་ནི། ངལ་དུབ་ཆེན་པོ་དག་ཏུ་གྱུར།། 138

तां श्रोणकोटिकर्णस्य दृष्ट्वा प्रशमसम्पदम् ।
भिक्षुभिर्भगवान् पृष्टः पूर्ववृत्तमभाषत ॥ १३१ ॥

वाराणस्यां पुरा सम्यक्सम्बुद्धे काश्यपाभिधे ।
निर्वाणधातौ निःशेषकार्य्यत्वात् परिनिर्वृते ॥ १३२ ॥

क्रिकिनामन्टपश्चैत्यं तस्य रत्नैरकारयत् ।
स्वयं तत्पुण्यसम्भारं स्वर्गं वक्तुमिवोन्नतम् ॥ १३३ ॥

शीर्णस्थापितसंस्कारे तस्मिन् संन्नाष्टतन्धनम् ।
तत्पुत्रः प्राप्तराज्योऽथ न ददौ लोभमोहितः ॥ १३४ ॥

अथोत्तरापथायातः सार्थवाहोऽर्थदाभिधः ।
प्रददौ पृथिवीमूल्यं तत्कृते कर्णभूषणम् ॥ १३५ ॥

कालान्तरोपगतोऽपि दत्वा चान्यद्धनं महत् ।
प्रणिधानं स कृतवान् भूयाः संपुण्यवानिति ॥ १३६ ॥

स श्रोणकोटिकर्णोऽयं पुण्यैः प्राप्तपदं महत् ।
तद्विधेनैव संयातः कर्णभूषणलक्षणः ॥ १३७ ॥

प्रस्थानसमये माता श्राविता परुषं वचः ।
यस्मादनेन तेनास्य बभूवास्य श्रमो महान् ॥ १३८ ॥

དག་པ་ཡོན་ཏན་དམ་པ་ཡིས། ལས་ཀྱི་ནུས་ཆེན་དབུས་སུ་ནི།
ནག་པོ་འི་ལས་ཀྱི་ཕྲ་ཆུང་ཡང་། གསལ་བ་ཉིད་དུ་ངེས་པར་ཟིན།། 139

ལིགས་བྱས་གྲོགས་ལྡན་སྙིང་སྟོབས་སྒྲོ་བ་དག་དང་ཁྲིམ་སྤྱངས་གྲོགས་ཀྱི།
དགའ་བ་དང་།
མི་བཟད་སྒྲོལ་བའི་བརྩོན་འགྲུས་ཟམ་སྟེགས་དག་དང་འཕོངས་པ་སྐྱོབ་པའི་
བརྩེ་བ་དང་།
མཇུག་ཏུ་ཡང་ནི་ཞི་བ་ཡོངས་སུ་འདྲིས་པར་གྱུར་ཅིང་རབ་དང་རང་བཞིན་བློ།
བསོད་ནམས་ཐོབ་པའི་ཡོངས་སུ་བསྒོ་བ་འདི་ནི་འབྲས་བུ་རྒྱས་པར་གནས་
པར་ཡིན།། 140

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གྲོ་བཞིན་བྲེ་བ་ནའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱ་དགུ་པའོ།།

मध्येषु महतः शुक्लगुणसत्कर्म्मवाससः ।
कृष्णकर्म्मलवांशोऽपि स्फुट एवावधार्य्यते ॥ १३९ ॥

सुकृतसचिवः सत्वोत्साहः प्रवाससखी धृतिः
विषमतरणे वीर्य्यं सेतुर्विपद्यधिका कृपा ।
शमपरिचिता पर्य्यन्ते च प्रसादमयी मतिः
परिणतिरियं पुण्यप्राप्तेः स्फुरत्फलशालिनी ॥ १४० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
श्रोणकोटिकर्णावदानं नामोनविंशतितमः पल्लवः ।

ཡལ་འདབ་སྟེ་ཉི་ཤུ་པ།

ཨ་སྲ་སྐྱོང་མའི་རྟོགས་པ་བརྗོད་པ།

ལྷོ་གཉིས་འགྲོགས་ལ་འཚོ་བ་ཇི་ལྟར་ཡོད།
གཙོ་བོ་མང་ལ་བདེ་བ་ཇི་ལྟར་ཡོད།།
ལས་ཀྱིས་བཅིངས་ལ་རང་སྟོབས་ཇི་ལྟར་ཡོད།
ཤེས་རབ་མཆོག་ལ་གནོད་པ་ཇི་ལྟར་ཡོད།། 1

ལུས་འཕགས་ཀྱི་ནི་མི་ཐི་ལར། མི་བདག་ཆུ་ཡི་སེམས་དཔའི་མིང་།
གང་གི་དབྱུང་བ་ལག་འགྲོ་ཡི། ས་ཡི་ཁུར་གྱི་ངལ་གསོར་གྱུར།། 2

ཉེས་མེད་ཕུན་སུམ་ཚོགས་པ་དེའི། བློན་ཆེན་དུམ་བུ་ཞེས་པ་ནི།
ཡོན་ཏན་དྲུག་པོ་མ་ལུས་པ། ཡོངས་ཤེས་ཕུར་བུ་ལྟ་བུ་བྱུང་།། 3

ལུགས་ཤེས་གསུས་ལས་དེ་ཡི་ནོར། མི་ཡི་བདག་པོས་བལྟས་གྱུར་ཅིང་།
བྲ་བའི་དབང་ལས་སྐྱེ་བོ་ཀུན། རྟག་ཏུ་བཞིན་ལ་རབ་ལྟར་གྱུར།། 4

ཆུ་དང་སྐྱེ་བོ་བཟློག་མེད་ཀྱང་། སོང་བའི་རྗེས་སུ་འགྲོ་བ་ཡི།
སྤྲོལ་དུ་རབ་ཏུ་འབབ་པ་ཡིས། སྤྲིད་པ་དག་ནི་རྣམ་པར་འཕེལ།། 5

དེ་ཡི་རང་བཞིན་སྐྱེ་བོ་ཀུན། མཐོང་ནས་ཕྲག་དོག་གིས་བཀྲལ་བའི།
བློན་པོ་འི་ཚོགས་ཀྱིས་དེ་ཡི་ནི། རྣམ་པར་ལྷུང་བ་རབ་ཏུ་བསམས།། 6

विंशः पल्लवः ।

आम्रपाल्यवदानम् ।

द्विजिह्वसङ्गे कथमस्ति वृत्ति-
रनेकमुख्ये कथमस्ति सौख्यम् ।
कर्म्मान्तबन्धेऽस्ति कथं स्वशक्तिः
प्रज्ञाप्रकर्षे कथमस्त्यपायः ॥ १ ॥

मिथिलायां विदेहेषु जलसत्वाभिधो नृपः ।
अभूद् भुजभुजङ्गस्य विश्रान्तपृथिवीभरः ॥ २ ॥

खण्डोनाम महामात्यस्तस्याखण्डलसम्पदः ।
बभूवाशेषषड्गुण्यपरिज्ञानबृहस्पतिः ॥ ३ ॥

नीतिज्ञगौरवात् तस्य नृपे व्यक्तं न लौकिनि ।
सदाभवत् मुखप्रेक्षी सर्व्वः कार्य्यवशाज्जनः ॥ ४ ॥

गतानुगतिकत्वेन प्रवाहप्रणयी भरः ।
वर्द्धते वार्य्यमाणस्य स्वजनस्य जलस्य च ॥ ५ ॥

सर्व्वं तन्मयमालोक्य जनं मात्सर्य्यमूर्च्छिताः ।
मन्त्रिणः संहतास्तस्य विनिपातमचिन्तयन् ॥ ६ ॥

འཕྲེད་མཁས་དེ་དག་རྒྱལ་པོ་ཡི། གནས་སུ་རབ་ཞུགས་དེ་ཡིས་ནི།
ཛེ་བོ་འི་སྦྱིབས་དེ་ཡང་ཡང་དུ། དོགས་པའི་གནས་སུ་བྱས་ནས་ཟ་ཤད།། 7

དེ་དག་ཚོག་གིས་དོགས་པ་ཡིས། རྒྱལ་པོ་དེ་ལས་ཕྱིར་ཕྱོགས་གྱུར།
ཁྱད་མེད་བྲིས་པ་ས་སྐྱོང་ནི། མཆོག་ཏུ་བསྔགས་པ་ལ་ཡིད་ཆེས།། 8

དོགས་པ་མི་འོས་ལ་ཡང་དོགས། དོགས་སྐྱོན་ལའང་དོགས་པ་མེད།
བྱེ་བྲག་མི་ཤེས་གཡོ་བ་ཡིས། ས་སྐྱོང་བྱ་རོག་དོགས་པ་ཅན།། 9

ཛེ་བོ་ཆགས་བྲལ་རྟགས་རྣམས་ནི། རྣམ་གཟིགས་བློན་པོ་འི་གང་ཟག་ནི།
རང་སྲུས་ས་འཚོ་སེང་གེ་ཞེས། བྱ་ལ་དོགས་བཅས་དལ་བྱུས་སྤྲུས།། 10

གཡོ་ཅན་ཕྲ་མས་མི་ཡི་བདག། བདག་ལ་ཡིད་བརྟན་བྲལ་བར་བྱས།
སྙིང་ནི་རྣམ་པར་ཕྱེ་བསྟན་ཀྱང་། གཙུགས་པ་ཉིད་དུ་འགྲོ་མ་ཡིན།། 11

ཆགས་དང་བྲལ་བའི་ཛེ་བོ་ནི། ཀུན་བརྗོད་མཐོང་ཐོས་བོར་བ་དེ།
བདག་ལ་ལྟོད་པ་ཉིད་གྱུར་དེ། ཤན་པོ་ཡི་ནི་ལུས་པོ་བཞིན།། 12

ཕྲ་མས་ཕ་དང་རབ་བསྐྱེད་པའི། མཛའ་བ་འདུམ་པར་ནི་འགྱུར་དེ།
རྡོ་ཡིས་དུམ་བུར་བྱས་པ་ཡི། ནོར་བུ་སྦྱར་ཡང་འབྱར་བ་ཡིན།། 13

ལྷུ་གཉིས་གྲུ་གྲུས་ནོན་པ་ཡིས། ཛེ་བོ་ཅན་དན་ཀང་འཕྱང་ནི།
དོན་བྱ་བྱེད་ཅིང་ཡོན་ཏན་དང་། ལྡན་ཡང་བསྟེན་བྱ་ཉིད་མི་འགྱུར།། 14

ते प्रविश्याश्रमं राज्ञस्तान्तस्य प्रभविष्णुताम् ।
मुहुः शङ्कास्पदं कृत्वा शशंसु र्भेदकोविदाः ॥ ७ ॥

तद्गिरा शङ्कितो राजा तस्य वैमुख्यमाययौ ।
अबलाबालभूपाला वर्णनप्रत्ययाः परम् ॥ ८ ॥

अशङ्क्यादपि शङ्कन्ते शङ्कादोषेऽप्यशङ्किताः ।
अविशेषज्ञचपलभूपालाः काकशङ्किनः ॥ ९ ॥

प्रभोर्विरक्तिलिङ्गानि विलोक्यामात्यपुङ्गवः ।
स्वसुतौ गोपसिंहाख्यौ सशङ्कः स्वैरमब्रवीत् ॥ १० ॥

धूर्त्तैर्म्मे वीतविश्वासः पिशुनैर्न्नृपतिः कृतः ।
प्रत्ययं नैति हृदये विदार्य्यापि प्रदर्शते ॥ ११ ॥

विरक्तः स्थगितालापदर्शनश्रवणः प्रभुः ।
सेफ इव वृद्धस्य यातः शिथिलतां मम* ॥ १२ ॥

पिशुनोद्भूतभेदस्य प्रेम्णः सन्धिर्न विद्यते ।
न मणिः श्लिष्यति पुनः पाषाणशकलीकृतः ॥ १३ ॥

द्विजिह्वकुटिलाक्रान्तः प्रभुश्चन्दनपादपः ।
न यात्यर्थक्रियाकारी गुणवानपि सेव्यताम् ॥ १४ ॥

---

* The line is too short by one syllable.

མི་བདག་གཉེར་ནི་དོན་གཉེར་པ། འཛིགས་རུང་སྲུང་བའི་དུག་འབེབས་པའི།
ལྷེ་གཉིས་པས་བཅོམ་རྣམས་འཁྲུགས་པའི། མི་ནི་ཛི་ལྟར་དགེ་བ་བསྟན།། 15

དེ་སྐད་ཡང་དག་བདང་ནས་འགྲོ། ས་བདག་སྐྱང་བའི་སྐྱོན་གྱིས་ནི།
གང་ན་དོགས་པ་ཟུག་རྡུ་ཡི། རང་བཞིན་གྱིས་འཚོ་ཡུལ་དེས་ཅི།། 16

མཁས་ཤིང་རྟུལ་ཕོད་བསྲུང་བར་བཟོད། ནོར་མང་ལེགས་པར་ཡང་དག་འགྲོགས།
དམ་པ་གནས་པའི་ཡངས་པ་ཅན། གནས་དེར་བདག་ནི་འདོད་པར་གྱུར།། 17

དེ་སྐད་སྨྲས་ཚེ་བུ་དག་ཀྱང་། དེ་བཞིན་ཞེས་སྨྲས་རྗེས་འབྲང་བཅས།
སྐྱིད་མོས་ཚུལ་དུ་འགྲོ་ལ་གྱིས། འཁོར་བཅས་དེ་ནི་རབ་ཏུ་སོང་།། 18

འགྲོ་བར་ཤེས་ནས་མི་ཡི་བདག། བཀློག་ལ་ཡང་དག་རབ་བརྩོན་པའི།
འབད་པ་ཡིས་ཀྱང་མ་ཐོབ་སྟེ། རབ་ཏུ་སྤྲངས་པ་སླར་ཐོབ་མིན།། 19

སྨོངས་པ་དམ་པའི་ལེགས་བྱས་སྨོད། སྐད་ཅིག་དེ་རྣམས་བླུན་པར་བྱས།
དེ་ནི་ཀུན་ཏུ་སྨྲ་ཞིག་གིས། དོན་གཉེར་དོན་བྱས་མིན་པར་གྱུར།། 20

ཡོན་ཏན་གྱིས་བཀུག་བློ་ལྡན་བློན། འོངས་པ་ཡངས་པ་ཅན་པ་ཡིས།
གུས་པའི་སྤྱོད་པས་མཆོད་དེ་ནས། ཚོགས་ཀྱི་གཙོ་བོའི་གནས་སུ་བཞག། 21

དེ་ནས་དེ་ཡི་འབྱོར་བས་དཔལ། དེས་ཐོབ་དེ་ཡི་གཙོ་བོས་ཀྱང་།
ཚོགས་པ་ནམ་ཡང་ཚུལ་མིན་ལས། གཞན་གྱི་གནོད་པའི་སྐྱོད་མ་གྱུར།། 22

कथं नृपनिधानार्थी कुशलं भजते नरः ।
घोरद्वेषविषाविष्टद्विजिह्वाघातविह्वलः ॥ १५ ॥

तस्माद् व्रजामः संत्यज्य द्वेषदोषेण भूपतेः ।
शङ्काशल्यमये वृत्ते मेऽस्मिन् देशे स्थितेन किम् ॥ १६ ॥

दक्षा रक्षाक्षमाः शूराः प्रभूतार्थाः सुसंहताः ।
सन्तः सन्ति विशालायां वासस्तत्र ममेप्सितः ॥ १७ ॥

इति ब्रुवाणः पुत्राभ्यां तथेत्युक्तः स सानुगः ।
उद्यानगतिभानेन प्रययौ सपरिच्छदः ॥ १८ ॥

प्रयाणं नृपतिर्ज्ञात्वा निवर्त्तनसमुद्यतः ।
यत्नेनापि न तं प्राप नोत्सृष्टं लभ्यते पुनः ॥ १९ ॥

मूर्खाः सत्सु कृतावज्ञा विमुच्यन्ते क्षणेन तैः ।
याति तेषां तु सर्व्वत्र कोऽपि नार्थी कृतार्थताम् ॥ २० ॥

धीमानमात्यः प्राप्तोऽथ हृष्टो वैशालिकैर्गुणैः ।
पूजितः प्रणयाचारैः संघमुख्ये पदे स्थितः ॥ २१ ॥

तद्बुद्धिविभवात्तश्रीः सोऽथ तत्प्रमुखो गणः ।
कदाचिदनयाल्लेभे न पराभवपात्रताम् ॥ २२ ॥

དེ་ནས་དུས་ཀྱི་སྨིན་པོ་འི་བུ། གཞན་པར་གྱུར་བ་སེང་གེ་ཡི།
བུ་མོ་ཡོན་ཏན་ལྡན་མ་ནི། མཛེས་མ་ཅེ་ལ་ཞེས་པ་བཙས།། 23

དེ་ཡི་བུ་མོ་གཉིས་པ་ཡང་། ཉེ་བའི་ཅེ་ལ་ཞེས་པ་སྐྱེས།
མཛེས་མའི་དེ་དག་སྐྱེས་ཉིད་ལ། མཚན་མཁན་མཁས་པས་རབ་སྨྲས་པ།། 24

ཅོ་ལའི་བུ་ནི་པ་བསད་ནས། ས་ཡི་བདག་པོ་དག་ཏུ་གྱུར།
ཉེ་བའི་ཅོ་ལའི་ཡོན་ཏན་ཅན། རྫོགས་པའི་མཚན་ལྡན་འགྱུར་ཞེས་སོ།། 25

སྨིན་སྲས་སྒྲ་བོ་ས་འཚོ་ནི། དཔའ་བས་ཆེར་རྒྱགས་མ་བསྒོམས་པས།
སྐྱིད་ཚལ་དཀྲུགས་པའི་གནོད་པ་ཡིས། ཚོགས་རྣམས་སྡང་འདིས་ཉིད་དུ་གྱུར།། 26

དེ་དག་དེ་ཡི་ཕ་དག་ལ། གུས་པས་ཁྲོ་བྲལ་དེ་དང་ནི།
ནུ་བོར་བཅས་ལ་སྐྱིད་ཚལ་གཉིས། སྣ་ལ་ཏ་མ་ཆེ་རྒྱས་བྱིན།། 27

ལེགས་བྱས་རིགས་པ་གཅིག་གིས་དེར།བདེ་བར་གཤེགས་པའི་སྐུ་གཟུགས་བྱས།
འགྲོ་བ་རྒྱ་ཆེའི་གཙུག་ལག་ཁང་། ས་ཡི་རྒྱན་ནི་གཞན་གྱིས་སོ།། 28

དེ་ནས་ཕས་འཐའི་དཀྱིལ་འཁོར་དུ། ཕ་ཡི་སྟོབས་རྒྱས་ས་སྐྱངས་བུ།
ཚོགས་པའི་ཁྲོ་བས་འཇིགས་པ་ལས། ལས་མཐའ་ཉེ་བར་བསྒྲུབ་སྐད་བཞག།། 29

སྨིན་པོའི་མཆོག་དེ་དུས་ཀྱིས་ནི། མཐོ་རིས་བཞུད་ཚེ་ཚོགས་རྣམས་ཀྱིས།
ལེགས་པ་ཉིད་ཕྱིར་གཞན་པའི་བུ། སེང་གེ་དེ་ཡི་གནས་སུ་བཞག།། 30

अथ कालेन सिंहस्य मन्त्रिसूनोः कनीयसः ।
अजायत सुता कान्ता चैल्ला नाम गुणोचिता ॥ २३ ॥

द्वितीया चोपचैल्लाख्या सुता जातास्य सुन्दरी ।
जन्मन्येव तयोः प्राह निमित्तज्ञो विचक्षणः ॥ २४ ॥

चैल्लायास्तनयो भावी पितृहन्ता महीपतिः ।
गुणवानुपचैल्लायाः पूर्णलक्षणवानिति ॥ २५ ॥

ज्येष्ठो मन्त्रिसुतः शौर्य्यात् गोपः प्रौढमदोद्धतः ।
उद्यानमर्दनक्षेपैर्गणानां द्वेष्यतां ययौ ॥ २६ ॥

तत्पितुर्गौरवात् तस्मै सानुजाय विमन्यवः ।
विशालशालतामन्ते जीर्णोद्यानद्वयं ददुः* ॥ २७ ॥

सुगतप्रतिमां चक्रे तत्रैकः सुकृतोचिताम् ।
विहारं वैभवोदारं भुवनाभरणं परः ॥ २८ ॥

अथ पित्रा बलोत्सिक्तः सुतः प्रत्यन्तमण्डले ।
गणकोपभयाद् गोपः कर्म्मान्तोपार्जने धृतः ॥ २९ ॥

कालेन त्रिदिवं याते तस्मिन् मन्त्रिवरे गणैः ।
कनीयसस्तु साधुत्वात् सिंहस्तस्य पदे धृतः† ॥ ३० ॥

---

* Is it for विशालशालतान्ते ? The reading here is corrupt.

† कनीयसस्तु for [illegible] ।

ཚོགས་པ་གྲུས་ཟླ་ས་འཚོ་ཡིས། ཕ་ཡི་གནས་ནི་མ་ཐོབ་ནས།
ཡུལ་དང་གནས་ནི་དེ་དག་ལ། ཆགས་པ་ཡོངས་སུ་གཏང་བར་སེམས།། 31

ཚེར་མས་གདམས་ཤིང་སྟག་གིས་སྐྲོམ། ནགས་ཚལ་མཆོག་ཏུ་གནས་པར་བྱ།
རྫི་བོ་མང་པོས་རབ་ཁྲོ་བ། མ་བསྐམས་སྐྱེ་བོ་འི་ནང་དུ་མིན།། 32

ཐ་དད་དམ་པའི་བྱ་བ་སྨྲས། གང་ཞིག་གཅིག་གིས་འདོད་གྱུར་པ།
དེ་ལ་གཞན་དག་ཡོངས་མི་སྲིད། ཚོགས་པ་ཇི་ལྟར་བསྟེན་པར་བྱ།། 33

ཞེས་བསམས་ང་རྒྱལ་ཅན་དེ་ཡི། གྲོང་ཁྱེར་རྒྱལ་པོ་འི་ཁབ་ཏུ་ཕྱིན།
མི་བདག་གཟུགས་ཅན་སྙིང་པོ་ཡིས། ཡོན་དན་གྱི་ནི་དཔལ་འབྱོར་བསྟེན།། 34

དེ་ཡི་དགེས་པས་དེ་མཆོད་ནས། དེ་ཡིས་ཡིད་བརྟན་གནས་སུ་གྱུར།
དེ་དུས་ཡོན་དན་གྱིས་འགྲོགས་པ། ཡུན་རིང་འདྲིས་པ་བཞིན་དུ་མཛེས།། 35

དེ་ནས་རྒྱལ་པོ་གཟུགས་སྙིང་གིས། བཙུན་མོ་ལྷ་པ་ཉིད་གྱུར་དེའི།
འབྲལ་བའི་མེ་ཡིས་གདུངས་དེ་དང་། ཉེ་བའི་ཚོ་ལ་ནུ་བོ་ཡིས། 36

བུ་མོ་བཙུན་མོར་བླངས་འོས་པ། བློ་ལྡན་དེ་ཡིས་རྣམས་བསམས་ནས།
གསང་ནས་རྒྱུ་ཞིང་དེ་ཡིས་བཀས། ཡངས་པ་ཅན་གྱི་གྲོང་ཁྱེར་སོང་།། 37

ཚོགས་ཀྱི་ཉེ་བར་སྤྱད་བྱ་ཉིད། མཛེས་མ་སུ་ལ་སྦྱིན་མི་བྱ།
ཞེས་བ་ཡངས་པ་ཅན་པས་སྨོན། རང་གི་ཡུལ་དུ་ངེས་པ་བྱས།། 38

गोपः पितुरसंप्राप्य पदं गणविमानितः ।
तद्देशवासविरसः परिहारमचिन्तयत् ॥ ३१ ॥

वास्तव्यं कण्टकाकीर्णे व्याघ्रघ्राते वरं वने ।
अनेकस्वामिसंभिन्नजने न तु विशृङ्खले ॥ ३२ ॥

नानामतक्रियालापः कथमाराध्यते गणः ।
समीहितं यदेकस्य तदन्यस्मै न रोचते ॥ ३३ ॥

इति मानी स संचिन्त्य गत्वा राजगृहं पुरम् ।
बिम्बिसारं नरपतिं गुणश्रियमशिश्रियत् ॥ ३४ ॥

स तेन मानितः प्रीत्या तस्य विस्रंभभूरभूत् ।
चिररूढेव तत्कालमाभाति गुणसङ्गतिः ॥ ३५ ॥

राज्ञोऽथ बिम्बिसारस्य वल्लभा पञ्चतां ययौ ।
तद्वियोगाग्निसन्तप्तं तं विचिन्त्य स बुद्धिमान् ॥ ३६ ॥

उपचैलां सुतां भ्रातुस्तद्विवाहोचितां बधूम् ।
गूढचारी तदादेशात् वैशालकपुरीं ययौ ॥ ३७ ॥

कन्या गणोपभोग्यैव न कस्मैचित् प्रदीयते ।
इति वैशालिकैः पूर्व्वं स्वदेशे नियमः कृतः ॥ ३८ ॥

དེ་ཡི་གྲོང་ཁྱེར་སྒོ་བསྲུང་ཕྱིར། གནོད་སྦྱིན་གནས་ན་འཁྲུང་བ་ཡི།
དྲིལ་བུ་ཤིན་དུ་གསང་བ་ནི། ཕ་རོལ་ཞུགས་ཚེ་སྒྲ་སྒྲོག་བྱེད།། 39

ནུ་བོ་འི་སྐྱིད་ཚལ་འཕྲིང་བར་ནི། གྲོས་ཀྱི་གསང་སྡེ་དེ་རབ་ཞུགས།
ཉེ་བའི་ཅོལ་ལེན་པ་ལ། ཕྱིན་པས་ཅོལ་ཐོབ་པར་གྱུར།། 40

དེ་ནི་ཤིང་དུ་ལ་བསྐྱོན་སོང་། དྲིལ་སྒྲ་ལས་ནི་མངོན་འདོད་པའི།
སྐྱེས་བུ་དཔའ་རྣམས་ངེས་བཅོམ་ནས། མི་ཡི་བདག་པོ་འི་གྲོང་ཁྱེར་ཕྱིན།། 41

དེ་ལ་ངེས་སྐྲས་མཛེས་མ་འདི། བདག་གི་བསམ་པ་མིན་པ་ཐོབ།
འདི་ཡི་བུ་ཡིས་ཕ་བསོད་ཅེས། གང་ཕྱིར་མཚན་མཁན་རྣམས་ཀྱིས་སྨྲས།། 42

དེ་སྐད་མི་ཡི་བདག་པོ་ནི། ཁྱོད་ཀྱི་བཙུན་མོར་འོས་པ་མིན།
ཁྱོད་ནི་འཚོ་ན་སྐྱེ་རྒུ་ཡི། ཕུན་སུམ་ཚོགས་པ་ཐམས་ཅད་འཚོ།། 43

དེ་ཡིས་འདི་བརྗོད་ཚོ་ན་ངེས། དེ་མཐོང་གདུང་བར་ཡོངས་མ་ནུས།
དེ་གདོང་ལ་བྲིས་རི་མོ་ཡིས། ལས་ཀྱི་སྐད་ཉིད་བཅིངས་པ་བཞིན།། 44

དེ་ཡིས་སྨྲས་པ་བུ་ཡི་ཕ། གསོད་པ་གང་དུ་གང་ཚེ་མཐོང་།
གལ་ཏེ་བུ་ནི་བྱུང་གྱུར་ན། རང་ཉིད་བདག་གིས་དབང་བསྒྱུར་བྱ།། 45

དེ་སྐད་བརྗོད་ནས་མི་ཡི་བདག། མཛེས་མ་ལེན་པ་དགའ་བར་གྱུར།
ལས་ཀྱི་རླབས་ཀྱིས་སྤྲུལ་བ་ཡིས། ཐོགས་པའི་བློ་ལ་མཐུ་ཡོད་མིན།། 46

तत्पुरे द्वाररक्षायै यक्षस्थानावलम्बिनी ।
परप्रवेशे कुरुते शब्दं घण्टी पटीयसी ॥ ३९ ॥

स प्रविश्य ततोऽभ्रातुर्गूढ़मुद्यानचारिणीम् ।
उपचैस्तां समाहर्तुं गतस्तैलामवाप्तवान् ॥ ४० ॥

यातस्तं रथमारुह्य घण्टाशब्दादभिद्रुतम् ।
स हत्वा वीरपुरुषानवाप नृपतेः पुरम् ॥ ४१ ॥

तमूचे दैवकन्येयं प्राप्ता विमनसात्मना ।
पितृहन्ता सुतोऽह्यस्या निमित्तज्ञेन सूचितः ॥ ४२ ॥

तस्मादेषा नरपते महिषी न तवोचिता ।
त्वयि जीवति जीवन्ति प्रजानां सर्व्वसम्पदः ॥ ४३ ॥

इत्युक्तस्तेन तां दृष्ट्वा त्यक्तुं नैव शशाक सः ।
निरुद्धः कर्म्मणा ह्येव तन्मुखालेख्यलेखया ॥ ४४ ॥

सोऽवदत् क्व कदा दृष्टः पुत्रेण निहतः पिता ।
स्वयं मयाभिषेक्तव्यः सुतो यदि भविष्यति ॥ ४५ ॥

इत्युक्त्वा नृपतिः कन्यां परिणीयाभवत् सुखी ।
कृतकर्मोर्मिनिर्म्माणे प्रभवन्ति न बुद्धयः ॥ ४६ ॥

དུས་ཀྱི་ལོངས་སྤྱོད་ལྡན་པ་དེའི། །བུ་ནི་དེ་ལ་སྐྱེས་གྱུར་ཏེ།
གང་གི་སྤྱོད་ཚུལ་བརྩིས་པ་ཡིས། །ཕ་ནི་གསོད་པར་བརྗོད་གྱུར་པའོ། ། 47

དཀའ་ཐུབ་ནགས་ཀྱི་རི་དགས་རྣམས། །གསད་ཕྱིར་ནགས་སུ་རྟེན་ལ་ཞེན།
དེ་ལ་ཐུབ་པའི་དམོད་པ་ནི། །བྲུ་ཡི་དབྱིབས་ཅན་འདི་ལྟར་གྱུར། ། 48

སྐབས་དེར་ཆེན་པོ་ཞེས་བྱ་བ། །ཡངས་པ་ཅན་གྱི་ཚོགས་ཀྱི་གཙོས།
ཨ་མྲའི་ནགས་ལས་རྒྱ་ཤིང་གི །སྡོང་པོ་ལས་འཁྲུངས་མཛེས་མ་ཐོབ། ། 49

དེ་ཡི་ཁྱིམ་དུ་མཛེས་མ་དེ། །དལ་བུས་དལ་བུས་བསྐྱེད་བསྲིངས་ཏེ།
དགའ་བ་ཆེ་དང་སྨིན་པ་ཡི། །བསམ་པ་ཡིས་ཀྱང་སེམས་མ་བཟུང་། ། 50

གཞན་གྱི་མཛའ་ལས་དེ་ཡི་མིང་། །ཨ་མྲ་སྐྱོང་མ་ཞེས་སུ་བཏགས།
བུ་མོ་དམན་པ་བཞིན་བཏང་ནས། །ཡང་ཚོ་དག་ནི་བཟུང་བར་གྱུར། ། 51

དེ་ནས་དེ་གཏོང་བརྩོན་པའི་ཕ། །མཛེས་མ་ཚོགས་ཀྱི་ཉེར་སྤྱད་བྱ།
ཞེས་པའི་དམ་ཚིག་འདས་གྱུར་པ། །ཚོགས་པ་དག་གིས་བཟོད་མ་གྱུར། ། 52

དེ་ནས་སྡུག་བསྔལ་གྱིས་གདུངས་པའི། །ཕ་ལ་བཏུད་ནས་དེས་སྨྲས་པ།
བདག་ནི་ཚོགས་ཀྱི་སྤྱོད་བྱ་ཉིད། །གལ་ཏེ་འོང་ཀྱང་དམ་ཚིག་འདི། ། 53

གཅིག་གི་སྟེང་དུ་གཞན་དག་ནི། །མི་འཇུག་རང་གི་གནས་སུ་སྡོད།
ཉི་མ་རེ་ལ་བདག་གི་ཟློང་། །ཀྲྀ་པ་ཀི་ཀྲུ་ཐུག་ལྡཱ། ། 54

भोगिनस्तस्य कालेन तस्यां सूनुरजायत ।
ज्योतिष्कचरिते यस्य वृत्तमुक्तं पितृद्रुहः ॥ ४७ ॥

तपोवनमृगाधानमृगयाव्यसने वने ।
एवंविधो ह्यभूत् तस्य मुनिशापः सुताकृतिः ॥ ४८ ॥

अत्रान्तरे महान्नाम वैशालिकगणाग्रणीः ।
कन्यामाम्रवनात् प्राप कदलीस्कन्धनिर्गताम् ॥ ४९ ॥

सा तस्य भवने कान्ता वर्द्धमाना शनैः शनैः ।
विदधे विपुलां प्रीतिं दानचिन्तां च चेतसि ॥ ५० ॥

प्रणयादाम्रपालीति बन्धुभिः सा कृताभिधा ।
सूनुहीनमिव त्यक्त्वा बाल्यं यौवनमाददे ॥ ५१ ॥

तद्विवाहोद्यतस्याथ न सेहे तत्पितुर्गणः ।
गणोपभोग्या कन्येति समयस्य व्यतिक्रमम् ॥ ५२ ॥

पितरं दुःखसन्तप्तं समेत्याथ जगाद सा ।
भवामि गणभोग्यैव किन्त्वेष समयो यदि ॥ ५३ ॥

एकस्योपरि नान्यस्य प्रवेशः स्वपदे स्थितिः ।
पणः कार्षापणशतैः पञ्चभिः प्रत्यहं मम ॥ ५४ ॥

ཞག་བདུན་དག་ནི་ཁྲིམ་དག་ནི། རྣམ་པར་བལྟ་བྱ་གཞན་དུ་མིན།
ཞེས་པའི་དམ་ཚིག་འདི་འདས་ན། ཀུན་གྱི་སྨྱོད་བྱ་ཉིད་འགྱུར་བའོ།། 55

ཞེས་པ་དེ་ཡིས་དམ་ཚིག་དག། ཤེས་ནས་དེ་ཡི་ཕས་སླས་པ།
ཚོགས་ཀྱིས་རུང་ཞེས་སླས་ནས་ནི། གུས་པས་ངེས་པ་བརྟན་པོ་བྱས།། 56

དེ་ནས་རིན་ཅེན་ཁང་པར་དེ། མཆོག་གི་རྒྱན་གྱིས་རབ་བརྒྱན་ཅིང་།
གསེར་གྱི་བ་གམ་ཁྲི་སྟན་ལ། འཛོགས་ནས་ཉིན་པར་ཟླ་འོད་བྱས།། 57

དེ་ནས་འདོད་ལྡན་གང་གང་གིས། ཟོང་ཁྱེན་དེ་ཙམ་ཉེ་བར་སོང་།
དེ་དང་དེ་ཡི་གཟི་བརྗིད་ནི། དེ་ཡི་མཐུ་ཡིས་རབ་དུ་ཉམས། 58

བལྟ་བ་ཉིད་དུ་འང་མི་ནུས་ན། རིག་པས་འཁྲུགས་པ་སྨྲར་ཡང་ཅི།
དེ་ནི་ཙན་དན་འཁྲི་ཤིང་དག། ལག་འགྲོས་ལོངས་སྤྱོད་བགགས་པ་བཞིན།། 59

དེ་ནས་མཛེས་མ་དེ་ཡིས་ནི། ནུ་མ་རྒྱས་པའི་ཁུར་དག་གིས།
ཀད་འཁྱོག་འཇིགས་པ་རབ་ཕྱེར་བ། ལང་ཚོ་ཡི་ཡང་ལང་ཚོ་བསྟེན། 60

དེ་ཡི་གཟུགས་ནི་རྨད་བྱུང་དེ། འདོད་ཆགས་རྫོགས་ཤིང་ལོངས་སྤྱོད་བྲལ།
གཡང་སའི་གསེར་གྱི་འཁྲི་ཤིང་གི། མེ་ཏོག་བཞིན་དུ་འབྲས་མེད་གྱུར།། 61

ལྟད་མོ་འི་བསམ་པས་རྟེད་མོ་འི་སྐད། ཐ་དད་ཡུལ་གཞན་ནས་འོངས་པའི།
རི་མོ་མཁན་གྱི་ས་སྐྱོང་གི། གཟུགས་ནི་དེ་ཡི་ཁང་པར་བྲིས།། 62

सप्ताहेनैव विचयः कार्य्यो वेश्मनि नान्यदा ।
इत्यस्मिन् समये बध्यः सर्वश्चैव व्यतिक्रमी ॥ ५५ ॥

इति तत्समयं ज्ञात्वा तत्पितुर्वचसा गणः ।
अकरोद् बाढमित्युक्त्वा दृढनिश्चयमादरात् ॥ ५६ ॥

ततः सरत्नभवने वराभरणभूषिते ।
हेमहर्म्यसमारूढ़ा दिदेश दिनचन्द्रिकाम् ॥ ५७ ॥

ततः पणीकृतः कामी यो यस्तां समुपाययौ ।
तस्य तस्याभवत् तस्याः प्रभावेणौजसः क्षयः ॥ ५८ ॥

द्रष्टुमेव न शेकुस्ते किम्पुनः स्प्रष्टुमाकुलाः ।
भुजङ्गभोगसंरुद्धां तां चन्दनलतामिव ॥ ५९ ॥

ततः सा सुन्दरी भेजे यौवनस्यापि यौवनम् ।
गुरुणा स्तनभारेण मध्यभङ्गभयप्रदम् ॥ ६० ॥

स्मरसम्भोगरहितं तत् तस्या रूपमद्भुतम् ।
स्वभ्रहेमलतापुष्पमिव निष्फलतां ययौ ॥ ६१ ॥

कौतुकाशाविनोदाय नानादेशान्तरागतैः ।
अकारि चित्रकारैर्भूपालप्रतिकृतिं गृहे ॥ ६२ ॥

མི་དབང་རྣམས་ནི་རི་མོ་ལ། བྲི་ཤིང་བལྟས་པས་རིམ་གྱི་དེ།
གཟུགས་ཅན་སྙིང་པོ་འི་གཟུགས་དག་ནི། དགའ་མའི་བདག་པོ་བཞིན་དུ་མཐོང་།། 63

དེ་མཐོང་ཉིད་ན་འཕྲུལ་ལ་ནི། འདོད་ཆགས་ཡང་དག་ལངས་པར་གྱུར།
གང་ཞིག་དེ་ནི་བྲིས་དེ་ལ། དེར་ནི་དགེ་མཚན་དག་ལས་དྲིས།། 64

གང་གི་མཛེས་སྡུག་བདུད་རྩི་ཡིས། ཡོངས་རྒྱས་མིག་གི་དགའ་བསྐྱེད་པ།
དགའ་མ་དག་གི་འཁྲི་ཤིང་དཔྱིད། གྲོགས་པོ་ས་བདག་འདི་ནི་སུ།། 65

གང་གི་དཔལ་མོ་ལྷ་མོ་འི་ཡང་། སྐལ་བཟང་ལས་སྐྱེས་དྲེགས་འཇོམས་པ།
ས་བདག་འདི་ཡི་མཛེར་གཙུགས་ཀྱི། སྐལ་ལྡན་བསོད་ནམས་ལྡན་པ་སུ།། 66

དེ་ཡིས་དྲི་ལ་དལ་བུར་ནི། རི་མོ་མཁས་པས་དེ་ལ་སྨྲས།
ལེགས་བྱས་ཕུན་ཚོགས་སྙིང་པོ་འདི། ས་བདག་གཟུགས་ཅན་སྙིང་པོ་ཡི།། 67

རྟུལ་ཕོད་གཟུགས་ནི་སྣང་གཞལ་བ། མགྲོ་རིས་འདྲེན་པའི་ལྷ་སྲུ་ཡིས།
འདི་ལས་ཡིད་སྐྱབས་དག་ཀྱང་ནི། རེ་བ་མེད་པ་ཉིད་དུ་དོགས།། 68

དེ་ཡིས་དེ་སྐད་བརྗོད་ཚེ་དེ། མངོན་པར་འདོད་པ་གསར་པ་ཡིས།
འཕྲུལ་ཉིད་མངོན་དུ་ཕྱོགས་བྱས་དེ། ས་སྐྱོང་ལ་ནི་མིག་གཏད་ནས།། 69

སྐབས་དེར་གཟུགས་ཅན་སྙིང་པོ་ཡིས། མི་མེད་ཁང་པར་དལ་བུས་ནི།
གདམས་ཀྱི་མཐུག་དུ་ས་འཚོ་ལ། ཚུང་ཟད་འཛུམ་དཀར་མཆུ་ཡིས་སྨྲས།། 70

विधाय चित्रलिखितान् सा क्रमेण नरेश्वरान् ।
ददर्श बिम्बिसारस्य रूपं रतिपतेरिव ॥ ६३ ॥

तमालोक्यैव सहसा समुद्भूतमनोभवा ।
स येन लिखितस्तत्र तं पप्रच्छ कुतूहलात् ॥ ६४ ॥

कोऽयं सखे प्रीतिलतामाधवो वसुधापतिः ।
प्रीणाति लोचने यस्य सुधापरिचिता रुचिः ॥ ६५ ॥

धन्या का नाम भूभर्त्तुरस्य प्रणयभागिनी ।
लक्ष्म्यं सौभाग्यजं गर्व्वमुर्व्वश्याः संहृतं यया ॥ ६६ ॥

इति पृष्टस्तया स्वैरं तामूचे चित्रकोविदः ।
भूपतिर्बिम्बिसारोऽयं सारं सुकृतसम्पदाम् ॥ ६७ ॥

शौर्य्यरूपतुलारोहे देवाः के नाकनायकाः ।
शङ्के करोति नैवास्य मन्मथो वा मनोरथम् ॥ ६८ ॥

इत्युक्ते तेन सा तस्थौ भूपालन्यस्तलोचना ।
सहसैवाभिलाषेण नवीनाभिमुखीकृता ॥ ६९ ॥

अत्रान्तरे बिम्बिसारः स्वैरवेश्मनि निर्जने ।
कथान्ते गोपमवदत् किञ्चित् स्मितसिताधरः ॥ ७० ॥

གྲོགས་པོ་ཚུང་ཟད་བདག་གི་ནི། ཡིད་ལ་གང་ཞིག་རྒྱུ་བ་ཉོན།
མ་བསླམས་གྲོགས་པོ་རང་དབང་དུ། སླུ་བ་ཅི་ཡང་བདུད་རྩིའི་རོ། 71

ཡངས་པ་ཅན་པའི་ཚོགས་རྣམས་ཀྱིས། ཐུན་མོངས་དུ་བྱས་བྱུད་མེད་མཆོག།
མཛེས་མ་བྲིན་པ་ཚུ་ཤིང་འདྲ། ཚུ་ཤིང་ནང་ནས་བྱུང་བར་ཐོས།། 72

གཟི་ལྡན་སྐྱིང་སྡུག་དུ་འོས་དེས། དེ་མཐུས་རི་ཉམས་དེ་དག་གིས།
ར་ལྷ་ཡང་ནི་སྲུ་མ་སྦྱིན། པདྨ་ལྡན་པ་བླང་བོས་བཞིན།། 73

བུད་མེད་རིན་ཅེན་སྐྱེ་གནས་ལས། མ་སྐྱེས་པ་དེ་ཐོས་ཉིད་ལས།
ཡིད་ནི་ཀུན་དགར་བཅས་པ་ཡིས། དགེ་མཚན་མི་གཞན་སུ་མི་བྱེད།། 74

བདག་གི་མིག་དང་ལྡན་ཅིག་དུ། ཡིད་ནི་དེ་ལ་མངོན་པར་ཆགས།
དེ་ཡི་ཡོན་ཏན་ཐོས་པ་ཡི། སྐལ་ལྡན་ཎ་བར་བདག་དགའ་འོ།། 75

ས་ཡིས་བདག་པོས་འདི་བརྗོད་ཚེ། ས་འཚོས་དེ་ལ་ལན་སྨྲས་པ།
རྒྱལ་པོ་འདོད་ཆགས་གཏེར་དེ་ནི། ལག་འགྲོ་འི་ཚོགས་ཀྱིས་ཡང་དག་བཀག།། 76

ཤིན་དུ་རྩུང་བ་འཁྲུལ་གྱུར་ན། བཟོད་དཀའི་གཡང་ས་ངན་པར་འགྲོ།
མི་བཟད་ལམ་འདི་ཁྱོད་ལ་ནི། མི་བཟད་མདའ་ཆེན་དག་གིས་བསྟན།། 77

དེ་ནི་ཐྲང་དུ་འཐོབ་པ་མིན། ཁྱོད་ཀྱང་འགྲོ་བར་འོས་པ་མིན།
གཉིས་ཀ་ཐེ་ཚོམ་ཐབས་དང་བྲལ། འདི་ལ་བདག་ནི་ཅི་ཞིག་སྨྲ།། 78

श्रूयतां यन्मम सखे किञ्चिन्मनसि वर्त्तते।
नियन्त्रमिचस्वच्छन्दवादः कोऽपि सुधारसः ॥ ७१ ॥

वैशालिकैर्वरारोहा गणैः साधारणीकृता।
रम्भोरूः श्रूयते कान्ता रम्भागर्भसमुद्भवा ॥ ७२ ॥

तत्प्रभावविनष्टाशैस्तेजस्विप्रणयोचिता।
सा तैर्न दूषिताद्यापि मातङ्गैरिव पद्मिनी ॥ ७३ ॥

श्रवणादेव सानन्दमपर्युषितकौतुकम्।
न करोति मनः कस्य तत् स्त्रीरत्नमयोनिजम् ॥ ७४ ॥

अभिलाषि मनस्तस्यां जातं मे सह चक्षुषा।
तद्गुणश्रुतिधन्याय श्रोत्राय स्पृहयाम्यहम् ॥ ७५ ॥

इत्युक्ते भूमिपतिना गोपस्तं प्रत्यभाषत।
भुजङ्गगणसंरुद्धः स राजन्मान्मथो निधिः ॥ ७६ ॥

अत्यल्पस्खलितं प्राप्य दुःसहापातदुर्गमः।
एष ते विषमः पन्था दर्शितो विषमेषुणा ॥ ७७ ॥

लभते सा न निर्गन्तुं न युक्तं गमनं च ते।
किमस्मिन् विरतोपाये वदाम्यभयसंशये ॥ ७८ ॥

དེ་ཡིས་དེ་བཟོད་མི་བདག་གིས། འདོད་པའི་གནོན་ཞིམ་གདང་སྟེ།
འདོད་པས་གཟིར་ད་རིགས་པའི་ལུགས། མཁས་པ་རྣམས་ཀྱང་མི་དྲན་ཏོ། 79

དེ་ནས་ས་འཚོ་ལྷག་ཅིག་དེ། གྲོང་ཁྱེར་ཡངས་པ་ཅན་སོང་ནས།
རི་དགས་མིག་ཅན་ཁང་པར་ནི། ཆས་གཞན་དག་གིས་རབ་ཏུ་ཞུགས།། 80

རི་མོ་མཐོང་བ་ཉིད་ཀྱིས་ནི། མིག་དག་ཡོངས་འཁྲིས་མི་ཡི་མགོན།
དེ་ཡིས་མཐོང་ནས་སྐད་ཅིག་ནི། སྐྱེངས་པ་དང་བཅས་ས་ལ་བལྟས། 81

ངོ་ཚས་ལན་དང་བྲལ་བ་དེ། འདར་བས་རབ་ཏུ་བསྐྱོད་པ་ཡིས།
དྲིལ་ཆུང་སྒྲ་ལྡན་མི་བདག་ལ། ལེགས་པར་འོངས་སམ་འདྲི་བ་བཞིན།། 82

དེར་ནི་རང་ལུས་རི་མོ་ལ། ལ་བཟང་མཐོང་ནས་ཁེངས་ལྡན་པའི།
རྒྱལ་པོས་དེ་ཡི་མཛེས་སྡུག་གི། ཆུ་རྒྱུན་འདྲེན་བྱེད་སྐྱིམ་པས་འཐུངས།། 83

ངོ་ཚའི་འབེབས་པས་མཛེས་མ་དང་། མངོན་པར་མཐོ་བས་ས་ཡི་བདག།
སྨྲ་པ་གཅད་ལས་ས་འཚོ་ཡིས། འཇུམ་པས་སྒྱུར་བར་དེ་ལ་སྨྲས།། 84

ལྷ་འདིའི་རྣམ་པ་རི་མོར་བྲིས། བསམ་གདན་ངེས་པར་བཟོད་པ་ལས།
ཁྱོད་ཀྱི་གུས་པའི་ཁྱད་པར་གྱིས། མངོན་སུམ་ཉིད་དུ་གསལ་བར་གྱུར།། 85

ཁྱོད་ཀྱིས་འདི་ནི་རི་མོ་ལ། བྲིས་ཤིང་འདིས་ཀྱང་སེམས་ལ་ཁྱོད།
ཁྱེད་གཉིས་མཛའ་བའི་ཡོ་ཆར་ནི། སུ་ཞིག་རབ་སོང་ངས་མི་ཤེས།། 86

इत्युक्तस्तेन नृपतिर्नोत्कण्ठाग्रहमत्यजत् ।
विद्वांसोऽप्युचितां नीतिं न स्मरन्ति स्मरातुराः ॥ ७९ ॥

वैशालिकपुरीं यातो गोपेन सहितोऽथ सः ।
प्रविवेशान्यवेशेन मन्दिरं हरिणीदृशः ॥ ८० ॥

सा चित्रदर्शनेनैव दृष्ट्वा परिचितं दृशोः ।
नरनाथं सवैलक्ष्यलक्षणं क्षितिमैक्षत ॥ ८१ ॥

लज्जानिरुत्तरे तस्याः कम्पव्यतिकरे परम् ।
रणन्ती रसना चक्रे स्वागतं नृपतेरिव ॥ ८२ ॥

विलोक्य धन्यतामानी तत्र चित्रे निजं वपुः ।
तां लावण्यनदीं राजा नयनाञ्जलिना पपौ ॥ ८३ ॥

लज्जावेशेन सुन्दर्यामाभिजात्येन भूपतौ ।
आबद्धमौनयोः क्षिप्रं गोपस्तां सस्मितोऽवदत् ॥ ८४ ॥

अयं ते चित्रलिखिताकारध्यानावधानतः ।
व्यक्तं भक्तिविशेषेण देवः प्रत्यक्षतां गतः ॥ ८५ ॥

त्वयायं लिखितश्चित्रे त्वमनेन तु चेतसि ।
न जाने युवयोः कोनु प्रयातः प्रेमदूतताम् ॥ ८६ ॥

ཞེས་སོགས་གདམས་ཀྱི་སྐྱོར་བ་ཡིས། རབ་དགའ་ཡོངས་རྫོགས་དེ་དག་གིས།
གང་གང་འདོད་ཆགས་ཀྱིས་བསྣུན་པ། དེ་དེ་ཉམས་སུ་མྱོང་བར་གྱུར།། 87

དྲིལ་སྒྲས་འཇིག་རྟེན་ངོགས་པ་སྐྲེས། རྒྱལ་པོ་འདོད་ལྡན་རབ་བསྒྲིབས་པ།
ལྟ་བར་མི་འོས་དེ་ཡི་ཁྲིམ། དབེན་པར་ཞག་བདུན་གནས་པར་གྱུར།། 88

འཁྲི་ཤིང་མེ་ཏོག་ལྡན་པ་བཞིན། དུས་སུ་དེ་ལས་མངལ་ཐོབ་དེས།
ངོ་ཚས་དམན་ཞིང་དལ་བུ་ཡིས། དེ་ལ་སྦྱོད་མཐའ་རིག་པར་བྱས།། 89

ཁྲིམ་ནི་སྤྱོད་ལ་ཉེ་བ་ན། བྱུང་ན་བུ་ནི་ཡོངས་ཤེས་པའི།
ཡིད་ཆེས་སྐད་དུ་སོར་གདུབ་དག། དེ་ལ་བྱིན་ནས་མི་བདག་སོང་།། 90

མི་བདག་འོད་ལྡན་ལུས་ཅན་མི་རྣམས་དག་གིས་བཀུར་བ་གཤེགས་གྱུར་ཆེ།
འཕྲུལ་ལ་རབ་སྐྱེས་འཕྲུལ་བའི་རབ་རིབ་ཀྱིས་གཏིབས་བཞིན་གྱི་པདྨ་ཟུམ།
སྤྱོད་ལ་ཆར་དང་འཛམ་པའི་རླུང་གི་ཟིལ་གྱིས་མནན་པའི་པད་ལྡན་བཞིན།
མཆི་མ་དང་བཅས་ཤུགས་རིངས་རབ་ལྡན་དེ་ནི་དགའ་བ་དམན་པར་གྱུར།། 91

ལག་པའི་སྟོན་གྱིས་འགྲམ་པ་དང་། བརྡུག་པ་ཡིས་ནི་ས་བདག་དང་།
ལུས་ཀྱི་གསར་དུ་ཉམ་ཆུང་ཉིད། འཛིན་ཅིང་དེ་ནི་ངེས་པར་དམན།། 92

དེ་ནས་དུས་ཀྱི་དགེ་ལྡན་མ། དེ་ལ་བུ་ནི་བཙས་གྱུར་ཏེ།
ཕ་ཡི་གཟུགས་བརྟན་དག་དང་མཚུངས། ལེགས་པའི་བློ་བཞིན་རྣམ་དུལ་བའོ།། 93

इत्यादिभिः कथाबन्धैः परिपूर्णप्रमोदयोः ।
यद् यदेव स्मरादिष्टं तत् तदास्वादतां गतम् ॥ ८७ ॥

घण्टारवाकुले लोके राजा प्रच्छन्नकामुकः ।
सत्तराचमनालोक्ये तस्थौ तद्भवने रहः ॥ ८८ ॥

लतेव पुष्पिता काले तस्माद् गर्भमवाप्य सा ।
चक्रे विदितवृत्तान्तं तं लज्जावनता शनैः ॥ ८९ ॥

आसन्ने वेश्मविचये दत्त्वास्मै नृपतिर्ययौ ।
भाविपुत्रपरिज्ञानप्रत्ययादङ्गुलीयकम् ॥ ९० ॥

याते भास्वद्वपुषि नृपतौ सम्मते लोचनानां
सद्यः प्रोद्यद्विरहतिमिराक्रान्तिमीलन्मुखाब्जा ।
साभूत् सायन्तनतनुतरापारवाताभिभूता
शोकोच्छ्वासव्यतिकरवती ह्रासहीना निशेव ॥ ९१ ॥

कपोलं पाणिपद्मेन सङ्कल्पेन महीपतिम् ।
नवं तानवमङ्गेन वहन्ती निमिमील सा ॥ ९२ ॥

ततः कालेन कल्याणी प्रतिबिम्बोपमं पितुः ।
अजीजनत्सा तनयं विनयं साधुधीरिव ॥ ९३ ॥

དེ་ནི་ཟླ་བའི་དཀྱིལ་འཁོར་བཞིན། རིམ་གྱིས་བསྐྱེད་པར་གྱུར་པའི་ཚེ།
འདི་ནི་གཟུགས་ཅན་སྙིང་པོ་ཡི། བུ་ཞེས་འཇིག་རྟེན་རྣམས་སུ་གྲགས།། 94

གང་ཚེ་རིགས་ལ་མི་འོས་པའི། ངན་སྨྲས་མདའ་ནི་དེ་དེ་ཡི།
རྩེད་གྲོགས་བྱིས་པ་ཁྲོ་བ་དང་། ལྷན་པ་རྣམས་ཀྱིས་སྨད་པའི་ཚེ།། 95

དེ་ནས་རིག་པ་བསླབ་འོས་བུ། སོར་གདུབ་དང་བཅས་ཕ་ཡི་ནི།
གནས་སུ་ཚོང་པའི་ཚོགས་ཆེན་ལ། དེ་ཡིས་རབ་ཏུ་སྤྲིངས་པར་གྱུར།། 96

གཟུགས་ཅན་སྙིང་པོ་དག་གིས་ཀྱང་། དབྱིབས་མཚུངས་བུ་ནི་ཡང་དག་ཐོབ།
ཡོངས་འཁྲུད་དགའ་བའི་མཆི་མ་ཡིས། དེ་ནི་འཇིགས་མེད་རྣམ་པར་བསྒྲུབས།། 97

ཨ་སྲ་སྐྱོང་མའི་སྤྱོད་མཐའ་དེ། ཐོས་ནས་དགེ་མཚན་ལྡན་པ་ཡི།
དགེ་སློང་གིས་དྲིས་བཅོམ་ལྡན་འདས། རྒྱལ་བས་དེ་ཡི་གཏམ་རྒྱུད་གསུངས།། 98

གྲོང་ཁྱེར་རྒྱལ་པོ་འི་ཁབ་ཏུ་ནི། རྒྱལ་པོའི་བཙུན་མོ་འི་སྐྱེད་ཚལ་གྱི།
ནགས་སུ་སྐྱེད་ཚལ་བསྲུང་བ་སྟོན། འཕྲེང་བ་ཅན་ཞེས་བྱ་བར་གྱུར།། 99

དད་པས་བརྟན་པའི་རང་སངས་རྒྱས། ནམ་ཞིག་འདོད་དགར་མདུན་དུ་འོངས།
རྒྱལ་པོ་ལ་འོས་ཙུ་ཏ་ཡི། མེ་ཏོག་རྣམས་ཀྱིས་དེ་ལ་མཆོད།། 100

དེར་ནི་སྐྱེ་གནས་ལས་མ་སྐྱེས། མི་བདག་བཙུན་མོར་བདག་གྱུར་ཅེས།
སེམས་ནི་རབ་ཏུ་དང་ལྡན་དེས། དེ་ཡི་མདུན་དུ་སྨོན་ལམ་བཏབ།། 101

वर्द्धमाने शनैस्तस्मिन् काले विम्ब इवैन्दवे ।
विम्बिसारस्य पुत्रोऽयमिति लोकेषु पप्रथे ॥ ९४ ॥

अपवादपरै स्तै स्तैस्तं प्रत्यनुचितैर्यदा ।
बाधन्ते शिशवः क्रीड़ाप्रसङ्गे ऽमर्षसंयताः ॥ ९५ ॥

ततः सा प्रेषयामास पुत्रं विद्यार्जनोचितम् ॥
वणिक्सार्थेन महता साङ्गुलीयं पितुः पदम् ॥ ९६ ॥

विम्बिसारोऽपि संप्राप्य सदृशाकारमात्मजम् ।
हर्षहृतः परिषज्य चक्रे तस्य परिग्रहम् ॥ ९७ ॥

वृत्तान्ते विश्रुते तस्मिन्नाम्रपाल्याः सकौतुकैः ।
भिक्षुभिर्भगवान् पृष्टस्तत्कथामवदज्जिनः ॥ ९८ ॥

पुरे राजगृहे राजवल्लभोद्यानकानने ।
बभूव मालती नाम पूर्व्वमुद्यानपालिका ॥ ९९ ॥

सा कदाचित् प्रसादार्द्रं पुरः प्राप्तं यदृच्छया ।
प्रत्येकबुद्धं राजर्षिं चूतपुष्पैरपूजयत् ॥ १०० ॥

अयोनिजा नृपस्याहं पत्नी स्यामिति तत्र सा ।
प्रणिधानं पुरश्चक्रे तस्य चित्तप्रसादिनी ॥ १०१ ॥

བསོད་ནམས་མི་དོག་འབྲས་བུའི་ལོངས་སྤྱོད་ལྡན།
དེ་ཉིད་མཆོག་གི་ལུས་ལྡན་ཨ་མྲ་སྐྱོང་།
དེ་སྐད་རྒྱ་ཆེའི་སྤྱོད་ཚུལ་ཐོས་གྱུར་ནས།
དགེ་སློང་དེ་དག་མདུན་སར་ཡ་མཚན་གྱུར།། 102

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཨ་མྲ་སྐྱོང་མའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་པའོ།།

पुण्यपुण्यफलभोगशालिनी
सैव दिव्यतनुराम्रपालिका ।
इत्युदारचरिता निशम्य ते
भिक्षवः सपदि विस्मयं ययुः ॥ १०२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
आम्रपाल्यवदानं नाम विंशतितमः पल्लवः ।

ཡལ་འདབ་སྟེ་གཉིས་ཤུ་རྩ་གཅིག་པའོ། །

རྒྱལ་བྱེད་ཀྱི་ཚལ་ཡོངས་སུ་བཟུང་བའི་རྟོགས་བརྗོད་ནི།

མི་རྣམས་ནོར་ནི་དངུལ་ཆུའི་ཐིགས་པ་ཁུ་ཚུར་དག་གིས་བསྐམས་པའི་རྣམ་པར་མཐོང་།
དབུལ་དང་མགོན་མེད་རྣམས་ལ་སྟེར་ཞིང་ཉེ་བར་མཁོ་བར་གྱུར་པ་རབ་ཏུ་རྒྱས་པའི་དཔལ།།
བསོད་ནམས་དགའ་ཚལ་གཙུག་ལག་ཁང་དང་མཆོད་རྟེན་བཅོམ་ལྡན་སྐུ་གཟུགས་རབ་གནས་ལ་སོགས་ཀྱིས།
ནོར་ལྡན་འདི་ནི་གྲགས་པས་ལྡན་ཅིག་མི་བཟང་གནས་སུ་གང་ཞིག་གང་གི་རྣམ་པར་མཛེས།། 1

དཔལ་ལྡན་མཉན་དུ་ཡོད་པར་ནི། ཁྱིམ་བདག་སྦྱིན་པ་ཞེས་པ་བྱུང་།
དེ་ཡི་བུ་ནི་རབ་སྦྱིན་དག། བསོད་ནམས་ཕུན་ཚོགས་འབྱུང་གནས་གྱུར།། 2

དེ་ནི་ཁྱིམ་པ་ཉིད་ན་གྲུབ། སློང་བ་རྣམས་ལ་རྟག་ཏུ་སྟེར།
སྐྱེ་བ་སྔར་གོམས་བག་ཆགས་ནི། སུ་ཡི་གང་གིས་བཟློག་པར་འགྱུར།། 3

རྟག་ཏུ་རྒྱུན་རྣམས་སྟེར་བ་ལས། ཕ་ཡིས་མཆོག་ཏུ་ཟློག་པ་ན།
ཀླུང་ལས་གཏེར་ནི་ཡང་དག་བླངས། དེ་ལ་རབ་ཏུ་བསྟན་པར་གྱུར།། 4

ཕ་ནི་མཐོ་རིས་སོང་བའི་ཚེ། ཀུན་ཏུ་གཏེར་ནི་མཐོང་བ་དེས།
དབུལ་དང་མགོན་མེད་ལ་བྱིན་པས། མགོན་མེད་ཟས་སྦྱིན་ཞེས་པར་གྱུར།། 5

एकविंशः पल्लवः ।

जेतवनप्रतिग्रहावदानम् ।

दृष्टं मुष्टिनिविष्टपारदकणाकारं नराणान्धनम्
धन्योऽसौ यशसा सहाक्षयपदं यद्यस्य विद्योतते ।
दीनानाथगणार्पणोपकरणीभूतप्रभूतश्रियः
पुण्यारामविहारचैत्यभगवद्बिम्बप्रतिष्ठादिभिः ॥ १ ॥

श्रीमान् बभूव श्रावस्त्यां दत्तो नाम गृहाधिपः ।
सुतस्तस्य सुदत्तोऽभूदाकरः पुण्यसम्पदाम् ॥ २ ॥

स बाल्यएवालङ्कारं याचकेभ्यः सदा ददौ ।
प्राग्जन्मवासनाभ्यासः कस्य केन निवार्य्यते ॥ ३ ॥

नित्यमाभरणत्यागात् परं पित्रा निवारितः ।
नदीसमुद्धृतान्यस्मै सदैवान्यान्यदर्शयत् ॥ ४ ॥

निधिदर्शी स सर्व्वंच पितरि त्रिदिवं गते ।
दीनानाथप्रदानेन बभूवानाथपिण्डदः ॥ ५ ॥

དུས་ཀྱིས་སྨིན་པ་བྲུས་པ་དེས། བྲ་ལྷན་བུ་ལ་མཉེས་གཞིན་པས།
བུ་ཡི་ཁྱིམ་ཐབ་དོན་གཉེར་ཞིང་། མཛེས་མ་འབད་པས་འཚོལ་བར་གྱུར།། 6

དེ་ནས་བྲམ་ཟེ་སྣང་སྟི་ཡི། ཕྱུང་པོ་ཞེས་པ་མཁས་པ་ལ།
གྲོང་ཁྱེར་རྒྱལ་པོ་འི་ཁབ་ཏུ་ནི། མཛེས་མ་དགའ་ཞིག་སློང་དུ་བཏང་།། 7

དེ་ཡིས་མ་ག་དྷར་ཕྱིན་ནས། རྒྱལ་པོ་འི་ཁབ་ཀྱི་གྲོང་སོང་སྟེ།
ཁྱིམ་བདག་ནོར་ནི་ཆེན་པོ་ལ། མཛེས་མཆོག་ནི་བྲམ་ཟེ་བསླངས།། 8

མགོན་མེད་ཟས་སྦྱིན་ཞེས་བྱ་བ། མཚན་ཡོད་ན་ཡོད་གྲགས་ལྡན་དེའི།
བུ་ནི་ལེགས་པར་སྐྱེས་པ་ལ། མཛེས་མ་བྱིན་ཞེས་དེ་ཡིས་སྨྲས།། 9

དེ་སྨྲས་ཡུལ་དང་འབྲེལ་བ་དག། མཆོག་ཏུ་ངེད་ཀྱི་རིགས་ལ་འོས།
ངེད་ཀྱི་བརྒྱུད་ཀྱི་བུ་མོ་རྣམས། རིན་ནི་ཤིན་ཏུ་ཆེ་བ་སྟེ།། 10

ཤིང་རྟ་མཆོག་ནི་བརྒྱ་ཕྲག་དང་། གླང་པོ་རྟ་དང་འབང་མོ་དང་།
གསེར་སྲང་རྣམས་ནི་བཞི་ཕྲག་བརྒྱ། གལ་ཏེ་ནུས་ན་སྦྱིན་པར་གྱིས།། 11

དེ་ཡིས་དེ་སྐད་བརྗོད་དེ་ལ། བྲམ་ཟེས་འཛུམ་ཞིང་ལན་སྨྲས་པ།
དེ་དག་མགོན་མེད་ཟས་སྦྱིན་གྱི། ཁྱིམ་གྱི་འབང་ཀ་ཡིན་མང་ཆུང་།། 12

བྲམ་ཟེས་བུ་མོ་འི་རིན་རྣམས་ནི། མ་ལུས་ཁ་ཡིས་བླངས་པའི་ཚེ།
ཁྱིམ་བདག་གིས་ནི་གུས་པ་ཡིས། དེ་ནི་ཟས་ལ་མགྲོན་དུ་གཉེར།། 13

कृतदानः स कालेन पुत्रवान् पुत्रवत्सलः ।
अभूत् पुत्रविवाहार्थी कन्यान्वेषणयत्नवान् ॥ ६ ॥

कन्यकां याचितुं काञ्चित् पुरं राजगृहं ततः ।
मधुस्कन्धाभिधं दक्षं ब्राह्मणं विससर्ज सः ॥ ७ ॥

आसाद्य मगधान् राजगृहं नगरमेत्य सः ।
महाधनं गृहपतिं ययाचे कन्यकां द्विजः ॥ ८ ॥

अनाथपिण्डदो नाम श्रावस्त्यामस्ति विश्रुतः ।
तत्पुत्राय सुजाताय कन्यां देहीत्युवाच सः ॥ ९ ॥

सोऽब्रवीदेष सम्बन्धः परमोऽस्मत्कुलोचितः ।
वंशेऽस्माकं तु कन्यानां शुल्कमादीयते महत् ॥ १० ॥

शतं शतं रथाग्र्याणां गजाश्वाश्वतरस्य च ।
दासीनिचयनिष्काणां दीयतां यदि शक्यते ॥ ११ ॥

इत्युक्ते तेन तं विप्रः सस्मितः प्रत्यभाषत ।
अनाथपिण्डदगृहे दास्ये शुल्कं तदल्पकम् ॥ १२ ॥

ब्राह्मणेनाखिले तस्मिन् कन्याशुल्के प्रतिश्रुते ।
तमादराद् गृहपतिर्भोजनाय न्यमन्त्रयत् ॥ १३ ॥

དེར་ནི་དེ་ཡིས་མ་བསྒྲམས་པར། བཟའ་བ་བཅའ་བ་རྣམ་མང་ཟློས།
མཚན་མོ་མ་ཞུའི་ནད་ཀྱིས་བཏབ། གདུང་བ་ཆེན་པོ་འི་ཆོ་ངེ་བཏོན།། 14

གང་ཞིག་སྲིད་པས་འཇུ་མིན་ཟློས། མཚན་མོ་གཉིད་ཀྱི་བདེ་མིན་འཛིན།
འཇིག་རྟེན་གཞན་དུ་བདེ་སྐྱིད་དེ། སྐྱེ་བའི་ལས་ནི་ཇི་ལྟར་བྱེད།། 15

མི་གཙང་བས་འཇིགས་ཁང་པ་ལས། དེ་ནི་ཕྱི་རུ་འབད་ཀྱིས་དོར།།
རང་བཞིན་ཉིད་ཀྱིས་མ་རབས་རྣམས། ཡོ་ལྡན་ལྡོས་པ་མེད་པའི་གནས།། 16

དེ་ཡི་དགེ་བའི་ལས་དག་གིས། སྙིང་རྗེས་གཉེན་པ་ཤཱ་རིའི་བུ།
མཽ་གལ་བུ་དང་འགྲོགས་ནས་ནི། ལམ་དེ་ཉིད་ནས་ཡང་དག་འོངས།། 17

དེ་དག་གིས་ནི་དལ་བྱས་དེ། སྨྱུག་མའི་རྩེ་མོ་གྲོལ་བ་ཡིས།
ཕྲིས་ཤིང་ལན་བརྒྱར་ས་ཡིས་ཀྱང་། བཀུས་དེ་དེ་ལ་ཆོས་བསྟན་སོང་།། 18

དེ་དག་མདུན་དུ་དེ་ཡང་སེམས། རབ་ཏུ་དང་བས་ལུས་བཏང་ནས།
རྒྱལ་ཆེན་བཞི་ཡི་རིགས་ཀྱི་ནི། ལྷ་ཡི་ནང་དུ་སྐྱེས་པར་གྱུར།། 19

དེར་ནི་རྣམ་ཐོས་སྲས་ཀྱི་བཀས། མི་ཡིས་འཇིག་རྟེན་ཁང་པ་དང་།
ལྷ་ཁང་སྒོ་ནི་མཆོད་པ་ལ། དེ་ཡིས་ལྷག་པར་ཉེར་གནས་བྱས།། 20

དེ་ནས་འབྲེལ་པ་ངེས་པ་ནི། སྤྲིང་ཡིག་གིས་ཞེས་བརྗོད་པ་བཞིན།
མགོན་མེད་ཟས་སྦྱིན་རང་ཉིད་ནི། རིན་རྣམས་ཁྱེར་ནས་འོངས་པར་གྱུར།། 21

स भुक्त्वा विविधं तत्र भक्ष्यभोज्यमयन्त्रितः।
रात्रौ विसूचिकाक्रान्तश्चुक्रोश विपुलव्यथः॥ १४॥

ये ऽन्नमश्नन्ति लौल्येन निशि निद्रासुखापहम्।
जन्मकर्म्म कथं कुर्य्युः परलोकसुखाय ते॥ १५॥

तत्याजाशुचिभीत्या तं गृहात् परिजनो वहिः।
आस्पदं नैरपेक्ष्यस्य जात्या दासजनः शठः॥ १६॥

शुभेन कर्म्मणा तस्य संप्राप्तस्तेन वर्त्मना।
समौद्गल्यायनः शारिपुत्रः कारुण्यपेशलः॥ १७॥

तं वंशस्य दलाग्रेण निर्लिख्यापि तया मृदा।
प्रक्षाल्य धर्म्ममादिश्य तौ तस्य ययतुः शनैः॥ १८॥

सोऽपि चित्तं तयोरग्रे प्रसाद्य त्यक्तविग्रहः।
चतुर्महाराजिकेषु देवेषु समजायत॥ १९॥

तत्र विश्रवणादेशान् मर्त्यलोके निकेतने।
स चक्रे शिविरद्वारे पूजाधिष्ठानसंनिधिम्॥ २०॥

लेखविज्ञातसम्बन्धनिश्चयोऽथ यथोदितम्।
अनाथपिण्डदः शुल्कमादाय स्वयमाययौ॥ २१॥

འབྲིལ་བའི་ཁྱིམ་དུ་ཕྱིན་པ་ན། རྒྱལ་པོ་ལ་འོས་ཟས་ཀྱི་ཚོགས།
ཕུན་ཚོགས་རི་ཡི་རྣམ་པ་ཅན། ངོ་མཚར་བསྐྲུན་པ་དེ་ཡིས་མཐོང་།། 22

ཁྱིམ་བདག་ལ་ནི་ཨ་མཚན་ལས། དྲི་མེད་ཡིད་ལྡན་དེ་ཡིས་དྲིས།
བཟའ་བ་རབ་མང་བཤམས་པ་འདི། རྒྱལ་པོ་མགྲོན་དུ་གཉེར་རམ་ཅི།། 23

དེ་ཡིས་དེར་སླུས་སངས་རྒྱས་ནི། བཅོམ་ལྡན་དགེ་འདུན་དང་བཅས་པ།
བདག་གིས་བདག་གི་དགའ་ཆེན་ནི། རང་གི་བསོད་ནམས་ལ་མགྲོན་གཉེར།། 24

ཞེས་པ་སངས་རྒྱས་མཚན་བརྗོད་པས། སྤུ་ལོང་གིས་ནི་རབ་རྒྱས་དེ།
འཕྲལ་ཉིད་ཟླ་བའི་ཁུ་བ་ཡིས། དེ་ནི་ཡོངས་སུ་བཀང་བཞིན་གྱུར།། 25

དོན་དམ་རྣམ་པར་རིག་མིན་སུ་ཞིག་གི་ནི་མིང་ཙམ་ལས།
གང་ཡང་སྐྱེ་བས་བཅིངས་པའི་ལྷན་སྐྱེས་དངོས་པོ་རབ་དུ་རྒྱས།
རབ་གསལ་སྦྱིན་གྱི་སྒྲ་ལ་དགའ་ཞིང་མངོན་འདོད་གསར་བ་ཡིས།
རྨ་བྱ་རོལ་སྐྱིག་གར་དང་འཕྱུར་བའི་སྤྱོད་ལ་རིག་པར་བྱེད།། 26

འོད་ཟེར་རབ་གསལ་བཞིན་རས་ཀྱིས། པདྨོ་ལས་སྐྱེས་དེས་སླུས་པ།
སངས་རྒྱས་བཅོམ་ལྡན་ཞེས་པ་སུ། དགེ་འདུན་ཞེས་ནི་སུ་ལ་བརྗོད།། 27

དེ་ཡིས་འདི་དྲིས་ཁྱིམ་བདག་གིས། འཛུམ་དང་བཅས་པས་རབ་སླུས་པ།
ཀྱེ་མ་ས་གསུམ་དག་གི་ནི། སྟོན་པ་ཁྱོད་ཀྱིས་མི་ཤེས་སམ།། 28

स सम्बन्धिगृहं प्राप्य ददर्शाश्चर्य्यकारिणीम् ।
शिखराकारराजार्हभक्ष्यसंभारसम्पदम् ॥ २२ ॥

स विस्मयाद् गृहपतिं पप्रच्छ स्वच्छमानसः ।
भूरिभक्ष्योत्सवः कोऽयमपि राजनिमन्त्रितः ॥ २३ ॥

स तं बभाषे भगवान् बुद्धः सङ्घपरिग्रहः ।
मया निमन्त्रितः सङ्घे सोऽयं मम महोत्सवः ॥ २४ ॥

इति बुद्धाभिधानेन जातरोमाञ्चकण्टकः ।
इन्दुस्यन्दिरिवाक्लिन्नः सहसैव बभूव सः ॥ २५ ॥

अविदितपरमार्थे कस्यचिन् नाममात्रे
स्फुरति सहजभावः कोऽपि जन्मानुबन्धः ।
अभिनवघननादे व्यक्तहर्षाभिलाषः
स्पृशति ललितनृत्योद्वृत्तवृत्तिं मयूरः ॥ २६ ॥

सोऽवदद्वदनाम्भोजसंजाताभिनवद्युतिः ।
क एष भगवान् बुद्धः कश्च सङ्घोऽभिधीयते ॥ २७ ॥

इति पृष्टो गृहपतिस्तेन प्रोवाच सस्मितः ।
अहोवत न जानीषे शास्तारं भुवनत्रये ॥ २८ ॥

འཁོར་བའི་ཞགས་པས་འཛིགས་ནས་སྐྱབས། འཚོ་བའི་སྐྱབས་གྱུར་རྒྱལ་བ་དེ།
འཛིག་རྟེན་ན་ནི་སུ་ཞིག་གིས། མི་ཤེས་བ་དེ་མཆོག་ཏུ་བསྔུས། 29

སྐྱབས་ཀྱི་ཐབས་ནི་མི་ཤེས་པར། གང་གིས་ན་ཚོད་ཟད་པར་བྱས།
གདི་ལྕུག་གི་རིག་སྐྱེ་བ་ནི། འབྲས་མེད་བྱས་པ་དེ་ཡིས་ཏེ།། 30

གཽཏུ་དམ་སངས་རྒྱས་བཅོམ་ལྡན་འདས། ཤཱ་ཀྱའི་རྒྱལ་པོ་འི་རིགས་ལས་འཁྲུངས།
ཁྲིམ་སྤྱངས་ཟླ་མེད་བྱང་ཆུབ་ཏུ། ཡང་དག་རྫོགས་པར་སངས་རྒྱས་པ།། 31

དེ་ཡིས་མཆོག་ཏུ་རྗེས་བཟུང་བས། ཕྱི་ནས་རབ་ཏུ་བྱུང་གྱུར་པ།
འདོད་ཆགས་བྲལ་བའི་དགེ་སློང་གིས། ཚོགས་ལ་དགེ་འདུན་ཞེས་སུ་བརྗོད།། 32

སངས་རྒྱས་གཙོར་བྱས་དགེ་འདུན་ནི། བསོད་ནམས་ཟློད་གིས་རྙེད་གྱུར་ནས།
རང་གི་དགེ་བ་འཚོལ་བྱེད་པ། བདག་གི་གུས་པས་མགྲོན་དུ་གཉེར།། 33

དེ་སྐད་དེ་ཡི་ཚིག་ཐོས་ནས། མགོན་མེད་ཟས་སྦྱིན་དེ་དྲན་ཞིང་།
སངས་རྒྱས་ལ་དམིགས་བསྙོམ་པ་ཡིས། མཚན་མོ་གཉིད་དུ་ཡང་དག་སོང་།། 34

མཚན་མོ་འི་ལྷག་མའི་ཐུན་ལ་ནི། འདོད་པས་ཡང་དག་དྲངས་པ་བཞིན།
ཐོ་རངས་ཞེས་ཤེས་གྲོང་ཁྱེར་ཀྱི། སྔ་ནས་དེ་ནི་ཕྱི་རོལ་སོང་།། 35

སྔ་ཡི་ལྷ་ཁང་དུ་ཕྱིན་པས། དེ་ཡི་ལྷ་དང་ཡང་དག་སྤྲད།
སྤྲང་སྟིའི་ཕྱུང་པོས་བསྟན་པ་ཡི། མཆོག་གི་ལམ་ནི་ཐོབ་པར་གྱུར།། 36

संसारपाशभीतानां शरण्यं शरणैषिणाम् ।
जिनं यस्तं न जानाति स लोके वञ्चितः परम् ॥ २९ ॥

किं तेन मोहलीनेन विकलीकृतजन्मना ।
अज्ञानतरणोपायं वयो येन व्ययीकृतम् ॥ ३० ॥

गौतमो भगवान् बुद्धः शाक्यराजकुलोद्भवः ।
संबुध्यानुत्तरं सम्यक् संबोधिमनगारिकः ॥ ३१ ॥

पश्चात् प्रव्रजितानां च तस्यैवानुग्रहात् परम् ।
भिक्षूणां गतरागाणां समूहः सङ्घ उच्यते ॥ ३२ ॥

स एष बुद्धप्रमुखः सङ्घः स्वकुशलैषिणा ।
मया पुण्यपणं प्राप्य प्रणयेन निमन्त्रितः ॥ ३३ ॥

इति तद्वचनं श्रुत्वा तत् स्मृत्वानाथपिण्डदः ।
बुद्धालम्बनभावेन निशि निद्रां समाययौ ॥ ३४ ॥

रजन्यां यामशेषायां समाकृष्ट इवोत्सुकः ।
प्रभातमिति स ज्ञात्वा पुरद्वारेण निर्ययौ ॥ ३५ ॥

शिविकाद्वारमासाद्य संप्राप्त इव देवताम् ।
मधुस्कन्धेन निर्दिष्टं श्रेयःपन्थानमाप्तवान् ॥ ३६ ॥

དེ་ནས་དེ་ཡིས་བཅོམ་ལྡན་ཐོབ། སྒོམ་པས་གདུངས་པས་བདུད་རྩི་བཞིན།
རབ་དགའི་དྲི་བཟང་བདེ་བ་ཡིས། ཉམས་སུ་མྱོང་བ་དཔེ་མེད་གྱུར།། 37

ལམ་འགྲོན་སྒོམ་པས་གུས་བཅས་པར། རིང་ནས་གྲིབ་བསིལ་ལྗོན་པ་བཞིན།
ཞི་ཞིང་ངལ་བསོས་བསིལ་བ་དེ། ཐོབ་ཅིང་ཡོངས་སུ་གདུང་བ་བྲལ།། 38

དེ་ཡི་ཡིད་ནི་དྲི་མ་དང་། བྲལ་བ་དེ་མཐོང་ཉིད་ཀྱིས་ཐོབ།
ནམ་མཁའ་སྤྲིན་དང་ཕྲད་པ་ཡིས། སྤྲིན་གྱི་ཚོགས་དང་བྲལ་བ་བཞིན།། 39

གང་ཡང་བསོད་ནམས་ངང་ཚུལ་དང་། བཀའ་དྲིན་ལྡན་པའི་མཐུ་དེ་ནི།
རང་གི་དྲིན་གྱི་སེམས་ཀྱིས་ནི། སྤྱོད་ཚུལ་འགེགས་མེད་འགྱུར་བ་ཡིན།། 40

དེ་བསམས་ཀྱི་མ་བདག་གི་ནི། ཡང་དག་སྨོངས་པ་འདི་དང་བྲལ།
རྣམ་འགྱུར་འདི་ནི་རྗེས་སུ་བཅད། རབ་ཏུ་ཞི་བ་ཕུན་ཚོགས་སྐྱེས།། 41

བཅོམ་ལྡན་འདས་འདི་བདག་གིས་སྟོན། གང་ཞིག་མཐོང་བར་མ་གྱུར་བསླུས།
སྐུ་འདི་སྐལ་ལྡན་མིན་པ་ཡིས། མིག་གི་སྤྱོད་ཚུལ་མི་འགྱུར་རོ།། 42

གཟིགས་པའི་བཅུད་ཀྱི་བདུད་རྩི་ཡིད་འོང་རྒྱ་ཆེའི་རི་བོང་ཅན་ལྟར་ཉམས་སུ་བདེ།
སྤྱོད་ཚུལ་སྙིང་རྗེ་དར་ལ་བབ་པའི་དབང་གྱུར་རབ་ཏུ་དང་བའི་རང་བཞིན་བློ།
འཁོར་བ་དག་ནི་མེད་པར་དགྱེས་ཀྱང་ཡོངས་སུ་འཛིན་ཅིང་རབ་ཏུ་ཉེ་བར་གནས།
ཕུལ་དུ་བྱུང་བ་འདི་ནི་རྡུལ་བྲལ་རྣམས་ཀྱི་ཆགས་པ་ཉིད་དང་བྲལ་བར་བགྱིད།། 43

भगवान् तं ततः प्राप्य स तृष्णार्त्त इवामृतम् ।
बभूवानुपमास्वादं प्रमोदामोदनिर्वृतः ॥ ३७ ॥

तं दृष्ट्वा सादरं दूरात् छायातरुमिवाध्वगः ।
अवाप गतसन्तापः शान्तिं विश्रान्तिशीतलाम् ॥ ३८ ॥

तस्य तद्दर्शनेनैव विमलाभिगतं मनः ।
शरत्समागमेनेव घनध्वान्तोज्झितं नभः ॥ ३९ ॥

स कोऽपि पुण्यशीलानामनुभावः प्रसादिनाम् ।
भवन्ति यत्प्रसादेन निर्विघ्नाश्चित्तवृत्तयः ॥ ४० ॥

सोऽचिन्तयदहो मोहविहीनस्य हि मे तथा ।
अनुच्छेदविकारोऽयं जातः प्रशमसम्पदः ॥ ४१ ॥

वञ्चितोऽस्मि न यत् पूर्व्वं दृष्टोऽयं भगवान् मया ।
नाधन्यानामियं याति मूर्त्तिर्लोचनगोचरम् ॥ ४२ ॥

अमृतमधुरोदारा दृष्टिर्द्युतिः शशिपेशला
तरुणकरुणायत्ता वृत्तिः प्रसादमयी मतिः ।
अयमतिशयं प्रत्यासन्नः करोति विरागतां
विगतरजसां निःसंसारः प्रियोऽपि परिग्रहः ॥ ४३ ॥

ཅེས་བསམས་ནས་ཀུན་དགའ་ལྡན་པ་དེས། ཉེ་བར་བདུད་ནས་དེ་ཡི་ནི།
ཞབས་ཀྱི་པདྨར་ཕྱག་འཚལ་བ། རབ་ཏུ་དང་བའི་སེམས་ཀྱིས་བསྐྲུབས།། 44

དེར་ནི་འོངས་ལ་བཅོམ་ལྡན་ཡང་། རབ་དང་དགྱེས་པའི་མཚན་ཉིད་ཅན།
སྙིང་རྗེ་རྫོགས་པའི་ཟོ་ཉ་ཡིས། བཞིན་རས་མཛེས་པས་བཀའ་སྩལ་པ།། 45

དེ་ཡི་དབུགས་འབྱིན་སྐྱེད་པའི་སྨན། སྐྱེ་རྡུལ་དག་སྐྲད་བདུད་རྩི་ཡི།
ཆུ་བོ་རབ་འབབ་ཅི་ཡང་ནི། ངེས་པར་དེ་ལ་རྣམ་པར་སྤྲོས།། 46

དེ་ནས་དེ་ལ་བཅོམ་ལྡན་གྱིས། འཕགས་པའི་བདེན་པ་བཞི་པོ་རྣམས།
རབ་ཏུ་རྟོགས་པ་སྒྲུབ་བྱེད་པ། ལེགས་ལྡན་ཆོས་ནི་བསྟན་པ་མཛད།། 47

སྟོན་པའི་བཀའ་ལས་ཉོན་མོངས་ཀྱི། རྒྱུད་ནི་མཐའ་དག་ཞིག་པ་དེས།
རང་གི་སྐྱེ་བ་བརྗོད་བྱས་ནས། དེ་ལ་ཕྱག་འཚལ་དེར་གསོལ་པ།། 48

བཅོམ་ལྡན་བདག་ནི་ཤིན་ཏུ་འདས། བཅོམ་ལྡན་འདས་ལ་སྐྱབས་སུ་སོང་།
གོམས་པའི་བག་ཆགས་རྣམ་པར་ཞིག། འཁོར་བར་མཆོག་ཏུ་བདག་མི་དགའ།། 49

ཆེན་པོ་རྣམས་ཀྱིས་གཟིགས་པ་ནི། མི་དགེ་བ་དག་རིང་དུ་བྱེད།
དགེ་བ་སྦྱར་བར་རབ་ཏུ་སྟེར། རིགས་པའི་སྤྱོད་པ་གསལ་བར་བྱེད།། 50

ཁྱོད་ནི་བཞུགས་སྐད་གསུས་པ་ལས། གཙུག་ལག་ཁང་མཆོག་བདེར་འོས་པ།
ཡིད་འོང་རིན་ཅན་སྙིང་པོའི་གནས། རང་གི་གྲོང་དུ་བདག་བགྱིད་དོ།། 51

इति चित्तप्रसादेन चिन्तयन्नुपसृत्य सः ।
विदधे तस्य सानन्दः पादपद्माभिवन्दनम् ॥ ४४ ॥

भगवानपि तत्प्राप्तिप्रसादानन्दलक्षणाम् ।
उवाह वदनच्छायां पूर्णकारुण्यपूरितम् ॥ ४५ ॥

दृष्टिमाश्वासजननीं कामं कामपि तस्य सः ।
विससर्जोज्ज्वलां जन्मरजःशुद्ध्यै सुधानदीम् ॥ ४६ ॥

अथास्य भगवान् भद्रां विदधे धर्म्मदेशनाम् ।
चतुर्णामार्य्यसत्यानां प्रतिभावविधायिनीम् ॥ ४७ ॥

स शासनाद्विसंव्यस्तसमस्तक्लेशसन्ततिः ।
निजं जन्म निवेद्यास्मै प्रणतस्तमभाषत ॥ ४८ ॥

अतिक्रान्तोऽस्मि भगवन् भवन्तं शरणं गतः ।
विपन्नवासनाभ्यासः संसारे न रमे परम् ॥ ४९ ॥

करोत्यकुशलं दूरे शुभमाशु प्रयच्छति ।
सूचयत्युचिताचारं महतामवलोकनम् ॥ ५० ॥

सुखार्हं त्वद्विहाराय विहारं परमादरात् ।
रत्नसारपुरोदारं स्वपुरं कारयाम्यहम् ॥ ५१ ॥

དེར་ནི་སྐལ་ལྡན་བདག་ཅག་གིས། མཆོག་དང་རིམ་གྲོས་བསྟན་པ་ན།
བཅོམ་ལྡན་རྟག་ཏུ་བཞུགས་པ་ཡིས། རྗེས་སུ་བཟུང་བ་དག་ཏུ་མཛོད།། 52

ཅེས་པའི་དོན་གཉེར་དེ་བཞིན་ཞེས། བཅོམ་ལྡན་འདས་ཀྱིས་དེ་ལ་གནང་།
གང་ཕྱིར་དགེ་བ་གསུམ་པ་ཡིས། དོན་གཉེར་འཛེམས་ལ་བསྟན་པ་མིན།། 53

དེ་ནས་བཅོམ་ལྡན་ལ་ཞུས་ནས། དེ་ཡི་བཀའ་ཡིས་དགེ་སློང་ནི།
ཤ་རི་བུ་དང་ལྷན་ཅིག་ཏུ། དེ་ནི་མཉན་ཡོད་གྲོང་ཁྱེར་སོང་།། 54

དེར་ནི་རྒྱལ་བྱེད་གཞོན་ནུ་ཡིས། གསེར་གྱི་རིན་ནི་ཆེན་པོ་ལ།
ནགས་ཚལ་ཁྲི་པ་བླངས་ནས་དེས། གཙུག་ལག་ཁང་གི་ཐིག་རྣམས་བཏབ།། 55

དེ་ནས་མགོན་མེད་ཟས་སྦྱིན་ནི། ལྷ་རྣམས་དག་གིས་གྲོགས་བྱས་པས།
མཐོ་རིས་རྣམ་པའི་གཙུག་ལག་ཁང་། གུས་ཤིང་སྤྲོ་བས་རབ་ཏུ་བརྩིགས།། 56

དེར་ནི་རྒྱལ་བྱེད་གཞོན་ནུ་ཡང་། མཆོག་ཏུ་བཅོམ་ལྡན་ལ་གུས་པས།
གྲགས་དང་བསོད་ནམས་བསྒྲུབ་པའི་སླད། སྒོ་ཡི་ཁང་པ་བྱས་པར་གྱུར།། 57

དེ་ནས་རྨད་བྱུང་གཙུག་ལག་ཁང་། དེ་བརྩམས་ཞེ་སྡང་གིས་འཁྲུགས་པའི།
མུ་སྟེགས་ཀྱིས་མཐོང་སྨོད་བྱས་ཤིང་། འགལ་བ་བརྗོད་པས་རྩོད་པ་བྱས།། 58

དེ་དག་གིས་གཙོ་མིག་དམར་ནི། སྤྲུལ་ནག་ཕྱོགས་དང་བཅས་པ་བཞིན།
ངན་མཁས་དག་གི་ཕྲག་དོག་ལས། མདུན་ས་དག་ནི་འཛིག་པར་བྱས།། 59

करोतु तत्र भगवान् सततं स्थित्यनुग्रहम् ।
धनैरासेवितोऽस्माभिः सपर्य्यापरिचर्य्यया ॥ ५२ ॥

इत्यर्थनां तथेत्यस्य भगवान् प्रत्यपद्यत ।
प्रणयिप्रार्थनाभङ्गप्रगल्भा न हि साधवः ॥ ५३ ॥

भगवन्तमथामन्त्र्य श्रावस्तीं स पुरीं ययौ ।
तदादिष्टेन सहितः शारिपुत्रेण भिक्षुणा ॥ ५४ ॥

तत्र जेतकुमारेण हिरण्यार्घेण भूयसा ।
दत्तं काञ्चनमादाय विहारं तमरचयत् ॥ ५५ ॥

भक्त्युत्साहादथारम्भकृतसाहायकः सुरैः ।
विहारं त्रिदिवाकारं चकारानाथपिण्डदः ॥ ५६ ॥

तत्र जेतकुमारोऽपि भक्त्या भगवतः परम् ।
यशःपुण्यप्रतिष्ठायै विदधे द्वारकोष्ठकम् ॥ ५७ ॥

अथ तीर्थ्यास्तमालोक्य विहारारम्भमद्भुतम् ।
सापवादविवादेन चक्रे द्वेषाकुलः कलिम् ॥ ५८ ॥

रक्ताक्षप्रमुखस्तेषां मात्सर्य्यात् क्षुद्रपण्डितः ।
सपक्ष इव कृष्णाहिश्चकितः पुरतः सदा ॥ ५९ ॥

དེ་ཡིས་རྩོད་པ་རྒྱལ་བའི་བར། གཙུག་ལག་ཁང་གི་ཚོགས་བཀག་ཆོ།
མགོན་མེད་ཟས་སྦྱིན་ཚོགས་དག་གིས། ཤཱ་རིའི་བུ་ནི་ཡང་དག་འོངས།། 60

དེ་ནས་མིག་དམར་དག་གི་མཐུ། ཁྱོད་འཕགས་བསྟན་ཕྱིར་དེ་བོས་ནས།
མིག་འཕྲུལ་སྟོབས་ཀྱིས་རབ་རྒྱས་པ། ས་ད་ཀ་རའི་ལྡིར་པ་བསྟན།། 61

ཤཱ་རིའི་བུ་ཡི་མཐུས་བསླངས་པའི། རླུང་སྟུག་ཆེན་པོ་ཆེ་བ་ཡིས།
སྨུ་སྤྲིགས་ཕྲེད་ཀྱི་སྒྲོ་བ་བཞིན། རྩ་ནས་འཐོན་ཞིང་དུམ་བུར་གྱུར།། 62

དེ་ནས་མིག་དམར་གྱིས་སྤྲུལ་བ་དེ། མེ་ཏོག་རྒྱས་པའི་པ་དྨོ་ཅན།
ཤཱ་རིའི་བུ་ཡིས་རྣམ་སྤྲུལ་བའི། གླང་པོས་འདམ་རྫབ་ལྷག་མར་བྱས།། 63

མིག་དམར་སྟོབས་ཀྱིས་བཞག་པ་ཡིས། ལྟོས་འགྲོ་ཆེན་པོ་མགོ་བདུན་པ།
ཤཱ་རིའི་བུ་ཡིས་སྤྲུ་ཁྱུང་གིས། གཤོག་པའི་རྩེ་མོའི་རླུང་གིས་འཐངས།། 64

དེ་ནས་དེས་བཀག་རོ་ལངས་ལ། ཤཱ་རིའི་བུ་ཡི་སྲུང་བྱས་བཏབ།
སྔགས་ཀྱི་བཙོན་འགྲུས་ཀྱིས་བསྐུལ་ནས། མིག་དམར་གསོད་དུ་རབ་ཏུ་སོང་།། 65

རོ་ལངས་ཀྱིས་བཅོམ་སྐྲག་པ་ལས། ང་རྒྱལ་རྒྱགས་པའི་རིམས་ཞི་ནས།
དེ་ནི་ཞབས་ལ་གཏུགས་བྱས་དེ། ཤཱ་རིའི་བུ་ལ་སྐྱབས་སུ་སོང་།། 66

བཅོམ་པ་དེ་ཡི་མིག་དམར་དེ། སྐྱབས་འོས་དག་ལ་སྐྱབས་སོང་ནས།
རབ་ཏུ་བྱུང་བ་འདོད་ཆགས་བྲལ། དག་པའི་བྱང་ཆུབ་ཐོབ་པར་གྱུར།། 67

रुद्धे विहारसम्भारे तेन वादजयावधिः ।
अनाथपिण्डदगिरा शारिपुत्रः समाययौ ॥ ६० ॥

रक्ताक्षोऽथ तमाहूय प्रभावोत्कर्षदर्शने ।
इन्द्रजालबलोत्फुल्लं सहकारमदर्शयत् ॥ ६१ ॥

शारिपुत्रप्रभावोत्थैर्विपुलैस्तन्मुखानिलैः ।
उन्मूलितः शकलतां तीर्थ्योत्साह इवाप सः ॥ ६२ ॥

रक्ताक्षविहितां फुल्लकमलां पद्मिनीं ततः ।
पङ्कशेषां द्विपश्चक्रे शारिपुत्रविनिर्म्मितः ॥ ६३ ॥

रक्ताक्षवक्षीनिक्षिप्तः सप्तशीर्षमहोरगः ।
शारिपुत्रेण निक्षिप्तस्तार्क्ष्यः पक्षाग्रमारुतैः ॥ ६४ ॥

तदाहूतोऽथ वेतालः शारिपुत्रेण कीलितः ।
प्रेरितो मन्त्रवीर्य्येण रक्ताक्षं हन्तुमुद्ययौ ॥ ६५ ॥

वेतालाभिहतस्त्रासान्नश्यन्मानमदज्वरः ।
शरणं पादपतितः शारिपुत्रं जगाम सः ॥ ६६ ॥

रक्ताक्षस्तेन भङ्गेन शरण्यं शरणं गतः ।
प्रव्रज्यायां वीतरागः शुद्धां बोधिमवाप्तवान् ॥ ६७ ॥

མུ་སྟེགས་གཞན་རྣམས་ཡོངས་སྤང་དང་། ཁྲོ་བའི་ཕ་རོལ་བསྒྲལ་འདོད་པ།
དགེ་སློང་དག་ལ་གཏོད་བཙོན་ཞིང་། དེ་ན་ལས་བྱེད་ཟློལ་གྱིས་གནས།། 68

དེ་ནས་དེ་དག་ཤཱ་རིའི་བུས། དུས་སུ་དེ་ལས་འཁྲུ་ཤས་ནས།
དེ་ཡི་སྤྱན་ཟུར་ཙམ་ཉིད་ཀྱིས། ཡིད་ནི་བྱམས་དང་ལྡན་པར་གྱུར།། 69

ཁམས་དང་བསམས་པ་བག་ལ་ཉལ། རང་བཞིན་དག་ཀྱང་སྤྱད་ནས་དེ།
ཆོས་ནི་བསྟན་པས་དེ་དག་རྣམས། བླ་མེད་གནས་སྐབས་དག་ལ་བཀོད།། 70

དེ་ནས་གཙུག་ལག་ཁང་དེའི་ལས། བརྩམས་པ་བགེགས་དང་བྲལ་བའི་ཚེ།
འཛུམ་པའི་བཞིན་ལྡན་ཤཱ་རིའི་བུས། མགོན་མེད་ཟས་སྦྱིན་ལ་སྨྲས་པ།། 71

གཙུག་ལག་ཁང་གི་ཐིག་བཏབ་པའི། དུས་མཚུངས་ཉིད་དུ་དགའ་ལྡན་གྱི།
ལྷ་ཡི་གནས་སུ་གསེར་གྱི་ནི། གཙུག་ལག་ཁང་ཆེན་ཡང་དག་གྲུབ།། 72

དེ་ཐོས་གུས་པ་ཉིས་འགྱུར་གྱིས། རབ་དུ་དང་བ་ཡང་དག་སྐྱེས།
རིན་ཅེན་གསེར་མཆོག་ཁང་པ་ཡི། གཙུག་ལག་ཁང་ནི་དེ་ཡིས་བྱས།། 73

དེ་ནས་བཅོམ་ལྡན་རྒྱལ་བ་ལ། གསོལ་དེ་ལྷ་དང་ལྷན་ཅིག་ནི།
ལམ་དུ་དེ་ཡིས་ཉེར་བསྒྲུབས་པའི། རྒྱལ་པོ་ལ་འོས་འབྱོར་པས་བྱོན།། 74

དེ་ནི་བྱོན་པ་ལ་དགའ་ནས། སྲིད་གསུམ་རབ་དུ་དང་བའི་ཚེ།
དེ་ལ་མགོན་མེད་ཟས་སྦྱིན་གྱིས། ཚ་ཡི་རྒྱན་ནི་རབ་དུ་བསྒྲེངས།། 75

तीर्थ्यास्त्वन्ये परिद्वेषक्रोधपारमितांशवः ।
तत्र कर्म्मकरव्याजात्तस्थुर्भिक्षुवधोद्यताः ॥ ६८ ॥

तेऽथ धर्म्मद्रुहः काले शारिपुत्रेण लक्षिताः ।
तद्दृष्टिपातमात्रेण बभूवुर्मैत्रमानसाः ॥ ६९ ॥

आशयानुशयं धातुं प्रकृतिं च विचार्य्य सः ।
धर्म्मदेशनया तेषां दिदेशानुत्तरां दशाम् ॥ ७० ॥

अथ तस्य विहारस्य निर्विघ्नारम्भकर्म्मणि ।
अनाथपिण्डदं प्राह शारिपुत्रः स्मिताननः ॥ ७१ ॥

विहारसूत्रपातस्य तुल्य एव क्षणे महान् ।
हैमोविहारः संवृत्तस्तुषिते देवसद्मनि ॥ ७२ ॥

एतदाकर्ण्य संजातप्रसादद्विगुणान्तरः ।
हेमरत्नवरागारं विहारं समकारयत् ॥ ७३ ॥

विभवैरथ राजार्हैः पथि तेनोपकल्पितैः ।
विघ्नतस्त्रिदिवैः सार्द्धमाययौ भगवान् जिनः ॥ ७४ ॥

तदागमनहर्षेण प्रसन्ने भुवनत्रये ।
अनाथपिण्डदस्तस्मै वारिधारामपातयत् ॥ ७५ ॥

གང་གི་ཚེ་ན་ཕྱོགས་དེ་རུ། ཆུ་ཡི་རྒྱུན་ནི་མ་བབས་པ།
དེ་ཚེ་གཞན་དུ་བཅོམ་ལྡན་གྱི། གསུང་ལས་རྒྱུན་དང་ལྡན་པར་བབས།། 76

དེ་མཐོང་མཚར་ནས་དགེ་སློང་གིས། ཞུས་ཤིང་བཅོམ་ལྡན་འདས་ཀྱིས་སྨྲར།
བཀའ་སྩལ་ཆུ་འདིར་རིངས་པ་ཡི། རྒྱུ་ནི་རབ་ཏུ་མཉན་པར་གྱིས།། 77

སྔོན་གྱི་སངས་རྒྱལ་རྣམས་ལ་འདིས། གནས་འདི་ཡི་ནི་འདི་ཉིད་དུ།
རབ་ཏུ་བྱིན་པར་གྱུར་ཏོ་ཞེས། ཆུ་རྒྱུན་འདི་ནི་གཞན་དུ་ལྷུང་།། 78

སྔོན་གྱི་ཡང་དག་རྫོགས་སངས་རྒྱས། རྣམ་པར་གཟིགས་ལ་འདི་ཉིད་ཀྱིས།
མཆོག་གི་ཀུན་དགའ་ར་བ་ཡི། ས་ཕྱོགས་འདི་ཉིད་རབ་ཏུ་བྱིན།། 79

རྒྱལ་གྱི་སྐྱེ་བ་དག་ལ་ཡང་། སངས་རྒྱས་གཙུག་ཏོར་ཅན་ལ་ཕུལ།
དེ་ནས་ར་གཱུའི་སྐྱེ་བ་ལ། རྒྱལ་བ་ཐམས་ཅད་སྐྱོབས་ལ་ཕུལ།། 80

སྲིད་པས་བྱིན་ཞེས་གྱུར་པ་ན། འཁོར་བ་འཛིག་ལ་རབ་ཏུ་ཕུལ།
ཆེན་པོའི་བདག་ཏུ་གྱུར་པའི་ཚེ། སྐྱོབ་པ་གསེར་ཞེས་བྱ་ལ་ཕུལ།། 81

ཨཱ་ཁ་ར་ཡི་སྐྱེ་བ་ལ། སླར་ཡང་འོད་སྲུངས་ལ་འདི་ཕུལ།
ད་ལྟ་ང་ལ་འདི་ཉིད་ཀྱིས། ཡུལ་འདི་དག་ནི་རབ་ཏུ་བྱིན།། 82

དུས་ཀྱི་ནོར་བཟང་ཞེས་པས་འདི། བྱམས་པ་ལ་ནི་འབུལ་བར་འགྱུར།
སྙིང་སྟོབས་བཟོད་པ་ཚུལ་ཁྲིམས་དང་། ལྡན་རྫིར་འདི་ཡི་གཏེར་རྣམས་མཐོང་།། 83

तस्मिन् यदा न प्रदेशे वारिधारा पपात सा ।
तदा भगवतो वाक्याद् त्वरितं पतितान्यतः ॥ ७६ ॥

तं दृष्ट्वा कौतुकात् पृष्टो भिक्षुभिर्भगवान् पुनः ।
उवाच श्रूयतामेतद् वारिस्तम्भस्य कारणम् ॥ ७७ ॥

अनेन पूर्व्वबुद्धेभ्यो अस्मिन्नेवेदमास्पदम् ।
प्रतिपादितमित्येषा वारिधारान्यतश्च्युता ॥ ७८ ॥

अनेनैव पुरा सम्यक्सम्बुद्धाय विपश्यिने ।
अयमेव वरारामप्रदेशः प्रतिपादितः ॥ ७९ ॥

बुद्धाय शिखिने प्रादात् पुष्यजन्मन्ययं पुनः ।
ततो ददौ विश्वभुवे जिनाय रघुजन्मनि ॥ ८० ॥

भवदत्ताभिधोभूत्वा ककुच्छन्दाय दत्तवान् ।
ददौ वृहस्पतिर्भूत्वा कनकाख्याय तायिने ॥ ८१ ॥

काश्यपाय पुनश्चायं प्रादादाषाढ़जन्मनि ।
अनेनैवाधुना मह्यं देशोऽयं प्रतिपादितः ॥ ८२ ॥

कालेन सुधनाख्योऽयं मैत्रेयाय प्रदास्यति ।
सत्त्ववान् क्षान्तिशीलत्वान्निधानान्येष पश्यति ॥ ८३ ॥

སྦྲོ་ཡང་ཁྲིམས་ཀྱི་བདག་པོ་འདི། གསེར་སྦྲིན་ཞེས་པར་གྱུར་པ་ན།
རང་སངས་རྒྱས་ནི་སྒྲ་ངན་ལས། འདས་པའི་ལེགས་པར་བྱ་བ་བྱས།། 84

རིན་ཅེན་བུམ་པར་དེ་ཡི་གདུང་། བཅུག་ནས་སྨོན་ལམ་བཏབ་པ་ལས།
ད་ལྟ་རིན་ཅེན་མཛོད་འོས་པའི། གསེར་གྱི་སྦྱོར་དུ་འདི་གྱུར་དོ།། 85

དགེ་སློང་དེ་དག་རྣམས་ཀྱིས་བདུད་རྩིའི་སྙིང་པོ་བཞིན།
སྟོན་པའི་གསུང་གིས་མངོན་པར་བརྗོད་འདི་ཐོས་ནས།
ཁྲིད་པོར་རབ་གནས་ཀྱིས་བསྐྱབས་བསོད་ནམས་རྒྱས་པ་ཡི།
མི་རྟག་ལྷག་པར་གནས་པས་མཆོག་ཏུ་དགའ་བར་གྱུར།། 86

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་རྒྱལ་བྱེད་ཀྱི་ཚལ་ཡོངས་སུ་བཟུང་
བའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་གཅིག་པའོ།།

पुनश्चायं गृहपतिर्भूत्वा हेमप्रदाभिधः।
चक्रे प्रत्येकबुद्धस्य संस्कारं परिनिर्वृतौ ॥ ८४ ॥

रत्नकुम्भे तदस्थीनि धृत्वा तत्प्रणिधानतः।
अधुना रत्नकोशार्हः संजातोऽयं सुवर्णभाक् ॥ ८५ ॥

श्रुत्वेति शास्तुर्वचनाभिधानं
ते भिक्षवः सारमिवामृतस्य।
कर्तुः प्रतिष्ठाञ्जितपूर्णपुण्य-
पुष्पाधिवासेन भृशं ननन्दुः ॥ ८६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
जेतवनप्रतिग्रहावदानं नाम एकविंशः पल्लवः।

ཡལ་འདབ་ཉི་ཤུ་རྩ་གཉིས་པ།

ཀྱེ་མ་ལེགས་ལྡན་རིན་ཐང་ཆེ་བའི་ཆེན་པོ་ཉིད།
ནོར་བུ་བཞིན་དུ་ཡོན་དན་བླ་མ་ཉིད་ཀྱིས་འཐོབ།
ཡོན་དན་མེད་པར་གང་ཞིག་ལུས་ཀྱི་བླ་མ་ཉིད།
རྫོ་ལས་རགས་པ་བཞིན་དུ་དེ་ནི་འབྲས་བུ་མེད༎ 1

ཤཱ་ཀྱའི་གྲོང་གི་མི་ཡི་དབང་པོ་སྟོན།
དཔལ་ལྡན་ཟས་གཙང་དག་པའི་བདུད་རྩིའི་གཏེར།
ཚགས་བྲལ་ལྡན་ལས་བདེ་གཤེགས་ཉིད་ཐོབ་པའི།
སྲས་ནི་དྲན་ནས་འདོད་དང་བཅས་པར་གྱུར༎ 2

དེ་བསམསམས་བསོད་ནམས་ཡོན་དན་ལྷག་གནས་ཤིང་།
དབྱངས་ཅན་གནས་དང་མཚོ་ལས་སྐྱེས་པའི་དཔལ།
ཡིད་ནི་རབ་དུ་དང་བའི་རྩེ་དགའི་གནས།
བུ་ཡི་བཞིན་རས་གང་ཚེ་བདག་གིས་མཐོང་༎ 3

དེ་ནི་བལྟ་བར་སྤྲིད་པས་འདིར་བྱོན་ཅེས།
བདག་གིས་གང་གང་རྒྱལ་བྱེད་ཚལ་དུ་བཏང་།

अथ द्वाविंश पल्लवः ।

अहो महार्हं मणिवन्महत्वं
भव्या भजन्ते गुणगौरवेण ।
विना गुणं यद्वपुषां गुरुत्वं
स्थूलोपलानामिव निष्फलं तत् ॥ १ ॥

श्रीमान् पुरा शाक्यपुरे नरेन्द्रः
शुद्धोदनः शुद्धिसुधानिधानम् ।
वैराग्ययोगात् सुगतत्वमाप्तं
स्मृत्वा सुतं सोत्सुकतामवाप ॥ २ ॥

सोऽचिन्तयत् पुण्यगुणाधिवासं
सरस्वतीवाससरोरुहश्रि ।
मनःप्रसादस्य विलाससौधं
द्रक्ष्यामि सूनोर्वदनं कदाहं ॥ ३ ॥

एहीति तद्दर्शनलालसेन
ये ये मया जेतवनं विसृष्टाः ।

དེ་དེ་མིག་མི་འཛུམས་པས་དེ་བལྟ་ཞིང་།
དེ་ཉིད་དུ་ནི་བདུད་རྩི་འཐུང་ཞིང་འདུག། 4

གང་ཡང་མཛོད་ལས་བདག་མཚུངས་འཆར་ཀ་ནི།
དེ་དཀྲུག་སྐྱད་དུ་བདག་གིས་ཡང་དག་བཏང་།
སྤྲིང་ཡིག་ལག་དེ་ལྷ་རྣམས་མངོན་དགའ་བ།
དེ་ཉིད་དུ་ནི་ལྷ་ཉིད་བཞིན་དུ་གྱུར།། 5

དེ་ཡི་ཁ་ལ་བདག་གི་འཕྲིན་གྱི་ཚིག།
སྤྲིངས་པ་གང་དེ་བརྗོད་པ་མ་ཡིན་ནམ།
གང་ཕྱིར་ཐམས་ཅད་ངེས་པར་རང་ཕན་འདོད།
གཞན་གྱི་དོན་ལ་བསིལ་བ་ཉིད་འཛིན་ལོ།། 6

ཆགས་མེད་འདི་ནི་ཡུད་ཙམ་ངལ་གསོ་མཛོད།
དྲག་དུ་བདུད་རྩིས་ཁེངས་པའི་རྣམ་གཟིགས་ཀྱིས།
སྒྱུར་དུ་བདག་གི་ལུས་ལ་ཆགས་གྱུར་པ།
བརྩེ་བའི་དབང་གིས་གཉེན་གྱི་དོན་འདི་མཛོད།། 7

ཅེས་པ་འདི་ཐོས་བདག་དང་ཕྲད་པ་ལ།
སྐད་ཅིག་ཀྱང་དེ་ཕྱི་བཞོལ་ཇི་ལྟར་མཛད།
དེ་ཡི་ཐུགས་ནི་ཡལ་འདབ་མཆེན་པ་ལ།
རང་བཞིན་མཛོད་གཙུགས་རྣམ་རྒྱན་མེད་དམ་ཅི།། 8

ते ते तदालोकननिर्निमेषं
तत्रैव तिष्ठन्त्यमृतं पिबन्तः ॥ ४ ॥

संप्रेषितस्तस्य मया स नायया
योऽप्यात्मतुल्यः प्रणयादुदायी ।
स लेखहस्तस्त्रिदिवाभिरामे
तत्रैव लेखत्वमिराभियातः ॥ ५ ॥

संदेशवाक्यं प्रहितम्मया यत्
तद्विस्मृतं तस्य मुखेन नूनम् ।
सर्व्वोहि नाम स्वहिताभिलाषी
धत्ते परार्थे किल शीतलत्वम् ॥ ६ ॥

विलोकनेनैत्य निषिच्य तूर्ण
पीयूषपूरेण ममाङ्गसङ्गम् ।
निःसङ्गतो विश्रमतां मूहूर्त्तं
दयाविधेयः कुरु बन्धुकार्य्यम् ॥ ७ ॥

इत्येतदाकर्ण्य कथां स कुर्य्यात्
क्षणं विलम्बं मम दर्शनेऽपि ।
तच्चेतसः पल्लवपेशलस्य
न हि स्वभावः प्रणयावभङ्गः ॥ ८ ॥

ཡི་ད་ལ་རེ་བ་འདི་ཡིས་ས་ཡི་བདག།
དེ་བལྟའི་སྐད་བཞིན་མདུན་དུ་སོང་བའི་ཚེ།
དེ་ཡི་དྲིན་གྱིས་རབ་བྱུང་གསོལ་བྱས་པའི།
དགའ་བའི་ཙོ་ལྡན་འཆར་ཀ་ཡང་དག་འོངས།། 9

རབ་ཏུ་བྱུང་བ་དེ་དང་མཚུངས་པའི་མཐུ།
ཀུན་དགའ་རྣམ་པར་ཁྲབ་པ་དེ་མཐོང་ནས།
བརྟན་པའི་སྤྱོད་ཚུལ་ཉམས་ཞིང་འདོད་ལྡན་པས།
མི་བདག་ཀུན་དུ་སྨོངས་པས་བརྒྱལ་བར་གྱུར།། 10

བསིལ་བའི་ཆུས་བྲན་འདུ་ཤེས་རྙེད་པ་དེས།
དེ་ལ་ཅི་སྐད་བྱིན་པ་མིན་ཞེས་དྲིས།
ལྷ་གཅིག་ཁྱོད་ཅན་ཉིན་ཞག་ཚོགས་ཀྱིས་དེས།
གུས་བཅས་འགྲོན་པར་འགྱུར་ཞེས་དེས་ཀྱང་སྨྲས།། 11

དེ་ནས་ཉིན་ཞག་རྣམས་ནི་རབ་འདས་ཚེ།
གཞོན་ནུ་དོན་ཀུན་གྲུབ་པའི་བཅོམ་ལྡན་འདས།
དགེ་སློང་ཚོགས་ཀྱི་རྗེས་འབྲང་ལྷ་རྣམས་ཀྱི།
ཚོགས་དང་བཅས་པ་མཁའ་ལ་དལ་བུས་བྱོན།། 12

མཐོ་རིས་མཛེས་མའི་ལག་པད་ཀྱིས་གདེར་བ།
མནྡ་ར་བའི་འཕྲེང་རྒྱུས་མཛེས་པ་དེ།

मनोरथेनेति पुरः प्रयाते
तद्दर्शनायेव धराधिनाथे ।
प्रव्रज्यया व्यञ्जिततत्प्रसादः
समाययौ हर्षरसादुदायी ॥ ९ ॥

दृष्ट्वा तमानन्दविपूर्णमानसं
प्रव्रज्यया तत्सदृशानुभावम् ।
उत्कण्ठितः कुण्ठितधैर्य्यवृत्तिः
संमोहमूर्च्छां नृपतिः प्रपेदे ॥ १० ॥

स लब्धसंज्ञः शिशिरैः पयोभिः
पप्रच्छ तं किन्नु समेष्यतीति ।
सोऽप्यब्रवीद्देव दिनैर्भवन्त-
मसंभृतैः सादरमेष्यतीति ॥ ११ ॥

ततः प्रयातेषु दिनेषु केषु
व्योम्ना शनैर्भिक्षुगणानुयातः ।
सहाययौ नाकसदां निकायैः
सर्व्वार्थसिद्धैर्भगवान् कुमारः ॥ १२ ॥

द्युसुन्दरीपाणिसरोजमुक्त-
मन्दारमालाकलितश्वकाशे ।

མཐོ་རིས་གང་གཱའི་དབུ་བ་རབ་གསལ་བརྩེགས།
མཛེས་ཤིང་ཀོད་པའི་ལྷ་ཡི་རི་བོ་བཞིན།། 13

སྤྲིན་གྱི་གྲོགས་རྣམས་དཀྲིགས་པས་འབྲིད་ཅིང་འཕྲུལ།
ཛམྦུ་ན་དའི་དྲིལ་ཆུང་སྒྲ་ལྡན་པའི།
ཞལ་ཡས་ཁང་གི་ཕྱོགས་ཀྱི་གདོང་མཛེས་པ།
གུས་པས་སྟོན་པའི་བསྟོད་པ་བསྒྲུབས་པ་བཞིན།། 14

བར་མེད་ཉི་མའི་འོད་ཟེར་སྤྲིན་བྱེད་པ།
རིག་འཛིན་གྲུབ་པའི་ཚོགས་དང་བཅས་པའི་ལྷ།
ཡོངས་རྫོགས་གཏུགས་དཀར་ཡང་དག་ཆགས་པ་ཡིས།
ཁྱབ་པས་ནམ་མཁའ་ཡང་དག་རྫོགས་པར་གྱུར།། 15

དེ་ནས་འཇིག་རྟེན་ཀུན་ལ་ཕན་རྫོགས་པ།
ཀུན་དབྱིབས་ཀུན་གྱི་རང་བཞིན་རྣམ་པར་སྣང་།
ལེགས་པར་བྱོན་པ་དེ་ནི་སྐད་ཅིག་གིས།
མཁའ་དང་ཕྱོགས་དང་ས་ལས་ཀུན་གྱིས་མཐོང་།། 16

སྐྱེ་བོ་འི་མིག་གི་རབ་དགའ་སྤྲུངས་པ་དང་།
དགེ་ལ་དགའ་བའི་བསོད་ནམས་ཚད་གྱུར་པ།
སྣང་བའི་གཏེར་དེ་མཐོང་ནས་འཇིག་རྟེན་རྣམས།
ཤིན་ཏུ་རངས་པའི་ཟ་རླབས་མེད་བྱུང་བྱུང་།། 17

स्वर्गीयगङ्गास्फुटफेनकूट-
विलासहासाङ्क इवामराद्रिः ॥ १३ ॥

सङ्घट्टभिन्नाभ्रसखैः स्खलद्भिः
सशब्दजाम्बूनदकिङ्किनीकैः ।
बभुर्विमानैः ककुभां मुखानि
भक्त्येव शास्तुर्विहितस्तवानि ॥ १४ ॥

निरन्तरैरन्तरिवार्कतारैः
सुरैः सविद्याधरसिद्धसङ्घैः ।
पर्य्याप्तसंसक्तसितातपत्रै-
र्व्याप्तः समाप्तिं गगनं जगाम ॥ १५ ॥

तं सर्व्वलोकोपकृतिप्रपन्नं
सर्व्वाकृतिं सर्व्वमयावभासम् ।
समापतन्तं नभसोऽथ दिग्भ्यः
क्षितेश्च सर्व्वे ददृशुः क्षणेन ॥ १६ ॥

प्रहर्षराशिं जनलोचनानां
पुण्यप्रमाणं सुकृतोत्सवानाम् ।
लोकस्तमालोकनिधिं विलोक्य
समुल्ललन्नुच्छलिताद्भुतोर्म्मिः ॥ १७ ॥

ངོ་མཚར་མཛད་གྱུར་མཛེས་པའི་མཐུ་ལྡན་པ།
འཆར་ཀས་ལེགས་པར་བཤད་ལ་རབ་ཞེས་ནས།
གཞོན་ནུ་འགྲོ་བའི་བླ་མ་དེ་ལ་ནི།
ས་བདག་རིང་ནས་ཐལ་མོ་སྦྱར་ནས་བདུད། 18

དེ་ནས་བཟས་ཏེ་འཕགས་སྐྱེའི་རྗེས་འབྲང་བཅས།
རྒྱལ་པོ་གུས་པས་ཡང་དག་མཆོད་གྱུར་པ།
ཕྱོགས་ཆ་གཟི་བྱིན་རྒྱས་པས་མཛེས་པ་ཡིས།
ནུ་གྲོ་དྷ་ཡི་རིན་ཅན་ས་གཞིར་བྱོན།། 19

འཛིག་རྟེན་གསུམ་པོ་བཀའ་ལ་ལེགས་གནས་དེ།
དེར་ནི་ཀང་སྟེགས་ལྡན་པའི་གསེར་གྱི་ཁྲི།
རིན་ཅན་སྨུ་གུ་བཀྲ་བའི་འདབ་ལྡན་ལ།
ལྷུན་པོ་ལ་ནི་འོད་ལྡན་ལུས་བཞིན་འཛེགས།། 20

ཡིད་ཀྱི་བླ་བ་མིག་གི་བདུད་རྩིའི་རྒྱུན།
ཡིད་ལ་རེ་བས་དོན་གཉེར་འོངས་པ་དེ།
དགའ་བས་མིག་མི་འཛུམ་པར་བལྟས་པ་ལས།
སྐད་ཅིག་ས་ཡི་བདག་པོས་ལྷ་ཉིད་ཐོབ།། 21

དགའ་བའི་རོ་ལས་ནང་དུ་ཞུགས་པ་བཞིན།
དོ་ཤལ་རིན་ཅན་མཆོག་ལ་གཟུགས་བརྙན་ཆགས།

आश्चर्य्यभूतं रुचिरप्रभाव-
मुदायिना सूचितमाकलय्य ।
जगद्गुरुं भूमिपतिः कुमारं
कृताञ्जलिस्तं प्रणनाम दूरात् ॥ १८ ॥

अथावतीर्य्यार्य्यजनानुयातः
संपूज्यमानः प्रणयेन राज्ञा ।
स्फीतप्रभाभासितदिग्विभागां
न्यग्रोधिनीं रत्नभुवं विवेश ॥ १९ ॥

हेमासनं शासनसन्निविष्ट-
लोकत्रयः सङ्गतपादपीठम् ।
स तत्र रत्नाङ्कुरचित्रपत्रं
भास्वद्वपुर्मेरुमिवारुरोह ॥ २० ॥

तन्मानसेन्दोर्नयनामृतौघं
मनोरथप्रार्थनयोपयातम् ।
विलोकयन्निर्वृतिनिर्निमेषः
क्षणं क्षितीशस्त्रिदशत्वमाप ॥ २१ ॥

स तं जगादाश्रुनिरुद्धकण्ठः
सोत्कर्षहर्षाकुलितं कुमारम् ।

གཞོན་ནུ་ཁྱུད་འཕགས་དགྱེས་པ་རྒྱས་དེ་ལ།
མགྲིན་པ་མཆིམས་འགགས་པ་དེ་ཡིས་སླུས།། 22

ཡོངས་ཚིམ་གཡོ་མེད་བསིལ་བའི་རང་བཞིན་ལས།
ཐམས་ཅད་དགེ་བའི་ཐང་ལ་དགའ་བར་བྱེད།
ཡོངས་སྲུ་གདུང་བྱེད་བྲལ་བའི་ཉེར་བསྟན་འདི།
བདག་ཅག་རྣམས་ལ་ཁྱོད་ཀྱིས་ཅི་ཕྱིར་མཛད།། 23

མཛའ་དང་རབ་དགའ་ཡོན་ཏན་ལ་གུས་པས།
འཁྲུད་པ་དང་ནི་བརྟན་པར་འགྲོགས་པ་དང་།
ཞབས་ལ་ཕྱུག་བགྲིའི་སྐད་དུ་མཉམ་ཉིད་དུ།
བདག་གི་བློ་ནི་འཕྲལ་ལ་ཁྱོད་ཅན་རྒྱུག།། 24

ཅུང་ཟད་གང་དེ་བདག་གིས་བརྗོད་པ་འདི།
བདག་ལ་བྱམས་ངོར་ཁྱོད་ཀྱིས་གསན་པར་བྱ།
ཡོན་ཏན་སྤྲངས་པའི་ཆགས་བྲལ་རིམ་པ་ནི།
མཛའ་བས་སྨོངས་པས་བརྗོད་བྱ་མིན་པ་ཉིད།། 25

ཉི་མའི་གཟུགས་བརྙན་ལྷན་པའི་རིན་ཅེན་གྱིས།
ལེགས་སྦྱར་ལྷག་པའི་འོད་ཟེར་རབ་རྒྱས་པ།
གསེར་གྱི་ཁང་བཟང་འདི་དག་ཅི་ཡི་སླད།
བདང་ནས་ཁྱོད་ནི་ནགས་ན་སྡོང་པར་འཁྲམ།། 26

हाराग्ररत्नप्रतिविम्बसक्तां
प्रवेशयन् प्रीतिरसाद्दिवान्तः ॥ २२ ॥

सन्तोषशीताचलवत् स्वभावात्
सर्व्वे रमन्ते कुशलस्थलीषु ।
कृतस्त्वयास्माकमयं तु कस्मात्
सत्स्नूपकारी विरहोपदेशः ॥ २३ ॥

स्नेहात् प्रमोदात् गुणगौरवाच्च
धीर्धावतीयं त्वयि मे प्रसह्य ।
आलिङ्गनाय स्थिरसङ्गमाय
पादप्रणामाय च तुल्यमेव ॥ २४ ॥

यद्वस्तु किञ्चिन्नदितं मया तत्
श्रोतव्यमेव प्रणयोपरोधात् ।
गुणोज्झितं वा विरसक्रमं वा
न स्नेहमोहस्य भवत्यवाच्यम् ॥ २५ ॥

प्रत्यग्ररत्नप्रतिविम्बितार्क-
प्रौढप्रभाप्रावरणान्यमूनि ।
त्वं हेमहर्म्याणि विहाय कस्मात्
विगाहसे शून्यवनान्तराणि ॥ २६ ॥

ཉ་ཆུང་ལག་པས་གསེར་གྱི་བུམ་བདུད་ཅིང་།
དྲི་བཟང་ཆུ་ཡིས་མཆོག་ཏུ་མདོན་བཀུས་པ།
སུ་དང་ཐང་ལ་ཡོངས་སྤུ་ཚ་བའི་ཆུ།
རྡུལ་གྱིས་གྲུས་པས་གཅིག་པུ་ཛི་ལྟར་འགྲུ།། 27

རིན་ཅེན་མཛེས་པའི་ནུ་ཆ་འགྲམ་པར་འཁྲུང་།
རྒྱུན་རྣམས་འདོར་བར་བྱེད་པ་ཅི་ཞིག་རིགས།
ཅི་སླད་བདེ་མེད་ཁྱེད་ནི་གློ་བུར་དུ།
ཅན་དན་ཟླ་ལྟར་དཀར་བས་དགའ་མ་ཡིན།། 28

མི་བདག་ལ་འོས་ཁྲི་སྟན་ཟླ་རེ་ཆེ།
ལྷག་ལྟར་ཁྱད་པར་དཀར་ལ་ཅིས་མི་གཟིམས།
དཔལ་མོས་གསར་འཁྲུར་ལོངས་སྤྱོད་འོས་གྱུར་པ།
ཁྱོད་ཀྱི་ལུས་ཀྱི་སྟན་ངན་ཛི་ལྟར་བཟོད།། 29

མཛེས་འཛུམ་རླབས་ཀྱིས་གཟུགས་བརྟན་གོས་འོས་པ།
ལུས་འདི་ལ་ནི་ཆོས་གོས་ཛི་ལྟར་འོས།
ཁྱོད་ཀྱི་ཕྱུག་ནི་པདྨ་འི་རོལ་གནས་འདིར།
ད་ལྟ་ལྷུང་བཟེད་དགའ་བ་ཛི་ལྟར་སྐྱེ།། 30

ཁྱོད་ཀྱི་མགྲིན་པ་རྒྱབ་ཀྱི་གནས་འདི་དག།
སྤྲེད་ལྡན་མཛེས་མའི་ལག་པས་བསྣམས་འོས་པ།

कान्ताकरावर्जितहेमकुम्भ-
सत्सौरभाम्भःप्रवराभिषिक्तः ।
एकः कथं स्नासि विकासिपांशु-
सन्तप्ततोयासु मरुस्थलीषु ॥ २७ ॥

गण्डस्थलात् कुण्डलरत्नकान्ति
किं लम्बितं मण्डनमेव वेत्सि ।
कस्मादकस्मात् तव निःसुखस्य
न चन्दनं नन्दनमिन्दुशुभ्रम् ॥ २८ ॥

महाविताने शयने नृपार्हे
शेषे न किं शेषविशेषशुभ्रे ।
लक्ष्मीनवालिङ्गनभोगयोग्या
कथं तनुस्ते सहते कुशय्याम् ॥ २९ ॥

कान्तास्मितोर्म्मिप्रतिमांशुकार्हं
किं चीवरस्योचितमेतदङ्गम् ।
पाणौ च लीलाकमलास्पदेऽस्मिन्
पात्रं कथं ते प्रियमद्य जातम् ॥ ३० ॥

अयं विहारस्तव कण्ठपीठः
सोत्कण्ठकान्ताभुजबन्धनार्हः ।

ལོངས་སྤྱོད་དཔལ་མོ་འི་རབ་དགའ་ཉམས་སྒྱུར་ཅིང་།
གློ་བུར་ཉིད་དུ་མཛའ་གཙུགས་ཉམས་པར་བྱེད།། 31

མེ་དོག་གཞུ་ལྡན་སྐྱེངས་པར་བྱེད་པའི་གཟུགས།
གླང་ཆེན་སྨྱོས་བྱུས་ལྷུར་མགོ་འི་ཀུ་ཀྲུས་འགྱུར།
ཡངས་ཚོ་དགའ་བའི་རྩེས་ཉེ་བའི་ནགས།
ཅི་སླད་ཁྱོད་ཀྱི་མི་བཟད་ཆགས་བྲལ་བྱས།། 32

ཞེས་གསན་ཚུལ་ཁྲིམས་གཏེར་གྱིས་བཀའ་སྩལ་དེ།
ཟླ་བའི་ཆ་བཞིན་རོལ་པའི་འཛུམ་དག་གིས།
མི་བདག་སྣ་ཚོགས་རིན་ཅེན་འོད་འཕྲོས་པའི།
རྒྱལ་པོ་འི་དཔལ་ནི་མི་སྣང་མཛད་པ་བཞིན།། 33

རྒྱལ་པོ་ཆུ་རྒྱུན་ལྷུར་གཡོ་འཚོ་བའི་སྒྲོག།
གལ་དེ་ཀ་དང་ན་བས་མི་འཛོམས་ན།
རབ་དགའ་བདུད་རྩིའི་ཆར་ལྷའི་ཡུལ་རྣམས་ལ།
རྟག་ཏུ་སྲུ་ཞིག་མངོན་པར་འདོད་མི་བགྱི།། 34

ཉི་བའི་བདུད་རྩི་ཉམས་སྐྱོང་བརྟན་རྣམས་ཀྱིས།
ནགས་ནང་སྡོང་པའི་ས་གཞི་གནང་མེད་ཡིན།
འཁོར་བས་རྒྱགས་ཤིང་རྩེ་དགས་འཁྲུགས་རྣམས་ཀྱི།
བ་གམ་ལྡན་པ་མཐར་ནི་རྣམ་པར་ལྡང་།། 35

सम्भोगलक्ष्मीक्षपितप्रमोदः
करोत्यकस्मात् प्रणयावभङ्गम् ॥ ३१ ॥

रूपं विलक्षीकृतपुष्पचापं
मत्तेभकुम्भोच्चकुचा विभूतिः ।
रतेर्विलासोपवनं वयस्य
केनासमस्ते कलितो विरागः ॥ ३२ ॥

श्रुत्वेति तं शीलनिधिर्बभाषे
शशाङ्कलेखाललितस्मितेन ॥
संक्रान्तनानान्टपरत्नरागां
कुर्व्वन्नलक्षामिव राजलक्ष्मीम् ॥ ३३ ॥

राजन् जरारोगहृतेव न स्या-
त्तरङ्गलोला यदि जीववृत्तिः ।
तत् कस्य न स्यादनिशं प्रहर्ष-
पीयूषवर्षी विषयाभिलाषः ॥ ३४ ॥

शमामृतास्वादनसुस्थिराणा-
मपातनं शून्यवनान्तभूमेः ।
विभूतिलीलामदविह्वलानां
हर्म्याणि पर्य्यन्तनिपातनानि ॥ ३५ ॥

གང་ཞིག་གྲུར་ཀུམ་དང་བཅས་ཁྲུས་བཀྲུས་པའི།
མི་བདག་རྟག་ཏུ་ཆགས་དང་ལྡན་པར་གྱུར།
ཡིད་ནི་རབ་ཏུ་དང་བའི་ཁྲུས་བཀྲུས་པའི།
ཚོག་ཤེས་ངང་ཚུལ་དྲི་མ་བྲལ་བར་འགྱུར།། 36

སྙིང་རྗེ་ཁྲུས་པ་རྣམས་ཀྱི་ལུས་མཛེས་པ།
གཞན་ཕན་གྱིས་ཡིན་ཙན་དན་བྱུགས་པས་མིན།
རྣ་བ་ཐོས་པས་ཡིན་གྱི་རྣ་ཆས་མིན།
ལག་པ་སྦྱིན་པས་ཡིན་གྱི་གདུབ་བུས་མིན།། 37

ས་བདག་གིས་སྤྱད་ལྷག་མར་གྱུར་པའི་རྒྱན།
སྨུ་ཏིག་འོད་ཆགས་དཀར་བའི་འཛུམ་དང་བཅས།
རྫོངས་པས་དགའ་བ་མ་བཅོམ་འདི་དག་ནི།
དམ་པ་རྣམས་ཀྱི་སྤྱད་པར་འོས་པ་མིན།། 38

ཆགས་པས་གཟིར་དང་དགྲ་ཡིས་གདུངས་གྱུར་པ།
ནོར་གྱི་བསམ་གཏན་ལྡན་པའི་རྒྱལ་པོ་ལ།
རེག་ན་བ་ བའི་ལམ་ན་གཉིད་ཡོད་མིན།
ཞི་བ་རྣམས་ནི་ཀུན་ཏུ་བདེ་བར་གཟིམས།། 39

ལག་འགྲོ་འི་སྤྱོད་ཚུལ་སྒྱུ་ལ་ཤུན་མཛེས་པ་ཡི།
གོས་བཟང་གིས་མིན་ཚོས་གོས་དག་གིས་ཡིན།

सकुङ्कुमैः स्नान्ति नृपाः पयोभिः
सरागतां यैः सततं प्रयान्ति ।
सन्तोषशीलस्तु मनःप्रसाद-
शुद्धाम्बुधौता विमलीभवन्ति ॥ ३६ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणाकुलानां
परोपकारेण न चन्दनेन ॥ ३७ ॥

एतानि मोहाहृतवल्लभानि
संसक्तमुक्तांशुसितस्मितानि ।
सतां न भोग्यानि भवन्ति भूभृ-
दुच्छिष्टशिष्टानि विभूषणानि ॥ ३८ ॥

रागातुराणां रिपुतापितानां
निद्रा धनध्यानवतान्न नाम ।
शय्यासु सुस्पर्शवतीषु राज्ञां
सर्व्वत्र शान्तः सुखमेव शेते ॥ ३९ ॥

निर्मोककान्तेन वरांशुकेन
भुजङ्गवृत्तिर्न तु चीवरेण ।

ལྷུང་བཟད་ཀྱིས་ནི་ཟས་དག་གཙང་བ་དང་།
ཡོངས་རྫོགས་བདུད་རྩིའི་གྲོགས་སོ་ཉིད་དུ་བསྐྱེད།། 40

གདུགས་ཀྱི་བཞིན་ནི་མཆོག་དུ་མི་གསལ་ཞིང་།
རླུང་ཡབ་རླུང་གིས་ཡིད་ནི་རྣམ་པར་གཡོ།
ཧ་རི་ཙན་དན་གྱིས་བརླན་དོ་ཤལ་གྱིས།
མི་བདག་སྙིང་ལ་བསིལ་བ་རེག་པར་བྱེད།། 41

འཁོར་བ་བྲལ་བའི་ནད་ཀྱི་རྗེས་སུ་འགྲོ།
རྩེ་དགའ་རོ་བྲལ་མཛེས་མ་སྐད་ཅིག་མཐའ།
གང་གི་ལུས་ལ་གནོད་པ་རྟག་གནས་དེ།
སུ་ཡི་ལོངས་སྤྱོད་སྐལ་བཟང་ཉེ་བར་རིགས།། 42

འཕྲལ་དུ་ཟིལ་གནོན་ལོངས་སྤྱོད་ཉེར་སྤྱོད་ན།
ཀྲུན་དུ་གླལ་བཅས་ལྷུན་པ་ཉིད་བསྐྱེད་ཅིང་།
སྲིད་འཁྲུལ་རྨོངས་དང་བརྒྱས་པ་དང་།
མི་བཟད་ཆགས་དང་བཅས་པ་ཉིད་དུ་བཅས།། 43

གང་ཚེ་བདེ་དཔལ་ཟླ་ཚེས་རི་མོ་དང་།
ལང་ཚོ་ཡང་ནི་སྨྲ་རྡོ་འི་མེ་དོག་སྟེ།
ལུས་ནི་ལས་ཀྱི་རླབས་ཀྱིས་འཕྲེང་བ་འཛིན།
དེ་ཚེ་བདག་ནི་རྗེས་སུ་ཆགས་དང་བྲལ།། 44

पात्रं पवित्राणि समाप्लुतानि
पीयूषमैत्राण्यशनानि हूते ॥ ४० ॥

छत्राणि वक्त्रं भ्रमप्रकाशं
मनोविलोलं व्यजनानिलौघाः ।
संसक्तजाड्यं हृदयं नृपाणां
कुर्व्वन्ति हारा हरिचन्दनार्द्राः ॥ ४१ ॥

वियोगरोगानुगता विभूतिः
कान्ताः क्षणान्ता विरसो विलासः ।
यस्मिन्नपायः सततानुशायी
स कस्य भोगः सुभगोपयोगः ॥ ४२ ॥

जाड्यं सजृम्भं जनयत्यजस्रं
तनोति तृष्णाभ्रममोहमूर्च्छाः ।
करोत्यसह्यं सरसत्वमेव
भोगोपभोगः प्रसभप्रयोगः ॥ ४३ ॥

यदा सुखश्रीर्नवचन्द्रलेखा
प्रभातपुष्पाण्यपि यौवनानि ।
कर्म्मोर्म्मिमालाग्रहणं शरीरं
तदा ममायं गमितोऽनुरागः ॥ ४४ ॥

ཛ་ཡབ་དང་བཅས་དར་དང་རྒྱལ་མཚན་ཐོགས།
ཛྷ་དང་བཅས་པའི་གླང་ཞོན་ཟླ་བའི་སྟབས།
རང་བཞིན་གྱིས་གཡོ་རྒྱལ་པོ་འི་དཔལ་འབྱོར་གྱི།
ཡོངས་སྤྱོད་ཐམས་ཅད་སྐད་ཅིག་འཛིག་པའི་གྲོགས།། 45

རྒྱལ་པོ་འི་ཐུགས་ནི་རབ་དང་མཆོག་བསྒྲུབ་ཅིང་།
དགེ་བའི་སྐད་དུ་དེ་དེ་བཀའ་སྩལ་ནས།
ཞི་བའི་ཐབས་ལྡན་བདུད་རྩིའི་རྒྱུན་རྒྱས་ཤིང་།
དེ་ཡི་སྐྱོན་གྱིས་འཁོར་ལ་རྣམ་པར་གཟིགས།། 46

ཤཱ་ཀྱའི་རིགས་སུ་འཁྲུངས་པའི་མཁས་པ་ནི།
ཁྲི་ཕྲག་བདུན་གྱིས་ཆོས་ནི་རྟོགས་བྱས་ཤིང་།
དེ་ལ་སྟོང་ཕྲག་བདུན་ཡང་ཡོངས་རྫོགས་ཀྱི།
ཁྱད་པར་ཡང་དག་ཐོབ་པའི་སྣོད་ཉིད་མཛད།། 47

དེ་ནས་དེ་དང་གྲངས་མཚུངས་སྟོང་ཕྲག་ཚོགས།
ཟས་དཀར་ལ་སོགས་རྣམས་ཀྱིས་དགེ་བ་ཐོབ།
བྲི་བོ་ཟས་སོགས་བདུད་རྩི་ཟས་སོགས་ཀྱིས།
ཤིན་ཏུ་ཆེ་བའི་སེམས་ནི་དང་བ་ཐོབ།། 48

ཁ་ཅིག་ཉན་ཐོས་བྱང་ཆུབ་ལྡན་པར་གྱུར།
ཉི་ཚེའི་བྱང་ཆུབ་རིག་དང་ལ་ལ་དག།

सचामराः सध्वजपुञ्जपट्टाः
सवाजिबाला द्विपकर्णतालाः ।
स्वभावलोलाः किल राजलक्ष्म्यः
सर्व्वे विलासाः क्षणभङ्गसङ्गाः ॥ ४५ ॥

उक्तेति तत् तत् कुशलाय राज्ञ-
श्चित्तप्रसादं परमं विधाय ।
स शान्तिकल्लोलसुधाप्रवाहं
किरन् दृशा पार्षदमालुलोके ॥ ४६ ॥

मनीषिणां शाक्यकुलोन्नतानां
सप्तायुतानि प्रतिपाद्य धर्म्मम् ।
चक्रे सहस्राणि च सप्त तत्र
संप्राप्तपर्य्याप्तविशेषभाञ्जि ॥ ४७ ॥

शुक्लोदनाद्यैः कुशलोपपन्नै-
र्गणोऽथ तत्तुल्यसहस्रसङ्ख्यैः ।
द्रोणोदनाद्यैरमृतोदनाद्यै-
श्चित्तप्रसादः सुमहानवाप्तः ॥ ४८ ॥

केचिद् ययुः श्रावकबोधियुक्त-
प्रत्येकबोधौ निरताश्च केचित् ।

དེ་བཞིན་ཡང་དག་བླ་མེད་བྱང་ཆུབ་གཞུགས།
གཞན་ནི་མཁའ་བཞིན་རབ་ཏུ་དང་བར་གྱུར།། 49

དེ་ནས་གཞན་གྱིས་རྒྱུན་ཞུགས་འབྲས་བུ་ཐོབ།
དེ་བཞིན་གཞན་གྱིས་ལན་གཅིག་ཕྱིར་འོང་དང་།
ཕྱིར་མི་འོང་འབྲས་དེ་ཡང་གཞན་གྱིས་དེ།
ཉོན་མོངས་རྣམ་གྲོལ་གཞན་གྱིས་དགྲ་བཅོམ་ཐོབ།། 50

མདུན་སར་དེ་ནི་ལྷ་སྦྱིན་གཅིག་བུ་ཞིག།
སྨུན་པའི་ཚོགས་ཀྱིས་གདིབས་ཤིང་རབ་རྨོངས་པས།
སྡིག་དམོད་མ་ཐུལ་སྐྱེ་བོ་རྣམས་ཀྱི་ལུགས།
བདེན་པ་ལ་བཀོད་འདི་ནི་སྐྱུ་ཞེས་སྨྲས།། 51

མི་ཡི་བདག་ཀྱང་མཉེས་ག་ཤིན་གྱིས་ཆགས་ཤིང་།
སྲས་ནི་དར་ལས་ཟློག་པར་དོགས་སྐྱེས་པ།
རྒྱལ་བའི་བཀའ་ལས་དགེ་སློང་མོ་གལ་བྱས།
རྫུ་འཕྲུལ་ཆེན་པོས་རྒྱུགས་དང་བྲལ་བར་བྱས།། 52

བཅོམ་ལྡན་མཐུ་ནི་རྒྱལ་པོས་མཐོང་གྱུར་ཀྱང་།
ཤིན་ཏུ་སྨད་བྱུང་སྐྱེས་བུ་ཉིད་མི་སེམས།
ཕྱུལ་བྱུང་མཛད་པ་གོམས་པས་རིག་པ་ནི།
ངེས་པར་སྐྱེ་བོ་འི་ཡ་མཚན་རྒྱུ་མ་ཡིན།། 53

सम्यक् तथानुत्तरबोधिसक्ताः
परे बभूवुर्गगनप्रसन्नाः ॥ ४९ ॥

स्रोतःपरिप्राप्तफलं ततोऽन्ये
सकृत्तथागामिफलं तथान्ये ।
अन्येऽप्यनागामिफलं तदापु-
रर्हत्फलं क्लेशविमुक्तिमन्ये ॥ ५० ॥

एकस्तु तत्रार्जितपापशाप-
स्तमःसमूहोपहितप्रमोहः ।
मायेयमित्याह हसन् जनानां
सत्यस्थितिं संसदि देवदत्तः ॥ ५१ ॥

नृपं तु वात्सल्यनिलीनमेव
पुत्रोदयात् प्रत्युपजातदर्पम् ।
मौद्गल्यभिक्षुर्जिनशासनेन
महर्द्धिभिर्वीतमदं चकार ॥ ५२ ॥

दृष्ट्वापि राजा भगवत्प्रभावं
नात्यद्भुतं पौरुषमेव मेने ।
अभ्यासलीनानि जनस्य नूनं
सोत्कर्षकृत्यानि न विस्मयाय ॥ ५३ ॥

དེ་ནས་ཉི་མ་གཞན་ལ་ལྷ་དབང་གིས།
རབ་བསྒྲུབས་གསེར་གྱི་གཞལ་ཡས་ཁང་ཆེན་དུ།
ལྷུན་པོ་འི་ལྟོག་ལྟོག་ལྟར་གསལ་ཞིང་མཛེས་པ་ཡི།
རིན་ཅན་སེང་གེའི་ཁྲི་ལ་བཅོམ་ལྡན་འདས།། 54

དེ་ནས་དེར་ནི་ཚངས་དང་དབང་པོ་སོགས།
འོད་ཟེར་ཆེ་བའི་ལྷ་རྣམས་ཉེར་གནས་ཚེ།
དེ་ཡི་གཙུག་ཏོར་རྩ་ལས་འཕྲོས་པའི་ཕྱོགས།
ཀླུ་འོད་འཕྲེང་བའི་རོལ་པ་བཞིན་དུ་མཛེས།། 55

དོ་ཤལ་ཕན་རྩེན་རིག་ཅིང་གཡོ་བ་ཡིས།
ཀླུ་རྣམས་སྣུག་པོར་བབས་ཤིང་ཞུགས་པ་ཡིས།
བར་མཚམས་མེད་པའི་ས་དེར་རྒྱལ་པས་ན།
སྐྱོ་བཞི་རྣམས་སྤྱུ་ལམ་ཉིད་ཐོབ་མ་གྱུར།། 56

ཀུ་བེར་སོགས་སྨིན་མ་གཡོ་ལྡན་པས།
དེར་ནི་མངོན་པར་འཇུག་འདོད་གློག་གྱུར་པ།
བཞིན་ནི་མཛེས་བྲལ་བརྗོད་པ་འཁྲུལ་གྱུར་པའི།
ས་བདག་མཆོག་ཏུ་གཟི་བྱིན་མེད་པར་གྱུར།། 57

རྒྱལ་བའི་བཀའ་ཡིས་དེ་དག་རྣམས་ཀྱིས་བཏང་།
ཇི་ཞིག་ལྟར་སྤྲེས་དེ་མདུན་ས་གཞི་ཐོབ།

अथापरेद्युर्भगवान् सुरेन्द्र-
सम्पादिते हेममहाविमाने ।
सुमेरुशीर्ष्णीव समानरुचौ
सिंहासने रत्नमये न्यषीदत् ॥ ५४ ॥

ब्रह्मेन्द्रमुख्येषु ततः सुरेषु
तत्रोपविष्टेषु पृथुप्रभेषु ।
बभुस्तदुष्णीषशिखाविलासै-
श्चन्द्रांशुमालाजटिला इवाशाः ॥ ५५ ॥

अन्योन्यसंघट्टविलोलहारै-
र्घनावहारैस्त्रिदशैर्विशद्भिः ।
निरन्तरां तां भुवमेत्य राजा
द्वारेषु मार्गान्न चतुर्षु लेभे ॥ ५६ ॥

सम्भ्रमैस्तत्र कुवेरमुख्यै-
र्निवार्य्यमाणाभिमतप्रवेशः ।
विच्छायवक्त्रः स्खलिताभिधायी
भूभृत् परं निष्प्रतिभो बभूव ॥ ५७ ॥

प्रवेशितस्तैर्जिनशासनेन
कदाचिदासाद्य तदग्रभूमिम् ।

ཟས་གཙང་སྐྱི་བོས་དེ་ལ་ཕྱག་འཚལ་ནས།
དེ་ཡི་མདུན་ན་རབ་དང་སེམས་ཀྱི་གནས།། 58

དེ་ནས་སྟོན་པས་དེ་ལ་ཆོས་ཀྱི་གདམས།
འཕགས་པའི་བདེན་བཞི་རབ་ཏུ་རྟོགས་བྱེད་བསྟན།
གང་ཞིག་ཤེས་པས་དེ་ཡི་འཛིག་ཚོགས་ལ།
ལྟ་བའི་རི་རྩེ་ཉི་ཤུ་དག་ཀྱང་བཅོམ།། 59

དེ་ནས་སྐྱེ་བའི་བྲུ་བ་བྲུས་པ་དེ།
སོང་ནས་ཟས་དཀར་ལ་སྨྲས་རྒྱལ་སྲིད་བཟུང་།
དེས་སྨྲས་བདག་ནི་བཅོམ་ལྡན་གྱིས་གནང་བ།
བསྟན་པ་ལ་དགའ་རྒྱལ་སྲིད་མ་ཡིན་ནོ།། 60

གྲི་བོ་ཟས་ཀྱང་རྒྱལ་སྲིད་ལས་ཕྱིར་ཕྱོགས།
བདུད་རྩི་ཟས་ཀྱང་ཆགས་བྲལ་ལྡན་གྱུར་ཆེ།
དེ་ནས་ཟས་གཙང་གིས་གནང་རྒྱལ་པོ་ཡི།
དཔལ་འབྱོར་དེ་ནི་བཟང་ལྡན་ཞེས་པས་བཟུང་།། 61

དེ་ནས་རྒྱལ་པོས་ལོངས་སྤྱོད་གཙང་མ་རྣམས།
རབ་ཕུལ་འགྲོ་བའི་དབང་གིས་རྒྱལ་བ་མཆོད།
ནྱ་གྲོ་དྷ་ཡི་གནས་ནི་དེ་རབ་ཕུལ།
ཟས་གཙང་ཡིད་ལ་རེ་བ་དག་པར་གྱུར།། 62

शुद्धोदनस्तं प्रणिपत्य मूर्ध्ना-
चित्तप्रसादेन पुरोऽस्य तस्थौ ॥ ५८ ॥

शास्ता तु तस्मै चतुरार्य्यसत्य-
प्रबोधिकां धर्म्मकथान्दिदेश ।
ज्ञानेन या विंशतिशृङ्गमस्य
सत्कायदृग्भूधरमप्यभांक्षीत् ॥ ५९ ॥

ततः स गत्वा कृतकृत्यजन्मा-
शुक्लोदनं प्राप्य भजस्व राज्यम् ।
स्वस्याव्रतीत्तं भगवत्प्रदिष्टं
तच्छासनं मोदयितुं न राज्यम् ॥ ६० ॥

द्रोणोदने राज्यपराङ्मुखेऽपि
वैराग्ययोगादमृतोदने च ।
जग्राह शुद्धोदनसंप्रदिष्टां
तां राजलक्ष्मीमथ भद्रकाख्यः ॥ ६१ ॥

राजार्हभोगैरथ पूजयित्वा
जिनं जनेशः शुचिसंप्रणीतैः ।
न्यग्रोधधाम प्रतिपाद्य चास्मै
शुद्धोदनं शुद्धमनोरथोऽभूत् ॥ ६२ ॥

དེ་ནས་བྲེ་བོ་ཟམ་ཀྱི་བུ་གཞོན་གཉིས།
མ་ཡི་བསྐུལ་བས་དེ་ལས་གཅིག་རབ་བྱུང་།
རྒྱལ་པོ་འདི་བཀའ་ཡིས་བཀག་པས་གཞན་མ་ནི།
ཆེན་པོ་ཞེས་པ་ཁྱིམ་ན་གནས་པར་གྱུར།། 63

དེ་ནས་ཆགས་བྲལ་རྒྱལ་པོ་བཟང་ལྡན་གྱི།
ཡིད་ནི་ནགས་ཚལ་མངོན་པར་འདོད་པར་གྱུར།
རྣམ་རིག་ལྡན་པས་རབ་ཞིར་ཞུགས་པའི་ཡིད།
གསར་པའི་དཔལ་འབྱོར་གྱིས་ཀྱང་ཁེབས་པ་མིན།། 64

དེ་ནས་དེ་ཡིས་རྒྱལ་སྲིད་དབང་བསྐུར་ནི།
འཕོབ་འདོད་སེམས་ལྡན་ལྷས་བྱིན་ཡང་དག་བོས།
སྨྲས་པ་བདག་ནི་རབ་ཏུ་འབྱུང་བའི་དུས།
རིམ་པས་འོང་ལ་ཁྱོད་ནི་ཅི་ཞིག་བརྗོད།། 65

དབེན་ལའི་ཚུལ་འཆོས་འཛིན་པའི་ལྷས་བྱིན་གྱིས།
མ་དུན་སར་ལེགས་བསྡམས་དེ་ལ་སླར་སྨྲས་པ།
རྒྱལ་པོ་བདག་ལ་རྒྱལ་སྲིད་འདོད་པ་མེད།
རབ་ཏུ་བྱུང་བས་ཁྱོད་དང་བདག་མཚུངས་འགྱུར།། 66

ཞེས་པ་གྲ་གྲུའི་དུལ་བརྟུན་ལྡན་པ་དེ་ཡི།
འཁྲིག་ཚིག་བརྗོད་པ་རྒྱལ་པོས་ཐོས་གྱུར་ནས།

द्रोणोदनस्यापि सुतौ युवानौ
राजाज्ञया प्रेरणया च मातुः ।
एकस्तु यः प्रव्रजितोऽनिरुद्धः
परो महान्नाम गृही बभूव ॥ ६३ ॥

अथाभवच्चेतसि भद्रकस्य
राज्ञो विरक्तस्य वनाभिलाषः ।
विवेकभाजां प्रशमप्रवृत्तं
नवापि लक्ष्मीर्न मनो रुणद्धि ॥ ६४ ॥

ततः समाहूय स देवदत्तं
राज्याभिषेकप्रतिपन्नचित्तम् ।
उवाच मे प्रव्रजनस्य कालः
समागतः किं भवताभिधेयम् ॥ ६५ ॥

तं प्रत्युवाचात्तविवेकदम्भः
सुसंवृतः संसदि देवदत्तः ।
राजन्न राज्येऽस्ति ममाभिलाषः
प्रव्रज्यया त्वत्सदृशो भवामि ॥ ६६ ॥

श्रुत्वेति राजा कुटिलस्य तस्य
मिथ्याविनीतस्य कदर्थवाक्यम् ।

ཤཱ་ཀྱའི་ཚོགས་འདི་ཁྲོད་ཀྱི་བརྟག་པ་ཡིས།
དཔང་དུ་གྱུར་ཅེས་འཛུམ་ཞིང་རབ་ཏུ་སྨྲས།། 67

དེ་ནས་ལྷ་སྦྱིན་འཁྲོད་པས་ཉེ་བར་གདུངས།
ཡོངས་སྤྱོད་རྫིས་སུ་ཆགས་ལས་འདི་ལྟར་བསམས།
ཅི་སྐད་བདག་གིས་སྦྱིན་ཅི་ཡོག་འདི་བཟོད།
ཡང་ན་རབ་བྱུང་ཡང་ན་རྒྱལ་སྲིད་བསྟེན།། 68

བཟང་ལྡན་སོགས་བཅས་ཤཱ་ཀྱ་གཞོན་ནུ་རྣམས།
རང་གི་རྒྱལ་སྲིད་བཏང་ནས་བགྲོད་པ་ཡིས།
འཕགས་པའི་སྤྱོད་ཚུལ་ལ་དགྱེས་ཟས་གཙང་གི།
མདུན་བདར་གླང་པོ་ཤིང་རྡུས་ངེས་པར་བྱུང་།། 69

དེ་ནས་ཐམས་ཅད་འགྲོ་ཆེ་ལྷས་བྱིན་གྱིས།
ཅོད་པན་ལ་ཆགས་བདྨ་ར་ག་ཆེ།
མཁའ་མཆོག་འོད་ཀྱིས་འདབ་གསར་ལྡན་བྱེད་པ།
ཁྲག་གིས་བྲུགས་འདྲ་ཤ་འདོད་ཁྲ་ཡིས་ཁྱེར།། 70

དེ་ནས་མཚན་མཁན་གྱིས་དེའི་ཁྲག་གི་རྟགས།
སེམས་ནི་སྐྱོན་བཅས་མཚན་མ་ངན་གྱུར་པ།
དྲག་པོ་ཞི་དམྱལ་བར་འགྲོ་བ་དེ་མཐོང་ནས།
མཚན་མ་གཞན་དག་སྐུར་ཡང་བརྗོད་པ་ཉིད།། 71

उदीरितं शाक्यगणस्तवायं
सङ्कल्पसाक्षीति हसन्नुवाच ॥ ६७ ॥

अथार्थतापोहतः प्रदध्यौ
भोगानुरागादिति देवदत्तः ।
मया किमेतद्विपातमुक्तं
भजेत वा प्रव्रजितोऽपि राज्यम् ॥ ६८ ॥

राज्यं समुत्सृज्य निजं व्रजन्तः
शाक्यं कुमाराः सहभद्रकाद्याः ।
शुद्धोदनं निर्ययुरार्य्यवृत्त-
प्रीतिं पुरस्कृत्य रथैर्द्विपैश्च ॥ ६९ ॥

व्रजत्सु सर्व्वेष्वथ देवदत्तः
किरीटसक्तं पृथु पद्मरागम् ।
जहार रक्ताक्तमिवामिषार्थी
श्येनः प्रभापल्लविताम्बरार्कम् ॥ ७० ॥

नैमित्तिकैरुक्तमथास्य लक्ष्म
दृष्ट्वा तदुग्रं नरकप्रयाणम् ।
चित्तं सदोषं किल दुर्निमित्तं
निमित्तमन्यत् पुनरुक्तमेव ॥ ७१ ॥

ཀོ་ཀ་བྱུང་བ་ཉམས་དྲག་མ་ཧེ་དང་།
འཚེ་ཡོགས་མིང་དང་ཚང་གིས་རབ་སྐྱོས་པ།
དེར་ནི་རྣམ་པ་དེ་ལྟའི་གེགས་གྱུར་པ།
ངན་པའི་མཚན་ཉིད་རྣམས་ནི་ཡང་དག་བཤད།། 72

དེ་ནས་རབ་དགའི་ས་བདག་བཟང་ལྡན་ཡང་།
ལྷས་བྱིན་ལ་སོགས་དེ་རྣམས་བཅས་པ་ཉིད།
རབ་བྱུང་ཆོས་གོས་ལྷུང་བཟེད་ལྡན་གྱུར་པས།
ས་གཞི་ཆགས་བྲལ་རང་བཞིན་བྱས་པ་བཞིན།། 73

རྒྱལ་པོ་དང་ནི་དེ་བཞིན་རྒྱལ་སྲས་དག།
དོ་ཤལ་དཔུང་རྒྱན་རྣ་རྒྱན་རབ་སྤངས་པ།
དེ་དག་རྣམས་ཀྱི་སྐྲ་ལྷུང་ཉེ་བར་འཁོར།
འདྲིག་མཁན་ཆགས་བྲལ་མིག་ཆུ་ལྡན་པར་གྱུར།། 74

དེ་ནི་མྱོངས་ཤིང་དམན་ཡང་རྒྱལ་བའི་བཀས།
རབ་ཏུ་བྱུང་ནས་མཆོད་འོས་མཆོག་ཏུ་གྱུར།
སེམས་ནི་མཆོག་ཏུ་རབ་ཏུ་དང་བའི་རྒྱུ།
མཁས་པ་ཉིད་མིན་རིགས་ལྡན་མིན་ནམ་སྙམ།། 75

དེ་ནས་ཕྱུག་ལ་མི་བདག་བཟང་ལྡན་གྱིས།
འདྲིག་མཁན་དེ་ཡང་འཁོར་དེར་འཁོད་ཞེས་ནས།

कोकालिखण्डोत्कटमोरकाणां
तिष्यादिनाम्नां मदद्दुर्मदानाम् ।
संकूचितान्यत्यधिकानि तत्र
तथाविधानैर्बहुलक्षणानि ॥ ७२ ॥

भूपप्रमोदादथ भद्रकोऽपि
तैर्देवदत्तप्रमुखैः सहैव ।
प्रव्रज्यया चीवरपात्रयोगात्
चकार वैराग्यमयीमिव क्ष्माम् ॥ ७३ ॥

राज्ञस्तया राजकुमारकाणा-
मुत्सृष्टहाराङ्गदकुण्डलानाम् ।
साश्रोविरागादवतार्य्य तेषां
केशानुपाली किल कल्पकोऽभूत् ॥ ७४ ॥

मूर्खः स नीचोऽपि जिनाज्ञयैव
प्रव्रज्यया पूज्यतरो बभूव ।
चित्तप्रसादस्य परस्य मन्ये
न कारणं पण्डितता न जातिः ॥ ७५ ॥

सामीचिकायामथ भद्रकोऽपि
ज्ञात्वा नृपः पार्षदिकं तमेनम् ।

ས་བདག་གྱུར་ནས་དམན་པ་འདི་ཡི་ནི།
རྐང་ལ་འདུད་ཅེས་ཇི་ལྟར་གསོ་མེད་གྱུར།། 76

རྣམ་པར་རྟོག་ལྡན་ཁེངས་དང་མ་བྲལ་བ།
དེ་ལ་བཅོམ་ལྡན་འཛུམ་ཞིང་བཀའ་སྩལ་བ།
སྒྲོངས་པས་ཆེར་བསྒྲུམས་རིགས་ལ་འབྱུང་བ་ཡིས།
མངོན་པར་ཁེངས་པ་རབ་ཏུ་བྱུང་ནས་གཏོང་།། 77

ཞེས་ཐོས་རྒྱལ་པོ་འི་སྲས་བཅས་རྒྱལ་པོ་ཡིས།
ཕྱག་འཚལ་ཆོ་ནས་གཞི་རབ་དུ་གསོལ།
བཅོམ་ལྡན་གསུང་གིས་དེ་ཡི་རྐང་པ་ལ།
ལྷས་བྱིན་ཚིག་རྩུབ་བརྗོད་ཅིང་ཕྱག་མི་བྱེད།། 78

དེ་ནས་ས་གསོལ་ཡ་མཚན་ཡིད་ཅན་གྱི།
དགེ་སློང་ཚོགས་ཀྱིས་དྲིས་ཤིང་སྟོན་པ་ཡིས།
བཀའ་སྩལ་རྒྱལ་པོ་སྐྱེ་བ་གཞན་ལ་ཡང་།
འདྲིག་མཁན་འདི་ལ་ངེས་པར་ཕྱག་འཚལ་བྱས།། 79

ཀ་ཤིའི་གྲོང་དུ་དབུལ་པོ་གཞོན་ནུ་ཡིས།
སྨད་འཚོང་བཟང་མོ་ཞེས་པ་སྒྲོན་མཐོང་གྱུར།
མཛེས་པས་དེ་ཚེ་དེ་ཡི་གཡོག་རྣམས་བྱས།
གང་ཕྱིར་ཆགས་པ་རྒྱུད་ཀུན་ཉེ་བར་སྟོན།། 80

नीचस्य पादौ कथमस्य वन्दे
महीपतिः सन्निति निश्चलोऽभूत् ॥ ७६ ॥

तमब्रवीदस्खलिताभिमानं
विकल्पभिन्नं भगवान् विहस्य ।
प्रव्रज्यया मोहमहानुबन्धी
संत्यज्यते जातिमयोऽभिमानः ॥ ७७ ।

श्रुत्वेति राज्ञा सह राजपुत्रैः
कृते प्रणामे पृथिवी चकम्पे ।
न देवदत्तः परुषाभिधायी
पदौ ववन्दे भगवद्गिरास्य ॥ ७८ ॥

कम्पात् क्षितेर्विस्मितमानसेन
पृष्टस्ततो भिक्षुगणेन शास्ता ।
उवाच राजा किल कल्पकस्य
जन्मान्तरेऽप्यस्य कृतः प्रणामः ॥ ७९ ॥

पुरा युवा काशिपुरे विलोक्य
भद्राभिधानां गणिकां दरिद्रः ।
सेवां व्यधात् सुन्दरकस्तदास्यै
रागो हि सर्व्वव्यसनोपदेष्टा ॥ ८० ॥

དེ་ཡིས་བཏང་ནས་མི་རྟོག་བཏུ་བའི་སྐད།
ཡང་ཡང་ལྷག་པར་དོན་གཉེར་བྱུང་བ་བཞིན།
དེ་དང་འགྲོགས་པའི་ལུས་མེད་རི་བ་ལས།
ནགས་ནང་རྣམས་སུ་དེ་ཡིས་ངལ་ཞིང་འཁྱམས།། 81

སྐབས་དེ་ར་རྫོན་ལ་ཆགས་པས་རབ་ངལ་ཞིང་།
ནགས་ནང་ཕྱིན་པར་གྱུར་པས་ས་ཡི་དབང་།
ལུས་ནི་འཁྲི་ཤིང་གིས་བསྒྲིབས་ཚངས་བྱིན་གྱིས།
དེ་ནི་རབ་མཐོང་དེ་ཡི་གླུ་དག་ཐོས།། 82

མི་རྟོག་གསར་པ་གསར་པ་འདོད་པས་སྦྲང་རྩི་བྱེད།
ཅི་སྟེ་དེ་ལྟར་གདུང་བས་ཁྱོད་འཛེམས་གྱུར་དུ་སོང་།
བཞིན་རས་མི་རྟོག་རྣམ་རྒྱས་ཆུ་སྐྱེས་ལྡན་པ་དེ།
གང་ཕྱིར་ཉིན་མོ་འི་མཇུག་ཏུ་ཟུམ་པར་གྱུར་པ་ཡིན།། 83

མི་བདག་གིས་ནི་དེ་ཡི་གླུ་སྐད་ཐོས།
འཛུམ་ཟེར་དོ་ཤལ་མཛེས་པ་ལ་རེག་ཅིང་།
དེར་སྨྲས་ཉི་འོད་དྲག་པོས་གདུངས་པ་ལ།
གྲོགས་པོ་གླུ་ཡི་ཉམས་དགའ་འགྱུར་པ་ཅི།། 84

དེས་ཀྱང་སྨྲས་པས་བདག་ངེས་པར་ནི།
ཉི་མ་མི་གདུང་འདོད་པ་མཆོག་ཏུ་གདུང་།

तया विसृष्टः कुसुमोच्चयाय
पुनःपुनर्भृङ्ग इवाधिकार्थी ।
तत्सङ्गमानङ्गमनोरथेन
श्रान्तः स बभ्राम वनान्तरेषु ॥ ८१ ॥

अत्रान्तरे श्रान्ततरः क्षितीशः
प्राप्तो वनान्तं मृगयारसेन ।
तं ब्रह्मदत्तः प्रसमीक्ष्य गीतं
तस्याश्चकारोच्छन्नतनुर्लताभिः ॥ ८२ ॥

नवनवकुसुमाशया किमेवं
मधुकर तापहतोऽसि गच्छ तूर्णम् ।
विकसितकमलाननाब्जिनी सा
भवति हि संकुचिता दिवावसाने ॥ ८३ ॥

तस्या हि गीतं नृपतिर्निशम्य
स्मितप्रभाघट्टितहारकान्तिः ।
उवाच तं तीव्रकरार्कतापः
कोऽयं सखे गीतरसाभियोगः ॥ ८४ ॥

सोऽप्यब्रवीत् भूमिपते न नाम
तप्तो रविस्तप्ततरस्तु कामः ।

འཇིག་རྟེན་ན་ནི་རང་ལས་སྡུག་བསྔལ་འཛིན།
སོ་ཀའི་སྐྱ་ངམ་ཐང་ནི་སྐྱིག་བྱེད་མིན།། 85

དོན་ལྡན་ཚིག་འདིའི་ཡོན་དན་ཐུལ་བ་ཡིས།
དེ་ནི་ས་ཡི་བདག་པོའི་མཛའ་བོར་གྱུར།
ལེགས་བཤད་ཡང་དག་བརྗོད་པས་རིག་པ་ནི།
སུ་ཞིག་དག་གི་བསྙེན་བཀུར་གནས་མི་འགྱུར།། 86

དེ་ནས་རྒྱལ་པོ་མི་མེད་ངལ་གྱུར་པ།
དེ་ཡི་བསིལ་བའི་རིམ་གྲོས་གདུང་བ་བྲལ།
དེ་ནས་བྲུས་ཞེས་དེ་ཡིས་དགའ་བས་དེ།
བླངས་ནས་ལྷན་ཅིག་རྒྱལ་པོའི་ཕོ་བྲང་སོང་།། 87

དེ་ལ་འདི་ཡི་སྒྲོག་རབ་བྱིན་ཞེས་ནས།
ལྷག་པར་ཆོས་པས་སེམས་ཀྱི་སྤྱོད་ཚུལ་རྟོགས།
རྒྱལ་སྲིད་སྤྱོད་སྦྱིན་མངོན་ཕྱོགས་དེ་གནས་དེ།
སེམས་རྗེས་ཞུགས་ལ་སྦྱིན་མིན་ཅི་ཞིག་ཡོད།། 88

དེ་ནི་རྒྱལ་སྲིད་སྤྱོད་སྦྱིན་བརྩོན་པའི་ཚེ།
མཛེས་པས་མཚན་མོ་བསམས་པ་བདག་ལ་ནི།
བཟང་མོ་མེད་ན་རྒྱལ་སྲིད་བདེ་བས་ཅི།
དེར་མཛའི་བདུད་རྩིས་དབང་བསྒྱུར་སྐལ་ལྡན་ཡིན།། 89

स्वकर्म्मदुःखानि विहन्ति लोके
न ग्रीष्मदग्धानि मरुस्थलानि ॥ ८५ ॥

इत्यर्थवद्वाक्यगुणार्पणेन
स भूपतेर्वल्लभतामवाप ।
संवादसंस्पर्शसुभाषितं हि
केषां च सत्कारपदं न याति ॥ ८६ ॥

तेनाथ राजा विजने श्रमातुरः
शीतोपचारैरपनीततापः ।
प्रीत्या तमादाय ततः सहैव
स्वराजधानीमगमत् कृतज्ञः ॥ ८७ ॥

तत्रास्य जीवप्रद इत्युदन्त-
सन्तोषसंपूरितचित्तवृत्तिः ।
राज्यार्द्धदानाभिमुखः स तस्थौ
चित्तानुवृत्तस्य किमस्य देयम् ॥ ८८ ॥

राज्यार्द्धदानप्रसृतेऽथ तस्मिन्
नाचिन्तयत् सुन्दरकः कृपायाम् ।
भद्रां विना राज्यसुखेन किं मे
धन्यो हि तत्प्रीतिसुधाभिषिक्तः ॥ ८९ ॥

རྒྱལ་སྲིད་ལས་ཀྱང་ཕྱིད་ལ་བདག་མི་སྲིད།
དབལ་ནི་ཆུང་ཡང་ཉམས་པ་མེད་ན་མཛེས།
དོན་གཅིག་ལྡན་པས་རྟག་ཏུ་འགལ་བར་བརྗོད།
གཉིས་ཀ་ལོངས་སྤྱོད་རྗོད་ལ་གཟུགས་ཅན་ཉིད།། 90

དེ་སྐད་མི་བདག་ནང་ནས་བཀུམ་པ་ན།
རྒྱལ་སྲིད་མཐའ་དག་གིས་ནི་བདག་རྫོགས་འགྱུར།
ཞེས་པ་སྐད་ཅིག་རྣམ་བསམས་འགྲོད་པས་བདུངས།
དྲག་པོ་འི་ཕྲུགས་བདང་དེ་ཡིས་སླར་བསམས་པ།། 91

བདག་གི་ཅི་བསམས་མཆོག་ཏུ་སྨད་འོས་འདི།
ངེས་པར་རྣོ་བའི་རབ་བྲིད་འདི་ལྟ་ཅི།
ལས་ངན་རྟོག་པའི་དྲིམས་རབ་བསྒོས་པ།
ཀྱེ་མ་རང་སེམས་ལ་ཡང་ངོ་རེ་ཚ།། 92

རྒྱལ་སྲིད་ཤེས་གྱུར་བདེ་ལ་ཕྱུག་འཚལ་ལོ།
ཀུན་སྨོངས་མ་གཅིག་དཔལ་འབྱོར་བཟོད་པར་མཛོད།
གང་དག་ཉམས་སྨུ་མ་སྐྱོང་བསམ་ཉིད་ན།
དང་པོ་འི་བློ་ཡི་རང་བཞིན་འདི་ལྟར་གྱུར།། 93

ཀྱེ་མ་དཔལ་དང་དུག་ཤིང་བསྐྱངས་ཙམ་གྱིས།
སྐྱེས་བུ་རྣམས་ནི་རྣམ་པར་ཉམས་པར་བྱེད།

मह्यं न राज्याद्यपि रोचतेऽर्द्ध-
मखण्डितात्यापि हि शोभते श्रीः।
एकार्थयोगे हि सदा विवादः
द्वयोर्हि भोगैः कलिरेव मूर्त्तः ॥ ९० ॥

तस्मान्नृपं कुष्ठमहं निपात्य
समस्तराज्येन भवामि पूर्णः।
क्षणं विचिन्त्येत्यनुतापतप्तः
तीव्रं मनः स्वस्य पुनः प्रदध्यौ। ९१ ॥

किं चिन्तितं निन्द्यपरं मयैतत्
कोऽयं प्रकारः खलु तीक्ष्णतायाः।
कृतघ्नसंकल्पकलङ्कलेपा-
दहोनु लज्जा निजचेतसोऽपि ॥ ९२ ॥

स्वस्त्यस्तु राज्याय नमः सुखेभ्यः
संमोहमाता क्षमतां च लक्ष्मीः।
येषामनास्वादितचिन्तिताना-
मेवंविधा धीः प्रथमः स्वभावः ॥ ९३ ॥

भ्रमं विधत्ते विदधाति मूर्च्छां
निपातयत्येव तमस्तनोति।

འཁྲུལ་པ་སྐྱེད་བྱེད་བརྒྱལ་བ་ཉིད་དུ་བྱེད།
རྣམ་པར་ལྷུང་བྱེད་སྨྱོན་པ་རྒྱས་པར་བྱེད།། 94

ཡུན་རིང་འདི་བསམས་རང་ཉིད་བྱང་ཆུབ་ལ།
ཆགས་བྲལ་དེ་ཡིས་སེམས་སྐྱེས་སྤྲོ་དྲི་ནི།
མི་ཡི་དབང་པོས་མཐོན་པར་གསོལ་བཏབ་ཀྱང་།
སྲིད་པ་དང་བྲལ་རྒྱལ་སྲིད་བཟུང་མ་གྱུར།། 95

དུས་ཀྱིས་རང་སངས་རྒྱས་ཉིད་ཐོབ་པ་དེ།
རྫུ་འཕྲུལ་ཆེ་ལྡན་མི་བདག་གིས་མཐོང་ནས།
མགོ་འཕྲེང་དེ་ཡི་ཞབས་པད་ལ་འཕོས་པས།
སེམས་ཉི་དང་བར་འཚོས་པ་དེ་དག་སྨྲས།། 96

གང་ཡང་དམ་པའི་ལས་ཀྱི་རྣམ་སྨིན་སྐྱེས།
རབ་ཞིའི་དབང་བསྐུར་དབེན་དེ་ཕྲུག་པར་འོས།
གང་གི་མཐུ་ལས་ཆགས་པ་བྲལ་རྣམས་ཀྱིས།
རྩ་གཏེར་སྐེ་རགས་ལྡན་པ་གཏང་བར་འོས།། 97

ཞེས་པ་དེ་དོན་ཕྱིས་བསྐྱེད་རྒྱལ་པོས་བརྗོད།
ཐོས་ནས་དེ་དོན་དོན་དུ་གཉེར་ནས་བཟུང་།
འདྲིག་མཁན་དེ་ནི་ཞི་བའི་གནས་ཐོབ་ནས།
དེ་ཉིད་དམན་པ་གང་གྲཱ་སྐྱོང་བ་པོ།། 98

आघ्रातमात्रैव करोति पुंसा-
महो विनाशं विषवल्लरी स्त्रीः ॥ ९४ ॥

चिरं विचिन्त्येति स जातचित्तः
प्रत्येकबोधिर्विमलः प्रभाते ।
अभ्यर्थ्यमानोऽपि नरेश्वरेण
राज्यं न जग्राह निवृत्ततृष्णः ॥ ९५ ॥

प्रत्येकबुद्धत्वमवाप्तमेनं
कालेन दृष्ट्वा नृपतिर्महर्द्धिः ।
तत्पादपद्मच्युतमौलिमाल्य-
श्चित्तप्रसादोचितमित्यवोचत् ॥ ९६ ॥

स कोऽपि सत्कर्म्मविपाकजन्मा
वन्द्यो विवेकः प्रशमाभिषेकः ।
यस्य प्रभावाद्विरतस्पृहाणां
त्याज्येव रत्नाकरमेखला भूः ॥ ९७ ॥

श्रुत्वेति राज्ञा कथितं तदर्थ-
जातं तदभ्यर्थनया विधाय ।
तत् कल्पकः शान्तिपदं प्रपेदे
सेवान्तरङ्गः किल गङ्गपालः ॥ ९८ ॥

མཆོག་གི་ལམ་ཀྱི་སྦྱོར་བས་རབ་བྱུང་ལས།
དམ་པའི་དངོས་པོ་མཆོད་འོས་ཐོབ་དེ་ལ་འདང་།
རྒྱལ་པོས་རབ་བདུད་ཕྱུག་འཚལ་དེ་ཡི་ཚེ།
ཉམ་འགྱུར་དྲུག་ལྷན་ས་ཡང་གཡོས་པར་གྱུར།། 99

རྒྱལ་པོ་ཉམ་འདུད་བསྒྲུབ་པ་དེ་ཉི་བཟང་སྤྲིན་དག་དང་ཚངས་པས་ཕྱིན།
གང་ཡང་ཉེ་བར་འཁོར་དེ་དགེ་ལྡན་འདྲིག་མཁན་གང་ག་སྐྱོང་།
ཞེས་པའི་ངོ་མཚར་བཅོམ་ལྡན་གྱིས་གསུངས་དགེ་སློང་དེ་དག་ཉམས་ཐོས།
སེམས་ནི་རབ་དང་ཁོ་ན་ལེགས་པའི་ལམ་ལ་རྒྱུ་ཉིད་ཡིན་པར་སེམས།། 100

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་འཁྲི་ཤིང་ལས་ཡབ་དང་སྲས་འཛམ་བའི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་གཉིས་པའོ།།

प्राप्तं तमप्युत्तमकर्म्मयोगात्
प्रव्रज्यया सज्जनपूज्यभावम् ।
राजा ववन्दे प्रणतः पृथिव्याः
कम्पस्तदाभूदपि षड्विकारः ॥ ९९ ॥

सोऽयं राजा विहितविनतिर्भद्रको ब्रह्मदत्तो
पश्चोपाली स किल कुशली कल्पको गङ्गपालः ।
इत्याश्चर्य्यं भगवदुदितं भिक्षवस्ते निशम्य
स्वच्छं चित्तं सुकृतशरणे मेनिरे हेतुमेव ॥ १०० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
पितापुत्रसमादानं नाम द्वाविंशतिमः पल्लवः ॥

ཨ་ལ་འདབ་ཅི་ཤུ་ཙ་གསུམ་པ་ནི།

གང་ཞིག་སེམས་ཅན་དོན་རྣམས་དག་གི་བུ་དང་ཆུང་མ་ལ་སོགས་མཆོག་ཏུ་ནི།
པངས་པའང་བདང་ནས་དམན་པའི་པོ་ཉ་བཞིན་ལོག་གྱུར་པ་མེད་པ་ཉིད།
ཡིད་བཞིན་རིན་ཅན་ལས་ལྷག་མཛེས་ཤིང་འཛིག་རྟེན་ཀུན་གྱིས་སྨད་པར་
མི་འོས་པ།
སྐྱེས་བུའི་རིན་གཞན་པ་སྔོན་མེད་མཐུ་ལྡན་སུ་ཞིག་དེ་རྣམས་ཕྱག་བགྱི་འོས།། 1

ཤཀྱའི་གྲོང་ཁྱེར་དག་ཏུ་སྔོན། ལྷ་སྦྱིན་གདམ་ཀྱི་མཛུག་ཐོགས་སུ།
དགེ་སློང་གིས་དྲིས་བཙོམ་ལྡན་འདས། རྒྱལ་བས་སྔོན་གྱི་སྤྱོད་མཐའ་གསུངས།། 2

དཔལ་འབྱོར་ཡིད་གཙུགས་གནས་གྱུར་པ། སྣ་ཚོགས་ཞེས་པའི་གྲོང་ཁྱེར་བྱུང་།
ཀུན་ལ་ཕན་པའི་ནུས་པ་ཅན། ལེགས་བྱས་སྐྱེ་བའི་ས་གཞི་བཞིན།། 3

དེར་ནི་མི་བདག་སྤྱོད་ཚུལ་བཀྲ། གྲགས་མིན་སྨུན་པའི་ཚ་ཟེར་ཅན།
མིག་གི་ཀུན་དགའ་བདུད་རྩིའི་གཟུགས། ཀུན་ཏུ་རྒྱལ་བ་ཞེས་པ་བྱུང་།། 4

དེ་ཡི་བུ་ནི་གཏོང་ཕོད་ཅན། ཐམས་ཅད་སྒྲོལ་ཞེས་བྱ་བ་གྱུར།
གང་གི་སྔོན་མེད་གཏོང་བ་ཡིས། དཔག་བསམ་ཤིང་གི་གྲགས་པ་ཕྲོགས།། 5

ཕྲག་དོག་སྤངས་ནས་དུས་མཉམ་དུ། མཁས་པ་ཡིས་ནི་རབ་བརྒྱན་པ།
བདེན་པ་གང་གི་ཚིག་དང་ནི། སྦྱིན་པས་དཔལ་དང་ཐོས་པས་བླ།། 6

अथ त्रयोविंशः पल्लवः ।

चिन्तारत्नादधिकरुचयः सर्व्वलोकेष्वनिन्द्या
वन्द्यास्तेऽन्यैः पुरुषमणयः केऽप्यपूर्व्वप्रभावाः ।
येषान्नैव प्रियमपि परं पुत्रदारादि दत्त्वा
सत्वार्थानां भवति वदनम्लानता दैन्यदूती ॥ १ ॥

भगवान् भिक्षुभिः पृष्टः पुरा शाक्यपुरे जिनः ।
जगाद पूर्व्ववृत्तान्तं देवदत्तकथान्तरे ॥ २ ॥

पुरी बभूव विश्वाख्या विश्वासवसतिः श्रियः ।
विश्वोपकारसक्तस्य सुकृतस्येव जन्मभूः ॥ ३ ॥

सञ्जयाख्योऽभवत् तस्याममित्रतिमिरांशुमान् ।
नेत्रानन्दसुधाह्लतिः विचित्रचरितो नृपः ॥ ४ ॥

तस्य विश्वान्तरो नाम वदान्यस्तनयोऽभवत् ॥
अपूर्व्वत्यागिना येन हृतं कल्पतरोर्यशः ॥ ५ ॥

ईर्ष्याविरहितास्तुल्यं विदग्धेन प्रसाधिताः ।
सत्येन भारती येन दानेन श्रीः श्रुतेन धीः ॥ ६ ॥

གང་གི་གྲགས་པ་ཀུ་ད་ཀའི། ནང་གི་འདབ་ལྟར་དྲི་མེད་པ།
ཕྱོགས་ན་ཚུང་མ་རྣ་རྒྱན་དུ། གྱུར་པ་ད་ལྟའང་རྣམ་པར་མཛེས།། 7

ནམ་ཞིག་དེ་ཡིས་སྐྱོང་བ་ལ། ཤིང་རྟ་རྒྱལ་སྲིད་རྣམ་པར་རྒྱལ།
འོད་ཀྱིས་ཡིད་ལ་རེ་བ་འཕྲོག། རིན་ཅན་མཆོག་གིས་བརྒྱན་པ་བྱིན།། 8

ཤིང་རྟ་མཆོག་དེ་བྱིན་པ་ལ། སྐྱེ་བོ་མཐའ་དག་ཡམ་མཚན་གྱིས།
སྙིང་ནི་ཀུན་དུ་ནོན་གྱུར་ཅིང་། བསམ་པས་ཀྱང་ངོ་མི་ཡི་དབང་།། 9

དེ་ནས་ས་བདག་དགའ་བ་ཞན། ཡིད་ལ་རེ་བ་བསམ་པས་ནོན།
མི་དགའ་བ་ནི་ཉེར་བསགས་པས། བློན་པོ་ཆེ་རྣམས་བོས་ཏེ་སྨྲས།། 10

ཤིང་རྟ་ཆེན་པོ་འི་བདེ་འདི་ནི། གང་གི་མཐུ་ཡིས་རབ་བསྲུབས་པ།
དགྲ་འཇོམས་རྒྱལ་བར་བྱེད་པ་ཡིས། ཤིང་རྟ་དེ་ནི་གཞོན་ནུས་བྱིན།། 11

གཉིས་ལ་བདག་གི་དཔལ་འབྱོར་ནི། གཡོ་མེད་གྱུར་ཅིང་བདེ་བར་གནས།
ཤིང་རྟ་རྟུལ་ཕོད་ལམ་དེ་དང་། གླང་པོ་རྒྱལ་བའི་གཏེར་ལའོ།། 12

དེ་སྐད་རྒྱལ་པོ་འི་ཚིག་ཐོས་ནས། བློན་པོ་རྣམས་ཀྱིས་དེར་སྨྲས་པ།
མཉེས་ག་ཤིན་ནས་ནི་བག་མེད་པ། འདི་ནི་རྒྱལ་པོ་ཁྱོད་ཀྱི་སྐྱོན།། 13

ཆོས་ནི་སྲུ་ཡི་དགའ་བ་མིན། སྦྱིན་པ་སྲུ་ཡི་བཀུར་བྱ་མིན།
འོན་ཀྱང་རྩ་བ་ཉམས་པ་ཡིས། ཤིང་ལས་འབྲས་བུ་དོན་གཉེར་ལྡོག། 14

अद्यापि यस्य दिक्कान्ताकर्णाभरणतां गतं ।
विभाति केतकीगर्भपलाशविशदं यशः ॥ ७ ॥

स कदाचित् ददौ दिव्यरत्नालङ्कारमर्थिने ।
रथं विजयसाम्राज्यमनोरथहरं त्विषा ॥ ८ ॥

दत्ते रथवरे तस्मिन् विस्मयेनाखिलो जनः ।
बभूवाक्रान्तहृदयश्चिन्तया च नरेश्वरः ॥ ९ ॥

महामात्यानथाहूय हर्षहीनो महीपतिः ।
उवाचोपचितोद्वेगचिन्ताक्रान्तमनोरथः ॥ १० ॥

दत्तो रथः कुमारेण स जैत्रः शत्रुमर्दनः ।
यत्प्रभावार्ज्जिता सेयं महारथवरूथिनी ॥ ११ ॥

लक्ष्मीः सुखनिषण्णा मे याता निश्चलतां तया ।
रथे सौर्य्यपथे तस्मिन् जयकुञ्जे च कुञ्जरे ॥ १२ ॥

इति राजवचः श्रुत्वा तमभाषन्त मन्त्रिणः ।
राजन् दोषस्तवैवायं वात्सल्येन प्रमाद्यतः ॥ १३ ॥

धर्म्मः कस्य न हर्षाय दानं कस्य न सम्मतम् ।
किन्तु मूलहताद्वृक्षान्निवर्त्तन्ते फलार्थिनः ॥ १४ ॥

གཉིས་སྐྱེས་དེ་ཡི་ཞིང་དུ་ཡང་། གཞན་གྱི་ཡུལ་དུ་བཙོངས་པར་གྱུར།
ཅེས་སྨྲས་བློན་པོ་ཐམས་ཅད་ནི། ཟུག་རྔུས་ཟུག་པ་བཞིན་དུ་གྱུར།། 15

དེ་ནས་དགེ་བའི་རྣམ་སྨིན་བཞིན། སྙིང་ལ་ཀུན་དགའ་སྟར་བྱེད་པ།
དུས་ཀྱི་སྲིས་བྱེད་དགའ་བ་ཡི། དཔྱིད་ནི་ཡང་དག་བྱུང་གྱུར་ཅིང་།། 16

དཔྱིད་ནི་དོན་གཉེར་བྱུང་བ་རྣམས། རང་ཉིད་ཀྱིས་བཟུང་བསྟེན་འོས་པའི།
མི་རྟོག་ཚལ་གྱི་འཇིག་རྟེན་ནི། གྲགས་པ་བཞིན་དུ་དཀར་བ་དང་།། 17

འགྲོ་བ་ལྡོན་པ་མྱ་ངན་མེད། འཇིག་རྟེན་གྲིབ་བསིལ་ཕན་པར་བརྟེན།
མི་རྟོག་གཡོན་ནུས་རབ་བརྒྱན་པ། དཔྱིད་ཀྱིས་བསྐྱབ་པར་བརྩམས་པའི་ཚེ།། 18

རྒྱལ་སྲས་སྐྱོང་བའི་དཔག་བསམ་ཞིང་། རྒྱལ་སྲིད་འཕེལ་བྱེད་གླང་པོ་ལ།
ཞོན་པ་མི་རྟོག་རྒྱས་པ་ཡི། ལྡོན་པ་གཟིགས་སུ་ནགས་སུ་ག་ཞིགས།། 19

རྒྱལ་ཕྲན་གཞན་གྱིས་བཏང་བ་ཡི། བྲམ་ཟེ་ལམ་དུ་བགྲོད་དེ་ལ།
མངོན་ཕྱོགས་ཞེས་པ་བརྗོད་པའི་ཚིག། སྔོན་དུ་བཏང་ནས་རབ་སྨྲས་པ།། 20

ལེགས་པ་ཁྱོད་ནི་འཇིག་རྟེན་ན། གསོ་བའི་ཡིད་བཞིན་ནོར་བུར་སྒྲོགས།
གང་དང་ཕྲད་པས་སྐྱོང་བ་རྣམས། དཔལ་གྱི་མཆོག་ཏུ་འཁྱུད་པར་གྱུར།། 21

ཕྲལ་ཕྱིན་ཁྱོད་པར་གྲགས་པ་ནི། གཉིས་ཉིད་བཟང་པོ་འདི་སྐྱེ་བ་ལ།
སྦྱིན་པས་ལག་བརྐྱན་འཇིག་རྟེན་ན། ཁྱོད་དང་མཐོ་བརྟན་གླང་འདི་འོ།། 22

विक्रीतः परदेशे च रथस्तेन द्विजन्मना ।
इत्युक्ता मन्त्रिणः सर्व्वे शल्यविद्धा इवाभवन् ॥ १५ ॥

अथ कालेन संप्राप्ते वसन्ते मदनोत्सवे ।
विपाके सुकृतस्येव हृदयानन्ददायिनि ॥ १६ ॥

स्वयंग्रहोपजीव्यस्य मधोर्मधुकरार्थिनः ।
लोकः पुष्पवनैर्यातो यशोभिरिव शुभ्रताम् ॥ १७ ॥

अशोकं लोकसच्छायमुपकारोद्यतं द्रुमम् ।
मधौ विधूतं सन्नद्धे कलिकालङ्कृतं जगत् ॥ १८ ॥

राजपुत्रः समारुह्य कुञ्जरं राज्यवर्द्धनम् ।
ययौ फुल्लान् वने द्रष्टु मर्थिकल्पतरु स्तरून् ॥ १९ ॥

व्रजन्तं प्रति सामन्तप्रयुक्तास्तं द्विजाः पथि ।
बभाषिरे समभ्येत्य स्वस्तिवादपुरःसराः ॥ २० ॥

चिन्तामणिर्गीयसे त्वं श्लाघ्यो जगति जङ्गमः ।
यस्य सन्दर्शनेनार्थी गाढ़मालिङ्ग्यते श्रिया ॥ २१ ॥

द्वावेव विश्रुतोत्कर्षविशेषौ भद्रजन्मनि ।
दानार्द्रहस्तस्त्वं लोके गजश्चायं स्थिरोन्नतिः ॥ २२ ॥

ལེགས་བྱས་རྒྱ་ཆེའི་གླང་པོ་འདི། བདག་ཅག་ལ་ནི་གནང་བར་མཛོད།
ཁྱོད་ལས་གཞན་གྱིས་གཏོང་ཕོད་ནི། འདི་ནི་སྦྱིན་པར་མི་ནུས་སོ།། 23

དེ་ཡིས་དེ་བླངས་སྤྲོ་ལྡན་དེ། སྤོག་ལྡན་ཡང་དག་རྒྱལ་སྲིད་བཞིན།
དུང་དང་རྒྱལ་མཚན་ཛ་ཡབ་བཅས། གཉིས་འཐུང་དེ་དག་རྣམས་ལ་བྱིན།། 24

བྱང་ཆུབ་བཙོ་བོ་སྨོན་ལམ་གྱིས། རིན་ཅེན་མང་ལྡན་གླང་པོ་འི་དབང་།
བྱིན་ནས་དག་པའི་བློ་ལྡན་དེ། ཀུན་དུ་དགའ་བ་རྒྱས་པར་གྱུར།། 25

རྒྱལ་བའི་གླང་པོ་བྱིན་པ་ཡི། གྲགས་པ་མི་བདག་གིས་ཐོས་ནས།
རྒྱལ་པོ་འི་དཔལ་འབྱོར་བསྲུང་བ་ཡི། ཐབས་དང་བྲལ་བ་ཉིད་དུ་བསམས།། 26

དེ་ནས་ས་བདག་རྒྱལ་སྲིད་ནི། ཉམས་པས་འཇིགས་ཤིང་ཁྲོས་པ་ཡིས།
ངེས་པར་བསྐྲད་ནས་གཞོན་ནུ་དེ། ཕྱུག་འཚལ་ནས་ནི་ཆས་གྱུར་ཏེ།། 27

བཙུན་མོ་མ་དྲིས་ལྷ་གཅིག་དེས། གཞོན་ནུ་དྲིས་ལྡན་ཞེས་པ་དང་།
དེ་བཞིན་ཀྲི་ཥྞ་ཞེས་པ་ཡི། བུ་མོ་ཁྲིད་ནས་ནགས་སུ་སོང་།། 28

སློང་བ་རྣམས་ལ་ནགས་སུ་ཡང་། བཞོན་པ་ལ་སོགས་ལྷག་མ་བྱིན།
གང་ཕྱིར་ཆེན་པོ་འི་སྙིང་སྟོབས་ནི། ཕུན་སུམ་ཚོགས་སམ་རྒྱུད་ཀྱང་སྐྱོམས།། 29

ནམ་ཞིག་མ་དྲིས་མེ་ཏོག་དང་། རྩ་བ་འབྲས་བུ་བསྒྲུབ་པའི་སྐད།
སོང་ཚེ་བྲམ་ཟེ་རྒུ་ཞིག་གིས། རྒྱལ་པོ་འི་སྲས་ལ་མངོན་ཕྱོགས་སྨྲས།། 30

अस्मभ्यं सुकृतोदार कुञ्जरोऽयं प्रदीयताम् ।
त्वदन्येन वदान्येन दातुमेष न शक्यते ॥ २३ ॥

इत्यर्थितस्तैः सोत्साहः स तेभ्यस्तु ददौ द्विपम् ।
सजीवमिव साम्राज्यं सशङ्खध्वजचामरम् ॥ २४ ॥

दत्त्वा बोधिप्रधानेन प्रणिधानेन शुद्धधीः ।
रथरत्नं द्विपेन्द्रञ्च सोऽभूदानन्दनिर्भरः ॥ २५ ॥

श्रुत्वैव नृपतिर्दत्तं विश्रुतं जयकुञ्जरम् ।
रक्षाप्रकाररहितां राजलक्ष्मीममन्यत ॥ २६ ॥

स राज्यभ्रंशभीतेन कुपितेन महीभुजा ।
निष्कासितः कुमारोऽथ प्रतस्थे प्रणिपत्य तम् ॥ २७ ॥

माद्रीदयितया सार्द्धं जालिनं नाम दारकम् ।
कृष्णाभिधां तथा कन्यामादाय स ययौ वनम् ॥ २८ ॥

वनेऽपि शेषं स ददौ वाहनादिकमर्थिने ।
समं हि महतां सत्वं संपत्सु च विपत्सु च ॥ २९ ॥

माद्र्यां कदाचिद्यातायां पुष्पमूलफलाप्तये ।
ब्राह्मणः कश्चिदभ्येत्य राजपुत्रमभाषत ॥ ३० ॥

གཡོག་འཁོར་མེད་པ་བདག་ལ་ནི། བུ་སྲིང་སྲུང་པོ་འདི་དག་བླང་།
གང་ཕྱིར་སྙིང་སྟོབས་ཆེན་པོ་ཁྱོད། ཐམས་ཅད་སྦྱིན་པར་རབ་ཏུ་གྲགས།། 31

འདི་ཐོས་འཕྲལ་ལ་མ་དཔྱད་པར། མཆོག་ཏུ་སྡུག་པའི་བུ་སྲིང་དག།
དེ་ཡིས་དེ་ལ་བྱིན་ནས་ནི། དེ་བྲལ་རྒྱ་ངན་བཟོད་པར་བྱས།། 32

ནོར་དང་བུ་དང་ཆུང་མ་སོགས། འཇིག་རྟེན་པ་ཡི་མཆོག་ཏུ་ཕངས།
བཙེ་ལྡན་གཏོང་ཕོད་ཅན་རྣམས་ལ། སྦྱིན་པ་ལས་གཞན་ཕངས་པ་མེད།། 33

དེ་ནས་བུ་ལ་མཆེས་གཤིན་པའི། མ་དྲིས་འོངས་པས་བུ་སྲིང་དག།
མ་མཐོང་ཤིན་ཏུ་བརྒྱལ་ནས་ནི། ཁྱོད་ཡི་མདུན་དུ་འགྱེལ་བར་གྱུར།། 34

རྒྱ་ངན་མེ་ནི་འབར་བ་ཡིས། ཁྱབ་ཅིང་ཆོ་ངེ་འདོན་པ་དེ།
འདུ་ཤེས་རྙེད་པས་བུ་སྲིང་དག། བྱིན་པར་གྱུར་པའི་*བྱུང་མཐའ་ཐོས།། 35

ཁྱོ་ལ་མཇལ་བས་རྗེས་ཞུགས་དེ། བུ་ལ་བྱམས་པའི་སྡུག་བསྔལ་མི།
བཟོད་དཀའ་དེ་ཡི་སེམས་ལ་ནི། ཁོང་དུ་རབ་ཏུ་འབར་བར་གྱུར།། 36

སྐབས་དེར་ལྷ་ཡི་དབང་པོ་ནི། བྲམ་ཟེའི་གཟུགས་སུ་མངོན་པར་འོངས།
རྒྱལ་པོ་འི་སྲས་ལ་བཙུན་མོ་ནི། སྡུག་མ་འབང་མོ་འི་དོན་དུ་བསླངས།། 37

དེ་ཡིས་བསླངས་པའི་ཕྲལ་ལ་དེ། བཙུན་མོ་དང་བྲལ་རྒྱ་ངན་དག།
བློ་ཡིས་བཟོད་བྱས་སྙིང་སྟོབས་ཀྱིས། ཆུ་གཏེར་དེ་ཡིས་དེ་ལ་བྱིན།། 38

---

* བྱུང་མཐའ means বৃতান্ত; བྱུང་ should be replaced by འདས་ (অতীত) to signify বৃত্তান্ত the correct rendering.

परिचारकहीनाय चतुरौ बालकाविमौ ।
देहि मह्यं महासत्व सर्व्वदोऽसि विश्रुतः ॥ ३१ ॥

श्रुत्वैतदविचार्य्यैव दारकौ दयितौ परम् ।
दत्त्वा स तस्मै सहसा सेहे तद्विरहव्यथाम् ॥ ३२ ॥

धनपुत्त्रकलत्रादि लोके कस्य न वल्लभम् ।
दानादन्यद् वदान्यानां दयितं न दयावताम् ॥ ३३ ॥

अथ माद्री समभ्येत्य बालकौ बालवत्सला ।
अपश्यन्ती पुरः पत्युः पतितापन्नमूर्च्छिता ॥ ३४ ॥

सा लब्धसंज्ञा दीप्तेन व्याप्ता शोककृशानुना ।
शिशुप्रदानवृत्तान्तं श्रुत्वैवाभूत् प्रलापिनी ॥ ३५ ॥

तस्याश्चेतसि दुःखाग्निरपत्यस्नेहदुःसहः ।
प्रियप्रेमानुसृत्यैव प्रययौ पुटपाकताम् ॥ ३६ ॥

अत्रान्तरे समभ्येत्य विप्ररूपः सुरेश्वरः ।
भृत्यार्थी दयितां पत्नीं राजपुत्त्रमयाचत ॥ ३७ ॥

याचितस्तेन सहसा शुचं जायावियोगजाम् ।
धिया संस्तभ्य सत्वाब्धिः स तस्मै विततार ताम् ॥ ३८ ॥

འཕྲུལ་ལ་བྱིན་པས་རབ་འབྲུགས་ཤིང་། རི་དགས་མོ་བཞིན་རྣམ་སྐྲག་པའི།
བཙུན་མོ་ལ་དེས་བྱང་ཆུབ་ཀྱི། བག་ཆགས་ནང་དུ་འཛོག་ཅིང་སྨྲས།། 39

དགེ་མ་ཡང་དག་ཡིད་དྲོན་ཅིག། མྱ་ངན་བྱ་བར་མི་འོས་སོ།
མཛའ་བ་འདི་ནི་རྨི་ལམ་འདྲ། སྙིང་སྡུག་འགྲོགས་པ་བདེན་པ་མེད།། 40

གཉིས་སྐྱེས་འདི་ལ་གུས་པ་ཡིས། ཁྱོད་བློ་ཆོས་ལ་དགའ་བར་གྱིས།
གསོ་བའི་འཇིག་རྟེན་བགྲོད་པ་ལ། དམ་པའི་ཆོས་ནི་བརྟན་པའི་གྲོགས།། 41

རང་གི་སྐྱེ་བོ་སྐྱེ་བོ་ལེགས་པ་ཀུན་མཐོང་གཉེན་རྣམས་ཉམས་སུ་སྤྱོད་པར་གྱུར།
སྐད་ཅིག་ཡོངས་སུ་གྱུར་པས་དྲི་མ་ཅན་འགྱུར་གྲོགས་ཀྱི་འཕྲེང་བ་མགྲིན་པར་
བཀོད།
ལང་ཚོ་དང་ནི་སྲོག་དག་ཆུང་མ་བུ་ཡིས་རྟག་ཏུ་ཟད་པ་ཉིད་གྱུར་ཅིང་།
ཆོས་ལས་གཞན་པའི་ཐོབ་པ་གང་ཡང་ཡོངས་སུ་འདྲིས་པ་བརྟན་པ་ཉིད་མ་ཐོབ།།
42

ཅེས་སྨྲས་བཙུན་མོ་ལ་ཆགས་པ། ཡོངས་བདང་དེ་ཡི་བཞིན་པད་ཀྱིས།
མཛེས་དང་སེམས་ཀྱི་བརྟན་པ་ཡི། སྤྱོད་ཚུལ་དག་ནི་དེ་ཡིས་བཟུང་།། 43

འབྲལ་བའི་མྱ་ངན་གྱིས་གདུངས་པའི། མ་དྲིས་མཐོང་ནས་སྙིང་རྗེས་འབྲུགས།
བདེ་སོགས་བདག་པོས་རང་གི་གཟུགས། ཡང་དག་བཟུང་ནས་དེ་ལ་སྨྲས།། 44

བུ་མོ་མི་དགའ་མ་བྱེད་ཅིག། ང་ནི་སྐབས་གསུམ་དབང་པོ་ལྷ།
འདི་ཡིས་སློང་བ་རྣམས་ལ་ཁྱོད། སྟེར་གྱུར་དེ་སླད་བདག་གིས་བསླངས།། 45

सद्यःप्रदानतरलां संत्रस्तां हरिणीमिव।
सोऽवदद्दयितामन्तः कलयन् बोधिवासनाम्॥ ३९॥

समाश्वासिहि कल्याणि न शोकं कर्तुमर्हसि।
स्वप्नप्रणयकल्पोऽयमसत्यः प्रियसंगमः॥ ४०॥

शुश्रूषया द्विजस्यास्य धर्मे ते रमतां मतिः।
विलोललोकयात्रायां धर्मः स्थिरसुहृत् सताम्॥ ४१॥

दृष्टाः सर्वे स्वजनसुजना बान्धवाश्चानुभूताः
न्यस्ता कण्ठे क्षणपरिमलम्लायिनी मित्रमाला।
दारे पुत्रे क्षपितमनिशं यौवनं जीवितञ्च
प्राप्तो नान्तस्थिरपरिचयः कोऽपि धर्माद्दृतेऽन्यः॥ ४२॥

इत्युक्त्वा वल्लभां लोभपरित्यागादुवाह सः।
द्युतिं वदनपद्मेन धैर्यवृत्तिञ्च चेतसा॥ ४३॥

वियोगशोकविकलां माद्रीं दृष्ट्वा कृपाकुलः।
निजरूपं समाधाय शचीपतिरुवाच ताम्॥ ४४॥

विषादं मा कृथाः पुत्रि देवोऽहं त्रिदशेश्वरः।
अर्थिभ्यस्त्वान्ददात्येष तस्मादसि मयार्थिता॥ ४५॥

ད་ནི་ཁྱོ་འདི་ཉིད་ལ་ཁྱོད། བདག་གིས་གཏམས་པར་བྱས་ཏེ་གཏད།
གཞན་ལ་འདི་ཡིས་ཁྱོད་མི་སྟེར། ཇི་ལྟར་གཞན་གྱི་ནོར་སྟེར་གྱུར།། 46

ཁྱོད་ནི་བུ་སྲིང་གཉིས་པོ་དང་། ངེས་པར་ཕྲད་པ་བདག་གིས་བྱ།
ཞེས་སྨྲས་མིག་སྟོང་ལྡན་པ་ནི། འཕྲུལ་ལ་ཉིད་དུ་མི་སྣང་གྱུར།། 47

དེ་ནས་བྲམ་ཟེ་བུ་ཚ་དག། ཁྱིར་ནས་ནོར་ནི་འདོད་པ་ཡིས།
ཐམས་ཅད་ཤེས་ཀྱི་གྲོང་སོང་ནས། ཆགས་པ་ལས་ནི་འཚོང་བར་བརྩོན།། 48

རྒྱལ་པོ་འི་སྲས་ཀྱི་བུ་སྲིང་དག། ཐམས་ཅད་ཤེས་ཀྱི་ཡོངས་ཤེས་ནས།
མིག་ནི་མཆི་མས་འགགས་པ་ཡིས། ནོར་ནི་ཆེན་པོ་དག་གིས་བསླུས།། 49

དུས་ཀྱི་ས་བདག་ཐམས་ཅད་ཤེས། མགྲོ་རིས་ཀ་ཤེགས་ཚེ་གྲོང་ཁྱེར་པ།
བློན་པོ་འི་ཚོགས་ཀྱིས་གསོལ་བཏབ་ནས། ཐམས་ཅད་སྒྲོལ་གྱིས་རྒྱལ་སྲིད་
བསྟེན།། 50

མཆོག་ཏུ་སྦྱིན་པ་ལ་ཞེན་པ། རྟུལ་བྲལ་དེ་ཡི་རྒྱལ་སྲིད་ནི།
ཕུན་ཚོགས་སྙིང་སྟོབས་ཀྱིས་རྒྱས་པས། སྒྲ་ཡང་སྙིང་བ་པོར་མ་གྱུར།། 51

ནོར་རིས་འབྱོར་ཚོགས་ཕྱིག་པ་ཅན། བྲམ་ཟེ་ཛམ་བུ་ཀ་དེ་ཡང་།
བདག་གི་རང་མཐུས་ཕུན་ཚོགས་ཞེས། སྐྱེ་བོ་དག་ལ་མངོན་པར་སྨྲས།། 52

ཐམས་ཅད་སྒྲོལ་དེ་ང་ཉིད་དེ། གཉིས་སྐྱེས་དེ་ཡང་ལྷས་བྱིན་ནོ།
དགེ་སློང་རྣམས་ལ་བཅོམ་ལྡན་གྱིས། འདི་གསུངས་སྦྱིན་པ་བསྟན་པ་མཛོད།། 53

अधुना सैव पत्युस्त्वं न्यासीभूता मयार्पिता ।
तं ददात्येष नान्यस्मै परस्वं दीयते कथम् ॥ ४६ ॥

करिष्यामि तवावश्यं दारकाभ्यां समागमम् ।
इत्युदीर्य्य सहस्राक्षः सहसान्तरधीयत ॥ ४७ ॥

अथ तौ दारकौ विप्रः समादायार्थलिप्सया ।
विश्वामित्रपुरं गत्वा लोभाद्विक्रेतुमुद्यतः ॥ ४८ ॥

विश्वामित्रः परिज्ञाय राजपुत्रस्य दारकौ ।
जग्राह महतार्थेन वाष्पसंरुद्धलोचनः ॥ ४९ ॥

कालेन त्रिदिवं याते विश्वामित्रमहीपतौ ।
भेजे विश्वन्तरो राज्यं पौरामात्यगणार्थितः ॥ ५० ॥

राज्ये विरक्तस्य तस्य दानव्यसनिनः परम् ।
सत्वेन वर्द्धमानर्द्धिर्नं कश्चित् याचकोऽभवत् ॥ ५१ ॥

तद्वित्तपूर्णविभवो ब्राह्मणः सोऽपि जम्बुकः ।
कृतघ्नः स्वप्रभावान् मे सम्पदित्यभ्यधाज्जनम् ॥ ५२ ॥

विश्वन्तरः स एवाहं देवदत्तः स च द्विजः ।
उक्तेति चक्रे भगवान् भिक्षूणां दानदेशनाम् ॥ ५३ ॥

སྤྲིན་པ་འཇིག་རྟེན་ཕ་རོལ་མི་རྣམས་གཉེན།
གཡང་ས་བརྒྱར་ནི་ཀུན་དུ་ལྷུངས་པའི་རྟེན།
འཇིགས་ཅུང་སྨུན་པར་ཡུན་རིང་རབ་ཏུ་གསལ།
བཟོད་དཀའི་སྡུག་བསྔལ་དུས་སུ་དབུགས་འབྱིན་ནོ།། 54

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཐམས་ཅད་སྒྲོལ་གྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་གསུམ་པའོ།།

आलम्बनं श्वभ्रशतावपाते
घोरान्धकारे सुचिरप्रकाशः ।
आश्वासनं दुःसहदुःखकाले
दानं नराणां परलोकबन्धुः ॥ ५४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
विश्वन्तरावदानन्नाम त्रयोविंशः पल्लवः ॥

ཡལ་འདབ་ཉི་ཤུ་རྩ་བཞི་པ།

མཐའ་དག་འཇིག་རྟེན་སྣང་བ་སྒྲོ་སྐྱད་ཉི་མ་འོད་ཟེར་འགྱེད།
བདུད་རྩིའི་ཆར་མཆོག་དབབ་སྐྱད་ཟླ་བ་རྫོགས་པ་ཉིད་དུ་འགྲོ།
སེམས་ཅན་བསྐྱལ་བའི་སྐྱད་དུ་དགེ་བའི་ཟམ་སྟེགས་ཆེན་པོ་ནི།
ཁ་ཅིག་འདི་སྙིད་འགྲོ་བར་བསྟུགས་པར་འོས་པའི་སྐྱེ་བ་འཛིན།། 1

ཤཱ་ཀྱའི་གྲོང་ཁྱེར་དག་དུ་སྟོན། རྒྱལ་པོ་དཔལ་ལྡན་ཟས་གཙང་བྱུང་།
གྲགས་པའི་རི་བོང་ཅན་བསྐྱེད་པ། བདུད་རྩིའི་ཆུ་གཏེར་གཞན་པ་བཞིན།། 2

ངོ་བོས་མི་བསྲུན་ལ་ཆགས་དཔལ། ངོ་མཚར་བྱེད་པ་སྲུ་ཞིག་གིས།
ཡོན་དན་ལྡན་པའི་ཚོགས་ལ་གཏད། དམ་པའི་ཕྱོགས་སུ་ལྷུང་བར་བྱས།། 3

ད་ལྟའང་མ་ལུས་ཕྱོགས་དང་ངོགས། ནགས་སུ་ཆགས་ཤིང་དེ་ནི་ལྡན་པ།
གང་གི་གྲགས་པ་རྣམ་དག་པས། ཐུབ་པའི་བརྟུལ་ཞུགས་བླངས་པ་བཞིན།། 4

སངས་རྒྱས་མ་རུ་བདག་བྱུང་ཅིག། ཅེས་པའི་སྨོན་ལམ་སྨོན་བཏང་པས།
དྲི་མེད་མཛེས་པར་མི་ཡུལ་འོངས། བི་ཤཱ་ཁཱའི་བུ་མོ་ལོ།། 5

སྐྱེས་བུ་དམ་པའི་གྲགས་པ་བཞིན། ལྷ་མོ་སྒྱུ་འཕྲུལ་ཆེ་ཞེས་པ།
དེ་ཡི་ཡིད་འོང་མཆོག་ཏུ་གྱུར། ཟླ་བའི་ཀུ་མུད་ལྡན་པ་བཞིན།། 6

चतुर्विंशः पल्लवः ।

ह्रसति सकललोकालोकसर्गाय भानुः
परममममृतरश्मी पूर्णतामेति चन्द्रः ।
इयति जगति पूज्यं जन्म गृह्णाति कश्चित् ।
विपुलकुशलसेतुः सत्त्वसन्तारणाय ॥ १ ॥

पुरा शुद्धोदनः श्रीमान् राजा शाक्यपुरेऽभवत् ।
यशःशशाङ्कजनकः सुधासिन्धुरिवापरः ॥ २ ॥

खलासक्ता स्वभावेन लक्ष्मीर्गुणिगणार्पिता ।
आश्चर्य्यकारिणा येन कृता सत्पक्षपातिनी ॥ ३ ॥

अद्याप्यखिलदिक्तीर्थवनासक्तैर्विवेकिभिः ।
यशोभिः शुचिभिर्यस्य मुनिव्रतमिवोह्यते ॥ ४ ॥

स्यामहं शुद्धमातेति पुरा प्रणिधितः किल ।
विश्वकर्म्मसुतो मर्त्त्यमाजगामामलद्युतिः ॥ ५ ॥

कीर्त्तिः सत्पुरुषस्येव तस्याभूद्दल्लभा परम् ।
महामायाभिधा देवी चन्द्रस्येव कुमुद्वती ॥ ६ ॥

དེ་ཡི་རྨི་ལམ་དཀུ་ནང་ན། གླང་པོ་དཀར་དང་མཁའ་ལ་འགྲོ།
རི་བོ་འཛོམ་དང་སྐྱེ་བོ་ནི། ཆེན་པོས་རབ་ཏུ་འདུད་པ་མཐོང་།། 7

སྐབས་དེར་བྱང་ཆུབ་སེམས་དཔའ་ནི། རང་ཉིད་འཇིག་རྟེན་ལ་བརྩེ་བས།
དགའ་ལྡན་ལྷ་ཡི་གནས་དག་ལས། དེ་ཡི་ལྷུམས་སུ་ཡང་དག་བྱོན།། 8

འཇིག་རྟེན་དགའ་བྱེད་བྱང་ཆུབ་སེམས། དེ་ཡིས་ལྷུམས་སུ་བཟུང་བ་ནི།
འོ་མཚོ་འི་རླབས་ཀྱི་ཟླ་བ་བཞིན། དཀར་བའི་འོད་དང་ལྡན་པར་གྱུར།། 9

བུ་རམ་ཤིང་སྐྱེས་རྒྱལ་པོ་འི་བརྒྱུད། དེ་ནི་ལྷུམས་ན་གནས་པས་དེ།
གཏེར་དང་ལྡན་པའི་ས་གཞི་བཞིན། དགེ་བའི་མཚན་ཉིད་ཀྱིས་མཚོན་གྱུར།། 10

དེ་ཡི་སྲིད་པ་བྱུང་གྱུར་པ། སྨིན་པའི་བསོད་ནམས་རང་བཞིན་སྐྱེས།
ས་ཏྲ་ཀ་རའི་ཏྲི་བཟང་ནི། *སོལ་བ་ལ་ཡང་སྨྲ་བ་མིན།། 11

དེ་ནས་དུས་ཀྱིས་ཡང་དག་རྫོགས། ལུམ་བི་ནི་ཡི་ནགས་གནས་པའི།
ལྷ་མོ་དེ་ལ་སྲས་བལྟམས་དེ། ཨ་རི་དི་ལས་ཉིན་བྱེད་བཞིན།། 12

མ་ཡི་མངལ་གྱི་དྲི་མ་ཡིས། མ་རེག་དེ་ཡི་དཀུ་བརྡོལ་བྱུང་།
དེ་ནས་དེ་ཡི་རང་བཞིན་གྱིས། གདུང་བྲལ་ལུས་ནི་རྣལ་གནས་གྱུར།། 13

ཕྱིར་བྱང་ཉིད་ན་བརྒྱ་བྱིན་གྱིས། སྟོབས་ཤེས་འདོད་ནས་སྐད་ཅིག་ནི།
རྡོ་རྗེ་སྙིང་པོ་འི་སྐུ་དེ་བཟུང་། དེ་ནི་ནུས་མེད་ཉིད་དུ་གྱུར།། 14

---

* Here the Tibetan rendering is incorrect. སོལ་བ means अङ्गार charcoal, whereas by the Sanskrit original अङ्कुर in Tibetan, མྱུ་གུ bud is meant.

सापश्यद्दन्तिनं श्वेतं स्वप्ने कुक्षौ विहायसा ।
गतमारोहणं शैले प्रणतिञ्च महाजनात् ॥ ७ ॥

अत्रान्तरे बोधिसत्त्वस्तुषितात् त्रिदशालयात् ।
गर्भं तस्याः समापेदे स्वयं लोकानुकम्पया ॥ ८ ॥

वहन्ती बोधिसत्त्वं सा गर्भे भुवननन्दनम् ।
इन्दुं दुग्धाब्धिवेलेव बभूव पाण्डुरद्युतिः ॥ ९ ॥

इक्ष्वाकुराजवंश्येन तेन गर्भस्थितेन सा ।
भूर्निधानवतीवाभूत् भव्यलक्षणलक्षिता ॥ १० ॥

बभूव दोहदस्तस्या दानपुण्यमयोदयः ।
अङ्कुरेऽप्यविसम्वादि सहकारस्य सौरभम् ॥ ११ ॥

अथ कालेन सम्पूर्णे सा लुम्बिनीवने स्थिता ।
असूत तनयं देवी दिवाकरमिवादितिः ॥ १२ ॥

मातुर्गर्भमलास्पृष्टं कुक्षिं भित्त्वा स निर्गतः ।
तां चक्रेऽथ स्वभावेन स्वस्थाङ्गीं विगतव्यथाम् ॥ १३ ॥

निर्गच्छन्नेव दृष्टोऽसौ बलजिज्ञासया क्षणम् ।
शक्रेण वज्रसाराङ्गस्तस्याशक्यत्वमाययौ ॥ १४ ॥

བལྟམས་པ་ཙམ་གྱིས་ཁྲིཙྪ་དེ། རང་གི་གོམས་པ་བདུན་ཕྱིན་ནས།
ཡི་གེ་རབ་གསལ་ཚིག་གིས་ནི། ཕྱོགས་སུ་རྣམ་པར་གཟིགས་ཤིང་སྨྲས།། 15

འདི་ནི་བདག་གི་མྱང་འདས་ཤར། འཇིག་རྟེན་བློ་གྲོས་རྗེས་མཐུན་སློ།
འདི་ཡང་སྐྱེ་བའི་མཐའ་དང་ལྡན། འདི་ནི་འཁོར་བ་དག་ལས་བྱུང་།། 16

དེ་སྐད་དེ་ཡིས་བརྗོད་པ་ན། ས་ནི་ཀུན་དུ་འདར་གྱུར་ཏེ།
འགྲོ་བའི་བླ་མ་མི་ཟད་སྟོབས། དེ་ནི་གཟུང་བར་མ་ནུས་བཞིན།། 17

མཁའ་ཡི་ཆུ་རྒྱུན་གྱིས་བཀྲུས་པ། དེ་ཡི་གྲགས་པ་དཀར་བའི་གདུགས།
སྙིང་སྟོབས་འཇུམ་པའི་ཊ་ཨབ་བཅས། དེར་ནི་ལྷ་རྣམས་དག་གིས་གཟུང་།། 18

ཐུབ་པ་ཀོ་ཀྲི་ད་ཡི་རིར། གནས་ལ་ཚ་བོ་མི་སྤྲིན་གྱིས།
འོད་ཟེར་མཐོང་ནས་རབ་དུ་དྲིས། ཕྱག་དང་དང་པའི་བཅས་པའི་རི། 19

གང་གི་མཐུན་པས་དབྱུལ་བྱེད་པ། ཉི་མ་བརྒྱ་ཡི་སྣང་བ་བཞིན།
སྣང་བ་མཐོང་བ་གང་ལས་ལགས། ཡ་མཚན་ལས་དེས་དེ་སྐད་བརྗོད།། 20

ལྷ་ཡི་སྤྱན་ལྡན་རེས་སྨྲས་པ། བྱང་ཆུབ་སེམས་དཔའི་སྐྱེ་བ་ལ།
བསོད་ནམས་སྣང་བ་འདི་དག་སྐྱེས། མཉེས་ཀ་ཤིན་མི་རིང་ཉིད་ན་དེ།། 21

དགེ་བ་ཀེ་སྐད་དུ་ཙུ་ཅག་བལྟ། ཞེས་བརྗོད་ཐུབ་པ་ཀུན་དགའ་ཞིང་།
ངལ་བསོས་བདེ་བ་ཉིད་དུ་གྱུར། སྐྱས་བལྟམས་དོན་ཀུན་མཆོག་དུ་ནི།། 22

जातमात्रः शिशुर्गत्वा स्वयं सप्तपदानि सः ।
दिशो विलोकयन्नूचे सुव्यक्ताक्षरया गिरा ॥ १५ ॥

इयं निर्वृतिः पूर्वा च गतिर्लोकेषु दक्षिणा ।
पश्चिमा जातिरप्येषा संसारादियमुत्तरा ॥ १६ ॥

इति तस्य ब्रुवाणस्य पृथिवी समकम्पत ।
तमक्षयबलं धर्त्तुमशक्तेव जगद्गुरुम् ॥ १७ ॥

छत्रं तस्य यशः शुभ्रं सत्त्वस्मेरं सचामरम् ।
व्योमाम्बुधाराधौतस्य जगृहुस्तस्य देवताः ॥ १८ ॥

अस्मिन्नवसरे पृष्टः स्वस्रीयेणासिताभिधः ।
नारदेन प्रभां दृष्ट्वा किष्किन्धाद्रिस्थितो मुनिः ॥ १९ ॥

कस्मादर्कशतालोक इवालोकः प्रदृश्यते ।
तमोदरिद्रा येनेति गिरयः सगुहागृहाः ॥ २० ॥

विस्मयादिति तेनोक्तः सोऽवदद् दिव्यलोचनः ।
जातः पुण्यप्रभासोऽयं बोधिसत्त्वस्य जन्मनि ॥ २१ ॥

अचिरेणैव तं वत्स द्रक्ष्यावः कुशलाप्तये ।
इत्युक्त्वा मुनिरानन्दाद् विश्रान्तिसुखितोऽभवत् ॥ २२ ॥

སྒྲས་བདམས་དོན་ཀུན་མཆོག་ཏུ་ནི། གྲུབ་པ་ཟས་གཙང་གིས་མཐོང་ནས།
འདི་ནི་དོན་ཀུན་གྲུབ་པ་ཞེས། དེ་ཡི་མཚན་ཡང་བཏགས་པར་གྱུར།། 23

གནོད་སྦྱིན་ཤཱཀྱ་འཕེལ་ཞེས་པ། ཤཱཀྱའི་གྲོང་ཁྱེར་དགའ་ན་གནས།
གང་ལ་བཏུད་པས་ཤཱཀྱ་ཡི། བྱིས་པ་ཉེར་འཚེ་མེད་པར་འགྱུར།། 24

ལུགས་དེ་ཡབ་ཀྱིས་ཕྱག་འཚལ་བའི། སླད་དུ་གདུང་ཚོ་གསང་བ་ལ།
དེ་ཡིས་བྱང་ཆུབ་སེམས་དཔའ་དེ། མཐོང་ནས་དེ་ཡིས་ཞབས་ལ་གཏུགས།། 25

དེ་ནས་ས་བདག་དགྱེས་པ་ཡིས། དེ་ནི་པང་དུ་བླངས་བྱས་ནས།
དེ་ཡི་ལུས་ལ་མཚན་རྣམས་ནི། མཚན་མཁན་དག་གིས་རབ་ཏུ་བལྟས།། 26

དེ་ནས་མཚན་ཤེས་ཡ་མཚན་ལྡན། ཀུན་གྱིས་མི་བདག་ལ་སྨྲས་པ།
ལྷ་གཅིག་གཞོན་ནུ་མཆོག་འདི་ནི། མཚན་རྣམས་དག་གི་ཉེ་བར་མཚོན།། 27

མཚན་ཉིད་འདི་དག་རྣམས་ཀྱིས་ནི། འཁོར་ལོ་སྒྱུར་པ་བརྒྱ་བྱིན་བདག།
ཐམས་ཅད་ངལ་བསོའི་སྐལ་ལྡན་ནམ། བཅོམ་ལྡན་དེ་བཞིན་གཤེགས་པར་
འགྱུར།། 28

འདི་ཡི་ཞབས་གཉིས་རབ་ཏུ་མཛེས། དམར་ཞིང་པདྨ་ལྟ་བུར་མཉེན།
སོར་མོའི་འདབ་རིང་འཁོར་ལོ་ཡིས། མཚན་ཞིང་ལེགས་པར་རབ་ཏུ་གནས།།
29

མཐོ་ཞིང་དང་བའི་རྒྱལ་པོ་བཞིན། སོར་མོའི་ཡུལ་འདབ་དྲ་བར་ལྡན།
དཔལ་ལྡན་ཨེ་ནའི་བྱིན་པ་རྫང། ཕུས་མོའི་བར་དུ་ཕྱག་གིས་བརྒྱུད།། 30

पुत्रजन्मनि सर्व्वार्थसिद्धिं शुद्धोदनः परम् ।
दृष्ट्वा सर्व्वार्थसिद्धोऽयमिति नामास्य निर्म्ममे ॥ २३ ॥

शाक्यवर्धननामाभूत् यक्षः शाक्यपुराश्रयः ।
यत्प्रणामेन शाक्यानां शिशवो निरुपद्रवाः ॥ २४ ॥

तत्स्थित्या प्रेषितः पित्रा प्रणामाय स गुह्यकः ।
तं बोधिसत्त्वमालोक्य निपपातास्य पादयोः ॥ २५ ॥

अथोत्सङ्गे समादाय हृष्टस्तं पृथिवीपतिः ।
लक्षणानि निमित्तज्ञैस्तस्य देहे व्यलोकयत् ॥ २६ ॥

लक्षणज्ञास्ततः सर्व्वे नृपमूचुः सविस्मयाः ।
देव दिव्यकुमारोऽयं लक्षणैरुपलक्ष्यते ॥ २७ ॥

जायते लक्षणैरेतैर्विश्वविश्रान्तशासनः ।
शक्राधिपश्चक्रवर्त्ती भगवान् स तथागतः ॥ २८ ॥

दीर्घाङ्गुलिदलौ चक्रलाञ्छनौ सुप्रतिष्ठितौ ।
अरुणौ चरणावस्य कान्तौ कमलकोमलौ ॥ २९ ॥

राजहंस इव प्रांशुः सजालाङ्गुलिपल्लवः ।
एष जानुयुगः श्रीमानाजानुभुजभूषितः ॥ ३० ॥

གསང་བ་སྦྲུབས་བཅས་སླང་པོ་བཞིན། ཉ་གྲོ་དྷ་ལྟར་རྒྱ་ཞིང་གབ།
གཡས་སུ་འཁྱིལ་བའི་སྤུ་ཡིས་མཚན། རྒྱ་ཁྱོན་དག་དང་མཚུངས་པར་མཐོང་།། 31

རྟུལ་དང་དྲི་མའི་ཆས་མ་རེག། འཛམ་བུ་ཆུ་བོ་བཙོ་མའི་འོད།
ཕྱག་ཞབས་སྦྲག་སོ་མགྲིན་པའི་མཆོག། རབ་གསལ་འདབ་མ་བདུན་མའི་
དབྱིབས།། 32

སྐུ་སྟོད་དག་ཀྱང་སེང་གེ་འདྲ། ལུས་ཀྱི་ཡན་ལག་ཆེ་ཞིང་གསལ།
ཚེམས་ནི་བཞི་བཅུ་མཉམ་ཞིང་དཀར། བར་མཚམས་མེད་ཅིང་ཤངས་དག་
མཛེས།། 33

ལྗགས་ཀྱང་རིང་ཞིང་སྲབ་པ་སྟེ། འབྲུག་དང་ཧཾ་ཡི་སྒྲ་ལྟ་བུ།
སྤྱན་མཐིང་ཛིམ་བ་ཡི་འདྲ། གཙུག་ཏོར་ལྷུན་ཅིག་སྐྱེས་པའི་དབུ།། 34

དབུ་ནི་གདུགས་དབྱིབས་ཁྱིམ་པ་འདི། མཛོད་སྤུ་དཀར་མཛེས་སྨིན་ཚར་མཚན།
ཕྱུགས་དཀར་བཀྲ་ཤིས་རབ་ཏུ་འབར། རི་མོ་དུང་དང་རྒྱ་སྐྱེས་ཕྱག།། 35

རྒྱལ་པོ་ཁྱོད་ཀྱི་སྲས་པོ་འདི། འཁོར་ལོ་སྒྱུར་བའམ་ཀུན་མཁྱེན་ནི།
ཡང་དག་རྫོགས་པའི་བྱང་ཆུབ་ཏུ། སངས་རྒྱས་འགྲོ་བའི་བླ་མར་འགྱུར།། 36

ཞེས་བརྗོད་དེ་དག་སོང་བའི་ཚེ། ས་ཡིས་བདག་པོས་དགའ་བ་ཐོབ།
ཉིན་ཞག་བདུན་ན་སྟོན་པ་ཡི། ཡུམ་ནི་མཐོ་རིས་དག་ཏུ་སོང་།། 37

གང་ཚེ་དེ་བཙམས་ཤཀྱ་རྣམས། ཐུབ་པ་བཞིན་དུ་ཞི་བ་ཉིད།
མཐོང་བ་དེ་ཚེ་གཞོན་ནུ་དེ། ཤཀྱ་ཐུབ་པ་ཞེས་པར་གྲགས།། 38

सकोशहस्तिगुह्यश्च न्यग्रोधपरिमण्डलः ।
दक्षिणावर्त्तरोमाङ्कः परिणाहसमोन्नतिः ॥ ३१ ॥

रजोमललवास्पृष्टस्तप्तजाम्बूनदद्युतिः ।
हस्तपादांशकण्ठाग्रस्पष्टसप्तच्छदाकृतिः ॥ ३२ ॥

सिंहपूर्व्वार्द्धकायश्च वृहत्स्पष्टाङ्गविग्रहः ।
चत्वारिंशत्समाप्रोतशुक्लदन्तः सुनासिकः ॥ ३३ ॥

दीर्घप्रतनुजिह्वश्च मेघदुन्दुभिनिस्वनः ।
अभिनीलाक्षगोपक्ष्मः सहजोष्णीषमस्तकः ॥ ३४ ॥

सितोर्णाङ्को भ्रुवोर्भागः स्वस्तिकोरःस्थलोज्ज्वलः ।
लेखाशृङ्गाब्जहस्तोऽयं छत्राकारशिराः शिशुः ॥ ३५ ॥

राजन्नयं ते तनयश्चक्रवर्त्ती भविष्यति ।
सम्यक्सम्बोधिसम्बुद्धः सर्व्वज्ञो वा भविष्यति ॥ ३६ ॥

इत्युक्ता तेषु जातेषु लेभे हर्षं महीपतिः ।
सप्तभिर्दिवसैः शास्तुर्जननी त्रिदिवं ययौ ॥ ३७ ॥

तस्य जन्मनि शाक्यानां मुनीनामिव शान्तता ।
दृष्टा यदा शाक्यमुनिर्नामाभूत् स तदा शिशुः ॥ ३८ ॥

འདི་ནི་ལྷ་རྣམས་དག་གིས་ཡང་། ལྷ་ཞེས་གཟི་བརྗིད་དག་གིས་ངེས།
ས་ཡི་བདག་པོས་དེ་ཡི་མཚན། ལྷ་ཡི་ལྷ་ཞེས་བཏགས་པར་གྱུར།། 39

དེ་ནས་མི་སྦྱིན་དང་འགྲོགས་དེ། ཐུབ་པ་ནག་པོ་དེ་ཉིད་མཐོང་།
གུས་པས་དཀའ་ཐུབ་ནགས་ཚལ་ནས། དེ་ནི་བལྟ་རུ་ཡངས་དག་འོངས།། 40

བྱང་ཆུབ་སེམས་དཔའ་སྐལ་བ་ནི། གསལ་བྱེད་ཉི་མ་འཆར་བ་བཞིན།
མཐོང་ནས་བཞིན་གྱི་དཔལ་རྒྱས་པ། པདྨ་ཉིད་དང་མཚུངས་པ་ཐོབ།། 41

ཕྱག་དང་མགྲོན་ཆ་བྱས་པ་ཡིས། རྒྱལ་བ་ཐུབ་པ་དེས་སྨྲས་པ།
རྒྱལ་པོ་ཡོན་ཏན་ཚོགས་ཀྱིས་བཞིན། སྲས་ཀྱི་ཁྱོད་ནི་དབྱེས་པར་འོས།། 42

འདི་ཡི་མཚན་རྟགས་འདི་དག་ནི། ཐར་པའི་དཔལ་འབྱོར་ཕུན་ཚོགས་སམ།
འཁོར་ལོ་སྒྱུར་བའི་དཔལ་དུ་བརྗོད། འབྲས་བུ་འདི་དག་བསླུ་བ་མེད།།
43

འདི་ཡིས་བྱང་ཆུབ་སྔ་དྲོ་ཡིས། རྫོགས་སངས་རྒྱས་པའི་ཆུ་སྐྱེས་ཞལ།
པདྨའི་འབྱུང་གནས་དག་གི་བཞིན། སྐལ་ལྡན་མིག་གི་སྣོད་དུ་གྱུར།། 44

བྱང་ཆུབ་འོ་མའི་རྒྱ་མཚོ་ཆེ། སྙིང་སྟོབས་དག་པ་འདི་ཡི་ནི།
གསུང་གི་བདུད་རྩི་མཁས་པ་དག། སྐལ་ལྡན་རྣམས་ཀྱི་ཉེར་འཚོར་འགྱུར།།45

གང་གི་དུས་ནི་ཡོངས་རྫོགས་པས། འདི་ནི་མཐོང་པ་རྙེད་དཀའ་བ།
བདག་ཉིད་གཅིག་པུ་འགྲོ་བ་ནི། བསོད་ནམས་ལྡན་པ་འདི་ན་བསླུས།། 46

देवानामपि देवोऽयमिति निश्चित्य तेजसा ।
देवातिदेव इत्यस्य नाम चक्रे महीपतिः ॥ ३९ ॥

नारदेनाथ सहितस्तत्त्वदर्शी तपोवनात् ।
तं समभ्याययौ द्रष्टुमादरादसितो मुनिः ॥ ४० ॥

स बोधिसत्त्वं बालार्कमिव कल्पप्रकाशनम् ।
दृष्ट्वा विकाशिवक्त्रश्रीर्लेभे कमलतुल्यताम् ॥ ४१ ॥

सोऽब्रवीत् विहितातिथ्यं नृपतिं प्रणतं मुनिः ।
राजन् गुणगणेनेव स्पृहणीयोऽसि सूनुना ॥ ४२ ॥

एतानि लक्षणान्यस्य मोक्षलक्ष्मीसमागमम् ।
वदन्ति चक्रवर्त्तिश्रीः फलं नैषां विनश्वरम् ॥ ४३ ॥

अस्य बोधिप्रभावेण सम्बुद्धस्य मुखाम्बुजम् ।
धन्यः पद्माकरस्येव नेत्रपात्रं करिष्यति ॥ ४४ ॥

विबुधाः शुद्धसत्त्वस्य बोधिदुग्धमहोदधेः ।
धन्या वागमृतैरस्य भविष्यन्त्युपजीविनः ॥ ४५ ॥

पुण्यभाजि जगत्यस्मिन्नेक एवास्मि वञ्चितः ।
एतत्सन्दर्शनं यस्य पूर्णकालस्य दुर्लभम् ॥ ४६ ॥

ཞེས་སྨྲས་མི་བདག་ལ་སྨྲན་ནས། མཁའ་ལས་དཀའ་ཐུབ་ནགས་སོང་སྟེ།
ཡིད་ནི་རབ་ཏུ་དང་བྱས་ནས། ལུས་ནི་རབ་ཏུ་གཏང་བར་བསམ།། 47

ཡོངས་སུ་རྫོགས་པའི་མན་ངག་ནི། མི་སྲིན་དག་གིས་མངོན་པར་ཤུས།
དེ་ཡིས་དེ་ལ་སྨྲས་པ་བྱ། བ་དུད་རྩི་གཞོན་ནུས་སྟོན་པར་འགྱུར།། 48

རྒྱལ་སྲས་དེ་ལས་བདུད་རྩི་ནི། རྟོགས་ནས་ནད་དང་བྲལ་བ་ཁྱོད།
འཁོར་བའི་ཆུ་གཏེར་ལས་སྒྲོལ་འགྱུར། ཞེས་པ་སྨྲས་ཏེ་ལུས་བཏང་གྱུར།། 49

མི་སྲིན་གྱིས་ནི་འཕྲལ་ལ་དེའི། ལུས་ཀྱིས་ལེགས་པར་བྱ་བ་བྱས།
ཀ་ཏྲ་ཡན་ཞེས་ཐོབ་ནས། གྲུབ་སྒྲད་བ་རཱ་ཎ་སིར་སོང་།། 50

དེ་ནས་གཞོན་ནུ་སྐྱེད་བསྐྱངས་ཤིང་། རིག་ཀུན་ལེགས་པར་ཕ་རོལ་ཕྱིན།
ཡི་གེ་མཁས་པས་ཚངས་པ་ཡི། ཡི་གེ་མངོན་གསར་རྣམ་པར་སྤྲུལ།། 51

གླང་ཆེན་ཁྲི་ཡི་སྟོབས་མཚུངས་པར། དེ་ནི་འགྲོ་ལ་གྲགས་པའི་ཚེ།
ཡངས་པ་ཅན་པས་དགའ་བའི་སྐད། དེ་ལ་གླང་ཆེན་ཁྲོས་པ་བསྒྲིངས།། 52

འབྱུང་འགྱུར་འཁོར་ལོ་སྒྱུར་བའི་ཕྱིར། དེ་ལ་སྐྱེས་བུ་ཞོངས་པ་ཡིས།
གླང་པོ་ཆེ་དེ་ལྷ་སྦྱིན་གྱིས། ཡོངས་སུ་སྡང་བ་དག་གིས་བསད།། 53

སོ་གཉིས་རབ་ཏུ་ལྷུང་བ་དེ། དགའ་བོས་གོམ་པ་བདུན་དུ་ཁྱེར།
གཞོན་ནུ་ཡིས་ཀྱང་དེ་བླངས་ནས། ར་བ་དྲུག་ལས་ཕྱི་རོལ་འཕངས།། 54

इत्युक्त्वा नृपमामन्त्र्य गत्वा व्योम्ना तपोवनम् ।
सुप्रसन्नं मनः कृत्वा देहत्यागमचिन्तयत् ॥ ४७ ॥

स पर्य्यन्तोपदेशाय नारदेनाभिचोदितः ।
तमुवाचामृतं वत्स कुमारः कथयिष्यति ॥ ४८ ॥

अधिगम्यामृतं तस्मान्नृपसूनोरनामयम् ।
तरिष्यसि भवाम्बोधिमित्युक्त्वा तनुमत्यजत् ॥ ४९ ॥

शरीरसत्क्रियां तस्य कृत्वा सपदि नारदः ।
ययौ वाराणसीं सिद्धौ लेभे कात्यायनाभिधाम् ॥ ५० ॥

वर्द्धमानः कुमारोऽथ सर्व्वविद्यासु पारगः ।
लिपिप्रवीणोऽभिनवां लिपिं ब्राह्मीं विनिर्म्ममे ॥ ५१ ॥

नागायुतसमप्राणे तस्मिन् जगति विश्रुते ।
वैशालिकैः प्रियायास्मै प्रेषितो मत्तकुञ्जरः ॥ ५२ ॥

भविष्यति चक्रवर्त्तीत्यस्य प्राप्तमुपायनम् ।
देवदत्तः परिद्वेषात् तं जघान महागजम् ॥ ५३ ॥

च्युतं चकर्ष द्विरदं नन्दः सप्त पदानि तम् ।
कुमारस्तु तदुत्क्षिप्य प्राकाराद् बहिरक्षिपत् ॥ ५४ ॥

ཏ་ལ་བདུན་དང་ས་ཡི་གཞི། མདའ་གཅིག་གིས་ནི་བས་པར་ཕུག།
གཅོད་འབིགས་མཚོན་དང་བསྣུན་བཅོས་ལ། དེ་ཉིད་ཕུལ་དུ་ཕྱིན་པར་གྱུར།། 55

དེ་ནས་བཙུན་མོ་ཡོན་ཏན་མཚུངས། གྲགས་འཛིན་མ་ནི་རྒྱལ་སྲས་ཀྱི།
དགའ་བའི་ཁྲིམས་བཞིན་འཛིག་རྟེན་ན། གྲགས་པས་མཐོ་བ་བསྒྲངས་པར་གྱུར།། 56

སྐ་ས་དེར་རླུང་ནི་ཆེན་པོ་ཡིས། ཤིན་ཏུ་ཆེ་བའི་ལྗོན་པ་ནི།
དཔག་ཚད་བདུན་པ་རྣམ་པར་བསྐྱིལ། ཆུ་བོ་འི་སྲོལ་ནི་འགགས་པར་གྱུར།། 57

ཕུར་བཀྲོར་རོ་ཧི་ཀ་ཞེས་པ། དེ་ནི་ཤིང་ཆེན་གྱིས་བཀག་པས།
ངང་ཚུལ་ཉམས་པའི་བུད་མེད་བཞིན། རྒྱུན་ལས་རབ་ཏུ་བཟློག་སྟེ་སོང་།། 58

རྒྱལ་པོ་འི་སྲས་ཀྱི་ལྗོན་པ་དེ། གླངས་ཤིང་བཅག་སྟེ་འཕངས་ནས་ཀྱང་།
སྐྱེ་རྒྱ་ཉི་སླར་ཚུ་ཡིས་ནི། ཆུ་སྐྱོང་འཁྲུགས་པ་རྣམ་པར་བཟློག།། 59

དེ་ནས་ནམ་ཞིག་སྐྱིད་ཚལ་དུ། ངང་པ་སྒྲོ་ལྡན་རྣོན་པོ་ཡིས།
ལྷས་བྱིན་གྱིས་ནི་བསད་པར་གྱུར། གཞོན་ནུ་ཡིས་ནི་ཡང་དག་བསོས།། 60

དེ་ཡི་རྩོད་པས་ལྷ་སྦྱིན་ནི། ལྷག་པར་ཤིན་ཏུ་གདུང་བར་གྱུར།
གང་ཕྱིར་རིགས་མཚུངས་ཡོན་ཏན་གྱིས། མཐོ་བ་གྱ་གྱུ་མི་བཟོད་དོ།། 61

ནམ་ཞིག་གཞོན་ནུ་འདོད་པ་ཡི། གཟུགས་མཚུངས་རྒྱལ་པོ་འི་བུ་མོ་ནི།
ས་འཚོ་ཞེས་པ་མཐོང་གྱུར་ནས། འདོད་པ་ཅི་ཡང་སྐྱེས་པར་གྱུར།། 62

एकनाराचनिर्भिन्नसप्ततालमहीतलः ।
छेद्यभेद्यास्त्रशस्त्रेषु स एवातिशयं ययौ ॥ ५५ ॥

ततस्तुल्यगुणां पत्नीं राजस्तनुर्यशोधराम् ।
अवाप विश्रुतां लोके शुद्धशील इवोन्नतिम् ॥ ५६ ॥

अत्रान्तरे महावातविच्युतः सप्तयोजनः ।
सरित्प्रवाहसंरोधं विदधे विपुलद्रुमः ॥ ५७ ॥

सा स्फारतरुसंरुद्धा रोहिका नाम निम्नगा ।
शीलभ्रष्टेव वनिता प्रययौ प्रतिलोमताम् ॥ ५८ ॥

राजपुत्रस्तमुत्क्षिप्य भङ्क्त्वा विक्षिप्य तद्द्रुमम् ।
न्यवारयत् प्रजामत्स्यजलकल्लोलविप्लवम् ॥ ५९ ॥

ततः कदाचितुद्याने हंसं निशितयन्त्रिणा ।
देवदत्तेन निहतं कुमारः समजीवयत् ॥ ६० ॥

सन्तापं तद्विवादेन देवदत्तोऽधिकं ययौ ।
न सहन्ते हि कुटिलास्तुल्यकुलगुणोन्नतिम् ॥ ६१ ॥

कदाचिद् गोपिका नाम कुमारं राजकन्यका ।
कन्दर्परूपमालोक्य किमप्यौत्सुक्यमाययौ ॥ ६२ ॥

ཟས་གཙང་གིས་ནི་བཙུན་མོ་འདི། སྲས་ཀྱི་ཕྲུགས་ལ་འོས་ཤེས་ནས།
ཁབ་ཏུ་བླངས་ཏེ་ཡིད་བསྲུབས་ཀྱི། ཡིད་ལ་རི་བ་རྫོགས་པར་བྱས།། 63

དེ་ནས་མཚན་མཁར་ངེས་བཅས་རྣམས། མངོན་ཕྱོགས་མི་བདག་ལ་སྨྲས་པ།
ཁྱོད་སྲས་ཉི་མ་བ་ནུ་པ་ལ། འཁོར་ལོས་སྒྱུར་འམ་ཐུབ་པར་འགྱུར།། 64

དེ་ཐོས་མི་བདག་སྲས་ཀྱིས་ནི། འཁོར་ལོས་སྒྱུར་བའི་གནས་ཐོབ་སླད།
རབ་ཏུ་བྱུང་ལ་འཛེམས་པ་ཡིས། ཉིན་གྲངས་རང་བཞིན་བསམས་པར་གྱུར།། 65

དཔལ་ནི་ཐམས་ཅད་གཡོ་བ་དང་། ཞི་བ་བརྟན་པའི་བདེ་བའང་རིག།
འོན་ཀྱང་ལོངས་སྤྱོད་ལ་ཆགས་རྣམས། ཕུན་སུམ་ཚོགས་ལ་མཆོག་ཏུ་གུས།། 66

དེ་ནས་ནམ་ཞིག་སྐྱེད་ཚལ་དུ། རྣམ་པར་རྩེ་སླད་རྒྱལ་པོ་ཡི་སྲས།
མགྱོགས་ཤིང་མགྲོ་བའི་རྟ་ལྡན་པའི། ཤིང་རྟ་དག་ལ་ཞོན་ཏེ་གཤེགས།། 67

དེ་ཡི་ལམ་དུ་སྐྱེས་བུ་ནི། རྒ་བས་འཁོགས་ཤིང་མདོག་མི་སྡུག།
མགོར་སྐྲེས་གཟེགས་ཤིང་བྲུལ་གྱུར་པ། སྐྱེམ་ཞིང་རྒུད་པའི་རྣམ་པ་མཐོང་།། 68

དེ་ཡིས་དེ་མཐོང་རང་ལུས་ལ། གཟིགས་ནས་ཡུན་རིང་རྣམ་བསམས་པ།
ཀྱེ་མ་ལུས་འདི་སྨིན་པ་ཡི། མཇུག་ནི་སྨད་པར་འོས་པ་ཡིན།། 69

འདི་ནི་ན་ཚོད་མཐའ་ཐོབ་ཀྱང་། མཐའ་ནི་བསྟེན་པར་མི་བྱེད་ཅེས།
རྒ་བ་འདི་ནི་རྒན་པོ་ལ། སྐྲ་དཀར་ཟློས་ཀྱི་རྒོད་པ་བཞིན།། 70

शुद्धोदनः सुतस्यैतां ज्ञात्वा चित्तोचितां वधूम् ।
अपूरयद् विवाहेन मन्मथस्य मनोरथम् ॥ ६३ ॥

नैमित्तिकास्ततोऽभ्येत्य नृपमूचुः सुनिश्चयाः ।
पुत्रस्ते चक्रवर्त्ती वा मुनिर्वा सप्तमेऽहनि ॥ ६४ ॥

तच्छ्रुत्वा नृपतिः सूनोश्चक्रवर्त्तिपदाप्तये ।
प्रव्रज्याचकितश्चिन्तां दिनसङ्ख्यामयीं ययौ ॥ ६५ ॥

लोलां सर्व्वः श्रियं वेत्ति शान्तस्थिरसुखामपि ।
तथापि भोगरक्तानां सम्पत्स्वेवादरः परम् ॥ ६६ ॥

ततः कदाचिदुद्यानविहाराय नृपात्मजः ।
प्रययौ रथमारुह्य वल्गुतुङ्गतुरङ्गमम् ॥ ६७ ॥

स विवर्णं जराजीर्णं कीर्णशीर्णशिरोरुहम् ।
सुशुष्कपरुषाकारं ददर्श पुरुषं पथि ॥ ६८ ॥

स तं दृष्ट्वा निजं कायमालोक्याचिन्तयच्चिरम् ।
अहो पर्याप्तपाकोऽयं कायस्यास्य जुगुप्सितः ॥ ६९ ॥

वयः पर्याप्तमाप्तोऽपि पर्याप्तं नाश्रयत्ययम् ।
अतीवपलितव्याजाज्जरा दृढं हसत्यसौ ॥ ७० ॥

ཀྱེ་མ་ད་ནི་རྒན་པོ་དག། རུས་གཟེབ་ལུས་པོ་རྩ་རྒྱུས་ཀྱི།
རྒྱུན་གྱི་ཞགས་པས་སྦྲུས་པ་རུ། སྨོངས་པའི་མཁའ་འགྲོ་གསོ་འམ་སྙམ།། 71

འདི་ནི་ཁྲིམ་དུ་ཅི་ཞིག་བྱེད། དཀར་ཐུབ་ནགས་སུ་ཅིས་མི་འགྲོ།
རྒན་པོ་འི་ལུས་དང་ལྷན་ཅིག་ཏུ། བློ་ཡང་རབ་ཏུ་འཁྲམས་པ་འམ།། 72

རྒན་པོ་འཁོར་བ་ལ་བརྟེན་གྱི། བློ་ནི་ཆོས་ལ་མ་ཡིན་ནོ།
རྒ་བས་ལུས་ནི་འཁོགས་པ་ལ། རང་བཞིན་གྱིས་ནི་དབེན་པ་མེད།། 73

སོ་འཐིང་ལྷུང་བས་ཁ་རྩུ་དག། ཟགས་པའི་ཆ་ཡི་འཁྲུགས་པའི་ཚིག།
ཡི་གེ་རབ་ཏུ་འཁྲུལ་གྱུར་པ། རྒན་པོ་འདི་ནི་སྨད་པར་བྱེད།། 74

ལྟ་བྱེད་ཉམས་ཤིང་ལུས་པོ་འདི། སྟོབས་ནི་ཉམས་ཤིང་ཐོས་པ་ཉམས།
འོན་ཀྱང་སྨོངས་ལས་རྒན་པོ་ནི། གཞོན་ནུ་མ་ཡི་མཛེས་པར་མཐོང་།། 75

དཀར་པོ་འདི་ཉིད་སྨད་པ་ཉིད། ཡིན་ཡང་རྒན་པོ་ཅི་སྟེ་འཛིན།
མཆོག་ཏུ་གཡོ་ཞིང་ཆགས་བྲལ་ཡང་། གང་འདི་ལུས་ལ་ཤིན་ཏུ་ཕངས།། 76

ད་ལྟར་བསམས་ཤིང་ལུས་དག་ནི། རྒུད་པ་རྣམས་ཀྱི་ཚོགས་གྱུར་ཅིང་།
གནོད་པ་དང་བཅས་དགོངས་གྱུར་པ། དེ་ཡི་ཐུགས་ཡིད་བྱུང་བར་གྱུར།། 77

སླར་ཡང་ངུས་གཞན་དག་ན་དེས། རྣ་བར་གྱུར་པའི་རོ་འདྲ་བ།
གནག་དང་བཅས་པ་སྐྱ་བོ་བཞིན། ནད་ཀྱིས་ཐེབས་པའི་མི་ཞིག་མཐོང་།། 78

शरीरे सन्ततस्नायुपाशप्रोतास्थिपञ्जरे ।
वृद्धः पुष्णाति मन्येऽहमहो मोहविहङ्गमम् ॥ ७१ ॥

सारथे किं करोत्येष किं न याति तपोवनम् ।
सङ्कोचमेति वृद्धस्य देहेन सह सा मतिः ॥ ७२ ॥

वृद्धोऽवलम्बते यष्टिं न तु धर्म्ममयीं धियम् ।
जराकुटिलकायस्य स्वभावो निर्विवेकता ॥ ७३ ॥

जुगुप्सां जनयत्येष वृद्धः प्रस्खलिताक्षरैः ।
वचोभिश्च्युतदन्ताभैर्गलल्लालालवाकुलैः ॥ ७४ ॥

नष्टा दृष्टिः कृशः कायः शक्तिर्लुप्ता हृता श्रुतिः ।
तथापि मोहाद्‌दृष्टैव वृद्धस्य तरुणी प्रिया ॥ ७५ ॥

धत्ते धवलतां वृद्धः किमेतामतिगर्हिताम् ।
लोला परं विरक्तापि यद्यस्यातिप्रिया तनुः ॥ ७६ ॥

इति चिन्तयतस्तस्य निर्वेदः समजायत ।
मन्यमानस्य सापायं कायं निचयमापदाम् ॥ ७७ ॥

पुनश्च समयेऽन्यस्मिन्नपश्यद् व्याधितं नरम् ।
विपक्वकुणपप्रायं सपूयमिव पाण्डरम् ॥ ७८ ॥

དེ་ཡིས་དེ་མཐོང་རང་ཉིད་ཀྱིས། ལུས་ལ་དམིགས་དེ་རབ་བསམས་པ།
ཀྱི་མ་ལུས་འདིར་ནད་ཀྱི་ཚོགས། ལྷན་སྐྱེས་ཁོ་ནར་རབ་ཏུ་བྱུང་།། 79

ཤ་ཡི་རང་བཞིན་ལུས་པོ་འདི། དམན་པ་ཡིན་ཡང་སྐད་ཅིག་གང་།
ཀུན་ཞིང་འཁྲུགས་པར་མི་འགྱུར་བ། འདི་ཉིད་ཡ་མཚན་ཤིན་ཏུ་ཆེ།། 80

འདི་བསམས་ཐུགས་ནི་བྱུང་བ་སྟེ། ལུས་ལ་ཕྲ་ཆོས་ཞུགས་པ་ཡིས།
རྒྱལ་སྲིད་ལོངས་སྤྱོད་ཆགས་པ་ལ། གུས་པ་དག་དང་བྲལ་བར་གྱུར།། 81

དེ་ནས་དུས་རེར་འཁྲིད་བ་དང་། གོས་ཀྱིས་གཡོགས་པར་གྱུར་པའི་ལུས།
ལུས་ཀྱི་བྲ་བས་གཅེན་འདུན་གྱི། སྐྱོ་བོ་འཁྲུགས་པའི་རོ་ཞིག་མཐོང་།། 82

དེ་མཐོང་འཁྲལ་ལ་ཆགས་བྲལ་ཞིང་། བརྩེ་བ་སྡུག་བསྔལ་སྨོད་པས་འཁྲུགས།
འཁོར་བ་སྙིང་པོ་མེད་པ་ནི། ཡོངས་སུ་གཏང་བར་ཡུན་རིང་བསམས།། 83

ལས་ཀྱི་རང་བཞིན་ལྟ་བུ་ཡི། འཁྲིང་བ་སྙིང་ལ་རེག་པར་བརྒྱུང་།
རིང་དུ་འགྲོ་བར་ཆས་གྱུར་བ། འདི་ནི་ཡི་དགས་གནས་སུ་འགྲོ།། 84

ཀྱི་མ་ཡུལ་ལ་གོམས་པར་ནི། རྩེ་དགའ་དག་ལ་བརྩོན་པ་ཡིས།
མི་རྣམས་དུས་མཐར་འོ་རྒྱལ་ལས། ཤིང་དང་རྡོ་བ་མཚུངས་པ་ཉིད།། 85

སྐྱེས་བུ་རྣམས་ལུས་སྲིད་མཚོའི་སྡུག་བསྔལ་རྒྱ་ཡི་རྒྱ་བུར་དང་།
དུས་རླུང་གིས་བསྐྱོད་ལས་ཀྱི་འཕྲོ་ཤིང་རྩེ་ཡི་མེ་ཏོག་དང་།

स प्रदध्यौ तमालोक्य समुद्दिश्य निजां तनुम् ।
अहो नु सहजैवास्मिन् काये रोगगणोन्नतिः ॥ ७९ ॥

इदमेव महच्चित्रमियं मांसमयी तनुः ।
न याति क्लेदवैक्लव्यं क्षणं पर्य्युषितेऽपि यत् ॥ ८० ॥

इति ध्यात्वा स सोद्वेगः शरीरविचिकित्सया ।
बभूव राज्यसम्भोगरागे विगलितादरः ॥ ८१ ॥

अथान्यस्मिन् क्षणे माल्यवस्त्राच्छादितविग्रहम् ।
ददर्श देहसत्कारव्यग्रबन्धुजनं शवम् ॥ ८२ ॥

तं दृष्ट्वा सहसोद्वेगदयादुःखघृणाकुलः ।
चिरं निःसारसंसारपरिहारमचिन्तयत् ॥ ८३ ॥

एष प्रेतवनं याति संसक्तां हृदये वहन् ।
दीर्घां प्रस्थानयात्रायां मालां कर्म्ममयीमिव ॥ ८४ ॥

अहो नु विषयाभ्यासविलासाध्यवसायिनाम् ।
नृणामन्त्यक्षणे कष्टा काष्ठपाषाणतुल्यता ॥ ८५ ॥

उद्वेगवारिभवसागरबुद्बुदेऽस्मिन्
कालानिलाकुलितकर्म्मलताग्रपुष्पे ।

སྐྱུ་མའི་བྲུད་མེད་མིག་ནི་རྣམ་པར་གཡོ་བ་དག་གི་ཆ།
འདི་ལ་བརྟན་པ་ཉིད་དུ་མངོན་པར་ཁེངས་པ་འདི་ནི་ཅི།། 86

གཞན་ལ་ཕན་པར་ལྷུར་པ་ཅུང་ཟད་ན་བཟོད་རིགས་པའི་ཆོས་མ་ཐོས།
དགེ་བའི་མེ་ཏོག་བསྣམས་པ་ཉིད་མིན་བདེན་པ་ཡི་ནི་ཚུལ་མ་མཐོང་།
ཞི་བའི་གནས་ལ་རེག་པ་མིན་ཞེས་གསལ་བར་བསམས་པ་ལ་ཆགས་ཤིང་།
ངལ་བཙོས་སློག་སོང་འདི་ནི་འཕྲུལ་ལ་གཡོ་བ་མེད་ཉིད་འཛིན་པར་གྱུར།། 87

དེ་སྐད་རྒྱལ་པོ་འི་བུ་ཡིས་ནི། ལུས་ཀྱི་མི་བརྟན་པ་ཉིད་བསམས།
མ་ལུས་ཡུལ་ལ་ཆགས་པ་ཡི། མཛའ་བ་མཆོག་ཏུ་མེད་པར་གྱུར།། 88

དེ་ནས་མདུན་དུ་གཙང་མ་ཡི། རིས་ཀྱི་ལྷ་རྣམས་ཀྱིས་སྤྲུལ་པ།
ལྷུང་བཟེད་ངུར་སྨྲིག་འཛིན་པ་ཡི། རབ་ཏུ་བྱུང་བ་མཐོང་བར་གྱུར།། 89

དེ་མཐོང་ཉིད་ན་དེ་ཡི་བློ། རབ་ཏུ་བྱུང་ལ་མངོན་ཕྱོགས་གྱུར།
གང་ཕྱིར་འདོད་པ་མཐོང་བ་ནི། དགའ་བས་རང་བཞིན་རྒྱས་པར་གྱུར།། 90

གནས་དང་གནས་མིན་རྒྱལ་པོ་འི་སྲས། འདོད་ཆགས་བྲལ་འགྱུར་རྒྱུ་རྣམས་ནི།
མཐོང་བ་ཐམས་ཅད་ཁ་ལོ་བས། ས་ཡི་བདག་པོ་དག་ལ་བཤད།། 91

དེ་ནས་ཡབ་ཀྱི་ཚིག་གི་ནི། གཞོན་ནུ་གྲོང་གཟིགས་དགེ་མཚན་ལ།
འགྲོ་བས་ལམ་དུ་གཏེར་རྣམས་ནི། སྣ་ཚོགས་བཞག་པ་མཐོང་བར་གྱུར།། 92

मायावधूनयनविभ्रमसंविभागे
पुंसां क एष वपुषि स्थिरताभिमानः ॥ ८६ ॥

नोक्तं किञ्चित् परहितयुतं न श्रुतं धर्म्मयुक्तम्
नैव घ्रातं कुशलकुसुमं सत्यरूपं न दृष्टम् ।
नैव स्पृष्टं शमपदमिति व्यक्तमासक्तचिन्ता-
विश्रान्तोऽयं वहति सहसा निश्चलत्वं गतायुः ॥ ८७ ॥

राजसूनुर्विचिन्त्येति शरीरं विपदास्पदम् ।
अशेषविषयासङ्गे परां निःस्नेहतां ययौ ॥ ८८ ॥

अथाग्रे निर्म्मितं देवैः स शुद्धावासकायिकैः ।
व्यलोकयत् प्रव्रजितं पात्रकाषायधारिणम् ॥ ८९ ॥

तं दृष्ट्वैव बभूवास्य प्रव्रज्याभिमुखी मतिः ।
ईप्सितालोकनप्रीत्या स्वभावो हि विभाव्यते ॥ ९० ॥

वैराग्यकारणं तत्र नृपसूनोः पदे पदे ।
विलोक्य सारथिः सर्व्वं क्षितिपाय न्यवेदयत् ॥ ९१ ॥

कुमारोऽथ पितुर्वाक्यात् ग्रामालोकनकौतुकी ।
व्रजन् पथि निधानानि विवृतानि व्यलोकयत् ॥ ९२ ॥

སྐྱེས་བུས་སྟོན་བཀོད་ཐུད་མེད་ཀྱིས། ལག་པས་བཏོན་ནས་ཉེ་བར་གནས།
གང་ཚེ་དེ་ཡིས་མ་བླངས་པ། དེ་ཚེ་ཆུ་ཡི་གཏེར་དུ་ཞུགས།། 93

དེ་ནས་དེ་ཡི་ཞིང་པ་རྣམས། མགོར་སྐྱེས་རྡུལ་གྱིས་གོས་ཤིང་སྐྱ།
ལག་པ་རྐང་པ་རྣམ་པར་གས། བཀྲེས་དང་སྐོམ་པ་ངལ་བས་གཟིར།། 94

ཐོད་པ་མི་བཟད་འཛེར་དག་གིས། ཀོ་འབྲུད་ཕྱོགས་ནི་རྨ་ཡིས་ཉེན།
ཉོན་མོངས་དབང་གྱུར་མཐོང་གྱུར་ནས། སྙིང་རྗེ་རབ་ཏུ་རྒྱས་པར་གྱུར།། 95

བརྩེ་བས་དེ་དག་ནོར་རྣམས་ཀྱིས། དབུལ་པོ་ཉིད་ནི་མེད་པར་བསྒྲུབས།
བསོད་ནམས་དགེས་ཞེས་གླང་བུ་རྣམས། ཉོན་མོངས་དག་ལས་གྲོལ་བར་བྱས།།
96

དེ་ནས་རྒྱལ་སྲས་རྗེས་འབྲང་བཅས། ཉི་མའི་འོད་ཟེར་རབ་རྒྱས་པ།
ཉིན་གུང་ཚད་པ་ཆེན་པོའི་ཚེ། དེ་ནས་ཕྱིར་ནི་ལོག་པར་གྱུར།། 97

ཤིང་རྟའི་སྒྲ་ཡིས་གཙུག་ཕུད་ཅན། གྲེན་ཕྱོགས་ཕྱོགས་ན་སྔོན་པོར་བྱས།
རྡུལ་གྱི་ཆུ་ཡི་ཐིགས་རྒྱས་པས། ནགས་ཚལ་གཞི་ནི་བསིལ་བར་སྦྱིབ།། 98

དེར་ནི་ཤིང་རྟ་ལས་བབས་ནས། སྙན་པར་གྲགས་ཤིང་རྣ་རྒྱན་ནི།
རྣམ་པར་འཕྱུང་དེས་ངལ་གསོ་འི་སླད། འཛམ་བུའི་གྲིབ་མ་བསྟེན་པར་གྱུར།།99

དེ་ཡི་རྡུལ་གྱི་ཆུ་ཐིགས་རྒྱུན། གསལ་བ་སྙིང་ཁར་འཛིན་པ་དག།
དོ་ཤལ་དག་གི་འབྲེལ་པ་ནི། ཆགས་ལྡན་སྦྱར་བས་མཛེས་པ་བཞིན།། 100

तत्पूर्व्वपुरुषन्यस्तैः स्वीकारैरुत्थितान्यपि ।
यदा स नाग्रहीत्तानि तदा विविशुरम्बुधिम् ॥ ९३ ॥

ततः स कर्षकान् पांशुव्याप्तपाण्डुशिरोरुहान् ।
विदीर्णपाणिचरणान् क्षुत्पिपासाश्रमातुरान् ॥ ९४ ॥

हलकुद्दालविषमोल्लेखपक्षव्रणार्द्दितान् ।
विलोक्य क्लेशविवशान् बभूव करुणाकुलः ॥ ९५ ॥

विधाय दयया तेषां द्रविणैरदरिद्रताम् ।
स वृषाणां वृषरतः क्लेशमुक्तिमकारयत् ॥ ९६ ॥

ततः प्रतिनिवृत्तोऽथ सानुजः पार्थिवात्मजः ।
मध्याह्नपृथुसन्तापे तरलस्तरणित्विषः ॥ ९७ ॥

रथघोषोन्मुखशिखिश्यामीकृतदिगन्तरः ।
स्वेदवारिकणाकीर्णः प्रभास्निग्धवनस्थलीम् ॥ ९८ ॥

सोऽवरुह्य रथात्तत्र गण्डस्खलितकुण्डलः ।
विश्रान्त्यै विश्रुतयशा जम्बूच्छायामशिश्रियत् ॥ ९९ ॥

स बभारोरसि व्यक्तां स्वेदाम्बुकणसन्ततिम् ।
वपुराश्लेषललितां हारस्येव कुटुम्बिनीम् ॥ १०० ॥

རིམ་གྱིས་ཤིང་རྣམས་ཐམས་ཅད་ཀྱི། གྲིབ་མ་ཡོངས་སུ་གྱུར་པའི་ཚེ།
ད་ཡི་སྐྱུ་ལས་ཛམྦུ་ཡི། གྲིབ་མ་ཆུང་ངུ་གཡོས་མ་གྱུར། 101

དེ་ཡི་གྲིབ་མ་བསིལ་བ་དེས། གདུང་བས་ཉེན་པ་རབ་ཏུ་བཟློག།
ཆགས་བྲལ་དྲག་པོ་འི་བག་ཆགས་ཀྱིས། འཁོར་བར་དགའ་བྲལ་དག་གི་བཞིན། 102

དེ་ནས་ས་བདག་ཕྱོགས་དེ་རུ། ཕྲས་ནི་གཟིགས་པར་བཞེད་ལྡན་པས།
གླང་པོ་ཆེ་ལ་ཞུང་བ་ནི། རབ་འདུས་ཛ་ཡབ་འཁྲུག་ཅིང་འོངས། 103

གཞོན་ནུའི་མཐུ་ལས་གྲིབ་མ་ནི། གཡོ་བ་མེད་པ་དེས་མཐོང་ནས།
གུས་པས་རྨད་བྱུང་ཡང་དག་ཐོབ། རབ་ཏུ་བཏུད་ནས་དེར་ཕྱག་འཚལ། 104

དེ་ནས་ཡབ་དང་ལྷན་ཅིག་དེ། གྲོང་ཁྱེར་འགྲོ་བར་བརྩོན་པ་དེ།
གྲོང་ཁྱེར་མཐའ་ཡི་དུར་ཁྲོད་ནི། རོ་ཡིས་ཡོངས་སུ་གང་བ་མཐོང་། 105

ཞི་བའི་ནགས་ནི་མི་ཤེས་པ། རོ་ཡི་ཁེངས་མཐོང་ཆགས་བྲལ་ཅན།
དེ་ཡིས་སྐད་ཅིག་ཤིང་རྟ་ནི། བཟུང་ནས་ཁ་ལོ་སྒྱུར་ལ་སྨྲས། 106

ཁ་ལོ་པ་ལྟོས་སྲོག་ཆགས་ཀྱིས། གནོད་པའི་རང་བཞིན་ལུས་ཀྱི་སྐབས།
ཁྲུངས་པའི་བག་མེད་རྣམས་ཀྱི་ཡིད། འདི་ལྟར་མཐོང་ཡང་ཆགས་པས་བརླན། 107

གཞན་གྱི་བུད་མེད་བལྟས་མ་ངོམས། མིག་ནི་གུས་དང་བཅས་པར་སྒྱུར།
འདི་ཡི་བདེན་ལྡན་མིན་པའི་སྐྱེ། བྱ་རོག་གིས་ནི་གཅོད་ལ་ལྟོས། 108

छायासु परिवृत्तासु शनकैः सर्व्वशाखिनाम् ।
तस्य जम्बूतरुच्छाया न चचाल तनुस्तनोः ॥ १०१ ॥

सा तस्य शीतलच्छाया तापक्लान्तिमवारयत् ।
संसारविरतस्येव तीव्रवैराग्यवासना ॥ १०२ ॥

पुत्त्रदर्शनसोत्कण्ठस्तं देशमथ भूपतिः ।
आजगाम गजोत्सर्पञ्चस्तभ्रमरचामरः ॥ १०३ ॥

छायां स निश्चलां दृष्ट्वा कुमारस्य प्रभावतः ।
गौरवाद्भुतसम्प्राप्तः प्रणतं प्रणनाम तम् ॥ १०४ ॥

ततः स सहितः पित्त्रा नगरं गन्तुमुद्यतः ।
अपश्यत् पुरपर्य्यन्ते श्मशानं शवसंकुलम् ॥ १०५ ॥

स दृष्ट्वा कुणपाकीर्णमशिवं शिवकाननम् ।
सोद्वेगं सारथिं प्राह स्थगितस्यन्दनः क्षणम् ॥ १०६ ॥

सारथे पश्य जन्तूनां कायापायमतीं दशाम् ।
दृष्ट्वेदमपि रागार्द्रं मनो मोहप्रमादिनाम् ॥ १०७ ॥

परस्त्रीदर्शनात्तृप्तं नेत्त्रमास्वाद्य सादरम् ।
अस्यासत्यवती जिह्वा पश्य काकेन कृष्यते ॥ १०८ ॥

འདི་ཡི་ནུ་མའི་སྟེང་དུ་ནི། སེན་དམུགས་དགོད་ཅིང་བདེ་བར་གནས།
འདོད་པས་རྒྱས་པའི་བྱ་རྒོད་ཀྱིས། མཆུ་གཅོད་འདོད་ལྡན་དག་གིས་བཞིན།། 109

ཀྱང་འཕྲང་འདི་དག་གཡོ་བའི་བྱ་རོག་ཆགས་པའི་ལྡི་བས
སྐྲག་ཅིང་བརྒྱལ་བ་དང་།
རྣམ་པར་གྱུར་ཅིང་རྣགས་པའི་རོ་ཡིས་དྲི་ངས་ངེས་པར་སྤྲ་ངན་སྤྲོགས་པ་བཞིན།
ལན་གཅིག་མ་ཡིན་བྱ་རྒོད་ཀྱིས་འཇོམས་བརླན་ལྡན་རྒྱུ་མ
གཟུགས་པའི་རོ་མཐོང་ནས།
རླུང་གིས་རྣམ་པར་བསྐྱོད་པའི་ཡལ་འདབ་ལག་པས་བཞིན
རས་སྒྲིབ་པར་བྱེད་པ་བཞིན།། 110

ཡང་ཆོ་ལྷར་པ་གཡོ་མེད་མོས་པའི་སྙིང་དག་རྒྱུར་དུ་བྲོགས
ཤིང་མགྲིན་པ་ངག་ལ་ཆགས།
ཅི་ཡང་ཁྲག་ལ་འདོད་པ་མངོན་པར་གསལ་ཞིད་སེན་མོ
ཁ་ཡི་རི་མོས་ཀུན་དུ་མཚན།
རྩ་ཡི་མཚན་མ་སོ་ཡིས་བརྟོད་པའི་མཆུ་ཡི་འདབ་མ
སྐད་ཅིག་སྒྲངས་ཤིང་སྒྲུང་བྱས་ནས།
ཅེ་སྤྱང་འདི་ནི་གཅེར་བུའི་བྱ་བ་དག་ལ་ཤིན་དུ་ཆགས
པས་དགའ་བར་བྱེད་པ་བཞིན།། 111

ཞེས་བརྗོད་སྲིད་ལ་འཇིགས་རྩང་ཞིང་། སྐད་པས་དགའ་དང་བྲལ་པ་སྐྱེས།
ཉིན་མོངས་རློག་པའི་ཐབས་སེམས་ཤིང་། གྲོང་ཁྱེར་ནང་དུ་ཞུགས་པར་གྱུར།། 112

अस्याः स्तनमुखन्यस्तनखोल्लेखसुखस्थितिः ।
खण्डयत्यधरं गृध्रः कामीव मदनिर्भरः ॥ १०९ ॥

एते दृष्टनिषक्तवायसशकृन्निष्ठीविनः पादपाः
मूर्च्छन्तीव विपाकपूयकुणपाघ्राणेन निष्कूणिताः ।
दृष्ट्वा गृध्रविदार्य्यमाणमसकृत् कौर्य्याद्रतन्त्रं शवम्
भूयो वातविलोलपल्लवकरैराच्छादयन्तीव च ॥ ११० ॥

क्षीवस्येवाचलस्य द्रुतहृतहृदया जम्बुकी कण्ठसक्ता
रक्ताभिव्यक्तकामा कमपि नखमुखोल्लेखमासूचयन्ती ।
आस्वाद्यास्वाद्य यूनः क्षणमधरदलं दत्तदन्तव्रणाङ्कं
लग्नानङ्गक्रियायामियमतिरभसोत्कर्षमाविष्करोति ॥ १११ ॥

इत्युक्त्वा जातविरतिर्भववीभत्सकुत्सया ।
कलयन् क्लेशनिर्व्वाणं प्रविवेश पुरान्तरम् ॥ ११२ ॥

རི་དྭགས་སྐྱེས་ཞེས་རི་དྭགས་མིག། རི་དྭགས་ལས་སྐྱེས་དྲི་བཟང་ཅན།
གཞོན་ནུ་མ་ཡི་ཆས་རབ་འབར། ཡང་ཐོག་སྟེང་ནས་དེར་དེ་མཐོང་།། 113

དེ་མཐོང་ཚེ་ན་དེ་ཡི་མིག། མཆོག་ཏུ་ཐོས་པ་ཡང་དག་རྒྱུ།
ཐྲལ་ཉིད་དབེན་པ་དག་དང་ལྡན། ཆགས་དང་བཅས་ཤིང་གཡོ་བར་གྱུར།། 114

ངོ་ཚ་བཟློད་པར་མི་ནུས་པ། འདོད་པ་བཞིན་དུ་དེ་མཐོང་བ།
ཉིད་ཀྱིས་གཞོན་ནུ་མ་དེ་དྲངས། གྲོགས་མོའི་མདུན་དུ་འདུག་ནས་སྨྲས།། 115

ཆགས་པས་གདུངས་པ་གང་གི་ལུས། འདི་ཡི་རིག་པ་ཟླ་འོད་ཀྱིས།
མྱ་ངན་འདར་འགྱུར་བྱུད་མེད་ནི། འཇིག་རྟེན་དག་ན་སྐལ་ལྡན་སུ།། 116

རྒྱལ་པོའི་བུ་ཡིས་འདོད་པའི་སྒྲ། མྱ་ངན་འདའ་བ་ཐོས་ཉིད་ན།
སྤྲིན་གྱི་པད་ཚལ་སྟོན་པ་བཞིན། ཀྱེན་ཏུ་ཀློགས་དེ་དེ་ལ་བལྟས།། 117

དེ་ཡི་ཚིག་དང་ལུས་དེས་ཀྱང་། རབ་ཏུ་དང་བར་གྱུར་པ་དེས།
ལེགས་སྦྱོར་ཡོན་ཏན་འབར་བ་ཡི། དོ་ཤལ་སེམས་ཀྱང་དེ་ལ་འཕངས།། 118

བལྟ་བའི་རྗེས་སུ་མཐུན་པ་ཡིས། རྒྱལ་བུའི་དགོངས་པ་ས་བདག་གིས།
ཤེས་ནས་བཙུན་མོའི་ཚོགས་གནས་སུ། དེ་ནི་བླངས་ནས་བཀོད་པར་གྱུར།།
119

དེ་ནས་བཙུན་མོ་སྟོང་ཕྲག་ནི། དྲུག་གིས་གང་བའི་ཕོ་བྲང་དུ།
རྒྱལ་པོའི་སྲས་ཀྱི་ཞི་བ་ནི། དགྱེས་པར་རྣམ་པར་བསམས་ཤིང་ཞུགས།། 120

तत्र हर्म्म्यगतापश्यत् तं कन्याभिजनोज्ज्वला ।
मृगजा नाम मृगजामोदिनी मृगलोचना ॥ ११३ ॥

सरागतरला दृष्टिः श्रोत्रसञ्चारिणी परम् ।
अभूत्तद्दर्शने तस्याः सहसैव विरेकिणी ॥ ११४ ॥

सा तदालोकनेनैव बाला लज्जासहिष्णुना ।
स्मरेणेव समाकृष्टा सखीं प्राह पुरःस्थिताम् ॥ ११५ ॥

का धन्या ललना लोके स्पर्शेनास्य शशित्विषः ।
यस्या मदनसन्तप्ता तनुर्निर्वाणमेष्यति ॥ ११६ ॥

निर्व्वाणशब्दं श्रुत्वैव राजपुत्रः समीहितम् ।
तां ददर्शोन्मुखः पद्मवनानीव दिशन् दृशा ॥ ११७ ॥

स तस्यास्तेन वचसा वपुषा च प्रसादितः ।
हारं सुवृत्तं चित्तञ्च चिक्षेपास्यै गुणोज्ज्वलम् ॥ ११८ ॥

आलोकनानुकूल्येन भावं विज्ञाय भूपतिः ।
पुत्रस्यान्तःपुरपदे तामादाय न्यवेशयत् ॥ ११९ ॥

षष्ठां कान्तासहस्राणां वृतमन्तःपुरन्ततः ।
विवेश राजतनयः प्रियां शान्तिं त्रिचिन्तयन् ॥ १२० ॥

སྐབས་དེར་མི་ཡི་བདག་པོ་ལ། མཚན་མཁན་རྣམས་ཀྱིས་གསལ་བར་སྨྲས།
ཁྱོད་ཀྱིས་སྲས་ནི་ཐུབ་པ་འམ། འཁོར་ལོ་སྒྱུར་བར་ནང་མོ་འགྱུར། 121

དེ་ནས་མི་བདག་རབ་འབྱུང་ལ། མཆོག་ཏུ་འཇིགས་པས་བསམས་ནས་ནི།
གྲོང་ཁྱེར་སྒོ་སྲུང་འགྲོ་བ་དང། འོང་བ་རྣམས་ནི་འགགས་པར་བྱས། 122

བྲེ་བོ་ཟམ་སོགས་སྲུན་ལྷ་རྣམས། དེ་ཡི་སྒོ་རྣམས་དག་ཏུ་བཀོད།
རང་ཉིད་གྲོང་ཁྱེར་དབུས་སུ་ནི། དམག་དང་བློན་པོར་བཅས་ཏེ་གནས། 123

དེ་ནས་ལྷ་མོ་གྲགས་འཛིན་མས། རྒྱལ་པོའི་བུ་ལས་མངལ་ཐོབ་པ།
ཟླ་བ་རབ་ཏུ་ཉེ་བ་ཡིས། སྟོན་ཀའི་མཁའ་བཞིན་རབ་ཏུ་མཛེས། 124

དེ་ནས་གྲོང་ཁྱེར་སྒོ་སྲུང་བ། ཞག་ཅིག་ལྷག་མར་གྱུར་པའི་ཚེ།
ཉི་མ་ཞི་བར་རབ་ཞུགས་ཤིང་། ཉིན་པར་རབ་འབྱུང་མངོན་ཕྱོགས་གྱུར། 125

ཉི་མ་ཞི་བར་སོང་བའི་ཚེ། ཐུན་མཚམས་ཀུང་ནི་འཁོར་བ་ལས།
ཡུན་རིང་སྤྱད་ནས་དུར་སྨྲིག་གིས། གོས་ལ་བརྟེན་དེ་མི་སྣང་གྱུར། 126

མ་ལུས་ཕྱོགས་ཀྱི་མུན་པ་ཡི། ཚོགས་པ་འཇོམས་བསྟན་ཟླ་བ་ནི།
དཔལ་བུས་ཤར་བ་ནས་མཁའ་དག། སྣང་བས་ཁྱེངས་ཤིང་གཟིགས་པར་བྱས། 127

ཆགས་དང་གདུང་བ་ལྡན་པའི་སེམས། ཉི་མ་སོང་ཚེ་ནམ་མཁའ་ན།
ཟླ་བ་དག་པའི་སྙིང་ལྡན་པས། ཅི་ཡང་མ་བསྐྱད་རབ་དང་གྱུར། 128

अत्रान्तरे नरपतिं प्राहुर्नैमित्तिकाः स्फुटम् ।
मुनिर्वा चक्रवर्त्ती वा प्रातस्ते भविता सुतः ॥ १२१ ॥

ततः सञ्चिन्त्य नृपतिः प्रव्रज्याचकितः परम् ।
अकारयत् पुरद्वारगुप्तिं रुद्धगमागमाम् ॥ १२२ ॥

द्रोणोदनमुखान् भ्रातॄन् द्वारेषु विनिवेश्य सः ।
नगरस्य स्वयं मध्ये तथा सामात्यसैनिकः ॥ १२३ ॥

राजपुत्रादथ प्राप्तगर्भा देवी यशोधरा ।
बभाषे शारदीव द्यौः प्रत्यासन्नेन्दुपाण्डुरा ॥ १२४ ॥

एकरात्रावशेषेऽथ नगरद्वाररक्षणे ।
शमप्रवृत्तार्कमभूत् प्रव्रज्याभिमुखं दिनम् ॥ १२५ ॥

चिरं विचर्य्य संसारं शान्तिं याते दिवस्पतौ ।
काषायाम्बरमालम्ब्य ययौ सन्ध्यावदृश्यताम् ॥ १२६ ॥

अशेषाशातमोमोहविरामविमलां शनैः ।
इन्दुर्गामुदितश्चक्रे पूर्णालोकविलोकिनीम् ॥ १२७ ॥

सरागतापे नभसश्चेतसीव गते रवौ ।
शुद्धेन्दुहृदयस्याभूत् प्रसादः कोऽप्यविप्लवः ॥ १२८ ॥

དེ་ནས་སྐབས་དེར་བཙུན་མོ་འི་ཚོགས། གནས་པའི་ཕོ་བྲང་འཁོར་གྱི་ཁྱིམས།
རིན་ཅན་ཁང་བར་ཟླ་བའི་འོད། རབ་ཞུགས་ཐེ་ཚོམ་དགོད་བྱེད་པར།། 129

རོ་བྲལ་སྙིང་པོ་མེད་གྱུར་པ། ཀུན་ལ་གཟིགས་ཤིང་རྒྱལ་པོ་འི་བུ།
མཁའ་ལྟར་དྲི་མེད་རང་དབང་དུ། སྙན་པ་རབ་ཏུ་གྲགས་པས་སྨྲས།། 130

བུད་མེད་རྣམས་ཀྱི་ཚོགས་པ་འདི་ནི་འདོད་པའི་མེ་ཡི་སྐར་མདའི་
གཡོག་འཁོར་དང།

དྲག་པོ་འི་སྡུག་བསྔལ་བརྒྱ་ཕྲག་དག་གིས་གདུང་བའི་གྲོགས་ཡིན་
ཡོངས་སུ་གཏང་བར་འོས།།

ད་ནི་ཁྱིམ་དག་ཡོངས་སུ་བཏང་ནས་ལྡོན་པའི་འོག་གི་འཁྲི་ཤིང་གསིལ་བ་ཡི།
གཞི་ལ་རབ་ཏུ་ཞི་བ་བདེ་བའི་སྙིང་པོར་བདག་ནི་ཡོངས་སུ་འགྱུར་བར་འོས།། 131

ཟླ་བའི་འོད་ཀྱི་རྒྱགས་པའི་རང་བཞིན་མཚན་མོ་ལང་ཚོ་རྒྱས་པ་འདི་ལ་ནི།
འདི་དག་མིག་རྣམས་གཉིད་ཀྱི་རྒྱ་ཡིས་ངེས་བྲུས་གོས་རྣམས་
མལ་སྟན་དག་ལ་ལྷུང།

རྨི་ལམ་གྱིས་བསྐྱེད་རིགས་པ་མིན་པའི་ཚིག་སྨྲས་པ་ཡིས་
ཕྲག་པ་ཀུན་ཏུ་གཡོགས།

སྨྱོས་པའི་དབུགས་ཀྱི་རླུང་གིས་བསྐྱོད་པའི་མར་མེ་དག་ནི་ངོ་མཚར་
གྱུར་པ་བཞིན།། 132

ལུས་ནི་བསྐྱུངས་ཤིང་རང་དབང་མེད། ངོ་ཚ་མེད་ཅིང་གོས་དང་བྲལ།
ལུས་ཅན་གཅིག་ཀྱིས་ལོག་པ་དང་། ཤི་ལ་ངེས་པར་བྱེ་བྲག་ཅི།། 133

अथास्मिन्नन्तरे कान्तासन्ततान्तःपुरोदरे ।
रत्नहर्म्म्यप्रविष्टेन्दुद्युतिसन्दोहहासिनि ॥ १२९ ॥

निःसारविरसं सर्व्वं राजसूनुर्विलोकयन् ।
जगाद गगनस्वच्छस्वच्छन्दोच्छलितस्मृतिः ॥ १३० ॥

गणोऽयं नारीणां मदनदहनोल्कापरिकरः
परित्यज्य स्तीव्रव्यसनशतसन्तापसचिवः ।
इदानीं युक्ता मे तरुतललताशीतलतरे
परित्यक्तागारप्रशमसुखसारे परिणतिः ॥ १३१ ॥

एताश्चन्द्रद्युतिमदमया यामिनार्य्यो वनेऽस्मिन्
निद्रामुद्रानियमितदृशः संस्तरस्रस्तवस्त्राः ।
स्वप्नोत्पन्नानुचितवचनाः केशसंच्छादितांशाः
क्षिप्रं मन्दानिलविचलितान् लज्जयन्तीव दीपान् ॥ १३२ ॥

सरलस्रस्तगात्राणां निर्लज्जानां विवाससाम् ।
सुप्तानाञ्च मृतानाञ्च भेदः को नाम देहिनाम् ॥ १३३ ॥

ཞེས་པ་བརྗོད་ཅིང་ག་ཞིགས་པ་ལ། དེ་ནི་བརྩོན་པར་གྱུར་པའི་ཚེ།
གྲོང་ཁྱེར་སྒོ་ནི་སྤྱང་བ་རྣམས། ཕན་ཚུན་གདམ་དག་བྱུང་གྱུར་པ།། 134

ཀྱེ་ཀྱེ་སྨྲ་སྨྲ་འདིར་མེལ་ཚེ། མེལ་ཚེ་ལྷན་པ་ཉེས་པ་མེད།
ཛེ་ཡི་ཕྲུགས་ངོར་འཁྲུགས་པ་ཡིས། མཐའ་དག་ཉིད་ནི་མེལ་ཚེ་བྱེད།། 135

འཁོར་བའི་ཁང་པར་མཁས་པ་མེལ་ཚེ་བྱེད། སྨོངས་པའི་མུན་པར་བག་མེད་
གཉིད་པར་བྱེད།
མེལ་ཚེ་རབ་ལྡན་འཇིག་རྟེན་དག་ན་འཚོ། ཤི་དང་གཉིད་ཀྱི་ལོག་ལ་བྱེ་བྲག་ཅི།།
136

མཚན་མོ་རྒྱལ་སྲས་ཁང་བཟང་ན། གནས་པས་གདམ་དེ་ཐོས་གྱུར་ནས།
རང་གི་འདོད་པ་ལེགས་པ་ཡིས། ལམ་ནས་སོང་བ་བཞིན་དུ་སེམས།། 137

དེ་ཡི་མྱུང་འདས་མཚན་ཉིད་ཀྱིས། རྨི་ལམ་སྐད་ཅིག་གཉིད་ཀྱིས་མཐོང་།
བླ་ན་མེད་པའི་ཡེ་ཤེས་ཀྱིས། གཏེར་ལ་རབ་དུ་ཉེ་བར་བསམ།། 138

དེ་ནས་ལྷ་མོ་གྲགས་འཛིན་མ། འཕྲུལ་ལ་རབ་སད་སྐྲག་པ་ཡིས།
དེ་དུས་མཐོང་བའི་རྨི་ལམ་ནི། བདག་པོ་ཉིད་ལ་རབ་དུ་བཤད།། 139

ཛོ་བོ་བདག་གི་ཁྲི་རྒྱན་ལུས། ཆག་དང་དཔལ་ནི་འགྲོ་བ་དང་།
ཉི་ཟླ་དག་ཀྱང་བསྒྲིབས་གྱུར་པ། རྨི་ལམ་དུ་ནི་བདག་གིས་མཐོང་།། 140

དེ་ཐོས་དེ་ཡིས་དེར་སྨྲས་པ། མཛེས་མ་བདེན་སྤྱངས་འཁོར་བ་འདི།
རྨི་ལམ་ཉིད་ནི་རྨི་ལམ་གྱི་འདང་། རྨི་ལམ་དེ་ནི་ཅི་ཞིག་འདྲ།། 141

इति तस्य ब्रुवाणस्य सञ्जाते गमनोद्यमे ।
मिथः कथा समभवन्नगरद्वाररक्षिणाम् ॥ १३४ ॥

भो भोः कः कोऽत्र जागर्त्ति जाग्रतो नास्ति विप्लवः
प्रभुचित्तग्रहव्यग्राः समग्रा एव जाग्रति ॥ १३५ ॥

जागर्त्ति संसारगृहे मनीषी मोहान्धकारे स्वपिति प्रमत्तः ।
प्रजागरो जीवित मेव लोके मृतस्य सुप्तस्य च को विशेषः ॥ १३६ ॥

इति हर्म्यस्थितः श्रुत्वा रात्रौ राजसुतः कथाः ।
प्रस्थितं सत्पथेनेव निजं मेने मनोरथम् ॥ १३७ ॥

निवृत्तेर्लक्षणं दृष्ट्वा स स्वप्नं क्षणनिद्रया ।
अनुत्तरज्ञाननिधिं प्रत्यासन्नममन्यत ॥ १३८ ॥

ततः प्रबुद्धा सहसा त्रस्ता देवी यशोधरा ।
तत्कालोपनतं स्वप्नं दयिताय न्यवेदयत् ॥ १३९ ॥

पर्य्यङ्काभरणाङ्गानि स्वप्ने भग्नानि मे विभो ।
श्रीर्व्रजन्ती मया दृष्टा चन्द्रार्कौ च तिरोहितौ ॥ १४० ॥

इत्याकर्ण्य स तामूचे मुग्धे सत्यविवर्ज्जितः ।
संसार एव स्वप्नोऽयं स्वप्ने स्वप्नोऽपि कीदृशः ॥ १४१ ॥

དེ་རིང་རྨི་ལམ་ལྟེ་བ་ནས། འཁྲི་ཤིང་སྐྱེས་པས་ནམ་མཁའ་ཁྱབ།
ཀླུར་པོ་མགོ་ཡི་ཕྱོས་སུ་བྱས། ཤར་དང་ནུབ་ཀྱི་རྒྱ་གཏེར་གཉིས།། 142

ལག་པ་གཉིས་དང་རྐང་པས་ཀྱང་། ལྷོ་ཡི་རྒྱ་མཚོ་ང་ཡིས་བཟུང་།
བཟང་མོ་བདག་རྨིས་འདི་ནི་དགེ། བུད་མེད་བདག་པོ་དགེ་བས་དགེ།། 143

བྱང་ཆུབ་སེམས་དཔས་དེ་བརྗོད་ཚེ། ཅི་ཡང་མི་སྨྲ་གྲགས་འཛིན་མ།
སླར་ཡང་གཉིད་ལ་མངོན་ཕྱོགས་ཏེ། མིག་ནི་ཟུམ་པ་ཉིད་དུ་གྱུར།། 144

དེ་ནས་བརྒྱ་བྱིན་ཚངས་ལ་སོགས། བདུད་རྩི་སྤྱོད་རྣམས་ཡང་དག་འོངས།
བྱང་ཆུབ་སེམས་དཔའི་སྤྲོ་བ་ནི། ཤིན་ཏུ་ཆུང་བ་རབ་རྟོགས་ནས།། 145

དེ་དག་རྣམས་ཀྱི་ལྷ་ཡི་བུ། ས་རི་རྒྱ་གཏེར་འཛིན་བཟོད་པ།
ཤིན་ཏུ་མགྱོགས་པར་གྱུར་པ་བཞི། དེ་ཡི་འགྲོ་བའི་གྲོགས་ལ་བསྐོས།། 146

བརྒྱ་བྱིན་གྱིས་བསྐོས་གནོད་སྦྱིན་ནི། ལུས་ཅན་ཞེས་པས་རྣམ་སྤྲུལ་བ།
ཁང་བཟང་ལ་རེག་ཐེམ་སྐས་ལ། བབས་ནས་དེ་ནི་ཕྱི་རོལ་བྱུང་།། 147

བདུན་པ་ཞེས་པའི་ཁ་ལོ་པ། གཉིད་ནི་སད་པར་བྱས་དེ་བོས།
ཤུགས་ལྡན་ཞེས་པ་རྟ་ཡི་མཆོག། དེ་ཡིས་སྦྲོ་བ་བཞིན་དུ་བཟུང་།། 148

དཔལ་མོ་འི་ཟུར་མིག་ལྟར་གཡོ་བའི། རྟ་མཛེས་འཕྲོག་བྱེད་དེ་ལ་ནི།
དེ་ཡི་ཕྱག་གིས་སྒྲ་ར་སྐྱོགས་ནས། བཟུང་ཞིང་སྤྱི་བོར་རེག་པར་བྱས།། 149

स्वप्नेऽद्य नाभिसञ्जाता लता व्याप्ता विहायसा ।
मेरूपधानशिरसा पूर्व्वपश्चिमवारिधी ॥ १४२ ॥

भुजाभ्यां चरणाभ्याञ्च दक्षिणाब्धिर्मया धृतः ।
भद्रे स्वप्नः शुभोऽयं ते स्त्रीणां भर्त्तृशुभं शुभम् ॥ १४३ ॥

इत्युक्ते बोधिसत्त्वेन नोचे किञ्चिद् यशोधरा ।
पुनश्च निद्राभिमुखी बभूव मीलितेक्षणा ॥ १४४ ॥

शक्रब्रह्ममुखाः सर्व्वे समेत्याथ सुधाभुजः ॥
चक्रिरे बोधिसत्त्वस्य सत्त्वोत्साहप्रपूरणम् ॥ १४५ ॥

तैर्देवपुत्राश्चत्वारः समादिष्टा महाजवाः ।
सहाया गमने तस्य भूशैलाब्धिधृतिक्षमाः ॥ १४६ ॥

शक्रादिष्टेन यक्षेण पाञ्चिकाख्येन निर्म्मितैः ।
स हर्म्म्यासक्तसोपानैरवतीर्य्य विनिर्ययौ ॥ १४७ ॥

सुप्तं सारथिमादाय छन्दकाख्यं प्रबोध्य सः ।
उत्साहमिव जग्राह कण्ठकाख्यं तुरङ्गमम् ॥ १४८ ॥

तं तीक्ष्णरुचिरं लक्ष्मीकटाक्षतरलं हरिम् ।
स चक्रे संयमालीनं मूर्ध्नि संस्पृश्य पाणिना ॥ १४९ ॥

གང་གི་མཐུ་ཡི་ཕྱུགས་རྣམས་ཀྱང་། གསོ་བ་དག་ནི་རྣམ་པར་གཏོང་།
ཞི་བརྩོན་ལེགས་པའི་ཡིད་ཀྱིས་དེས། ནང་དང་ཕྱི་རོལ་གང་དུའང་མཉམ།། 150

དེ་ནས་སྤོབས་ནི་ཤེས་འདོད་ནས། དེ་ཡིས་ཞབས་ནི་ས་ལ་བཀོད།
ཡ་མཚན་ལྡན་པའི་ལྷ་ཡི་བུ། དེ་དག་རྣམས་ཀྱིས་གསོལ་མ་ཐུས།། 151

འདྲོག་པ་མེད་པའི་རྟ་ལ་དེ། འདུན་པ་དང་ནི་ལྡན་ཅིག་ཞོན།
རང་གི་བསམ་པ་བཞིན་དུ་ནི། དྲི་མེད་ཆེ་བའི་མཁའ་ལ་བཤེགས།། 152

དཔལ་ཀྱི་རྒྱ་ངན་ཤུགས་རིང་བཞིན། གསོ་བའི་རླུང་ནི་རབ་ལངས་པ།
གཙུག་ཏོར་ཐོད་ཀྱི་ཡལ་འདབ་ནི། གཡོ་ཞིང་བསྐྱུར་ཞིང་རབ་དུ་གཤེགས།།
153

དེ་རྒྱན་རིན་ཅན་འོད་ཟེར་གྱི། རི་མོས་ནམ་མཁའ་རྣམ་པར་བཀྲ།
སྐྱུད་པ་པ་ཏའི་འཕྲེང་བ་ཡིས། རྣམ་བཀྲ་རྣམ་སྤྲུར་བྲངས་པ་བཞིན།། 154

བསྟར་འོས་ཡོ་བྲང་འཁོར་ཀྱི་ལྷ། འདྲེན་བྱེད་གཡོ་བའི་ཛུ་དྲ་ལ།
མཆི་མའི་ཐིགས་ཟློགས་གང་གྱུར་བ། རབ་དུ་གཤེགས་པ་དེ་མཐོང་གྱུར།། 155

འཁོར་པ་བཞིན་དུ་རྣམ་རྒྱས་པའི། མི་བདག་གཉེན་བཅས་གྲོང་ཁྱེར་ལ།
རིང་ནས་གཡས་བསྐོར་མཛད་ནས་ནི། བཟོད་པར་མཛོད་ཅེས་དེ་ཡིས་སྨྲས།།
156

མཚན་མོ་སྐད་ཅིག་ལྷག་མ་ལ། སྐྱེ་བོ་གཉིད་ཀྱིས་རྒྱས་བདབ་ཚེ།
མིང་ཆེན་ཞིར་པ་རྒྱལ་པོའི་གཉེན། རབ་དུ་སད་པས་དེ་མཐོང་གྱུར།། 157

शमोद्यमे सुमनसा स कोऽप्यन्तर्व्वहिः समः।
शिशवोऽपि विमुञ्चन्ति यत्प्रभावेन चापलम् ॥ १५० ॥

बलजिज्ञासया न्यस्तं तेनाथ चरणं क्षितौ।
न ते कम्पयितुं शेकुर्देवपुत्राः सविस्मयाः ॥ १५१ ॥

छन्दकेन सहारुह्य निस्तरङ्गं तुरङ्गमम्।
स जगाहे महद्व्योम विमलं स्वमिवाशयम् ॥ १५२ ॥

प्रययौ तरलावर्त्त-नर्त्तितोष्णीषपल्लवः।
संसर्पिपवनोल्लासैः शोकोच्छास इव श्रियः ॥ १५३ ॥

तस्याभरणरत्नांशुलेखाभिः शबलं नभः।
जग्राह स्वचपचालीविचित्रमिव चीवरम् ॥ १५४ ॥

कीर्णाश्रुबिन्दुकलिता विलोलनयनोत्पलाः।
व्रजन्तं ददृशुर्दृश्यास्तमन्तःपुरदेवताः ॥ १५५ ॥

संसारमिव विस्तीर्णं पुरं सन्त्यक्तबान्धवम्।
दूरात् प्रदक्षिणीकृत्य क्षम्यतामित्यभाषत ॥ १५६ ॥

क्षपायां क्षणशेषायां जने निद्राभिमुद्रिते।
तं ददर्श महानाम प्रबुद्धो राजबान्धवः ॥ १५७ ॥

མཁའ་ལ་འགྲོ་བ་དེ་མཐོང་སྟེ། རི་བོང་ཅན་དུ་དོགས་པས་ཕྲོགས།
ཡུན་རིང་དཔྱད་ནས་མིག་དག་ནི། མཆི་མ་ཀྱུས་པས་སྐད་ཅེར་སླུས།། 158

གཞོན་ནུ་མཛེས་པའི་རྣམ་པ་ཅན། བནྡྷུ་ཛཱི་བ་ལྟ་བུ་ཁྱོད།
རིགས་པ་བྱེད་པའི་ཆགས་བྲལ་ཉིད། ངོ་མཚར་འདི་ནི་རིགས་མ་ཡིན།། 159

རིགས་མཆོག་ཁྱད་པར་དོན་གཉེར་བ། རི་བ་ཁྱོད་ལ་གཏད་བའི་ཡབ།
ཟེ་བ་ཀུན་སྐྱོང་ཁྱོད་ཀྱིས་ནི། ཅི་སླད་རི་ཐག་ཆད་པར་བྱེད།། 160

ཅེས་པ་ཤཱཀྱ་ཆེན་པོ་འི་ཚིག། མི་བདག་སྲས་ཀྱིས་ཐོས་གྱུར་ནས།
དེས་སྨྲས་གཉེན་དང་མཛའ་བ་ཡི། འབྲེལ་བ་འཆིང་བའི་ལྷུགས་ཀྱི་སྒྲོག།། 161

ལོག་པའི་ཁྲིམས་ཀྱི་བདེ་བ་ལ། དགའ་བའི་ལུས་འདི་འཛིག་པར་འགྱུར།
ཡུལ་གྱི་དུག་གིས་གཟིར་རྣམས་ལ། ནགས་ནི་བདུད་རྩིའི་ཁང་པ་ཡིན།། 162

ཡུལ་གྱི་ཚོགས་ཀྱི་འཁོར་བ་འདི་ན་བག་མེད་རབ་ཏུ་དགའ་ལྡན་ཞིང་།
གདེངས་ཅན་གདེངས་ཀ་གསུམ་པ་ལག་པས་དྲངས་ནས་མགོ་ལ་འཆི་བ་བཀོད།
དྲག་པོ་འི་དུག་གི་འཁྲི་ཤིང་ཡལ་འདབ་གཡོ་བའི་འཕྲེང་བས་མགྲིན་པ་
བལྡམས།
སོལ་བ་འབར་བའི་ཚོགས་ཀྱིས་གང་བའི་ངན་འགྲོ་འི་ལམ་དུ་འཇུག་པར་བྱེད།།
163

མཁའ་ལ་གཤེགས་ཤིང་འདི་སྨྲས་ནས། སྐད་ཅིག་གིས་ནི་གྲོང་ཁྱེར་བརྒལ།
ཁྲི་རོལ་ས་གཞིར་མཆོན་གཤེགས་ཏེ། དེ་ནི་མགྱོགས་པའི་རྟ་ལ་ཞོན།། 164

दिवि दृष्ट्वा व्रजन्तं तं शशाङ्कशङ्कया हृतः ।
ऊचे चिरं विचार्य्योच्चैर्वाष्पाम्बितविलोचनः ॥ १५८ ॥

चित्रमेतद् विरक्तत्वं बन्धुजीवोपमस्य ते ।
कुमार रुचिराकार न युक्तं युक्तकारणम् ॥ १५९ ॥

वंशोत्कर्षविशेषार्थी निबद्धाशः पिता त्वयि ।
कस्मान्निराशः क्रियते सर्व्वाशाभरण त्वया ॥ १६० ॥

इति शाक्यस्य महतः श्रुत्वा वाक्यं नृपात्मजः ।
तमूचे बान्धवप्रीतिर्बन्धो बन्धनशृङ्खला ॥ १६१ ॥

अयं कायः क्षयं याति मिथ्यागृहसुखप्रियः ।
विषयोग्रविषार्त्तानाममृतायतनं वनम् ॥ १६२ ॥

हस्ताकृष्टस्त्रिफणिफणभृन्मस्तकन्यस्तमृत्युः
कण्ठाबद्धोत्कटविषलतापल्लवालोलमालः ।
दीप्ताङ्गारप्रकरगहनं गाहते दुर्ग्गमार्ग्गम्
संसारेऽस्मिन्विषयनिचये सप्रमोदः प्रमादी ॥ १६३ ॥

इत्युदीर्य्य व्रजन् व्योम्ना विलङ्घ्य नगरं क्षणात् ।
वहिर्भूतलमभ्येत्य स ययौ वाजिना जवात् ॥ १६४ ॥

དེ་ནས་ཤཱ་ཀྱའི་གཙོ་ཆེན་གྱིས། ས་ཡི་བདག་པོ་དེ་ལ་སྨྲས།
སོ་བྲང་འཁོར་དུ་བཙུན་མོ་རྣམས། སྙིང་རྗེའི་ཚོ་ངེ་བྱུང་བར་གྱུར།། 165

དེ་ནས་ཚངས་དབང་ནོར་སྦྱིན་ལ། སོགས་པའི་ལྷ་རྣམས་དག་གིས་བསྐོར།
དཔག་ཚད་བཅུ་གཉིས་ཕྱིན་ནས་ནི། རྒྱལ་པོ་འི་བུ་ཡིས་ནགས་ཚལ་སླེབ།། 166

དེ་ནས་རྟ་ལས་བབས་ནས་དེས། རྒྱན་རྣམས་དག་ནི་རྣམ་པར་བཀྲོལ།
བཞིན་གྱི་འོད་ཀྱིས་ཀུན་དགའ་ནི། གསལ་བས་འདུན་པ་ལ་སྨྲས་པ།། 167

ཁྱོད་ནི་རྟ་དང་རྒྱན་རྣམས་དག། བཟུང་ལ་ཁང་པ་དག་ཏུ་སོང་།
སྒྱུ་མའི་འཆིང་བ་འདི་དག་གིས། ད་ནི་བདག་ལ་དགོས་པ་མེད།། 168

ནགས་འདིར་བདག་རང་གཅིག་པ་འདི། ཞི་བ་མཆོག་ཤེས་གཉེན་དང་ལྡན།
སྐྱེ་བོ་གཅིག་ཕྱུར་ཡང་དག་སྐྱེ། གཅིག་བུ་ཉིད་དུ་རྣམ་པར་ལྡུང་།། 169

མི་བཟང་ཡུལ་དང་སྦྱོར་བའི་ལོངས་སྤྱོད་དག་གནད་བདང་ཞིང་།
རོ་ལྡན་དཀར་བའི་ཁྱད་པར་ཉོན་མོངས་སྐྱིམས་པར་རབ་ཞུགས་པ།
ཡོངས་སུ་ཟིལ་གནོན་སྲིད་པ་འདི་ནི་འདི་ཉིད་བདག་གི་གནས།
འདོད་པའི་མཛེས་པ་ཞི་བ་དག་ནི་ཞི་བ་ཁོ་ན་བསྟེན།། 170

ཞེས་སྨྲས་དེ་ཡིས་འབར་བ་ཡིས། རྒྱན་རྣམས་དེ་ཡི་ལག་ཏུ་གཏད།
ཉུ་རིག་མཆི་མའི་ཐིགས་ཚོགས་ཀྱི། དེ་དག་ཉུ་ངན་གདོང་བ་བཞིན།། 171

महता शाक्यमुख्येन बोधितस्याथ भूपतेः ।
अन्तःपुरे च कान्तानामुद्भूतः करुणः स्वरः ॥ १६५ ॥

अथ ब्रह्मेन्द्रधनदप्रमुखैस्त्रिदशैर्वृतः ।
राजसूनुर्वनं प्राप गत्वा द्वादशयोजनम् ॥ १६६ ॥

अवरुह्याथ तुरगात् विमुच्याभरणानि सः ।
उवाच सूचितानन्दच्छन्दकं वदनत्विषा ॥ १६७ ॥

गृहीत्वाभरणानि त्वं हयञ्च व्रज मन्दिरम् ।
नेदानीमस्ति मे कृत्यमेतैर्मायानिबन्धनैः ॥ १६८ ॥

वनेऽस्मिन्नहमेकाकी शमसन्तोषबान्धवः ।
एकः संजायते जन्तुरेक एव विपद्यते ॥ १६९ ॥

विषमविषययोगं भोगमुत्सृज्य रे कः
सरसरतिविशेषक्लेशशोषप्रवृत्तः ।
परिभवभुवनेऽस्मिन्नेष नः सन्निवेशः
शमितमदनकान्तिः शान्तिमेव श्रयामि ॥ १७० ॥

इत्युक्त्वाभरणान्यस्य दीप्तान्यङ्के मुमोच सः ।
त्यक्तशोकान्वितानीव मुक्तापक्ष्मसञ्चये ॥ १७१ ॥

48

རལ་གྲིས་གཙུག་ཕུད་བཅད་ནས་ནི། ནམ་མཁའི་གཞི་ལ་དེ་ཡིས་འཕངས།
བརྒྱ་བྱིན་གྱིས་ཀྱང་དེ་བླངས་ནས། གུས་པས་ལྷ་ཡི་གནས་སུ་ཁྱེར།། 172

གང་དུ་བདག་ཉིད་ཆེན་པོ་དེས། ཉོན་མོངས་བཞིན་དུ་སྐྲ་བཅད་པ།
དེར་ནི་དམ་པ་རྣམས་དག་གིས། དབུ་སྐྲ་བླངས་པའི་མཆོད་རྟེན་བརྩིགས།། 173

འདུན་པ་ཡིས་ཀྱང་རྟ་བླངས་ནས། རབ་དུ་སོང་སྟེ་ཉིན་བ་དུན་གྱིས།
གྲོང་ཁྱེར་ཉེ་བ་དལ་བུས་ཕྱིན། མྱ་ངན་དག་གིས་གཟིར་བས་བསམས།། 174

མི་བདག་སྲས་ནི་ཡོངས་སུ་དོར། རྟ་ནི་སྟོང་པ་ཉིད་དུ་ཁྲིད།
སྲས་ཀྱི་ཆོ་ངེ་ལྡན་པ་ཡིས། མི་བདག་བལྟ་བར་ཇི་ལྟར་ནུས།། 175

དེ་ལྟར་བསམས་ནས་རྟ་བདང་སྟེ། དེ་ཡི་གནས་དེ་ཉིད་བསྐུགས་པ།
སྟོན་སྟོང་རྟ་ནི་གྲོང་ཁྱེར་དུ། མྱ་ངན་གཟུགས་ཅན་བཞིན་དུ་ཞུགས།། 176

དེ་མཐོང་ཕོ་བྲང་སྐྱེ་བོ་ནི། ས་བདག་བློན་པོར་བཅས་པ་དང་།
མ་ལུས་ཕྱོགས་ཀྱི་སོ་སོར་ན། ཆོ་ངེའི་ཀུ་ཅོར་མ་ཅོར་བྱས།། 177

མགྲིན་པ་གདུང་བའི་སྐྲ་རབ་བསྐྱེད། མྱ་ངན་ལྡན་པ་ཀུན་གྱིས་འཛུམས།
ཆགས་བྲལ་ལྡན་པའི་རྟ་དེ་ནི། མཆི་མ་ཉིལ་ཞིང་སྨྲོག་བདང་གྱུར།། 178

བྱང་ཆུབ་སེམས་དཔའི་རིག་པ་ཡིས། བསོད་ནམས་ཐོབ་ཅིང་གཙང་པ་དེས།
འཁོར་བ་ལས་ནི་གྲོལ་བའི་སྐད། བྲམ་ཟེའི་རིགས་སུ་སྐྱེ་བ་བླངས།། 179

चूड़ां निष्कृष्य खड्गेन स चिक्षेप नभःस्थले ।
शक्रश्च तं समादाय निनाय दिवमादरात् ॥ १७२ ॥

केशः क्लेश इवोत्कृत्तो यत्र तेन महात्मना ।
केशप्रतिग्रहं चैत्यं सद्भिस्तत्र निवेशितम् ॥ १७३ ॥

छन्दकोऽप्यश्वमादाय प्रयातः सप्तभिर्दिनैः ।
शनैः प्राप पुरोपान्तं शोकार्त्तः समचिन्तयत् ॥ १७४ ॥

शून्यं तुरगमादाय परित्यज्य नृपात्मजम् ।
द्रष्टुं शक्नोमि नृपतिं कथं पुत्रप्रलापिनम् ॥ १७५ ॥

विचिन्त्येति हयं त्यक्त्वा स तत्रैव व्यलम्बत ।
शून्यासनः पुरं वाजी मूर्त्तः शोक इवाविशत् ॥ १७६ ॥

तं दृष्ट्वान्तःपुरजनः सामात्यश्च महीपतिः ।
प्रतिप्रलापमुखरा श्चक्रिरे निखिला दिशः ॥ १७७ ॥

उद्भूतार्त्तस्वरैः कण्ठैः सोत्कण्ठैः स विषादवान् ।
सर्व्वैं र्गृहीतकौर्म्याश्रु र्वाजी जीवित मत्यजत् ॥ १७८ ॥

स बोधिसत्त्वसंस्पर्शपुण्यप्राप्तिपवित्रितः ।
जग्राह ब्राह्मणकुले जन्म संसारमुक्तये ॥ १७९ ॥

གང་དུ་གཞོན་ནུ་ཅུར་སྨྲིག་ནི། བརྒྱ་བྱིན་དག་གིས་བྱིན་པ་བླངས།
དེར་ནི་ཅུར་སྨྲིག་བླངས་པ་ཡི། མཆོད་རྟེན་སྐྱེ་བོ་ཆེན་པོས་བྱས།། 180

དེ་ལྟར་འབྱོར་བ་སྲིད་མེད་འཇིག་སྐད་སྐྱེ་བ་རབ་གྲོལ་སྐད།
སྐྱེ་བོས་དབེན་པའང་སྐྱེ་བོ་རྣམས་ཀྱི་རྨོངས་པའི་འཁོར་ལོ་ཟློག་པའི་སྐད།
ཡོན་དན་གྱིས་ནི་སྐྱེ་བོ་ཆགས་མཛད་ཆགས་པ་དག་དང་བྲལ་གྱུར་བ།
དགེ་བ་འདོད་ཅིང་འདོད་པ་བདང་ནས་བསྔགས་པར་འོས་པ་ཉིད་བསྟན་དོ།། 181

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མངོན་པར་འབྱུང་བའི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་བཞི་པའོ།

शक्रदत्तं कुमारस्तु यत्र काषाय मग्रहीत् ।
काषायग्रहणं तत्र चैत्यं चक्रे महाजनः ॥ १८० ॥

विभवमभववृत्त्यै जन्म जन्मप्रमुक्त्यै
विजनमपि जनानां मोहगर्त्तान्निवृत्त्यै ।
इति स कुशलकामः काममुत्सृज्य भेजे
गुणकृतजनरागः श्लाघ्यतां त्यक्तरागः ॥ १८१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलताया-
मभिनिष्क्रमणावदानं चतुर्विंशः पल्लवः ।

ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་ལྔ་པའོ།

མཛེས་པའི་མིག་གི་འཁོར་ལོ་སྐྱུར་བའི་བདུད།
གང་གིས་བཀའ་ཡི་ཡུལ་དུ་བསྒྱུར་བྱས་པ།
སྲིད་པའི་མཐུ་ཡིས་ཟིལ་མནན་མངོན་པར་གྲོལ།
སྐྱེ་བའི་འཛིགས་ལས་རབ་གྲོལ་དེ་དག་རྒྱལ། ། 1

དེ་ནས་དཀའ་ཐུབ་ནགས་ཚལ་དེར། བྱང་ཆུབ་སེམས་དཔའ་དཀའ་ཐུབ་བསྟེན།
དེ་ཚེ་དེ་ཡི་ཉེ་གནས་ལྔ། པ་ར་ཀྲྀ་སིར་རབ་ཏུ་སོང་། ། 2

དེ་ནས་ཐུབ་དབང་འདོད་འོས་པའི། ཤཱ་ཀྱ་ཐུབ་པ་དཔལ་སྦུ་ཡིས།
སྨེ་གདོང་དག་གི་གྲོང་དུ་ནི། རང་ཉིད་ལྷོངས་ནི་རྒྱུ་ཞིང་གཤེགས། ། 3

དེར་ནི་ཁྲིམ་བདག་སྨེ་ཞེས་པའི། མངོན་པར་བརྗོད་པའི་བུ་མོར་ནི།
གཞོན་ནུ་མ་དག་དགའ་མ་དང་། དགའ་སྟོབས་ཞེས་པ་བྱུང་བར་གྱུར། ། 4

དེ་ཡིས་ས་བདག་ཟས་གཙང་གི། སྲས་ཀྱི་གྲགས་པ་ཐོས་གྱུར་ནས།
ཁྲིམ་བདག་དག་ཏུ་དེ་སྒྲུབ་སླད། བརྟུལ་ཞུགས་ལོ་ནི་བཅུ་གཉིས་བྱས། ། 5

འཕྲེང་བ་ལྷ་བུའི་གཞོན་ནུ་མ། དྲི་བཟང་དགའ་ལྡན་སྙིང་ལ་ནི།
མངོན་པར་འདོད་པ་རང་བཞིན་སྐྱེས། སྐྱུད་པ་བཞིན་དུ་རྟག་ཏུ་གནས། ། 6

अथ पञ्चविंशतिः पल्लवः ।

जयन्ति ते जन्मभयप्रमुक्ता
भवप्रभावाभिभवाभियुक्ताः ।
यैः सुन्दरीलोचनचक्रवर्त्ती
मारः कृतः शासनदेशवर्त्ती ॥ १ ॥

ततस्तपोवने चास्मिन् बोधिसत्त्वे तपोजुषि ।
तदुपस्थापकाः पञ्च वाराणस्यां प्रवव्रजुः ॥ २ ॥

स्पृहणीयो मुनीन्द्राणामथ शाक्यमुनिः शनैः ।
स्वयं सेनायनीग्रामं जनचारिकया ययौ ॥ ३ ॥

तत्र सेनाभिधानस्य कन्ये गृहपतेः सुते ।
नन्दा नन्दबलाख्याच चारुवृत्ते बभूवतुः ॥ ४ ॥

शुद्धोदनस्य भूभर्त्तुस्ते श्रुत्वा विश्रुतं सुतम् ।
चक्राते तद्विवाहार्थं व्रतं द्वादशवार्षिकम् ॥ ५ ॥

आमोदिनीनां हृदये सदा सूत्रवदास्थितः ।
मालानामिव बालानामभिलाषः स्वभावजः ॥ ६ ॥

ཡང་ཡང་འོ་མ་འཕྱུངས་པ་ཡིས། བ་རྣམས་འོ་མ་དེ་གཉིས་ཀྱིས།
བླངས་ནས་ཞལ་གྱི་སྣོད་དུ་ནི། དགེ་བའི་འོ་ཐུག་བཙུལ་ཞུགས་མཐར།། 7

འོ་ཐུག་ཆོ་ག་བཞིན་བསྒྲུབ་ཚེ། བྲམ་ཟེའི་གཟུགས་སུ་ལྷ་དབང་དང་།
པདྨའི་སྤྱན་ལྡན་ལྷ་དག་ཀྱང་། ཡུལ་དེར་ཡང་དག་མངོན་པར་འོངས།། 8

མཛེས་མ་དེ་དག་དགའ་བ་ཡིས། མགྲོན་གྱི་ཚོ་ནི་རབ་བླངས་ཚེ།
བརྒྱ་བྱིན་གྱིས་སྨྲས་ཡོན་ཏན་ཀུན། རྒྱལ་པོ་ལ་ནི་ཐོག་མར་ཕུལ། 9

བདག་ལས་རེ་ཞིག་ཚངས་པ་འདི། ལྷག་པས་དང་པོ་ཉིད་དུ་འོས།
ལྷ་ཡི་རྒྱལ་པོས་དེ་བརྗོད་ཚེ། གདོང་བཞི་པ་ཡིས་རབ་སྨྲས་པ།། 10

གཙང་མ་རིས་ཀྱི་ལྷ་དེ་དག། བདག་ལས་ཀྱང་ནི་ལྷག་པ་ཡིན།
ཚངས་པས་དེ་སྐད་སྨྲས་པའི་ཚེ། དེ་དག་ཀྱི་ཀྱང་མཁར་ནས་སྨྲས།། 11

ནི་ར་ཉྫ་ན་ཞེས་པ་ཡི། ཀླུང་དུ་བཞུགས་ཤིང་ཆུར་གནས་པ།
བྱང་ཆུབ་སེམས་དཔའ་དཀའ་ཐུབ་ཀྱིས། རིད་འདི་ཀུན་ལས་ཁྱད་པར་འཕགས།། 12

དེ་དག་ཐོས་ནས་གཞོན་ནུ་མས། བོས་དེ་རིན་ཅན་སྣོད་དུ་ནི།
ཐོག་ནས་བླུགས་དེ་གུས་པ་ཡིས། སྦྲང་རྩིའི་འོ་ཐུག་དེ་ལ་ཕུལ།། 13

བྱང་ཆུབ་སེམས་དཔས་དེ་བླངས་ནས། རིན་ཅན་སྣོད་ནི་དེ་ལ་གཏད།
བྱིན་པ་འདི་ནི་སླར་མི་བླངས། ཞེས་བརྗོད་དེ་དག་གིས་མ་བླངས།། 14

धेनूनां पीतदुग्धानां दुग्धन्ताभ्यां पुनः पुनः ।
गृहीत्वा स्फटिकस्थाल्या व्रतान्ते पायसं शुभम् ॥ ७ ॥

विधिवत् पायसे सिद्धे विप्ररूपः सुरेश्वरः ।
तं समभ्याययौ देशं देवश्च कमलासनः ॥ ८ ॥

हर्षादतिथिभागेऽथ कन्यकाभ्यां समुद्धृते ।
शक्रोऽवदत्सर्व्वगुणोदयायाग्रे प्रदीयताम् ॥ ९ ॥

मत्तोऽयमधिकस्तावद्ब्राह्मणः प्रथमोऽपि च ।
इत्युक्ते सुरराजेन प्रोवाच चतुराननः ॥ १० ॥

मत्तोऽधिको देव आस्ते शुद्धावासनिकायिकः ।
इत्युक्ते ब्रह्मणा तेऽपि जगदुर्गगनस्थिताः ॥ ११ ॥

सर्वप्रतिविशिष्टोऽसौ बोधिसत्त्वस्तपःकृशः ।
नद्यां निराजनाख्यायां विगाह्य सलिले स्थितः ॥ १२ ॥

एतदाकर्ण्य कन्याभ्यामाहूय मणिभाजने ।
अवतीर्य्यार्प्पितं भक्त्या तदस्मै मधुपायसम् ॥ १३ ॥

बोधिसत्त्वस्तदादाय रत्नपात्रीं ददौ तयोः ।
दत्तेयं न पुनर्ग्राह्येत्युक्ता जगृहतु र्न ते ॥ १४ ॥

འོད་ལྡན་དེ་ནི་ཆུ་སྐྱུང་ཀུ། ངེས་འཕངས་སྐྱུ་རྣམས་དག་གིས་ཐོབ།
རྡོ་རྗེ་ཅན་གྱི་དེ་དག་ལས། མཁའ་ལྡིང་གཟུགས་ཀྱིས་བསྐྱོད་ཐོབ་གླངས།། 15

རབ་དང་བྱང་ཆུབ་སེམས་དཔའ་ཡིས། དེ་ནས་མཛེས་མ་ཟུང་ལ་སྨྲས།
སྨྲིན་པའི་སྨོན་ལམ་དག་གིས་ནི། ཁྱེད་གཉིས་ཅི་ཞིག་མངོན་པར་འདོད།། 16

དེ་ལ་དེས་སྨྲས་ཟས་གཙང་སྲས། མཁས་པ་ཀུན་དུ་དགའ་བའི་གཏེར།
གཞོན་ནུ་དོན་ཀུན་གྲུབ་པ་དེ། བདག་ཅག་བདག་པོར་མངོན་པར་འདོད།། 17

དེ་དག་ཚིག་ནི་ཆགས་ལྡན་ཞིང་། འདོད་པའི་ཟ་ཆྲབས་ལྷག་པ་དེས།
དེ་ཡི་ཐུགས་ལ་མ་གོས་དེ། ཆུ་ཡིས་པདྨའི་འདབ་མ་བཞིན།། 18

དེ་ཡིས་སྨྲས་པ་གཞོན་ནུ་དེ། རབ་ཏུ་བྱུང་བ་མ་ཐོས་སམ།
དེ་ལ་བུད་མེད་དཔལ་མོ་བཞིན། མིག་གཡོ་དགའ་བ་མེད་དམ་ཅི།། 19

ཞེས་པ་འདོད་པ་མིན་ཐོས་ནས། ཤུགས་རིང་ཕྱུངས་ཏེ་གཞོན་ནུ་མས།
སྨྲས་པ་སྨྲིན་པའི་ཆོས་འདི་ནི། དེ་ཡི་གྲུབ་སྐད་ཉིད་གྱུར་ཅིག།། 20

མ་མཐོང་བྲམས་པ་ཡང་དག་སྦྲུར། ནང་ཞུགས་ཕྱི་རོལ་ཕྱོགས་ཚེ་ནའང་།
ཡུན་རིང་གོམས་པ་ངེས་པར་ནི། ཕྱོགས་སུ་ལྷུང་བ་མི་ཟློག་སོ།། 21

དེ་དག་ཚིག་དེ་ཐོས་ནས་བློ། རབ་དང་བྱང་ཆུབ་སེམས་དཔའ་ནི།
ནགས་ཀྱི་ནང་དུ་ངལ་གསོའི་སྐད། དེ་དག་ལ་ནི་གླིང་ནས་གཤེགས།། 22

सा तेन नद्यां निक्षिप्ता नागैर्नीता प्रभावती।
विक्षोभ्याप्याहृता तेभ्यस्तार्क्ष्यरूपेण वज्रिणा ॥ १५ ॥

प्रसादी बोधिसत्त्वोऽथ कन्यायुगलमभ्यधात्।
दानस्य प्रणिधानेन भवत्योः किं समीहितम् ॥ १६ ॥

ते तमूचतुरानन्दनिधिः शुद्धोधनात्मजः।
सर्वार्थसिद्धोऽभिमतः कुमारः पतिरावयोः ॥ १७ ॥

उद्यमं मारलीलायाः सरसं तद् वचस्तयोः।
न लिलिम्प मनस्तस्य पाद्मं दलमिवोदके ॥ १८ ॥

स जगाद कुमरोऽसौ न किं प्रव्रजितः श्रुतः।
न तस्य लोलनयनाः प्रियाः श्रिय इव स्त्रियः ॥ १९ ॥

इत्यनीप्सितमाकर्ण्य दीर्घं निश्वस्य कन्यके।
ऊचतु दानधर्म्मोऽयं सिद्धौ तस्यैव जायताम् ॥ २० ॥

अदृष्टस्नेहसंश्लिष्टः प्रविष्टोऽन्तःपराङ्मुखः।
न नाम सुचिराभ्यस्तः पक्षपातो निवर्त्तते ॥ २१ ॥

इति तद्वचनं श्रुत्वा बोधिसत्त्वः प्रसन्नधीः।
प्रयातस्ते समामन्त्र्य विश्रान्त्यै काननान्तरम् ॥ २२ ॥

འི་ཐུག་བ་དུན་རྡིའི་ཚ་དག་གིས། སྟོབས་ནི་མཆོག་དུ་རྒྱས་པ་ཐོབ།
བསིལ་གྲིབ་མཆོག་ལྡན་ཤིང་དག་གིས། རབ་མཛེས་ས་འཛིན་དག་ལ་འཛོགས། ||
23

དེར་ནི་སྐྱིལ་ཀྲུང་བཅིངས་པ་མཛད། དེ་ཡིས་བདེ་བར་བཞུགས་པའི་ཚེ།
ང་རྒྱལ་བཞིན་དུ་རྩེ་མོ་ནི། རབ་དུ་མཐོ་བའི་རི་དེ་ཞིག || 24

ས་འཛིན་རྣམ་པར་ཞིག་པ་དེར། ཐུགས་ནི་བྱུང་བཞིན་དེ་ཡིས་བསམས།
ཀྱེ་མ་དྲི་མེད་མ་ཡིན་པའི། ལས་འདི་བདག་གིས་ཅི་ཞིག་བྱས། || 25

དེ་ལྟར་བརྒྱ་བསམ་དགུགས་རིང་བ། དེ་ལ་ནམ་མཁའ་ལྷ་ཡིས་སྨྲས།
དམ་པ་ཁྲོད་ཀྱིས་མི་འོས་པའི། ལས་ནི་ཅི་ཡང་བསྒྲུབས་པ་མེད། || 26

རྒྱུན་ཆད་མེད་པར་དགེ་བསྒྲུབས་པ། ས་ཡི་འཛིན་པར་བཟོད་མ་གྱུར།
སེམས་ཅན་དགེ་བ་རབ་བསྒྲུབས་པ། རབ་མཐོ་རི་བོ་བརྒྱ་བས་ལྷི། || 27

ཆུ་བོ་ནི་ར་ཉྫ་ན་ནི། ཡང་དག་སྒྲོལ་ལ་གཡོ་མེད་ཡུལ།
བྱང་ཆུབ་སེམས་ལ་གྲུབ་སྟེར་བ། རྡོ་རྗེ་གདན་ཞེས་བརྗོད་པར་སོང་། || 28

ལྷ་ཡི་བབསྟན་པའི་ལམ་ནས་དེ། རབ་གཤེགས་ལམ་གྱི་ས་གཞི་ལ།
ཞབས་ནི་བཀོད་པས་གསེར་དག་གི། པདྨ་རྒྱུད་པ་བྱུང་བར་གྱུར། || 29

དེ་ནི་གཤེགས་པའི་ས་གཞི་ལ། ཆུ་རྣམས་རབ་དུ་བརྡོལ་བས་དཀྲིགས།
མཁར་བའི་སྐྲོད་བཞིན་སྒྲ་ལྡན་ཞིང་། རབ་དུ་པར་ཞེས་ཉེམས་ཞེས་ཀྱང་། || 30

पायसामृतभागेन लब्धदिव्यबलोदयः ।
प्रच्छायतरुमुच्छाय मारुरोह महीधरम् ॥ २३ ॥

पर्य्यङ्कबन्ध माधाय तत्र तस्मिन् सुखं स्थिते ।
अहङ्कार इवात्युच्चशिराः सोऽद्रिर्व्यगीर्य्यत ॥ २४ ॥

विशीर्णभूधरे तस्मिन् स प्रदध्यौ विषसधीः ।
सपक्षालानि कर्म्माणि मया कानि कृतान्यहो ॥ २५ ॥

इति चिन्ताश्रतोच्छासं तमूचु र्व्योमदेवताः ।
न त्वया विहितं साधो कर्म्म किञ्चिदसाम्प्रतम् ॥ २६ ॥

अच्छिन्नोत्ततकुशलं धर्त्तुं न क्षमते क्षितिः ।
स त्व मुत्ततकुशलः प्रोच्चशैलशताद्गुरुः ॥ २७ ॥

निरञ्जनीं समुत्तीर्य्य सरितं व्रज निश्चलम् ।
सिद्धिदं बोधिसत्त्वानां देशं वज्रासनाभिधम् ॥ २८ ॥

देवतादिष्टमार्गेण प्रस्थितस्यास्य भूतले ।
पादन्यासैरभूत्तस्य हेमपद्मपरम्परा ॥ २९ ॥

पृथिवी व्रजत स्तस्य प्रोल्लसत्सलिलाकुला ।
रणन्ती कांस्यपात्रीव प्रोन्ननाम ननाम च ॥ ३० ॥

གང་གི་ཟླ་མེད་ཡེ་ཤེས་གཏེར། འགྲུབ་པ་འགྱུར་བའི་འབྲས་བུ་ཅན།
མཚན་མ་དེ་དང་དེ་དག་ནི། བྱུང་བར་གྱུར་བ་དེ་ཡིས་མཐོང་།། 31

ཉི་ར་ཉྫ་ནའི་ས་གཞི་ལ། ནག་པོ་ཞེས་བྱ་ཡོང་བའི་ཀླུ།
སངས་རྒྱས་བྱུང་བས་མིག་ཐོབ་ཅིང་། ས་ཡི་སྐྲ་ཐོས་ངེས་པར་འཐོན།། 32

མཚན་ཉིད་ཐམས་ཅད་རབ་རྫོགས་ཤིང་། འཛམྦུ་ཆུ་བོ་འི་འོད་ཟེར་འབར།
བྱང་ཆུབ་སེམས་དཔའ་དེ་མཐོང་ནས། ཐལ་མོ་སྦྱར་བྱས་རབ་སྨྲས་པ།། 33

པདྨའི་སྤྱན་ལྡན་མཛེས་པ་ཁྱོད་ནི་ལང་ཚོ་དར་ལ་ནགས་ཚལ་འདིར།
ཕུན་ཚོགས་རྣམས་ལ་འབྲལ་བའི་གདུང་བ་རབ་ཏུ་བྱིན་ནས་རྣམ་པར་གནས།
མཚུངས་མེད་ཞི་བའི་ཁྱད་པར་རབ་ཏུ་འབྱེད་ཅིང་ཆོག་ཤེས་སྐྱེ་བའི་རྒྱུ།
ཁྱོད་ནི་སྲིད་པའི་མཚོ་ལས་ལུས་ཅན་རྣམས་ཀྱི་བདེན་པའི་ཟམ་སྟེགས་འགྱུར།། 34

ཇི་ལྟར་འདི་ན་རི་དགས་འདི་དག་ཐམས་ཅད་འཇིགས་
པའི་གཡོ་བ་ཉིད་ནི་བཏང་བྱས་ཤིང་།
ཇི་ལྟར་མཁར་འགྲོད་ཚོགས་རྣམས་རྩེ་དགའི་འཁོར་
ཡོས་ཉེ་བ་ཉིད་དུ་རྣམ་པར་གནས།
གང་ཡང་སེམས་ཅན་རྣམས་ཀྱི་སྙིང་གི་ཡིད་བརྟན
མཚུངས་པ་ཉིད་ཀྱི་གནས་གྱུར་པ།
དེ་ལྟར་འདི་ནི་ངལ་དུབ་མེད་པར་བདེ་བ་སྦྱིན་པའི་སངས་རྒྱས་སྐུ་ཡིན་སྙམ།། 35

तानि तानि निमित्तानि प्रवृत्तानि ददर्श सः ।
येषामनुत्तरज्ञाननिधानसाधनं फलम् ॥ ३१ ॥

निरञ्जनाय भुवने नागोऽन्धः कालिकाभिधः ।
बुद्धोत्पादितदृग्भूमेः शब्दमाकर्ण्य निर्ययौ ॥ ३२ ॥

सर्वलक्षणसम्पन्नं दीप्तजाम्बूनदद्युतिम् ।
स बोधिसत्त्वमालोक्य प्रोवाच रचिताञ्जलिः ॥ ३३ ॥

नलिननयन कान्तस्त्वं वने यौवनेऽस्मिन्
विहरसि विरहार्त्तिं सम्पदामर्पयित्वा ।
अशमशमविशेषोन्मेषसन्तोषहेतु-
र्भवसि भवसमुद्रे देहिनां सत्यसेतुः ॥ ३४ ॥

अथामुञ्चन्त्येते भयतरलता मत्र हरिणाः
यथा लीलाचक्रं विहरति समीपे खगगणः ।
ससत्वासत्वानां किमपि हृदयाश्वाससदनं
तथा मन्ये बौद्धं वपुरिद मनायाससुखदम् ॥ ३५ ॥

ལག་ལྡན་སྒྲ་གྲུ་པ་དྨོ་ལ་དགའ་ལག་པ་དག་ལ་ལག་པ་འཇོག་པར་བྱེད།
གཙུག་ཕུད་ལྡན་པའི་མཛུག་རྩེའི་རླུང་གིས་སྐྱོན་པའི་སྐྲ་
དང་ལྡན་ཞིང་བདེ་བར་བྱེད།
མིག་ཟུར་གཡོ་བའི་རི་དགས་མོ་རྣམས་ས་ཀུན་དུ་གྲུས་
པས་གྲིན་དུ་ཕྱོགས་པར་གྱུར།
བསོད་ནམས་རབ་དང་བཞིན་འདི་ནི་རབ་ཏུ་ཞི་བར་འགྱུར་བའི་དུས་ཀྱི་ལུགས།། 36

དེ་རིང་ཁོ་ན་དག་པའི་སངས་རྒྱས་ཉིད་ཐོབ་ནས།
འཇིག་རྟེན་གསུམ་པོ་ཁྱོད་ཀྱི་མ་ལུས་རྟོགས་པར་བ་བྱེད།
བདུད་རྩིའི་ཟེར་གྱིས་འཕྲུལ་ལ་ཀུ་མུད་ལྡན་པ་ནི།
རབ་དང་རབ་ཏུ་དགའ་བའི་དཀར་བ་རྫོགས་པ་བཞིན།། 37

ཉིན་མོ་འི་མགོན་བཞིན་གཟི་བརྗིད་རབ་འབར་ཁྱོད་ཀྱི་
སྣང་བས་འཕྲུལ་ལ་ཕན་རྩོན་དུ།
རབ་རྒྱས་པདྨ་ལྟ་བུས་མཆོག་གི་སྣང་བ་ལ་རེག་འཇིག་རྟེན་རྣམས་དག་གིས།
སྤྲང་རྩི་འཐུང་བའི་འཕྲེང་བཞིན་གདུང་ཞིང་སྐྲག་པར་
ངེས་བཅིངས་སྙིང་ལས་ཕྱིར་བྱུང་བ།
གདི་སྡུག་སྡུན་པའི་འཕྲེང་བ་སྐྱར་ཡང་ནང་དུ་གནས་ན་བྱེད་པར་མི་འགྱུར་རོ།། 38

དུལ་བས་དེ་སྐད་སྨྲ་བ་ཡི། རྒྱ་ཡིས་རྒྱལ་ལ་རབ་དང་བློ།
བྱང་ཆུབ་སེམས་དཔས་ཕེབས་པར་སྨྲས། ཚུ་བོ་ཡང་དག་བརྒྱལ་ནས་གཞིགས།། 39

करिकलभकः पद्मप्रीत्या करोति हरेः करं
सुखयति शिखी स्निग्धालापं कलापशिखानिलैः ।
भवति हरिणी लोलापाङ्गा पुरः प्रणयोन्मुखी
प्रशमसमयस्येयं पुण्यप्रसादमयी स्थितिः ॥ ३६ ॥

अद्यैव बुद्धत्व मवाप्य शुद्धं
त्वं बोधि मेष्यत्यखिलां त्रिलोकीम् ।
सद्यः प्रसादप्रमदावदातां
कुमुद्वतीं पूर्ण इवामृतांशुः ॥ ३७ ॥

अन्योन्यन्दिननाथदीप्तमहसः सद्यस्तवालोकनात्
लोकानां कमलप्रबोधकलया दिव्यप्रकाशस्पृशाम् ।
निर्य्याती हृदयान्निबद्धमधुपश्रेणीव संबन्धन-
व्यस्तान्तर्न पुनः करिष्यति पदं मोहान्धकारावलिः ॥३८॥

इति ब्रुवाणां विनया नागराजः प्रसन्नधीः ।
बोधिसत्त्वं समाभाष्य समुत्तीर्य्य नदीं ययौ ॥ ३९ ॥

རྡོ་རྗེ་གདན་གནས་བྱང་ཆུབ་ཀྱི། རྩ་བར་དེས་ཕྱིན་མ་འཁྲུགས་པར།
བརྒྱ་བྱིན་གྱིས་བྱིན་ཀུ་ཤ་རྣམས། རྩེ་མོ་གཡས་བསྟན་མཐལ་སྟན་བྱས། ། 40

དེར་ནི་སྐྱིལ་ཀྲུང་བཅས་མཛད་ནས། གཡོ་བ་མེད་པར་ངེས་པར་ཞུགས།
བདུད་རྩིའི་ཆུ་གཏེར་བསྲུབས་པ་ཡི། མཇུག་ཏུ་ངལ་གསོ་བཞིན་དུ་མཛེས། ། 41

བརྟན་ཞིང་དྲང་པོ་འི་དབྱིབས་ལྡན་དེ། ཐུན་མོང་མན་པར་བཟོད་པའི་རྟེན།
མི་གཡོ་གསེར་གྱི་འོད་ལྡན་པ། ལྷུན་པོ་གཞན་པ་བཞིན་དུ་མཛེས། ། 42

ཟག་པ་ཟད་པ་མཐར་ཐུག་པ། སྐྱིལ་ཀྲུང་འདི་ལ་བདག་གནས་སོ།
ཞེས་པའི་བརྟག་པ་བྱས་ནས་དེས། དྲན་པའི་སྒོ་ནི་རབ་ཏུ་བཅིངས། ། 43

དེ་ནས་སྐབས་དེར་བདུད་དག་ནི། ཞི་ལ་ཕྲག་དོག་སྤྲིང་ཡིག་ཐོགས།
མྱུར་བ་ཉིད་དུ་མངོན་པར་འོངས། བྱང་ཆུབ་སེམས་དཔའ་ལ་སྨྲས་པ། ། 44

འཇིག་རྟེན་གཅིག་ལ་གཡོན་ཉིད་དང་། འདོད་མིན་འདོད་པ་འདི་ནི་ཅི།
དུས་མིན་མེ་ཏོག་གཞོན་ནུའི་དབྱིབས། ཁྱོད་ཀྱི་བློ་ཡང་སུ་ཞིག་འདོད། ། 45

རྟོགས་པ་བཅོམ་པའི་ལྷ་སྤྲིན་གྱིས། ཁྱོད་ཀྱི་གྲོང་ཁྱེར་རབ་ཏུ་བླངས།
བཙུན་མོ་འི་ཚོགས་ཀྱིས་འཕྲེང་བ་བཀག། མི་ཡི་བདག་པོ་ཟས་གཙང་བཅིངས། ། 46

ཞེས་པའི་ཚིག་ནི་ཐོས་ཉིད་ན། སྒྲ་ངན་ཁྲོ་བའི་དུག་སྤངས་པ།
དེ་ཡི་རྣམ་འགྱུར་མ་བསླབས་པའི། སེམས་ཀྱིས་རྣམ་པར་བསམས་པར་གྱུར། ། 47

वज्रासनपदं प्राप्य बोधिमूलमनाकुलम् ।
दक्षिणाग्रैः कुशैश्चक्रे शक्रदत्तैः स संस्तरम् ॥ ४० ॥

तत्रोपविश्य पर्य्यङ्कबद्धो निश्चलनिश्चयः ।
मन्थावसानविश्रान्तः स दुग्धाब्धिरिवाबभौ ॥ ४१ ॥

असाधारः क्षमाधारः स धीरसरलाकृतिः ।
रुरुचे काञ्चनरुचिः परो मेरुरिवाचलः ॥ ४२ ॥

अस्रावक्षयपर्य्यन्तः पर्य्यङ्कोऽयम्मम स्थिरः ।
बबन्धेति स संकल्पं कृत्वा प्रतिमुखीं स्मृतिम् ॥ ४३ ॥

अत्रान्तरे समभ्येत्य मारः संयममत्सरः ।
लेखहार स्तत्र तूर्णं बोधिसत्त्वमभाषत ॥ ४४ ॥

अकामकामता केयं लोके बन्धनदा मता ।
अकालकलिकाकारा मतिस्ते कास्य कामना ॥ ४५ ॥

गृहीतं हतशंकेन देवदत्तेन ते पुरम् ।
निरुद्धान्तःपुरश्रेणी बद्धः शुद्धोदनो नृपः ॥ ४६ ॥

इति श्रुत्वैव वचनं शोकामर्षविषोज्झितः ।
अशिक्षितविकारेण चेतसा स व्यचिन्तयत् ॥ ४७ ।

ཀྱེ་མ་བདག་ལ་བདུད་དག་ནི། བར་ཆད་བྱ་བར་རབ་ཏུ་བརྩོན།
ངོ་ཚ་མེད་ནི་གཙུག་ཕུད་ལྡན། རྩེ་ཞིང་འགྲོ་ལ་གར་སྟབས་སྐྱུར།། 48

མཐའ་ནི་འཆི་བར་མི་ནུས་བདུད། ཁྱོད་ཀྱིས་གནོད་པར་ནུས་མ་ཡིན།
འཆི་བའི་མཆོད་སྦྱིན་གཅིག་གི་ནི། འདོད་པ་ཉིད་འདི་ཁྱོད་ཀྱིས་ཐོབ།། 49

མཆོད་སྦྱིན་སྦྱིན་པ་དཀའ་ཐུབ་བསྡུགས། བདག་ཉིད་ལ་ནི་བྱེད་མི་སྤྲོ།
རང་གི་ཡོན་ཏན་བསྔགས་པ་ཡིས། བསོད་ནམས་མེ་ཏོག་རྙིས་ཤིང་འབྲུལ།། 50

དེ་ཡིས་དེ་སྐད་སྨྲས་བྱུང་བས། ལུས་ཅན་སེམས་ནི་འཕྲོག་པའི་བདུད།
ཁྲོ་བ་དང་བཅས་རབ་སོང་སྟེ། རྨད་དུ་སྦྱོར་བ་ཡང་དག་བརྩམས།། 51

དེ་ནས་ཙུ་ཏའི་འཁྲི་ཤིང་བཞིན། ཡིད་འོང་རབ་ཏུ་མཛེས་པའི་མིག།
གཡོ་བའི་རླུང་བས་གཡོ་ལྡན་མ། ཡིད་འོང་མཛེས་མ་མཐོང་བར་གྱུར།། 52

སྤྱོད་ཚུལ་མཛེས་པས་ངོམས་གྱུར་པ། འདོད་པའི་བུ་མོ་གསུམ་པོ་དེའི།
ཀང་པ་པདྨ་ཅན་བཀོད་ནས། དཀའ་ཐུབ་ནགས་འདི་ཆགས་ལྡན་བྱས།། 53

དེར་ནི་མིག་གིས་རི་དྭགས་མོ། འཕྱིད་པའི་འགྲོས་ཀྱིས་གླང་མོ་དང་།
དེ་དག་བཞིན་གྱི་ཆུ་སྐྱེས་ཀྱིས། པདྨ་ཅན་ནི་དམན་པར་བྱས།། 54

དེ་ཡི་ལུས་ནི་ལང་ཚོ་ཡིས། བརྒྱན་ཅིང་རྗེས་སུ་ཆགས་པས་བྱུགས།
མཛེས་སྡུག་གོས་དང་ལྡན་པ་ཡིས། སེམས་མེད་རྣམས་ཀྱང་ཆགས་པར་གྱུར།།
55

अहो वतान्तरायं मे मारः कर्त्तुं समुद्यतः ।
नर्त्तयत्येष दुर्वृत्तः शिखण्डिक्रीड़या जगत् ॥ ४८ ॥

मार मार विरामस्ते दौर्ज्जन्यस्य न जायते ।
एकेन हिंसायत्नेन प्राप्तेयं कम्रता त्वया ॥ ४९ ॥

यज्ञदानतपःश्लाघां नात्मनः कर्त्तुमुत्सहे ।
स्वगुणोदीरणम्लानं पुण्यपुष्पं हि शीर्य्यति ॥ ५० ॥

इति निर्भर्त्सितस्तेन चित्तस्तेनः शरीरिणाम् ।
सामर्षः प्रययौ मारः समारम्भाद्गतोद्यमः ॥ ५१ ॥

अथादृश्यन्त ललिता लालित्याञ्चितलोचनाः ।
भ्रमद्भ्रूभङ्गतरङ्गिण्यः कान्ताश्च्यूतलता इव ॥ ५२ ॥

चारुतच्चरितातृप्ता स्तिस्रस्ताः कामकन्यकाः ।
सरागं पादनलिनीन्यासैश्चक्रुस्तपोवनम् ॥ ५३ ॥

विलोचनेन हरिणी करिणी गतिविभ्रमैः ।
तत्र ताभि र्मुखांभोजै र्नलिनी मलिनीकृता ॥ ५४ ॥

यौवनाभरणै रंगैरनुरागविलेपनैः ।
लावण्यवसनैस्तासां कामोऽभूदप्यचेतसाम् ॥ ५५ ॥

རྡོ་རྗེའི་གདན་ལ་བསམ་གཏན་ལ། མཉམ་གཞག་གཡོ་མེད་སྤྲིན་ལྡན་པ།
དེ་མཐོང་ནས་ནི་དེ་དག་རྣམས། ཡ་མཚན་བསམ་གཏན་འཛིན་པར་གྱུར། 56

བྱང་ཆུབ་སེམས་དཔའ་རྟག་པ་ལས། རྒྱགས་དང་ཆགས་པའི་རང་བཞིན་གྱིས།
ན་ཚོད་འཕྲུལ་ཉིད་ཡོངས་བདང་དེས། དམ་པའི་ངོ་ཚའི་རྒྱ་བ་བསྐྱེན། 57

དེ་ནས་དེ་དག་ཕྱིར་ལོག་སྟེ། སོང་བས་ཡིད་ལ་རེ་བ་ཅད།
ཡིད་སྨྲུབས་གྲགས་པ་རྩོམ་པ་ཡིས། དམག་གི་ཚོགས་པ་བསྡུས་པར་གྱུར། 58

ཐ་དད་བཞིན་ལྡན་སྒྲོག་ཆགས་དང་། མཚོན་ཆ་ཀུན་གྱི་འཇིག་པས་ཁྱབ།
ཁྲི་བ་ཕྲག་ནི་སུམ་ཅུ་དྲུག ། དེ་ཡི་དཔུང་ཆེན་ཡང་དག་རྫོགས། 59

རང་ཉིད་ཁྲི་ཞིང་དྲག་པོ་ཡིས། རྣ་བའི་བར་དུ་མདའ་བསྣུན་དྲངས།
བདུད་ཀྱི་རྣམ་འགྱུར་དྲག་པོ་ཡིས། བྱང་ཆུབ་སེམས་དཔའ་ཀུན་དུ་གཙེས། 60

དེ་ཡིས་རབ་འཕངས་རྟུལ་དང་ནི། དུག་དང་རྡོ་ལྡན་མཚོན་གྱི་ཆར།
མནྡ་ར་དང་པདྨོ་ཡི། ཚོགས་སུ་བྱང་ཆུབ་སེམས་ལ་གྱུར། 61

སླར་ཡང་བདུད་དཔུང་གིས་འཕངས་པ། མཚོན་གྱི་ཆར་ནི་འཛིན་བཟོད་པ།
དེ་ལ་རྡོ་རྗེ་ར་བའི་གནས། ལྷ་རྣམས་དག་གིས་རབ་ཏུ་བྱས། 62

བརྟག་པ་ཉམས་པའི་དྲན་པས་ཀྱང་། ཏིང་ངེ་འཛིན་གྱི་རྣ་བའི་ཚོར།
ཞིལ་གྱི་ལྡོན་པ་འདབ་མ་ནི། དྲིལ་བུ་གསལ་བའི་སྒྲ་ལྡན་སྒྲུལ། 63

वज्रासनसमाधानध्याननिश्चललोचनम् ।
तं विलोक्याभवत् तासां विस्मयध्यानधारणा ॥ ५६ ॥

ता बोधिसत्त्वसंकल्पान् मदरागमयं वयः ।
परित्यज्यैव सहसा सलज्जा भेजिरे जराम् ॥ ५७ ॥

प्रतीपगमनात्तासामथ भग्नमनोरथः ।
मन्मथः प्रथितारम्भः सैन्यसम्भारमाददे ॥ ५८ ॥

सर्वप्रहरणैर्व्याप्तं नानाप्राणिमुखैर्भयैः ।
षट्त्रिंशत्कोटिविपुलं बलं तस्य समुद्ययौ ॥ ५९ ॥

स्वयमाकर्षनिष्कृष्टकोपक्रूरशरासनः ।
मारः स्फारविकारेण बोधिसत्त्वं समाद्रवत् ॥ ६० ॥

शस्त्रवृष्टि स्तदुत्सृष्टा सह पांशुविषाश्मभिः ।
प्रययौ बोधिसत्त्वस्य मन्दाराम्बुजतुल्यताम् ॥ ६१ ॥

पुनर्मारबलोत्सृष्टा शस्त्रवृष्टि र्न्तंतक्षमे ।
चक्रिरे देवतास्तस्य वज्रप्रतिसमाश्रयम् ॥ ६२ ॥

स्मरोऽपि नष्टसङ्कल्पः समाधेः शोचकण्टकम् ।
घण्टापटुरटत्पत्रं निर्ममे स्फटिकद्रुमम् ॥ ६३ ॥

རྒྱ་ཅེར་སྒྲོགས་པའི་ཞིང་དེ་དང་། བདུད་དཔུང་མཚོན་དང་བཅས་པ་དག།
ནམ་མཁའི་ལྷ་ཡིས་བླངས་ནས་ནི། ལྷུགས་རིའི་ཕྱི་རོལ་རབ་ཏུ་འཕངས།། 64

དེ་ནས་བཅོམ་ལྡན་ཡེ་ཤེས་ནི། དྲི་མེད་རབ་དང་ཡང་དག་ཐོབ།
ཀུན་རིག་ཀུན་རྟོགས་སྐྱེ་བ་ནི། ཐམས་ཅད་དྭན་པ་མཆོག་ཏུ་གྱུར།། 65

དེར་ནི་བླ་མེད་ཡེ་ཤེས་ཀྱིས། རྫོགས་པའི་བྱང་ཆུབ་བརྙེས་པ་དེས།
ལས་ཀྱི་ཐ་རླབས་ཀྱིས་སྤྲུལ་པ། འབྱུང་པོ་ཀུན་གྱི་འགྲོ་བ་མཐོང་།། 66

དེ་ནས་ཤཱ་ཀྱའི་གྲོང་ཁྱེར་དུ། བྱང་ཆུབ་སེམས་དཔའ་དཀའ་ཐུབ་ཀྱིས།
ཉོན་མོངས་དབང་གིས་འདས་གྱུར་ཅེས། མཁའ་ལ་བདུད་ཀྱིས་རབ་ཏུ་བསྒྲགས།།
67

དེར་ནི་རྒྱལ་པོ་ཟས་གཙང་མ། དེ་ཐོས་རྡོ་རྗེས་བཅོམ་པ་བཞིན།
བུ་ལ་བྱམས་པའི་དུག་གིས་གཟིར། ས་ལ་རབ་ཏུ་འགྱེལ་བར་གྱུར།། 68

མི་བདག་བཙུན་མོའི་ཚོགས་དང་བཅས། སྲོག་ནི་བཏང་བར་བྱས་པའི་ཚེ།
ལེགས་སྤྱོད་ཕྱོགས་སུ་ལྷུང་བ་ཡི། ནམ་མཁའི་ལྷ་ཡིས་དེར་སྨྲས་པ།། 69

བདུད་རྩི་གསོལ་ནས་ཁྱོད་ཀྱི་སྲས། ཡང་དག་རྫོགས་སངས་རྒྱས་ཉིད་གྱུར།
དེ་ཡིས་གཟིགས་པ་རྣམས་ལ་ཡང་། འཆི་བས་བྱས་པའི་འཇིགས་པ་མེད།།70

མི་བདག་བློན་པོ་བཙུན་མོ་དང་། བཅས་པས་ཚིག་དེ་ཐོས་གྱུར་ནས།
བདུད་རྩིས་བྲན་བཞིན་སྐད་ཅིག་ལ། སྲོག་ནི་སླར་ཡང་བྱུང་བར་གྱུར།། 71

तन्तारमुखरं दृक्षं मारञ्च सबलायुधम् ।
चक्रवाटे समुत्क्षिप्य चिक्षिपु र्व्योमदेवताः ॥ ६४ ॥

भगवानथ संप्राप्तप्रसन्नज्ञाननिर्म्मलः ।
सर्व्ववित्सर्व्वगः सर्व्वजातिस्मृतिपरोऽभवत् ॥ ६५ ॥

स तत्रानुत्तरज्ञानसम्यक्सम्बोधिमापितः ।
ददर्श सर्व्वभूतानि गतिं कर्म्मोर्म्मिनिर्म्मिताम् ॥ ६६ ॥

अथ शाक्यपुरे मारः प्रवादमसृजद्दिवः ।
बोधिसत्त्वः प्रयातोऽस्तं तपःक्लेशवशादिति ॥ ६७ ॥

तत्र शुद्धोदनो राजा पुत्रस्नेहविषातुरः ।
निपपात तमाकर्ण्य वज्राहत इव क्षितौ ॥ ६८ ॥

अन्तःपुरे सहन्दपे प्राणत्यागकृतक्षणे ।
सुहृत्तपक्षपातिन्य स्तमूचु र्व्योमदेवताः ॥ ६९ ॥

पुत्र स्तवामृतं पीत्वा सम्यक्सम्बुद्धतां गतः ।
तेनावलोकितस्यापि नास्ति मृत्युभयं कुतः ॥ ७० ॥

इति सान्तःपुरामात्यः श्रुत्वा नरपति र्व्वचः ।
अभूत्प्रत्यागतप्राणः सुधासिक्त इव क्षणात् ॥ ७१ ॥

ཀུན་དགའི་དགའ་སྟོན་ཆེན་པོ་དེར། ཟླ་བ་སྒྲ་གཅན་གྱིས་ཟིན་ཚེ།
བྱང་ཆུབ་སེམས་དཔའི་བཙུན་མོ་ནི། གྲགས་འཛིན་མ་ལ་སྤྲས་མཛེས་བཅས།། 72

སྒྲ་གཅན་ཞེས་པ་བྱིས་པ་དེའང་། མི་བདག་དེས་བསྐྱེད་དོགས་པའི་ཚེ།
མ་ཡིས་དག་སྣང་རྗེ་དང་བཅས། འཕངས་ཚེ་ཆུ་ལ་འཁྱོར་བར་གྱུར།། 73

བཅོམ་ལྡན་འདས་ཀྱང་ཉིན་ཞག་བདུན། སྐུ་ནི་གཡོ་བ་མེད་པར་གནས།
རྡོ་རྗེ་སྐྱིལ་ཀྲུང་བཅིངས་པ་ཡིས། ལྷ་རྣམས་ཡ་མཚན་ལྡན་པར་བྱས།། 74

ཚངས་པའི་རིགས་ཞེས་བྱ་བ་ཡི། ལྷ་གཉིས་ཀྱིས་ནི་བསྐུལ་བ་ན།
མཆོག་དུ་ཀུན་དགའ་བདུད་རྩི་ཡི། ཚོགས་ལྷར་མཛེས་པས་བཀའ་སྩལ་པ།། 75

ལྷ་དང་ལྷ་མིན་དབང་ཕྱུག་བདེ། གང་གིས་སྡུག་བསྔལ་དུ་རྩི་བ།
བདེ་བར་གནས་པ་འདི་ནི་སྟོན། ཀྱེ་མ་བདག་གིས་ཤེས་མ་གྱུར།། 76

མཛེས་སྡུག་ཆུས་རྒྱས་ལང་ཚོ་ལྡན་པའི་ལུས།
བདུད་རྩིས་བརླན་པ་མཐོ་རིས་ལོངས་སྤྱོད་ཚོགས།
མ་ལུས་བདང་གྱུར་རྩོལ་མེད་བདེ་འདི་ཡིས།
འགྲན་ཟླ་སྙིང་པོ་མེད་པའི་རྫུལ་ཉིད་དོ།། 77

མི་བཟད་ཡུལ་གྱི་ཉོན་མོངས་འཁོར་བའི་ལམ་འགྲོན་ཀུན་དུ་གདུང་གྱུར་ཅིང་།
ཉོན་མོངས་ཅན་བདག་ཞི་བས་དགའ་བ་ཉེར་གྱུར་ཙན་དན་གྲིབ་མས་བཞིན།
དབང་པོ་མཐའ་དག་ཆོམ་པའི་བདེ་བ་འདི་ཡིས་བདག་ནི་དགའ་བ་སྐྱེས།
ཞི་བའི་གངས་ལྡན་ནགས་སུ་ངལ་བསོས་པ་རྣམས་བདེ་བའི་དཔེ་ནི་ཅི།། 78

तस्मिन्महोत्सवानन्दे बोधिसत्त्ववधूः सुतम् ।
कान्तं यशोधरासूत राहुग्रस्ते निशाकरे ॥ ७२ ॥

राहुलाख्यः स बालोऽपि नृपतेर्जन्मशङ्किनः ।
जनन्या सशिलः क्षुद्रौ निक्षिप्तोऽम्भसि पुप्लुवे ॥ ७३ ॥

भगवानपि सप्ताहं स्थितो निश्चलविग्रहः ।
वज्रपर्य्यङ्कबन्धेन देवानां विस्मयं व्यधात् ॥ ७४ ॥

स ब्रह्मकायिकाख्याभ्यां देवताभ्यां विरोधितः ।
अवदत्परमानन्दसुधासन्दोहसुन्दरः ॥ ७५ ॥

अहो वत मया ज्ञाता पूर्व्वमेषा सुखस्थितिः ।
यया सुरासुरैश्वर्य्यसुखं दुःखगणायते ॥ ७६ ॥

लावण्याम्भःप्लाविताङ्गास्तरुण्यः
पीयूषार्द्राः स्वर्ग्गसम्भोगवर्ग्गाः ।
अस्याशेषत्यागहेलासुखस्य
स्पर्द्धाबन्धे पांशुनिःसार एव ॥ ७७ ॥

संतप्तोऽहं विषयविषमक्लेशसंसारपान्थः
क्लान्तः शान्त्याश्रिति मुपगता श्चन्दनच्छाययेव ।
संजातेयं सकलकरणव्यापिनी निर्वृतिर्म्मे
विश्रान्तानां शमहिमवने किं सुखस्योपमानम् ॥ ७८ ॥

གནས་སྐབས་དེར་ནི་བསོད་ནམས་དག། ཡོངས་སུ་སྨིན་པས་ནགས་ཚལ་དེར།
ཚོང་པ་ག་མོན་བཟང་པ་དག། དོན་མཐུན་ཆེན་པོས་འོངས་པར་གྱུར།། 79

ལྷ་ཡིས་བསྐུལ་བ་དེ་དག་གིས། གུས་པས་བཅོམ་ལྡན་ལ་ཕྱོགས་དེ།
ཕྱག་འཚལ་ནས་ནི་བསོད་སྙོམས་འདི། བླང་བར་མཛོད་ཅེས་རབ་ཏུ་སྨྲས།། 80

བརྩེ་བའི་དབང་གྱུར་ཀུན་མཁྱེན་གྱིས། དེ་ནི་གསན་ནས་རྣམ་བསམས་པ།
སྔ་རབ་རྣམས་ཀྱིས་སྔོན་དུ་འདི། བླངས་ཀྱི་སྔོད་སྤྱངས་ལག་པར་མིན། 81

དེ་ལྟར་བསམས་པ་དེ་ལ་ནི། རྒྱལ་ཆེན་བཞི་ཞེས་བྱ་བའི་ལྷས།
ཞལ་ལས་བྱུང་བའི་ལྷུང་བཟེད་བཞི། ཕྱུལ་ནས་ལྷ་ཡི་གནས་སུ་སོང་།། 82

དེ་ནས་བཅོམ་ལྡན་འདས་ཀྱིས་ཀྱང་། བསོད་སྙོམས་རབ་ཏུ་བཞེས་མཛད་ནས།
སྐྱབས་བསུམ་དག་གི་བཀའ་ཡིས་ནི། དེ་དག་རྗེས་སུ་བཟུང་བ་མཛད།། 83

ལེགས་བྱས་རྣམ་པར་རྒྱས་པའི་དབང་པོ་བསོད་ནམས་སྨིན་ལ་མཁས།
རྒྱུད་པ་མ་ལུས་ཟད་བྱེད་དོན་དུ་གཉེར་བའི་དཔག་བསམ་ཤིང་།
རིག་པ་ཡོངས་གྱུར་བསླབ་པའི་རྗེས་མཐུན་དམ་པ་དག་གིས་གྲོགས།
སྐལ་ལྡན་འགའ་ཞིག་དག་གི་དགེ་བའི་རྩ་བས་ཐོབ་པར་འགྱུར།། 84

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བ་དུད་བཅོམ་པའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་ལྔ་པའོ།

अस्मिन्नवसरे पुण्यपरिपाकेण तद्वनम् ।
वणिजौ पृथुसार्थेन प्राप्तौ त्रपुसभल्लिकौ ॥ ७९ ॥

देवताप्रेरितौ भक्त्या भगवन्त मुपेत्य तौ ।
प्रणतौ पिण्डपातोऽयं गृह्यतामित्यभाषताम् ॥ ८० ॥

दयाविधेयः सर्व्वज्ञ स्तदाकर्ण्य व्यचिन्तयत् ।
पूर्व्वैः पात्रे गृहीतोऽयं न पाणौ पात्रवर्ज्जिते ॥ ८१ ॥

इति चिन्तयतस्तस्य महाराजाभिधाः सुराः ।
दत्वा स्फटिकपात्राणि चत्वारि त्रिदिवं ययुः ॥ ८२ ॥

कृत्वाथ भगवान् पात्रे पिण्डपातप्रतिग्रहम् ।
अनुग्रहं तयोश्चक्रे शरण्यत्रयशासनात् ॥ ८३ ॥

विततसुकृतसाक्षी पुण्यनिक्षेपदक्षः
क्षयितविपदशेषः प्रार्थनाकल्पवृक्षः ।
भवति कुशलमूलैः कस्यचिद् भाग्यभाजः
शुभपरिणतिदीक्षादक्षिणः साधुसङ्गः ॥ ८४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मारविद्रावणावदानं नाम पञ्चविंशः पल्लवः ॥

ཡལ་འདབ་ཉི་ཤུ་རྩ་དྲུག་པ།

མཛེས་པའི་སྤྱོད་ཚུལ་དང་ལྡན་ཡོན་ཏན་སྐྱུད་པར་འོས་གྱུར་ཅིང་།
རིན་ཆེན་འོད་ཟེར་རྣམ་དག་དམ་པའི་སྣང་བ་རྒྱས་པར་བྱེད།
ནད་མེད་ཀླུ་དྲིག་རང་བཞིན་འགྲོ་བའི་རྒྱན་ནི་སྐྱེད་བྱེད་པ།
གང་ཞིག་དགེ་བས་རྗེས་འབྲེལ་མིང་ཆེན་རིགས་དེ་འགའ་ཞིག་ཡིན།། 1

སེར་སྐྱའི་གཞིར་ནི་ནུ་གྲོ་དྷའི། ཀུན་དགའ་ར་བར་བཅོམ་ལྡན་འདས།
དེ་བཞིན་གཤེགས་པ་བཞུགས་ལ་སྔོན། ཤཱ་ཀྱ་རྣམས་ཀྱིས་རང་རིགས་ཞུས།། 2

དེས་དྲིས་དེས་ཀྱང་མཻ་གལ་བུ། དེ་ལ་དྲི་མེད་ཡེ་ཤེས་ཀྱིས།
གཟིགས་པ་བསྐྱེས་ནས་མདུན་དུ་ནི། རང་གི་རིགས་འབྲུ་ངས་གསུང་བར་
བསྐོས།། 3

དེ་ཡི་ཡེ་ཤེས་སྤྱན་གྱིས་ནི། འདས་པ་དེ་ཉིད་ཇི་བཞིན་གཟིགས།
ཡང་དག་དྲན་པས་དེ་རྣམས་ལ། སྨྲས་པ་ཤཱ་ཀྱ་བྱུང་བ་ཉིན།། 4

མ་ལུས་འཇིག་རྟེན་འདི་ནི་སྔོན། ཆུ་ཡི་རང་བཞིན་གཅིག་ཉིད་དུ།
གནས་ཚེ་རླུང་གིས་བསྐྱབས་པ་ལས། ཆུ་ནི་འོ་མ་བཞིན་དུ་གྱུར།། 5

ཆུ་དེར་སྟུག་པོ་ཉིད་ཀྱིས་ནི། དལ་བུས་སྐྱ་བར་གྱུར་པའི་ཚེ།
ཁ་དོག་རོ་དང་རེག་དང་སྐྲ། དྲི་ཡི་རང་བཞིན་ས་གཞིར་གྱུར།། 6

अथ षड्विंशः पल्लवः ।

वंशः स कोऽपि विपुलः कुशलानुबन्धी
यस्मात्सुवृत्तमुचितं गुणसङ्ग्रहस्य ।
रत्नं विशुद्धरुचिसञ्चितसत्प्रकाशं
मुक्तामयं जगदलङ्करणं प्रसूते ॥ १ ॥

न्यग्रोधारामनिरतं पुरा कपिलवास्तुनि ।
शाक्याः स्ववंशं पप्रच्छुर्भगवन्तं तथागतम् ॥ २ ॥

तैः पृष्टः स्वकुलोत्पत्तिं स मौद्गल्यायनं पुरः ।
वक्तुं न्ययुङ्क्त कृत्वास्य विमलज्ञानदर्शनम् ॥ ३ ॥

स विलोक्य यथातत्त्वमतीतं ज्ञानचक्षुषा ।
तानवोचत संस्मृत्य श्रूयतां शाक्यसम्भवः ॥ ४ ॥

अशेषेऽस्मिन् जलमये जगत्येकार्णवे पुरा ।
स्थिते पवनसंस्पर्शात् पयः पय इवाभवत् ॥ ५ ॥

जले तस्मिन् घनतया याते कठिनतां शनैः ।
अभूद्वर्णरसस्पर्शशब्दगन्धमयी मही ॥ ६ ॥

དེར་ནི་ལས་དག་ཡོངས་ཟད་པས། འོད་གསལ་ལྷ་ལས་ལྷུང་གྱུར་པ།
དེ་མཚུངས་ཁ་དོག་ཡང་དག་རྒྱས། སེམས་ཅན་སྙིང་སྟོབས་སྟོབས་ལྷག་པ།། 7

རོ་ལ་ཆགས་པས་ར་བ་སྨོངས་པས། མཛུབ་མོར་རོ་ནི་སྐྱུང་བྱས་ནས།
ཁ་ཟས་སྐྱོན་གྱིས་ལྷི་བ་དང༌། རྩུབ་ཅིང་ཁ་དོག་ངན་པར་གྱུར།། 8

དེ་དག་རྣམས་ཀྱི་ས་ལ་ནི། རིམ་གྱིས་ས་ལུ་འབྲུངས་པར་གྱུར།
རྐུན་པས་རྣམ་པར་བཅོམ་རྣམས་ཀྱིས། ཞིང་དང་ཁང་པ་ཡོངས་སུ་བཟུང་།། 9

དེ་དག་ཉམས་སྲུངས་སྐྱོང་བ་ལ། རྒྱལ་རིགས་ཚུལ་དང་ལྡན་པ་ནི།
སྐྱེ་བོ་མང་པོས་བཀུར་གྱུར་པ། ཀུན་གྱིས་བཀུར་བ་ཞེས་པ་བྱུང་།། 10

དེ་ཡི་རིགས་བརྒྱུད་ཆེན་པོ་ལ། དཔལ་ལྡན་མི་བདག་གསོ་སྦྱོང་འཕགས།
གྲགས་པའི་མེ་ཏོག་ཉམས་མེད་བྱུང་། ཆུ་གཏེར་ལ་ནི་ཡོངས་འདུ་བཞིན།། 11

དེ་ཡི་སྲས་གྱུར་འཁོར་ལོ་སྒྱུར། སྐྱེ་གནས་སྐྱེས་མིན་ང་ལས་ནུ།
གང་གི་རིགས་བརྒྱུད་འགྲོ་བ་ན། གཟུགས་གཅིག་ཉིད་ལྡན་ཆེན་པོ་བྱུང་།། 12

དེ་ཡི་རིགས་ནི་སྟོང་ཕྲག་གི། རིགས་ལས་མི་བདག་ཀྲི་ཀི་བྱུང་།
གང་གི་ཐུགས་ནི་བཅོམ་ལྡན་འདས། འོད་སྲུངས་དག་གིས་དང་བར་མཛད།། 13

དེ་བརྒྱུད་བྲ་རས་ཤིང་པ་བྱུང་། དེ་ལ་ཡང་ནི་འཕགས་སྐྱེས་པོ།
དེ་ཡི་བུ་ནི་ནུ་བོ་ལ། དགའ་བས་ཕྲུ་བོ་གནས་ནས་བསྐྱོད།། 14

तस्यामाभास्वरा देवाश्च्युताः कर्म्मपरिक्षयात् ।
तत्तुल्यवर्णसम्भूताः सत्त्वाः सत्त्वबलाधिकाः ॥ ७ ॥

अङ्गुल्या रसमास्वाद्य तत्तृष्णातीव्रमोहिताः ।
आहारदोषात् सम्प्रापु र्गुरुरूक्षविवर्णताम् ॥ ८ ॥

अन्नप्रसविनी तेषां क्रमेणाभूद् वसुन्धरा ।
तमोभिश्च विलुप्तानां क्षेत्रागारपरिग्रहा ॥ ९ ॥

ततस्तेषां क्षतत्राणात् क्षत्रियः क्षितिपालने ।
महासम्मतनामाभूज्जनस्य महतो मतः ॥ १० ॥

तस्यान्वये महत्यासीन्नृपः श्रीमानुपोषधः ।
अम्लानकीर्त्तिकुसुमः पारिजात इवोदधौ ॥ ११ ॥

चक्रवर्त्ती सुतस्तस्य मान्धाताभूदयोनिजः ।
जगत्येकातपत्रस्य यस्य वंशो महानभूत् ॥ १२ ॥

वंशे सहस्रवंशस्य कृकिस्तस्याभवन्नृपः ।
चित्तप्रसादमकरोद् भगवान् यस्य काश्यपः ॥ १३ ॥

इक्ष्वाकुरन्वये तस्य तस्य चाभूद् विरूढकः ।
प्रीत्या कनीयसः सूनो र्ज्येष्ठा स्तेन विवासिताः ॥ १४ ॥

དེ་ནས་གཞོན་ནུ་ཐམས་ཅད་ནི། གཅིག་དུ་འདུས་ནས་རང་ཡུལ་ལ།
ཆགས་དང་བྲལ་བས་ཐུབ་པ་ཆེ། སེར་སྐྱ་ཞེས་པའི་གནས་སུ་སོང་ ༎ 15

ཁྲིམས་པ་སྣ་ཆེན་སྒྲོགས་པ་ཡིས། བསམ་གདན་དུས་ཀྱི་གོགས་བྱེད་པ།
དེ་དག་གྲོང་ཁྱེར་གཞན་དུ་ནི། སེར་སྐྱའི་གཞི་ཞེས་དེ་ཡིས་སྨྲལ༎ 16

དུས་ཀྱི་ས་བདག་བུ་ལ་ནི། མཆེས་གཞིན་རྗེས་སུ་གདུང་བ་ཡིས།
བློན་པོ་རྣམས་ལ་གཞོན་ནུ་ནི། དེ་དག་ཁྱེད་ལ་ཤོག་ཅེས་སྨྲས ༎ 17

བློན་པོས་དེར་སྨྲས་རྒྱལ་པོ་ལགས། དེ་དག་ཀུན་གྱི་གྲོང་མཆོག་ཐོབ།
བུ་ཚ་སྐྱེས་ཤིང་དཔལ་འབྱོར་ཆེ། སླར་ཡང་དགུག་པར་མི་ནུས་སོ ༎ 18

དེ་དག་རྣམས་ཀྱི་ཕ་ཡིས་དེར། ནུས་སམ་མི་ནུས་རྣམ་བསམས་ཚེ།
དེ་དག་ཤཱ་ཀྱའི་མིང་ཅན་གྱུར། དེ་རྣམས་རིགས་ལ་མི་ཡི་གྲོང་ ༎ 19

དེ་ཡི་རིགས་ལས་ས་སྐྱོད་ནི། སྟོང་ཕྲག་ལྔ་པ་ལྔ་འདས་ཚེ།
དཔལ་ལྡན་ས་ཡི་བདག་པོ་ནི། ཤིང་རྟ་བཅུ་པ་བྱུང་བར་གྱུར ༎ 20

དེ་ཡི་བརྒྱུད་ལ་སེང་གེ་འགྲམ། ས་ཡི་བདག་པོ་བྱུང་གྱུར་ཏེ།
གང་ཞིག་སེང་གེ་བཞིན་དུ་ནི། རྒྱལ་པོ་གླང་པོས་གཡུལ་མི་བཟློད ༎ 21

དེ་སྲས་ཕྲ་བོ་ཟས་གཙང་སྟེ། གཞན་ནི་ཟས་དཀར་དེ་ཡི་ནི།
རྗེས་སུ་སྐྱེས་བ་བྲི་བོ་ཟས། བདུད་རྩི་ཟས་ནི་གཞོན་ནུའོ ༎ 22

एकीभूय ततः सर्व्वे स्वदेशविगतस्पृहाः ।
कुमाराः कपिलाख्यस्य महर्षेराश्रमं ययुः ॥ १५ ॥

ध्यानकालान्तरायाणां बाल्यादुच्चैः प्रलापिनाम् ।
सोऽन्यच निर्ममे तेषां पुरं कपिलवास्त्विति ॥ १६ ॥

कालेन पुत्रवात्सल्यादनुतापेन भूपतिः ।
आनीयन्तां कुमारास्ते सचिवानित्यभाषत ॥ १७ ॥

तमूचु र्मन्त्रिणः सर्व्वे राजन् प्राप्तपुरोत्तमाः ।
प्रत्यानेतु मशक्यास्ते जातापत्यपृथुश्रियः ॥ १८ ॥

इति तेषां पितु स्तत्र शक्याशक्यविचिन्तने ।
बभूवुः शाक्यसंज्ञास्ते नृपुरस्तेषु वंशकृत् ॥ १९ ॥

तद्वंशेषु पञ्चपञ्चसहस्रेषु महीभुजाम् ।
अतीतेषु क्षितिपतिः श्रीमान् दशरथोऽभवत् ॥ २० ॥

तस्यान्वये सिंहहनु र्बभूव पृथिवीपतिः ।
न रणे सिंहमिव यं सेहिरे राजकुञ्जराः ॥ २१ ॥

ज्येष्ठः शुद्धोदनस्तस्य सुतः शुक्लोदनः परः ।
द्रोणोदनस्तदनुजः कनीयानमृतोदनः ॥ २२ ॥

སྲུ་མོ་བཞི་སྟེ་གཙང་ཞེས་དང་། དཀར་བྲེ་བདུད་རྩི་དེ་བཞིན་ནོ།
ཟས་གཙང་སྲས་ནི་བཅོམ་ལྡན་འདས། དེ་བཞིན་གཞན་ནི་དགའ་བོ་འོ།། 23

དེ་ནས་ཟས་དཀར་སྲས་གཉིས་ནི། སྐར་རྒྱལ་ཞེས་དང་བཟང་ལྡན་ནོ།
བྲེ་བོ་ཟས་ཀྱི་སྲས་གཉིས་ནི། མ་འགག་དེ་བཞིན་ཆེན་པོ་འོ།། 24

ཀུན་དགའ་བོ་དང་ལྷས་སྦྱིན་ཞེས། བྲ་བ་བདུད་རྩི་ཟས་ལ་འབྱུངས།
ལེགས་པར་རབ་རྟོགས་གཙང་མའི་སྲུ། དཀར་མོ་འི་སྲུ་ནི་འཕྲེང་བ་ཅན།། 25

བཟང་པོ་བྲེ་བོ་མ་ཡི་སྲུ། ཡངས་པ་ཅན་ཡང་བདུད་རྩིའི་སྲུ།
གང་ལ་རིགས་ནི་རབ་གནས་པ། སྒྲ་གཅན་འཛིན་ནི་བཅོམ་ལྡན་སྲས།། 26

ཞེས་པ་རབ་གསལ་ཡེ་ཤེས་རང་བཞིན་དེས།
རིགས་ནི་ཇི་ལྟར་བཤད་བཞིན་ཐོས་གྱུར་ནས།
མཆོག་གྱུར་ཁྲིད་པར་དག་པ་ཤཱ་ཀྱ་རྣམས།
བཅོམ་ལྡན་མཐུ་ཡིས་རབ་ཏུ་བྱུངས་པར་གྱུར།། 27

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཤཱ་ཀྱ་བྱུང་བའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་ཙ་དྲུག་པའོ།།

कन्यास्वतस्रः शुद्धाख्या शुक्ला द्रोणामृता तथा ।
शुद्धोदनस्य भगवान् सूनु र्नन्द स्तथापरः ॥ २३ ॥

शुक्लोदनस्य तनयौ द्वौ तिष्याख्योऽथ भद्रिकः ।
द्रोणोदनस्य द्वौ पुत्रावनिरुद्धो महांस्तथा ॥ २४ ॥

आनन्ददेवदत्ताख्यावमृतोदनसम्भवौ ।
शुद्धासुतः सुप्रशुद्धः शुक्लासूनुश्च मालिकः ॥ २५ ॥

द्रोणापुत्रश्च भद्राणि वैशाल्याख्योऽमृतासुतः ।
राहुलो भगवत्सूनु र्यस्मिन् वंशः प्रतिष्ठितः ॥ २६ ॥

इत्युज्ज्वलज्ञानमयेन तेन
वंशं यथावत् कथितं निशम्य ।
शाक्या बभूवु र्भगवत्प्रभावैः
सम्भावितोत्कर्षविशेषशुद्धाः ॥ २७ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शाक्योत्पत्तिर्नाम षड्विंशः पल्लवः ॥

ཡལ་འདབ་ཉི་ཤུ་རྩ་བདུན་པ།

གོས་དག་གླ་རྩིའི་དྲི་ངད་ལྡན་པ་བཞིན།
སྐྱེས་བུ་སྙིང་སྟོབས་དབེན་པའི་གཉེན་ལྡན་པ།
བསོད་ནམས་ཉེ་བར་རྫོགས་པའི་མཐུ་ཆེན་གང་།
ཅི་ཡང་དེ་ནི་ཡུས་བརྒྱར་མེད་མི་འགྱུར། 1

གྲོང་ཁྱེར་རྒྱལ་པོ་འི་ཁབ་ཀྱི་ནི། འོད་མའི་ཚལ་གྱི་ནགས་ནང་ན།
སྙིག་ཆགས་འགྲོ་ཀུན་ཡོངས་གདུང་ལ། རྒྱལ་བ་ཐུགས་རྗེའི་མཚོ་བཞུགས་ཚེ། 2

གང་གི་ནོར་གྱིས་ནོར་སྦྱིན་ནི། ནོར་གྱི་དྲེགས་པས་ཡོང་བ་འཕྲོག།
དཔལ་ལྡན་གྲུ་འཛིན་ཞེས་བྱ་བ། ས་བདག་ཙམ་པར་བྱུང་བར་གྱུར། 3

དེ་ཡི་བུ་ནི་བཙས་གྱུར་པ། ཡིད་ལ་རེ་བ་བརྒྱ་ལྡན་པའོ།
ནོར་རྣམས་འདོད་པས་ཐོབ་པ་ཡི། རྣམ་པར་འབྱོར་བ་བདེ་བའི་གྲོགས། 4

གྲོ་བཞིན་དག་ལས་སྐྱེས་གྱུར་ཅིང་། བུ་སྐྱེས་པ་ཡི་ཚེ་ན་དེ།
དགའ་བས་བྱེ་བ་ཉི་ཤུ་ནི། དབུལ་པོ་ལ་བྱིན་གང་གི་ཚེ། 5

གྲོ་བཞིན་བྱེ་བ་ཉི་ཤུ་ཞེས། དེ་ཚེ་བྱིས་པ་དེ་གྲགས་གྱུར།
གང་གིས་རིགས་ནི་རྣམ་བརྒྱན་པ། ལེགས་བྱས་ཀྱིས་ནི་འཁོར་བ་བཞིན། 6

सप्तविंशः पल्लवः ।

स कोऽपि सत्त्वस्य विवेकबन्धोः
पुण्योपसन्नस्य महान् प्रभावः ।
नापैति यः कायशतेषु पुंसः
कस्तूरिकामोद इवांशुकस्य ॥ १ ॥

जिने सर्व्वजगज्जन्तुसन्तापकरुणाह्रदे ।
पुरे राजगृहे वेणुवनान्तर्विहारिणि ॥ २ ॥

श्रीमानभुद् भूमिपति श्चम्पायां पोतलाभिधः ।
जहार धनदर्प्पान्ध्यं धनेन धनदस्य यः ॥ ३ ॥

अजायत सुतस्तस्य मनोरथशतान्वितः ।
धनाना मीप्सितावाप्त्यै सुखसख्यो विभूतयः ॥ ४ ॥

श्रवणर्क्षेण जातस्य स सूनो स्तस्य जन्मनि ।
प्रीत्या ददौ दरिद्रस्य कोटीनां विंशतिं तदा ॥ ५ ॥

स श्रोणकोटीविंशाख्यः शिशुः ख्यात स्तदाभवत् ।
विभवः सुकृतेनैव येन वंशो विभूषितः ॥ ६ ॥

ནོར་རྣམས་ཀུན་དང་ལྡན་ཅིག་དུ། རིག་པ་ཐོབ་ཅིང་འཕེལ་བར་གྱུར།
ཕ་ཡི་ལུགས་རྣམས་བཟུང་བ་ཡིས། བདེ་བ་ཉིད་དུ་ངལ་གསོ་བྱས།། 7

ནམ་ཞིག་ཉི་མའི་དཀྱིལ་འཁོར་ལས། ཉི་མའི་ཚོགས་བཞིན་མདུན་དུ་ནི།
མོ་གལ་གྱི་བུ་བབས་ནས། འདོས་པ་ལ་ནི་དེ་ཡིས་སྨྲས།། 8

ཕྱོགས་མཚམས་རབ་ཏུ་གསལ་བྱེད་པ། ཉི་མ་འདྲ་བ་ཁྱོད་ནི་སུ།
སྐབས་གསུམ་དབང་ངམ་རི་བོང་ཅན། ལྷ་འམ་ནོར་གྱི་དབང་པོ་འམ།། 9

དེ་ལ་དེས་སྨྲས་བདག་ནི་ལྷ། མ་ཡིན་སངས་རྒྱས་བཅོམ་ལྡན་འདས།
ཡོན་ཏན་དཔལ་ལྡན་ལྷ་དབང་གིས། ཕྱག་བྱེད་དག་གི་སློབ་མ་ཡིན།། 10

ཐུབ་ཆེན་དེ་ལ་ཁྱོད་ཀྱིས་ནི། དྲི་མེད་བསོད་སྙོམས་རབ་ཏུ་སྩོལ།
སྙིང་སྟོབས་དག་ཅིང་རྒྱས་པ་ལས། ཐོབས་པའི་ལོངས་སྤྱོད་བཅོམ་ལྡན་མཉེས།། 11

ཞེས་པ་བཅོམ་ལྡན་འདས་ཀྱི་མཚན། གྲོ་བཞིན་རྣ་བར་སོང་བ་ཡིས།
ཉི་མ་ལ་གྲུས་རིགས་ཡིན་ཀྱང་། སྤྲོ་ལོང་རབ་ཏུ་རྒྱས་པར་གྱུར།། 12

སྔོན་སྐྱེའི་བག་ཆགས་ཀྱིས་སྦྱར་བའི། རང་བཞིན་གང་ལ་གང་གནས་པ་ནི།
དེ་ལ་དེ་ནི་བརྗོད་པས་ཀྱང་། གསལ་བ་ཉིད་དུ་རྟོགས་པར་གྱུར།། 13

དེ་ཡིས་དེ་ལ་ཆོས་པའི་སྣོད། མཐོ་རིས་སྐྱེ་བོ་ལ་འདྲིས་པ།
ཉི་ཤུ་གྲུས་པས་ཆགས་པ་དང་། དད་ལྡན་སེམས་ཀྱི་རབ་ཏུ་བསྐུར།། 14

प्राप्तविद्यः स सर्व्वार्थैः सह वृद्धि मुपागतः ।
चकार सुखविश्रान्तिं व्यवहारधरः पितुः ॥ ७ ॥

स कदाचित् प्रभापुञ्जमिव सूर्य्यस्य मण्डलात् ।
अवतीर्णं पुरप्राप्तं मौद्गल्यायन मब्रवीत् ॥ ८ ॥

को भवानर्कसंकाशः प्रकाशितदिगन्तरः ।
त्रिदशेशः शशाङ्को वा देवो वा द्रविणेश्वरः ॥ ९ ॥

स तं बभाषे न सुरः शिष्यो भगवतस्त्वहम् ।
बुद्धस्य विबुधाधीशवन्द्यमानगुणश्रियः ॥ १० ॥

स्वच्छं तस्य प्रयच्छन्तं पिण्डपातं महामुनेः ।
सत्त्वशुद्धोदयावाप्तं भोग्यं भगवतः प्रियम् ॥ ११ ॥

इति श्रोणस्य भगवन्नाम्ना श्रवणगामिना ।
रविभक्तस्य जात्यापि रोमाञ्चः समजायत ॥ १२ ॥

प्राग्जन्मवासनायुक्तः स्वभावो यस्य यः स्थितः ।
स तस्योदीरणेनापि स्फुट एव विभाव्यते ॥ १३ ॥

स तस्मै विंशतिस्थालीभागं नाकजनोचितम् ।
प्राहिणोद्भक्तिसंसक्तश्रद्धायुक्तेन चेतसा ॥ १४ ॥

དེ་ནས་གྲུམ་པས་ཕུན་ཚོགས་དེས། སྦྱིངས་པ་དེ་དག་མཐའ་དག་ནི།
ལྷག་པར་ཐེམས་སུ་འཛིན་བརྩོན་པའི། བཅོམ་ལྡན་རང་གིས་བཞེས་པར་གྱུར། ||15

གནས་སྐབས་དེར་ནི་གྲུམ་པ་ཡིས། རྒྱལ་པོ་གཟུགས་ཅན་སྙིང་པོ་ནི།
མི་བདག་ལ་འོས་ཚོས་པའི་སྣོད། རང་གིས་བཟུང་ནས་བྱུང་བར་གྱུར། ||16

གྲོ་བཞིན་གྱིས་སྦྱིངས་ཡོངས་སྤྱོད་ཀྱི། རྡི་བཟང་དེར་ནི་ས་བདག་གིས།
ཚོར་ནས་བརྒྱ་བྱིན་གྱིས་སྦྱིངས་པ། ཐམས་ཅད་མཆོག་ལྡན་ཡིན་པར་བསམས། ||17

ལྷུང་བཟེད་ལྷག་མ་བཅོམ་ལྡན་གྱིས། བྱིན་ནས་ས་ཡི་བདག་པོ་ལྟུངས།
ཟས་དེ་གྲོ་བཞིན་གྱིས་སྦྱིངས་པར། ཐོས་ནས་ཡ་མཚན་འཛིན་པར་གྱུར། ||18

དེ་ནས་མི་དབང་བཅོམ་ལྡན་ལ། ཕྱག་འཚལ་རྒྱལ་པོའི་ཕོ་བྲང་དུ།
རབ་དུ་སོང་སྟེ་གྲོ་བཞིན་གྱིས། ཕུན་ཚོགས་མཆོག་དུ་རྒྱས་པར་བསམས། ||19

རང་ཉིད་དེ་ནི་ལྷ་རུ་འགྲོ། གྲགས་ཆེན་དེ་ནི་བལྟ་བར་འོས།
ཀློན་བཅས་ད་ལྟར་ངེས་བྱས་ནས། དེ་ཡིས་བགྲོད་པ་རྩོམ་པར་བསྟན། ||20

ས་བདག་རང་ཉིད་འོང་བར་ནི། བརྩོན་པ་ལུགས་ཤེས་གྲུ་འཛིན་གྱིས།
ཤེས་ནས་དབེན་པ་དག་དུ་བྲུ། གྲོ་བཞིན་ཀྱི་བ་ལ་སྐྲུས་བྲ། ||21

མི་བདག་རིགས་ཀྱི་རྗེན་པའི་ཟླ། བྲུ་ཁྱོད་ལྷ་རུ་འོང་ཞེས་པ།
འདི་ནི་མཆོག་དང་ཁྱད་པར་ ུ། སྐྱོན་དང་བཅས་པར་བདག་གིས་རྟོགས། ||22

ततस्तं प्रेषितं तेन भगवान् भक्तिसंसदा ।
अनुग्रहाग्रहव्यग्रः समग्रं स्वयमग्रहीत् ॥ १५ ॥

अस्मिन्नवसरे भक्त्या स्थालीभागं नृपोचितम् ।
समादाय स्वयं राजा विम्बिसारः समाययौ ॥ १६ ॥

श्रोणप्रहितभोगाना मामोद न्तत्र पार्थिवः ।
आघ्राय शक्रप्रहितं सर्व्वं दिव्य ममन्यत ॥ १७ ॥

पात्रशेषं भगवता दत्त मास्वाद्य भूपतिः ।
श्रोणेन प्रेषितं श्रुत्वा तदनु विस्मयं ययौ ॥ १८ ॥

भगवन्तं प्रणम्याथ राजधानीं नरेश्वरः ।
प्रविश्याचिन्तयत् स्फीतां दिव्यां श्रोणस्य सम्पदम् ॥ १९ ॥

गच्छामि तं स्वयं गत्वा द्रष्टव्योऽसौ महायशाः ।
इति निश्चित्य सचिवैः स यात्रारम्भ मादिशत् ॥ २० ॥

पोतलः क्षितिपं ज्ञात्वा स्वयमागमनोद्यतम् ।
नीतिज्ञं पुत्र मेकान्ते श्रोणकोटी मभाषत ॥ २१ ॥

पुत्र त्वां द्रष्टु मायाति वर्णाश्रमगुरुर्न्नृपः ।
इत्येष भृश मुत्कर्षः सदोषः प्रतिभाति मे ॥ २२ ॥

ས་དབང་མཆོག་ཆ་ཉིད་གྱུར་ན། ཀ་ཤེགས་པ་སྤྱོར་བར་བརྩོན་པ་ཡང་།
ཐོག་པ་མེད་པར་འཛོམས་གྱུར་ཏེ། རྒྱུད་ལས་འཕོས་པའི་མདའ་བཞིན་ནོ༎ 23

ཤིན་དུ་ཁེངས་པ་གཡོག་རྣམས་ཀྱི་འདང་། དགག་པོ་འོས་སུ་གྱུར་ཤིན་ན།
མངོན་པར་ཁེངས་པ་གཅིག་བུ་ཡི། ས་ཡི་བདག་པོ་སླར་ཡང་ཅི༎ 24

གཟུགས་དང་ན་ཚོད་སྐལ་བཟང་དང་། མཐུ་དང་འབྱོར་པ་ཐོས་པ་ལ།
འགྲན་ལས་རང་གི་བུ་དག་ཀྱང་། ཁྱད་འཕགས་སྐྱེ་བོས་མི་བཟོད་དོ༎ 25

སྣང་བའི་རང་བཞིན་སྐྱེ་བོ་ལ། ཡོན་དན་བསྒྲིབས་པས་འཚོ་བྱ་བྱ།
ཡོན་དན་བསྒྲིབས་པའི་པདྨ་ནི། ཚ་ཟེར་ཅན་གྱི་ཡིད་དུ་འོང་༎ 26

འཕྱུར་བ་སྲུ་ཡིས་སྣང་བྱ་མིན། རབ་དུང་སྲུ་ཡིས་སྙིང་སྡུག་མིན།
ལྡོན་པ་རེངས་པ་ཆླུང་གིས་སྐྱེལ། རང་དུ་ཉུང་པ་སྲུང་བར་བྱེད༎ 27

མངོན་པར་འགྲོ་འོས་ས་སྐྱོང་དེ། གལ་དེ་ཁྱོད་ཅན་རང་ཉིད་འོངས།
དེ་ལ་ཁྱོད་ཟེགས་རྫོངས་པ་འདི། དགེ་ལེགས་སླད་དུ་མི་འགྱུར་རོ༎ 28

དེ་སྐད་འདི་ནས་རང་སོང་སྟེ། རྒྱུ་སྐར་ཕྱུང་པོ་དང་མཚུངས་པའི།
དོ་ཤལ་སྐྲིས་སུ་བྱིན་ནས་ནི། ཕྱག་འོས་གཙོ་ལ་ཕྱག་འཚལ་བྱེས༎ 29

ཞེས་པ་ཕ་ཡི་ཚིག་ཐོས་ནས། གྲོ་བཞིན་བྱེ་བ་རིན་ཅེན་གྱིས།
རྣམ་པར་བརྒྱན་པའི་གྲུ་ཞེན་དེ། ས་ཡི་བདག་པོ་ལྷ་རུ་སོང་༎ 30

क्षितीशा लक्षतां यातं पक्षपातोद्यता इव ।
अविलम्बित माघ्नन्ति शरा इव गुणच्युताः ॥ २३ ॥

भृत्यानामपि विद्वेष्यो भवत्यतिशयोन्नतिः ।
अभिमानैकसाराणां किं पुनः पृथिवीभुजाम् ॥ २४ ॥

रूपे वयसि सौभाग्ये प्रभावे विभवे श्रुते ।
स्वसुतस्यापि संघर्षात् नोत्कर्षं सहते जनः ॥ २५ ॥

जने द्वेषमये पुत्र गुणमाच्छाद्य जीव्यते ।
आच्छादितगुणः पद्मः प्रियस्तीक्ष्णरुचेरपि ॥ २६ ॥

उद्धतः कस्य न द्वेष्यः प्रणतः कस्य न प्रियः ।
द्रुमं पातयति स्तब्धं नम्रं रक्षति मारुतः ॥ २७ ॥

स चाभिगम्यो भूपाल स्त्वां यदि स्वयमेष्यति ।
तद्देष दर्पमोहस्ते श्रेयसे न भविष्यति ॥ २८ ॥

तस्मादितः स्वयं गत्वा प्रणम्यं प्रणम प्रभुम् ।
नक्षत्रराशिसदृशं दत्त्वा हारमुपायनम् ॥ २९ ॥

पितुः श्रुत्वेति वचनं श्रोणकोटी महीपतिम् ।
प्रययौ नावमारुह्य द्रष्टुं रत्नविभुषितः ॥ ३० ॥

རྒྱལ་པོ་འདི་ཡོ་བྲང་སོང་ནས་དེས། ཕྲད་ཅིང་མཐོང་ནས་རྒྱལ་པོ་ལ།
ཕྱག་འཚལ་དོ་ཤལ་དེ་ལ་ཕུལ། དཔལ་ནི་དགའ་ནས་དགོད་པ་བཞིན॥ 31

མི་བདག་མཛའ་བའི་སྤྱན་གྱིས་ནི། ཀུང་པ་གསེར་གྱི་པ་སྤུ་མཚན།
རང་ཉིད་འོངས་པ་དེ་མཐོང་ནས། ཡ་མཚན་ལས་ནི་འདི་སྐད་སྨྲས॥ 32

ཀྱེ་མ་བསོད་ནམས་མཐུ་ཆེན་ལྡན། གང་དང་ཕྲད་པ་ཙམ་ཉིད་ན།
སེམས་ཀྱི་སྤྱོད་ཚུལ་རབ་དང་བ། སེམས་ཅན་གཉེན་ཁྱོད་ཅི་ཞིག་གོ॥ 33

ཡོན་དན་ལས་ནི་དབང་ཕྱུག་མཆོག། དབང་ཕྱུག་ལས་ནི་བདེ་བ་མཆོག།
བདེ་བ་ལས་ནི་ནད་མེད་མཆོག། ནད་མེད་ལས་ནི་ལེགས་པའི་གྲོགས॥ 34

དགེ་བ་ཁྱོད་ཀྱིས་བཅོམ་ལྡན་འདས། འོད་མའི་ཚལ་ན་ཅང་མཐོང་ངམ།
དེ་ཡི་ཞབས་པད་ཟུང་དག་ལ། བལྟ་བར་འོས་པ་བདག་འདོད་དོ॥ 35

སྐྱེ་བོ་ལེགས་ལས་ཕྱོགས་ལྡང་བ། ས་ཡི་མགོན་པོས་འདི་བརྗོད་ཆེ།
གྲོ་བཞིན་བྲི་བ་ཉི་ཤུས་ཀྱང་། གུས་པས་དེ་དག་ལ་སྨྲས་པ॥ 36

ལྷ་གཅིག་ཁྱོད་ཀྱི་བཀའ་དྲིན་ནི། མཚུངས་མེད་དགེ་བ་འདི་ཉིད་ལས།
ད་ལྟ་བདག་གིས་བཅོམ་ལྡན་ནི། བལྟ་བར་རིགས་པ་ཉིད་དུ་གྱུར॥ 37

ཞེས་བརྗོད་དེ་དང་ལྷན་ཅིག་ཏུ། ལུགས་ལ་མཁས་པ་ས་ཡི་བདག།
གུས་པས་དེ་བཞིན་གཤེགས་པ་ནི། བལྟ་རུ་ཀུང་པ་ཉིད་ཀྱིས་སོང་॥ 38

स राजधानीमासाद्य प्राप्य दृष्ट्वा च भूपतिम् ।
ददौ हारं प्रणम्यास्मै हर्षहासमिव श्रियः ॥ ३१ ॥

तं दृष्ट्वा स्वयमायातं नृपतिः स्निग्धया दृशा ।
हेमरोमाङ्कचरणं विस्मयादित्यभाषत ॥ ३२ ॥

अहो पुण्यमहेशाख्यः कोऽपि त्वं सत्त्वबान्धवः ।
यस्य संदर्शनेनैव मनोवृत्तिः प्रसीदति ॥ ३३ ॥

गुणेभ्यः परमैश्वर्यमैश्वर्यात् सुखमुत्तमम् ।
सुखेभ्यः परमारोग्य मारोग्यात् साधुसङ्गमः ॥ ३४ ॥

अपि दृष्टस्त्वया साधो भगवान् वेणुकानने ।
तत्पादपद्मयुगलं द्रष्टुमर्हसि मे मतः ॥ ३५ ॥

इत्युक्ते क्षितिनाथेन सौजन्यात् पक्षपातिना ।
तं श्रोणकोटीविंशोऽपि प्रणयात् प्रत्यभाषत ॥ ३६ ॥

अस्मादतुल्यकल्याणात् प्रसादाद्देवदेव ते ।
अधुना योग्यता याता भगवद्दर्शने मम ॥ ३७ ॥

इत्युक्ते तेन सहितः प्रतस्थौ स्थितिकोविदः ।
भक्त्या तथागतं द्रष्टुं पद्भ्यामेव महीपतिः ॥ ३८ ॥

གྲོ་བཞིན་སྐྲིས་པའི་ཉིན་པར་ནས། ས་ལ་མ་རེག་རྐང་པ་ཡིས།
འགྲོ་ཚོ་གསོག་པོས་ཆེན་པོ་ལ། འོས་མའི་གོས་ཀྱིས་ས་གཞི་གཡོགས།། 39

བཅོམ་ལྡན་ལ་གུས་དུལ་བ་དང་། ས་བདག་ལ་ཡང་རྗེས་སུ་ལས།
ངོ་ཚ་བཞིན་དུ་གཡོག་རྣམས་ཀྱི། ས་ལ་གོས་ནི་འགེབས་པ་ཟློག། 40

དེ་ནས་གོས་ནི་ཟློག་པའི་ཚེ། ལྷ་ཡི་གོས་ཀྱིས་ས་གཞི་གཡོགས།
བསོད་ནམས་ལྡན་པའི་ཉེར་མཁོ་རྣམས། འབད་པ་མེད་པར་ཕུན་སུམ་ཚོགས།། 41

ལྷ་ཡི་གོས་རྣམས་བཟློག་ནས་ནི། དེ་ཡིས་ས་ལ་རྐང་བཞག་ཚེ།
རི་ནགས་རྒྱ་མཚོ་དང་བཅས་པ། གཡོ་མེད་ས་གཞི་རྣམ་པར་གཡོས།། 42

དེ་ནས་ས་བདག་དང་འགྲོགས་ཏེ། རྒྱལ་བའི་གནས་སུ་ཕྱིན་པ་དེས།
བཅོམ་ལྡན་འདས་ལ་རབ་བལྟུས་ཤིང་། དེ་ཡི་ཞབས་ལ་ཕྱག་འཚལ་བྱས།། 43

དགའ་དང་ཞི་ཞིང་དབེན་ལྡན་པ། མདུན་ན་གནས་པ་དེ་ལ་ནི།
བཅོམ་ལྡན་འདས་ཀྱིས་གཟིགས་པ་ཡིས། བདུད་རྩིས་མངོན་པར
དབང་བསྐུར་མཛད།། 44

ཁམས་དང་བསམ་པ་བག་ལ་ཉལ། རང་བཞིན་དག་ཀྱང་སྤྱད་ནས་དེ།
བདེན་པ་ཡང་དག་རྟོགས་པའི་སྐད། དེ་ལ་ཆོས་ནི་བསྟན་པ་མཛད།། 45

དེ་ཡི་འཇིག་ཚོགས་ལྟ་བའི་རི། རྩེ་མོ་ཉི་ཤུ་ལྡན་པ་ནི།
ཡེ་ཤེས་རྡོ་རྗེ་དེ་ཡིས་བཅོམ། རྒྱུན་དུ་ཞུགས་པའི་གནས་ལ་རེག། 46

अस्पृष्टपादस्य भुवा श्रोणस्याजन्मवासरात् ।
महार्हवस्त्रैः प्रस्थाने भृत्यैराच्छादिता मही ॥ ३९ ॥

भगवद्भक्तिविनयाद् गौरवाच्च स भूपतेः ।
वस्त्राण्यवारयद् भृत्यै र्स्रज्जमान इव क्षितौ ॥ ४० ॥

वारितेष्वथ वस्त्रेषु दिव्यवस्त्रैर्हृता मही ।
अप्रयत्नोपकरणाः सम्पदः पुण्यशालिनाम् ॥ ४१ ॥

निवार्य्य दिव्यवस्त्राणि भूमौ तेनार्प्पिते पदे ।
विचचालाचला पृथ्वी सशैलवनसागरा ॥ ४२ ॥

ततः स भूमिपतिना सह प्राप्य जिनाश्रमम् ।
भगवन्तं विलोक्यास्या विदधे पादवन्दनम् ॥ ४३ ॥

उपविष्टस्य तस्याग्रे हृष्टस्यालोकनामृतैः ।
चक्रे शमविवेकस्य भगवानभिषेचनम् ॥ ४४ ॥

आशयानुशयं धातुः प्रकृतिञ्च विचार्य्य सः ।
सत्यसन्दर्शनायास्य विदधे धर्म्मदेशनाम् ॥ ४५ ॥

सत्कायदृष्टिशैलोऽस्य तया विंशतिशृङ्गवान् ।
ज्ञानवज्रेण निर्भिन्नः श्रोतःप्राप्तिपदस्पृशः ॥ ४६ ॥

དེ་ནས་དེ་ཡི་ལུས་ལ་ནི། རབ་བྱུང་སྐྱེས་ཚེ་མི་ཡི་བདག།
ཡ་མཚན་གྱུར་པས་བཅོམ་ལྡན་ལ། ཕྱག་འཚལ་འཕྲལ་ལ་རང་ཉིད་སོང་།། 47

གྲོ་བཞིན་བརྟུལ་ཞུགས་དྲག་ལྡན་ཡང་། བག་ཆགས་ལྷག་པའི་འདུ་བྱེད་ལས།
ནམ་ཞིག་གཉེན་དང་ལོངས་སྤྱོད་ཀྱིས། བདེ་བ་དྲན་པ་སྐྱེས་པར་གྱུར།། 48

བཅོམ་ལྡན་འཛུམ་དང་བཅས་པ་དེས། སྐྱེངས་པ་དེ་བོས་བཀའ་སྩལ་པ།
སེམས་ནི་ཀུན་དུ་ཡོངས་ཞུམ་པ། ཁྱོད་ཀྱིས་ཡོངས་སུ་རྟོག་འདི་ཅི།། 49

དྲལ་བའམ་ཤིན་དུ་དྲངས་པ་ཡི། རྒྱུད་མང་དབྱངས་དང་བྲལ་བ་ཡིན།
མཉམ་པ་ལས་ནི་སྒྲ་སྙན་འགྱུར། དེ་སྐད་མཉམ་པ་བསྟེན་པར་བྱ།། 50

ཞེས་པ་བཅོམ་ལྡན་འདས་ཀྱི་བཀས། ཕྱི་ནང་གདུང་བ་རྣམ་པར་སྤངས།
ཐམས་ཅད་ཞི་བ་ཉེ་བར་གྱུར། དེ་ཡིས་དྲི་མེད་ཡེ་ཤེས་ཐོབ།། 51

དེ་ཡི་སྐད་བྱུང་གྲུབ་པ་དེ། མཐོང་ནས་ཡ་མཚན་ཆེ་བ་ཡི།
དགེ་སློང་ཀུན་གྱིས་བཅོམ་ལྡན་ལ། དྲིས་ཤིང་དེས་ཀྱང་བཀའ་སྩལ་པ།། 52

གྲོ་བཞིན་གྱིས་ནི་དགའ་བའི་ལས། སྐྱེ་བ་གཞན་ལ་བསྒྲུབས་པ་ཉིད།
གང་ཕྱིར་བསོད་ནམས་མིན་པ་ཡི། མཐུ་ལྡན་སྐད་བྱུང་ཕུན་ཚོགས་མིན།། 53

སྔོན་ཚེ་ཡང་དག་རྫོགས་སངས་རྒྱས། བཅོམ་ལྡན་བདེ་གཤེགས་རྣམ་པར་གཟིགས།
གཅིག་ལྡན་ཞེས་པའི་གྲོང་ཁྱེར་དུ། ལྷོངས་ནི་རྒྱུ་ཞིང་གཤེགས་པར་གྱུར།། 54

प्रव्रज्यायां ततस्तस्य जातायां सहसा स्वयम् ।
भगवन्तं प्रणम्याथ विस्मितः प्रययौ नृपः ॥ ४७ ॥

तीव्रव्रतेऽपि श्रोणस्य कदाचित् समजायत ।
वासनाशेषसंस्काराद् बन्धुभोगसुखस्मृतिः ॥ ४८ ॥

स तमाहूय भगवान् विलक्षं प्राह सस्मितः ।
कोऽयं परिवितर्कस्ते प्रतिसंलीनचेतसः ॥ ४९ ॥

विश्लिष्टात्यन्तकृष्टा वा तन्त्री भवति विस्वरा ।
समा माधुर्य्यमायाति तस्मात् साम्यं समाश्रयेत् ॥ ५० ॥

इत्यादेशाद् भगवतः सर्व्वसाम्यमुपागतः ।
स प्राप विमलज्ञानं पश्चात्तापविवर्ज्जितः ॥ ५१ ॥

तस्य तामद्भुतां सिद्धिं विलोक्य पृथुविस्मयाः ।
पप्रच्छ भिक्षवः सर्व्वे भगवन्तं स चाभ्यधात् ॥ ५२ ॥

श्रोणस्य श्रूयतां श्रेयःकर्म्म जन्मान्तरार्ज्जितम् ।
नह्यपुण्यानुभावानां भवन्त्यद्भुतसम्पदः ॥ ५३ ॥

विपश्यी भगवान् सम्यक्संबुद्धः सुगतः पुरा ।
पुरीं बन्धुमतीं नाम जनचारिकया ययौ ॥ ५४ ॥

དེར་ནི་ལེགས་བྱས་གུས་པ་ཡིས། །གཟན་ལ་ཉེ་བར་མགྲོན་དུ་གཉེར། །
ཉིན་རེ་རེས་ཀྱིས་དེ་དག་གི། །ཁྱིམ་དུ་རྗེས་འབྲང་བཅས་པ་གཤེགས། ། 55

དེ་ནས་དབང་པོའི་ཟླ་ཞེས་པ། །བྲམ་ཟེའི་བུ་ནི་དབུལ་པོ་ཡི། །
རེས་ལ་བབ་ཚེ་འབད་པ་ཡིས། །དེ་ལ་འོས་པའི་བཟའ་བ་སྦྱར། ། 56

དེ་ཡི་འབད་པ་ཆེན་པོ་ཡིས། །གུས་པས་གཙང་མར་སྦྱར་བའི་ཟས། །
གོས་ཀྱི་ནོར་འཛིན་གཡོགས་བྱས་ནས། །རབ་དུ་བདུད་དེ་དེ་ལ་ཕུལ། ། 57

ལོངས་སྤྱོད་དེ་ཡི་སྨོན་ལམ་གྱིས། །གྲོ་བཞིན་བྱེ་བ་ལྷ་ལྷ་བུ། །
གསེར་གྱི་སྤྲུ་ཡི་ཁང་པ་ཅན། །ནོར་ཆེན་འདིར་ནི་དེ་གྱུར་དོ། ། 58

གོས་དང་བྲལ་བའི་ས་གཞི་ལ། །འདི་ཡིས་ནམ་ཡང་རིག་པ་མེད། །
འདི་ཉིད་ཕྱིར་ན་དེ་ཡིས་ནི། །ཁང་པས་རེག་ལ་ས་གསོས་གྱུར། ། 59

ཅེས་པ་བདེ་གཤེགས་གསུང་ནི་བ་ཏུ་ཧྲི་ལྷར་དཀར་བ། །
ཚོམས་ཀྱི་འོད་བཞིན་རབ་དུ་གསལ་བའི་རང་བཞིན་དག །
དགེ་སློང་ཚོགས་ཀྱི་ཐུགས་ནི་རྣམ་པར་མི་གཡེང་པས། །
མཆོག་དུ་འཕྲུངས་ནས་དེག་བ་བརྟན་པའི་སྐད་དུ་གྱུར། ། 60

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གྲོ་བཞིན་བྱེ་བ་ཉི་ཤུ་པའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་བདུན་པའོ། །

तत्र भक्त्या सुकृतिभि र्भक्तायोपनिमन्त्रितः ।
वारेण प्रत्यहं गेहं ययौ तेषां सहानुगः ॥ ५५ ॥

ततो दरिद्रः संप्राप्तवारो ब्राह्मणदारकः ।
इन्द्रसोमाभिधश्चक्रे यत्नात् तद्योग्यभोजनम् ॥ ५६ ॥

स प्रयत्नेन महता भोज्यं भक्तिपविचितम् ।
आच्छाद्य वस्त्रै र्वसुधां प्रहृष्टस्तस्मै न्यवेदयत् ॥ ५७ ॥

तद्भोगप्रणिधानेन जातः सोऽयं महाधनः ।
सौवर्णरोमचरणः श्रोणकोटी सुरोपमः ॥ ५८ ॥

न वस्त्ररहिता भूमिः स्पृष्टानेन कदाचन ।
कम्पस्तच्चरणस्पर्शादत एवाभवद् भुवः ॥ ५९ ॥

इति सुगतवचः सुधावदातं
दशनमयूख मिवोन्मिषत्स्वभावम् ।
प्रणिहितहृदयः परं निपीय
स्थिरकुशलाय बभूव भिक्षुसंघः ॥ ६० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
श्रोणकोटीविंशावदानं सप्तविंशः पल्लवः ॥

ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་བརྒྱད་པ།

མི་བསྐྱུན་སྐྱེ་བོ་ངན་པའི་གནོད་པ་བཟོད་པ་དཀའ་ཆེན་པོ་ཡིས།
བསམ་པ་ཆེ་རྣམས་བསམ་པ་རྣམ་པར་འགྱུར་བ་ཉིད་མ་ཡིན།
སྤྲུལ་གྱི་རབ་བསྐོར་ས་འཛིན་དག་གིས་དཀྲུགས་པར་གྱུར་མོད་ཀྱང་།
རྒྱ་མཚོ་སྙིང་ལས་བདུད་རྩིའི་རང་བཞིན་རབ་ཏུ་གཏོང་བ་མིན།། 1

སྔོན་ཆེ་གྲོང་ཁྱེར་རྒྱལ་པོའི་ཁབ། ཀ་ལན་ད་ཀའི་གནས་ཞེས་པ།
འོད་མའི་ཚལ་ནི་ཡིད་འཕྲོག་ན། བཅོམ་ལྡན་འདས་ནི་རྣམ་པར་བཞུགས།། 2

དེར་ནི་རྒྱལ་པོ་དགྲ་མང་རྣམས། རྣམ་པར་སྐྲག་བྱེད་རལ་གྲིའི་གཉེན།
གཟུགས་ཅན་སྙིང་པོ་དག་གི་བུ། མ་སྐྱེས་དགྲ་ཞེས་བྱ་བར་གྱུར།། 3

ལྷས་བྱིན་ཞེས་པ་ཤཱ་ཀྱའི་རིགས། དེ་ཡི་སྙིང་གི་གྲོགས་པོར་གྱུར།
གང་གིས་ངན་པའི་སྤྱགས་ཀྱིས་དེ། རོ་ལངས་བཞིན་དུ་དྲག་པོར་གྱུར།། 4

དེ་ཡིས་ནམ་ཞིག་ས་ཡི་བདག། མདུན་སར་བདེ་བར་འཁོད་ལ་སྨྲས།
རྒྱལ་པོ་བདག་གིས་ཁྱེད་བསྟེན་པའི། འབྲས་ནི་ད་དུང་གྲུབ་པ་མེད།། 5

བདེ་བར་ཡིད་གཅུགས་གྲོགས་དག་ནི། ཕན་ཚུན་ཡིད་ལ་རེ་བ་སྐོང་།
རྫུན་གྱིས་རིམ་གྲོ་བྲལ་བ་ལ། གྲོགས་ཀྱི་སྒྲ་ནི་རབ་ཏུ་འཇུག།། 6

अष्टाविंशः पल्लवः ।

दौर्ज्जन्यदुःसहविशालखलापकारै-
र्नैवाशये विकृतिरस्ति महाशयानाम् ।
व्यालोल्वणक्षितिभृदाकुलितोऽपि सिन्धु-
र्नैवोत्ससर्ज्ज हृदयादमृतस्वभावम् ॥ १ ॥

पुरे पुरा राजगृहे भगवान् वेणुकानने ।
कलन्दकनिवासाख्ये विजहार मनोहरे ॥ २ ॥

तत्र वित्रासितानेकशत्रुर्निस्त्रिंशबान्धवः ।
अजातशत्रुनामाभूत् विम्बिसारसुतो नृपः ॥ ३ ॥

शाक्यवंशः सुहृत् तस्य देवदत्ताभिधोऽभवत् ।
क्षुद्रमन्त्रेण यस्यासीत् स वेताल इवोत्कटः ॥ ४ ॥

स कदाचित् सुखासीनं रहः प्राह महीपतिम् ।
न राजन् फलितोऽद्यापि ममापि त्वत्समाश्रयः ॥ ५ ॥

मिथ्योपचाररहितः सुखनियन्त्रतन्त्रयोः ।
मिथो मनोरथत्राणान्मित्रशब्दः प्रवर्त्तते ॥ ६ ॥

གང་འདི་འོད་མའི་ནགས་ཚལ་ན། ཤཱ་ཀྱའི་དགེ་སློང་བདེར་གནས་པ།
དེ་བསད་ལྷ་ཡིས་ཕྱུག་བྱས་པ། དེ་ཡི་གནས་ནི་ཐོབ་པར་འདོད།། 7

གང་གིས་དགྲ་བོ་མི་ཚོམས་དང་། གང་གིས་གྲགས་པ་མི་འཐོབ་དང་།
གང་གི་ཁེངས་པ་མི་འཕེལ་བ། གྲོགས་ཀྱི་ཕུན་ཚོགས་དེ་ཡིས་ཅི།། 8

ནོར་ཆེན་ཞེས་པའི་གྲོང་ཁྱེར་ནས། དེ་ནི་ཟས་ལ་མགྲོན་དུ་གཉེར།
ཚུལ་འཆོས་ཅན་དེ་དགེ་སློང་དང་། ལྷན་ཅིག་ནང་པར་གྲོང་ཁྱེར་འོངས།། 9

རྒྱལ་པོའི་ལམ་དུ་རབ་ཞུགས་པ། དེ་ལ་གླང་ཆེན་ནོར་སྐྱོང་ནི།
ཁྲོ་བས་ལོང་བཞིན་གཏུམ་པ་དེ། མངོན་སུམ་རབ་དུ་གཏང་བར་བྱས།། 10

ལྷ་སྦྱིན་གྱིས་ནི་དེ་སྐབས་ཚེ། མི་བདག་གྲོགས་ལ་མཉེས་ག་ཤིན་པས།
སངས་རྒྱས་མཐུ་ནི་བསམས་བྱས་ནས། གདོང་སྨད་ཅི་ཡང་མི་སྨྲ་གྱུར།། 11

རྒྱལ་པོའི་གྲོགས་ཀྱིས་ངན་རྒྱུགས་པའི། ལྷ་སྦྱིན་དག་ཀྱང་ཕྱིར་བྱུང་ནས།
གླང་པོའི་གློན་པོ་ཆེན་པོ་ལ། ནོར་ཤལ་ཧྲན་པར་བྱིན་ནས་སླུས།། 12

དགེ་སློང་དགེ་སློང་བརྒྱས་བསྐོར་ནས། ནང་པར་གྲོང་ཁྱེར་འོང་པར་གྱུར།
དེ་ལ་ཁྱོད་ཀྱིས་གླང་པོ་ཆེ། གཏང་བར་བྱོས་ཤིག་ས་བདག་གསུང་།། 13

ལྷས་བྱིན་ཚིག་ཐོས་གཉིས་འཕྲུང་གི། བདག་པོས་དེ་བཞིན་ཞེས་པ་སྨྲས།
གང་ཕྱིར་ལུག་དང་སྤོངས་པའི་འཕྲེང་། གཅིག་སོང་རྗེས་སུ་ལྷུང་བ་ཉིད།། 14

य एष शाक्यश्रमणः सुखे वेणुवने स्थितः ।
तं हत्वा प्राप्तुमिच्छामि तत्पदं दैववन्दितम् ॥ ७ ॥

क्षीयते न यया शत्रु र्लभ्यते न यया यशः ।
वर्द्धते न यया मानः किं तया मित्रसम्पदा ॥ ८ ॥

महाधनाभिधानेन तत्पौरेण निमन्त्रितः ।
स पुरं प्रातरागन्ता दाम्भिकः सह भिक्षुभिः ॥ ९ ॥

राजमार्गं प्रविशतः स तस्य व्यालकुञ्जरः ।
उत्सृज्यता मभिमुखः क्रोधान्धो धनपालकः ॥ १० ॥

इत्युक्ते देवदत्तेन नृपति र्मित्रवत्सलः ।
बुद्धप्रभावं सञ्चिन्त्य नाह किञ्चिदवाङ्मुखः ॥ ११ ॥

देवदत्तोऽपि निर्गत्य राजसौहार्ददुर्मदः ।
प्राह हस्तिमहामात्रं हारं दत्वास्य तोषणम् ॥ १२ ॥

श्रमणः प्रातरागन्ता पुरं भिक्षुशतैर्वृतः ।
प्रेरणीय स्त्वया तस्मै गज इत्याह भूपतिः ॥ १३ ॥

देवदत्तवचः श्रुत्वा तथेत्यूचे द्विपाधिपः ।
श्रेणी हि मेषमूर्खाणा मेकयातानुपातिनी ॥ १४ ॥

55

ཐམས་ཅད་མཁྱེན་པས་སྡིག་ཅན་གྱི། སེམས་ཀྱི་བསམས་པ་མཁྱེན་མོད་ཀྱང་།
དགེ་སློང་ལྔ་བརྒྱ་དག་དང་ནི། ཐབས་ཅིག་ཡང་དག་ཕྱིན་པར་གྱུར།། 15

དེ་ནས་གྲོང་ཆེན་བདག་པོ་ཡི། གཉན་བསྟུན་པ་ཀྱི་གྲོང་པོ་ཆེ།
དྲག་པོ་ཁང་བཟང་རྐང་འཕྱུང་འཛོམས། ཁྲོ་བས་ལོང་བས་དེ་མདུན་བརྒྱུགས།། 16

ཡོངས་སུ་འཁྲིས་ལས་ལྷུགས་ཀྱུ་ནི། ལྟོ་བ་ཡིས་ཀྱང་དབང་མི་འགྱུར།
མི་བསྲུན་རིག་བྱེད་ལྡན་པ་བཞིན། སྣང་དང་རྒྱུགས་པས་དྲི་མར་བྱས།། 17

ལན་གཅིག་མིན་པར་རྣ་བསྐྱོད་པས། བརྡེན་པའི་གདུང་བ་ལ་ཆགས་པ།
བྱུང་བ་རྣམས་ཀྱི་སྒྲོག་འཁྲོག་བྱེད། བདག་པོ་ངན་པས་གཡོག་གི་བཞིན།། 18

ཁང་པའི་ཉེར་འཚོས་ཤིང་རྣམས་ནི། འཛོམས་པ་དེ་ཡིས་མཐོན་པར་བརྒྱུགས།
འཛིག་རྟེན་འཕྲལ་ལ་བྲོས་པའི་ཚེ། ཧཱ་ཧཱ་ཞེས་པ་ཆེན་པོ་བྱུང་།། 19

དེ་ཡི་རྣ་བར་རབ་བསྐྱོད་སྤུ་དུས་ཀྱིས་གླངས་པའི་རླུང་གི་
རབ་ཟགས་ལི་ཁྲིའི་རྒྱན་གྱི་ཚོགས།
སྦྲད་མེད་འཛིགས་པའི་སོས་དམར་ལྷུང་བ་ལྟ་བུར་སྤྲོད་
པས་རྒྱལ་པོ་འི་ལམ་ནི་ཁེངས་གྱུར་ཅིང་།
རབ་གདུམ་དབྱུག་པ་གླང་འདྲའི་སྣ་ནི་གཡབ་མོ་འི་ཚོགས་
འཕྲེད་ཕྱོགས་ཀྱི་སྦྲད་མེད་འཛིགས་པ་ཡིས།
གདུང་བར་གྱུར་པའི་ལན་བུའི་འོད་ལྟར་བྱུང་བའི་ཚོགས་
གཏིབས་རྣམ་པར་འཕྲུལ་པ་ཀུན་སྟོངས་གྱུར།། 20

གྲོང་ཁྱེར་བཅོམ་པས་རབ་གདུངས་དེ། སྐྱེ་བོ་ཀུ་ཅོས་འཁྲུགས་པའི་ཚེ།
རབ་སྨྱོས་གློ་ལྡན་ལྷས་བྱིན་ནི། བ་གམ་རྩེ་ལྡན་སྟེང་དུ་འཛེགས།། 21

ज्ञात्वापि तमभिप्रायं सर्व्वज्ञः पापचेतसाम् ।
प्रातः समाययौ सार्द्धं भिक्षूणां पञ्चभिः शतैः ॥ १५ ॥

अथ हस्तिपकोत्सृष्टः कृष्टप्रासादपादपः ।
तमभ्यधावदाविद्धः क्रोधान्धः क्रूरकुञ्जरः ॥ १६ ॥

अनायत्तः परिचयादङ्कुशस्य गुरोरपि ।
खलविद्वानिव द्वेषी मदेन मलिनीकृतः ॥ १७ ॥

सेवाव्यसनसक्तानामसत्कृत्कर्णचापलात् ।
प्राणापहारी भृङ्गाणां भृत्यानामिव दुष्पतिः ॥ १८ ॥

मन्दरोपद्रवे तस्मिन् द्रुमद्रोहिण्यभिद्रुते ।
विद्रुते सहसा लोके हाहाकारो महानभूत् ॥ १९ ॥

तस्याश्चत्कर्णतालानिलतुलितसरत्सान्द्रसिन्दूरपूरैः
संपूर्णे राजमार्गे च्युतचकितवधूरक्तवस्त्रासमानैः ।
उद्दण्डोच्चण्डशुण्डभ्रमणरवलसत्साध्वसायासिताशा
व्यालोलालकाभ भ्रमरमिलद्विभ्रमः संभ्रमोऽभूत् ॥ २० ॥

पुरप्रमाथव्यथिते जने कोलाहलाकुले ।
आरुरोह महाहर्म्यं देवदत्तः प्रमत्तधीः ॥ २१ ॥

དེ་ནི་བཅོམ་ལྡན་འཛིན་པ་ལ། མཆོག་དུ་བལྟ་ནི་འདོད་པར་གྱུར།
ཡོན་ཏན་ཅན་རྣམས་རབ་བཅོམ་པས། གདུམ་པོ་དག་ནི་ཡོངས་སྲུ་ཆེམ།། 22

དེར་ནི་གླང་པོས་རབ་སྐྲག་ནས། དགེ་སློང་ཐམས་ཅད་བྲོས་པའི་ཚེ།
དགེ་སློང་ཀུན་དགའ་གཅིག་བུ་ཉིད། བཅོམ་ལྡན་འདས་ཀྱིས་ཉེ་འཁོར་གྱུར།། 23

བཅོམ་ལྡན་འདས་ཀྱི་ཕྱག་ལས་དེར། གདོང་ལྔ་ལྡན་པ་ལྔ་འཐོན་ཏེ།
འཇིགས་སུ་རུང་བའི་རལ་པ་ཅན། དེ་ཡི་སེན་མོ་འི་འོད་ཚོགས་བཞིན།། 24

དྲེགས་པའི་རྗེད་བྱེད་གློག་བྱེད་པ། དེ་ཡི་དྲི་ཚོར་གཉིས་འཕྲུང་ནི།
ཆུ་དང་གཅི་བ་ཟག་བྱེད་ཅིང་། འཕྲལ་ལ་ཉིད་དུ་ཕྱིར་ཕྱོགས་གྱུར།། 25

སོ་ལྡན་དྲེགས་པས་དབུལ་བ་ཉིད། ཐོབ་ཅིང་མགྱོགས་པས་བྲོས་པས་དེར།
ཕྱོགས་བཅུ་རྣམས་ནི་སྨིག་བྱེད་ཀྱིས། རབ་དུ་འབར་བ་མཐོང་བར་འགྱུར།། 26

དེ་ཡིས་འགྲོ་བ་མི་འབར་ཞིང་ འབར་བའི་དྲ་བས་དཀྲིགས་མཐོང་ནས།
སྟོན་པའི་ཞབས་ཀྱི་པདྨའི་དྲང་། བསིལ་བ་དག་དུ་ཉེ་བར་སོང་།། 27

སྨྲིད་པ་སྦྱོན་ཞམས་ཡིད་ནི་བསམ་གཏན་བཞིན་གྱི་མཛེས་པ་
རབ་དུ་ཉམས་གྱུར་ཅིང་།
ཉེན་མོངས་དྲི་བའི་དབུགས་ཐོད་དེ་ཡི་ལག་པ་ཆགས་པས་
ཡོང་བ་དག་གིས་ནི།
མང་དུ་མཛད་པ་རྩམ་བཞིན་བཀྲིན་པ་ཉེར་གནས་སྤྲིན་པས་
དམན་པའི་སྣང་རྩི་འཕྲུངས།
ཙ་ཙོ་སྐྲིག་པར་སོང་ཞིང་ཡོངས་གཡུངས་དམན་པར་སོང་
སྤྱི་ཁྲར་ལྷར་སྤྲོད་པར་གྱུར།། 28

भगवद्वहणं द्रष्टुं सोऽभवद्भृशमुत्सुकः ।
उन्मूलनेन गुणिनां मातङ्गः परितुष्यति ॥ २२ ॥

विद्रुतेषु गजत्रासात् तेषु सर्व्वेषु भिक्षुषु ।
आनन्द एक एवाभूत् भिक्षु र्भगवतोऽन्तिके ॥ २३ ॥

तत्र पञ्चाननाः पञ्च निर्ययु र्भगवत्करात् ।
करालकेशरसटा स्तन्नखांशुचिता इव ॥ २४ ॥

द्विप स्तज्जन्ध माघ्राय दर्प्पापस्मारवारणम् ।
अभूत् स्रुतशकृन्मूत्रः सहसैव पराङ्मुखः ॥ २५ ॥

जवेन विद्रुत स्तत्र दन्ती दर्प्पदरिद्रताम् ।
प्राप्तः प्रदीप्तदहनाः स ददर्श दिशो दश ॥ २६ ॥

स विलोक्य जातवह्निज्वलज्ज्वालाकुलं जगत् ।
पादपद्मान्तिकं शास्तुः शीतलं समुपाययौ ॥ २७ ॥

संकोचाभिरुचेः सचिन्तमनसः प्रध्वस्तवक्त्रद्युते-
र्दैन्यापन्नविहीनदानमधुपप्रारब्धकोलाहलः ।
लोभान्धस्य महाव्ययोत्सव इव क्लेशोष्मनिश्वासिन-
स्तस्याभूत् परितापनिश्लथगते र्भारायमाणः करः ॥ २८ ॥

སྟོན་པ་ཐུགས་རྗེའི་རྒྱ་མཚོ་ཡི། ཞབས་ཀྱི་དྲུང་དུ་འོངས་གྱུར་ཅིང་།
འཇིགས་པ་དེ་ལ་འཁོར་ལོ་དང་། བཀྲ་ཤིས་ཀྱིས་མཚན་ཕྱག་གིས་རེག། 29

ཐུམ་པར་ཕྱག་བཀོད་དེ་ལ་ནི། བཅོམ་ལྡན་རྒྱལ་བས་བཀའ་སྩལ་པ།
གནས་སྐབས་དམན་པ་འདི་ཉིད་བུ། རང་ལས་ཉིད་ཀྱིས་ཐོབ་པ་ཡིན།། 30

ཁྱོད་ལུས་ཤ་ཡི་རི་བ་ནི། དབེན་པའི་སྣང་བ་དག་གི་སྒྲིན།
རྨོངས་པའི་ཚོགས་ཀྱིས་ཁྲར་གྱུར་པ། སྡིག་པས་མཆོག་དུ་བསྐྲུན་པ་ཡིན།། 31

བཅོམ་ལྡན་སྙིང་རྗེས་བརླན་པས་འདི། བརྗོད་ཆོ་འཇིགས་པའི་གླང་པོ་དེ།
ཡིད་བརྟན་ཐོབ་ནས་གདགས་ཐག་གིས། བདག་བཞིན་གཡོ་མེད་ཉིད་དུ་གྱུར།། 32

ལྷས་བྱིན་གྱི་ནི་བརྟག་པ་དང་། གླང་པོ་དྲག་པོ་ཆེན་པོ་ཡང་།
ཉམས་ཆོ་གེགས་མེད་དགའ་བ་ཡིས། སྐྱེ་བོ་ཡ་མཚན་སྐྱེས་པར་གྱུར།། 33

དེ་ནས་ཁྱིམ་བདག་ཁྱིམ་དུ་ནི། ཟས་ནི་རབ་དུ་བླང་མཛོད་ནས།
དགེ་སློང་དག་དང་ཐབས་ཅིག་དུ། བཅོམ་ལྡན་ནགས་སུ་གཤེགས་བརྩོན་གྱུར།། 34

གླང་པོ་འི་དབང་ཡང་མགོན་བཏུད་དེ། རྒྱལ་བའི་ཞབས་ཀྱི་པདྨ་ལ།
ལག་པས་རེག་པར་བྱས་ནས་ནི། གླང་པོས་ལུས་ནི་བཏང་བར་གྱུར།། 35

རྒྱལ་ཆེན་བཞི་པའི་ལྷ་དག་དུ། ཉེ་བར་འཁྲུངས་ཤིང་མཛེས་པ་ནི།
དྲི་མ་མེད་དེ་འཕྲུལ་ཉིད་ལ། བདེ་བར་གཤེགས་པ་ལྷ་རུ་འོངས།། 36

तं पादमूलमायान्तं भीतं कारुण्यसागरः ।
शास्ता करेण पस्पर्श चक्रस्वस्तिकलक्षणा ॥ २९ ॥

कुम्भविन्यस्तहस्त स्तं प्रोवाच भगवान् जिनः ।
पुत्र स्वकर्म्मणैवेमां प्राप्तोऽसित्वमिमां दशाम् ॥ ३० ॥

विवेकालोकजलदः कायोऽयं मांसभूधरः ।
भारस्ते मोहसम्भारः पापादुपनतः परः ॥ ३१ ॥

इत्युक्ते करुणार्द्रेण भीतो भगवता गजः ।
स लब्धश्वास माश्वानलीनो निश्चलतां ययौ ॥ ३२ ॥

देवदत्तस्य संकल्पे कुञ्जरे च महोत्कटे ।
भग्ने निर्विघ्नहर्षोऽभूत् समुद्गताद्भुतो जनः ॥ ३३ ॥

ततः कृत्वा गृहपते र्गृहे भोज्यप्रतिग्रहम् ।
भगवान् भिक्षुभिः सार्द्धं काननं गन्तुमुद्ययौ ॥ ३४ ॥

अभिसृत्य गजेन्द्रोऽपि जिनस्य चरणाब्जयोः ।
कृत्वा करेण संस्पर्शं वपु स्तत्याज कौञ्जरम् ॥ ३५ ॥

चतुर्महाराजिकेषु देवेषु विषदद्युतिः ।
उपपन्नः स सहसा सुगतं द्रष्टुमाययौ ॥ ३६ ॥

རང་གི་བསྒོ་གནས་ཕྱིན་གྱུར་པའི། །བཅོམ་ལྡན་འདས་ལ་མངོན་ཕྱོགས་ཏེ། །
ནོར་བུའི་རྣ་ཆ་རབ་འབར་བ། །ཉི་མ་འདྲ་བ་དེས་ཕྱག་འཚལ། ། 37

དེ་ཡི་དཔུང་རྒྱན་ཅོད་པན་གྱི། །འོད་ཀྱི་ཡལ་འདབ་རྒྱས་གྱུར་པ། །
སྤྲིན་གྱི་འཕྲེང་བ་བརྒྱ་བྱིན་གྱི། །གཞུ་ཡིས་ཁྲབ་པ་བཞིན་དུ་མཛེས། ། 38

སྡིག་པ་བྲལ་དེས་སྟོན་པ་ཡི། །མདུན་དུ་དུལ་བས་འཁོད་ནས་ནི། །
ལྷ་ཡི་མི་རྟོག་སྙིང་སྟོབས་བཞིན། །དཀར་བས་གདོར་ནས་དེས་སླུས་པ། ། 39

ཡོངས་སུ་སིམ་པའི་གནས་གྱུར་པ། །བཅོམ་ལྡན་ཁྲོད་ཀྱི་ཞབས་དག་གི། །
པདྨོ་ལ་ནི་རེག་པས་བདག །སྐབས་ངན་སྡུག་བསྔལ་གདུང་བ་ཞི། ། 40

ཀྱི་མ་བཅོམ་ལྡན་གཟིགས་པ་གདུང་བའི་དུག་སྐྱོན་ཚ་བ་ཞི་བར་བྱེད། །
ཅི་ཡང་བདུད་རྩིའི་ཆར་པ་ཞི་ཞིང་བསྔགས་འོས་འཛུམ་ཞིང་ཡིད་དུ་འོང་། །
གང་གིས་གསལ་བར་རིག་པས་མཆོག་ཏུ་རྟུབ་པའི་རྣམ་འགྱུར་གཉེད་པ་དག །
རྣམ་པར་བདང་ནས་སྨྱོངས་པའི་ཕྱུགས་ཀྱང་ནང་དུ་རབ་ཏུ་ཞི་བ་སྟེན། ། 41

དེ་སྐད་བསྟོད་པར་བྱེད་དེ་ཡིས། །སྲིད་པ་ཞི་སྨྲད་བཅོམ་ལྡན་གྱིས། །
ཡང་དག་བདེན་པ་མཐོང་བྱེད་པ། །དག་པའི་ཆོས་ནི་བསྟན་པར་མཛད། ། 42

དབུ་རྒྱན་སྨུ་ཏིག་འོད་དཀར་བའི། །མགོ་ཡིས་སྟོན་པའི་ཞབས་དག་ལ། །
ཕྱག་འཚལ་སྲིད་པའི་འཁྲུལ་པ་ལ། །དགོད་པ་བཞིན་དུ་དེ་རབ་སོང་། ། 43

स्व माश्रमपदं प्राप्तं भगवन्त मुपेत्य सः ।
प्रणनामार्कसंकाशं प्रदीप्तमणिकुण्डलः ॥ ३७ ॥

तस्य केयूरमुकुटप्रभापल्लवपूरिताः ।
शक्रचापैरिव व्याप्ता विरेजु र्घनराजयः ॥ ३८ ॥

विनयादुपविश्याग्रे स शास्तुः स्वस्तकल्मषः ।
तं दिव्यपुष्पैराकीर्य्य सत्वशुभ्रै रभाषत ॥ ३९ ॥

भगवन् भवतः पादपद्मसंस्पर्शनेन मे ।
दुर्दशादुःखसन्तापः शान्तः सन्तोषशालिनः ॥ ४० ॥

शमश्लाघ्या कापि व्यसनविषदोषोष्मशमनी
सुधावृष्टि र्दृष्टि र्वत भगवतः स्निग्धमधुरा ।
यया स्पृष्ट स्पष्टं खरतरविकारव्यतिकरं
विमुञ्चन्तः शान्तिं श्रयति हतमोहः पशुरपि ॥ ४१ ॥

इति तस्य ब्रुवाणस्य भगवान् भवशान्तये ।
सत्यदर्शनसंशुद्धां विदधे धर्म्मदेशनाम् ॥ ४२ ॥

मौलिमुक्तांशुशुभ्रेण शिरसा चरणद्वयम् ।
स शास्तुः प्रययौ नत्वा हसन्निव भवभ्रमम् ॥ ४३ ॥

བཞིན་རས་ནམ་མཁའི་ཟླ་བའི་གཞི། རབ་གསལ་བྱས་ནས་དེ་སོང་ཚེ།
དགེ་སློང་གིས་ཁྲིམས་བཙོམ་ལྡན་གྱི། དེ་ཡི་བྱུང་བའི་མཐའ་བཀའ་སྐྱལ།། 44

སྔོན་དུས་གཞན་ལ་སྟོན་པ་ནི། འོད་སྲུངས་ཞེས་པའི་བསྟན་པ་ལ།
རབ་ཏུ་བྱུང་བར་གྱུར་ཀྱང་འདི། བསླབ་པའི་གནས་ལ་གུས་མ་གྱུར།། 45

མ་གུས་པ་ལས་གླང་པོ་ཡི། ལོངས་སྤྱོད་ཉིད་དང་དགེ་འདུན་ནི།
བསྟེན་ལས་བདེན་པའི་ལྟ་སྤྱོབས་ཀྱིས། མཇུག་ཏུ་བསྟན་པ་འཛིན་པ་ཐོབ།། 46

སྐྱེ་བ་སྔ་མར་བསྒྲུབས་པའི་ལས། སུ་ཞིག་གིས་ཀྱང་མི་ཟློག་སྟེ།
གུས་པར་སྤྱོད་བྱས་སེམས་ལྡན་ལ། ལས་ཀྱི་ཉེ་བར་བསྟན་ནས་འབྲེལ།། 47

འཛིགས་རྩང་གནོད་པ་དེ་ལ་ནི། དགེ་སློང་ཀུན་གྱིས་བདག་བཏང་བ།
དེར་ཡང་ཀུན་དགའ་བོས་མ་ཡིན། སྔོན་ཚེ་འགྲོགས་པ་མཉེན་པར་གྱིས།། 48

རི་བོང་མཚན་མ་ལྷུར་བསིལ་མཆོར། གང་བ་གང་བའི་བཞིན་ཞེས་པའི།
ངང་པའི་རྒྱལ་པོ་སྤྲིན་དང་ནི། ཡིད་དུ་འོང་བར་སྔོན་གྱུར་ཏོ།། 49

ནམ་ཞིག་བཱ་རཱ་ན་སཱི་ན། ས་ཡི་བདག་པོ་ཚངས་བྱིན་གྱིས།
ཚངས་པ་ལྡན་པའི་རྫིང་བུ་ནི། དགའ་བར་གང་བའི་བཞིན་གྱིས་བྱིན།། 50

གཡོ་བའི་པདྨ་དཀྲིགས་པ་ཡི། ཟེ་འབྲུ་ཡོངས་སུ་སེར་བ་དེ།
ངང་པ་དག་ནི་ལྷ་བརྒྱ་དང་། མཚོ་སྐྱེས་ཅན་དེར་རྣམ་པར་རོལ།། 51

गते तस्मिन् मुखशशिप्रकाशितनभस्तले ।
भगवान् भिक्षुभिः पृष्ट स्तद्वृत्तान्त मभाषत ॥ ४४ ॥

पूर्व्वकल्पान्तरे शास्तुः काश्यपाख्यस्य शासने ।
अभूत् प्रव्रजतोऽप्येष शिक्षापदनिरादरः ॥ ४५ ॥

अनादरात् कुञ्जरता भोगः संघोपसेवनात् ।
सत्यदृष्टिबलेनान्ते संप्राप्तः शासनग्रहः ॥ ४६ ॥

प्राग्जन्मविहितं कर्म्म कस्यचिन्न निवर्त्तते ।
कर्म्मोपदिष्टसम्बन्धभक्तिभोगैः सचेतसः ॥ ४७ ॥

तस्मिन् व्यतिकरे घोरे सर्व्वैं स्त्यक्तोऽस्मि भिक्षुभिः ।
नत्वानन्देन तत्रापि श्रूयतां पूर्व्वसंगतिः ॥ ४८ ॥

शशाङ्कशीतिसरसि भ्रातरौ रुचिरौ पुरा ।
पूर्णमुखः सुखश्चेति राजहंसौ बभूवतुः ॥ ४९ ॥

कदाचिद् ब्रह्मदत्तस्य वाराणस्यां महीपतेः ।
ब्रह्ममतीं पुष्करिणींरम्यां पूर्णमुखो ययौ ॥ ५० ॥

स तस्यां लोलकमलकिञ्जल्कपरिपिञ्जरः ।
विजहार सरोजिन्यां हंसानां पञ्चभिः शतैः ॥ ५१ ॥

སྔོན་གྱི་བསོད་ནམས་མཐུ་ཡི་ནི། ཁྱད་འཕགས་གཙུགས་རབ་འབར་བ་དེ།
གྲུ་བ་དོར་བའི་སྐྱེ་བོ་ཡིས། གཡོ་མེད་མིག་གིས་མཐོང་བར་གྱུར། ། 52

དེ་ནི་དེར་གནས་ས་བདག་གིས། ཐོས་ནས་དེ་དག་བལྟ་འདོད་པས།
རྒྱ་ཡིས་འཚོ་བ་མཁས་པ་དག ། དེ་གཟུང་སྐད་དུ་བཏང་བར་གྱུར། ། 53

པདྨ་ཅན་གྱི་རོལ་པའི་འཛུམ། དགའ་བའི་འོད་ཟེར་དེ་བཟུང་ཚེ།
ངང་པ་ལྔ་བརྒྱ་དག་གིས་ནི། དེ་བཏང་མགྱོགས་པར་རབ་ཏུ་སོང་། ། 54

གཅིག་ནི་དེ་ལ་གཞུང་བཟང་བས། བཅིངས་པ་མེད་ཀྱང་བཅིངས་པ་བཞིན།
མཛའ་བའི་ཞགས་པས་དབང་བྱས་ནས། དེ་ཡི་དོན་དུ་གདུང་ཞིང་གནས། ། 55

དེ་ནས་རྒྱལ་པོས་ངང་པ་ཡི། རྒྱལ་པོ་དེ་ཡིས་བཟུང་བ་དང་།
གཉིས་པ་མཛའ་བས་བཅིངས་པ་ཡང་། མཐོང་ནས་ཡ་མཚན་དེ་དག་བཏང་། ། 56

ངང་པ་གང་པའི་བཞིན་དེ་བདག ། དེ་ཡིས་རྗེས་འབྲང་ཀུན་དགའ་བོ།
དེས་ན་རིང་ཡང་བདག་བཏང་ནས། སོང་བའི་དགེ་སློང་ངང་པ་ཉིད། ། 57

གང་གི་གྲགས་པ་ཕ་རོལ་གྱིས། ཡིད་ཀྱི་གླིགས་པ་ལ་བྲིས་པ།
བཱ་རཱ་ཎ་སིར་སྔོན་དུས་ན། ས་བདག་ཨ་ཊ་ཞེས་པ་བྱུང་། ། 58

སྟོང་དང་གསུམ་འགྲེད་ལྷ་ཕྱོགས་པ། གསུམ་གྱི་དུས་སུ་སྔོན་འགྲོ་ཞིང་།
ལག་པའི་མཚན་ཞེས་གྲགས་པ་ནི། དེ་ཡི་བསླུ་མེད་གྲོགས་པོར་གྱུར། ། 59

पूर्व्वपुण्यानुभावेन तं रूपातिशयोज्ज्वलम् ।
ददर्श कार्य्याण्युत्सृज्य जनो निश्चललोचनः ॥ ५२ ॥

तं श्रुत्वा भूपति स्तत्र स्थितं तद्दर्शनोत्सुकः ।
कुशलान् ग्रहणे तस्य व्यसृजज्जालजीविनः ॥ ५३ ॥

तस्मिन् गृहीते नलिनीलीलास्मितसितत्विषि ।
शतानि पञ्च हंसानां त्यक्त्वा तं प्रययु र्जवात् ॥ ५४ ॥

एकस्तु तस्य सौजन्यादबद्धोऽपि सुबद्धवत् ।
तदर्थं व्यथित स्तस्थौ प्रेमपाशवशीकृतः ॥ ५५ ॥

ततस्तैः प्रापितं राजा राजहंसं विलोक्य तम् ।
स्नेहबद्धं द्वितीयञ्च विस्मित स्तावलोकयत् ॥ ५६ ॥

हंसः पूर्णमुखः सोऽह मानन्द स्तस्य चानुगः ।
गता स्तदद्य च त्यक्त्वा मां हंसा एव भिक्षवः ॥ ५७ ॥

पूर्व्वस्मिन्नभवत्काले वाराणस्यां महीपतिः ।
तुट्टिर्नाम मनःपट्टे लिखितं यद्यशः परैः ॥ ५८ ॥

सहस्रयोध स्तस्याभूद् दाक्षिणात्यो निरत्ययः ।
करदण्डीति विख्यातः संग्रामाग्रेसरः प्रियः ॥ ५९ ॥

ནམ་ཞིག་འཛིགས་རུང་གཡུལ་ཞུགས་ཚེ། བློན་པོ་ལྔ་བརྒྱ་དག་གིས་ནི།
མི་བདག་དེ་བདང་འཛིགས་ནས་སོང་། ལག་པའི་མཆོན་གྱིས་གདང་མ་གྱུར།།60

ས་སྐྱོང་དེ་ནི་ང་ཉིད་དེ། བློན་པོ་དེ་དག་དགེ་སློང་རྣམས།
ལག་པའི་མཆོན་དེ་ཀུན་དགའ་བོ། འདི་ཉིད་ང་ནི་གདང་མ་གྱུར།། 61

སྔོན་གྱི་སྐྱེ་བ་གཞན་ལ་ཡང་། བདག་ནི་སེང་གེ་ཁྲིན་པར་ལྒྱུར།
ཕྲ་སྐྱེས་གཡོག་གིས་སྐད་ཅིག་ལ། སྤྲངས་པ་གང་དེ་དགེ་སློང་རྣམས།། 62

ཕྲ་སྐྱེས་གཅིག་གི་སྟེར་མོ་ཡིས། རིང་དུ་བཀོས་ནས་བདག་ཐར་བྱས།
དེ་ཉིད་ཀུན་དགའ་བོ་འདི་སྟེ། ད་ལྟ་བདག་གི་རྗེས་འབྲང་གྱུར།། 63

སྔོན་ཚེ་རི་དགས་ཁྱུ་ཡི་བདག། རྒྱ་ཡི་ཞགས་པས་བཅིངས་པར་གྱུར།
དེ་ཡི་རྗེས་འབྲང་རི་དགས་རྣམས། སྲིད་ལྡན་འོངས་པས་སྐྲག་ནས་བྲོས།། 64

མིག་རྩ་ལྡན་པའི་རི་དགས་མོ། རྗེས་སུ་ཆགས་པས་མ་བདང་སྟེ།
མཛའ་བའི་ལྷུགས་སྐྲོག་གིས་བཅིངས་པས། གཡོ་བ་མེད་པར་གྱུར་བ་བཞིན།།65

དེ་ནས་སྲིད་ལྡན་འོངས་གྱུར་ཅིང་། རི་དགས་སོད་པར་བརྩོན་མཐོང་ནས།
དེ་ཡིས་སྨྲས་པ་ཐོག་མར་ནི། མདའ་ཡིས་བདག་གི་འཚོ་བ་ཐོགས།། 66

ཞེས་པ་དེ་ཡི་གསལ་བ་ཡི། ཚིག་དང་མཛའ་བས་མཚར་སྐྱེས་པ།
རྗོན་པ་དེ་ནི་བྱམས་པ་ཡིས། རི་དགས་རི་དགས་མོར་བཅས་བདང་།། 67

कदाचिद् घोरसमरे पञ्चामात्यशतानि तम् ।
नृपं त्यक्त्वा ययु र्भीत्या करदण्डी तु नात्यजत् ॥ ६० ॥

अहमेव स भूपालः सचिवा स्ते च भिक्षवः ।
करदण्डी स एवाय मानन्दो न जहाति माम् ॥ ६१ ॥

जन्मान्तरेऽपि सिंहोऽहं मासं कूपे निपातितः ।
उपेक्षितः क्षणाद् भृत्यैः शृगालै र्येऽद्य भिक्षवः ॥ ६२ ॥

एकेन च नखैः खातं दीर्घं कृत्वास्मि मोक्षितः ।
जम्बुकेन स एवाय मानन्दोऽद्य ममानुगः ॥ ६३ ॥

कूटपाशनिबद्धस्य मृगयूथपतेः पुरा ।
लुब्धकागमने एव जग्मु स्तदनुगा मृगाः ॥ ६४ ॥

अनुरक्ता न तत्याज तं मृगी साश्रुलोचना ।
प्रीतिशृङ्खलया बद्धा याता निस्पन्दतामिव ॥ ६५ ॥

अथ लुब्धक मायान्तं दृष्ट्वा मृगवधोद्यतम् ।
सावदन्मम बाणेन प्रथमं हर जीवितम् ॥ ६६ ॥

इति स्पष्टगिरा तस्याः स्नेहेन च स विस्मितः ।
मुमोच लुब्धकः प्रीत्या हरिणं हरिणीसखम् ॥ ६७ ॥

ཛི་དགས་ཁྲུ་ཡི་བདག་དེ་ང་། ཛི་དགས་མོ་དེ་ཀུན་དགའ་བོ།
དེ་ལྟར་མཛའ་བའི་འབྲེལ་པ་འདི། སྔོན་གྱི་སྦྱོད་པས་རྗེས་སུ་ཞུགས།། 68

ཞེས་པ་བདེ་གཤེགས་གསུང་ཐོས་དགེ་སློང་ནི།
དེ་དག་ཐམས་ཅད་ངོ་ཚས་ཞུམ་པ་བཞིན།
འདོད་པས་བརླན་པས་ཀུན་དགའ་དང་བཅས་པར།
འོད་ཀྱིས་མདོན་དགའ་ཀུན་དགའི་བཞིན་པར་བལྟས།། 69

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ནོར་སྐྱོང་གི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་བརྒྱད་པའོ།།

मृगयूथपतिः सोऽहमानन्दः सा कुरङ्गिका ।
इत्येष प्रीतिसम्बन्धः प्राग्वृत्तमनुवर्त्तते ॥ ६८ ॥

श्रुत्वेति वाक्यं सुगतस्य सर्व्वे
लज्जानिलीना इव भिक्षवस्ते ।
सानन्दमानन्दमुखारविन्दं
प्रभाभिरामं ददृशुः स्पृहार्द्राः ॥ ६९ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
धनपालावदानं अष्टाविंशः पल्लवः ॥

ཡལ་འདབ་ཉི་ཤུ་རྩ་དགུ་པ།

གང་ཞིག་སྙིང་སྟོབས་ལྡན་པའི་སྙིང་སྟོབས་ཀྱི།
ཁྱད་པར་སེམས་ཅན་ཐམས་ཅད་བདེ་བའི་རྒྱུ།
ལུས་ནི་ཞིག་ཀྱང་ཁྲོ་བའི་མི་རྣམས་དག།
མཆོག་ཏུ་ཞི་བར་འགྱུར་དེ་རྒྱལ་གྱུར་ཅིག ॥ 1

ཆོས་བསྟན་པ་ལ་མངོན་འདུག་པ། དགེ་སློང་ཀོཊི་ཀརྞ་ཡི།
གདམས་གྱི་ཞར་ལ་དགེ་སློང་གིས། དྲིས་ཤིང་བཅོམ་ལྡན་གྱིས་བཀའ་སྩལ ॥ 2

བཱ་རཱ་ཎ་སི་དག་ཏུ་ནི། ས་བདག་ཚངས་པ་བྱིན་གྱི་བུ།
ཀཱ་ཤི་མཛེས་པ་ཞེས་པ་དང་། ཏུས་ཀྱི་ས་ཞེས་བྱ་བ་བྱུང་ ॥ 3

རྒྱལ་ཚབ་དབང་ནི་བསྐུར་འོས་པ། གཞོན་ནུ་ཀཱ་ཤི་མཛེས་པ་ཡིས།
རྒྱལ་སྲིད་ཆོས་དང་ཆོས་མིན་གྱི། རང་བཞིན་ཡུན་རིང་དཔྱད་ནས་བསམས ॥ 4

ལང་ཚོ་སྐད་ཅིག་འཇིག་པ་དང་། སྲོག་ནི་ཆུ་རླབས་གཡོ་བའི་ཚེ།
རྒྱལ་སྲིད་རྨི་ལམ་བག་མ་ལེན། རྨོངས་པའི་རྩ་འདིར་བདག་བློ་མེད ॥ 5

ཆགས་པའི་ཆོ་ངེ་རབ་མང་ཞིང་། ཡང་ཡང་སྒྱུ་དང་རྨོངས་རང་བཞིན།
འཁོར་བ་སྙིང་པོ་མེད་པ་ལ། འཕྱོན་མ་ཏུ་ཞིང་བརྟེན་པ་མེད ॥ 6

ऊनत्रिंशः पल्लवः ।

जयति स सत्त्वविशेषः
सत्त्ववतां सर्व्वसत्त्वसुखहेतुः ।
देहदलनेऽपि शमयति
कोपाग्निं शान्ति मुच्चैर्यः ॥ १ ॥

धर्म्मोपदेशे भगवान् कौण्डिन्यस्याग्रवर्त्तिनः ।
भिक्षोः कथाप्रसङ्गेन पृष्टो भिक्षुभि रभ्यधात् ॥ २ ॥

ब्रह्मदत्तस्य तनयो वाराणस्यां महीपतेः ।
काशिसुन्दरनामा च कालभूश्च बभूवतुः ॥ ३ ॥

यौवराज्यभरैकार्हः कुमारः काशिसुन्दरः ।
धर्म्माधर्म्ममयं राज्यं विचार्य्याचिन्तयच्चिरम् ॥ ४ ॥

क्षणक्षयिणि तारुण्ये जीविते वीचिचञ्चले ।
राज्ये स्वप्नविवाहेऽस्मिन् मोहमूले न मे मतिः ॥ ५ ॥

रागप्रलापबहुले मायामोहमहे मुहुः ।
वेश्यारोदननिःसारे संसारे नास्ति सत्यता ॥ ६ ॥

དེ་སྐད་ཁྲིམ་ནས་ཁྲིམ་མེད་པར། བདག་ནི་སྡིག་མེད་རབ་ཏུ་འབྱུང་།
རལ་གྲིས་གཙོད་ལ་རིག་གྲུར་པའི། རྣམ་པར་འབར་ལ་ཆགས་པས་ཏེ།། 7

དེ་ལྟར་རྣམ་བསམས་རྒྱལ་པོ་འི་བུ། དྲི་མེད་དབེན་པའི་བསམ་པ་ཅན།
ནགས་སུ་འགྲོ་བར་འདོད་པ་ཡི། ས་སྐྱོང་ལ་ནི་མངོན་ཕྱོགས་སྨྲས།། 8

རྒྱལ་པོ་བདག་ལ་ལོངས་སྤྱོད་ཀྱིས། ཚོགས་འདི་ཉེ་བར་མཁོ་བ་མེད།
རྒྱལ་ཚབ་དབང་ནི་བསྐུར་འོས་པའི། ཀུན་དུ་རྩོམ་པའི་བློག་པར་མཛོད།། 9

ཡབ་ལགས་གསོད་འཆིང་འཛིགས་དང་རྡུང་། སྐྱེད་བྱེད་རྒྱལ་པོ་འི་ཕུན་སུམ་ཚོགས།
ཁྲོ་བའི་མེ་ཡིས་རབ་གདུངས་པ། འདི་དག་བདག་ནི་ལོངས་མི་འདོད།། 10

དུར་ཁྲོད་མེ་ཡི་རྩེ་མོ་བཞིན། ཤིན་ཏུ་དྲག་པོ་འི་སྤྱོད་པས་ཁྱབ།
རབ་ཏུ་འབར་བསས་ས་དག་དཔལ། སུ་ཡི་ཆགས་བྲལ་སྐྱེད་མི་བྱེད།། 11

གདུགས་ཀྱི་སྣང་བ་ཡང་དག་བསྒྲིབས། ཛ་ཡབ་དག་གི་རླུང་གིས་བསྐྱོད།
རྒྱགས་པས་མྱོས་པ་ས་ཡི་དབང་། སྡིག་པ་དག་གི་གཡང་ལ་ལྷུང་།། 12

འཛམ་པའི་ལོངས་སྤྱོད་གོས་གོམས་པ། ཤིན་ཏུ་གཞོན་པ་ས་བདག་གི།
ལུས་ལ་མཐུག་ཏུ་ཉོན་མོངས་ཀྱི། རྡོ་རྗེ་མི་བཟད་འབབ་པར་གྱུར།། 13

རྒྱུན་དུ་བསམ་པའི་གདུང་བ་དང་། སྲིད་པ་དྲག་པོ་འི་ཚ་ངེ་ཅན།
རྒྱལ་སྲིད་རིམ་བསྟེན་འདི་རྣམས་ཀྱི། མྱོངས་ཤིང་བརྒྱལ་བ་མི་བློགས་སོ།། 14

प्रव्रज्या मनघा स्तस्मादगारादनगारिकम् ।
निस्त्रिंशवृत्तिसंसक्ताभिरागः किं विभूतिभिः ॥ ७ ॥

राजन्ननु विचिन्त्येति विवेकविमलाशयः ।
उवाचाभ्येत्य भूपाल मरण्यगमनोत्सुकः ॥ ८ ॥

मम सम्भोगवर्गोऽयं राजन्नैवोपयुज्यते ।
यौवराज्याभिषेकार्हः समारम्भो निवार्य्यताम् ॥ ९ ॥

क्रोधाग्नितप्ताः सुतरा मेता स्तात न मे मताः ।
बहुबन्धभयायासजनन्यो राजसम्पदः ॥ १० ॥

व्याप्ताः क्रूरतराचारै र्ज्वलिताः पार्थिवश्रियः ।
कुर्व्वन्ति कस्य नोद्वेगं श्मशानाग्निशिखा इव ॥ ११ ॥

छत्रसंछादिता लोका श्चामरानिललोलिताः ।
पतन्ति पातकश्वभ्रे मदक्षीवाः क्षितीश्वराः ॥ १२ ॥

मृदुभोगांशुकाभ्याससुकुमारे महीभुजाम् ।
काये पतति पर्य्यन्ते क्लेशः कुलिशदारुणः ॥ १३ ॥

चिन्तासन्ततसन्तापतीव्रतृष्णाप्रलापिनाम् ।
राज्यज्वरजुषां नैषां मोहमूर्च्छा निवर्त्तते ॥ १४ ॥

གནས་དང་གནས་སུ་སྐྱེ་གཉིས་པ། འཁྲུག་ཅིང་རིན་ཅན་སྒྲོན་མ་ཅན།
སྒྲོན་ཁྲིངས་ལ་བལྟ་རྒྱལ་པོ་སི། བྱ་བ་གཞན་དག་གསོད་པ་ཡིན།། 15

མི་བདག་བརྒྱ་ལྷག་དྲིག་ལྡན་མ། བདག་ལ་གཞན་དུ་མི་འགྱུར་སེམས།
ཞེས་བཞིན་ས་དབང་དག་གི་དཔལ། དོ་ཤལ་རྫ་ཡབ་དག་གིས་དགོད།། 16

འདས་པའི་ས་བདག་དྲན་པ་ལས། རྒྱལ་པོའི་དཔལ་ནི་སྨིངས་པས་བསྒྲིབས།
རླུང་ཡབ་ཀྱིས་གསལ་ཤུགས་རིངས་དང་། སུ་དྲིག་མ་ཆེ་མའི་རྒྱུན་ལྡན་བཞིན།।
17

དེ་སྐད་རབ་དུ་བྱུང་བ་སིས། སྐྱེ་བོའི་ལུགས་ནི་རྣམ་སྤྲངས་ནས།
ཆོག་ཤེས་བསིལ་བའི་གྲིབ་མ་ཅན། ཡོངས་གདུངས་ཞི་བའི་གནས་སུ་འགྲོ།। 18

རྟག་དུ་གནོད་པའི་ལུས་འདི་ཡང་། ངལ་གསོ་མེད་པ་འཁོར་བ་ཡི།
ལམ་གྱི་འགྲོན་པོས་བསྐུར་དཀའ་ན། ས་ཡི་ཁྲར་ལྟ་སྐྱར་ཡང་ཅི།། 19

ཞེས་པ་མཆོག་དུ་མི་སྨན་པ། བྱ་ཡི་ཚིག་གྲོས་ས་ཡི་བདག།
རབ་དུ་འབྱུང་བའི་སྐྲ་ཡིས་འཇིགས། སྲུ་ངན་ལྡན་པས་དེ་ལ་སྨྲས།། 20

ཆེན་པོར་གྱུར་པའི་རིགས་འདི་དང་། ཡང་དག་རྒྱལ་སྲིད་འཕེལ་བའི་སྐད།
རྒྱན་པོ་བདག་གིས་བྱ་ཁྱོད་ལ། རེ་བ་མཆོག་དུ་རྣམ་པར་བཅིངས།། 21

མཉེས་ག་ཤིན་བདག་གིས་བརྟག་པ་ནི། དུས་མིན་ཉམས་པར་བྱ་མི་འོས།
ནགས་སུ་ཁྱོད་ཀྱི་ལང་ཚོ་འདི། གསར་དུ་མཛེས་པ་འོས་མ་ཡིན།། 22

वक्राणां रन्ध्रदीप्तानां द्विजिह्वानां पदे पदे ।
छिद्रसंदर्शिनां राज्ञां व्यापारः परमारणम् ॥ १५ ॥

नृपवंशशतोच्छिष्टां मन्यते मा मनन्यगाम् ।
इतीव श्रीः क्षितीशानां हारचामरहासिनी ॥ १६ ॥

व्यञ्जितव्यजनोच्छ्वासा लक्ष्मी र्मुक्ताश्रुसन्ततिः ।
राज्ञां मोहाद्भृतातीतभूपतिस्मरणादिव ॥ १७ ॥

तस्माद् व्रजामि प्रव्रज्याविवर्जितजनस्थितिः ।
सन्तोषशीतलच्छायं सन्तापशमनं वनम् ॥ १८ ॥

अविश्रान्तस्य संसारपथपान्थस्य दुर्व्वहः ।
कायोऽस्य यत् सदापायः किं पुनः पृथिवीभरः ॥ १९ ॥

इति पुत्रवचः श्रुत्वा भूपति र्भृशमप्रियम् ।
प्रव्रज्याशब्दचकितः सोद्वेग स्त मभाषत ॥ २० ॥

अस्य वंशस्य महतः साम्राज्यस्य च वृद्धये ।
आशानिबद्धहृद्बेन त्वयि पुत्र मया परम् ॥ २१ ॥

वत्स सङ्कल्पभङ्गं मे न काले कर्त्तुमर्हसि ।
इदन्तव महच्छायं यौवनं न वनोचितम् ॥ २२ ॥

དམ་པའི་སྡུགས་ཀྱི་གོམས་པར་ལྡན། ལེགས་པའི་ལྷ་བ་ལ་ཆགས་པ།
དབང་པོ་ཐུལ་བའི་མི་བདག་ནི། ཀུན་དུ་ནགས་མེད་དཀའ་ཐུབ་ཡིན།། 23

རང་གནས་ཡིན་ཡང་མཚོ་སྐྱེས་ནི། གོས་པ་མེད་པར་ཆུ་ལ་གནས།
ནགས་ནང་ཡིན་ཡང་མྱུ་ངན་མེད། བྲུད་མེད་ཀང་པས་བསྐྱུན་པ་མཐོང་།། 24

རང་ཁྲིམས་ཉིད་སྲུའི་ལོངས་སྤྱོད་ཀྱིས། ཇི་སྲིད་མིག་ནི་སྐྱུས་ཆུང་བ།
དེ་སྲིད་ཡུལ་ནི་འདི་དག་རྣམས། སྐད་ཅིག་ལོངས་སུ་གཏང་བར་ནུས།། 25

རང་གི་སྐྱེ་བོ་ནང་གི་ནི། བདེ་བ་ལོངས་བདང་ཁྲིམས་ལས་འཐོན།
ཉམས་སྐྱོང་ལོངས་སྤྱོད་བྲལ་བ་ཡིས། ཉིན་མོངས་སྐྱེ་བོས་མི་བཟོད་དོ།། 26

ཁྲིམས་དུ་ཆོས་ནི་བདེ་བ་ཡིས། ཉན་དང་དྲན་དང་སྒྲུབ་པར་བྱེད།
ནགས་སུ་སྐམ་པོ་རྣམས་ཀྱིས་ནི། ཉན་དང་དྲན་དང་བྲ་བ་བསྐམ།། 27

རྩ་ཡི་ཚོགས་ཀྱི་ཁབ་རྩེ་ཡིས། ཀང་པར་རྨ་སྐྱེས་ཟག་བྱེད་པ།
དེ་ལས་འཇིག་རྟེན་ཕ་རོལ་དུ། སྡུག་བསྔལ་གཞན་པ་ཅི་ཞིག་འབྱུང་།། 28

སྐྱེ་བ་ཟ་བ་རྣམས་ལ་ལྟ། པགས་པ་རུས་པའི་ལྷག་མར་གྱུར།
རྟག་དུ་གཞན་གྱི་བྲིན་པ་ཟ། དཀའ་ཐུབ་ཅན་རྣམས་ཡི་དགས་བཞིན།། 29

བྲ་ཀྭ་ནགས་ན་གནས་པ་ནི། རྟུལ་གྱི་གོས་དང་མཚུངས་པ་སྟེ།
ཚངས་པར་སྤྱོད་པ་སྐྱོང་བ་ནི། རྒྱ་སྲིན་འབྱུང་གནས་སྐྱེམས་པ་ཡིན།། 30

सन्मन्त्राभ्यासयुक्तानां शक्तानां साधुदर्शने ।
जितेन्द्रियाणां सर्व्वत्र नृपाणां भवनं तपः ॥ २३ ॥

स्वपदेऽपि सरोजस्य निःसङ्गसलिलस्थितिः ।
दृष्टा वनेऽप्यशोकस्य ललनाचरणाहतिः ॥ २४ ॥

स्वगेहसुलभै र्भोगै र्य्यावद्‌दृष्टिविसूचिका ।
तावद्देते परित्यक्तुं शक्यन्ते विषयाः क्षणम् ॥ २५ ॥

सुख मन्तः परित्यज्य स्वजनं गृहनिर्गतः ।
अभ्यस्तभोगविरहक्लेशं न सहते जनः ॥ २६ ॥

श्रूयते स्मर्य्यते धर्म्मः क्रियते च सुखाद् गृहे ।
वने शुष्यन्ति शुष्काणां श्रवणस्मरणक्रियाः ॥ २७ ॥

क्षरत्क्षतजपादस्य दर्भसन्दर्भसूचिभिः ।
ततः किं दुःख मपरं परलोके भविष्यति ॥ २८ ॥

भुञ्जानं जन मीक्षन्ते याता श्चर्मास्थिशेषताम् ।
परदत्तं सदाश्नन्ति प्रेता इव तपस्विनः ॥ २९ ॥

वने निवसनं पुन पांशुप्रावरणं समम् ।
पालनं ब्रह्मचर्य्यस्य मकराकरशोषणम् ॥ ३० ॥

ནགས་སྲེག་མེ་ཡི་དུ་བ་རབ་རྒྱས་ཁྲོ་གཉེར་ལྡན་པའི་བཞིན།
ཕ་ཁྲང་གནས་དང་ཕུག་པའི་ཕྱུག་ནི་སྡུག་པོར་གྱུར་པའི་ཁྲིམ།
སེང་གེས་བསད་པའི་སོ་གཉིས་ཁྲག་གིས་དམར་པོར་གྱུར་པའི།
ནགས་སུ་ཁྲིམ་བཏང་ནས་ནི་སུ་ཞིག་དགའ་བ་འབྱུང་བར་འགྱུར།། 31

འདོད་ལྡན་དག་ནི་དུལ་བ་འདོད་ཅིང་དུལ་བ་དང་ལྡན་སྤྲོ་བསངས་
རྩེ་དགའ་དྲན།
ཚོམ་པ་ཞིན་དུ་དྲག་པོའི་བརྟུལ་ཞུགས་ལ་དགའ་བཀྲིས་པར་
གྱུར་པ་ཟས་དག་འདོད།། 32

བདག་ནི་ཡོངས་སུ་བོར་ནས་བྱ། ནགས་སུ་འགྲོ་བར་མི་འོས་སོ།
ཁྱོད་ནི་ནགས་ན་གནས་པ་དག། དགྲ་རྣམས་ཡིད་ལ་རེ་བ་ཡིན།། 33

སྒྲ་དྲིག་གསལ་བར་དགོད་བྱེད་པ། རྒྱལ་པོའི་ཕུན་ཚོགས་ང་རྒྱལ་ཅན།
བཏང་ནས་སླར་ཡང་མི་འོང་སྟེ། རལ་གྲི་དག་གིས་འཁྲི་ཤིང་བཞིན།། 34

ཕ་ཡིས་ལན་མང་དེ་བརྗོད་ཀྱང་། དེ་ནི་ངེས་པ་ལས་མ་གཡོས།
བདག་ཉིད་ཆེན་པོའི་བརྟན་པ་ནི། རྗེ་རྡེ་རིན་ཅན་རྩེ་མོ་མཚུངས།། 35

མ་དང་བློན་པོ་རྣམས་དང་ནི། གཉེན་དང་གྲོང་པ་ཆེ་རྣམས་ཀྱིས།
གསོལ་བ་བཏབ་ཀྱང་ཉིན་གསུམ་དེ། ཟས་དང་སྐྲ་བ་མེད་པར་གྱུར།། 36

दावाग्निधूमविकटभ्रुकुटीमुखेषु
गोनासवासघनघूकगुहागृहेषु ।
सिंहाहतद्विरदलोहितलोहितेषु
त्यक्त्वा गृहं भवति कस्य धृति र्वनेषु ॥ ३१ ॥

कामी संयम मिच्छति स्मरति च श्यामारतेः संयमी
तृप्त स्तीव्रतरव्रतेषु रमते भक्ष्यं क्षुधा कांक्षति ।
एकाकी जन मीहते जनवनोद्वेगी वनं वाञ्छति
त्यक्त्वान्वेषणतत्पराः पुनरपि प्राप्यावमानं जनाः ॥ ३२ ॥

न मां पुत्र परित्यज्य गहनं गन्तुमर्हसि ।
भवन्तु तव शत्रूणां वनवासमनोरथः ॥ ३३ ॥

व्यक्तमौक्तिकहासिन्यः करवाललता इव ।
त्यक्ता न पुनरायान्ति मानिन्यो नृपसम्पदः ॥ ३४ ॥

इत्युक्तोऽप्यसकृत् पित्रा निश्चयान्न चचाल सः ।
वज्ररत्नशिखाकल्पः संकल्पो हि महात्मनाम् ॥ ३५ ॥

जननीभि रमात्यैश्च बन्धुपौरमहत्तमैः ।
स प्रर्थितोऽप्यभून्मौनी निराहारो दिनत्रयम् ॥ ३६ ॥

རྒྱལ་པོར་སྤྱོད་དམ་དཀའ་ཐུབ་ཅན། འདི་ནི་རང་གི་འདུན་པས་འཚོ།
འཛིག་རྟེན་འདི་ནི་འདོད་རྗེས་འཇུག། ཅེས་པ་བློན་པོས་རྒྱལ་ལ་སྨྲས།། 37

མཆི་མ་དང་བཅས་ས་སྐྱོང་གིས། ཇི་ཞིག་ལྟར་ལྟས་གནང་ནས་དེས།
མི་སྨྲས་གྲོང་ཁྱེར་པ་རྣམས་ཏེ། ཐུབ་པའི་དཀའ་ཐུབ་ནགས་སུ་སོང་།། 38

ཆགས་བྲལ་ཡོངས་སུ་སྨིན་པ་ཡིས། དེར་ནི་སེམས་ཅན་ཐམས་ཅད་ལ།
བྱམས་པས་དག་བྱས་བཙོ་བ་དག། དབེན་པའི་གྲོགས་སུ་དེ་ཡིས་བསྟེན།། 39

དེ་ཡི་མཐུ་ཡིས་དེ་དག་ཏུ། ནགས་ན་གནས་པ་ཐམས་ཅད་ཀྱིས།
རང་བཞིན་ཁོན་གྱི་མེ་སྤངས་ནས། སེམས་ཀྱི་སྤྱོད་ཚུལ་བསིལ་བར་གྱུར།། 40

རི་དྭགས་ཚོགས་ལ་རབ་ཆགས་རྗེན་པ་རྣམས་ཀྱི་སྲོག་ཆགས་གསོད་
པ་རབ་བཏང་ཞིང་།
སེང་གེས་གླང་ཆེན་འཇོམས་པ་དང་བྲལ་ཡན་ལག་ཀུན་གྱིས་འགྲོགས་
པར་གྱུར་པ་ལ།
དེར་ནི་རྗོན་པའི་ཤུད་མེད་ནུ་རིག་ཚོགས་རྣམས་སྤངས་པའི་ཀེད་
སྐབས་རྨ་བྱ་ཡི།
གོས་ཀྱི་དབྱུལ་ཞིང་ཤུགས་རིངས་དང་ལྡན་ཆགས་བྲལ་མཆུ་ནི་
རབ་ཏུ་བསྐམས་པར་འགྱུར།། 41

ཆུ་གཏེར་སྐྱེ་རགས་ཅན་ས་བཏང་། འབྱུང་པོ་ཀུན་ལ་བཟོད་པ་བསྟེན།
བཟོད་པ་སྨྲ་བ་ཞེས་པར་ནི། ཀཱ་ཤིའི་མཛེས་པ་དེ་གྲགས་གྱུར།། 42

སྐབས་དེར་ས་གཞི་མགུ་བ་ཡི། ཚངས་པས་བྱིན་ནི་མཐོ་རིས་སོང་།
འབྱུང་པོ་རྣམས་ཀྱི་ནུ་ངན་བཞིན། དུས་ཀྱི་ས་ནི་ས་སྐྱོང་གྱུར།། 43

राजभोगी तपस्वी वा जीवत्वेष निजेच्छया ।
कामानुवर्त्ती लोकोऽय मित्यूचुः सचिवा नृपम् ॥ ३७ ॥

स कथञ्चिदनुज्ञातः साश्रुनेत्रेण भूभुजा ।
ययौ पौरजनाक्रन्दमौनी मुनितपोवनम् ॥ ३८ ॥

वैराग्यपरिपाकेण तत्र मैत्रीपविञ्चिताम् ।
भेजे स सर्व्वसत्त्वेषु विवेकदयितां दयाम् ॥ ३९ ॥

बभूवु स्तत्प्रभावेण तत्र सर्व्ववनौकसाम् ।
जातिवैरानलत्यागशीतला श्चित्तवृत्तयः ॥ ४० ॥

त्यक्ते प्राणवधे प्रसक्तहरिणीवृन्दैः पुलिन्दैः परं
सिंहै र्व्वारणदारणव्युपरमे सर्व्वाङ्गसङ्गीकृते ।
मायूरावरणै र्दरिद्रजघना मुक्ताकलापोज्झिता-
स्तत्रोच्छ्रासविरागशुष्यदधरा जाताः किराताङ्गनाः ॥ ४१ ॥

क्षमां त्यक्त्वाब्धिवसनां सर्व्वभूतक्षमाश्रितः ।
सोऽभवत् क्षान्तिवादीति विश्रुतः काशिसुन्दरः ॥ ४२ ॥

अत्रान्तरे महीहर्षे ब्रह्मदत्ते दिवं गते ।
उद्वेग इव भूतानां भूपालः कलिभू रभूत् ॥ ४३ ॥

དེ་ནས་རབ་མང་བྱུང་བའི་ཚོགས། གཡོ་བའི་སྨིན་འཁྲིག་བཞིན་རས་ལོག།
ཐུབ་པའི་དུལ་བ་ལ་སྡང་བའི། དཔྱིད་ནི་ཡང་དག་བྱུང་བར་གྱུར།། 44

རི་དགས་མིག་ཅན་ཁེངས་པ་དག། ཉམས་པའི་ཡོ་ཉ་ཙུ་ད་ནི།
རབ་དུ་རྒྱས་དག་ཆགས་པ་ཡིས། སྨྱོས་པའི་རྒྱུ་ཡི་འོད་ཀྱིས་ནརྗེས།། 45

སྲུ་ངན་མེད་པ་དམར་པོ་ལ། ལོགས་གནས་འཁྲི་ཤིང་གིས་འཁྲུད་དོགས།
ཕྲག་དོག་ཅན་བཞིན་མི་དོག་རྣམས། མ་ལ་ཡ་ཡི་རླུང་གིས་ཕྲོགས།། 46

ཁྲ་བྱུག་གིས་རྒྱས་སྐྱེད་མོས་ཚལ། ལང་ཚོ་རྒྱས་པ་དེ་ཡི་ཚེ།
ནགས་ཚལ་བལྟ་བའི་ལྟད་མོ་ལ། རྒྱལ་པོ་བཙུན་མོ་འི་ཚོགས་བཅས་སོང་།། 47

ཁ་དོག་སྣ་ཚོགས་མེ་དོག་རྣམས། ལྷུང་བའི་ཚོགས་ཀྱིས་རབ་སྤྲས་པ།
དགའ་བའི་ནགས་ཚལ་བལྟ་ཞིང་དེ། དལ་བུས་དཀའ་ཐུབ་ནགས་སུ་ཕྱིན།། 48

ནགས་ཀྱི་ས་གཞི་མཛེས་པ་དེར། མཛེས་པའི་གྲོགས་དང་ལྷན་རིང་དུ།
རོལ་ཞིང་རྩེ་དགའ་ངལ་གསོ་བས། སྐད་ཅིག་གཅིག་ནི་ཐོབ་པར་གྱུར།། 49

སྟོན་མེད་མི་དོག་འཛུམ་པ་ཡི། སྐྱེ་མ་རབ་དུ་འཐུ་ཞིང་དེར།
བཙུན་མོའི་ཚོགས་ཀྱིས་བུད་མེད་རྣམས། གཡོ་བའི་འཁྲི་ཤིང་བཞིན་དུ་སོང་།། 50

སྐབས་དེར་བཟོད་པ་སྨྲ་བ་ནི། དབེན་པའི་གནས་ན་རབ་དགྲེས་པས།
ཞི་བ་རྗེས་སུ་སེམས་བྱེད་ཅིང་། གཅིག་དུ་གཡོ་བ་མེད་པར་གནས།། 51

अथादभ्रभ्रमद्भृङ्गभ्रूभङ्गमलिनाननः ।
मुनिसंयमविद्वेषी वसन्तः प्रत्यदृश्यत ॥ ४४ ॥

मदनोन्मादभूतस्य प्रोद्भूतस्य मृगीदृशाम् ।
मानविध्वंसदूतस्य चूतस्य रुरुचे रुचिः ॥ ४५ ॥

रक्ताशोकस्य पार्श्वस्थलतालिङ्गनशंकितः ।
ईर्ष्यालुरिव पुष्पाणि जहार मलयानिलः ॥ ४६ ॥

उद्यानयौवने तस्मिन् काले कोकिलसंकुले ।
सान्तःपुरो नृपः प्रायाद् वनालोकनकौतुकी ॥ ४७ ॥

नानावर्णपतत्पुष्पप्रकारप्रचितानि सः ।
पश्यन् वनानि रम्याणि शनैः प्राप तपोवनम् ॥ ४८ ॥

वनस्थलीषु कान्तासु तत्र कन्यासख श्चिरम् ।
विहृत्य रतिविश्रान्तः क्षणं निद्रा मवाप्तवान् ॥ ४९ ॥

अपूर्व्वकुसुमस्मेरा श्छिन्वाना स्तत्र मञ्जरीः ।
अन्तःपुराङ्गना श्चेरुः संचारिण्यो लता इव ॥ ५० ॥

अत्रान्तरे क्षान्तिवादी विविक्तोद्देशनिर्वृतः ।
एकान्ते निश्चल स्तस्थौ शान्ति मन्त विचिन्तयन् ॥ ५१ ॥

མི་དམར་ཀུན་དགའ་ལ་སྤྲོ་ཞིང་། མཁས་པ་རྣམས་ཀྱིས་ཐུག་ཕྲད་འོས།
རིད་ཀྱང་མཛེས་སྡུག་མ་ཉམས་པ། ཐོག་མའི་རི་བོང་ཅན་ཤར་བཞིན།། 52

ཡིད་འོང་ཡོངས་སུ་གྱུར་པ་ཡི། རི་མོའི་དབྱིབས་ནི་མཛེས་པ་དག།
རི་མོ་སྙིང་པའི་ཚུལ་གྲིས་ནི། གཟུགས་ཀྱིས་སྟོངས་པར་མ་གྱུར་པའོ།། 53

སེམས་ཀྱི་མེ་ལོང་དག་བྱེད་པ། དེ་མཐོང་རྒྱལ་པོའི་བཙུན་མོའི་ཚོགས།
དེ་དག་རི་མོ་བྲིས་པ་བཞིན། དེ་ཉིད་དུ་ནི་གཡོ་མེད་གནས།། 54

དེ་ནས་མི་བདག་སྨུར་སྨད་པས། མ་དུན་དུ་བཙུན་མོ་མཐོང་མ་གྱུར།
ཉགས་སུ་བལྟས་པས་ཐུབ་པ་ལ། ཡོངས་སུ་བསྐོར་ནས་གནས་པ་མཐོང་།། 55

དེ་མཐོང་ཉིད་ཀྱི་ལག་འགྲོ་ནི། དབུགས་གཏོད་ཐག་རོག་དུག་གིས་འཁྲུགས།
ཧ་ལ་ཧ་ལ་བཞིན་དུ་ནི། རབ་གྲགས་ཚིག་གི་ཚུལ་གྲིས་སྨྲས།། 56

ཐུབ་པའི་མཚན་མར་བཅོས་པ་ཡི། ཚས་ཀྱིས་མཚར་བ་ཁྱོད་འདྲ་སུ།
ཀློད་པོ་རྣམས་ཀྱི་སྙིང་འཕྲོག་ཁྱོད། ངེས་པར་བུད་མེད་རྣམས་ལ་འབྲིད།། 57

གཞན་གྱི་བུད་མེད་འཕྲོག་བསྟན་ནས། དེ་མི་བགགས་ཀློག་བཀླས་པ་དང་།
དྲང་པོའི་ཡིད་རྗེན་དགའ་ཐུབ་ནི། གཡོ་སྒྱུ་ཅན་གྱི་ཐབས་མཆོག་ཡིན།། 58

ཁ་དངར་སྒྲུ་ལྡན་ཤིང་ཤུན་ཅན། ཁྱོད་ཀྱི་པགས་པ་ནགས་ཀྱི་ནི།
དུག་གི་ལྷོད་པ་བཅད་པ་བཞིན། ཀྱི་མ་སྨོངས་པ་སྐྱིད་པ་ཡིན།། 59

अमन्दानन्दविष्यन्दी वन्दनीयो मनीषिणाम् ।
कृशोऽप्यकृशसौन्दर्य्यः शशीव प्रथमोदितः ॥ ५२ ॥

परिणाममनोज्ञेन रेखासंस्थानशोभिना ।
पुराणचित्ररूपेण नैव शून्या तदाकृतिः ॥ ५३ ॥

तं दृष्ट्वा राजललना श्चित्तदर्प्पणमार्ज्जनम् ।
तत्रैव निश्चला स्तस्थु स्ता श्चित्रलिखिता इव ॥ ५४ ॥

प्रबुद्धोऽथ नृपः क्षिप्रं नापश्यद्दयिताः पुरः ।
ददर्श वन मन्विष्य परिवार्य्य स्थिता मुनिम् ॥ ५५ ॥

भुजङ्ग स्ता विलोक्यैव श्वसन्नीर्ष्याविषाकुलः ।
विससर्ज वचोरूपहलाहलमिवोत्कटम् ॥ ५६ ॥

कस्त्वं मुनिव्यञ्जनया चित्रकृत्रिममायया ।
मुष्णासि मुग्धहृदया नूनं नारीप्रतारकः ॥ ५७ ॥

परस्त्रीहरणे ध्यानं जप स्तद्विघ्नवारणे ।
धूर्त्तानां परमोपायः सरलाश्वासनं तपः ॥ ५८ ॥

मुखमाधुर्य्यधूर्त्तस्य वृत्ति र्व्वल्कलिन स्तव ।
अहो नु मोहजननी वने विषतरोरिव ॥ ५९ ॥

ཐུབ་པར་བརྟག་པ་ལྟ་བུའི་ཚམ། སྤྱོད་པ་སླར་ཡང་འདི་འདྲ་བ།
ནང་གི་དེ་ཉིད་རྩོལ་ཆོས་ཀྱིས། བསྒྲུབས་པའང་སུ་ཞིག་དག་གིས་རིག། 60

ས་བདག་ཁྲི་བས་འདི་བརྗོད་ཚེ། ཁྲོ་མེད་ཟན་པའི་བསམ་པ་ཅན།
བཟོད་པ་སྨྲ་བས་རྣམ་འགྱུར་དང་། དྲལ་བའི་ཡིད་ཀྱིས་དེ་ལ་སྨྲས། 61

བདག་ནི་ཐུབ་པ་བཟོད་པ་སྨྲ། བདག་ལ་དོགས་པ་བྱ་མི་འོས།
མཛེས་མ་འདི་དག་རྣམས་དང་ནི། འཁྲི་ཤིང་དག་ལ་བྱེ་བྲག་མེད། 62

ཅེས་པ་དེ་ཡིས་བརྗོད་ཐོས་ནས། དེ་ནི་ཁྱོད་ཀྱི་བཟོད་པ་བལྟའོ།
ཞེས་པ་བརྗོད་ཅིང་མི་བདག་གིས། རལ་གྲིས་དེ་ཡི་ལག་གཉིས་བཅད། 63

བཟོད་པའི་ངང་ཚུལ་ཁྱད་པར་དུ་འང་། རྣམ་འགྱུར་མེད་པ་དེ་མཐོང་ནས།
རབ་ཞི་ལ་ཡང་ཁྲོ་ལྡན་པས། དེ་ཡི་རྐང་པ་གཉིས་ཀྱང་བཅད། 64

ལས་དུ་དགེ་བ་མིན་པ་སྤྱིར། ལྷ་ཡིས་སྤྲུན་ནི་འཁྲིན་པར་བྱེད།
མཐུག་དུ་ལུས་ནི་ཡོངས་སུ་གཅོད། མི་བསྲུན་པ་རྣམས་ཁྲོ་བཞིན་ནོ། 65

བརྗེགས་པར་གྱུར་ཀྱང་བཟོད་པར་ཆགས། ཕྱུང་པོ་བཅད་ཀྱང་སྨྲ་བཅད་ལྡན།
དྲག་པོར་གདུངས་ཀྱང་བསིལ་བར་གནས། དྲང་པོ་རྣམས་ཀྱང་ཐང་ཤིང་བཞིན། 66

ལག་པ་རྐང་པ་རེས་བཅད་པའི། གདུང་བ་དྲག་པོ་བརྟག་ཐུས་ནས།
ཁྲོ་བས་འཁྲུགས་པའི་ཡིད་དག་ནི། བཟོད་པས་བསྒྲུངས་ཤིང་དེ་ཡིས་བསམས། 67

मुनिकल्पसमाकल्प श्चरितं पुनरीदृशम् ।
सिद्धिं सम्भावितात्म्वापि वेत्ति क स्तत्व मान्तरम् ॥ ६० ॥

इत्युक्ते भूभुजा क्रोधादक्रोधमधुराशयः ।
निर्व्विकारेण मनसा क्षान्तिवादी जगाद तम् ॥ ६१ ॥

क्षान्तिवादी मुनिरहं न मां शंकितुमर्हसि ।
एतासु निर्विशेषो मे कान्तासु च लतासु च ॥ ६२ ॥

इति तेनोक्त माकर्ण्य क्षान्तं पश्यामि तेऽधुना ।
इति ब्रूवाण श्चिच्छेद हस्तौ तस्यासिना नृपः ॥ ६३ ॥

विशसेऽपि क्षमाशीलं निर्व्विकारं विलोक्य तम् ।
चकर्त्त चरणौ तस्य प्रशमाय समत्सरः ॥ ६४ ॥

प्रदिशन्त्यशिवं मार्गे जिह्वया दूषयन्ति च ।
लुम्पन्त्यङ्गानि पर्य्यन्ते खलाः कौक्षेयका इव ॥ ६५ ॥

ताड़नेऽपि क्षमासक्ताः स्कन्धच्छेदेऽपि मौनिनः ॥
शीतला स्तीव्रतापेऽपि सरलाः सरला इव ॥ ६६ ॥

निकृत्तपाणिचरणः स संस्तभ्य पृथुव्यथाम् ।
रक्षन् मन्युमनःक्षोभं क्षमया समचिन्तयत् ॥ ६७ ॥

ཇི་ལྟར་འདི་ཡིས་ལས་གཞན་རྣམས། བཏང་ནས་བདག་གི་ལུས་བཙད་པ།
དེ་བཞིན་བདག་གིས་འཁོར་བ་ཡི། མི་བཟོད་ཉོན་མོངས་གཅོད་གྱུར་ཅིང་།། 68

མི་བདག་ཁྲོ་བས་སྨོངས་པ་ཡིས། ཐུབ་པ་སྨྲུན་ཟླར་མ་ཞེས་པར།
གྲོང་ཁྱེར་སོང་ཚེ་རྡུལ་གྱིས་ས། ཀླུ་ངན་བྱེད་བཞིན་དྲི་མར་གྱུར།། 69

དེ་ནས་དེ་ཡི་བཟོད་པའི་ལྷ། དེ་སྡུག་བསྔལ་བས་རྒྱལ་ལ་ཁྲོས།
གྲོང་ཁྱེར་དུ་ནི་སྦུ་གི་དང་། ཡམས་དང་ཆར་མེད་ཉེར་འཚེ་བྱས།། 70

རྒྱལ་པོས་ཐུབ་ལ་གནོད་བྱས་ལ། ལྷ་རྣམས་ཁྲོས་དེ་བསྐྱེད་པའི་སྐྱོན།
མཚན་མ་མཁན་ལས་ཞེས་ནས་ནི། དེ་ལ་དང་པར་བྱེད་དུ་སོང་།། 71

དེ་ཡི་ཞབས་གཉིས་ལ་བཏུད་ནས། བཟོད་པ་མཛོད་ཅེས་བཟློད་ནས་ནི།
ཕྱི་ནས་འགྲོད་པའི་ཀླུ་ངན་གྱིས། སེམས་དང་བྲལ་བ་བཞིན་དུ་གྱུར།། 72

བཟོད་པ་སླ་བས་དེར་སླས་པ། བདག་ལ་ཁྲོ་བ་ཆུང་ངུའང་མེད།
ལས་ཀྱི་རི་མོས་ཡོངས་བཅད་པས། རྒྱལ་པོ་འདི་འདྲ་སྐྱོང་བྱ་ཉིད།། 73

ཐམས་ཅད་ཟ་བྱེད་རང་དབང་དུ། ངེས་པར་སྐྱོང་བྱ་རྟེ་བ་ཡིན།
བརྟན་མིན་ཡོན་ཏན་མིན་དོན་མིན། དཀའ་ཐུབ་མ་ཡིན་ཛེ་ས་མིན།། 74

སྐྱེ་བའི་གཞི་ལ་རྩ་བའི་སྟོབས་ཆེ་ལྡན་པ་རང་གི་ལུས།
གསར་སྐྱེས་དག་གི་འབྲས་བུ་དུས་ཀྱི་ཡོངས་སུ་སྨིན་པ་ནི།

त्यक्तान्यकर्म्मणानेन च्छिन्नान्यङ्गानि मे यथा ॥
संसारविषमक्लेशच्छेदं कुर्य्यामहं तथा ॥ ६८ ॥

कोपमोहादविज्ञाय नृपतौ भ्रातरम्मुनिम् ॥
पुरीं प्रयाते रजसा शोकम्लानेव भूरभुत् ॥ ६९ ॥

तत स्तद्दुःखकुपिता राज्ञे तत्क्षान्तिदेवता ॥
चक्रे नगर्य्यां दुर्भिक्षमरकावृष्टिविप्लवम् ॥ ७० ॥

नैमित्तिकोभ्यो विज्ञाय राजा मुनिपराभवात् ॥
देवताकोपजं दोषं तं प्रसादयितुं ययौ ॥ ७१ ॥

निपत्य पादयोस्तस्य क्षमस्वेत्यभिधाय सः ॥
पश्चात्तापविषादेन निश्चेतन इवाभवत् ॥ ७२ ॥

त मब्रवीत् क्षान्तिवादी राजन् मन्यु र्न मेऽल्पपि ।
कर्म्मरेखापरिच्छेदादीदृशी भवितव्यता ॥ ७३ ॥

सर्व्वाणि न गणयति स्वच्छन्दा भवितव्यता ।
न धैर्य्यं न गुणं नार्थं न तपो नापि गौरवम् ॥ ७४ ॥

अन्तस्थितप्रसववीजपरम्पराणि
भिन्नानि कालपरिपाकविचिचितानि ।

རྣམ་པར་བཀྲ་ཞིང་ཐ་དད་གྱུར་པ་རྒྱུད་མར་སྐྱེས་པ་ཡི།
ས་བོན་ནང་ན་གནས་པ་སྐྱེ་བོ་རྣམས་ཀྱིས་སྤྱོད་པ་ཡིན།། 75

དེ་སྐད་ས་བདག་ཁྱོད་ལ་བདག། རྣམ་འགྱུར་ཅི་ཡང་ཡོད་མ་ཡིན།
བདེན་པ་འདི་ཤེས་བདག་གི་ཁྲག། འོ་མ་ཉིད་དུ་གྱུར་ལ་ལྟོས།། 76

ཡན་ལག་བཅད་ཀྱང་བདག་གི་ཤིད། གལ་དེ་སྡིག་མེད་གྱུར་བ་ན།
བདེན་པ་དེ་ཤེས་བདག་གི་ནི། ཡན་ལག་དེ་དག་འགྱུར་བར་ཤོག།། 77

ཅེས་པ་དག་པའི་བློ་ལྡན་དེས། མཆོག་ཏུ་བདེན་པ་བརྗོད་པ་ལས།
འཕྲུལ་ལ་ཡན་ལག་དེ་དག་ཉིད། འགྱུར་ནས་རྣལ་དུ་གནས་པ་ཐོབ།། 78

དེ་ནས་མི་བདག་ཅོད་པན་ནི། ཞབས་ལ་རེག་པས་དེ་ལ་སྨྲས།
ཐུབ་པ་ཁྱོད་ནི་མཐུ་ཆེན་པོ། དེ་ལས་དཀའ་ཐུབ་ཀྱིས་ཅི་བཞེད།། 79

སྨོངས་པས་ལོང་བ་སྡིག་པ་ཤེས། གསང་ལ་ལྷུང་བར་གྱུར་པ་བདག།
སྙིང་རྗེའི་གཏེར་ཁྱོད་བསོད་རྣམས་ཀྱི། ལག་པའི་འཆེས་ལས་གདོན་པར་འོས།།
80

ས་དབང་གིས་དེར་གསོལ་བཏབ་པའི། ཐུབ་པས་དེ་ལ་ལན་སྨྲས་པ།
ཁྲིང་པ་རྣམས་ནི་ལེགས་བསྒྲལ་དང་། བཅིངས་པ་རྣམས་ཀྱང་དགྲོལ་བ་དང་།།81

འཇིགས་པ་རྣམས་ནི་དབུགས་དབྱུང་དང་། རྣམ་པར་སྨོངས་རྣམས་ཐར་བྱའི་སྐད།
རྒྱལ་པོ་བླ་མེད་ཡང་དག་པར། རྫོགས་པར་བྱང་ཆུབ་ང་དག་དོན་ཉིར།། 82

जन्मस्थले विपुलमूलबलस्य जन्तु
र्भुंक्ते फलानि निजकर्म्ममहीरुहस्य ॥ ७५ ॥

त्वयि तस्मान्न मे कश्चित् विकारोऽस्ति महीपते ।
सत्येनानेन मे पश्य रुधिरं क्षीरतां गतम् ॥ ७६ ॥

अङ्गच्छेदेऽप्यकलुषि बभूव यदि मे मनः ।
सत्येनैतेन श्लिष्टानि तान्येवाङ्गानि सन्तु मे ॥ ७७ ॥

इति शुद्धधिय स्तस्य तीव्रसत्योपयाचनात् ।
श्लिष्टान्यङ्गानि तान्येव सहसा स्वास्थ्य माययुः ॥ ७८ ॥

मुकुटस्पृष्टचरण स्त मुवाच नृप स्ततः ।
मुने महाप्रभावोऽसि तपसा तत् किमिच्छसि ॥ ७९ ॥

पुण्यहस्तावलम्बेन मोहान्धं करुणानिधे ।
पापावसाने पतितं मां त्व मुद्धर्त्तु मर्हसि ॥ ८० ॥

इत्यर्थितः क्षितीशेन प्रत्यभाषत तं मुनिः ।
सन्तारणाय मग्नानां बद्धानामपि मुक्तये ॥ ८१ ॥

आश्वासनाय भीतानां निर्व्वाणाय विमुच्यताम् ।
राजन्ननुत्तरां सम्यक्संबोधि महमर्थये ॥ ८२ ॥

བླ་མེད་ཡང་དག་རྫོགས་པ་ཡི། བྱང་ཆུབ་གང་ཆེ་བདག་གིས་ཐོབ།
དེ་ཚེ་ཡི་ཤེས་རལ་གྲི་ཡིས། སྲིད་ཀྱི་རྨོངས་པ་གཅོད་པར་བྱ།། 83

ཐུབ་པས་དེ་བཟོད་དེ་ལ་ནི། ཁམས་བདེ་བྲུས་ནས་རང་གནས་སོང་།
རྒྱལ་པོའི་གནས་སུ་སྨི་བདག་ཀྱང་། དེ་ཉིད་ཡིད་ལ་སེམས་ཤིང་སོང་།། 84

བཟོད་པ་སྨྲ་བ་དེ་ཉིད་ང་། དུས་སུ་ཀཽཎྜི་ནྱ་འདི།
ད་ལྟ་ཡང་དག་རྫོགས་བྱང་ཆུབ། ཐོབ་ནས་བདག་གིས་འདི་བསྒྲལ་དོ།། 95

ཞེས་པ་བདེ་གཤེགས་ཞལ་གྱི་པདྨ་ལས་འཁྲུངས་པ།
ཡིད་འོང་སྙན་ཚིའི་གཟུགས་བརྙན་རབ་ཏུ་དང་བའི་གསུང་།
བུང་པའི་ཚོགས་བཞིན་དགེ་སློང་ཚོགས་ཀྱིས་རབ་འཐུངས་ནས།
རབ་ཏུ་དགའ་བ་རྒྱས་པ་ཅི་ཡང་བྱུང་བར་གྱུར།། 86

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཀ་ཤིའི་མཛེས་པའི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ཉི་ཤུ་རྩ་དགུ་པའོ།།

यदा तु सम्यक् संबोधि न्ता मवाप्नोष्यनुत्तराम् ॥
मोहच्छेदं करिष्यामि तदा ज्ञानासिना तव ॥ ८३ ॥

प्रययौ मुनिरित्युक्त्वा त मामन्त्र्य स्व माश्रमम् ।
तमेव मनसा ध्यायन् राजधानीं नृपोऽप्यगात् ॥ ८४ ॥

क्षान्तिवादी स एवाहं कौण्डिन्यः कालभूरयम् ।
आसाद्य सम्यक्सम्बोधि मुद्धृतोऽयं मयाधुना ॥ ८५ ॥

इति सुगतमुखारविन्दनिर्मित-
मधुरमधुप्रतिमं वचः प्रसन्नम् ।
भ्रमरभव इवोदितप्रमोदः
किमपि बभूव निपीय भिक्षुसंघः ॥ ८६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
काशीसुन्दरावदानं नाम ऊनत्रिंश पल्लपः ।

ཡལ་འདབ་སུམ་བཅུ་པ།

སེམས་ཅན་སྙིང་པོ་དྲང་ཞིང་ལེགས་སྤྱོད་བསོད་ནམས་
གནས་དེ་སུ་ཡང་ཕྱུག་བྱུར་འོས།

ཆོས་ལམ་བགྲོད་པའི་གེགས་དང་ཤིན་ཏུ་ངན་པར་སྤྱོད་དེ་
སུ་ཡང་སྨད་པར་འོས།

གང་གི་སྤྱོད་པ་བཀྲ་བ་རྣམ་དཔྱོད་ཡུན་རིང་སྤྱི་ལོང་རྒྱུས་པས་བྱུགས་གྱུར་པ།
དེ་དག་བསྡུགས་ན་སྐྱེ་བོ་མིག་ཆུ་ལྡན་ཞིང་མི་སྨྲ་ཉིད་དུ་མཚུངས་པར་གྱུར།། 1

དགེ་སློང་རྣམས་ཀྱིས་ལྷ་སྦྱིན་གྱི། ཞར་ལ་མདོན་དྲིས་བཅོམ་ལྡན་གྱིས།
སྔོན་གྱི་བྱུང་བའི་མཐའ་དག་ལ། བརྗེད་པའི་མཐའ་ནི་བཀའ་སྩལ་པ།། 2

བ་ར་ཧ་སེར་མི་ཡི་དབང་། དབང་པོ་འི་སྐྱེ་ཆེན་ཞེས་པ་བྱུང་།
གང་གི་དཔལ་གྱིས་ས་ཡི་དབང་། ཐམས་ཅད་སྐྱེངས་པ་ཉིད་དུ་གྱུར།། 3

དེ་ཡི་ལྷ་མོ་གྲགས་པ་བཞིན། ཡིད་འོང་ཟླ་བའི་འོད་ཅེས་གྱུར།
གང་གིས་བདེན་པ་མཐུ་ཡིས་ནི། མི་ལམ་བདེན་པ་ཉིད་དུ་གྱུར།། 4

དུས་དེར་ནགས་སུ་རི་དགས་ཀྱི། ཕྲུ་ཡི་བདག་པོ་བྱུང་གྱུར་པ།
གསེར་གྱི་ཡོགས་ཞེས་བྱ་བའི་མིང་། ཐོབ་ཅིང་གསེར་གྱི་རང་བཞིན་སྣང་།། 5

མུ་ཏིག་དོ་ཤལ་གསལ་བའི་ཁྲིངས། རིན་ཅན་མཐིང་གིས་སྤྲས་འདྲའི་འོད།
གང་གི་མིག་གི་རྫི་མ་ནི། ནགས་ཀྱི་དཔལ་གྱི་རྒྱན་དུ་མཛེས།། 6

त्रिंश पल्लवः ।

श्लाघ्यः कोऽपि स सत्त्वसारसरलः सौजन्यपुण्यस्थिति-
र्न्निन्द्यः कोऽपि स धर्म्ममार्ग्गगमने विघ्नः कृतघ्नः परम् ।
चित्रं यच्चरितं विचार्य्य सुचिरं रोमाञ्च चर्च्चाचित-
स्तुल्यं याति जनः सवास्पनयन स्तद्वर्णने मूकताम् ॥ १ ॥

देवदत्तप्रसङ्गेन भिक्षुभि र्भगवान् पुरा ।
पृष्टः कथा मकथयत् पूर्व्ववृत्तान्तसंश्रयाम् ॥ २ ॥

महेन्द्रसेननामाभूद् वाराणस्यां नरेश्वरः ।
ययुः क्षितीश्वराः सर्व्वे यस्य लक्ष्म्या विलक्षताम् ॥ ३ ॥

चन्द्रप्रभाभवत्तस्य दिव्यकीर्त्तिरिव प्रिया ।
यस्याः पत्युः प्रभावेण स्वप्नाः सत्यत्व माययुः ॥ ४ ॥

बभूव समये तस्मिन् मृगयूथपति र्व्वने ।
सुवर्णपार्श्व इत्याप्तनामा हेममयच्छविः ॥ ५ ॥

नीलरत्नोदरास्फारमुक्ताहारनिभप्रभा ।
अभूद्दृष्टिच्छटा यस्य भूषणं काननश्रियः ॥ ६ ॥

བྱུ་རུའི་འཁྲི་ཤིང་ར་ཙོ་དང་། རིན་ཅན་བཀྲ་བའི་པགས་པས་ཀྲུས།
ངོ་མཚར་བདུད་རྩིའི་རྒྱ་གཏེར་གྱི། ཟ་ཧྲབས་དེ་ཡི་འོད་ཟེར་མཛེས།། 7

བྱང་ཆུབ་སེམས་དཔར་ཞུགས་གྱུར་པ། དེ་ཡི་གཟུགས་ནི་མཛེས་པར་གྱུར།
གང་ཕྱིར་ལེགས་བྱས་རི་མོ་ཡི། དང་པོའི་མཚན་ཉིད་གཟུགས་བཟང་ཉིད།། 8

དེ་ཡི་གྲོགས་པོ་བྱ་རོག་ནི། ཤན་པོ་རིང་དུ་མཐོང་བར་གྱུར།
ཛོན་པ་འཚོལ་བས་འཛིགས་པ་ཡིས། དེ་ནི་མཆོག་དུ་ཕྱོགས་རྣམས་ལྟ།། 9

དེ་དག་ཕན་ཚུན་དགའ་བ་ཡི། གདམ་གྱིས་དབེན་པར་རྣམ་པར་རྩེན།
དུད་འགྲོ་ལ་ཡང་སྔོ་མ་ཡི། བསོད་ནམས་རྣམས་ཀྱི་མི་སྐད་འབྱུང་།། 10

ནམ་ཞིག་རྒྱ་ནི་འཚོལ་བྱེད་ཅིང་། ཁྱུ་ཡི་མགོན་དེ་རྗེས་འབྲང་བཅས།
ལྷུ་བའི་འཕྲེང་ལྡན་རྒྱ་སྐྱུང་གིས། འཛུག་ངོགས་དག་དུ་སོང་བར་གྱུར།། 11

དེ་ཡི་ཚེ་ངའི་སྐྱ་དག་ནི། ཤིན་དུ་ཆེ་ཞིང་རིང་བ་ཐོས།
རི་དགས་ཐམས་ཅད་མགྲིན་པ་ནི། འཁྲིག་པའི་རྣམ་འཕྲུལ་ལྡན་པས་བྲོས།། 12

གསེར་གྱི་ལོགས་ནི་དེ་ཡི་ཚེ། བརྩེ་བའི་ཞགས་པས་དབང་དུ་བྱས།
མདའ་ཡིས་གནད་དུ་ཕུག་པ་བཞིན། དེ་ཉིད་དུ་ནི་གཡོ་མེད་གནས།། 13

དེ་ནི་གདོན་པར་ཆས་པ་དག། བྱ་རོག་རིང་དུ་མཐོ་བ་ནི།
མཐོང་ནས་དེ་ལ་སྨྲས་པ་གྲོགས། ཁྱོད་ཀྱི་བརྩོན་པ་འདི་མི་རིགས།། 14

प्रबालवल्लिशृङ्गस्य चित्ररत्नचितत्वचः ।
तस्याश्चर्य्यसुधाम्भोधिलहरी ददृशे रुचिः ॥ ७ ॥

बोधिसत्त्वावतारस्य तस्य कान्त मभूद् वपुः ।
पूर्व्वं सुकृतचित्तस्य लक्षणं हि सुरूपता ॥ ८ ॥

दीर्घदृष्टि र्बभूवास्य वयस्यो वृद्धवायसः ।
लुब्धकान्वेषणव्यासे दिग्विलोकनतत्परः ॥ ९ ॥

तौ कथाभि र्मिथः प्रीत्या विविक्तेषु विजह्रतुः ।
प्राक्पुण्यै र्जायते वाणी तिरश्चामपि मानुषी ॥ १० ॥

स कदाचिज्जलान्वेषी यूथनाथः सहानुगैः ।
तटिन्या वेणुमालिन्याः पुलिनं समुपाययौ ॥ ११ ॥

तस्य तारतरं श्रुत्वा दीर्घं माक्रन्दनिस्वनम् ।
हरिणा दुद्रुवुः सर्व्वे ग्रीवावलनविभ्रमैः ॥ १२ ॥

सुवर्णपार्श्वस्तु तदा कृपापाशवशीकृतः ।
तत्रैव निश्चल स्तस्थौ मर्म्मविद्ध इवेषुणा ॥ १३ ॥

तदुद्धरणसन्नद्धं दीर्घदृष्टिं विलोक्य तम् ।
काकः प्रोवाच न सखे युक्तोऽय न्ते समुद्यमः ॥ १४ ॥

ཀྲུད་པའི་དུས་ན་མི་དོག་མཚུངས། དོན་བྲམ་པ་ནི་རྡོ་རྗེ་འདྲ།
མི་བསྲུན་རང་གི་ལུས་ཀྱི་གྲོགས། འདི་དག་བྲམ་པ་མི་བསམ་མོ།། 15

དེ་དག་བྲ་རོག་གིས་བཟོད་ཀྱང་། སྙིང་རྗེས་གྲུས་ཤིང་དྲང་བ་དེ།
ཚུ་བོ་ལ་ནི་སྦྱུར་བ་རྩ། ཞུགས་ནས་དེ་ནི་ཐར་པར་བྱས།། 16

དོགས་མེད་དེ་ཡི་རྩ་དག་གིས། དེ་ཡི་བཅིངས་པ་རྣམས་བཀྲོལ་ནས།
ཞན་ཅིང་ཀྱང་པར་གདུགས་བྱས་དེ། འགྲོ་བར་བརྩོན་པ་དེ་ལ་སྨྲས།། 17

གྲོགས་པོ་ཁྱོད་ཀྱིས་སུ་ལ་ཡང་། བདག་ནི་འདིར་གནས་སྨྲ་མི་བྱ།
པགས་པ་ལ་ཆགས་རྗེན་པ་ནི། གསེར་གྱི་འོད་ཅན་བདག་དོན་གཉེར།། 18

དེ་ཡི་དུལ་བས་དེ་བཟོད་ཚེ། གྲུ་གྲུ་ཅན་ཞེས་བྲ་བ་དེས།
དེ་ལ་ཕྱག་འཚལ་བསྟོད་པས་བསྟོད། དེ་དེ་བཞིན་ཞེས་བཟོད་ནས་སོང་།། 19

སྐབས་དེར་མཚན་མོ་རྨི་ལམ་དུ། མི་བདག་བཙུན་མོ་ཟླ་འོད་ཀྱིས།
རི་དགས་དམ་ཆོས་སྨྲས་བྱེད་ཅིང་། སྟོན་ལ་འཁོད་པ་དེ་མཐོང་གྱུར།། 20

དེ་ནས་བདེན་སྨི་ལྷ་མོ་དེ། རབ་སང་མི་ཡི་བདག་ལ་སྨྲས།
ལྷ་གཅིག་བདག་གི་རྨི་ལམ་དུ། རྨད་བྱུང་གསེར་གྱི་རི་དགས་མཐོང་།། 21

རི་དགས་དེ་ནི་མངོན་སུམ་དུ། གྱུར་པ་མཐོང་བ་བདག་འཚལ་ལོ།
རི་དགས་མཚན་མའི་མཚོན་མ་ལས། སྨྲ་གཅན་རིགས་པས་འཐོབ་པ་བཞིན།། 22

पुष्पोपमा विपत्काले कृतार्थाः कुलिशोपमाः ।
कृत मेते न मन्यन्ते स्वकायसुहृदः खलाः ॥ १५ ॥

इत्यसौ वार्य्यमाणोऽपि काकेन करुणाकुलः ।
अवतीर्य्याशु सरितं सरल स्त मतारत ॥ १६ ॥

विमुच्य बन्धनान्यस्य स शृङ्गाभ्या मशङ्कितः ।
तं पादपतितं दीन मवदद् गन्तुमुद्यतम् ॥ १७ ॥

न त्वया कथनीयोऽह मत्रस्थः कस्यचित् सखे ।
प्रार्थयन्ते सुवर्णं मां चर्म्मलुब्धा हि लुब्धकाः ॥ १८ ॥

इत्युक्त स्तेन विनयात् तत्तथेत्यभिधाय सः ।
ययौ कुटिलकाख्य स्तं प्रणम्य प्रस्तुतस्तुतिः ॥ १९ ॥

अत्रान्तरे नरपतेः पत्नी चन्द्रप्रभा निशि ।
स्वप्ने ददर्शासनस्थं मृगं सद्धर्म्मवादिनम् ॥ २० ॥

सत्यस्वप्नाय सा देवी प्रबुद्धा नृप मब्रवीत् ।
सुवर्णहरिणः स्वप्ने देव दृष्टो मयाद्भुतः ॥ २१ ॥

त मह द्रष्टु मिच्छामि साक्षादुपगतं मृगम् ।
अङ्कादिव मृगाङ्कस्य निर्गतं राहुशंकया ॥ २२ ॥

ལྷ་མོས་གཙུགས་པས་དེ་བརྗོད་ཚེ། མཛའ་སྐྱད་ས་ཡི་བདག་པོ་ཡིས།
ནོར་རྣམས་ཕྱིན་ནས་ཇོན་པ་དག། རི་དགས་གཟུང་བའི་སྐད་དུ་བཏང་།། 23

དེ་ནས་ཇོན་པ་དེ་དག་རྣམས། ནགས་སུ་བཙལ་ནས་ཕྱིར་ལོག་སྟེ།
འདར་དང་བཅས་པས་མི་བདག་ནི། འབྲས་མེད་འོངས་པས་ཁྲོས་ལ་སྨྲས།། 24

ལྷ་གཅིག་རི་ཡིས་རྒྱས་པ་ཡི། འགྲོ་བ་འདི་ཉིད་རྣམ་པར་བཅལ།
ངལ་གསོ་མེད་པར་བདག་ཅག་འཁྱམས། དེ་ལྟའི་རི་དགས་ཉིད་མ་བྱུང་།། 25

མིག་ནི་ངོ་མཚར་བཀོད་པ་ཡིས། འགུགས་པ་རབ་ཏུ་མཛེས་པའི་མིག།
གསེར་གྱི་རི་དགས་རྨི་ལམ་དུ། ཡོངས་རྫོགས་གཟུགས་འདི་ག་ལ་ཡོད།། 26

ལྷ་གཅིག་གལ་ཏེ་ཡིད་ཀྱིས་ནི། དགེ་མཚན་དེ་ལ་དགྱེས་པ་ན།
བཟོ་བོ་མཁས་པ་ཁ་ཅིག་དག། གསེར་གྱི་རི་དགས་བགྱིད་དུ་སྩོལ།། 27

ཞེས་པ་ཐོས་ནས་མི་བདག་དེ། ནོར་ནི་རབ་མང་སྟེར་བྱེད་ཅིག།
རི་དགས་འཚོལ་བའི་བརྟག་པ་ལ། མངོན་པར་ཞེན་པ་ཉིད་དུ་བྱུང་།། 28

དེ་ནས་ནོར་མང་སྟེར་ཐོས་ནས། ཇོན་པ་པས་ཀྱང་ནོར་ལེན་ལ།
བཀས་ཆགས་བློ་ལྡན་གྱ་གྱུ་ཅན། མི་བདག་ལ་མངོན་ཕྱོགས་ནས་སྨྲས།། 29

ལྷ་གཅིག་བཀའ་དྲིན་མཛོད་ཅིག་དང་། རི་དགས་བདག་གིས་བསྟན་པར་བྱ།
གསེར་གྱི་རི་དགས་རི་དགས་དེ། ནགས་སུ་བདག་གིས་མཐོང་བར་གྱུར།། 30

इत्युक्तः प्रणयात् प्रीतो देव्या च पृथिवीपतिः ।
मृगग्रहाय व्यसृजत् लुब्धकान् द्रविणप्रदः ॥ २३ ॥

ततः प्रतिनिवृत्तास्ते वन मन्विष्य लुब्धकाः ।
निष्फलागमनक्रुद्धं सकम्पा जगदु र्नृपम् ॥ २४ ॥

इयन्ती जगती देव विचिता निचिताचलैः ।
भ्रान्ता वय मविश्रान्ता न लभ्य स्त्वद्विधो मृगः ॥ २५ ॥

आश्चर्यरचनाकृष्टलोचन श्चारुलोचनः ।
स्वप्नसम्पन्नरूपोऽसौ हिरण्यहरिणः कुतः ॥ २६ ॥

मनो विनोदने तस्मिन् यदि देव प्रसीदति ।
कुर्वन्तु काञ्चनमृगं कुशलाः केऽपि शिल्पिनः ॥ २७ ॥

इति श्रुत्वा स नृपति र्ददन् बहुतरं धनम् ।
मृगान्वेषणसक्तत्वे बभूवाभिनिवेशवान् ॥ २८ ॥

ततः कुटिलकोऽभ्येत्य नृपं श्रुत्वा बहुप्रदम् ।
उवाच द्रविणादाने लुब्धकेभ्योऽपि लुब्धधीः ॥ २९ ॥

प्रसादः क्रियतां देव मृगं सन्दर्शयाम्यहम् ।
दृष्टः कनकसाराङ्गः सारङ्गः स मया वने ॥ ३० ॥

ཅེས་པ་ཕྲོས་ནས་ས་ཡི་བདག། རབ་ཏུ་དགའ་བའི་མིག་གྲུས་པས།
བཟང་པོ་སྟོན་ཅིག་གང་ན་དེ། གང་ན་དེ་ཞེས་ཡང་ཡང་སྨྲས།། 31

རི་དགས་ལམ་ནི་སྟོན་བྱེད་པ། དེ་ཉིད་སྔོན་དུ་འགྲོ་བར་བྱས།
དཔུང་བཅས་དེ་ནི་ཐྲི་མེད་གདུགས། ཀླ་ཤར་རི་བོ་བཞིན་དུ་སོང་།། 32

དེ་ནས་གླང་པོ་རྟ་འགྲོས་ཀྱིས། བསྐྱངས་པའི་རྟལ་གྱི་ནགས་ཁྲོངས་པ།
ཤིང་རྟེར་གནས་པའི་བྱ་རོག་ནི། རིང་དུ་མཐོང་བས་མཐོང་བར་གྱུར།། 33

དེ་ཡིས་རི་དགས་ཁྱུ་ཡི་བདག། གསེར་གྱི་ལོགས་ལ་མངོན་ཕྱོགས་སྨྲས།
བདག་གིས་ཕན་པ་སྔོན་བརྗོད་དེ། ཁྱོད་ཀྱིས་མཉན་མིན་བྱས་པ་མིན།། 34

བདག་གིས་བཟློག་ཀྱང་ཁྱོད་ཀྱིས་ནི། གང་ལ་སྔོག་ནི་བྱིན་པ་སྟེ།
སྐྱེས་བུ་འདི་དེ་གོ་བགོས་ཤིང་། གཞུ་བཟུང་རྣམས་དང་ལྷན་ཅིག་འོངས།། 35

ད་ནི་འཇིགས་པ་བྱུང་ཚེ་ཀྱཱའི། གང་དུ་འགྲོ་བྱ་ཅི་ཞིག་བྱ།
ཕན་པ་ཅི་ཞིག་སྨྲ་བར་བྱ། མཉམ་དུ་འཆི་བར་བྱ་འམ་ཅི།། 36

བྱས་པ་མི་གཟོམ་རྟུངས་གཅོད། སྡིག་ལ་ཆགས་པའི་ངན་པ་འདི།
ཁྱོད་ཀྱིས་བདག་ཉིད་ཉམས་བྱའི་སླད། དུག་གི་ཀང་འཕྲང་བསྒྱུངས་པར་གྱུར།།
37

བྱས་པ་མི་གཟོ་འདི་རྟ་གདོང་མེ། རང་གི་ལུས་ཀྱི་གནས་དག་ཀྱང་།
ཡོངས་སུ་སྐྱུད་པས་མི་ངོམས་དེ། སྡིག་ཆགས་བཅས་པའི་རྒྱ་མཚོ་འཕྲངས།། 38

इत्याकर्ण्य क्षितिपतिः प्रहर्षोत्फुल्ललोचनः ।
भद्र सन्दर्शय क्वासौ क्वासावित्यवदन्मुहुः ॥ ३१ ॥

तमेवाग्रेसरं कृत्वा मृगमार्गप्रदर्शकम् ।
ससैन्यः स ययौ स्वच्छछत्रचन्द्रोदयाचलः ॥ ३२ ॥

दीर्घदृष्टि र्ददर्शाथ काक स्तरुशिरःस्थितः ।
गजवाजिव्रजोदीर्णरेणुप्रावरणं वनम् ॥ ३३ ॥

सुवर्णपार्श्व मभ्येत्य जगाद मृगयूथपम् ।
हित मुक्तं मया पूर्व्वं न श्रुतं न कृतं त्वया ॥ ३४ ॥

स एष पुरुषः प्राप्तः सन्नद्धैः सह धन्विभिः ।
मया निवारितेनापि संहारेण न तृप्यते ॥ ३५ ॥

अधुना क्व नु गन्तव्यं किं कर्त्तव्यं भयोद्भवे ।
हितं कि मनुवर्त्तव्यं तुल्यं मर्त्तव्यमेव वा ॥ ३६ ॥

कृतघ्नः क्रूरचरितः क्षुद्रोऽयं सङ्कपातकः ।
त्वयैवात्मविनाशाय रक्षितो विषपादपः ॥ ३७ ॥

स्वशरीरप्रदस्यापि संहारेण न तृप्यते ।
ससत्त्वसागरग्रासी कृतघ्नो वाड़वानलः ॥ ३८ ॥

བྲིས་མི་གཟོ་ལ་ཕན་པ་དང་། གྲུ་གྲུའི་བདག་ལ་ཡིད་གཙུགས་དང་།
ངན་པ་རྣམས་ལ་གདམས་ངག་ནི། བྲིད་པོ་འི་སྤྲིན་ནི་འབབ་ཞིག་ཡིན།། 39

ཞེས་པ་བྲ་རོག་གིས་བཤད་ཚེ། ས་ཡི་བདག་པོ་ཉེ་བར་འོངས།
ཁྲུད་ལ་ཕན་པའི་དུས་ལ་ནི། བབ་པ་ཁྲུ་ཡི་བདག་པོས་བསམས།། 40

དཔའ་བོ་རྣམས་ཀྱི་སྐྱེ་འདི་ཡིས། ནགས་ཚལ་ཆེན་པོ་བསྐོར་ནས་ནི།
བདག་གི་ཞར་ལ་རི་དགས་རྣམས། ཕུད་ཐམ་ཉིད་ཀྱི་མེད་པར་བྱེད།། 41

དེ་སྐད་དཔུང་གི་གཙོ་བོ་དང་། ཉེ་བར་རང་ཉིད་འགྲོ་བར་བྱ།
བདག་ཉིད་གཅིག་པུ་གསོད་གྱུར་ལ། རི་དགས་འདི་ཀུན་འཚོ་གྱུར་ཅིག། 42

དེ་ལྟར་ངེས་བྱས་རི་དགས་དེ། ས་བདག་དང་ནི་ཉེ་བར་སོང་།
གཞན་སྲོག་ཡོངས་སུ་སྐྱོབ་པ་ལ། བདག་ཉིད་ཆེ་རྣམས་སྲོག་ནི་རྩྭ།། 43

མདུན་དུ་མགྲོགས་པར་འོང་བ་དེ། མཐོང་ནས་གྲུ་གྲུ་ཅན་དགའ་བས།
རྒྱལ་ལ་མགྲོགས་པར་དེ་འདི་ཞེས། ལག་པ་དག་གིས་རིང་ནས་བསྟན།། 44

དེ་ཚེ་བྱ་རོག་དམོད་པ་ནི། རྡོ་རྗེ་ལྷུང་བ་ལྟ་བུ་ཡིས།
དེ་ཡི་ལག་པ་ཐེག་པ་ཡིས། ཤིང་འཕུང་ཡལ་འདབ་ཡོངས་སུ་ལྷུང་།། 45

རི་དགས་ཀྱིས་བཤད་དེ་ཡི་ཕྱིར། མི་བདག་ཡ་མཚན་ལྡན་པས་ཐོས།
ཞལ་ནས་བྱས་པ་མི་གཟོ་བའི། སྤྱོད་ཚུལ་སྨད་ཅེས་མ་ཆེར་གྱུར།། 46

उपकारः कृतघ्नेषु विश्वासः कुटिलात्मसु ।
उपदेशश्च मूर्खेषु कर्त्तुं दोषाय केवलम् ॥ ३९ ॥

इति काकेन कथिते प्रत्यासन्ने च पार्थिवे ।
अचिन्तयत् प्राप्तकालं हितं यूथस्य यूथपः ॥ ४० ॥

सुभटानामियं सेना विगाहेद् गहनं महत् ।
करोति मत्प्रसङ्गेन मुहूर्त्तेनैव निर्मृगम् ॥ ४१ ॥

तस्मात् सैन्यप्रधानस्य गच्छामि स्वयमन्तिकम् ।
एकस्यैव बधो मेऽस्तु सर्व्वे जीवन्त्वमी मृगाः ॥ ४२ ॥

इति निश्चित्य स ययौ समीपं भूपतेर्मृगः ।
परप्राणपरित्राणे तृणं प्राणा महात्मनाम् ॥ ४३ ॥

तमायान्तं द्रुतं दृष्ट्वा हृष्टः कुटिलकः पुरः ।
सोऽय मित्याशु पाणिभ्यां राज्ञे दूरे व्यदर्शयत् ॥ ४४ ॥

तत्क्षणे द्रोणशापेन वज्रेणेव निपातिना ।
करौ परिच्युतौ तस्य पापपादपपल्लवौ ॥ ४५ ॥

तद्वृत्तं विस्मितः श्रुत्वा मृगेन कथितं नृपः ।
अभूत् कृतघ्नचरिते धिक्कारमुखराननः ॥ ४६ ॥

དེ་ནས་ས་བདག་དགྱེས་པ་ཡིས། རྫིས་ཤིན་ཏུ་ཆེ་བ་དང་།
འབྱོར་བ་མཆོག་གི་རི་དགས་དེ། རང་གི་གྲོང་ཁྱེར་དག་ཏུ་ཁྱེར། 47

དེ་ནས་རྒྱལ་པོའི་ཕོ་བྲང་ཕྱིན། དེ་ནས་རིན་ཆེན་ཁྲི་སྟེང་ཕུལ།
དེ་ཡི་མདུན་དུ་མི་ཡི་བདག། བཙུན་མོ་བློན་པོའི་ཚོགས་བཅས་འཁོར། 48

བྱང་ཆུབ་སེམས་དཔའ་རི་དགས་དེའི། མཆོག་གི་བློ་ཡིས་མདུན་ས་དེར།
ཆོས་བསྟན་གང་གི་སྐུ་བོ་རྣམས། བསྐྱབ་བའི་གནས་དང་ལྡན་པར་གྱུར། 49

ང་ཉིད་སྔོན་གྱི་དུས་ན་ནི། རི་དགས་གསེར་གི་ལོགས་དེར་གྱུར།
མ་རུངས་ཀྱི་གྱུ་ཅན་གྱུར་གང་། དེ་ཡང་ད་ལྟ་ལྷས་བྱིན་ནོ། 50

དེ་ནས་བཅོམ་ལྡན་སྲིད་པའི་འཛིགས་པ་འབྱེད་པར་བྱེས་པས་སྙིང་སྟོབས་ནི།
རྒྱ་ཆེ་མཛེས་པའི་སྤྱོད་ཚུལ་ལེགས་སྤྱད་ལ་འདིས་རབ་ཞིའི་རང་བཞིན་དག།
དེ་སྐད་བཤད་པ་ཐོས་ནས་བསོད་ནམས་དག་ནི་ཡོངས་སུ་སྨིན་གྱུར་པའི།
དབེན་པས་མཛེས་པའི་དགེ་སློང་ཚོགས་དེ་དགེ་བའི་སྐད་དུ་ཅི་ཡང་གྱུར། 51

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གསེར་གྱི་ལོགས་ཀྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་སུམ་བཅུ་པའོ།

ततः क्षितिपतिः प्रीत्या विभूत्या परया मृगम् ।
तं निनाय स्वनगरीं गौरवेण गरीयसा ॥ ४७ ॥

राजधानी मथासाद्य तस्मै रत्नासनं नृपः ।
दत्त्वा सान्तःपुरामात्य स्तस्याग्रे समुपाविशत् ॥ ४८ ॥

स बोधिसत्त्वो हरिण स्तस्यां पर्षदि दिव्यधीः ।
धर्म्मं दिदेश येनाभूज्जनः शिक्षापदान्वितः ॥ ४९ ॥

सुवर्णपार्श्वः सारङ्गः सोऽयमेवाभवं पुरा ।
योऽभवत् कुटिलः क्रूरो देवदत्तः स चाधूना ॥ ५० ॥

इति सुकृतचितं भगवता भवभीतिभिदा
कथित मुदारसत्त्वरुचिरस्य ततश्चरितम् ।
प्रशममयं निशम्य कुशलाय स भिक्षुगणः
किमपि बभूव पुण्यपरिपाकविवेकरुचिरः ॥ ५१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
सुवर्णपार्श्वावदानं त्रिंशः पल्लवः ॥

ཡལ་འདབ་སུམ་ཅུ་རྩ་གཅིག།

འཇིག་རྟེན་དག་ན་ཡོངས་སུ་མཆོད་བྱེད་མངོན་སུམ་མཚན་ཉིད་ཀྱིས།
སྐྱེ་བོ་བཟང་དང་ངན་པའི་ཁྱད་པར་འདི་དག་ལེགས་པར་མཚོན།
ཉི་མས་ཐམས་ཅད་དྲི་མེད་རབ་ཏུ་གསལ་བ་རྣམ་པར་སྒྲུབ།
སྨག་རུམ་སྨུན་པས་འགྲོ་བ་མ་ལུས་སྨུན་ནག་ལྡན་པར་བྱེད།། 1

ཐམས་ཅད་མཁྱེན་པས་སྟོན་བྱུང་མཐའ། མ་ལུས་ངེས་པར་གཟིགས་བྱེད་ཅིང་།
གནམ་འདི་ཉིད་ལས་རབ་བརྩམས་དེ། བཅོམ་ལྡན་འདས་ཀྱིས་སྐད་གསུངས་པ།།
2

གྲོང་ཁྱེར་པ་ཊ་ལ་ཡི་བུ། ཞེས་པར་མི་བདག་ས་ཡི་ནི།
འབྱུར་འཛིག་འབྱེར་འཛིག་ཅེས་བྱ་བ། བསོད་ནམས་ལྡན་ཚོགས་གནས་སུ་གྱུར།།
3

དེ་ཡི་སྲས་པོ་ཡོན་ཏན་གྱིས། ཚོགས་ཀྱིས་མགྲོ་བ་དགེ་བྱེད་དང་།
གཉིས་པ་ཡོན་ཏན་མེད་པ་ཡང་། མི་དགེ་བྱེད་ཅེས་བྱ་བར་གྱུར།། 4

དགེ་བྱེད་སྐྱོང་བ་ཐམས་ཅད་ཀྱི། སྙིང་རྗེ་ཡི་ནི་དཔག་བསམ་ཤིང་།
སྦྱིན་པའི་ཚུལ་གྱི་ཡབ་ཀྱི་དཔལ། གདུགས་ཀྱི་ལྷག་མ་ཉིད་དུ་གྱུས།། 5

དེ་ལ་སུ་བདག་བསོད་ནམས་སྨིས། ཡིད་དགའ་མ་ཞེས་བྱ་བ་ཡི།
རང་གི་བུ་མོ་སྐྱོང་ཡིག་དང་། ཚོག་གི་ཡོ་ཞ་བདང་ནས་བྱིན།། 6

एकत्रिंशः पल्लवः ।

प्रत्यक्षलक्षणपरीक्षित एष लोके
संलक्ष्यते सुजनदुर्ज्जनयो र्विशेषः ।
अर्कः प्रकाशविशदं विदधाति विश्व-
मन्धीकरोति निखिलं जगदन्धकारः ॥ १ ॥

सर्व्वज्ञः पूर्व्ववृत्तान्त मशेष मवलोकयन् ।
अस्मिन्नेव कथारम्भे भगवान् पुनरब्रवीत् ॥ २ ॥

नृपः पाटलिपुत्राख्ये पुरे भूमिपुरन्दरः ।
अभूत् पुरन्दरो नाम मन्दिरं पुण्यसम्पदः ॥ ३ ॥

कल्याणकारी तस्याभूत् सूनु र्गुणगणोन्नतः ।
अकल्याणाभिधानश्च द्वितीयो निर्गुणः सुतः ॥ ४ ॥

कल्याणकारी सर्व्वार्थिकरुणाकल्पपादपः ।
छत्रावशेषा मकरोद् दानशीलः श्रियं पितुः ॥ ५ ॥

तस्मै मनोरमां नाम पुण्यसेनो महीपतिः ।
दूतं विसृज्य लेखेन स्वसुतां वचसा ददौ ॥ ६ ॥

དེ་ནས་ལེན་ལ་ཉེ་བའི་ཚེ། །རྒྱལ་ལ་རྒྱལ་སྲས་ཀྱིས་སྨྲས་པ། །
ཡབ་གཅིག་བག་མ་ལེན་པ་འདི། །ད་ལྟ་བདག་ལ་ཐོབ་འདོད་མེད། ། 7

མཉེས་གཤིན་ཡངས་པ་ཉིད་ཀྱིས་ངན། །བདག་ནི་སྦྱིན་ལ་ཞེན་པ་ཡིས། །
དགའ་བས་དཔལ་འབྱོར་གྲག་ཏུ་བླངས། །ཁྱོད་ཀྱི་མཛོད་ནི་སྟོང་པར་བྱས། ། 8

དེ་སྐད་རྒྱ་གཏེར་ཆེན་པོ་ནི། །གཟིངས་ཀྱིས་ཡང་དག་བསྒྲལ་ནས་བདག། །
མཆོག་གི་རིན་ཆེན་སྒྲུབ་བརྩོན་པས། །རིན་ཆེན་གླིང་དུ་ངེས་པར་འགྲོ། ། 9

མཆོག་གི་ཕུན་ཚོགས་ཐོབ་ནས་ནི། །བདག་གིས་ཕྱུང་མ་བླང་པར་བགྱི། །
ནོར་མེད་དག་གི་ཕྱུང་མ་ནི། །བདེ་བའི་ཕུན་ཚོགས་སྐྲག་པ་སྐྱེད། ། 10

ཅེས་བརྗོད་དེ་ཡིས་ཡབ་ཀྱི་བཀའ། །ཐོབ་ནས་ཞབས་ལ་ཕྱག་འཚལ་ཏེ། །
ཐ་སྙབས་གཡོ་བས་ནམ་མཁའ་ལ། །འཕྲུད་པ་རྒྱ་ཡི་གཏེར་དུ་ཞུགས། ། 11

ཡོན་ཏན་མེད་པ་ཡོན་ཏན་ལ། །སྡང་བས་ནང་དུ་འཁྲུ་སེམས་ཤིང་། །
གཞུང་བཟང་དུ་སྟོན་རྗེས་སྐྱེས་པའི། །སྤུན་ཟླ་དེ་ནི་དེར་རྗེས་འབྲང་། ། 12

སྤྲ་བོས་དེ་ལ་སྨྲས་པ་རུ། །རྒྱ་མཚོར་ལས་ཀྱིས་རྣམ་སྨད་པས། །
གཟིངས་ནི་ཞིག་པར་གྱུར་བ་ན། །ཁྱོད་ཀྱི་ཕྲག་པར་བདག་བླང་བྱ། ། 13

ཞེས་པས་སྤུན་ཟླ་ཡིད་བརྟན་བྱས། །དེ་བཞིན་ཞེས་དེས་དེ་ལ་སྨྲས། །
སྐྱེར་རྗོམ་གཡོ་ཅན་མི་བསྲུན་པ། །རབ་དུ་ཉིད་ལ་ཡང་དག་བརྟེན། ། 14

प्रत्यासन्नविवाहोऽथ नृपं राजसुतोऽभ्यधात् ।
प्राप्तः परिणय स्तात सम्प्रत्येष न मे मतः ॥ ७ ॥

वात्सल्यपेशलतया मदात्ताः प्रकृतिश्रियः ।
मया दानव्यसनिना कोष स्ते शुषिरीकृतः ॥ ८ ॥

तस्मात् प्रवहणेनाहं समुत्तीर्य्य महोदधिम् ।
रत्नद्वीपं व्रजाम्येव दिव्यरत्नार्ज्जनोद्यतः ॥ ९ ॥

दिव्यसम्पद मासाद्य करिष्ये दारसंग्रहम् ।
कलत्र मकृतार्थस्य नासन्नं सुखसम्पदाम् ॥ १० ॥

इत्युक्त्वा स पितुः प्राप्य शासनं चरणानतः ।
जगाहे जलधिं लोलकल्लोलालिङ्गिताम्बरम् ॥ ११ ॥

भ्राता त मनुवव्राज सौजन्यव्यञ्जनोऽनुजः ।
निर्गुणः सगुणद्वेषद्रोह मन्त र्व्विचिन्तयन् ॥ १२ ॥

ज्येष्ठ स्त मब्रवीद् वत्स समुद्रे कर्म्मविप्लवात् ।
अहं ग्राह्य स्त्वया स्कन्धे जाते प्रवहणक्षये ॥ १३ ॥

इति भ्राता कृताश्वास स्तथेत्यूचे स तं शठः ।
दोषोद्यतः प्रणयितां खलः समवलम्बते ॥ १४ ॥

དེ་ནས་གཟིངས་ལ་ཞོན་བྱས་དེ། །བསོད་ནམས་བཞིན་དུ་རྫས་མཐུན་པར། །
འགྲོ་བའི་རླུང་གིས་རིན་ཅེན་གླིང་། །མི་ཡི་བདག་པོ་འི་སྲས་ཀྱིས་ཐོབ།། 15

རིན་ཅེན་མཆོག་རྣམས་རབ་རྙེད་ནས། །རྒྱལ་པོ་འི་སྲས་དག་དལ་བུ་ཡིས། །
སླར་ལོག་ཆོ་ན་གཟིངས་དག་ནི། །རླུང་གི་སྟོབས་ཀྱིས་མྱུར་དུ་ཞིག།། 16

གཟིངས་ནི་ཞིག་པ་དེ་ཡི་ཚེ། །སྔོན་གྱི་གྲོགས་ཀྱི་སྤྲུན་ཟླ་དེའི། །
མགྲིན་པར་ལག་འགྲོ་ལྟ་བུ་ཡི། །རྫས་སྐྱེས་གཡོ་ཅན་དེ་ཡིས་བཟུང་།། 17

ལས་ཀྱི་རླུང་གིས་མྱུར་བསྐྱོད་པས། །རྒྱལ་པོ་འི་བུ་ཡི་ངོགས་ཕྱིན་ནས། །
ལོང་བའི་ཙོ་ཀ་དང་པོ་ཉིད། །འཕྲུལ་ལ་གཉིད་དུ་སོང་བར་གྱུར།། 18

ཉལ་དེ་ཡི་རིན་ཅེན་ནི། །བཅིངས་རྣམས་ཆུ་བོ་མ་ཚུངས་དེས། །
མཐོང་ནས་གདུང་བའི་ཁུང་བུར་ནི། །རབ་དུ་འཕྲོག་པའི་བྱ་བ་བརྩམས།། 19

དེ་ཡིས་བརྟན་པར་བཅིངས་པ་དེའི། །མིག་གི་ཆུ་སྐྱེས་རབ་ཕྱུང་ནས། །
འཇིགས་པའི་མཚོ་ལས་སྒྲོལ་བྱེད་དེའི། །མིག་གི་འབྲས་བུ་མེད་པར་བྱས།། 20

རིན་ཅེན་ཁྱེར་ནས་དེ་སོང་ཚེ། །རྒྱལ་པོ་འི་ནི་གཟི་བྱིན་ཉམས། །
གླང་པོས་ཆུ་སྐྱེས་དཀྲུགས་པ་ཡི། །པདྨའི་འབྱུང་གནས་བཞིན་དུ་གྱུར།། 21

ཉི་མ་ཟླ་བ་སྤངས་པ་ཡི། །ནག་ཕྱོགས་མཚན་མོ་རྩོམ་པ་བཞིན། །
ཀུ་ངན་སྤུན་པ་དྲག་པོས་བསྒྲིབས། །དེ་ནི་སྣང་བ་མེད་པར་གྱུར།། 22

ततः प्रवहणारूढः पवनै रनुकूलताम् ।
यातैः पुण्यैरिव प्राप्य रत्नद्वीपं नृपात्मजः ॥ १५ ॥

दिव्यरत्नानि सम्प्राप्य प्रत्यावृत्ते ततः शनैः ।
राजपुत्रे प्रवहणं द्रागभञ्जत् प्रभञ्जनः ॥ १६ ॥

भग्ने प्रवहणे तस्मिन् भ्रातरं पूर्व्वसम्विदा ।
स जग्राह शठः कण्ठे तं भुजङ्ग इवानुजः ॥ १७ ॥

कर्म्मवातेरित स्तूर्णं कूलं प्राप्य नृपात्मजः ।
अवाप सहसा निद्रा मान्ध्यप्रथमदूतिकाम् ॥ १८ ॥

तस्य सुप्तस्य रत्नानि दृष्ट्वा बद्धान्यथानुजः ।
प्रहर्तुं व्यसनच्छिद्रे क्रूरः समुपचक्रमे ॥ १९ ॥

उत्पाट्य गाढ़बद्धस्य स तस्य नयनाम्बुजम् ।
तं तारकं भयाम्भोधौ चकार गततारकम् ॥ २० ॥

आत्तरत्ने गते तस्मिन् वाजहनु र्गतद्युतिः ।
मातङ्गोन्मूलिताम्भोज इवाभूत् कमलाकरः ॥ २१ ॥

स बभूव निरालोकः शोकतीव्रतमोवृतः ।
कृष्णपक्षक्षपारम्भ इव सूर्य्येन्दुवर्ज्जितः ॥ २२ ॥

དེ་ནས་བ་གླང་རྫི་བོ་འི་བདག ། གནས་དེར་ཡང་དག་འོངས་པ་ཡིས། །
རྒྱལ་སྲས་ལོང་བ་མཐོང་ནས་ནི། ། དེ་ཡི་གདུང་བ་འཕེལ་པར་གྱུར། ། 23

དེ་ནི་དེ་ཡི་རང་གནས་བླངས། ། རིམ་གྲོ་མཆོག་གིས་རབ་ཏུ་བསྐྱངས། །
དེ་ཡི་ཡོན་ཏན་ལེགས་སྦྱོར་དང་། ། མཛའ་བ་འབེབས་པས་དབང་བྱས་གྱུར། ། 24

དེར་ནི་སྐྱ་ངན་ནད་ཞིའི་སྐད། ། རྟག་ཏུ་སེམས་ནི་དགའ་བྱེད་པའི། །
པི་ཝང་སྒྲོན་དུ་གོམས་གྱུར་པ། ། དབྱངས་ལ་མཁས་པ་དེ་ཡིས་བླངས། ། 25

དམ་པའི་གྲོགས་དང་རྒྱ་ཆེ་དབེན་པའི་གཏམ་གྱི་མངོན་སྦྱོར་དང་། །
སྙན་ངག་བཏུང་བ་སྙིང་སྡུག་གྲོགས་རྣམས་མཛའ་བས་རྩེ་བ་དང་། །
པི་ཝང་སྒྲ་སྙན་མི་ཏོག་མཛེས་པའི་ནགས་ཀྱིས་གནས་པ། །
ཡིད་ནི་སྐྱ་ངན་མི་ཡིས་གདུངས་རྣམས་བདུད་རྩིར་ཞུགས་པ་ཡིན། ། 26

བ་གླང་རྫི་ཡི་བདག་པོ་དེའི། ། ཚུང་མ་པི་ཝང་གླུ་མཁན་མས། །
རྒྱལ་པོ་འི་བུ་མཐོང་དེ་ནས་ནི། ། མངོན་པར་འདོད་ལྡན་ཉིད་དུ་གྱུར། ། 27

རྟག་ཏུ་གྲོ་གྱུ་ལྡན་མ་དེའི། ། པི་ཝང་གིས་ནི་གདམས་བྱས་བཞིན། །
ཆགས་པ་གསར་པས་བརྒྱལ་བྱེད་ཅིང་། ། འདོད་དང་ལྡན་པས་ཡང་དག་
བསམས། ། 28

སྐལ་བཟང་འདི་ལ་བདག་གི་ནི། ། མིག་དང་སེམས་ཀྱང་ཤིན་ཏུ་ཆགས། །
གལ་ཏེ་མཛའ་བར་མ་གྱུར་ན། ། བདག་གི་གདུང་བ་ཟློག་མི་འགྱུར། ། 29

अत्रान्तरे समायात स्तं देशं गोकुलाधिपः ।
राजपुत्रं विलोक्यान्ध मभूत् संक्रान्ततद्व्ययः ॥ २३ ॥

स तं नीत्वा स्वनिलयं परिचर्य्यापरः परः ।
तस्यासीद् गुणसौजन्यस्नेहावेशवशीकृतः ॥ २४ ॥

तत्र शोकरुजां शान्त्यै सदा चेतोविनोदिनीम् ।
वीणां स्वरप्रवीणोऽसौ पूर्व्वाभ्यस्ता मवादयत् ॥ २५ ॥

सत्सङ्गमः पृथुविवेककथाभियोगः
काव्यासवः प्रियसुहृत्प्रणयो विहारः ।
वीणास्वनः कुसुमकान्तवनान्तवासः
शोकाग्नितप्तमनसा ममृतावगाहः ॥ २६ ॥

तस्य गोपपतेः पत्नी गीतवीणाविचक्षणा ।
पश्यन्ती राजतनयं प्रययौ साभिलाषताम् ॥ २७ ॥

कृतोपदेशा सततं कुटिला वीणयेव सा ।
मूर्च्छन्ती नवरागेण सोत्कण्ठा समचिन्तयत् ॥ २८ ॥

सुभगोऽयं ममातीव दृशि चित्ते च वर्त्तते ।
निवर्त्तते न मे तापः प्रेम्णि चेन्न प्रवर्त्तते ॥ २९ ॥

ཡང་ཡང་སེན་མོ་བདབ་པ་ཡིས། །སྦྲ་བྱེད་ཆགས་ལྡན་པི་ཝང་འདི། །
བསོད་ནམས་ཀྱིས་ནི་འདི་ཡི་ཐང་། །འཇིག་འོས་ཉིད་གྱུར་སྐལ་པ་བཟང་།། 30

ཞེས་བསམས་དེ་ཡི་དལ་བུ་ཡིས། །འདར་བཅས་ལག་པའི་ཡལ་འདབ་ཀྱིས། །
དེ་ལག་པད་ལ་རེག་བྱེད་ཅིང་། །རྣམ་འགྱུར་ལྡན་པས་དེ་ལ་སྨྲས།། 31

ཁྱོད་ལ་སོང་བའི་བདག་ཡིད་འདི། །མཛའ་བོ་བྲུས་པ་མི་ཤེས་བཞིན། །
བུད་མེད་རྣམས་ལ་རྙེད་སླ་བའི། །ལེགས་སྤྱིར་ངོ་ཚ་མི་དྲན་ནོ།། 32

འདོད་པས་འཕངས་པའི་བུད་མེད་ནི། །ངོ་ཚ་བྲལ་བའི་ལྟོས་པ་དག །
རིགས་སྤྱོད་ལ་མེད་ཁྲིམས་ལ་མེད། །ཐེ་ཚོམ་ལ་མེད་ཁེངས་ལ་མེད།། 33

བདག་གི་བརྟག་པ་མཛའ་བ་ཡིས། །འབྲས་བུ་ལྡན་པར་བགྱི་བར་འོས། །
བུད་མེད་རྣམས་ནི་བསྟེན་པ་ན། །ལྷ་བཞིན་གཙུགས་པ་ཉིད་དུ་འགྱུར།། 34

ཞེས་པ་དབྱངས་དང་བྲལ་གྱུར་ཅིང་། །མ་བསྟམས་དེ་ཡི་ཚིག་ཐོས་ནས། །
གཡོན་མ་དེ་ལ་རྒྱལ་པོ་འི་བུ། །ནང་གི་བྱེད་པ་སྒྲག་པས་སྨྲས།། 35

ཡུམ་གཅིག་ཚུལ་ཁྲིམས་ཡོངས་གཏོང་བ། །འདི་ནི་དམ་པའི་རིགས་པ་མིན། །
སྡིག་པའི་དུག་གིས་རེག་གྱུར་པ། །ཚུལ་ཁྲིམས་ཉམས་པའི་སྐྱེ་བོ་སྨད།། 36

གང་ཞིག་གཞན་གྱི་བུད་མེད་ལ། །ལུས་ཀྱིས་ཡོངས་འཁྱུད་བདག་གིར་བྱེད། །
འདི་ནི་དམྱལ་བའི་མེ་ལྕེ་ལ། །ཕྱེ་མ་ལེབ་བཞིན་སླར་ཡང་འཁྱུད།། 37

धन्येयं नखसम्पातैः क्वणन्ती रागिणी मुहुः ।
यातास्य वल्लकी पुण्यै रङ्कारोहणयोग्यताम् ॥ ३० ॥

इति संचिन्त्य सा स्वैरं तमुवाच सविभ्रमम् ।
स्पृशन्ती तत्कराम्भोजं सकम्पकरपल्लवा ॥ ३१ ॥

ललनासुलभां लज्जां ममेदं त्वद्गतं मनः ।
अक्षतस्त्र इव प्रीतिं न संस्मरति मानद ॥ ३२ ॥

न शीलं न कुलाचारं नाभिमानं न संशयम् ।
अपेक्षन्ते स्मरक्षिप्ता वैलक्ष्यरहिताः स्त्रियः ॥ ३३ ॥

प्रणयान्मम सङ्कल्पं सफलं कर्त्तुमर्हसि ।
भवन्ति मानिताः प्रीत्यै देवता इव योषितः ॥ ३४ ॥

इति तस्य वचः श्रुत्वा भिन्नस्वरविशृङ्खलम् ।
चपलां राजपुत्र स्तां त्रस्तान्तःकरणोऽवदत् ॥ ३५ ॥

नेयं मातः समुचिता सतः शीलपरिच्युतिः ॥
धिक्किल्विषविषस्पृष्टं नष्टशीलस्य जीवितम् ॥ ३६ ॥

पराङ्गनापरिष्वङ्ग मङ्गे रङ्गीकरोति यः ।
आलिङ्गति पतङ्गोऽयं नरकाग्निशिखां पुनः ॥ ३७ ॥

གཞན་ལ་ཕན་པ་ལ་ཆགས་ཤིང་། གཞན་གྱི་བུད་མེད་ལ་གུས་བྲལ།
གང་ཡང་འཚོ་མེད་ལ་ཆགས་པ། དེ་དག་འཚོ་ལ་གཞན་ནི་ཤི།། 38

དེ་སྐད་དེ་ཡིས་བརྗོད་ཐོས་ནས། ཡིད་ཀྱི་ཤིང་རྟ་ཆག་པར་གྱུར།
གང་ཕྱིར་བུད་མེད་མཛལ་བ་ནི། བཀག་པ་ཞི་བ་ཉིད་ལས་ལྷག།། 39

དེ་ནས་ཡིད་ལ་རེ་བ་དག། ཉམས་པར་གྱུར་ཚེ་ལག་འགྲོ་མ།
དེ་ཡི་རང་བདག་ལ་ཕྱོགས་དེ། ཁྲོ་བའི་དུག་སྦྲུག་བཞིན་སྨྲས་པ།། 40

དགེ་བ་དྲང་པོ་ཁྱོད་ཀྱིས་ནི། མཆོག་ཏུ་མཉེས་གཞིན་སྐྱོན་དུ་གྱུར།
གང་ཕྱིར་ངང་ཚུལ་མི་ཤེས་པ། ཁྱིམ་ནི་དང་དབང་ཅན་སུ་ཞིག།། 41

གཞན་ལ་མཆོག་ཏུ་ཡིད་བརྟན་གྱིས། རིག་པ་ཁྱོད་ཀྱི་མཛེས་པ་མིན།
སྨྲས་པ་ཡི་ནི་སེམས་དང་ནོར། སྐྱེ་བོ་སུ་ཡི་སུ་ཡིས་ཤེས།། 42

ཁྱོད་ཀྱི་ཁྱིམ་བཟུང་ལོང་བ་དེ། གཞན་གྱི་ཆུང་མའི་མིག་སྟོང་པ།
བཀྲིན་པ་ལོང་བའི་གྲོགས་པོ་དག། དེ་ཡི་འབྲས་བུ་རིགས་པ་བལྟ།། 43

ང་ཡི་དབེན་པར་འགྲོགས་པ་ལ། དེ་རིང་མཆོག་ཏུ་བདག་དོན་གཉེར།
གལ་ཏེ་འདི་ལ་མིག་ཡོད་ན། བདག་གིས་ཐར་པར་ཅི་ལྟར་འགྱུར།། 44

དེ་ཡིས་དེ་སྐད་སྨྲས་བ་གླང་རྫིའི། བདག་དེ་ཁྲོ་བས་མཆོག་ཏུ་གདུངས།
དེ་ནི་རིང་དུ་བསྐྲད་བྱས་ནས། ཁྱིམ་དང་སེམས་ཀྱང་བྲང་བར་བྱས།། 45

परोपकारनिरताः परदारनिरादराः ।
येऽप्यहिंसाव्यसनिन स्ते जीवन्ति मृताः परे ॥ ३८ ॥

इति तेनोक्त माकर्ण्य साभूद् भग्नमनोरथा ।
निधनाभ्यधिकः प्रीतिप्रतिषेधो हि योषिताम् ॥ ३९ ॥

ततः स्वपति मभ्येत्य भुजङ्गी भङ्ग मागते ।
मनोरथे मन्युविषं वमन्तीव जगाद सा ॥ ४० ॥

परवत्सलता साधो दोषाय सरलस्य ते ।
कोह्यविज्ञातशीलानां स्वाधीनीकुरुते गृहम् ॥ ४१ ॥

परेषु भृश माश्वासं स्पृशत स्ते न शोभनम् ।
गुप्तञ्चित्तञ्च वित्तञ्च जनो जानाति कस्य कः ॥ ४२ ॥

परदारसहस्राक्ष स्त्वयान्धः स गृहे धृतः ।
दीनान्धजनवात्सल्यात् पश्य तस्योचितं फलम् ॥ ४३ ॥

अद्याहं तेन विजने सङ्गमे भृश मर्थिता ।
यद्यस्य नयने स्यातां स्यात् कथं मे पलायनम् ॥ ४४ ॥

इत्युक्तः स तया कोपात्तमो गोपपति र्भृशम् ।
दूरे निष्काश्य तं चक्रे गेहं चित्तञ्च शीतलम् ॥ ४५ ॥

གང་ཞིག་ཕ་ཡིས་བུ་གདོང་ཞིང་། སྙིང་དུ་སྡུག་པས་གྲོགས་གསོད་གང་།
གཉེན་རྣམས་གཅོད་པ་རལ་གྲིའི་རྒྱུན། དེ་དག་ཆུང་མའི་སྤྱོད་ཚུལ་ཡིན།། 46

གང་ཞིག་སྨིན་འཁྲུག་མིག་དག་ནི། གང་ཞིག་རྣོ་ཞིང་གང་ཡང་གཡོ།
གང་ཡང་ཉུ་མ་སྨྲ་གྱུར་པ། དེ་ཀུན་བུད་མེད་སྙིང་ལ་ཡོད།། 47

ཡབ་ནི་མཐོ་རི་ག་ཞིགས་གྱུར་དེ། དོན་མཐུན་རྣམས་ཀྱི་དཔལ་བུ་ཡིས།
ལམ་བསྒྲལ་སྤྱུན་ཟླ་མི་བདག་དུ། གྱུར་ཅེས་དགེ་བ་བྱེད་པས་ཐོས།། 48

དེ་ཡིས་གྲོས་པོ་ས་ཡི་བདག། བསོད་ནམས་སྐྱེ་ཡི་གྲོང་ཁྱེར་ནི།
ལམ་རིང་ཉོན་མོངས་རབ་ཞི་བའི། གྲོགས་པོ་དུས་ཀྱི་ཐོབ་པར་གྱུར།། 49

གནས་སྐབས་དེར་ནི་དེ་དག་དུ། ས་བདག་སྲས་མོ་ཡིད་དགའ་མ།
གང་ལ་ཚོག་གི་སྨོན་ཕྱིན་པ། དེ་ནི་ཆུ་གཏེར་ལྟུང་ཐོས་ཚེ།། 50

མི་ཡི་དབང་པོ་རྣམས་བོས་དེ། རིམ་བ་ཛེ་བཞིན་འཁོད་པ་ལ།
རིན་ཆེན་བཞོན་པར་ཞོན་ནས་ནི། རང་ཉིད་ཁྱོ་འདམ་ས་རུ་འོང་།། 51

དཔལ་བྲུས་མིག་ནི་མཛེས་མ་དེས། ས་སྐྱོང་རྣམས་ལ་བལྟས་པ་ན།
དེ་ནི་འདོད་དགར་སོང་གྱུར་པ། རྒྱལ་པོ་འི་སྲས་དེ་མཐོང་བར་གྱུར།། 52

དེ་ནི་ལོང་ཡང་འཕྲུལ་ལ་དེའི། མིག་གི་སྙིང་སྡུག་ཉིད་དུ་གྱུར།
སྨིན་གྱིས་ལོང་ཡང་གཟའ་ནང་ན། ཀུ་མུད་ལྡན་ལ་ཟླ་བ་སྡུག།། 53

पिता त्यजति यत्पुत्रं सुहृन्मित्रं निहन्ति यत् ।
बन्धुच्छेदासिधाराणां तद्दाराणां विजृम्भितम् ॥ ४६ ॥

भ्रुवो दृशो र्यत् कौटिल्यं यत्तैक्ष्ण्यं यच्च चापलम् ।
कुचयो र्यच्च काठिन्यं तत्सर्व्वं हृदि योषिताम् ॥ ४७ ॥

कल्याणकारिसार्थेन पथः सन्तारितं शनैः ।
पितरि त्रिदिवं याते शुश्राव भ्रातरं नृपम् ॥ ४८ ॥

स पुरं पुण्यसेनस्य श्वशुरस्य महीपतेः ।
कालेन प्राप दूराध्वक्लेशप्रशमबान्धवम् ॥ ४९ ॥

अत्रान्तरे सुता तत्र महीभर्त्तु र्मनोरमा ।
वाचा दत्ता पुरा यस्मै तस्मिन्नब्धिच्युते श्रुते ॥ ५० ॥

आहूतेषु नरेन्द्रेषु निविष्टेषु यथाक्रमम् ।
आरुह्य रत्नशिविकां स्वयम्बरभुवं ययौ ॥ ५१ ॥

विलोकयन्ती भूपालान् सा शनै श्चललोचना ।
यदृच्छयागत न्तत्र राजपुत्रं ददर्श तम् ॥ ५२ ॥

अन्धोऽपि तस्याः सहसा स ययौ प्रियतां दृशोः ।
ग्रहमध्ये कुमुद्वत्या मेघान्धोऽपि प्रियः शशी ॥ ५३ ॥

ལོང་བ་གདམས་པ་མི་བདག་རྣམས། འོང་བ་འབྲས་བུ་མེད་པ་ལས།
སྐྱེངས་ཤིང་ལོག་ནས་སོང་བའི་ཚེ། བུ་མོ་ས་བདག་གིས་ཕྱིར་བསྐྱད།། 54

མིག་ཡངས་མ་དེས་དོ་ཤལ་ཡང་། དེ་ཡིས་མགྲིན་པར་ཡོངས་འཕངས་ནས།
དེ་ལ་དལ་བུས་སྨན་པའི་སྨྲ། བདག་ནི་ཁྱོད་ཀྱི་དབང་ཞེས་སྨྲས།། 55

དེ་ཡང་བུད་མེད་སྤྱོད་ཚུལ་གྱིས། འཛེགས་ཏེ་དབེན་པར་དེ་ལ་སྨྲས།
བུད་མེད་ཤེས་རབ་ཀྱིས་དབུལ་ན། ཁྱོད་ཀྱིས་འདིར་ནི་རིགས་མ་བྱས།། 56

རྒྱལ་པོ་དྲན་པའི་སྙིང་སྡུག་གྲོགས། པདྨའི་སྤྱན་རྣམས་འཁོར་པའི་ཚེ།
སྐྱེ་བ་དོན་མེད་ལོང་བ་བདག། ཁྱོད་ཀྱིས་ཅི་ཡི་སླད་དུ་གདམས།། 57

མིག་ལྡན་རྣམས་ཀྱིའང་ཆུང་མ་ནི། གཞན་གྱི་བཞིན་རས་རྣམ་པར་ལྟ།
ལོང་བའི་ཆུང་མ་ཉིན་མོ་ཡང་། གཞན་ལ་མངོན་བགྲོད་སློས་ཅི་དགོས།། 58

བདག་ལ་བུ་མེད་བུད་མེད་ཀྱིས། དེ་ལ་བདག་ནི་ཡིད་ཆེས་མེད།
བུད་མེད་ཐུར་བགྲོད་གྲུ་གྲུ་ཅན། རིགས་དང་འཇུག་ངོགས་ལྷུང་བར་བྱེད།། 59

ཅེས་པའི་ཚིག་རྩུབ་དེས་སྨྲས་པས། མི་བདག་བུ་མོ་ངོ་ཚ་གཡོས།
དེས་སྨྲས་མགོན་པོ་ཐམས་ཅད་དུ། དོགས་པ་བགྱི་བར་མི་འོས་སོ།། 60

གལ་ཏེ་བུད་མེད་འགའ་ལ་སྐྱོན། མཐོང་བས་ཤིན་ཏུ་དོགས་པ་ཁྱོད།
དེ་ཡི་ཁྱབ་པས་སྐྱོན་མེད་ལ། སྐུན་འབྱིན་འདི་ནི་ཛི་ལྟར་བྱེད།། 61

नृपेषु प्रतियातेषु विलक्षेष्वफलागमात् ।
महीपतिसुतान्तस्तं वव्रे गुणविनिर्गतम् ॥ ५४ ॥

सापि हारं परिक्षिप्य कण्ठे तस्यायतेक्षणा ।
शनकैर्मधुरालापा त्वद्वशास्मीत्युवाच तम् ॥ ५५ ॥

स्त्रीवृत्तचकितः सोऽपि विजने ता मभाषत ।
प्रज्ञादरिद्रया नेदं स्त्रिया युक्तं कृतं त्वया ॥ ५६ ॥

स्मरसौहार्द्दमित्रेषु पद्मनेत्रेषु राजसु ।
स्थितेषु वन्ध्यजन्मान्धः कस्मादस्मि वृत स्त्वया ॥ ५७ ॥

अन्यवक्त्रावलोकिन्यो जाया श्चक्षुष्मतामपि ।
वधूः किं पुनरन्धस्य दिनेऽप्यन्याभिसारिका ॥ ५८ ॥

ललनाभि र्न मे कृत्यं प्रत्यय स्तासु नास्ति मे ।
कुलकूलनिपातिन्यो निम्नगाः कुटिलाः स्त्रियः ॥ ५९ ॥

इत्युक्ता तेन परुषं लज्जालोला नृपात्मजा ।
तमूचे नाथ सर्व्वंच न शङ्कां कर्त्तु मर्हसि ॥ ६० ॥

दृष्टदोषः क्वचिन्नार्य्यां यदि त्व मतिशङ्कितः ।
अदुष्टापि त्वया नाम तद्याता क्रियते कथम् ॥ ६१ ॥

གལ་ཏེ་ཁྱོད་ཉིད་ལ་དགའ་ཞིང་། ཡིད་ཀྱི་སྐྱབས་ནི་གཞན་མེད་ན།
བདེན་པ་དེ་ཡིས་ཁྱོད་ཀྱི་མིག། གཅིག་ནི་དྲི་མ་མེད་གྱུར་ཅིག།། 62

མིག་བཟང་མས་ནི་བརྗོད་ཙམ་ལས། དེ་ཡི་ལྟ་བྱེད་གཡས་པ་ནི།
པདྨ་རྒྱས་པ་ལྟ་བུ་དག། བདེན་པའི་མཐུ་ཡིས་བྱུང་བར་གྱུར།། 63

དེ་ནས་མིག་བཟང་མ་དེ་ལ། རབ་དུ་དང་ནས་དེ་ཡི་བཞིན།
ཆུ་སྐྱེས་མཛེས་སྤྲུག་ཡོན་དན་གྱིས། མཚན་བསྐྱེད་རབ་དགའ་རྒྱལ་བུས་སྨྲས།། 64

གང་ལ་བླ་མའི་ཚིག་གིས་སྨོན། ཁྱོད་ནི་རབ་དུ་བྱིན་གྱུར་པ།
སྐལ་པ་བཟང་མོ་རྒྱལ་པོ་འི་བུ། དགེ་བྱེད་དེ་ནི་ང་ཉིད་ཡིན།། 65

དེ་ཉིད་བདག་ཡིན་མིག་ཕྱུང་ལ། གལ་ཏེ་ངེས་པར་ཁོན་མེད་ན།
བདེན་པ་དེ་ཡིས་བདག་གི་མིག། གཞན་པ་རྣལ་དུ་གནས་གྱུར་ཅིག།། 66

ཅེས་བའི་བདེན་པ་བརྗོད་པ་ལས། འཕྲུལ་ལ་ཉིད་དུ་དེ་ཡིས་མིག།
གཉིས་པའི་སེམས་དང་ལྡན་ཅིག་ཏུ། དྲི་མ་དག་དང་བྲལ་བ་ཐོབ།། 67

དེ་ནས་སྤྱོད་ཚུལ་རིག་པ་ཡིས། ས་ལ་སྤྱོད་པ་བསོད་ནམས་སྐྱེས།
སྟོང་གྲོགས་བྲུས་དེ་རང་གིས་ནི། རྒྱལ་སྲིད་མཛེས་མ་ལྡན་ངེས་ཐོབ།། 68

གང་ཞིག་དགེ་བྱེད་དེ་ནི་ང་། ཀུ་བོ་དེ་ཡང་ལྷ་སྦྱིན་ཏེ།
སྟོན་གྱི་མཐུ་ངེས་ད་ལྟ་ཡང་། རྣམ་པ་དག་ནི་དེ་ལྟར་གྱུར།། 69

त्वय्येव यदि मे प्रीति रनन्यशरणं मनः ।
तेन सत्येन ते नेत्र मेकं भवतु निर्मलम् ॥ ६२ ॥

इत्युक्तमाने सुदृशा दक्षिणान्तस्य लोचनम् ।
सत्यानुभावेनाभूत्तत् प्रफुल्लकमलोपमम् ॥ ६३ ॥

राजपुत्रः प्रहृष्टोऽथ तां प्रसाद्य सुलोचनाम् ।
उवाच तन्मुखांभोजलावण्यगुणविस्मितः ॥ ६४ ॥

कल्याणकारी सुभगः स एवाहं नृपात्मजः ।
यस्मै पुरा त्वं गुरुणा वचसा प्रतिपादिता ॥ ६५ ॥

स एवाहं यदि परं निर्व्वैरः पाटने दृशः ।
तेन सत्येन नयनं स्वस्थं भवतु मेऽपरम् ॥ ६६ ॥

सत्योपयाचनेनेति सहसैवास्य लोचनम् ।
द्वितीयमपि वैमल्य मवाप सह चेतसा ॥ ६७ ॥

ततो विदितवृत्तेन पुण्यसेनेन भूभुजा ।
कृतसाहायकः प्राप स्वराज्यं स प्रियासखः ॥ ६८ ॥

कल्याणकारी यः सोऽहं देवदत्तः स चानुजः ।
तेन पूर्व्वानुभावेन तद्विधोऽद्यापि वर्त्तते ॥ ६९ ॥

དེ་ལྟར་བྱང་ཆུབ་སེམས་དཔའི་སྤྱོད་པ་ནི།
དྲི་མེད་རྒྱ་ཆེར་ཕན་དང་མི་བསྒྲུན་པའི།
སྤྱོད་ཚུལ་ངན་པ་ཐོས་ནས་དགེ་སློང་རྣམས།
དེ་ལ་མཚུངས་པར་མཚུངས་མེད་ཡ་མཚན་གྱུར། ། 70

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དེབ་ཐེར་གྱི་རྟོགས་པ་བརྗོད་པའི་
ལམ་འདྲེན་སྐྱེ་སྒྲུབ་ཟླ་གཅིག་པའོ། །

इत्युदार मुपकारनिर्म्मलं
बोधिसत्त्वचरितं निशम्य ते ।
भिक्षवः खलविचेष्टितस्य त-
त्तुल्य मप्रतिमविस्मयं ययुः ॥ ७० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कल्याणकार्य्यवदानं एकत्रिंशः पल्लवः ॥

ཡལ་འདབ་སུམ་ཅུ་རྩ་གཉིས་པ།

སྐྱེ་བོ་དམ་པའི་གཡོན་ཕྱོགས་གཡོན་པ་རྣམས།
ཕལ་ཆེར་དམན་ལ་ཆགས་དང་ལྡན་པར་གྱུར།
མཚམས་ནི་དམར་ལྡན་སྨུན་པ་མདོན་ཕྱོགས་པའི།
ས་འཛིན་དག་ལས་ཉི་མ་འཕེན་པར་བྱེད།། 1

སྐྱེ་བ་གཞན་མང་ལ་བརྟེན་པ། ལྷ་སྦྱིན་དག་གི་སྤྱོད་པ་ནི།
བ་ཤད་ཀྱང་བཙོམ་ལྡན་ཡེ་ཤེས་ཀྱི། རྒྱ་མཚོས་སྐྱར་ཡང་བཀའ་སྩལ་པ། 2

ཀ་ལིང་ཀ་ཡི་ཡུལ་དུ་སྔོན། མི་བདག་དགྲ་ནི་ཉམས་བྱེད་པ།
གྲངས་མེད་རྣམ་གནོན་གྲགས་པ་ཅན། དཔལ་ལྡན་སྲུ་ངན་མེད་ཅེས་གྱུར།། 3

དེ་ཡི་སྲས་ནི་མཚུངས་པ་བཞི། ལོ་མ་རབ་དུ་ལོ་མ་དང་།
རྗེས་སུ་ལོ་མ་ཁྲིད་པར་གྱི། ལོ་མ་ས་ལ་གྲགས་པར་གྱུར།། 4

ཡང་ཆོས་རྒྱུགས་པ་དེ་དག་རྣམས། ཆུང་མར་བཙས་པ་ཕ་མས་བསྐྱད།
རྣམ་འགྱུར་གནོད་པ་ལྡན་པ་ཡིས། བུ་ཡིས་བུ་ལ་བྱམས་པའང་འཛིགས།། 5

དེ་རྣམས་རིམ་གྱིས་ལམ་བརྒྱུགས་ཟད། བཟོད་དཀའ་གནས་སྐབས་ངན་
པ་བཞིན།
ནགས་ཚལ་སྡུག་པོར་ཕྱིན་གྱུར་ནས། བཀྲེས་པས་ཉེན་པས་ཡང་དག་བསམས།།
6

द्वात्रिंशः पल्लवः ।

वामाः सज्जनवामाः
प्रायेण भवन्ति नीरोगिण्यः ।
तिमिरोन्मुखी सरागा
क्षिपति रविं भूधरात् सन्ध्या ॥ १ ॥

देवदत्तस्य चरिते बहुजन्मान्तराश्रये ।
कथितेऽपि पुनः प्राह भगवान् ज्ञानसागरः ॥ २ ॥

पुरा कलिङ्गविषये नृपतिः शत्रुभङ्गकृत् ।
श्रीमानभूदशोकाख्यः प्रख्यातासंख्यविक्रमः ॥ ३ ॥

तस्य शाखः प्रशाखश्च चत्वारः सदृशाः सुताः ।
अनुशाखो विशाखश्चेत्यभवन् भुवि विश्रुताः ॥ ४ ॥

तारुण्यमत्ता स्ते पित्रा सपत्नीकाः प्रवासिताः ।
सविकारनिकारेण पुत्रस्नेहोऽपि नश्यति ॥ ५ ॥

ते शनैः क्षीणपाथेया दुर्दशामिव दुःसहाम् ।
विकटा मटवीं प्राप्य क्षुत्क्षामाः समचिन्तयन् ॥ ६ ॥

རྒུད་དུས་བུད་མེད་འདི་དག་ཀྱང་། ལོང་བུ་འཆིང་བའི་ལྕགས་སྒྲོག་སྟེ།
སྦུ་ཡིས་འབད་རྟེད་ཡོ་མ་ཡི། ཟས་ལའང་སྐལ་བ་འཛིན་ཅིང་འཁོད།། 7

དེ་ལྟར་བསམས་ནས་དེ་རྣམས་ཀྱི། བུད་མེད་གསད་པར་ངེས་པ་བྱས།
སྐལ་བ་གཉིས་སྐབས་ངན་པ་ཡིས། བསྒྲིགས་ལ་གློ་ནི་འཇིགས་རུང་སྐྱེ།། 8

སྡིག་པའི་བརྡག་པས་འཇིགས་པ་ཡི། ཁྲིད་པར་ལོ་མ་དེ་ནང་ནས།
བརྩེ་བས་ཆུང་མ་ཁྱེར་ནས་ནི། ཐ་དད་དག་ཏུ་བྲོས་ཏེ་སོང་།། 9

སྐྱོན་ལྡན་མ་ཞེས་བྱ་བ་དེ། མཆོག་ཏུ་རྣམ་པར་འཁྲུགས་གྱུར་ཅིང་།
ལམ་རིངས་རྒྱུགས་པའི་ངལ་དུབ་ཀྱིས། བཀྲལ་ནས་ས་ལ་ངེས་པར་འགྱེལ།། 10

དེ་ནས་དེ་ཡི་སྲོག་འཇིགས་ཚེ། བདག་པོ་སྙིང་རྗེས་བརླན་པ་ཡིས།
སྤྲི་བོ་སྲུག་པ་ལས་བྱུང་བ། རང་གི་ཁྲག་ནི་འཐུང་དུ་བཅུག།། 11

ཁྲག་འཐུངས་འཚོ་བ་ཐོབ་གྱུར་དེ། སྙིང་སྟོབས་རྒྱ་མཚོས་རང་ཉིད་ཀྱིས།
ཡན་ལག་ངེས་པར་བཅད་པ་ཡི། ཤ་ཡིས་སྲོག་ནི་བརྟན་པར་བྱས།། 12

ཆུ་མེད་འཇིགས་རུང་དགོན་པ་དག། རིམ་གྱིས་བསྒྲལ་ནས་དེ་དག་གིས།
ཤིང་གི་གྲིབ་མཆོག་སྔོ་བསངས་ཅན། རི་ཡི་ཀླུང་གི་ངོགས་སུ་སླེབ།། 13

དེ་དག་དེར་ནི་ངལ་གསོ་ཚེ། རྐང་ལག་བཅད་པའི་མི་ཞིག་ནི།
ཆུ་བོ་མགྱོགས་པས་ཁྱེར་བཞིན་དུ། ཚེ་ངེ་དྲག་པོས་འདེབས་ཤིང་བྱུང་།། 14

एताः स्त्रियो विपत्काले गुल्फबन्धनशृङ्खलाः ।
कृच्छ्रलब्धे च भागिन्यः स्थिताः पर्य्याशनेऽपि नः ॥ ७ ॥

इति चिन्तयतामासीत् तेषां स्त्रीवधनिश्चयः ।
दुर्द्दशादग्धभाग्यानां घोरा संजायते मतिः ॥ ८ ॥

तेषां मध्याद् विशाखस्तु पापसंकल्पशंकितः ।
भार्य्या मादाय कृपया पलाय्य प्रययौ पृथक् ॥ ९ ॥

सा कलङ्कवती नाम भृशं वैक्लव्य मागता ।
दूराध्वधावनश्रान्ता मूर्च्छिता न्यपतद् भुवि ॥ १० ॥

ततः सा करुणार्द्रेण भर्त्रा प्राणक्षयक्षणे ।
शिरावेधसमुद्भूतं पायिता निजशोणितम् ॥ ११ ॥

तां रक्तपानसंप्राप्तजीवितां सत्वसागरः ।
स्वाङ्गं निष्कृत्य मांसेन प्राणवृत्ति मकारयत् ॥ १२ ॥

निर्ज्जलं घोरकान्तारं समुत्तीर्य्य क्रमेण तौ ।
प्रच्छायपादपश्यामं प्राप्तौ गिरिनदीतटम् ॥ १३ ॥

विश्रान्तयो स्तयो स्तत्र कृत्तपादकरो नरः ।
तीव्राक्रन्दी नदीवेगेनोह्यमानः समाययौ ॥ १४ ॥

འོ་བརྒྱལ་འཕོངས་པ་ལ་བརྟེན་ཏེ། མཐོང་བ་ཉིད་ན་སྙིང་རྗེས་འཁྲུད།
ཁྲིད་པར་ལོ་མ་ཆུར་ཞུགས་ནས། དཔུང་པ་དག་གིས་ཐར་པར་བྱས།། 15

དེ་ནས་ཆུ་དང་རྩ་བ་དང་། འབྲས་བུ་དག་གིས་སྨོག་སྐྱར་བྱུང་།
ཉི་མ་འགའ་ཡིས་བཅད་པ་བསོས། དེ་ཡིས་དེ་ནི་གདུང་མེད་བྱས།། 16

བསོས་ཀྱང་བགྲོད་པ་མ་ཚང་བས། གང་དུ་ཡང་ནི་འགྲོ་མ་ནུས།
དེར་ནི་དེར་གནས་དུས་སུ་ནི། དེ་ཡི་ཆུང་མ་བཟའ་བ་ཕྱིར།། 17

རྒྱལ་པོ་འི་བུ་ནི་ཆུང་མ་ལ། ཡང་དག་འགྲོགས་པ་ཉུང་བར་གྱུར།
ཕལ་ཆེར་རྒྱལ་འདོད་དཔའ་བོ་ནི། སེང་གེ་བཞིན་དུ་འཁྲིག་པ་ཉུང་།། 18

དལ་གྱི་སྨན་མཆོག་རོ་དག་ནི། ཟས་ཀྱི་ལུས་ནི་ཡོངས་རྫོགས་པ།
ཉམས་གྱུར་དེ་དང་དེ་ཡི་ནི། ཆུང་མས་འཁྲིག་ལ་ཆགས་པར་བྱས།། 19

མཛའ་བའི་སྐུམ་གྱི་མ་བྱུགས་ཤིང་། ཡོན་ཏན་སྨད་བྱས་མ་བཅིངས་ལ།
རྗེ་སོ་བླ་མས་མ་སྨད་པ། སྦུད་མེད་རང་འདོད་མེད་པས་བདེ།། 20

མཚན་མོ་སྐྲ་མེད་ཏུ་རྒྱུས་མ། དེ་ནི་དེ་དང་རོལ་པ་ན།
དོགས་མེད་འཁྲིག་པས་མ་ཚིམས་པར། བདག་པོ་གེགས་སུ་གྱུར་པར་བསམས།། 21

དེ་ནས་བདག་པོ་གཡེམ་མ་དེས། གསད་པའི་བློས་ནི་བྱས་པར་གྱུར།
སྡིག་པ་དག་ལ་བསླབ་མཁས་པ། སྦུད་མེད་སྡིག་པ་ཅན་རྣམས་ལོ།། 22

दृष्ट्वैव करुणाश्लिष्टः कष्टां विपद माश्रितः ।
विगाह्य सरितं दोर्भ्यां विश्वास्त मतारयत् ॥ १५ ॥

ततः प्रत्यागतप्राणं तोयमूलफलादिभिः ।
स तं चक्रे दिनैरेव संरूढच्छेदनिर्व्यथम् ॥ १६ ॥

स्वस्थोऽपि गतिवैकल्यान्नैव गन्तुं क्वचित् क्षमः ।
स तस्थौ तत्र तत्पत्न्या काले कलितभोजनः ॥ १७ ॥

राजपुत्रस्तु जायाया मभूद् विरलसङ्गमः ।
सिंहाल्परतयः शूराः प्रायेण विजिगीषवः ॥ १८ ॥

दिव्यौषधिरसाहारपरिपूर्णतनुः शनैः ।
तत्पत्नी विकलायास्मै चकार सुरतस्पृहाम् ॥ १९ ॥

स्नेहेन नोपलिप्यन्ते न बध्यन्ते गुणेन च ।
गौरवे नच सज्जन्ति स्वेच्छास्पर्शसुखाः स्त्रियः ॥ २० ॥

सा तेन निशि निःशब्दं रममाणा घनस्तनौ ।
निःशंकसुरतातृप्ता पतिं विघ्न ममन्यत ॥ २१ ॥

सा पत्युः स्वैरिणी तेन विदधे बधसम्विदम् ।
पापेषु शिक्षाकुशलाः कलुषाः किल योषितः ॥ २२ ॥

རང་གི་མགོ་བོ་མཚུངས་མེད་ནི། ན་བར་སྟོན་ཅིང་སྒྲ་ལྡན་དེས།
དཔྲལ་བར་སྡིག་པ་བྲིས་པ་བཞིན། རས་ཀྱི་འདབ་མས་བཅིངས་པ་བྱས།། 23

དེ་ཡི་མགོ་ཡི་ནད་ཀྱིས་ནི། རྣག་དུ་གདུངས་པས་ས་བདག་སྨྲས།
སྙིང་རྗེས་དེ་སྐད་བཅོས་པ་ཡིས། རིག་པ་དེ་དེ་སེམས་པར་གྱུར།། 24

ཀླུ་ངན་བསམས་པ་ཁྱིངས་དེ་ལ། དེ་ཡིས་འཁྲུན་བཞིན་རང་སྨྲས་པ།
འཁྲུགས་གདུང་བྱུང་བ་སྨྲ་སྒྲོགས་པའི། ཁ་བས་ཉེན་པའི་པད་ལྡན་བཞིན།། 25

རྣམ་པ་དེ་ལྟའི་མགོ་ནད་སྡོན། བདག་ནི་གཞོན་ནུ་མ་ལ་གྱུར།
སྨན་པ་རྣམས་ཀྱིས་རྗེ་བ་ནི། ཞུ་བ་བསྐྱུས་ནས་རྣམ་པར་བཟློག།། 26

རི་བོ་འདི་ཡིས་གཡང་ས་འདི། རྗེ་བ་ཡི་ནི་ཞུན་གྲིས་ཁྲབ།
གལ་ཏེ་ནུས་ན་ཐག་པ་ལ། ཐོབས་ལ་ཁྱོད་ཀྱིས་སླང་བར་མཛོད།། 27

བདག་གིས་ཁྱོད་ཀྱི་དཔྱང་ཐག་ནི། ལག་པ་གཉིས་ཀྱིས་གཟུང་བར་བྱ།
ཚུང་མས་དེ་སྐད་རྒྱལ་སྲས་ཀྱིས། མཛའ་ལས་དེ་བཞིན་ནོ་ཞེས་སྨྲས།། 28

དེ་ནས་དེ་ལག་གིས་བཟུང་བའི། ཐག་པར་དལ་བུས་འཚོལ་བྱས་དེ།
རི་ཡི་རྩ་ཀླུང་བྲག་ལ་བརྡབས། སྒྲ་སྒྲོགས་ངོགས་སུ་དེ་ཡིས་བབས།། 29

སྨན་ནི་ལེན་ལ་ཆགས་པ་ན། དེ་ཡིས་དཔྱང་ཐག་ངེས་པར་བཏང་།
གཡང་ས་ཆེན་པོ་བྱུད་མེད་ཀྱིས། སེམས་ལྷུར་གཡོ་བའི་རྩ་དེར་ལྷུང་།། 30

सा शिरःशूल मतुलं वदन्ती स्वस्य छद्मना ।
चक्रे लिखितपापास्या ललाटे पट्टबन्धनम् ॥ २३ ॥

तस्याः शिरोरुजां तीव्रां व्यतीतः पार्थिवात्मजः ।
कारुण्यात्तत्प्रतीकारे तां तां युक्ति मचिन्तयत् ॥ २४ ॥

विषादचिन्तास्तिमितं श्वसन्तं सा जगाद तम् ।
शीतार्त्तकूजद्भ्रमरा हिमम्लानेव पद्मिनी ॥ २५ ॥

एवंविधं मे कन्यायाः शिरःशूलं पुराभवत् ।
पाषाणभेदलेपेन भिषग्भिश्च निवारितम् ॥ २६ ॥

पाषाणभेदव्याप्तोऽयं प्राग्भागोऽस्य महीभृतः ।
रज्ज्वावतीर्य्य भवता गृह्यतां यदि शक्यते ॥ २७ ॥

धारयिष्यामि पाणिभ्या मह मालम्बनं तव ।
इत्युक्तः प्रणयात् पत्न्या तथेत्याह नृपात्मजः ॥ २८ ॥

तत्पाणिधृतरज्ज्वाथ विहितालम्बनः शनैः ।
सोऽवतीर्णः शिलास्फालगर्जद्गिरिनदीतटम् ॥ २९ ॥

भेषजादानसंसक्तः संत्यक्तालम्बन स्तया ।
स पपात महाश्वभ्रे स्त्रीचित्तचपलाम्भसि ॥ ३० ॥

རིག་པའི་ལམ་གྱི་ལྷག་མ་ལས། དེ་ཡི་ལུས་ཉིད་ཞིག་མ་གྱུར།
རྒྱུན་གྱིས་རབ་ཏུ་ཁྲེར་བྱེད་ཅིང་། བརྟན་པ་ཡིས་ནི་ཡུན་རིང་བསམས༎ 31

རང་གི་གྲོགས་ནི་བུད་མེད་ཀྱིས། སེམས་མཚུངས་འཁོར་མོ་སྟོན་བྱེད་ཅིང་།
བདག་གི་བུད་མེད་ངེས་པ་ལ། འདི་ལས་གདམས་ངག་བྱས་མིན་ནམ༎ 32

རབ་རྒྱས་བློ་ཡིས་རྟོགས་པར་དཀའ་ཞིང་མི་ལམ་ཀུན་རྟོག་དང་མཚུངས་ལ།
ཆགས་དང་སྡང་བའི་གདུང་བ་མི་བཟད་ཉོན་མོངས་རྣམ་པར་འགོད་ལ་ཆགས།
ངེས་པར་འདོད་པ་ལས་ནི་སྐྱེ་བོ་མཐའ་དག་སྨོངས་པར་རབ་འཇུག་པ།
སྒྱུ་མ་བུད་མེད་དག་ནི་སྐད་ཅིག་ཡོངས་སུ་འདྲིས་པའང་ལྷུང་བར་བྱེད༎ 33

དེ་ལྟར་ངེས་པར་སེམས་བྱེད་ཅིང་། ཤིན་ཏུ་ཆེ་བའི་རྒྱ་ཡི་རྒྱུན།
ལེགས་བྱས་ལྷ་བུས་གྲོང་ཁྱེར་ནི། ཕུསཀར་ཅན་དུ་དེ་ཡི་ཕྱིན༎ 34

གནས་སྐབས་དེ་ཡི་ཚེ་ན་དེར། མི་བདག་སྲས་མེད་ནོངས་གྱུར་པའི།
བློན་པོ་ཆེན་པོ་མཚན་མཁན་གྱིས། མཚན་བཟང་ལྡན་པ་དེ་བཟུང་གྱུར༎ 35

དེ་དག་གིས་དེ་ཆོ་ག་བཞིན། བཀྲ་ཤིས་རྒྱ་ཡིས་དེ་དབང་བསྐུར།
རྨད་བྱུང་བུད་མེད་སྤྱོད་མཐོང་བས། བག་མ་ལེན་ལ་སྨོང་བར་གྱུར༎ 36

བྱང་ཆུབ་སེམས་དཔས་སྤྲངས་པ་ཡིས། རི་ལ་སྨན་ནི་ཐུས་པ་ཞིན།
དུས་སུ་སྐྱོན་ལྡན་མ་དག་ཀྱང་། འཚོ་བ་ཆད་པས་འཁྲུགས་པར་གྱུར༎ 37

शुभस्य कर्म्मणः शेषादभग्नतनुरेव सः ।
उह्यमानः प्रवाहेण धीर श्चिर मचिन्तयत् ॥ ३१ ॥

नारीचित्ताभ मावर्त्तं दर्शयन्त्या निजाशयम् ।
मम स्त्रीनियमे नून मुपदेशः कृतोऽनया ॥ ३२ ॥

दुर्विज्ञेयप्रततमतिभिः स्वप्नसंकल्पकल्पा
रागद्वेषव्यसनविषमायासविन्याससक्ताः ।
कामात् कामी सकलजनतामोहने संप्रवृत्ताः
पातायैव क्षणपरिचितस्यापि मायाः स्त्रियश्च ॥ ३३ ॥

इति संचिन्तयन्नेव नदीवेगेन भूयसा ।
प्रापितः सुकृतेनेव स पुरीं पुष्करावतीम् ॥ ३४ ॥

तस्मिन्नवसरे तत्र निष्पुत्रे नृपतौ मृते ।
निमित्तज्ञै र्महामात्यै र्गृहीतः स सुलक्षणः ॥ ३५ ॥

अभिषिक्तः स तै स्तत्र विधिवत् मङ्गलोदकैः ।
अभूद् विवाहविद्वेषी दृष्टस्त्रीचरिताद्भुतः ॥ ३६ ॥

कलङ्कवत्यपि गिरौ बोधिसत्त्वविवर्जिते ।
मन्दवीर्य्यौषधिः काले वृत्तिच्छेदाकुलाभवत् ॥ ३७ ॥

གྲོང་དང་གྲོང་ཁྱེར་ལམ་དུ་དེས། །ཕྲག་ལ་ཡན་ལག་ཉམས་པ་བཀོད།
བདག་པོའི་བརྟུལ་ཞུགས་ལྡན་ཚིག་གིས། །སྐྱེ་བོ་རྣམས་ལ་བསོད་སྙོམས་བསྒྲངས།། 38

བདག་པོའི་བརྟུལ་ཞུགས་ལ་གུས་པས། །ཀུན་གྱིས་དེ་ལ་མང་དུ་བྱིན།
ལོག་པའི་ཚུལ་ཁྲིམས་བརྗོད་པས་ཀྱང་། །རྒྱུད་པ་ལ་ནི་འབྱོར་བསྐྱེད།། 39

དག་བྱེད་ཀུན་གྱི་ཕྱུག་འཚལ་མ། །དེ་ཡིས་དལ་བུས་བསྐོར་ཞིང་ཕྱིན།
གྲོང་ཁྱེར་པུཥྐར་ཅན་དུ་ནི། །མི་བདག་སྒོ་དང་ཉེ་བར་སོང་།། 40

རྒྱལ་པོ་བུད་མེད་སྤྱོད་ལ་སྣང་། །བདག་ཁྲིམས་ལྡན་ལ་ཕྱུག་འཚལ་འགྱུར།
ཞེས་བསམས་དེ་ལ་གུས་པ་ཡི། །མདུན་ན་འདོན་གྱིས་རྒྱལ་ལ་སྨྲས།། 41

ལྷ་གཅིག་ཡུལ་གཞན་རིང་པོ་ནས། །བདག་པོའི་ཁྲིམས་ལྡན་སུ་ཞིག་འོངས།
གང་ཞིག་རྐང་པ་བཀོད་པ་ཡིས། །འབྱུང་པོའི་ཡུམ་ནི་དག་པར་བྱེད།། 42

ལྷ་གཅིག་བདག་པོ་ཕྲག་བཀོད་པའི། །གཙང་མ་དེ་ལ་གཟིགས་པར་མཛོད།
བདག་ཁྲིམས་ལྡན་ལ་རབ་བདུད་ནས། །སྐྱེས་པ་རྣམས་ནི་ཚེ་འཕེལ་འགྱུར།། 43

དེ་སྐད་མདུན་ན་འདོན་གྱིས་དེ། །བལྟ་བར་ཞུས་པའི་མི་བདག་གིས།
དེ་ལ་སྨྲས་པ་བྲམ་ཟེ་དག། །དྲང་པོ་ཁྱོད་ཀྱིས་ཡོངས་མི་ཤེས།། 44

བུད་མེད་མཛའ་ཞེས་འདི་རབ་གྲགས། །ཟོལ་མེད་ཅེས་པ་བློ་གྲོས་འཁྲུལ།
གཙང་ཞེས་མཁའ་ཡི་མེ་ཏོག་ཐོབ། །བུད་མེད་སྡིག་ཅེས་ཐེ་ཚོམ་མེད།། 45

स्कन्धे भग्नाङ्ग मारोप्य सा ग्रामपुरवर्त्मसु ।
जनं पतिव्रतास्मीति गिरा भिक्षा मयाचत ॥ ३८ ॥

पतिव्रतागौरवेण सर्व्वं स्तस्यै ददौ बहु ।
मिथ्याशीलप्रवादोऽपि स्त्रूते विपदि सम्पदम् ॥ ३९ ॥

अटन्ती सा शनैः प्राप्ता नगरीं पुस्करावतीम् ।
सतीति वन्दिता सर्व्वैं र्नृपद्वारान्तिके ययौ ॥ ४० ॥

राजा स्त्रीवृत्तविद्वेषी वन्दते तु पतिव्रतम् ।
इति संचिन्त्य तद् भक्त्या नृपं प्राह पुरोहितः ॥ ४१ ॥

दूरदेशान्तराद्देव प्राप्ता कापि पतिव्रता ।
ययेयं चरणन्यासै र्भूतधात्री पविचिता ॥ ४२ ॥

हे देव पश्य तां साध्वीं स्कन्धारोपितभर्त्तृकाम् ।
पतिव्रताप्रणामेन पुंसा मायु र्व्विवर्द्धते ॥ ४३ ॥

नृपः पुरोहितेनेति तत्सन्दर्शन मर्थितः ।
त मुवाच न जानीषे ब्राह्मणः सरलो भवान् ॥ ४४ ॥

स्निग्धा स्त्रीति प्रवादोऽयं निर्व्याजेति मतिभ्रमः ।
सतीति व्योमपुष्पाप्तिः पापा स्त्रीति न संशयः ॥ ४५ ॥

འབྲས་བུ་མེད་ཅིང་བཅད་ལ་སྐྱེ། སྐྱེ་བོ་འགྲོགས་ལ་དྲང་པོར་འགྱུར།
འབྲེལ་བ་རྩ་མེད་བུད་མེད་ནི། བེ་ད་ས་ཡི་འཁྲི་ཤིང་བཞིན།། 46

འབྱེད་འཁྲུ་གཅིག་པོ་འི་ཚུལ་ཁྲིམས་ཅན། རང་བཞིན་ཉིད་ཀྱིས་ཚུལ་ཁྲིམས་འཆལ།
བུད་མེད་ལ་འདུད་བུད་མེད་འདུད། བུད་མེད་ལ་འདུད་འདུད་དོ་འདུད།། 47

བུད་མེད་སྤྱོད་ཚུལ་སྐྱོན་མཐོང་བ། དེ་བསམས་གདུང་བའི་བདག་ཉིད་ཅན།
བདག་ནི་རིན་ཅེན་གྲིས་གང་བའི། ས་གཞི་འདི་ལའང་ཡོངས་མི་སྤྱོད།། 48

རི་ཡི་རི་དགས་ཆུང་མ་ལྟར་སྒོངས་ཕ་རོལ་བསླུ་ལ་མཆོག་ཏུ་སྦྲིན།
ལུས་ནི་རྣམ་པར་སྤྲིན་ལ་ཆགས་ཤིང་སྐྱེས་བུ་རྣམས་ཀྱི་སྲོག་ཀྱང་འཕྲོག།
མི་ཏོག་ལྷུང་ལ་འཇིགས་པར་བྱེད་ཅིང་མ་ཡི་ནང་དུའང་རྣམ་པར་འཇུག།
དྲང་ཞིང་གྱ་གྱུ་བུད་མེད་རྣམས་ནི་རྣམ་པར་དབྱུང་བ་བརྒྱུས་མི་ཤེས།། 49

དེ་ལྟ་ན་ཡང་གལ་ཏེ་ཁྱོད། འབད་ན་བུད་མེད་དེ་བལྟ་བྱ།
ཞེས་བརྗོད་མི་ཡི་དབང་པོ་ཡིས། ཡང་ཐོག་འཛེགས་ནས་དེ་ལ་བལྟས།། 50

ཡན་ལག་བཅད་པའི་གྲོགས་ལྡན་མ། སྡིག་ཅན་མ་དེ་ཡོངས་ཤེས་ནས།
བློན་པོ་རྣམས་ལ་ས་བདག་དེས། དེ་ཡི་སྤྱོད་མཐའ་ངེས་པར་བཤད།། 51

དེས་ཀྱང་མི་བདག་ཡོངས་ཤེས་ནས། སྐད་ཅིག་གདོང་དུ་སྡིག་ཅན་མ།
སྐྱེ་བོ་རྣ་བ་བསྒྲིབས་རྣམས་ཀྱིས། རྒྱུར་དུ་བསྐྲད་དེ་རབ་ཏུ་སོང་།། 52

निष्फला श्चाग्निरोहिण्यः सरला जनसङ्गमे ।
नार्य्यो वेतसवल्लर्य्य इव निर्मूलबन्धनाः ॥ ४६ ॥

भेदद्रोहैकशीलाभ्यो दुःशीलाभ्यः स्वभावतः ।
नमः स्त्रीभ्यो नमः स्त्रीभ्यो नमः स्त्रीभ्यो नमोनमः ॥ ४७ ॥

दृष्टस्त्रीवृत्तदोषाय तच्चिन्ताव्यथितात्मने ।
अप्येषा पृथिवी मह्यं रत्नपूर्णा न रोचते ॥ ४८ ॥

नगमृगबधूमुग्धा स्त्रीक्ष्णाः परं परवञ्चने
तनुवितरणे सक्ताः पुंसां हरन्ति च जीवितम् ।
दधति च भयं पुष्पायाते पिबन्ति च पावकं
सरलकुटिला नैव ज्ञाता विचारशतैः स्त्रियः ॥ ४९ ॥

तथापि यदि निर्व्वन्ध स्तव पश्यामि तां स्त्रियम् ।
इत्युक्ता हर्म्य मारुह्य तां ददर्श नरेश्वरः ॥ ५० ॥

तामेव स परिज्ञाय पापां कृत्तांगसङ्गिनीम् ।
सचिवेभ्यः क्षितिपति स्तद्वृत्तान्तं न्यवेदयत् ॥ ५१ ॥

नृपं सापि परिज्ञाय पापा क्षण मधोमुखी ।
निरस्ता प्रययौ तूर्णं पिहितश्रवणै र्जनैः ॥ ५२ ॥

ཁྱད་པར་ལོ་མ་ཞེས་པའི་མི་དབང་སྐུས།
དེ་བདག་དེ་ཡི་ཆུང་མ་དེ་ལྷ་སྦྱིན།
ཞེས་པའི་བྱུང་ཚུལ་རྒྱལ་བས་བཤད་ཐོས་ནས།
དགེ་སློང་རྣམས་ཀྱིས་དེ་ཡི་སྤྱོད་པ་སྨད།། 53

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཁྱད་པར་ལོ་མའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་སུམ་ཅུ་རྩ་གཉིས་པའོ།།

विशाखनामा नरनाथसूनुः
सोऽहं वधूः सास्य च देवदत्तः ।
श्रुत्वेतिवृत्तं कथितं जिनेन
भिक्षुव्रज स्तच्चरितं निनिन्द ॥ ५३ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
विशाखावदानं द्वात्रिंशः पल्लवः ॥

ཡལ་འདབ་གསུམ་ཙུ་རྩ་གསུམ་པ།

བསོད་ནམས་རབ་ཞི་བདུད་རྩིའི་རང་བཞིན་མཐུ།
དེ་ནི་དག་པའི་བདག་ལ་ཅི་ཡང་ཡོད།
གང་གི་མཐུ་ཡིས་མ་རུངས་པ་རྣམས་ཀྱང་།
འཕྲུལ་ལ་ཁྲོ་བའི་དུག་ནི་རབ་ཏུ་གཏོང་ ॥ 1

དེ་བཞིན་གཤེགས་པ་རྒྱལ་བྱེད་ཚལ། ཀུན་དགའ་ར་བར་སྤྱོན་བཞུགས་ཤིང་།
དེ་ཡི་དཀའ་ཡིས་དགེ་སློང་ཚོགས། རི་དང་ནགས་ལ་རྒྱུ་བའི་ཚེ ॥ 2

རི་རབ་ལྷུན་པའི་ངོས་ལ་ནི། འདུག་ནས་བསམ་གཏན་སྐྱོང་བྱེད་པ།
དགེ་སློང་ཉམ་ཆུང་བཞིན་རས་ནི། མཛེས་བྲལ་སྐྱུ་བོ་ནམ་དག་འོང་ ॥ 3

དེ་ནས་བཅོམ་ལྡན་ཞབས་པད་ལ། མངོན་པར་ཕྱག་འཚལ་དེ་དག་གིས།
ལུས་ནི་ཉམ་ཐལ་ཆུང་བའི་རྒྱུ། དགེ་སློང་རྣམས་ཀྱིས་དྲིས་ནས་སྨྲས ॥ 4

མཁའ་ལྡིང་གིས་ཀྱང་གནས་དཀའ་བའི། ཀླུ་ནི་དགའ་བོ་ཉེར་དགའ་དག།
ལྷུན་པོ་ལ་ནི་ལན་གསུམ་དུ། བསྐོར་ཅིང་གཅིངས་ནས་རྣམ་པར་གནས ॥ 5

དེ་དག་རྟག་ཏུ་དུག་གི་དབུགས། མེ་ཡིས་རྒྱས་པ་ལན་གསུམ་སྤྲོ།
རེག་པས་རྡོ་བ་རྣམས་དག་ཀྱང་། འཕྲུལ་ལ་ཉིད་དུ་ཐལ་བར་བྱེད ॥ 6

त्रयस्त्रिंशः पल्लवः ।

स कोऽपि पुण्यप्रशमानुभावः
शुद्धात्मना मर्त्यमृतस्वभावः ।
यस्य प्रभावेण भवन्ति सद्यः
क्रूरा अपि क्रोधविषप्रमुक्ताः ॥ १ ॥

पुरा तथागते जेतवनारामविहारिणि ।
तदाज्ञया भिक्षुगणे गिरिकाननचारिणि ॥ २ ॥

सुमेरुपरिषण्डायां स्थित्वा ध्यानपरायणाः ।
आययु र्भिक्षवः पाण्डुविच्छायवदनाः कृशाः ॥ ३ ॥

तेऽथ कृत्वा भगवतः पादपद्माभिवन्दनाम् ।
ऊचिरे भिक्षुभिः पृष्टा देहदौर्बल्यकारणम् ॥ ४ ॥

सुमेरुं त्रिगुणावृत्त्या वेष्टयित्वा व्यवस्थितौ ।
अहष्टौ वैनतेयस्य नागौ नन्दोपनन्दकौ ॥ ५ ॥

तौ सदा त्रिविधोच्छ्वासं सृजतः कोपपावकम् ।
भवन्ति भस्म स्पर्शेन सहसैव शिला अपि ॥ ६ ॥

དེ་ཡི་དུག་གི་དབུགས་ཀྱིས་ནི། བསམ་གཏན་སྦྱོར་བ་བདག་ཅག་བསྒྲིགས།
བཞིན་མཛེས་ཁ་དོག་བྲལ་བ་དང་། རིད་པ་འབའ་ཞིག་ཉིད་དུ་གྱུར།། 7

ཅེས་དེ་བཤད་ཚེ་དགེ་སློང་གི། ཚོགས་ཀྱི་མདུན་བཞུགས་སྟོན་པ་ཡིས།
ཀླུ་དག་འདུལ་བ་ལ་འོས་པར། མཽ་གལ་གྱི་བུ་ལ་བསྟན།། 8

སྦྱོར་བས་མི་སྣང་དབྱིབས་ཅན་དེས། ལྡོག་གི་མཁའ་ལ་འཁྲུད་པ་ཡི།
རི་རབ་ལྷུན་པོར་ཡང་དེ་ཕྱིན། ཀླུ་དབང་དག་ནི་ཉལ་བ་མཐོང་། 9

དེ་ཡིས་དལ་བུས་བསྐྱང་བ་ལས། གང་ཚེ་དེ་དག་མ་སད་པ།
དེ་ཚེ་དེ་ནི་ཀླུ་ཆེན་གྱི། ལུས་སུ་གྱུར་ནས་ཡང་དག་བཅིངས།། 10

དེ་ཡིས་བསྡམས་པས་རབ་སད་དེ། འཇིགས་རུང་དབྱིབས་དེ་མཐོང་གྱུར་ནས།
འཇིགས་པས་རྣམ་པར་འཁྲུགས་གྱུར་ཏེ། མི་ཡི་གཟུགས་ཀྱིས་རབ་ཏུ་དྲིས།། 11

དེ་ནས་པན་ཚུན་འཁྲོས་བྱེད་པ། དེ་ལ་མཽ་གལ་གྱི་བུས།
ཀླུ་ཡི་གཟུགས་ནི་ཡོངས་བཏང་ནས། རང་གི་གཟུགས་སུ་བྱས་ཏེ་སྨྲས།། 12

ཀླུ་དག་མགྱོགས་པར་གང་དུ་འགྲོ། འཇིགས་པ་འདི་ནི་ཡང་དག་མཐོང་།
གང་གིས་ཁྱེད་ཅག་འཇིགས་བྱེད་པའི། ཀླུ་དེ་དེ་ན་མི་གནས་སོ།། 13

དེ་ཡི་འཇིགས་པས་གལ་ཏེ་ཁྱོད། རྣམ་ཀུན་བརྟན་པ་མེད་ཉིད་ན།
སྐྱབས་སུ་འོས་པ་སངས་རྒྱས་ལ། མངོན་པར་ཕྱག་འཚལ་ཅི་མི་བྱེད།། 14

वय न्तद्विषनिश्वासै र्निर्दग्धा ध्यानयोगिनः ।
विवर्णवदनच्छायाः केवलं कृशतां गताः ॥ ७ ॥

इति तैः कथिते शास्ता भिक्षुसंघार्थितः पुरः ।
नागयो र्दमने योग्यं मौद्गल्यायन मादिशत् ॥ ८ ॥

स सुमेरुं समासाद्य शृङ्गै रालिङ्गिताम्बरम् ।
सुप्तौ ददर्श नागेन्द्रौ योगेनान्तर्हिताकृतिः ॥ ९ ॥

योध्यमानौ शनै स्तेन बुबुधाते यदा न तौ ।
तदा महानागवपु र्भूत्वा स समवेष्टयत् ॥ १० ॥

प्रबुद्धौ पीड़ितौ तेन दृष्ट्वा तं भीषणाकृतिम् ।
विद्रुतौ नररूपेण तस्थतु र्भयविह्वलौ ॥ ११ ॥

नागरूपं परित्यज्य कृत्वा रूपं स्वकं ततः ।
पलायमानावन्योन्यं तौ मौद्गल्यायनोऽवदत् ॥ १२ ॥

नागौ क्व गम्यते तूर्णं भयं संत्यज्यता मिदम् ।
न स नागः स्थित स्तत्र येन विद्रावितौ युवाम् ॥ १३ ॥

सर्व्वथा यदि नास्त्येव तद्भयाद् युवयो र्धृतिः ।
क्रियते किं शरण्यस्य न बुद्धस्याभिवन्दनम् ॥ १४ ॥

ཅེས་དེས་བརྗོད་ཐོས་དུལ་བ་ཡིས། དེ་དག་གིས་ནི་དེ་ལ་སྨྲས།
འཕགས་པ་བཅོམ་ལྡན་བསྟན་པ་ཡིས། བདག་ཅག་ལ་ནི་བཀའ་དྲིན་མཛོད། 15

ཅེས་སྨྲ་ཀླུ་ཡི་དབང་པོ་དག། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་ཁྲིར་ནས།
དེ་དག་ལོ་རྒྱས་བ་ཤད་ནས་དེ། དེ་ལ་ཕྱག་འཚལ་ཉེ་བར་འཁྲིད། 16

དེ་ནས་ཀླུ་དབང་སྐྱབས་སོང་ཞིང་། རིན་ཅེན་འོད་ཀྱིས་ས་གཞི་དག།
བརྒྱན་པས་ཕྱག་འཚལ་བྱས་པ་ལ། བཅོམ་ལྡན་འདས་ཀྱིས་བཀའ་སྩལ་བ། 17

བསྒྲུབ་པའི་གནས་ནི་ཡང་དག་ཐོབ། འབྱུང་པོ་ཀུན་ལ་འཇིགས་མེད་ཕྱིར།
སྐྱབས་ཀྱི་གྲོགས་ནི་ཐོབ་པ་ལས། ད་ནི་ཁྱེད་ཅག་འཇིགས་པ་མེད། 18

ཅེས་ནི་ཡང་དག་གཟིགས་ཙམ་གྱིས། དེ་དག་སྐྱོན་དང་སྡང་བ་དང་།
བྲལ་བ་བཅོམ་ལྡན་འདས་ཀྱིས་མཛད། དེ་ལ་ཕྱག་འཚལ་སོང་བར་གྱུར། 19

བསམ་པ་ཆེ་རྣམས་ཡན་ལག་མཐོང་ཉིད་ན།
སྡང་བའི་དུག་ཚན་གདུང་བས་གཅོས་པ་ཡང་།
འོད་ཀྱི་ཟེའུ་གྱི་ལུས་ལ་ཆགས་པ་ཡིས།
ཞི་བའི་བདུད་རྩི་བསིལ་བ་ཉིད་དུ་འགྱུར། 20

དེ་ཡི་སྟོན་གྱི་བྱུང་བའི་མཐའ། མཐུ་ཡི་ཡ་མཚན་དགེ་སློང་གིས།
དྲིས་ཤིང་རྒྱལ་བ་བཅོམ་ལྡན་འདས། ཐམས་ཅད་གཟིགས་པས་དེ་ལ་གསུངས།
21

इति तेनोक्त माकर्ण्य विनयात्तौ तमूचतुः ।
प्रसादः क्रियतामार्य्य भगवद्दर्शनेन नो ॥ १५ ॥

इति ब्रुवाणौ नागेन्द्रौ नीत्वा भगवतोऽन्तिकम् ।
स तद्वृत्तान्त मावेद्य प्रणम्य समुपाविशत् ॥ १६ ॥

भगवानथ नागेन्द्रौ बभाषे शरणागतौ ।
प्रणाम ञ्चक्रतू रत्नप्रभाभूषितभूतलौ ॥ १७ ॥

शिक्षापदानि संप्राप्य सर्व्वभूताभयप्रदौ ।
शरणप्राप्तिसमयादधुना निर्भयौ युवाम् ॥ १८ ॥

इत्यालोकनमात्रेण दोषद्वेषविवर्जितौ ।
कृतौ भगवता सम्यक् जग्मतु स्तं प्रणम्य तौ ॥ १९ ॥

संदर्शनेनैव महाशयानां
प्रभापदेशेन शरीरलग्नैः ।
हिंस्रा अपि द्वेषविषोष्मतप्ताः
शमामृतैः शीतलतां व्रजन्ति ॥ २० ॥

तत्पूर्व्वजन्मवृत्तान्तं भिक्षुभि र्भगवान् जिनः ।
प्रभावविस्मयात् पृष्टः सर्व्वदर्शी जगाद तान् ॥ २१ ॥

བ་ར་ཧ་སིར་མི་ཡི་དབང་། དཔལ་ལྡན་ཀྲི་ཀི་ཞེས་པ་སྟོན།
བཅོམ་ལྡན་འོད་སྲུངས་ཞེས་པ་ལས། ཆོས་ཀྱི་བསྟན་པ་ཐོབ་པར་གྱུར།། 22

དེ་ཡི་ཕྲིན་པོ་དགའ་བོ་དང་། ཉེར་དགའ་དག་ལ་རྒྱལ་སྲིད་གཏད།
བྱང་ཆུབ་ལ་ནི་ཡང་དག་ཆགས། བདེན་པ་མཐོང་ལ་དགའ་བར་གྱུར།། 23

དེ་ཡི་ཕྲིན་དེས་རྒྱལ་སྲིད་ནི། ཆོས་དང་ཆོས་མིན་རང་བཞིན་དང་།
འོད་སྲུངས་ལ་ཡང་གཙུག་ལག་ཁང་། ཡོ་བྱད་ཀུན་དང་ལྡན་པར་བྱས།། 24

དུས་ཀྱིས་འདི་དག་དགའ་བོ་དང་། ཉེ་དགའ་ཀླུ་ཡི་དབང་པོར་སྐྱེས།
གཙུག་ལག་ཁང་ཡུལ་བསོད་ནམས་ཀྱི། ལྷུན་པོས་འཛིན་དེ་ཡི་གནས།། 25

དེ་ལྟར་གདེངས་ཅན་མཆོག་གི་སྤྱོད་པ་ལུས་གཞན་དག།
ཡོངས་གྱུར་ལེགས་སྤྱོད་ཡོངས་འདྲིས་རྒྱལ་བས་གསུངས་པ་དག།
ཞི་བའི་ཚུལ་ལྡན་ཐུབ་མཆོག་ཚོགས་ཀྱིས་ཐོས་གྱུར་དེ།
དུག་འཛིན་ངེས་པར་ཞི་བའི་ཡོན་ཏན་བསྟོད་པར་གྱུར།། 26

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་ བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དགའ་བོ་ཉེ་དགའི་རྟོགས་པ་བརྗོད་
པའི་ཡུལ་འདབ་སྟེ་གསུམ་ཙུ་རྩ་སུམ་པའོ།།

क्रिकिर्नाम पुरा श्रीमान् वाराणस्यां नरेश्वरः ।
काश्यपाख्याद् भगवतः प्राप्तवान् धर्म्मशासनम् ॥ २२ ॥

अमात्ययोः स विन्यस्य राज्यं नन्दोपनन्दयोः ।
बभूव बोधिसंसक्तः सत्यदर्शननिर्वृतः ॥ २३ ॥

धर्म्माधर्म्ममयं राज्यं कृत्वा तौ तस्य मन्त्रिणौ ।
सर्व्वोपकरणैर्युक्तं विहारं काश्यपाय च ॥ २४ ॥

कालेन जातौ नागेन्द्रावेतौ नन्दोपनन्दकौ ।
विहारार्पणपुण्येन पदं मेरुरभूत्तयोः ॥ २५ ॥

इति जिननिगदितफणिवरचरितं
परतनुपरिणतिपरिचितसुकृतम् ।
श्रुतवति शमनयमुनिपरिनिवहे
विषधरनियमनगुणनुतिरुदभूत् ॥ २६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
नन्दोपनन्दावदानं त्रयस्त्रिंशः पल्लवः ॥

ཡལ་འདབ་སུམ་ཅུ་རྩ་བཞི་པ།

གང་ཞིག་ནོར་གྱི་ཆ་ཤས་ཆུང་ངུའི་ལྷག།
གཞན་ལ་ཕན་པར་བསྒོམས་པས་བྱིན་གྱུར་པ།
ཡོན་དན་བརྟག་པ་ཡོངས་སུ་མི་ཟད་པས།
བསོད་ནམས་དེ་ནི་ཁྱད་པར་གྱུར་པ་ཡིན།། 1

དེ་ནས་འགའ་ཞིག་འདས་དུས་ན། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་ནི།
ཆོས་སྟོན་པ་ལ་དགའ་བོ་དང་། ཉེ་དགའ་ཉན་དུ་འོངས་པའི་ཚེ།། 2

རྒྱལ་པོ་གསལ་རྒྱལ་བཅོམ་ལྡན་ལ། བལྟ་བའི་སླད་དུ་ཉེ་བར་འོངས།
དེ་དག་གིས་ནི་བསྙེན་བཀུར་དང་། ཕྱག་མ་བྱས་པས་ཁྲོས་པར་གྱུར།། 3

རྒྱལ་ལ་ཕྱག་འཚལ་དེ་སོང་ནས། དེ་དག་ཆད་པས་གཅད་པར་བསམས།
དེ་དག་གིས་ཀྱང་མཁར་སོང་སྟེ། དེ་ལ་མཆོད་ཀྱིས་ཆར་པ་ཕབ།། 4

ཀུན་མཁྱེན་གྱིས་བསྐུལ་མགྱོགས་པར་ནི། མཻ་གལ་གྱི་བུ་སོང་ནས།
མི་བདག་གི་ནི་མཆོད་ཆར་དེ། པདྨ་ཨུཏྤལ་འཕྲེང་བར་བྱས།། 5

སླར་ཡང་ས་ཡི་བདག་པོ་ཡིས། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་ཕྱིན།
གདེངས་ཅན་དབང་པོ་འོངས་པ་ལ། དེ་ཡི་བཀའ་ཡིས་བཟློད་གསོལ་བྱས།། 6

चतुस्त्रिंशः पल्लवः ।

दत्तः परहितभावनया
यदि तनुधनकणशेषः ।
अपरिक्षयगुणकल्पनया
भवति सुपुण्यविशेषः ॥ १ ॥

अथ व्यतीते कस्मिंश्चित् काले भगवतोऽन्तिके ।
नन्दोपनन्दयो धर्म्मदेशनां श्रोतुमाययौ ॥ २ ॥

राजा प्रसेनजिद्द्रष्टुं भगवन्त मुपागतः ।
ताभ्या मकृतसत्कारप्रणामः कोप माययौ ॥ ३ ॥

स प्रणम्य जिनं गत्वा प्रदध्यौ निग्रहं तयोः ।
शस्त्रवृष्टिं संसृजन्तौ तौ च व्योम्ना समागतौ ॥ ४ ॥

सर्व्वज्ञप्रेषित स्तूर्णं मौद्गल्यायन एत्य ताम् ।
शस्त्रवृष्टिं नरपते श्चक्रे पद्मोत्पलावलिम् ॥ ५ ॥

पुनर्ग्गत्वा भगवतः समीपं पृथिवीपतिः ।
संप्राप्तौ क्षमयामास तस्यादेशात् फणीश्वरौ ॥ ६ ॥

དེ་ནས་ས་བདག་གིས་གསོལ་ཏེ། རྒྱལ་པོ་འི་ཁང་པར་བཅོམ་ལྡན་འདས།
དགེ་སློང་ཚོགས་བཅས་གུས་པ་ཡིས། གཙང་མའི་བ་ཞེས་ནི་གསོལ་ཏུ་
གཤེགས།། 7

ཁ་ཟས་འཚོད་པར་བྱེད་ཚེ་དེར། མཚན་མོ་མེ་ཡི་ཅེར་འཚོ་སྐྱེས།
འཕྲུལ་ལ་རྒྱལ་བའི་མཐུ་སེམས་ནི། རབ་ཏུ་ཞི་བ་ཉིད་དུ་གྱུར།། 8

བཅོམ་ལྡན་གསོལ་ནས་གཤེགས་པའི་ཚེ། རང་གི་གྲོང་དུ་ས་བདག་གིས།
མཚན་མོ་མེ་ནི་འབར་བ་ལ། ཆད་པའི་གྲོས་ཀྱིས་དགག་པ་སྒྲས།། 9

སྐབས་དེར་ཁྱིམ་བདག་ལེགས་སྦྱིན་གྱི། བུ་ནི་རྫུ་འཕྲུལ་སྟོབས་ཞེས་པ།
ཡང་ཚོ་ལྡན་པ་རྫུན་སྐྱོན་གྱིས། རྒྱལ་པོ་ཡིས་ནི་མངོན་པར་བསད།། 10

སྔོན་དུ་བཅོམ་ལྡན་སྟོན་པ་ཡིས། བསྟན་པ་རྗེས་སུ་བཟུང་བས་དེ།
ཡེ་ཤེས་བརྟན་ཐོབ་བུ་ཡི་ནི། སྡུག་བསྔལ་གྱིས་ཀྱང་སྡུག་མིན་གྱུར།། 11

བུད་མེད་རང་གི་ནོར་མང་པོ། བཀྲེན་པ་རྣམས་ལ་དེས་རབ་བྱིན།
ཤིན་ཏུ་ཆགས་ལས་དལ་བུས་དཔལ། པ་ཊ་གཅིག་གི་ལྷག་མར་བྱས།། 12

དེ་ནས་པ་ཊའི་རྙེད་པའི་ཚེས། མ་ལུས་ཆུང་ངུ་བྱིན་ནས་བྱུས།
དེ་ནི་ཁྱིམ་ལེགས་སྟེར་ཞེས་གྱུར། ཁྱིམ་ནི་ཤིན་དུ་ཆུང་ངུར་བརྗོད།། 13

ནམ་ཞིག་བལྟ་བ་ལ་འོངས་ཤིང་། མདུན་འཁོད་ཆུང་ངུ་སྦྱིན་པ་ཡིས།
མིང་གིས་ངོ་ཚར་གྱུར་དེ་ལ། བཅོམ་ལྡན་བརྩེ་བས་བཀའ་སྩལ་པ།། 14

अथार्थितः पार्थिवेन भगवान् राजमन्दिरम् ।
भक्तिपूतं ययौ भोक्तुं भक्तं भिक्षुगणैः सह ॥ ७ ॥

भक्ष्येषु पच्यमानेषु रात्रौ तत्राग्निविप्लवः ।
जातो जिनप्रभावेण सहसा शान्ति माययौ ॥ ८ ॥

भुक्त्वा गते भगवति क्षितिपः स्वपुरेऽभ्यधात् ।
ज्वलनज्वालनं रात्रौ वारयन् दण्डसंविदा ॥ ९ ॥

अत्रान्तरे गृहपतिः सुदत्तस्यात्मजो युवा ।
मिथ्यादोषाद्दह्निबलो नाम राज्ञाभिघातितः ॥ १० ॥

पूर्व्वं भगवतः शास्तुः शासनानुग्रहेण सः ।
लब्धज्ञानधृतिः पुत्रदुःखेऽप्यासीददुःखितः ॥ ११ ॥

अपुत्रः स्वधनं भूरि दीनेभ्यः प्रतिपाद्य सः ।
चकारातिरसादेकपणशेषं शनैः श्रियः ॥ १२ ॥

पणलाभकृताशेषधर्म्मः स्वल्पप्रदोऽथ सः ।
अभूद्गृही सुदत्ताख्यो गृहं हि स्वल्पमुच्यते ॥ १३ ॥

कदाचिद्दर्शनायातं भगवान् पुरतः स्थितम् ।
तं स्वल्पदाननाम्नैव लज्जितं दययावदत् ॥ १४ ॥

ཁྲིམས་བདག་སྦྱིན་པ་ཆུང་ངུ་ལ། ངོ་ཚ་བགྱི་བར་མི་འོས་སོ།
དད་པས་སྦྱིན་པ་བྱིན་པའི་ཐིགས། གསེར་གྱི་རི་བོ་མཚུངས་པར་གྱུར༎ 15

སྔོན་ཚེ་གཉིས་སྐྱེས་བེ་ལ་མས། ཤིན་ཏུ་མང་བ་རབ་ཏུ་བྱིན།
དད་པ་དང་བྲལ་ཐུན་མོང་བས། དེ་བཞིན་དུ་ནི་འཕེལ་མ་གྱུར༎ 16

སྲུ་ཞིག་འཛམ་གླིང་གཏོགས་པ་ཡིས། འགྲོ་ཀུན་གུས་པས་གསོལ་བྱེད་དང་།
སྲུ་ཞིག་བྱང་ཆུབ་ལྡན་ཞིག་ལ། དེ་ཡི་བསོད་ནམས་དེ་བས་ལྷག༎ 17

ཅེས་པ་བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས། བདེན་པ་ཐོས་ནས་མངོན་དགའ་ཞིང་།
དེ་ལ་ཕྱག་འཚལ་ཁྲིམས་བདག་ནི། རང་གི་ཁང་པར་རབ་ཏུ་སོང་༎ 18

མཚན་མོ་མར་མེ་བཏང་ནས་དེར། བཅོམ་ལྡན་རྗེས་བསྟན་སྒྲོག་པ་ན།
མེ་ནི་རབ་བསྒྲུབས་ཆད་པའི་སྐད། དེ་ནི་རྒྱལ་པོ་འི་སྐྱེས་བུས་བཟུང་༎ 19

ཆད་པའི་དངོས་པོ་མེད་པ་ན། བཙོན་ཁང་དག་ཏུ་བཞག་སྟེ་བཅིངས།
མཚན་མོ་བརྒྱ་བྱིན་ཚངས་པ་སོགས། ལྷ་རྣམས་དེ་ལ་བལྟ་རུ་འོངས༎ 20

དེ་དག་གིས་གསོག་ནོར་ལོང་ཞེས། གང་ཚེ་དེ་ཡིས་མ་བླངས་པ།
དེ་ཚེ་དེ་ཡི་ཁང་པར་ནི། ཆོས་བསྟན་པ་ལས་བསགས་པ་འཕེལ༎ 21

དེ་ཡི་མཐུ་ཡིས་རྒྱལ་པོས་ཀྱང་། གྲོང་ཁྱེར་རབ་ཏུ་འབར་མཐོང་ནས།
བཙོན་ར་ནས་ནི་དེ་བཏང་ཚེ། གང་དུའང་མེ་ནི་མཐོང་མ་གྱུར༎ 22

अल्पदानं गृहपते न लज्जां कर्त्तु मर्हसि ।
याति श्रद्धार्पितो दानकणः कनकशैलताम् ॥ १५ ॥

पुरा बहुतरं दत्तं वेलमेन द्विजन्मना ।
श्रद्धाविरहसामान्यान्न तथा वृद्धि माययौ ॥ १६ ॥

यः सर्व्वं भोजयेद्भक्त्या जम्बुद्वीपगतं जनम् ।
यश्चैकं बोधिसंयुक्तं तस्य पुण्यं ततोऽधिकम् ॥ १७ ॥

इति वाक्यं भगवत स्तथ्यं श्रुत्वा विनन्द्य च ।
निजगेहं गृहपतिः प्रययौ प्रणिपत्य तम् ॥ १८ ॥

दीपं दत्त्वा पठन् रात्रौ तत्र बुद्धानुशासनम् ।
दण्डाय राजपुरुषैः स नीतोऽग्निप्रवर्त्तनात् ॥ १९ ॥

दण्डस्य सम्भवात् बद्धं बन्धनागारवर्त्तिनम् ।
तं द्रष्टु माययु र्देवा रात्रौ शक्रब्रह्मादयः ॥ २० ॥

स तै र्धनं गृहाणेति प्रार्थितो नाग्रहीद् यदा ।
तदा धर्म्मोपदेशोऽयं प्रवृत्तस्तस्य मन्दिरे ॥ २१ ॥

राजापि तत्प्रभावेण दृष्ट्वा प्रज्वालितं पुरम् ।
मुक्त्वा तं बन्धनागारान्न ददर्श जलं क्वचित् ॥ २२ ॥

ནམ་ཞིག་བདེ་ག་ཤེགས་བལྟ་རུ་ནི། ཕྱིན་ནས་དེ་མདུན་འཁྲིད་པ་དེས།
མི་བདག་རྒྱལ་ལ་ཕྱག་འཚལ་སྨད། ཕྱི་ནས་འོངས་པ་མཐོང་བར་གྱུར།། 23

དེ་ཡི་སྔོན་དུ་བཅོམ་ལྡན་ལ། ཕྱག་བྱས་ས་ཡི་བདག་ལ་མིན།
འགྲོ་བས་མཆོད་འོས་སྔོན་དུ་ནི། གཞན་ལ་མཆོད་པར་འོས་པ་མིན།། 24

མི་བདག་རྒྱལ་ལ་རབ་བཏུད་ནས། རང་གི་གྲོང་ཁྱེར་དག་དུ་སོང་།
ཁྱིམ་བདག་རང་གི་གྲོང་ཁྱེར་ལས། གཞན་དུ་སྤྱུགས་ཞེས་བཀའ་ཡི་བསྒོས།། 25

དེ་ནས་ལེགས་སྦྱིན་དག་ལ་ལྷ། རབ་དུ་དད་པས་མི་བདག་ལ།
སྲོག་ཆགས་ཕྲ་མོ་རབ་སྲོས་དེ། སོ་ཡི་དུག་གིས་འབྲུགས་པར་བྱས།། 26

དེ་དག་གིས་བདབ་མི་བདག་དེ། བློན་པོ་བཙུན་མོ་འི་རྗེས་འབྲང་བཅས།
ཕྱིན་ནས་རྒྱལ་བའི་བསྟན་པ་ལས། ལེགས་སྦྱིན་ལ་ནི་དང་བར་བྱས།། 27

དེ་ལྟར་རྟག་དུ་ཉེ་བར་གནས་པས་མཆོག་གི་བདུད་རྩི་དག་གི་ཚོགས།
ཁྱིམ་གི་བདག་པོ་ལེགས་སྦྱིན་དེ་ཡིས་བཅོམ་ལྡན་གྱིས་གསུངས་ཞི་བ་བསྟེན།
དྲི་མེད་ཡིད་ལྡན་རྣམས་ཀྱི་མཐའ་རུ་གནས་པས་དབེན་པའི་གཏེར་ཆེན་ནི།
རང་གི་བཞིན་དུ་གེགས་དང་ཉོན་མོངས་ངལ་དུབ་རྣམ་པར་སྤངས་པས་འཕྲོབ།། 28

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཁྱིམ་བདག་ལེགས་སྦྱིན་གྱི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་གསུམ་ཅུ་རྩ་བཞི་པའོ།

स गतः सुगतं द्रष्टुं कदाचित्तत्पुरः स्थितः ।
नृपं जिनप्रणामाय प्राप्तं पश्चाद् व्यलोकयत् ॥ २३ ॥

अग्रे भगवतश्चक्रे प्रणयं न स भूपतेः ।
जगत्पूज्यस्य पुरतः पूजा मर्हति नापरः ॥ २४ ॥

जिन मामन्त्र्य नृपतिः प्रणतः स्वपुरं गतः ।
विवासनं गृहपतेरादिदेश निजात् पुरात् ॥ २५ ॥

प्रसादिनी सुदत्तस्य देवता नृपतिं ततः ।
क्षुद्रजन्तुभि रुत्सृष्टै श्चक्रे दंशविषाकुलम् ॥ २६ ॥

स त्रस्त स्तै र्नृपः प्राप्तः सामात्यान्तःपुरानुगः ।
गत्वा प्रसादयामास सुदत्तं जिनशासनात् ॥ २७ ॥

इति स सततप्रत्यासत्त्या परामृतनिर्भरं
भगवदुदितं शान्तिं भेजे सुदत्तगृहाधिपः ।
स्वमिव लभते विघ्नायासप्रयासविवर्ज्जितं
विमलमनसामन्तेवासी विवेकमहानिधिम् ॥ २८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
गृहपतिसुदत्तावदानं चतुस्त्रिंशः पल्लवः ॥

ཡལ་འདབ་སྡེ་གསུམ་ཅུ་རྩ་ལྔ་པ།

སྤྲིན་པའི་གྲོགས་སུ་སྐད་ཅིག་སུ་གྱུར་པ།
དེ་དག་སྤྲིན་བདག་འབྲས་བུ་མཚུངས་པ་འཕྲོབ།
གཞན་ལ་ཕན་པར་བརྩོན་པར་ཞུགས་རྣམས་ཀྱི།
གྲོགས་སུ་བསོད་ནམས་ལས་མེད་མི་འགྱུར་རོ།། 1

བཅོམ་ལྡན་རྒྱལ་བ་མཉེན་ཡོད་ཀྱི། རྒྱལ་བྱེད་ཚལ་ནི་དགའ་བར་སྡོད།
མགོན་མེད་ཟས་སྦྱིན་གཙུག་ལག་ཁང་། ཀུན་དགའ་ར་བར་མངོན་དགྱེས་ཚེ།། 2

ཀཽ་ཤཱམ་བིར་བད་ས་ཡི། མི་བདག་འཆར་བྱེད་ཅེས་པ་བྱུང་།
རིགས་འཛིན་བུ་མོའི་སྐྱེ་བ་ཡིས། ད་ལྟའང་གང་གིས་གྲགས་པ་སྒྲོགས།། 3

དེ་ཡི་ཡུལ་དུ་ཁྲིམ་པ་ནི། ལས་མཐའི་འབྱུང་གནས་ཀྱིས་འཚོ་བ།
ནོར་བཟང་ཞེས་བྱ་ནོར་དག་ནི། སྒྲུབ་ལ་རྣམ་པར་མཁས་པར་གྱུར།། 4

ནམ་ཞིག་བུ་བ་དོན་གཉེར་ཞིང་། མདུན་སར་འོངས་པ་མི་བདག་གིས།
ཚིག་ཉིད་ཀྱིས་ནི་ཡོངས་ཤེས་ནས། གུས་པ་བསྐྱེད་དེ་དེ་ལ་སྨྲས།། 5

ཁྲིམ་བདག་གསེར་ནི་ཡོངས་བསགས་པ། ཁྱོད་ཀྱི་དབྱངས་ནི་བདག་གིས་ཤེས།
སོག་པ་ཤེས་པ་ཁྱོད་ལ་ནི། གསེར་གྱི་གཏེར་ཆེན་ཡངས་པ་ཡོད།། 6

पञ्चत्रिंशः पल्लवः ।

फलं समानं लभते स दातु-
र्य्याति क्षणं दानसहायतां यः ।
परोपकारप्रणयोद्यतानां
नापुण्यकर्म्मा सचिवत्व मेति ॥ १ ॥

रम्ये पुरा भगवति श्रावस्त्यां जेतकानने ।
अनाथपिण्डदारामविहाराधिरते जिने ॥ २ ॥

कौशाम्ब्यां वत्सनृपति र्बभूवोदयनाभिधः ।
गायत्याद्यापि यत्कीर्त्तिं विद्याधरवधूजनः ॥ ३ ॥

अभवद् विषये तस्य कर्म्मान्ताकरजीवनः ।
गृहस्थः सुधनो नाम धनाधानविचक्षणः ॥ ४ ॥

नृपः कदाचिदास्थाने तं कार्य्यार्थिन मागतम् ।
वचसैव परिज्ञाय जगाद विहितादरः ॥ ५ ॥

जानाम्यहं गृहपते त्वां हिरण्योपचितस्वरम् ।
विपुलः सञ्चयस्तस्य सुवर्णनिधि रक्ति ते ॥ ६ ॥

རྒྱལ་པོས་འཇུམ་བཅས་འདི་བརྗོད་ཆེ། དེ་ལ་ཐལ་སྦྱར་དེས་སྨྲས་པ།
རྒྱལ་པོ་བདག་གི་ཁྲིམ་ན་གསེར། བསགས་པ་བདེན་པར་ཡོད་པ་ཉིད།། 7

མཉེས་གཤིན་ཡངས་པ་དམ་པ་ཡི། སྤྱོད་ཚུལ་བསམ་པ་ལ་ཆགས་ལྷ།
ཡབ་ཁྱོད་ཀྱིས་ནི་བསྐྱངས་པ་ཡི། སྐྱེ་བོ་འདི་ལ་ཅི་ཞིག་མེད།། 8

གལ་དེ་མི་བདག་བརྩེ་བ་མེད། ཟང་ཟིང་ལ་སྣོམ་སྡུག་ལྷུར་འགྱུར།
ནོར་ལྡན་རྣམས་ནི་ནོར་མེད་འགྱུར། ནོར་མེད་རྣམས་ནི་འཆི་བར་འགྱུར།། 9

མི་བདག་ཆོས་ཀྱི་ནོར་ལྡན་ན། དགོས་པ་མེད་པས་སྐྱེ་བོ་རྣམས།
ནོར་བསྒྲུབ་བསྒྲུབས་པའང་འགོད་བྱེད་ཅིང་། བགོས་པ་གསལ་བར་ལོངས་
སྤྱོད་བྱེད།། 10

བློ་ལྡན་དེ་ཡི་ཚིག་དག་ནི། ཕུན་ཚོགས་ས་བདག་གིས་ཐོས་ནས།
སོ་ཡི་འོད་ཀྱིས་བཀའ་དྲིན་ནི། གསལ་བར་བྱེད་བཞིན་དེ་ལ་སྨྲས།། 11

བདག་གི་ཐུ་བའི་བློན་པོར་ནི། བློ་གྲོས་ལྡན་པ་ཁྱོད་འགྱུར་འོས།
བློ་སྟོབས་ལྡན་པ་ཁྱོད་ལྟ་བུས། འཛིན་བྱེད་ཁུར་ནི་འཛིན་པར་བྱེད།། 12

དེ་སྐད་རྒྱལ་པོའི་ཚིག་ཐོས་ནས། ནོར་བཟང་གིས་ནི་དེ་ལ་སྨྲས།
བདག་ནི་རྒྱལ་པོའི་གཡོག་འཁོར་ལ། མདུན་སར་མཛེས་པའི་མཁས་པ་མིན།།
13

གཡོག་ནི་སྐྱེས་བུ་རྣམས་དག་གི། རང་དབང་སྐྱིད་ཚོལ་རྣམ་པར་གཅད།
བདེ་བའི་གཉེན་དང་བདེ་བའི་འཚོང་། འཁོར་བའི་སྡུག་བསྔལ་བཀྲིན་
འཛིགས་ཏེ།། 14

इत्युक्तः सस्मितं राज्ञा स त मूचे कृताञ्जलिः ।
सत्यमस्त्येव मे राजन् गृहे काञ्चनसञ्चयः ॥ ७ ॥

सद्‌वृत्तचिन्तानिरते देवे वात्सल्यपेशले ।
किम्बा नास्ति जनस्यास्य पितरि त्वयि गोप्तरि ॥ ८ ॥

धनिनो यान्त्यधनतां निधनं यान्ति चाधनाः ।
व्याघ्रतां याति चेद् भूभृदामिषाघ्राणनिर्घृणः ॥ ९ ॥

निःशङ्कै रर्ज्यते वित्त मार्जितञ्च विभज्यते ।
विभक्तं भुज्यते स्पष्टं जनै र्धर्म्मधने नृपे ॥ १० ॥

उपपन्नं वचः श्रुत्वा धीमत स्तस्य भूपतिः ।
तमूचे दशनोद्योतैः प्रसादं दर्शयन्निव ॥ ११ ॥

मतिमान् कार्य्यसचिव स्त्वं मे भवितुमर्हसि ।
धौधुर्य्यै स्त्वद्विधैरेव धार्य्यते धरणीभरः ॥ १२ ॥

इति राजवचः श्रुत्वा सुधन स्त मभाषत ।
न वयं राजसेवासु सभामण्डलपण्डिताः ॥ १३ ॥

स्वाच्छन्द्योद्यानविच्छेदः सुनिद्रासुखविक्रयः ।
सेवा हि पुंसां संसारदुःखदैन्यभयङ्करः ॥ १४ ॥

གཡོག་པོ་དག་ནི་ཀང་སྡིགས་བཞིན། ཏག་ཏུ་འོག་ན་གནས་པ་ཡི།
མགོ་ལ་དབང་ཕྱུག་ཞབས་བཀོད་ན། བྱ་བ་བྱས་པ་ཉིད་དུ་འགྱུར།། 15

གཡོག་གི་ཉོན་མོངས་ངལ་དུབ་ཀྱིས། ཕུན་ཚོགས་ཐོབ་པའང་ལོངས་སྤྱོད་ཀྱང་།
ཕྲ་མ་ཅན་དང་འགྲོགས་པ་ཡི། ཐེ་བོའི་སྐྱིན་མ་འཁྲིག་པོས་གཡོ།། 16

གཟུང་དཀའི་གདོན་བཞིན་མི་བདག་གི། ཕུན་ཚོགས་བྲག་ཏག་གཟུང་དཀའ་བ།
འདི་དག་རབ་ཏུ་འབད་པ་ཡི། བཟུང་ཡང་ངེས་པར་མི་གནས་སོ།། 17

འཁྲིར་པ་གསར་པ་གསར་པ་ནི། འདུ་འཕྲལ་མཛའ་གཙུགས་རྩོམ་པ་དག།
མི་བཟློག་སྐད་འཚོང་མཛེས་པ་བཞིན། སྐད་ཅིག་དགའ་བར་བྱ་བ་ཡིན།། 18

ཞེས་སྨྲས་རབ་ཏུ་བཀག་གྱུར་ཀྱང་། རྒྱལ་པོས་དེ་ནི་བློན་པོར་བྱས།
རྗེ་བོ་མཆོག་ཏུ་བཞེད་པ་ལ། ངེས་པར་སུ་ཞིག་འདའ་བར་བྱེད།། 19

རྒྱལ་པོས་ཀུན་གྱི་གཉེར་གཏད་ཅིང་། ཤིན་ཏུ་ཆེ་བའི་གནས་ཐོབ་སྟེ།
རྣམ་པར་སྤང་བས་སྲུན་འཁྱེན་པའི། བློན་པོ་རྣམས་ཀྱིས་བཟོད་མ་གྱུར།། 20

ཕྲ་མ་ཅན་གྱིས་བསླུ་བ་ཡི། རྒྱལ་པོས་ཆོས་ནི་བཏག་འདོད་ནས།
དམ་པའི་བྱ་བ་མིན་པའི་ལས། ཡང་ཡང་བསྐོས་ཀྱང་དེས་མ་བྱས།། 21

དེ་ནས་མི་བདག་ཁྲོ་རྒྱུན་གྱིས། དེ་ནི་གསོད་དུ་བསྐུལ་བར་གྱུར།
དེ་ལྟ་ན་ཡང་ཆོས་མིན་དང་། ཡང་དག་ལྡན་པའི་བཀའ་མ་མཉེས།། 22

ईश्वरैर्मस्तकन्यस्तचरणैः कृतकृत्यताम् ।
पादपीठ इवायाति सेवकोऽहंस्थितः सदा ॥ १५ ॥

सेवायासप्रयासेन प्राप्तानामपि सम्पदाम् ।
सम्भोगः पिशुनासङ्गी प्रभुभ्रूभङ्गभङ्गुरः ॥ १६ ॥

एताश्च नावतिष्ठन्ते प्रयत्नेन धृता अपि ।
दर्पोग्रदुर्ग्रहग्राहदुर्ग्रहा नृपसम्पदः ॥ १७ ॥

क्षणं नवनवश्लेषविशेषप्रणयोद्यताः ।
अवारवाररमणीरमणीया विभूतयः ॥ १८ ॥

इत्युक्तप्रतिषेधोऽपि स राज्ञा सचिवः कृतः ।
अतिक्रामति को नाम प्रभविष्णोः समीहितम् ॥ १९ ॥

प्राप्तप्रौढ़पदं राज्ञा नीतं सर्व्वाधिकारिताम् ।
विद्वेषदूषिताः सर्व्वे मन्त्रिण स्तं न सेहिरे ॥ २० ॥

धर्म्मजिज्ञासया राज्ञा पिशुनप्रेरितेन सः ।
नैवाकरोदसत्कार्य्यं नियुक्तोऽपि पुनः पुनः ॥ २१ ॥

आघातं प्रेक्षितः सोऽथ मिथ्याकोपेन भूभुजा ।
तथाप्यधर्म्मसंयुक्तं न शासन मतन्यत ॥ २२ ॥

སྐྱེ་བ་གཅིག་ཉིད་བདེ་བའི་སྐད། སྐྱེ་བ་བརྒྱ་མང་ཉམས་འགྱུར་བ།
སྨད་པའི་ལས་ནི་དགེ་བ་བདག། མི་བགྱིད་དོ་ཞེས་དེ་ཡིས་སྨྲས།། 23

ཆོས་ཀྱི་འཇིགས་ཤིང་ཚོ་འབྲང་གཙང་། དེ་ནི་ས་བདག་གིས་རབ་བདང་།
སྤྱོང་བ་རྣམས་ནི་མ་ལུས་ལ། རྒྱུན་ཆད་མེད་པའི་སྦྱིན་ཁང་བྱས།། 24

གྲགས་སྙན་ལྡན་པ་དེ་ཡིས་ནི། སྦྱིན་ཁང་ཀུན་དུ་གྲགས་པའི་ཚེ།
དཔག་བསམ་ཤིང་ལ་སྐྱེས་བུ་རྣམས། གུས་པ་མཆོག་ཏུ་ཆུང་བར་གྱུར།། 25

གནས་སྐབས་དེར་ནི་ཐུབ་པའི་ཚོགས། འཇུག་ངོགས་དོན་གཉེར་ལྷོ་ཕྱོགས་ནས།
འོངས་པ་འབྲོག་དགོན་ཉམ་ང་བ། སྐྱེ་བ་མེད་པའི་གནས་སུ་ཞུགས།། 26

དེར་ནི་ཐམས་ཅད་སྐོམ་པས་གཟིར། བརྒྱལ་ཞིང་མལ་སྟན་ལ་བརྟེན་པས།
སེམས་མེད་ལ་ཡང་སྨོངས་པ་ལས། སྐད་ཆེན་ཆུ་ནི་རབ་ཏུ་བླངས།། 27

ལྷ་དང་དྲི་ཟ་ཀླུ་རྣམས་ལས། བཙོ་བའི་ཆུ་གཏེར་སྲུ་ཞིག་འདིར།
གང་གནས་དེ་ཡི་བདག་ཅག་ལ། ཆུ་རབ་སྩོལ་ཞེས་དེ་ཡིས་སྨྲས།། 28

དེ་ནས་རིན་ཆེན་དཔུང་རྒྱན་ཅན། གསེར་གྱི་དྲིལ་ཆུང་སྒྲ་སྒྲོགས་ཤིང་།
ལག་པས་གསེར་གྱི་ཆུ་སྣོད་བཟུང་། ཤིང་གི་དབུས་ནས་བྱུང་བར་གྱུར།། 29

ལག་པའི་པདྨས་བདུད་དེ་ལེས། བདུད་རྩི་སྐྱུང་བཞིན་དེ་དག་གིས།
མགྲིན་པའི་བར་དུ་ཆུ་འཐུངས་ནས། འཚོ་བ་ཐོབ་ཅིང་དགའ་བར་གྱུར།། 30

एकजन्मसुखायैव बहुजन्मशतार्ह्हितम् ।
न साधुनिन्दितं कर्म्म करोमीति जगाद सः ॥ २३ ॥

भयधर्म्मोपधाशुद्धः प्रतिमुक्तः स भूभुजा ।
दानसत्त्र मविच्छिन्न मकरोदखिलार्थिनाम् ॥ २४ ॥

सर्व्वत्र विश्रुते तस्य दानसत्त्रे यशस्विनः ।
कल्पवृक्षादरः पुंसां परं प्रतनुतां ययौ ॥ २५ ॥

अत्रान्तरे मुनिगणास्तीर्थार्थी दक्षिणापथात् ।
आगता रूक्षकान्तार मविशन् निर्जनं वनम् ॥ २६ ॥

तत्र तृष्णातुराः सर्व्वे मूर्च्छिताः शयनाश्रिताः ।
अयाचन्त जलं मोहादुच्चै र्निश्चेतनानपि ॥ २७ ॥

देवगन्धर्व्वनागेभ्यः कश्चिद्योऽत्र दयांबुधिः ।
स्थितः प्रयच्छतु जलं सोऽस्माक मिति ते ऽब्रुवन् ॥ २८ ॥

ततः स रत्नकेयूरकणत्कङ्कणसद्ध्वनिः ।
भुजस्थहेमभृङ्गार स्तरुमध्याद् विनिर्य्ययौ ॥ २९ ॥

ते तस्मादमृतास्वादं पाणिपद्मावनामितात् ।
आकण्ठं सलिलं पीत्वा जहृषु र्लब्धजीविताः ॥ ३० ॥

ཡམ་མཚན་ལྡན་པ་དེ་དག་རྣམས། ཆས་དེ་སྔར་ཡང་མདོར་ཁྱོགས་དེ།
མི་མཐོང་ཞིང་གི་གནས་དག་ལས། ངེས་འགྲོན་ཁྲིད་ནི་སུ་ཞེས་དྲིས།། 31

དེ་ཡིས་སླུས་པ་མཚན་ཡོད་ན། སྔོན་པར་གྲགས་པ་དཔལ་གྱི་གནས།
མགོན་མེད་ཟས་སྦྱིན་ཞེས་བྱ་བ། ཀུན་སྤྱིར་ཁྱིམ་གྱི་བདག་པོ་ཡོད།། 32

ཚོམ་བུ་པ་དག་དེ་ཡིས་ནི། ཁྱིམ་དང་ཉེ་བར་གནས་པས་སྟོན།
དབྱུང་པ་བསྐྱངས་ནས་སྐྱོང་རྣམས་ལ། དེ་ཡི་ཁྱིམ་ནི་རྟག་ཏུ་བསྟན།། 33

བསོད་ནམས་དེ་ཡི་ལྷ་ཉིད་ན། ཐོབ་ཅིང་ད་ལྟ་བདག་འདིར་གནས།
སྐྱོང་བའི་རྗེས་མཐུན་དབྱུང་པ་དེས། བདག་གི་གཡས་པ་འདི་མཛེས་སོ།། 34

ཐུབ་པ་དེ་དག་དེ་ལ་ནི། ཁམས་བདེ་བྲུས་ནས་སྔར་སོང་བ།
ནགས་སུ་བཀྲིས་པས་རྐང་འཐུང་མཆོག། མཛེས་ཞིང་གྲིབ་བསིལ་ལྡན་པ་མཐོང་།། 35

དེ་བཞིན་ཉིད་དུ་དེ་དག་གིས། དེ་ལ་ཡང་ནི་བཟའ་བ་བླངས།
ཡ་མཚན་བྱེད་པ་ཟབ་མོ་ཡི། སྐད་ཀྱང་རབ་ཏུ་བྱུང་གྱུར་དེ།། 36

རྫིང་བུ་འདི་ཡི་འཇུག་ངོགས་ཀྱི། འགྲམ་ན་བཟའ་བ་ལྷ་ཡི་ཟས།
ཡོངས་རྫོགས་ཡོད་ཀྱི་རེར་སོང་ལ། གང་ཞིག་འདོད་པ་གསོལ་བར་མཛོད།། 37

དེ་སྐད་ངེས་བསྟན་དེ་དག་གིས། མཆོག་གི་བཟའ་བ་ཟོས་ནས་ནི།
མཆོག་གི་ཞིང་ལ་གནས་དེ་ལ། ཁྱོད་སུ་ཞེས་པ་རབ་ཏུ་དྲིས།། 38

प्रार्थितः पुन रभ्येत्य प्रपच्छु स्ते सविस्मयाः ।
अदृश्यवृक्षनिलया दुद्रूतं को भवानिति ॥ ३१ ॥

सोऽब्रवीद् विश्रुतयशाः श्रावस्त्या माश्रयः श्रियः ।
अनाथपिण्डदो नाम सर्व्वदोऽस्ति गृहाधिपः ॥ ३२ ॥

सौचिकेन मया पूर्व्वं तद्गृहान्तिकवासिना ।
भुज मुद्यम्य तद्वेश्म दर्शितं नित्य मर्थिनाम् ॥ ३३ ॥

तेन पुण्येन देवत्वं प्राप्तोऽत्र विहराम्यहम् ।
बाहु र्मम विभात्येष दक्षिणः सोऽर्थिदक्षिणः ॥ ३४ ॥

ते त मामन्त्र्य मुनयः पुनः संप्रस्थिता वने ।
क्षुधिताः स्निग्धसच्छायां ददृशुः पादपं परम् ॥ ३५ ॥

तमप्युच्चै रयाचन्त भोजनं तद्वदेव ते ।
उच्चचार च गम्भीरा वाणी विस्मयकारिणी ॥ ३६ ॥

अत्र पुष्करिणीतीरे द्रोण्यां दिव्यान्नभोजनम् ।
सम्पूर्णं मस्ति तद्गत्वा भुज्यतां यदभीप्सितम् ॥ ३७ ॥

इति तेन समादिष्टं भुक्त्वा ते दिव्यभोजनम् ।
को भवानिति पप्रच्छु स्तं दिव्यतरुसंश्रयम् ॥ ३८ ॥

དེས་ཀྱང་སླུས་པ་མཚན་ཡོད་ན། ཁྱིམ་བདག་མགོན་མེད་ཟས་སྦྱིན་ཡོད།
དེ་ཡི་དགེ་འདུན་མཆོད་ལ་བདག། བྲམ་ཟེ་རིམ་གྲོ་ལ་མཁས་པས། 39

ཡོངས་སུ་སྤྱད་པ་བཞི་ཡིས་ནི། ཞོ་ཡི་བུམ་པ་འགྲིམ་བྱེད་ཅིང་།
དེ་དག་གསོལ་བ་མཐར་ཕྱིན་ཚེ། ཟས་ལྷག་ཆུང་ངུ་ཟ་བར་གྱུར། 40

དགེ་སློང་རྣམས་ལ་རྒྱལ་པོ་འི་ཟས། ཞི་ས་རྒྱ་ཆེ་ལྡན་པ་དང་།
བདག་ཉིད་ལ་ནི་ཟས་ངན་དག། མཐོང་ནས་བདག་ཡིད་སྐྱོ་བར་གྱུར། 41

མགོན་མེད་ཟས་སྦྱིན་ཚོག་གིས་ནི། ཟས་ལ་གུས་པའི་བསམ་པ་ཡིས།
ཡན་ལག་བརྒྱད་ལྡན་གསོ་སྦྱོང་གི། བརྟུལ་ཞུགས་དེ་ནས་བདག་གིས་བླངས། 42

དེ་ནས་བརྟུལ་ཞུགས་མ་རྫོགས་པས། སྲིད་པས་བདག་གིས་མཚན་མོ་ཟོས།
དེ་ཡིས་བདག་ནི་འཇིག་རྟེན་དུ། གསོ་སྦྱོང་ཉམས་པར་རྣམ་པར་གྲགས། 43

བརྟུལ་ཞུགས་ཉམས་པ་དེ་ཡིས་ཀྱང་། བདག་ནི་ལྷ་ཡི་བུ་ཉིད་གྱུར།
དེ་ཡི་ཚིག་དེ་ཐོས་གྱུར་ནས། ཐུབ་པ་དེ་དག་ཡ་མཚན་གྱུར། 44

དེ་དག་འགྲོ་ཞིང་རབ་བསམས་པ། དཀའ་ཐུབ་དྲག་པོས་བདག་ཅག་རྣམས།
ཡུན་རིང་ཉོན་མོངས་འབའ་ཞིག་གྱུར། ད་དུང་དགེ་ལ་རིག་པ་མེད། 45

ད་ནི་གསོ་སྦྱོང་བརྟུལ་ཞུགས་ཉིད། རབ་དུ་བསྒྲུབ་ལ་འབད་པར་བྱ།
གནོད་པ་མེད་ཅིང་བདེ་བའི་ཐབས། རང་ལ་ཕན་ལ་སུ་མི་གུས། 46

सोऽप्याचचक्षे श्रावस्त्यां गृहस्थोऽनाथपिण्डदः ।
अस्ति तस्याह मभवं ब्राह्मणः संघभोजने ॥ ३९ ॥

चतुरः परिचर्य्यायां दधिकुम्भप्रचारकः ।
तद्भोजनान्ते संप्राप्ते स्वल्पशेषान्नभोजनः ॥ ४० ॥

भिक्षूणां गौरवोच्चारं दृष्ट्वाहं राजभोजनम् ।
आत्मनश्चान्न मक्षार मभवं खिन्नमानसः ॥ ४१ ॥

अनाथपिण्डदगिरा भोजने गौरवाशयाः ।
ततो मयाष्टाङ्गयुक्तं गृहीतं पोषधं व्रतम् ॥ ४२ ॥

असमाप्तव्रतेनाथ भुक्तं लौल्यान्मया निशि ।
तेनाह मभवं लोके विज्ञातः खण्डपोषधः ॥ ४३ ॥

खण्डेनापि व्रतेनाहं देवपुत्रत्व मागतः ।
इति ते तद्वचः श्रुत्वा मुनयो विस्मिता ययुः ॥ ४४ ॥

अचिन्तयन् व्रजन्त स्ते तीव्रेण तपसा वयम् ।
सुचिरं केवलं क्लिष्टा नाद्यापि कुशलस्पृशः ॥ ४५ ॥

अधुना पोषधं प्राप्तुं व्रतमेव यतामहे ।
निरपायसुखोपाये स्वहिते कस्य नादरः ॥ ४६ ॥

དེ་ལྟར་བསམས་ཤིང་དེ་དག་ནི། ཀོའུ་ཤམ་བིར་གཏད་ནས་སོང་།
ཁྲིམས་ན་གནས་པ་ནོར་བཟང་གི། ཁྲིམས་ནི་གྲགས་དང་ལྡན་པར་ཕྱིན།། 47

དེས་དེར་མགྲོན་གྱི་བྱ་བ་བྱས། དེ་ལ་རྨད་བྱུང་དེ་དག་བཤད།
མགོན་མེད་ཟས་སྦྱིན་བལྟ་བའི་སྐད། དེ་དང་ལྡན་ཅིག་ཉིད་དུ་སོང་།། 48

མཉན་ཡོད་དུ་ནི་ཡང་དག་ཕྱིན། དེ་རྣམས་དེ་ཡིས་གུས་བཅས་མཆོད།
དེ་ལ་ཇི་ལྟར་མཐོང་བ་དང་། ཇི་ལྟར་ཐོས་པ་ཐམས་ཅད་བཤད།། 49

བརྟུལ་ཞུགས་དོན་གཉེར་དེ་ཀུན་དང་། གྲོགས་པོ་ནོར་བཟང་དེ་ཡང་ནི།
ཆོས་ཀྱི་གྲོགས་དང་མཛའ་བ་ཡིས། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་ཁྲིད།། 50

དེ་ཡི་ཚིག་གིས་དེ་དག་རྣམས། བཅོམ་ལྡན་གྱིས་ཀྱང་རྗེས་སུ་བཟུང་།
གང་གི་དེ་དག་བདེན་པ་མཐོང་། ཡང་དག་རྟོགས་ཤིང་བདེར་བགྲོད་གྱུར།། 51

དེ་དག་སོང་ཚེ་བཅོམ་ལྡན་གྱིས། ཕྱོགས་ལྷུང་བརྟན་པའི་སྤྱན་གྱིས་ནི།
ནོར་བཟང་ཉིད་ལ་རྣམ་གཟིགས་ནས། ཡང་དག་ཡེ་ཤེས་ལྡན་པར་མཛད།། 52

བདེན་པ་ཡང་དག་མཐོང་བ་ཐོབ། ཁྱད་པར་དགེ་བ་རྒྱས་པ་དེ།
སོང་ནས་རྒྱལ་བའི་གཙུག་ལག་ཁང་། ཀོའུ་ཤམ་བིར་བྱེད་དུ་བཙུག།། 53

གང་ཕྱིར་བཅོམ་ལྡན་གྱིས་བསྔོས་པས། དེར་ནི་གྲོགས་པ་འོངས་གྱུར།
དགེ་སློང་སྐུལ་བྱེད་དེ་ཕྱིན་དེས། སྐུལ་བྱེད་གཙུག་ལག་ཁང་ཞེས་གྱུར།། 54

इति सञ्चिन्तयन्त स्ते कौशाम्बी मभितो गताः ।
सुधनस्य गृहं प्रापु र्विश्रुतं गृहमेधिनः ॥ ४७ ॥

तत्र तेन कृतातिथ्या निवेद्यास्मै तदद्भुतम् ।
अनाथपिण्डदं द्रष्टुं तेनैव सहिता ययुः ॥ ४८ ॥

श्रावस्त्यां ते समासाद्य पूजिता स्तेन सादरम् ।
अस्मै न्यवेदयन् सर्व्वं यथादृष्टं यथाश्रुतम् ॥ ४९ ॥

स तान् व्रतार्थिनः सर्व्वान् सुहृदं सुधनञ्च तम् ।
निनाय धर्म्मसचिवः प्रीतो भगवतोऽन्तिकम् ॥ ५० ॥

भगवानपि तद्वाक्याच्चक्रे तेषा मनुग्रहम् ।
सत्यदर्शनसम्बुद्धा येन ते सुगतिं ययुः ॥ ५१ ॥

तेषु यातेषु सुधनं पक्षपाताद्दया दृशा ।
विलोक्य भगवान् सम्यक् विदधे ज्ञानभाजनम् ॥ ५२ ॥

सत्यसन्दर्शनावाप्तविशेषकुशलोदयः ।
गत्वा जिनाय कौशाम्ब्यां स विहार मकारयत् ॥ ५३ ॥

यस्माद् भगवतादिष्टः तस्मिन् यातः सहायताम् ।
भिक्षु श्चुन्दाभिध स्तस्मात् सोऽभूच्चुन्दविहारभूः ॥ ५४ ॥

གཙུག་ལག་ཁང་སྐྱོང་འབངས་མོ་ནི། མགུ་བྱེད་ཅེས་པས་སྦྲུལ་[illegible]བ་ཡི།
ཐོས་རྒྱལ་དེ་ལ་བརྗེ་བ་ཡིས། བཅོམ་ལྡན་འདས་ཀྱིས་ཡང་དག་བཟླ[illegible]ས། 55

དེ་ཡིས་འབང་མོར་བདག་གྱུར་ཅེས། དད་པའི་སྨོན་ལམ་གྱིས་སྤྲུལ་དེ།
བཅོམ་ལྡན་འདས་ཀྱི་ཆོས་གོས་ལ། ཁ་དོག་གཅིག་པ་ཉིད་དུ་གྱུར། 56

ནོར་བཟང་གི་ནི་བསོ་ནམས་ཚོགས། རྨད་བྱུང་རབ་འབར་མགྲོན་གྱུར་ནས།
དེ་ཡི་སྦྱོར་བྱུང་དགེ་སློང་གིས། ཞུས་ཤིང་བཅོམ་ལྡན་གྱིས་ཀྱང་གསུངས། 57

ཕ་ར་ཊ་སེར་ཁྲིམས་བདག་སྤྱོད། གཟུགས་བྱེད་ཅེས་ནི་བྱ་བར་གྱུར།
རྒྱ་ཆེན་སྤྲང་པོ་གང་ཞིག་ནི། སྦྱིན་པ་ཡོངས་སུ་ཟད་མ་གྱུར། 58

ལོ་ནི་བཅུ་གཉིས་ཆར་མེད་ཀྱིས། ཉམས་པའི་དུས་སུ་དེ་ཡིས་ནི།
སྦྱིན་ཁང་མི་ཟློག་སློང་རྣམས་ལ། ཟས་ནི་རྒྱུན་ཆད་མེད་པར་གྱུར། 59

དེ་ཡི་ཁྲིམས་དུ་མཛོད་ཁང་བདག། པདྨའི་འབྱུང་གནས་ཞེས་བྱ་བས།
སྦྱིན་པ་ཡིས་ནི་གྲོགས་དག་བྱས། གང་ཕྱིར་གྲོགས་དང་ལྡན་པས་འགྲུབ། 60

དེ་ཡི་རང་རྒྱལ་ཚོགས་དག་གི། ཟས་ཀྱི་དུས་ནི་རིག་བྱེད་པ།
ལྷག་པའི་བློ་ལྡན་ཉེ་བར་གནས། ཆོས་ཀྱི་བོ་ཉ་ཞེས་པར་གྱུར། 61

ནམ་ཞིག་དེ་ནི་ལས་ཀྱི་བྲེལ། དུས་ནི་ཡོལ་བར་གྱུར་པའི་ཚེ།
དེ་དག་རྣམས་ཀྱི་མདུན་དུ་ནི། ཁྲི་ཡིས་དུས་ཀྱི་བརྡ་དག་བྱས། 62

राधाभिधा तदा दासी विहारपरिचारिका ।
दयया भगवानस्याः शीर्षं वस्त्रं समग्रहीत् ॥ ५५ ॥

अदासी स्यामिति श्रद्धाप्रणिधानार्पित स्तया ।
स चीवरो भगवतः प्रयया वेकवर्णताम् ॥ ५६ ॥

सुधनस्योज्ज्वलं दृष्ट्वा पुण्यसम्भार मद्भुतम् ।
भिक्षुभि र्भगवान् पृष्ट स्तत्पूर्व्वोदय मभ्यधात् ॥ ५७ ॥

सुन्धानाख्यो गृहपति र्वाराणस्या मभूत् पुरा ।
नोदारकुञ्जरस्याभूत् यस्य दानपरिक्षयः ॥ ५८ ॥

अनावृष्टिहते काले तस्य द्वादशवार्षिके ।
अवारित मभूच्छन मविच्छिन्नान्न मर्थिनाम् ॥ ५९ ॥

तस्य पद्माकरो नाम कोषागारपति र्गृहे ।
दानसाहायक ञ्चक्रे सहस्था हि समृद्धयः ॥ ६० ॥

प्रत्येकबुद्धसङ्घस्य भक्तकालनिवेदकः ।
धर्म्मदूताभिध स्तस्य मन्त्री धीमानुपस्थितः ॥ ६१ ॥

कर्म्मव्याक्षेपत स्तस्य जाते कालव्यतिक्रमे ।
कदाचित् कुकुर स्तेषां कालसंज्ञा व्यधात् पुरः ॥ ६२ ॥

གཟུགས་བྱེད་གང་དེ་ང་ཉིད་དེ། མཆོད་པ་མགོན་མེད་ཟས་སྦྱིན་ནོ།
ཚོགས་ཀྱི་ཆོས་ཀྱི་ཞོ་ཤ་གང་། དེ་ཉིད་སི་བདག་རཆར་བྱེད་ཡིན།། 63

གང་ཞིག་བཛྲ་ནི་རིག་བྱེད་པའི། ཁྲི་དེ་ཡང་ནི་ནོར་བཟང་ངོ་།
རྒྱལ་པོས་གདངས་ལས་ཞེས་པས་ན། གདངས་ཅན་ཞེས་པ་མིང་གཞན་གྱུར།། 64

དེ་ལྟར་ཡིད་ནི་ལེགས་པ་རྣམས་ཀྱི་སྤྱོད་པ་དག།
རིགས་པར་སྤྱོད་པ་འཚིགས་བྱེད་བཅོམ་ལྡན་གྱིས་གསུངས་པ།
ལེགས་བྱས་དྲི་བཟང་སྙིང་པོར་ལྡན་པ་བདུད་རྩིའི་རོ།
དགེ་སློང་རྣམས་ཀྱིས་གསན་པའི་སྙིམ་པས་འཐུངས་པར་གྲགས།། 65

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་པའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གདངས་ཅན་གྱི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སྟེ་གསུམ་ཅུ་རྩ་ལྔ་པའོ།།

सुन्धानोऽद्य स एवाहं कोष्ठिकोऽनाथपिण्डदः ।
सङ्घस्य धर्म्मदूतो यः स एवोदयनो नृपः ॥ ६३ ॥

संज्ञानिर्देशको यश्च कुक्कुरः सुधनोऽपि सः ।
राज्ञा घोषेण विज्ञातो घोषिलापरनामभृत् ॥ ६४ ॥

चरितमित्युचितं भवभेदिना
भगवता कथितं किल भिक्षवः ।
सुकृतसौरभसारसुधारसं
सुमनसः श्रवणाञ्जलिभिः पपुः ॥ ६५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
घोषिलावदानं पञ्चत्रिंशः पल्लवः ॥

ཡལ་འདབ་གསུམ་ཙུ་རྩ་དྲུག་པ།

ལྷ་ཡི་རྫིང་བུ་དག་ཏུ་འདམ་ལས་སྐྱེས་པའི་ཆུ་སྐྱེས་རྗེས།
ཡོངས་བསྐམས་གཙང་སར་སྐྱེས་པའི་པདྨ་དག་ལ་རེག་མི་བྱེད།
ལྷན་སྐྱེས་ཡོངས་སུ་འདྲིས་ཤིང་རྟག་ཏུ་ནང་ན་གནས་གྱུར་པ།
དཀར་བའི་ཡོན་ཏན་རྣམས་ཀྱི་བྱེད་པོ་རིགས་ནི་མིན་པ་ཉིད།། 1

མཚན་ཡོད་རྒྱལ་བྱེད་ཚལ་ན་སྟོན། སེམས་ཅན་ཀུན་ལ་ཤིས་པ་ཡི།
བསམ་གཏན་རྗེས་སུ་སྐྱོང་བྱེད་ཅིང་། རྒྱལ་བ་དཔག་བསམ་ཤིང་བཞུགས་ཚེ།། 2

གྲོང་ཁྱེར་སྐྱིད་མ་ལྷ་བུར་ནི། དེད་དཔོན་བློ་ལྡན་རྣམས་ཀྱི་མཆོག།
རིན་ཆེན་བསགས་པའི་རྒྱ་མཚོ་ནི། འབྱོར་པ་ཞེས་པ་བྱུང་བར་གྱུར།།

དེ་ཡི་ཆུང་མ་ཀ་དགི། ཞེས་པ་ལ་ནི་བུ་གསུམ་བྱུང་།
འབྱོར་ལྡན་དང་ནི་འབྱོར་བཟང་དང་། འབྱོར་བ་དགའ་ཞེས་གྲགས་པའོ།། 4

ནམ་ཞིག་དེ་ནི་ནད་ཀྱིས་བཏབ། འཆི་བ་འདོད་ཅིང་ཉེ་བར་གྱུར།
མཆོག་ཏུ་རྟུབ་ཅིང་ཆགས་བྲལ་བས། ཆུང་མ་བུ་རྣམས་དག་གིས་སྤངས།། 5

དེ་ཡི་འབང་མོ་འཕྲིང་ལྷར་མ། ཞེས་པ་གཅིག་གིས་གསུས་པ་ཡིས།
རྗེ་སྲིད་རྣལ་དུ་གནས་གྱུར་པ། དེ་སྲིད་རིམ་གྲོ་མཆོག་ཏུ་བྱས།། 6

षट्त्रिंशः पल्लवः ।

विबुधसरसि पद्मैः शोभिते पङ्कजन्मा
शुचिपरिसरजातं स्पृश्यते न स्थलेऽब्जम् ।
सहजपरिचितानां नित्यमन्तर्गतानां
भवति सितगुणानां कारणं नैव जातिः ॥ १ ॥

श्रावस्त्यां सर्व्वसत्त्वानां स्वस्तिध्यानपरायणे ।
जिनकल्पद्रुमे जेतवनारामस्थिते पुरा ॥ २ ॥

शुर्व्वारकाख्ये नगरे रत्नसञ्चयसागरः ।
भवो नामाभवत् सार्थपति र्मतिमतां वरः ॥ ३ ॥

भविलो भवभद्रश्च भवनन्दी च विश्रुताः ।
केतक्यां तस्य जायायां बभूवु स्तनया स्त्रयः ॥ ४ ॥

रोगयोगादुपगतः स कदाचिन्मुमूर्षुताम् ।
पारुष्याद् भृश मुद्विग्नैः पत्नीपुत्रै रुपेक्षितः ॥ ५ ॥

भक्त्या दासी तु तस्यैका परिचर्य्यापरा परम् ।
मल्लिकाख्याभवत्तस्याः सेवया स्वास्थ्य माययौ ॥ ६ ॥

མཛོད་ཉིང་ཕན་པས་རབ་བརྟད་པ། བྱས་ཤེས་དེ་ཧི་རི་དང་ལྡན།
ཟླ་མཚན་དུས་སུ་འཕྲོགས་གྱུར་པས། དེ་ལ་བུ་ནི་བཙས་པར་གྱུར།། 7

གང་ཚེ་དེ་སྐྱེས་པ་ཡི་ནི། ནོར་ཀུན་གང་བ་ཉིད་དུ་གྱུར།
ཕྱིས་པ་ཟླ་ཉ་ལྟར་མཛེས་དེ། དེ་ཚེ་གང་པོ་ཞེས་པར་གྱུར།། 8

ཕུ་བོ་གསུམ་གྱིས་ཆུང་གླངས། རྒྱ་མཚོར་ནོར་དོན་གཉེར་དུ་སོང་།
གང་པོས་ཕ་ཡི་ཚོང་ཁང་དུ། འདུག་ནས་ནོར་གྱི་བསྒྲུབ་པ་བྱས།། 9

དེ་ནས་དེ་དག་ནོར་ཐོབ་སྟེ། རྒྱ་མཚོ་ལས་ཀྱང་གྲོང་ཁྱེར་དུ།
སླར་ལོག་གཞིར་ནི་འདུས་ཕྲག་རྣམས། བགྲང་བར་བྱས་དེ་དགའ་བར་གྱུར།། 10

དེ་དག་རྒྱ་མཚོར་འགྲོད་པ་ལ། ནོར་ནི་ཟི་སྙད་བྱུང་གྱུར་པ།
རང་གི་ཁྱིམ་དུ་གང་པོ་ལ། དེ་ལས་ལྷག་པ་ཟེང་གིས་བྱུང་།། 11

དེ་མཐོང་དེ་དག་རྣམས་ཀྱི་ཕ། རྒྱན་པོས་མཐུག་གི་ཉི་མ་ལ།
དེ་ལ་ཕན་སླུས་སྨྲེད་པས་ནི། གྱུར་ཚེ་དུ་མ་ཉ་བས་པ་བསྐྱེད།། 12

ངལ་དུབ་ཆེན་པོ་མེད་པ་ཡིས། གང་པོས་ནོར་ནི་ཉེར་བསྒྲུབས་པ།
རྒྱ་མཚོའི་རྙེད་པ་དག་ལ་ནི། ཡོངས་ངལ་བྱས་པ་ཁྱོད་ཀྱི་པ་མཐོང་།། 13

དགེ་བའི་ལས་ཀྱི་རྣལ་སྦྱོར་གྱིས། ནོར་དོན་གཉེར་བ་དོན་ཡོད་འགྱུར།
གཞན་གྱི་ལག་ནས་འབྲོས་པར་བྱེད། གཞན་གྱི་ལྟུང་བར་གྱུར་པ་ཐོབ།། 14

स्नेहोपकारप्रणतः कृतज्ञः स तयान्वितः ।
कृती संगम मभ्येत्य तस्याः पुत्र मजीजनत् ॥ ७ ॥

यदा तज्जन्मनि पितुः सर्व्वार्थाः पूर्णतां ययुः ।
स तदा पूर्णनामाभूद्बालः पूर्णेन्दुसुन्दरः ॥ ८ ॥

ज्येष्ठा स्त्रयः कृतोद्वाहा ययु रब्धिं धनार्थिनः ।
पूर्णस्तु भाण्डशालायां पितु श्चक्रे धनार्जनम् ॥ ९ ॥

ततः प्रतिनिवृत्ता स्ते प्राप्तार्थाः सागरात् पुनः ।
गणनां हेमलक्षाणां कृत्वा स्व मुदिरे पुरम् ॥ १० ॥

समुद्रगमने तेषां यावानासीद् धनागमः ।
पूर्णस्य स्वगृहे पण्यै र्बभूवाभ्यधिक स्ततः ॥ ११ ॥

तद्दृष्ट्वा जनक स्तेषां वृद्धः पर्य्यन्तवासरे ।
त मूचे हित मायत्यां तृष्णा नैकक्षयोदयः ॥ १२ ॥

दृष्टं भवद्भिः सामुद्रलाभे कृतपरिश्रमैः ।
पूर्णेनोपार्जितं वित्त मक्लेशेन महीयसा ॥ १३ ॥

शुभकर्म्मविपाकेन भवन्त्यर्था धनार्थिनाम् ।
हस्तात् पलायतेऽन्यस्य प्राप्नोति पतितं परः ॥ १४ ॥

དམ་པའི་ལམ་ནི་ཡོངས་མ་བཟང་། རིགས་དང་མི་རིགས་རྣམ་བཅད་ཅིང་།
ཡུལ་དང་དུས་ནི་ཡོངས་ཤེས་ལ། དམ་པ་ཀུན་དུ་ཕུན་སུམ་ཚོགས།། 15

བློ་བཟང་སྐལ་ལྡན་རང་ཁྲིམས་དུ། ཆོས་ཀྱི་བགོ་སྐལ་ལྡན་པར་འགྱུར།
གཞན་ནི་རིན་ཅན་འབྱུང་གནས་སུ། སོང་ནས་སློག་ལ་ཐེ་ཚོམ་འཐོབ།། 16

ནོར་གྱི་ཉི་བར་གནས་པ་མཆོག། དམ་པས་འབད་དེ་རྟོགས་པར་བྱ།
འཁྲུ་མེད་དག་པའི་བློ་ལྡན་ལ། ནོར་སྦྱིན་དཔལ་ནི་རང་དབང་འགྱུར།། 17

རྟག་ཏུ་ཁྲོད་ནི་འགྲོགས་པ་ཡིས། དབྱེ་བ་དག་ནི་བསྲུང་བར་བྱ།
རིགས་ནི་དབྱེ་བས་དགེ་བ་དག། ཟག་པར་འགྱུར་དེ་བུམ་ཆུ་བཞིན།། 18

ཇི་ལྟར་བྲུད་ཤིང་བྱེ་བ་ཡིས། མེ་ཡི་འོད་ནི་མཆུངས་པ་ཉམས།
དེ་བཞིན་རིགས་བརྒྱུད་ཆེན་པོ་ཡིས། གཉེན་འདུན་བྱེ་བའི་འབྱོར་པའོ།། 19

ཆུང་མས་རྟག་ཏུ་མཚན་མོ་ནི། སྤང་བའི་རིག་བྱེད་བསླངས་པ་ཡི།
སྤྱན་ལྷ་བྱེ་བའི་བརྒྱུད་དག་ནི། ངེས་པ་ཉིད་དུ་ཇི་ལྟར་ཟློག།། 20

ཇི་སྟེ་སྟུ་རེ་ནོ་ལྷ་བུའི། བུད་མེད་ནང་དུ་མ་ཞུགས་པ།
དེ་སྲིད་རང་རིགས་སླིག་མ་ནི། མགྲོན་པོ་རྣམ་གཉིས་མི་འགྱུར་རོ།། 21

ནོར་ལ་རྩོད་པ་སྤྱུར་བླ་དང་། སྨོད་ཅིང་ཙུབ་པས་བླ་མ་དང་།
གཅིག་ལ་འདོད་པས་གྲོགས་པོ་ལ། བུད་མེད་ཀྱིས་ནི་སྡང་དུ་འཇུག།། 22

सन्मार्ग्गस्यापरित्यागात् युक्तायुक्तविवेचनात् ।
देशकालपरिज्ञानात् सतां सर्व्वत्र सम्पदः ॥ १५ ॥

भवन्ति स्वगृहे धन्याः सुधियो धर्म्मभागिनः ।
गत्वा रत्नाकरं चान्ये लभन्ते प्राणसंशयम् ॥ १६ ॥

यत्नेन वोद्धव्या सद्भिः धनस्योपनिषत् परा ।
अद्रोहमुग्धबुद्धीनां स्वाधीनानां धनाच्छ्रियः ॥ १७ ॥

रक्षणीयो भवद्भिश्च भेदः सततमंहतेः ।
भिन्नात् स्खलति कल्याणं कुलात् कुम्भादिवोदकम् ॥ १८ ॥

अथाभिन्नेन्धनस्याग्ने र्नश्यन्ते महशास्त्विषः ।
तथा विपुलवंशस्य भिन्नज्ञाते र्विभूतयः ॥ १९ ॥

भ्रातॄणां सन्ततो भेदः कथं नाम निवर्त्तते ।
अध्यापितानां पत्नीभि र्दंपविद्यां सदा निशि ॥ २० ॥

उन्नतानां स्ववशानां द्वैधं तावन्न जायते ।
यावत् कुठारधारेव योषिद्विशति नान्तरम् ॥ २१ ॥

भ्रातु र्यथानुवादेन गुरुं पारुष्यकृत्सया ।
मित्र मेकाभिलाषेण नयन्ति द्वैधतां स्त्रियः ॥ २२ ॥

གྲོགས་ཀྱི་མཛའ་གཅུགས་རྩ་བ་ནས། འབྱིན་པའི་རྒྱུར་ནི་རབ་འགྱུར་གང་།
དེ་ནི་བུད་མེད་སྨིན་མ་དག། གཡོ་ཞིང་དཀོར་ཀྱང་སྨྲ་བར་བྱེད།། 23

བུ་རྣམས་འབྱོར་པས་མངོན་འདོད་པས། ཕན་པ་འདི་བརྗོད་འབྱོར་པ་ནི།
མི་རྟག་པ་ལས་ཡོངས་མ་གྲོལ། དུས་ཀྱི་ཕ་རོལ་སོང་བར་གྱུར།། 24

ནོར་ནི་བགོས་པ་མིན་པའི་ཚེ། ཕྲུ་བོ་རྣམས་ནི་ཡུལ་གཞན་དུ།
ནོར་ཉིད་བསྒྲུབ་ལ་ཆགས་གྱུར་ཅིང་། གང་པོས་ཁྱིམ་དུ་ནོར་ལ་བསམས།། 25

དུས་ཀྱི་ཁང་པར་འོངས་པར་གྱུར། གོས་དང་ཟས་ལ་རྩོད་པ་དང་།
རྣ་བར་བུད་མེད་སྡུགས་བྱིན་པས། དེ་དག་རྣམས་ནི་རྩེ་བར་གྱུར།།

དེ་ནས་ནོར་ནི་བགོས་ལྡན་བྱེད། སྡང་བས་དབང་བྱས་དེ་དག་གིས།
འདི་ནི་འབང་མོ་འི་བུ་ཞེས་བརྗོད། གང་པོ་སྐལ་བ་མེད་པར་བྱས།། 27

དེ་ཡང་ནོར་གྱིས་གདུང་དུས་སུ། ལམ་དུ་སོ་ཀའི་ཚ་བ་ལའང་།
གླང་བས་འཁོངས་ཤིང་ཉེན་པ་ཡིས། ཤིང་ནི་ཁུར་བ་དག་གཅིག་མཐོང་།། 28

དེ་ཡིས་དེ་ལས་ཤིང་གི་ནི། རིན་གྱིས་ཤིང་གིས་ཁུར་པོ་བླངས།
སྲེག་བྱེད་ལ་ཡང་བསིལ་སྦྱོར་བ། ལྷ་ཡི་ཙན་དན་དག་ཏུ་མཐོང་།། 29

ལེགས་བྱས་ཆེན་པོ་ཉིད་ཀྱིས་བཞིན། དེ་ཡིས་ནོར་ཆེན་ཐོབ་པས་དེ།
དེད་དཔོན་རྣམས་ཀྱིས་བསྟེན་བྱ་སྟེ། ས་ཡི་བདག་པོས་མཆོད་བྱར་གྱུར།། 30

तद्वदन्ति हसन्त्योऽपि भ्रूविलासेन योषितः ।
यत् प्रयाति सुहृत्स्नेहमूलोन्मूलनहेतुताम् ॥ २३ ॥

हित मुक्तेति पुत्राणां भूतयेऽभिमतं भवः ।
अनित्यतां परिमुक्तः काले निधन माययौ ॥ २४ ॥

अविभक्ते धने शक्ता देशान्तरधनार्जने ।
ज्येष्ठा बभूवुः पूर्णस्तु गृहे वित्त मचिन्तयत् ॥ २५ ॥

कालेन गृहमागतानां वस्त्राशनविवादिनाम् ।
स्त्रीमन्त्रदत्तकर्णानां भेद स्तेषा मजायत ॥ २६ ॥

वित्ते विभज्यमानेऽथ तै र्विद्वेषवशीकृतैः ।
दासीसुतोऽय मित्युक्त्वा नीतः पूर्णो निरंशताम् ॥ २७ ॥

सोऽपि पूर्णधनः काले शीतसंकुचितं पथि ।
ददर्श ग्रीष्मतापेऽपि विवशं दारुभारकम् ॥ २८ ॥

आदाय दारुमूल्येन स तस्मात् दारुभारकम् ।
दिव्यचन्दन मद्राक्षीद्दहनस्यापि शीतदम् ॥ २९ ॥

सुकृतेनैव महता तेन लब्धमहाधनः ।
स सेव्यः सार्थवाहानां पूज्योऽभूत् पृथिवीपतेः ॥ ३० ॥

སྨོང་བ་རྣམས་ལ་ཀུན་རྫིར་དེས། རིན་ཆེན་འབྱུང་གནས་ལན་དྲུག་བསྐོར།
ཚོང་པ་ཀུན་གྱི་གྲུ་བཙས་དང་། ཤོ་གམ་ལ་སོགས་རྫིས་བརྫང་བྱས།། 31

སྔར་ཡང་མཉན་ཡོད་ན་གནས་པའི། དོན་མཐུར་ཚོང་པས་གསོལ་བཏབ་ནས།
རྒྱ་མཚོའི་གླིང་དུ་མགྲོགས་པར་དེ། གཟིངས་ལ་རབ་ཏུ་ཞོན་ནས་སོང་།། 32

དེ་ནས་གཟིངས་ནི་སྐྱར་ལོག་ཚེ། ཚིགས་སུ་བཅད་པ་བསྟན་པའི་ཕྱིར།
བདེ་གཤེགས་ལ་བརྟེན་ཚོང་པ་རྣམས། གླུ་རྩ་ལེན་པ་དེ་ཡིས་ཐོས།། 33

འདི་ནི་སུ་ཡིས་ཞེས་དེས་དྲིས། དེ་དག་ཀུན་གྱིས་ལེགས་སྨྲས་པ།
འདི་དག་སངས་རྒྱས་བཅོམ་ལྡན་འདས། བློ་ལྡན་གྱིས་གསུངས་ཚིགས་སུ་
བཅད།། 34

ཅེས་པ་སངས་རྒྱས་མཚན་ཐོས་ནས། དེ་ཡིས་དགའ་བ་ཐོབ་པར་གྱུར།
སྐྱེས་བུ་རང་ལ་བག་ཆགས་གནས། བརྗོད་པས་གསལ་བ་ཉིད་དུ་གྱུར།། 35

དེ་དག་ཕྱིས་ནི་རྒྱས་བཤད་པའི། བཅོམ་ལྡན་འདས་ཀྱི་གདམས་ངག་དེས།
ཐོས་ནས་དེ་ལ་ཡིད་སོང་སྟེ། དེ་ནི་ལྷ་ངར་འདོད་པར་གྱུར།། 36

རིམ་གྱིས་ཁྱིམ་དུ་འོངས་ནས་དེས། ཡོ་བྱད་ཐམས་ཅད་ཡོངས་བཏང་སྟེ།
གྲོགས་པོ་མགོན་མེད་ཟས་སྦྱིན་ནི། སྤུ་རྩ་མཉན་ཡོད་དར་སོང་།། 37

རབ་ཏུ་བྱུང་བར་མཐོང་འདོད་པ། དེ་ལ་དབང་པོ་གྲུབ་ནས་བཤད།
དེ་དག་ལྷན་ཅིག་ཏུས་པ་ཡིས། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་སོང་།། 38

रत्नाकरं स षट्कृत्वः प्रयातः सर्व्वदोऽर्थिनाम्।
चकार सर्व्ववणिजां तरशुल्काद्यनुग्रहम्॥ ३१॥

श्रावस्तीवासिभिः सार्थवणिग्भिः पुनरर्थितः।
ययौ प्रवहणारूढः समुद्रद्वीप माशु सः॥ ३२॥

प्रत्यावृत्ते प्रवहणे सोऽथ शुश्राव गायताम्।
वणिजां स्थावरां शैलगाथाः सुगतसंश्रयाः॥ ३३॥

कस्यैता इति ते तेन पृष्टाः सर्व्वे बभाषिरे।
एता भगवता गीता गाथा बुद्धेन धीमता॥ ३४॥

इति बुद्धाभिधामेव श्रुत्वा हर्ष मवाप सः।
पुंसां स्ववासनारूढव्यक्ति मायात्युदीरितम्॥ ३५॥

तै र्विस्तरेण कथिता माकर्ण्य भगवत्कथाम्।
सोऽभवत् तद्गतमनाः तद्दर्शनसमुत्सुकः॥ ३६॥

स शनै र्गृह मागत्य त्यक्त्वा सर्व्वपरिच्छदम्।
अनाथपिण्डदं द्रष्टुं श्रावस्त्यां सुहृदं ययौ॥ ३७॥

अभिलाषं निवेद्यास्मै प्रव्रज्यायां जितेन्द्रियः।
जगाम सहित स्तेन भक्त्या भगवतोऽन्तिकम्॥ ३८॥

གཏི་སྨུག་སྨུན་པ་ཉིན་མོར་བྱེད། ཀུན་མཁྱེན་དེར་ནི་ངེས་མཐོང་ནས།
དེ་ཡི་ཞབས་མཐོང་ཉིད་ན་དེས། བྲུ་བ་བྲུས་པ་ཉིད་དུ་བསམསམས།། 39

དེ་ཡི་བརྡུག་པ་བཅོམ་ལྡན་གྱིས། རྣམ་པར་མཁྱེན་ནས་དེ་ལ་ནི།
ཕྱོགས་རྣམས་ཚོམས་ཀྱི་ཟླ་འོད་ཀྱིས། དྲི་མེད་དབེན་པར་མཛད་ཅིང་
གསུངས།། 40

དགེ་སློང་ཚུར་ཤོག་ངོགས་མེད་ཅིང་། མི་མཐུན་ཕྱོགས་བྲལ་ཉམས་པ་སྤངས།
ལེགས་པར་གསུངས་པའི་ཆོས་འདུལ་ལ། ཚངས་པའི་སྤྱོད་པ་སྤྱོད་འདོད་པའི།།
41

ཞེས་པ་རབ་དང་ངང་ཚུལ་གྱིས། རྒྱལ་བས་སྔོན་དུ་བརྗོད་པའི་ཚེ།
དེ་ཡི་ལུས་ལ་འཕྲལ་ཉིད་དུ། མཆོན་པ་མེད་པར་རབ་བྱུང་སྐྱུང་།། 42

རབ་དུ་ཞི་ལས་དགྲ་དང་ནི། གྲོགས་ལ་མཚུངས་པར་བསྙེན་པ་དེས།
སྟོན་པའི་བཀའ་ནི་རབ་བཟུང་ནས། དེ་ལ་ཕྱག་ནི་བཙལ་དེ་སོང་།། 43

སྒྲོ་ནའི་ཕ་རོལ་འགྲམ་ཞེས་ཡུལ། མ་རུངས་སྐྱེ་བོ་འི་གནས་སུ་ནི།
རང་ཉིད་བཟོད་པ་ཡོངས་རྫོགས་ཅིང་། སྐྱེ་བོ་དག་དང་ལྷན་ཅིག་སོང་།། 44

རི་དགས་ཤོར་བ་ལ་མ་ཤེས། དེ་ནི་དེ་ནས་འོང་མཐོང་ནས།
རྔོན་པ་རྣམས་ཀྱིས་གཞུ་བཀང་སྟེ། ཁྲོ་བས་གསོད་པར་ཡང་དག་གཟས།། 45

རྣམ་འགྱུར་མེད་ཅིང་སྨྲ་ངན་མེད། འཇིགས་པ་དང་ནི་བྲལ་བ་སྟེ།
སྐད་ཅིག་ཙམ་ཀྱང་བརྗོད་མཐོང་ནས། དེ་དག་ཞི་བ་ཐོབ་པར་གྱུར།། 46

दृष्ट्वैव तत्र सर्व्वज्ञं मोहध्वान्तदिवाकरम् ।
तत्पाददर्शनेनैव मेने स कृतकृत्यताम् ॥ ३९ ॥

विज्ञाय तस्य भगवान् संकल्पं त मभाषत ।
दशनज्योत्स्नया कुर्व्वन् विवेकविमला दिशः ॥ ४० ॥

एहि भिक्षो निराशङ्के निर्विपक्षे क्षयोज्झिते ।
आख्याते धर्म्मविनये ब्रह्मचर्य्यां चरेप्सितम् ॥ ४१ ॥

इति प्रसादशीलेन जिनेनोदीरिते पुरः ।
प्रव्रज्या सहसैवास्य पपातालक्षिता तनौ ॥ ४२ ॥

ततः स शत्रौ मित्रे च प्रशमात् समतां श्रितः ।
शास्तुः शासन मादाय प्रणिपत्य जगाम तम् ॥ ४३ ॥

श्रोणापरान्तकं नाम देशं क्रूरजनाश्रयम् ।
स्वयं परीक्षितुं क्षान्तिं जनेन स समाययौ ॥ ४४ ॥

ततो दृष्ट्वा त मायान्तं मृगयाया ममङ्गलम् ।
लुब्धक श्चाप माकृष्य हन्तुं क्रोधात् समाद्रवत् ॥ ४५ ॥

निर्विकारं निरुद्वेगं स तं विगतसाध्वसम् ।
प्रहरेति ब्रुवाणञ्च दृष्ट्वैव शम मासवान् ॥ ४६ ॥

ཛོན་པ་འཕྲུལ་ལ་ཞི་གྱུར་པ། དེ་ལ་རབ་ཏུ་དང་ལྡན་རེས།
གང་གིས་དེ་ནི་རྗེས་འབྲང་བཅས། བྱང་ཆུབ་རྟོགས་བྱེད་ཆོས་བསྟན་དོ། 47

དེར་ནི་བདེ་གཤེགས་ལ་ངོས་པའི། ཡོ་བྱད་ཐམས་ཅད་ཕུན་ཚོགས་ཀྱི།
གཙུག་ལག་ཁང་ན་ཉམས་དགའ་བ། ལྔ་བརྒྱ་དག་ནི་དེ་ཡིས་བྱས། 48

གང་པོ་འི་ཡི་ཞེས་ཡོངས་སུ་རྫོགས། སྐབས་གསུམ་པ་ཡིས་མཆོད་བྱ་ཐོབ།
ཐུབ་པ་རྣམས་ཀྱིས་དགེས་བྱ་བ། ཆགས་བྲལ་དཔལ་དང་ལྡན་པར་གྱུར། 49

དེ་ནས་དེ་ཡིས་སྨོན་སྐྱེས་སྤྱན། འཁོར་ལྡན་དུས་ཀྱི་ནོར་རྣམས་ནི།
ཟད་པ་ཉིད་དུ་རབ་གྱུར་དེ། ནོར་གྱི་བསམ་པས་རྒྱ་མཚོར་སོང་། 50

དེ་ནས་དེ་ནི་གཟིངས་ལ་ཞོན། རྗེས་མཐུན་ཡང་དག་གཡོ་བ་ཡིས།
གོ་ཤཱིརྵ་ཡི་ཙན་དན་ནགས། ཉི་མ་ཉུང་དུས་སླེབ་པར་གྱུར། 51

སྤུ་རེ་ཐོགས་པ་ལྔ་བརྒྱ་ཡིས། དེར་ནི་མཆོག་གི་ཙན་དན་ནགས།
ལགས་འགྲོའི་ཚོགས་ཀྱིས་བྲུས་གྱུར་པ། དེ་ལ་གཅོད་པར་ཞུགས་པའི་ཚེ། 52

དེ་ནས་གནོད་སྦྱིན་སྡེ་ཡི་རྗེ། དབང་ཕྱུག་ཆེན་པོ་ཞེས་གྲགས་པ།
ཁྲོས་དེ་འཇིགས་པའི་རླུང་ཆེན་ནི། ཀ་ལི་ཀ་ཞེས་བྱ་བ་སྐྲོས། 53

རླུང་ནི་ཆེན་པོར་གྱུར་པ་དེས། སྲོག་ལ་ཐེ་ཚོམ་ཐོབ་གྱུར་པ།
ཚོང་པ་ཀུན་གྱིས་དབང་ཕྱུག་དང་། བརྒྱ་བྱིན་ལ་སོགས་ལྷ་རྣམས་བོས། 54

शाम्यत स्तस्य सहसा प्रसादी लुब्धकस्य सः ।
धर्म्मं दिदेश येनासौ बोधिं प्राप सहानुगैः ॥ ४७ ॥

स तत्र सुगतार्हाणां सर्व्वोपस्करसम्पदाम् ।
शतानि पञ्च रम्याणां विहाराणा मकारयत् ॥ ४८ ॥

पूर्णोऽपि ज्ञानसम्पूर्णः प्राप्त स्त्रिदशपूज्यताम् ।
वैराग्यलक्ष्म्या युक्तोऽभून्मुनीनां स्पृहणीयया ॥ ४९ ॥

अथ तस्याग्रजो भ्राता भविलः क्षीणवित्तताम् ।
कालेनोपगतः प्रायात् समुद्रं द्रविणाशया ॥ ५० ॥

ततः प्रवहणारूढ़ः सोऽनुकूलैः समीरणैः ।
गोशीर्षचन्दनवनं प्रापितः स्वल्पवासरैः ॥ ५१ ॥

कुठारिकशतै स्तस्मिन् पञ्चभि श्छेत्तु मुद्यते ।
तच्चन्दनवनं दिव्यं भुजङ्गगणसंकुलम् ॥ ५२ ॥

तत्स्वामी यक्षसेनानां महेश्वर इति श्रुतः ।
कोपादुदसृजद् घोरं कालिकाख्यं महानिलम् ॥ ५३ ॥

मरुता महता तेन प्रापिताः प्राणसंशयम् ।
चक्रन्दु र्वणिजः सर्व्वे शर्व्वशक्रमुखान् सुरान् ॥ ५४ ॥

སྒྲ་ཅོར་གདུང་སྒྲོགས་དེ་དག་ལ། དོན་མཐུན་འདྲེན་པ་འབྱོར་ལེན་ནི།
རྫིས་སྒྲུ་གདུང་བས་འཁྲུགས་པ་ཡིས། ཡུན་རིང་བསམས་ནས་རབ་སྨྲས་པ། ‖ 55

སྤྲུན་ཟླ་གཞོན་པ་གང་པོ་དེས། ཕན་འདོད་བདག་ལ་སྤྲོན་སྨྲས་པ།
ཉོན་མོངས་མང་ཞིང་བདེ་བ་ཉུང་། ཚུ་གཉེར་དུ་ཁྱོད་གང་ལ་འགྲོ། ‖ 56

བློ་ལྡན་བདེན་པ་མཐོང་གྱུར་པ། དེ་ཡི་ཚིག་ནི་མ་ཐུས་པས།
འཇིགས་རུང་སྡུག་བསྔལ་རྒྱ་མཚོ་འདིར། ནོར་ལ་ཆགས་པས་བདག་ལྷུང་ངོ་ ‖ 57

དེ་དག་ཐོས་ནས་ཚོང་པ་ཀུན། གང་པོ་འི་མཐུ་ནི་འཇིག་རྟེན་དུ།
རྣམ་པར་གྲགས་པ་ཡིད་ལ་བསྒོམས་ནས། དེ་ཉིད་ལ་ནི་སྐྱབས་སུ་སོང་ ‖ 58

འགྲོ་བའི་ཉོན་མོངས་དུག་གི་སྤྲིན། འཕྲོག་ཅིང་སྙིང་རྗེ་རྒྱས་པ་ཡི།
བདུད་རྩིས་ཡང་དག་རྫོགས་པའི་ཐུགས། གང་པོ་ཁྱོད་ལ་ཕྱག་འཚལ་ལོ ‖ 59

ཞེས་པ་དེ་དག་རྣམས་ཀྱི་སྒྲ། དབྱངས་གཅིག་གིས་ནི་མཁའ་ཁེངས་ཏེ།
སྐད་ཅིག་ལ་ཕྱིན་དེ་ཡི་སྤྱོད། གང་པོ་ལ་སྨྲས་རང་གི་ལྷས ‖ 60

སྤྲིནའི་ཕ་རོལ་འགྲམ་གནས་པ། དེ་ཡིས་དེ་དག་བསྒྲད་ཐོས་ནས།
རིང་འཛིན་བསྒྲུབས་པས་ནམ་མཁའ་ལ། སྐད་ཅིག་གིས་ནི་གཟིངས་ཅན་བྱིན ‖ 61

དེར་ནི་དེ་ཡིས་སྐྱིལ་ཀྲུང་བཅས། ལྷུན་པོ་བཞིན་དུ་མི་གཡོ་བས།
འཇིག་དུས་རླུང་ཚུབ་ལྟ་བུ་ཡི། རླུང་གི་ཤུགས་ཀྱིས་འགྲོ་བ་ཟློགས ‖ 62

तानार्त्तरावमुखरान् भविलः सार्थनायकः ।
उवाच सञ्चिन्त्य चिरं पश्चात्तापसमाकुलः ॥ ५५ ॥

पूर्णः कनीयान् भ्राता स हितैषी मां पुरावदत् ।
बहुक्लेशो ह्यल्पसुखः क्व गन्तव्य स्त्वयाम्बुधिः ॥ ५६ ॥

अकृत्वा धीमत स्तस्य वचनं सत्यदर्शिनः ।
च्युतोऽहं धनलोभेन घोरेऽस्मिन् व्यसनार्णवे ॥ ५७ ॥

श्रुत्वैतद् वणिजः सर्व्वे प्रभावं लोकविश्रुतम् ।
पूर्णस्य मनसा ध्यात्वा तमेव शरणं ययुः ॥ ५८ ॥

नमस्तुभ्यं जगत्क्लेशविषदोषापहारिणे ।
पूर्णायोदीर्णकरुणासुधासम्पूर्णचेतसे ॥ ५९ ॥

इत्येकस्वररावेण तेषां संपूरितेऽम्बरे ।
क्षणेन गत्वा तद्वृत्तं पूर्णः प्राह स्वदेवताः ॥ ६० ॥

श्रोणापरान्तकगतः श्रुत्वा तेषां स विप्लवम् ।
व्योम्ना समाधिसन्नद्धः प्राप प्रवहणं क्षणात् ॥ ६१ ॥

तस्मिन् पर्य्यङ्कबन्धेन स्थितो मेरुरिवाचलः ।
प्रलयोत्तालवेगस्य गतिं वायो र्ज्जहार सः ॥ ६२ ॥

གང་པོས་རླུང་ནི་བཀག་པ་དག། གནོད་སྦྱིན་ཚོགས་ཀྱི་གཙོ་བོས་ཞེས།
དེ་ལ་དང་བས་ཙན་དན་ནགས། དེ་དག་རྣམས་ལ་བདང་ནས་སོང་ ། 63

གང་པོ་འདི་རྡིན་གྱི་ཙན་དན་ཞིང་། འབྱོར་ལན་དག་གིས་བླངས་ནས་ནི།
རང་གི་གྲོང་ཁྱེར་སློབ་མ་འདྲར། དགའ་བས་དེ་དང་ལྷན་ཅིག་སོང་ ། 64

དེ་ནས་གང་པོས་སྤུན་ལ་བགྲོས། གོ་ཤཱིརྵ་ཡི་ཙན་དན་གྱིས།
བདེ་གཤེགས་ལ་འོས་ཁང་བཟང་དེར། ཙན་དན་འཕྲེང་བ་ཞེས་པ་བྱས། 65

དེར་ནི་གང་པོས་བསམས་པ་ན། བཅོམ་ལྡན་མགྱོགས་པར་ནམ་མཁའ་ལས།
རྒྱལ་བྱེད་ཚལ་ནས་དཔག་ཚད་བརྒྱ། འདས་ནས་ཡང་དག་བྱོན་པར་གྱུར། 66

བཅོམ་ལྡན་བྱོན་པའི་སྔོན་དུ་ནི། སྐུ་ཡི་འོད་ཟེར་རབ་འཕྲོག་པས།
གསེར་བཞིན་དུ་ནི་འཛིག་རྟེན་རྣམས། ཐམས་ཅད་སེར་པོ་ཉིད་དུ་གྱུར། 67

དེ་མཐོང་གྲོང་གི་ཉེ་འཁོར་ན། གནས་པ་ཁྲིམས་ཀྱི་བུ་མེད་རྣམས།
དང་བའི་སེམས་ནི་དྲག་པ་ཡིས། རབ་ཞི་ཉིད་ལ་མངོན་ཕྱོགས་གྱུར། 68

གང་གིས་དེ་དག་སྲིད་པ་ལས། འདས་ནས་དགེ་ཐོབ་བཅོམ་ལྡན་གྱིས།
དགེ་བར་འོས་པ་བདེན་པ་ནི། དེ་དག་རྣམས་ལ་བསྟན་པ་མཛད། 69

བཅོམ་ལྡན་རྫུ་འཕྲུལ་དག་གིས་དེར། མཆོད་རྟེན་གྲོང་པའི་བུད་མེད་བརྗོད།
དེ་དག་གིས་བསྐུན་ད་ལྟ་ཡང་། མཆོད་རྟེན་ཕྱག་བྱེད་ཕྱག་འཚལ་བྱེད། 70

पूर्णेन पवनं रुद्धं ज्ञात्वा यक्षगणाग्रणीः ।
तं प्रसाद्य ययौ त्यक्त्वा तेभ्य श्चन्दनकाननम् ॥ ६३ ॥

पूर्णप्रसादादादाय भविल श्चन्दनद्रुमान् ।
हृष्ट स्तेनैव सहितः शूवारं* स्वपुरं ययौ ॥ ६४ ॥

पूर्णोऽथ सम्मते भ्रातु स्तत्र गोशीर्षचन्दनैः ।
चक्रे चन्दनमालाख्यं प्रासादं सुगतोचितम् ॥ ६५ ॥

तत्र पूर्णेन भगवान् ध्यात स्तूर्णं विहायसा ।
समाययौ जेतवनादुत्क्रम्य शतयोजनीम् ॥ ६६ ॥

आगच्छतो भगवतः पुरः प्रसृतया जगत् ।
देहकान्त्या कपिशितं सर्व्वं हेम मिवाभवत् ॥ ६७ ॥

पुरोपान्तनिवासिन्य स्तं विलोक्य गृहाङ्गनाः ।
तीव्रचित्तप्रसादेन प्रशमोन्मुखतां ययुः ॥ ६८ ॥

कुशलोपचितां तासां भगवान् सत्यदेशनाम् ।
चक्रे भवाहतां कान्ता स्ताः प्रापुः कुशलं ययुः ॥ ६९ ॥

कृत्वा भगवत स्तत्र चैत्यं पौराङ्गनाभिधम् ।
ताभि र्विहित मद्यापि वन्दन्ते चैत्यवन्दकाः ॥ ७० ॥

---

* Perhaps for शिष्यवत् if the Tibetan equivalent སློབ་མ་ལྟ་བུ be accepted as correct.

བཅོམ་ལྡན་གྱིས་ནི་ཐུབ་རྣམས་དང་། །དེ་བཞིན་ཐུབ་པ་ཤིང་ཤུན་ཅན། །
རབ་ཏུ་བྱུང་བས་རྗེས་བཟུང་ནས། །དགག་པའི་ཆོས་ནི་བསྟན་པ་མཛད། ॥ 71

དེ་ནས་བཅོམ་ལྡན་རྒྱལ་བས་ནི། །ཁང་བཟང་ཙན་དན་འཕྲེང་ཞེས་པར། །
རབ་ཞུགས་འགྲོ་བའི་ཚོགས་ཀྱིས་ཁྲར། །བཟོད་པ་ཤེལ་གྱི་རང་བཞིན་མཛད། ॥ 72

དེ་ནས་དེར་ནི་སྙིང་རྗེའི་གཏེར། །རིན་ཆེན་ཁྲི་ལ་རབ་བཞུགས་དེས། །
སེམས་ཅན་ཐམས་ཅད་ཞི་བའི་སླད། །རྣམ་པར་གྲོལ་བ་བསྟན་པ་མཛད། ॥ 73

སྐབས་དེར་ཐུབ་དབང་ནག་པོ་དང་། །གོ་ཏྲུ་ད་མ་རྗེས་འབྲང་བཅས། །
ཆོས་ཉན་པ་ལ་མངོན་ཕྱོགས་ཏེ། །སྟོན་པའི་བསྟན་ལ་འོངས་པར་གྱུར། ॥ 74

དེ་ནས་དེར་ནི་བཅོམ་ལྡན་གྱིས། །ཁང་བཟང་རབ་ཏུ་བླངས་པ་མཛད། །
དགེ་སློང་དང་འགྲོགས་རྒྱལ་བྱེད་ཀྱི། །ཚལ་དུ་སླར་ཡང་གཤེགས་པར་བརྩེན། ॥ 75

གཤེགས་ཤིང་མཱི་གཡལ་བུ་ཡི་མ། །འཇིག་རྟེན་འོད་ཟེར་ཅན་གནས་པ། །
ཚིག་གིས་འཕགས་པའི་བདེན་པ་ཡི། །གཉིས་མེད་ཆོས་ཀྱི་ལམ་ལ་བཀོད། ॥ 76

དེ་ནས་བཅོམ་ལྡན་རྒྱལ་བྱེད་ཀྱི། །ཚལ་གཤེགས་གང་པོ་འི་བསོད་ནམས་ལ། །
ཡམ་མཚན་ལྡན་པའི་དགེ་སློང་གིས། །རྫིས་ཤིང་དེས་ཀྱང་བཀའ་སྩལ་བ། ॥ 77

སྔོན་གྱི་ཡང་དག་རྫོགས་སངས་རྒྱས། །འོད་སྲུངས་ཀྱི་ནི་དགེ་འདུན་གྱི། །
གཙུག་ལག་ཁང་སྐྱོང་ཉེ་གནས་སུ། །སྐྱེ་བ་གཞན་ལ་གང་པོ་གྱུར། ॥ 78

मुनीनां भगवान् कृत्वा तथा वल्कलिनो मुनेः ।
प्रव्रज्यानुग्रहं मुद्रां विदधे धर्म्मदेशनाम् ॥ ७१ ॥

तत श्चन्दनमालाख्यं प्रासादं भगवान् जिनः ।
प्रविश्य स्फाटिक श्चक्रे जनसंघभरक्षमम् ॥ ७२ ॥

अथ रत्नासनासीनः स तत्र करुणानिधिः ।
विदधे सर्व्वसत्त्वानां शान्त्यै निर्व्वाणदेशनाम् ॥ ७३ ॥

अत्रान्तरे सानुचरौ मुनीन्द्रौ कृष्णगौतमौ ।
अभ्येत्य धर्म्मश्रवणे शास्तुः शासन मापतुः ॥ ७४ ॥

तत्र कृत्वाथ भगवान् प्रासादस्य प्रतिग्रहम् ।
पुन र्जेतवनं गच्छन्नुद्ययौ सह भिक्षुभिः ॥ ७५ ॥

व्रजन् मारिचिलोकस्थां मौद्गल्यायनमातरम् ।
सज्गिरा चार्य्यसत्या तां धर्म्ममार्गे न्यवेशयत् ॥ ७६ ॥

अथ जेतवनं प्राप्तं भगवन्तं सविस्मयाः ।
पूर्णस्य पुण्यं पप्रच्छु र्भिक्षवः सोऽप्यभाषत ॥ ७७ ॥

काश्यपस्य पुरा सम्यक्सम्बुद्धस्यान्यजन्मनि ।
विहाराधिकृतः पूर्णः संघोपस्थायकोऽभवत् ॥ ७८ ॥

ནམ་ཞིག་དེ་ཡིས་གཙུག་ལག་ཁང་། །ས་གཞི་ཁྲི་དོར་མ་བྲུས་མཐོང་།
རི་མོས་འབབ་པའི་རབ་བྱུང་ལ། །ཁྲོ་བ་དྲག་པོས་རབ་ཏུ་སྨྲས།། 79

དིང་འདིར་གཙུག་ལག་ཁང་མ་ཕྱགས། །དྲེགས་པ་ལྡན་པ་འབང་མོ་འི་བུ།
སུ་ཡིས་རིས་ལ་བབ་པ་ཞེས། །བརྗོད་ཅིང་དེ་ལ་རབ་ཏུ་སྨད།། 80

ཚིག་རྩུབ་སྡིག་པ་དེ་ཡིས་ནི། །དམྱལ་བའི་ང་འགྲོར་སྡུག་བསྔལ་སྨྱོང་།
སྐྱེ་བ་ལྔ་བརྒྱར་གང་པོ་དེ། །འབང་མོ་ཡི་ནི་བུ་རུ་གྱུར།། 81

དགེ་འདུན་བསྙེན་པ་ཉིད་འདི་ཡི། །བསོད་ནམས་ཆེན་པོ་འི་སྐད་གྱུར་དེ།
གང་གིས་སྤྲིད་པའི་ཉོན་མོངས་རྣམས། །མ་ལུས་སྤྲངས་པའི་དགྲ་བཅོམ་བསྙེན།། 82

དེ་ལྟར་བསོད་ནམས་བསགས་པས་རབ་བསྐྲུན་པ།
གང་པོ་འི་མཐུ་ནི་རྨད་བྱུང་རྒྱལ་བ་ཡིས།
མདུན་སར་བཤད་པ་ཐོས་ནས་དགེ་འདུན་ཚོགས།
བསོད་ནམས་བསྔགས་ལ་མངོན་པར་དགའ་བར་གྱུར།། 83

ཅེས་པ་དགེ་བའི་དབང་པོས་བྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གང་པོ་འི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་གསུམ་ཅུ་རྩ་དྲུག་པའོ།།

स कदाचिदसंमृष्टां दृष्ट्वा वैहारिकीं भुवम् ।
प्राह प्रव्रजितं तीव्रं क्रोधादुपधिवारिकम् ॥ ७९ ॥

हन्तस्योपधे वारोऽद्य विहारोऽस्मिन्न मार्जितः ।
कस्य दासीसुतस्येति ब्रुवाणः स समभर्त्सयत् ॥ ८० ॥

तेन पारुष्यपापेन भुक्त्वा नरकदुर्गतिम् ।
दासीसुतोऽभवत् पूर्णः पञ्च जन्मशतानि सः ॥ ८१ ॥

संघोपासनमेवास्य पुण्यायाभून्महीयसा ।
अर्हत्त्वं येन निःशेषभवक्लेशोज्झितं श्रितः ॥ ८२ ॥

इति प्रभावं कथितं जिनेन
पूर्णस्य पुण्योपचयप्रणीतम् ।
श्रुत्वाद्भुतं संसदि भिक्षुसंघः
पुण्यप्रशंसाभिरतो बभूव ॥ ८३ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
पूर्णावदानं षट्त्रिंशः पल्लवः ॥

ཡལ་འདབ་གསུམ་ཙུ་རྩ་བདུན་པ།

ཅི་ཡང་མེད་པའི་བདེ་སླད་ཆགས་པ་མེད་པ་ཆགས་བྲལ་
དཔལ་འབྱོར་སྦྱིན་བྱེད་པ།
ཐམས་ཅད་བཏང་ནས་ལུས་ཀྱི་གྲོགས་ལྷན་དམ་པ་རྣམས་
ཞི་སླད་ནགས་སུ་འགྲོ།
དེར་ཡང་ཚུལ་འཆོས་བརྟུལ་ཞུགས་དག་ལ་ཡོ་བྱད་རྟོམ་
པ་གལ་དེ་གསོག་བྱེད་ན།
མཛོད་ཀྱི་ཡོ་བྱད་ཉེར་མཁོ་དེ་དག་རྣམས་ཀྱིས་ཁྲིམ་དུ་གནོད་པ་ཅི་ཞིག་བྱས།། 1

རྒྱལ་བ་རྒྱལ་བྱེད་གཙུག་ལག་ཁང་། ཀུན་དགའ་ར་བར་སྤྱོན་བཞུགས་པས།
མདུན་དུ་ཤཱ་ཀྱའི་རྒྱལ་པོ་རྣམས། རབ་དུ་བྱུང་བ་བསྟེན་པ་ཡི།། 2

བཀྲ་བའི་གོས་དང་དམ་པའི་སྣོད། ཕྱུས་མཁྱུད་ལ་སོགས་བསགས་པ་དག།
རབ་དུ་མང་པོ་གཟིགས་བྱུང་ནས། བཅོམ་ལྡན་འདས་ཀྱིས་ཡང་དག་བསམས།། 3

ཀྱི་མ་འདི་དག་ད་དུང་ཡང་། ལུས་ལ་སྨུག་པའི་ཡོ་བྱད་འཛིན།
མངོན་པར་ཁེངས་པའི་རང་བཞིན་གྱིས། འཆིང་བའི་རྒྱུ་ནི་ཡོངས་མ་ཀླིག།། 4

ལུས་ལ་ལུས་ཀྱི་ཆས་རྣམས་དེ། དེ་ལ་ཉེ་བར་མཁོ་བའི་འཕྲེང་།
དེ་ཡི་ཡོ་བྱད་འཛིན་པ་ནི། ཀྱི་མ་འཆིང་བའི་ལྷུགས་སྒྲོག་ཡིན།། 5

དེ་ལྟར་བསམས་ནས་བཅོམ་ལྡན་འདས། དབེན་པར་གནས་པ་བསྐྱབས་པ་ཡིས།
ཉེར་འཛིན་རྣམས་ལ་སྙིང་རྗེ་ལས། དགེ་བའི་སླད་དུ་ཡང་དག་བསྟོན།། 6

सप्तत्रिंशः पल्लवः ।

अकिञ्चन्यसुखाय निस्पृहतया वैराग्यलक्ष्मीजुषः
सर्व्वं यान्ति विहाय कायसचिवाः सन्तः प्रशान्त्यै वनम् ।
तत्रापि व्रतडम्बरे परिकरारम्भाय चेत् सञ्चय-
स्तत्कः कोशपरिच्छदोपकरणै र्गर्हेऽपराधः कृतः ॥ १ ॥

जिने जेतवनारामविहाराभिरते पुरा ।
शाक्यराजकुमाराणां प्रव्रज्यासंजुषां पुरः ॥ २ ॥

चित्रचीवरसत्पात्रयोगपट्टादिसञ्चयम् ।
प्रभूततर मालोक्य भगवान् समचिन्तयत् ॥ ३ ॥

अहो वतैषां नाद्यापि बन्धहेतु र्न्निवर्त्तते ।
अभिमानमयः काये प्रियः परिकरग्रहः ॥ ४ ॥

काये कायपरिष्कार स्तस्योपकरणावली ।
तस्याः परिकरादान महो नु बन्धशृङ्खला ॥ ५ ॥

इति संचिन्त्य भगवान् नैकान्तविहितस्थितिः ।
कारुण्यादुपसन्नानां कुशलाय समुद्यतः ॥ ६ ॥

དགེ་སློང་རྣམས་ཀྱིས་མི་མཐོང་སྐད། ཟླ་བ་གསུམ་དུ་བདག་ལ་ནི།
སུས་ཀྱང་ཉེ་བར་གནས་མི་བྱ། ཞེས་པའི་བགྲོ་བ་མཛད་པར་གྱུར།། 7

ངེས་པ་དེ་ལ་རབ་ཞུགས་ཚེ། དགེ་སློང་དགོན་པའི་བརྟུལ་ཞུགས་ཅན།
ཆོས་གོས་དམན་ལྡན་ཉེ་བའི་སྐྱེ། ཞེས་པ་དགོས་པའི་སྐད་དུ་འོངས།། 8

རབ་ཟློག་སྐལ་བ་ལྡན་པས་དེས། བདེ་གཤེགས་མཐོང་བ་ཡང་དག་ཐོབ།
བྱ་བ་བྱས་ཏེ་སྐད་ཅིག་འདུག། དེ་ལ་ཕྱག་འཚལ་རབ་ཏུ་སོང་།། 9

དགེ་སློང་རྣམས་ཀྱིས་བགྲོད་དེ་ལ། ཡོངས་བསྐོར་སྔོན་དུ་ཕྱིན་ཏེ་དྲིས།
འཕགས་པ་ཁྲོད་ལ་བཅོམ་ལྡན་གྱིས། ཀྱི་མ་མཐོང་བ་ཇི་ལྟར་གནང་།། 10

འདི་ཡི་བཀའ་ལ་ཟླ་གསུམ་དུ། དགེ་འདུན་དག་གིས་མཐོང་མེད་པའི།
ངེས་པ་གང་དེ་ལམ་མིན་ནས། བགྲོད་པ་ཁྲོད་ཀྱིས་ཇི་ལྟར་བ་ཞིག།། 11

དེ་དག་ཚིག་དེ་ཐོས་གྱུར་ནས། ལྷག་པར་འཛུམ་ཞིང་ཉེ་སྐྱེ་ཡིས།
དེ་དག་ལ་སྨྲས་བདག་གིས་ནི། ངེས་པ་གང་ཡང་ཉམས་མ་བྱས།། 12

བདག་ནི་བལྟ་བའི་གནས་སྐབས་ན། བཅོམ་ལྡན་རང་གིས་བཀའ་སྩལ་བ།
དགེ་སློང་དགོན་པ་པ་རྣམས་ནི། ལྟ་བ་བདག་གིས་བཀག་པ་མེད།། 13

ཡོ་བྱད་ཉེར་མཁོ་ཡོངས་བཏང་ཞིང་། འཆིང་བ་དག་ལས་ངེས་གྲོལ་བ།
ཞིང་རྡུང་ཕྱུག་དར་ཁྲོད་པ་དག། ལྟ་བ་དག་ནི་བཟློག་པ་མེད།། 14

मासत्रय मुपस्थानं कर्त्तव्यं येन केन चित् ।
अदर्शनाय भिक्षूणा मकरोदिति संविदम् ॥ ७ ॥

प्रवृत्ते नियमे तस्मिन् भिक्षुणारण्यकव्रतः ।
आययावुपसेनाख्यः कार्य्यार्थं तनुचीवरः ॥ ८ ॥

प्रवारितः स संप्राप्य धन्यः सुगतदर्शनम् ।
कृतकृत्यः क्षणं स्थित्वा प्रतस्थे प्रणिपत्य तम् ॥ ९ ॥

व्रजन्त मेत्य पप्रच्छु र्भिक्षवः परिवार्य्य तम् ।
तवार्य्य दर्शन मह्नो दत्तं भगवता कथम् ॥ १० ॥

मासत्रयं दर्शनेऽस्य नियमः शासनेन यः ।
स कथं भवता भग्नः सङ्घस्योन्मार्गगामिना ॥ ११ ॥

श्रुत्वा तद्वचनं तेषा मुपसेनः स्मितोत्तरम् ।
तानूचे न मया कश्चित् कृतः समयविप्लवः ॥ १२ ॥

अह मुक्तो भगवता दर्शनावसरे स्वयम् ।
आरण्यकस्य मे भिक्षो र्न्निषेधो नास्ति दर्शने ॥ १३ ॥

परिच्छदोपकरणत्यागनिर्मुक्तबन्धनाः ।
अवार्य्यदर्शना वृक्षमूलिकाः पांशुकूलिकाः ॥ १४ ॥

ལྷུང་བཟེད་ཆོས་གོས་ཚོགས་རྣམས་ལ། འདི་དེང་ནང་པར་གཞན་ནོ་ཞེས།
གང་ཞིག་བསམགས་པ་ལ་དགའ་བ། དེ་དག་འདིར་ནི་མཐོང་བ་མེད།། 15

གང་ཞིག་རབ་ཞིའི་བརྟུལ་ཞུགས་ཡོ་བྱད་དག་ལ་འབད་པས་
མངོན་པར་ཁེངས་འདིའི་འཆིང་།
དེ་དག་ཙན་དན་ཀང་འཕྲུང་དག་ལས་ཡང་དག་གདུང་བྱེད་མེ་ནི་ཉེ་བར་བསྐྲུན།
ཁ་བས་རབ་རྒྱུས་བསིལ་བའི་ཆུ་རྣམས་དག་གིས་དེ་དག་
མཆོག་ཏུ་སྐྱོམ་པས་གདུངས།
རྒྱུང་འདས་གེགས་མེད་གཏེར་གྱི་གནས་ལ་དེ་དག་བཀྲིན་
ཞིང་ཡོངས་པ་ཉིད་དུ་གྱུར།། 16

ཉི་ཐོས་དེ་སྐད་བརྗོད་ཐོས་ནས། ཤཱ་ཀྱའི་དགེ་སློང་དེ་དག་རྣམས།
སྐྱེངས་པས་སྒྲོ་བ་ཟད་གྱུར་པས། འཕྲུལ་ལ་ཉིད་དུ་རྣམ་པར་བསམས།། 17

འདི་དག་བཅོམ་ལྡན་གྱིས་གསུངས་པ། བདག་ཅག་ཆེད་ཡིན་གཞན་ལ་མིན།
གང་ཕྱིར་ཆོས་གོས་བཀྲ་བའི་ཚོགས། བདག་ཅག་ཁོ་ནས་རབ་ཏུ་གྱོན།། 18

འདོད་བྲལ་རྣམས་ལ་སྤོན་པ་དགྱེས། འདོད་ཆེན་བདག་ཅག་ལ་དགྱེས་མིན།
དེ་སྐད་འདོད་པ་ཡོངས་བཏང་ནས། བདག་ཅག་དེ་ཡིས་བཞེས་པར་འགྱུར།། 19

ཞེས་བསམས་དེ་དག་ཐམས་ཅད་ཀྱིས། རབ་ཏུ་གྱོན་པ་ལས་ལྷག་པའི།
མཛེས་པའི་གོས་ཀྱི་ཚོགས་བཏང་ནས། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་སོང་།། 20

འདོད་པ་བྲལ་ཆེ་བཅོམ་ལྡན་གྱིས། འཇིགས་ཚོགས་ལྟ་བའི་རི་བོ་ནི།
ཡེ་ཤེས་རྡོ་རྗེས་རྣམ་བཅོམ་གང་། དེ་དག་རྗེས་སུ་བཟུང་བ་མཛད།། 21

इद मद्य परं प्रातरिति ये सञ्चये रताः ।
पात्रचीवरवर्गेषु तेषां नास्तीह दर्शनम् ॥ १५ ॥

पायोभिः प्रसरत्तुषारशिशिरै स्तृष्णातुरा स्ते परम्
ते नित्यञ्च निधानधाम्नि विहतेऽप्यन्यादलं दुर्गताः ।
तेषां चन्दनपादपादुपनतः सन्तापकः पावको
यैरेष प्रशमव्रतोपकरणो बद्धोऽभिमानग्रहः ॥ १६ ॥

इत्युक्त मुपसेनेन श्रुत्वा ते शाक्यभिक्षवः ।
वैलक्ष्यक्षयितोत्साहाः सहसैव व्यचिन्तयन् ॥ १७ ॥

एतद् भगवतादिष्ट मस्मानुद्दिश्य नापरान् ।
विचित्रचीवरचयप्रावारा वयमेव यत् ॥ १८ ॥

विरतेच्छाः प्रियाः शास्तु मँहेच्छा वय मप्रियाः ।
तस्मादिच्छां परित्यज्य भवाम स्तस्य सम्मताः ॥ १९ ॥

इति संचिन्त्य ते सर्व्वं चारुचीवरसञ्चयम् ।
प्रावृत्याभ्यधिकं त्यक्त्वा ययु भँगवतोऽन्तिकम् ॥ २० ॥

इच्छाविरामे भगवान् व्यधात्तेषा मनुग्रहम् ।
ज्ञानवज्रेण सत्कायदृष्टिशैलं बिभेद यः ॥ २१ ॥

རྒྱུན་ཞུགས་འབྲས་བུ་ལ་རེག་པ། ཤཱ་ཀྱའི་རྒྱལ་སྲས་རྣམས་དག་གི།
སྨོན་བྱུང་དགེ་སློང་རྣམས་ཀྱིས་དྲིས། དེ་བཞིན་གཤེགས་པས་བཀའ་སྩལ་པ།། 22

ཏཱ་རཱ་ཙ་མིར་སྨོན་བྱུང་བ། ས་ཡི་བདག་པོ་ཚངས་པས་བྱིན།
གང་དཔུང་ས་འཛིན་སྤྲིན་པ་ཡིས། ལག་བརྐྱན་ཕྱོགས་ཀྱི་གཉིས་འཕྲུང་བཞིན།། 23

དེ་ཡི་བཙུན་མོ་སྒྲ་དྲིག་གི། འཁྲི་ཤིང་བཞིན་དུ་ཡོན་ཏན་ཅན།
སྐྱེས་བུ་དམ་པའི་སྟན་པ་བཞིན། གྲགས་པ་ཚངས་ལྡན་མ་ཞེས་གྱུར།། 24

དྲི་མེད་བསམ་པ་དང་ལྡན་དེ། ཚུལ་སྟེ་རྒྱ་མོང་བའི་ཚེ།
བདག་པོ་འི་གཟུགས་བརྙན་ལྷ་བུའི་བུ། མཚན་མཆོག་ལྡན་པ་བཙས་པར་གྱུར།། 25

ཚུ་ནང་དུ་སྐྱེས་བྱིས་པ་དེ། ཚུ་སྐྱེས་ཞེས་ནི་བྲ་བར་གྱུར།
ཡབ་ཀྱི་རྒྱལ་ཚབ་བཞེད་པ་དང་། མཚུངས་པ་ཉིད་ཆེ་བར་སྐྱེས།། 26

དེ་ནི་སྐྱེས་པའི་ཉིན་པར་ལ། བློན་པོ་ལྔ་བརྒྱས་མཚུངས་པར་ནི།
གཟུགས་ནི་མཚུངས་པའི་བུ་རྣམས་དག ལྔ་བརྒྱ་རབ་དུ་ཐོབ་པར་གྱུར།། 27

རང་གི་སྐྱེ་དྲན་བྱིས་པ་དེས། རིམ་གྱིས་སྨོན་བྱུང་དྲན་གྱུར་ནས།
བདག་ཉིད་ལ་ཕན་ལེགས་བྱས་ཀྱི། དུས་ལ་བབ་པར་ཡང་དག་བསམས།། 28

ལོ་ནི་དྲུག་ཅུ་ཐམས་པར་སྨོན། བདག་གི་རྒྱལ་ཚབ་བྱས་པ་ན།
མི་བཟད་དཀྱིལ་བར་ཡུན་རིང་དུ། ཉམ་ངའི་སྡུག་བསྔལ་གདུང་བ་ཐོབ།། 29

शाक्यराजकुमाराणां स्रोतःप्राप्तिफलस्पृशाम् ।
भिक्षुभिः पूर्व्ववृत्तान्तं पृष्टः प्राह तथागतः ॥ २२ ॥

वाराणस्या मभूत् पूर्व्वं ब्रह्मदत्तो महीपतिः ।
दानार्द्रहस्तो यद्वाहुः क्ष्मामधाद्दिग्द्विपोपमः ॥ २३ ॥

तस्य ब्रह्मावती मुक्तालतेव गुणशालिनी ।
कीर्त्तिः सत्पुरुषस्येव विश्रुता वनिताभवत् ॥ २४ ॥

प्रतिविम्बोपमं पत्युः सा सुतं विमलाशया ।
जलक्रीड़ागता काले सुषुवे दिव्यलक्षणम् ॥ २५ ॥

उदकाख्यः स बालोऽभूत् संजातः सलिलान्तरे ।
वर्द्धमानः पितु स्तुल्यं यौवराज्यमनोरथैः ॥ २६ ॥

शतानि पञ्चामात्यानां तस्य जन्मदिनं समम् ।
अवापु स्तुल्यरूपाणां पुत्राणां शतपञ्चकम् ॥ २७ ॥

निजं जातिस्मरः स्मृत्वा प्राग्वृत्तं स शिशुः शनैः ।
अचिन्तयत् प्राप्तकालं हितं सुकृत मात्मनः ॥ २८ ॥

षष्टिवर्षाणि कृत्वा तु यौवराज्य महं पुरा ।
अभवं कृच्छ्रसंतप्त श्चिरं नरकसङ्कटे ॥ २९ ॥

སྨད་ནས་སྐྱེ་བ་འདི་ལ་ཡང་། རྒྱལ་ཚབ་དག་ནི་ཉེ་བར་གནས།
རྣམ་པ་ཀུན་དུ་གསོལ་བདབ་ཀྱང་། བདག་ནི་ཐོག་པ་མི་བྱེད་དོ། 30

ཞེས་པ་དེ་ཡི་ཡུན་རིང་བསམས། རྒྱལ་སྲིད་ལོངས་སྤྱོད་ལས་ཕྱིར་ཕྱོགས།
ཕ་ནི་ཡིད་འབྱུང་སྐྱིད་བྱེད་པའི། ལྐུགས་པ་འཕྱེ་བོ་བཟུང་བར་གྱུར། 31

མཚན་ཉིད་ཐམས་ཅད་ལྡན་མོད་ཀྱང་། རྒྱལ་པོའི་ལུགས་ཀྱི་སྣོད་མ་གྱུར།
གཉེན་རྣམས་སྡུག་བསྔལ་སྐྱེད་བྱེད་དེ། ལྐུགས་པ་འཕྱེ་བོ་ཞེས་པར་གྱུར། 32

མཆོད་དང་བསྟན་བཅོས་སྟོབས་རྒྱས་པ། བློན་པོའི་བུ་རྣམས་ཀྱིས་ཐོབ་ཚེ།
རྒྱལ་སྲས་རབ་ཏུ་ཆེ་གྱུར་ཀྱང་། ལྡང་བ་མ་ཡིན་སྨྲ་བ་མེད། 33

དེ་ནས་དེ་ཡི་ལུས་སྐྱོན་གྱིས། སྨན་ནི་ས་ཡི་དབང་པོས་དྲིས།
སྨན་པས་སྨྲས་པ་རྒྱལ་པོ་ཡི། སྲས་ལ་མ་ཚང་མཐོང་བ་མེད། 34

གལ་ཏེ་བདེ་བ་བསྟན་པ་འདིའི། སྐྱོན་ནི་སེམས་ལས་སྐྱེས་གྱུར་པ།
དེ་ལྟ་ན་འདི་འཇིགས་པ་ཡི། ཤུགས་ལས་ལྡང་འགྱུར་སྨྲ་བར་འགྱུར། 35

ཞེས་པ་སྨན་པས་སྨྲས་པའི་ཚེ། དེ་བཞིན་ཞེས་སྨྲས་ས་དབང་གིས།
བརྩོན་གྱིས་གསོད་པའི་ས་རྩ་ནི། འཇིགས་པ་བགྱི་སྐད་བྱ་བདང་གྱུར། 36

སྐྱོད་བྱེད་སྐྱེས་བུ་དེ་དག་ལ། ཤིང་རྟ་ལ་གནས་དེས་སྨྲས་པ།
བཱ་རཱ་ཎ་སཱི་འདི་ན་ནི། སྐྱེ་བོ་འགའ་ཞིག་ཡོད་དམ་མེད། 37

जन्मन्यस्मिन्नपि पुन र्यौवराज्य मुपस्थितम्।
सर्व्वथा प्रार्थ्यमानोऽपि न करिष्यामि पातकम्॥ ३०॥

इति सञ्चिन्त्य स चिरं राजभोगपराङ्मुखः।
पितु रुद्वेगजननी मग्रहीत् पङ्गुमूकताम्॥ ३१॥

सर्व्वलक्षणयुक्तोऽपि राजवृत्ते रभाजनम्।
स मूकपङ्गु र्नामाभूद् बन्धूनां दुःखवर्द्धनः॥ ३२॥

प्राप्तेषु मन्त्रिपुत्रेषु शस्त्रशास्त्रबलोदयम्।
राजपुत्रः प्रवृद्धोऽपि नोदतिष्ठन्न चावदत्॥ ३३॥

पृष्टास्ततः क्षितीशेन वैद्या स्तद्दोषभेषजम्।
अवदन् वैकल्यं राजन् राजसूनो र्न दृश्यते॥ ३४॥

अभ्यासाद्यदि जातोऽस्य दोषोऽपि सुखसेविनः।
तद्भेष भयसंवेगादुत्तिष्ठति च वक्ति च॥ ३५॥

इति वैद्यै रभिहितं तथेत्युक्त्वा क्षितीश्वरः।
मिथ्यैव बध्यवसुधां भयाय व्यसृजत् सुतम्॥ ३६॥

स भर्त्स्यमानः पुरुषै स्त मुवाच रथस्थितम्।
अपि कश्चिद् वसत्यस्यां वाराणस्यां न वा जनः॥ ३७॥

ཅེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། །དེས་དེ་མི་བདག་དྲུང་དུ་ཁྲིད།
དེར་ནི་ཡབ་ཀྱིས་གསོལ་བདབ་ཀྱང་། །སྨྲར་ཡང་ལྐུགས་པ་ཉིད་དུ་གྱུར།། 38

སྨྲར་ཡང་གསོད་པར་ཁྲིད་པ་ན། །རོ་ཞིག་མཐོང་ནས་དེས་སྨྲས་པ།
རོ་འདི་འཚོ་བ་ཡིན་ནམ་མིན། །བདག་ཉིད་ཀུན་གྱི་ཤི་བ་ཡིན།། 39

དེ་ཐོས་ཡབ་ཀྱི་ངོགས་སུ་དེས། །བཀོད་ཆོ་སྨྲར་ཡང་སྨྲ་བཅད་བྲས།
སྨྲར་ཡང་གསོད་འཇིགས་ཉིད་སྨྲད་ཁྲིར། །དེ་དག་ལ་ནི་ལམ་དུ་སྨྲས།། 40

གང་ཞིག་འབྲུ་ཡི་ཕུང་པོ་འདི། །གང་ཕྱིར་དེ་ཐོས་རྗེས་སུ་ཟ།
ཞེས་བའི་ཚིག་འདི་བརྗོད་ཀྱང་སྨྲར། །ཕ་ཡི་མདུན་དུ་ཅང་མི་སྨྲ།། 41

དེ་ནས་དེ་ལ་ས་བདག་གིས། །བཤད་པས་རབ་སྨད་བསྟན་པའི་ཚེ།
དེ་ཡིས་སྨྲས་པ་མཆོག་སྟེར་ན། །བདག་ནི་སྨྲ་ཞིང་ཁང་པས་འགྲོ།། 42

དེ་ནས་རྒྱལ་པོ་དགྱེས་པ་ཡིས། །དེ་ལ་མཆོག་སྟེར་རྗེས་ཐོས་ཚེ།
རང་གི་ཁང་པས་མངོན་ཕྱོགས་ཏེ། །གསལ་བར་ཕ་ལ་དེ་ཡིས་སྨྲས།། 43

བདག་ནི་འཕྲེ་མིན་བདག་ལྐུགས་མིན། །བསམ་པ་གླེན་པོ་འང་བདག་མིན་དེ།
འོན་ཀྱང་སྐྱེ་བ་གཞན་ཉོན་མོངས། །དྲན་ཞིང་རྣམ་པར་འཁྲུགས་ལ་བརྟེན།། 44

ལོ་ནི་དྲུག་ཅུ་བདག་གིས་སྤྱོད། །རྒྱལ་ཚབ་བདེ་བ་ལོངས་སྤྱོད་ནས།
ལོ་ནི་སྟོང་ཕྲག་དྲུག་ཅུ་དག །དམྱལ་བའི་ནང་དུ་གནས་པར་གྱུར།། 45

इति तद्वचनं श्रुत्वा तै र्नीतः स नृपान्तिकम्।
तत्र पिचार्य्यमानोऽपि मूक एवाभवत् पुनः॥ ३८॥

पुन र्वध्यभुवं नीतः शवं दृष्ट्वा जगाद सः।
अस्त्येष जीवति शवः किम्वा सर्व्वात्मना मृतः॥ ३९॥

श्रुत्वैतत् तैः पितुः पार्श्वे न्यस्तो मौनं व्यधात् पुनः।
पुनर्व्वधभयाच्चैव नीतः प्रोवाच तान् पथि॥ ४०॥

राशि र्य एष धान्यस्य स हि भुक्तोऽनुभुज्यते।
इत्युक्तवाक्योऽपि पुन र्नोचे किञ्चित् पितुः पुरः॥ ४१॥

ततः ख्यातप्रतिक्षेपे तस्यादिष्टे महीभुजा।
सोऽवदद्वरदानेन वच्मि पद्भ्यां व्रजामि च॥ ४२॥

अथास्य राज्ञा हृष्टेन वरदाने प्रतिश्रुते।
स पद्भ्यां स्वय मभ्येत्य स्पष्टं पितर मब्रवीत्॥ ४३॥

नाहं पङ्गु र्न मूकोऽहं नैव चाहं जड़ाशयः।
किन्तु जन्मान्तरक्लेशं स्मृत्वा वैह्वल्य माश्रितः॥ ४४॥

यौवराज्यसुखं भुक्त्वा षष्टिवर्षाण्यहं पुरा।
षष्टिवर्षसहस्राणि न्यवसं नरकोदरे॥ ४५॥

དེ་སྐད་བདག་ནི་རྒྱལ་པོ་ཡིས། །འཛིགས་ནས་ལྐུགས་འཁྲེ་འདི་ཉིད་བྱས།
རབ་བྱུང་ཚངས་པར་སྤྱོད་པ་དག། སྤྱོད་པ་འདི་ནི་བདག་གི་མཆོག ॥ 46

ཅེས་པ་དེ་ཡིས་བརྗོད་ཐོས་ནས། མ་ལྐུགས་ཞེས་པས་དགའ་ཐོབ་ཅིང་།
ཆགས་བྲལ་ཞེས་པས་སྡུག་བསྔལ་བའི། ས་ཡི་བདག་པོས་དེ་ལ་སྨྲས ॥ 47

ཆོས་ཀྱི་རྩ་བ་རྒྱལ་སྲིད་འདི། བུ་ཁྱི་གཏང་བར་མི་འོས་སོ།
མཆོད་སྦྱིན་སྦྱིན་པ་སྐྱེ་རྒྱུ་སྐྱོབ། མི་བདག་དཔལ་ནི་བསོད་ནམས་རྫོགས ॥ 48

བུ་གཅིག་ས་བདག་བུ་ཁྱོད་ཀྱིས། ཆགས་པ་ཡོངས་སུ་བཏང་བ་ལས།
གཉིད་ཀྱིས་དབྲལ་བ་ཐོབ་གྱུར་ཅིང་། སྒྲུ་ངན་མལ་སྟན་དག་ལ་བརྟེན ॥ 49

ཡོངས་རྫོགས་ཟླ་བ་ལྟར་མཛེས་ཤིང་། སྐྱ་རེག་གསལ་བར་གྲོད་པ་ཅན།
ཕྱུན་སུམ་ཚོགས་པ་སྤངས་ནས་ཁྱོད། རབ་འབྱུང་ཇི་ལྟར་མངོན་པར་འདོད ॥50

རྒྱལ་པོ་ལ་འདྲིས་བདེ་བ་ཡི། མལ་སྟན་མཆོག་ནི་ཡོངས་བཏང་ནས།
ནགས་མཐའི་གནས་ལ་ཞེན་པ་ཡི། རྡུལ་ཁྲོད་ས་གཞི་ཇི་ལྟར་སྤྱེན ॥ 51

རྒྱལ་པོའི་པོ་བྲང་མཛེས་མ་རོལ་པའི་མི་ལོང་ནོར་བུ་དང་ལྡན་ཁང་པ་ནི།
འདི་དག་བཏང་ནས་ནགས་ཀྱི་ས་གཞི་འཛིགས་རུང་སྡུག་ནི་ཡང་དག
ཀྱི་བྱེད་ཅིང་།
བརྟན་པའི་སྤྲུལ་ནི་ཀུན་པོ་འི་དབུགས་ཀྱི་བསྐྱིགས་པ་དང་ལྡན་གྲིབ་མ
དམན་གྱུར་པ།
འཁྲི་ཤིང་ཅུང་བ་དེ་དག་རྣམས་ཀྱིས་མཉེན་པ་ཤིན་ཁྱོད་ཀྱི་དགེས་པ་ཇི
ལྟར་འགྱུར ॥ 52

राजभीत्या मया तस्मात् कृतेयं मूकपङ्गुता ।
प्रव्रज्यया ब्रह्मचर्य्यं चराम्येष वरो मम ॥ ४६ ॥

इति तेनोक्त माकर्ण्य त मुवाच महीपतिः ।
अमूक इत्यात्तधृति र्व्विरक्त इति दुःखितः ॥ ४७ ॥

धर्म्ममूलमिदं राज्यं पुत्र न त्यक्तु मर्हसि ।
यज्ञदानप्रजाचार्यैः पुण्यपूर्ण्णा नृपश्रियः ॥ ४८ ॥

एकपुत्र त्वया पुत्र परित्यागरसादहम् ।
निद्रादरिद्रतां नीतः शोकशय्यासमाश्रयः ॥ ४९ ॥

सम्पूर्ण्णचन्द्ररुचिरां व्यक्तमौक्तिकहासिनीम् ।
कथं संपद मुत्सृज्य प्रव्रज्याभिमता तव ॥ ५० ॥

कथं शय्याः परित्यज्य प्राज्यराज्यसुखोचिताः ।
वनान्तवासव्यसनी सेवसे पांशुलाः स्थलीः ॥ ५१ ॥

कान्तालीलामुकुरमणिमन्मन्दिरीं राजधानी
मेतां त्यक्त्वा ननु वनभुवः सम्पतद्व्याघ्रघोराः ।
सर्व्वप्रीत्यै जरदजगराश्वासविप्लुष्ट पत्राः
क्लिष्टच्छायाः प्रविरललतास्ताः कथन्ते भवन्ति ॥ ५२ ॥

ཞེས་པ་ཡབ་ཀྱི་ཚིག་ཐོས་ནས། རྒྱལ་པོའི་བུ་ཡིས་དེར་སྨྲས་པ།
མཚོ་མཛེས་སོ་ཡི་འོད་ཀྱིས་ནི། ཆགས་བྲལ་ལེན་དུ་འཛུག་པ་བཞིན།། 53

ཚུ་ནི་བསིལ་ཞིང་དྲི་མ་མེད། ཚིག་ཤེས་རི་བོང་ལྡན་པ་བསིལ།
ཆགས་བྲལ་སྐལ་པ་བཟང་པོའི་ས། ནགས་ཚལ་ལ་ནི་སུ་མི་དགའ།། 54

གཞན་གྱི་ཚུང་མ་དག་ལ་བཞིན། བདེ་སྒྱུར་ངན་པས་མ་བདང་བ།
གང་ཞིག་དམྱལ་རྒྱུན་གནོད་བཅས་ཀྱི། དགའ་མ་རྣམས་ལ་བདག་མི་དགའ།། 55

བསམ་གཏན་ཕྱོགས་དང་ཡོངས་ཤེས་དང་། དབང་པོ་རྣམས་ནི་ཐུལ་བ་དང་།
འཚོ་བས་རྒྱལ་པོའི་སྦྱོར་བ་འདི། འབད་པ་མེད་པས་དམྱལ་བ་སྟེར།། 56

ནགས་ཀྱི་ས་གཞི་མི་དོག་རབ་རྒྱས་འཁོར་བ་དག་ལ་རྒོད་པ་འདྲ།
ངོ་བོ་ཉིད་ཀྱིས་མཁས་པ་རྣམས་ལ་ཞི་བའི་རང་བཞིན་དགའ་བ་སྐྱེད།
བསམ་པ་ཡི་ནི་མཆོག་ཏུ་ངལ་ཞིང་རླུང་ཡབ་རླུང་གི་ཤུགས་རིངས་མང་།
ས་བདག་རྣམས་ཀྱི་འབྱོར་པ་འདི་ནི་ངེས་པར་བདེ་བའི་གྲོགས་མ་ཡིན།། 57

ཡབ་གཅིག་བདག་ལ་རྗེས་གནང་གསོལ། བདག་ནི་དཀའ་ཐུབ་ནགས་སུ་འགྲོ།
མི་རྟག་པ་ཉིད་དངོས་ཀུན་གྱི། རྩེ་མོར་ཆགས་པ་མཁྱེན་ལགས་སམ།། 58

ཞེས་པ་བུ་ཡི་ཚིག་ཐོས་ནས། དེ་དེ་བཞིན་ཞེས་རྣམ་པར་བསམས།
ས་བདག་མཁས་པ་ངོ་མཚར་ནི། རྒྱས་པར་བྱུང་པས་དེ་ལ་སྨྲས།། 59

पितुः श्रुत्वेति वचनं राजपुत्र स्त मब्रवीत् ।
दन्तकान्ताधररुचिं वैराग्यं ग्राहयन्निव ॥ ५३ ॥

शीतला निर्म्मलजलाः सन्तोषशशिशीतलाः ।
वने वैराग्यसुभगा भुवः कस्य न वल्लभाः ॥ ५४ ॥

परदारा इव क्षिप्रसुखावर्ज्जितदुर्जनाः ।
नरकप्रत्ययायामे सापाया न प्रियाः प्रियाः ॥ ५५ ॥

ध्यानं मन्त्रः परिज्ञान मिन्द्रियाणाञ्च निर्जयः ।
राज्ञां हिंसाप्रयत्नेन योगोऽयं नरकप्रदः ॥ ५६ ॥

हसन्त्यः संसारं कुसुमकलिलाः काननभुवः ।
स्वभावेन प्रीतिं विदधति बुधानां शममयीम् ।
इदं चिन्ताश्रान्ता व्यजनपवनोच्छ्वासबहुला
विभूति र्भूपानां भवति खलु नेयं सुखसखी ॥ ५७ ॥

अनुजानीहि मां तात व्रजाम्येष तपोवनम् ।
जानीहि सर्व्वभावानां शिरःशक्ता मनित्यताम् ॥ ५८ ॥

इति पुत्रवचः श्रुत्वा तत्तथेति विचिन्तयन् ।
उवाचोपचिताश्चर्य्य स्तं मनीषी महीपतिः ॥ ५९ ॥

དྲི་མེད་དབེན་པའི་ནགས་ཚལ་དུ། ཟླ་ཕྱེད་གལ་ཏེ་འགྲོ་འདོད་ན།
རེ་ཞིག་བདག་གི་ཐེ་ཚོམ་གསོལ། ཕྱི་ནས་རིགས་པར་ཕྱེད་འགྱུར་རོ॥ 60

ཕྱེད་ནི་གསོད་སར་འགྲོ་བ་ཡིས། འཁྲིག་པོ་དག་ཏུ་ཚིག་མང་པོ།
སྨྲས་པ་དེ་དག་དགོངས་པ་ནི། དེ་བཞིན་ཉིད་དུ་བརྗོད་པར་འོས॥ 61

ས་ཡི་བདག་པོས་དྲིས་པ་དང་། དེས་སྨྲས་བདག་གིས་བརྗོད་པ་དེས།
འདི་ན་སུ་ཞིག་བདག་གསོད་ལས། ཕྱེད་ཀྱི་ཟློག་པ་མི་གནས་སམ॥ 62

ལེགས་བྱས་དག་གི་རོ་ཡང་གསོན། སྡིག་ལྡན་ཤི་བ་མིན་ཡང་ཤི།
བསོད་ནམས་སྦྲ་མའི་རྩ་བ་སྐྱོད། ནོར་ལྡན་རྣམས་ཀྱི་འབྲུ་ཕྱུང་བཞིན॥ 63

ཞེས་པའི་བསམ་པས་བདག་གིས་ནི། ཚིག་ནི་གསུམ་པོ་དེ་དག་བརྗོད།
... ...॥ 64

ཅེས་པ་ཐོས་ནས་ས་ཡི་བདག། དེ་ལ་ཡོངས་འཁྲུད་གུས་བཅས་པས།
ཟླ་གཅིག་དགེ་བའི་སྐད་དུ་ནི། རིགས་པ་མཛོད་ཅེས་རབ་དུ་སྨྲས॥ 65

དེ་ནས་ཡབ་ནི་མིག་ཆུ་དང་། བཅས་པས་རྗེས་གནང་ནགས་ཚལ་དུ།
སློན་པོ་འི་ཟླ་ནི་ལྔ་བརྒྱ་དང་། ལྷན་ཅིག་རབ་དུ་སོང་བར་གྱུར॥ 66

དེར་ནི་དྲང་སྲོང་ཆེ་དྲུང་དུ། རྗེས་འབྲས་བཅས་པས་རབ་བྱུང་ཐོབ།
དུས་ཀྱིས་དེ་དག་རིལ་བ་དང་། ཤིང་ཤུན་བསགས་པ་དེ་ཡིས་མཐོང་॥ 67

विवेकविमलं पुत्र त्व मिच्छसि स चेद्वनम् ।
हित्वा मे संशयं तावत् पश्चाद्युक्तिं करिष्यसि ॥ ६० ॥

व्रजता वध्यवसुधां तिर्य्यगुक्तं त्वया वचः ।
प्रचुरं तदभिप्रायं वक्तु मर्हसि तत्त्वतः ॥ ६१ ॥

इति क्षितिभुजा पृष्टः सोऽब्रवीत्तन्मयोदितम् ।
वसत्यत्र न कश्चित् त्वा मद्वधाद्यो निवर्त्तयेत् ॥ ६२ ॥

सुकृती जीवति शवः स पापस्तु मृतोऽमृतः ।
प्राक् पुण्यं भक्ष्यते मूलात् सधनै र्धान्यराशिवत् ॥ ६३ ॥

इत्याशयान्मया तात तदुक्तं वचनं प्रियम् ।
... ... ॥ ६४ ॥

इति श्रुत्वा क्षितिपतिः तं परिष्वज्य सादरः ।
उचितं क्रियतां पुत्र कुशलायेत्यभाषत ॥ ६५ ॥

ततः स पित्रानुज्ञातः साश्रुनेत्रेण काननम् ।
प्रययौ मन्त्रिपुत्राणां सहितः पञ्चभिः शतैः ॥ ६६ ॥

महर्षे रन्तिके तत्र प्रव्रज्यां प्राप्य सानुगः ।
तेषां कालेन सोऽपश्यत् कुण्डवल्कलसञ्चयम् ॥ ६७ ॥

དེ་ནས་བསགས་པ་ལ་སྨོང་དེས། དེ་དག་མི་བལྟར་ངེས་བྱས་ནས།
བློ་གྲོས་ཆེན་པོས་ཇི་ཙམ་དུས། སྐྱེ་བོས་དབེན་སར་གཅིག་ཕྱུར་བསྡད། 68

མཐོང་དང་སྨྲ་བ་ངེས་པ་ཡིས། བསྐལ་བས་ཀྱང་འདོད་དགར་འོངས་པ་ཡི།
རི་དགས་ལ་ནི་དགེ་བ་དག །ལེགས་པར་འོངས་ཞེས་སྨྲས་ནས་དྲིས། 69

སྨྲར་ཡང་ཐུབ་པ་རི་དགས་ཀྱིས། བརྟུལ་ཞུགས་དེ་ཡིས་མཆོད་མཐོང་ནས།
བློན་པོའི་བུ་རྣམས་ཐམས་ཅད་ནི། སྐྱེངས་པར་གྱུར་པས་ཡང་དག་བསམས། 70

ནགས་སུ་ཡོངས་འཛིན་མེད་པ་ཡི། རི་དགས་རི་དགས་བརྟུལ་ཞུགས་འདི།
གོས་དང་དབྱུག་པའི་ཚོགས་དག་གིས། ཕྱུང་པོ་སྤངས་པ་འདི་དག་མཆོད། 71

དེ་ཡི་དོན་དུ་འདི་ཡིས་ནི། བདག་ཅག་བལྟ་ལ་ངེས་པ་བྱས།
བརྟུལ་ཞུགས་ཡོ་བྱད་བསགས་པ་ན། འདི་དག་གིས་ཀྱང་བཟློག་གམ་སྙམ། 72

ཞེས་པ་བསམས་ནས་དེ་དག་གིས། བརྟུལ་ཞུགས་ཡོ་བྱད་བསགས་པ་ཀུན།
ཆུ་ཡི་ཀླུང་དུ་རབ་སྤངས་ནས། དག་པས་དེ་དང་ཉེ་བར་ཕྱིན། 73

འཛིན་པ་སྤངས་པ་དེ་དག་གིས། ཁམས་དང་རང་བཞིན་མཁྱེན་ནས་དེའི།
བསམ་པ་བག་ལ་ཉལ་དག་ལ། འོས་པའི་ཆོས་ནི་བསྟན་པ་མཛད། 74

རྒྱལ་པོའི་བུ་དེ་ང་ཉིད་དེ། བློན་པོའི་བུ་དག་ཤཱ་ཀྱ་རྣམས།
ད་ལྟ་བདག་གིས་དེ་དག་ལ། གཏོང་བ་ཉེར་བསྟན་འདི་སྐད་བྱས། 75

ततः स सञ्चयद्वेषी तद्दर्शनसंविदा ।
एकाकी विजने तस्थौ कञ्चित् कालं महामतिः ॥ ६८ ॥

दर्शनाभाषणो बद्धनियमोऽपि यदृच्छया ।
प्राप्तं स्वागतमित्युक्ता पप्रच्छ कुशलं मृगम् ॥ ६९ ॥

पुनश्च पूजितं दृष्ट्वा मुनिन्तेन मृगव्रतम् ।
अमात्यतनयाः सर्व्वे विलक्षाः समचिन्तयन् ॥ ७० ॥

मृगो मृगव्रतश्चायं पूजितौ निष्परिग्रहौ ।
एतावनजिनौ दण्डसम्भाराडम्बरोज्झितौ ॥ ७१ ॥

एतदर्थ मनेनास्मद्दर्शने नियमः कृतः ।
व्रतोपकरणव्यग्रात् नून मस्यापि वारयेत् ॥ ७२ ॥

इति सञ्चिन्त्य सर्व्वे ते व्रतोपचारसञ्चयम् ।
नद्यां प्रक्षिप्य वारायां ययुः शुद्धा स्तदन्तिकम् ॥ ७३ ॥

त्यक्ता गृहभुवं तेषा माशयानुशयोचिताम् ।
सधातुं प्रकृतिं ज्ञात्वा विदधे धर्म्मदेशनाम ॥ ७४ ॥

राजपुत्रः स एवाहं शाक्या स्ते मन्त्रिसूनवः ।
पुन स्त्यागोपदेशोऽय मद्याप्येषां मया कृतः ॥ ७५ ॥

ཞེས་པ་ཤཱ་ཀྱ་གཞོན་ནུ་རྣམས་ཀྱི་སྔོན་བྱུང་ནི།
རྒྱལ་བ་ཉིད་ཀྱིས་གསུངས་པ་དེ་དག་ངེས་བཟུང་སྟེ།
ཧེན་ཁྲེད་རྣམས་ལ་མཉེས་གཤིན་ལྷན་པར་གྱུར་པ་དེའི།
ཐུགས་རྗེ་དེ་ནི་དགེ་སློང་ཚོགས་ཀྱིས་རབ་ཏུ་མཆོད།། 76

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སྐུགས་པ་འཕྱེ་བོ་འི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་སུམ་ཅུ་རྩ་བདུན་པའོ།།

इति शाक्यकुमारवृत्त मेतत्
कथितं भिक्षुगणाः स्वयं जिनेन ।
अवधार्य्य परा मपूजयत् तां
करुणा माश्रितवत्सलस्य तस्य ॥ ७६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मूकपङ्ग्ववदानं नाम सप्तचिंशः पल्लवः ॥ ० ॥

ཡལ་འདབ་སུམཅུ་རྩ་བརྒྱད་པ།

བརྟན་པའི་ཁར་གྱིས་མི་གདུང་ལྷག་མ་བཞིན།
ལེགས་བྱས་བཟོད་པ་གང་གི་བཟོད་པ་འཛིན།
རྣམ་འགྱུར་མེད་པའི་མཛེས་པ་རྨད་བྱུང་བསྐྱེད།
བརྟན་ལྡན་དེ་དག་མཆོག་ཏུ་རྒྱལ་གྱུར་ཅིག། 1

སྔོན་གྱི་བསོད་ནམས་ཕྱིན་ཅི་ལོག་པས་སྔོན།
གནོད་སྦྱིན་འདིར་སྐྱེས་སྐྱེ་རྒྱུ་རྣམས་ཀྱི་དགྲ།
ཨུ་དུམ་པ་ཞེས་བྱ་བ་དྲག་པོར་ནི།
གདུང་བས་འཛིགས་པ་དུས་བྱས་བཞིན་དུ་གྱུར།། 2

འཇིག་རྟེན་ལ་བརྩེ་མགོན་མེད་རྣམས་ཀྱི་གཉེན།
བཅོམ་ལྡན་ཞི་བ་བརྗོད་པས་འཕྲུལ་ལ་ནི།
དུས་མིན་དུས་དེར་བསླབ་པ་ཉེར་བསྟན་ཅིང་།
སྐྱབས་འགྲོ་རབ་ལྷན་འདུལ་བ་དག་ལ་བཀོད།། 3

སྲིད་པའི་གདུང་བ་རབ་ཏུ་ཞི་བ་དེ།
བདེ་གཤེགས་དེ་དུས་འཛུམ་སྐྱེས་རྒྱུ་བ་ལ།
རབ་ཏུ་དགའ་བས་ལྷ་རྩ་འོངས་གྱུར་པ།
མགྲོ་རིས་བདག་པོས་ཕྱག་འཚལ་འདི་སྐད་སྨྲས།། 4

अष्टत्रिंशः पल्लवः ।

ते जयन्ति धृतिशीलिनः परं
निर्व्विकाररुचिरत्वचिताद्भुताः ।
शेषवत् पृथुलभारनिर्व्यथाः
ये वहन्ति सुकृतक्षमाः क्षमाम् ॥ १ ॥

पुरा पुरापुण्यविपर्य्ययेण
रिपुः प्रजानां जनितप्रकम्पः ।
उदुम्बनामा निविड़ोपतापै-
र्यक्षः क्षयायैव कृतक्षणोऽभूत् ॥ २ ॥

अकालकालं त मनाथबन्धु-
र्लोकानुकम्पी भगवान् प्रसह्य ।
शिक्षोपदेशं शरणं प्रपन्नं
क्षमाभिधायी विनये न्ययुङ्क्त ॥ ३ ॥

तस्मिन् प्रशान्ते भुवनोपतापे
द्रष्टुं प्रहृष्टः सुगतं समेत्य ।
सञ्चारिणं नाकपतिः प्रणम्य
तत्कालजातस्मित मित्युवाच ॥ ४ ॥

ཅི་སྐད་གློ་བུར་འཛུམ་པའི་ཟླ་རིས་ཀྱིས།
ཁྲིད་ཞལ་ཆུ་སྐྱེས་ཟད་བྱུང་སྐད་དུ་མཛེས།
སྙིང་སྟོབས་བདུད་རྩིའི་རྒྱ་མཚོ་རྒྱུ་མེད་དུ།
འཛིག་རྟེན་ཐུན་མོང་བཞིན་དུ་བཞད་མ་ལགས།། 5

སྐབས་གསུམ་དབང་ཕྱུག་ཚིག་དེ་ཐོས་གྱུར་ནས།
བཅོམ་ལྡན་ཐམས་ཅད་གཟིགས་པས་དེར་གསུངས་པ།
ཕྱོགས་འདིར་རང་གི་སྔོན་བྱུང་དྲན་གྱུར་ནས།
དབང་པོ་བདག་ལ་འཛུམ་པ་འདི་སྐྱེས་སོ།། 6

སྔོན་ཚེ་ནགས་ཚལ་འདིར་ནི་གནས་གྱུར་པ།
ཁྲོ་བའི་སྐྱོན་སྤངས་ཐུབ་པ་བཟོད་ལ་དགའ།
ཆགས་རྟུལ་རང་བཞིན་སྲིད་ལ་སྐྱོང་བ་གང་།
པདྨ་དག་ལ་ཟླ་བ་བཞིན་དུ་གྱུར།། 7

དེ་ནས་དཔྱིད་ཀ་བྱུང་ཕྱོགས་བདག་པོ་ནི།
ཆགས་ལྡན་བཙུན་མོའི་ཚོགས་བཅས་རྩེ་དགའི་སྐད།
ནགས་ཀྱི་ནང་རྣམས་བལྟ་ཞིང་དགེ་མཚར་གྱིས།
དེ་ཡི་བསྟི་གནས་ཉེ་བའི་ས་གཞིར་འོངས།། 8

ཆགས་ལྡན་ས་སྐྱོང་རྟོད་ལྡན་ཞེས་པ་དེས།
རྩེ་དགའ་ལ་ནི་བྱུད་མེད་རྣམས་དག་གིས།

कस्मादकस्मात् स्मितचन्द्र-
लेखा मुखाम्बुजे भाति तवाद्भुतेयम् ।
अकारणं सत्त्वसुधासमुद्रा
न लोकसामान्यतया हसन्ति ॥ ५ ॥

श्रुत्वेति वाक्यं त्रिदशेश्वरस्य तत्
तं सर्व्वदर्शी भगवान् बभाषे ।
अस्मिन् प्रदेशे निजपूर्व्ववृत्तं
स्मृत्वा स्मितं जातमिदं ममेन्द्र ॥ ६ ॥

पुरा मुनिः क्षान्तिरति र्वनेऽस्मि-
न्नुवास निर्वासितरोषदोषः ।
योऽभूद्भुवो रागरजःस्वभावे
विद्वेषवानिन्दुरिवारविन्दे ॥ ७ ॥

अथोत्तराशाधिपति र्व्वसन्तो
वनान्तरालोकनकौतुकेन ।
सान्तःपुरः केलिसुखाय कामी
तदाश्रमोपान्तमही मवाप ॥ ८ ॥

रागी कलिर्नाम स भूमिपालः
पादप्रहारै र्वंदनासवैश्च ।

རྐང་པས་བསྣུན་དང་ཁ་ཡི་ཆང་གིས་ཀྱང་།
མྱ་ངན་མེད་མཛེས་བ་ཀུ་ལ་དཔལ་ཐོབ༎ 9

དེར་ནི་ཕྱོགས་རྣམས་དགའ་ཐུབ་པ་རྣམས་ཀྱིས།
དགའ་ཐུབ་ཉམས་བྱེད་ཁྲོ་ཆེན་སྤྲིན་འཁྲིག་གི།
ཚོགས་ཀྱི་བཞིན་དང་འདོད་མེའི་དུ་བས་བཞིན།
བྱུང་བ་འཁོར་བས་སྨུན་པ་དང་བཅས་གྱུར༎ 10

རླུང་གིས་བསྐྱོད་པ་རྩེ་དགས་གཡོ་བ་དང་།
མེ་ཏོག་ཟུན་བུས་དུད་པ་ནུ་མས་ཀྱུ།
ཡལ་འདབ་དམར་པོ་དང་ལྡན་མཆུ་སྒྲོས་དམར།
འཁྲི་ཤིང་རོལ་རྩེད་བུད་མེད་རྣམས་ཀྱིས་ཐོབ༎ 11

རྒྱལ་པོའི་བཙུན་མོ་དག་མཚན་རྣམ་འཕྲུལ་ལ།
ནགས་སུ་རྒྱུ་བས་ཆགས་ལས་རྣམ་གྲོལ་ཞིང་།
གཡོ་མེད་བསམ་གཏན་དེང་འཛིན་ལ་ཆགས་པ།
དྲང་སྲོང་དེ་ལ་ཡོངས་སུ་བསྐོར་ནས་གནས༎ 12

དེ་ནས་མི་དབང་ཕྱོགས་དེར་མངོན་ཕྱོགས་པས།
བུད་མེད་རྣམས་ཀྱིས་ཡོངས་བསྐོར་དེ་མཐོང་ནས།
ཕྲག་དོག་ཁྲོ་བའི་མེ་ནི་བལྟ་དཀའ་དེས།
དེ་ཡི་ལག་པ་རྐང་པ་སྨྲུར་དུ་བཅད༎ 13

लेभे विलासेषु नितम्बिनीना-
मशोकशोभां वकुलश्रियञ्च ॥ ९ ॥

दिश स्तपोलोपपृथुप्रकोप-
भ्रूभङ्गवृन्दैरिव तापसानाम् ।
तत्र भ्रमद्भि र्भ्रमरै र्बभूवुः
कामाग्निधूमैरिव सान्धकाराः ॥ १० ॥

लीलाविलोलाः पवनाकुलाली-
स्तनावनम्राः स्तवका लतानाम् ।
रक्ताधराः पाटलपल्लवानां
प्रापुर्विलासं ललना लतानाम् ॥ ११ ॥

राजाङ्गनाः कौतुकविभ्रमेण
वने चरन्त्य स्तमृषिं विलोक्य ।
अचञ्चलध्यानसमाधिसक्तं
विमुक्तरागं परिवार्य्य तस्थुः ॥ १२ ॥

तद्देशमभ्येत्य नरेश्वरोऽथ
दृष्ट्वा वधूभिः परिवारितं तम् ।
ईर्ष्याप्रकोपानलदुर्निरीक्ष्यः
चिच्छेद तस्याशु स पाणिपादम् ॥ १३ ॥

བརྟན་པར་རྣམ་འགྱུར་མེད་ངེས་ཡན་ལག་ཚོགས།
བཅད་ཀྱང་སླ་ཡི་བདག་ལ་ངེས་མ་ཁྲིས།
ཏྲི་ཛ་གཞོན་སྨིན་སྤྱོ་འཕྱེ་ལྷ་ཚོགས་ཀྱིས།
དེ་ལ་ཁྲི་བ་ཧྲག་པོ་དག་ལས་བཟློག ༎ 14

དེ་ནས་མི་བདག་རང་གི་གྲོང་སོང་ཚེ།
ཉགས་ནས་འོངས་པའི་ཐུབ་པ་ཐམས་ཅད་ཀྱིས།
དེར་ནི་ཡན་ལག་བཅད་པ་དེ་མཐོང་ནས།
བཟོད་ལྡན་དག་ཀྱང་ཁྲོ་བས་འདར་བར་གྱུར༎ 15

དམོད་པ་འདེབས་ཡ་མཆེར་ཕྱོགས་དེ་དག་ལ།
བཟློག་ནས་བཟོད་པར་ཞེས་དེ་ཡིས་སླུས།
བཟོད་པས་ཡང་དག་འཁྲུར་པའི་ཡིད་ལྡན་རྣམས།
ཁྲོ་བའི་ལས་ཀྱིས་ཆགས་པར་མི་བྱེད་དོ༎ 16

ཁྲོ་བྲལ་བདག་གི་ཀང་ལག་བཅད་གྱུར་ཀྱང་།
གལ་ཏེ་རྣམ་འགྱུར་ཤུགས་ལྡན་མ་གྱུར་ན།
བདེན་པ་དེ་ཡིས་ཉམས་མེད་ལུས་ལྡན་པར།
བདག་གྱུར་ཅིག་ཅེས་རབ་དང་ངེས་སྨྲར་སྨྲས༎ 17

དེ་ནས་བདེན་ཚིག་བརྗོད་པས་སྐད་ཅིག་ལ།
ལག་པ་ཀང་པ་འབྱུར་ཞིང་སྐྲ་དག་བསོས།

छिन्नाङ्गवर्गोऽपि स निर्विकार-
श्चुकोप भूपाय न नाम धीरः ।
न्यवारयत् क्रूरतरञ्च तस्मै
गन्धर्व्वयक्षोरगदेवसंघम् ॥ १४ ॥

ततः प्रयाते नृपतौ पुरं स्वां
समेत्य सर्व्वे मुनयो वनेभ्यः ।
तं तत्र कृत्तावयवं विलोक्य
क्षान्ता अपि क्रोधधुता बभूवुः ॥ १५ ॥

शापप्रदानाभिमुखान् निवार्य्य
क्षन्तव्यमित्येव स तानुवाच ।
क्षमासमालिङ्गितमानसानां
कोपक्रियाभिः क्रियते न संगः ॥ १६ ॥

विकारवेगोऽपि न पाणिपाद-
च्छेदे ममाभूद् यदि वीतमन्योः ।
सत्येन तेनाक्षतदेहएव
स्यामित्यवादीत् स पुनः प्रसादी ॥ १७ ॥

ततः क्षणात् सङ्गतपाणिपादं
रूढव्रणं प्रेत्य सदोदयेन ।

ལྷ་ཡིས་བཟོད་པའི་ཡོན་ཏན་དེ་བསྟོད་ཅིང་།
སྙིང་སྟོབས་དཀར་བའི་མེ་ཏོག་རྣམས་ཀྱིས་མཆོད༎ 18

རྒྱལ་པོའི་ངང་དེ་སྡིག་ནག་པོ་བརྩེགས་ལྷ་བྲུས།
ཆུ་བུར་གྱིས་གདམས་སྤྱོད་ཚུལ་རྣམ་པར་ཉམས།
རབ་དྲག་རྣག་གི་འཁོར་མོར་རྣམ་འཁོར་ཞིང་།
འཇིག་བྱེད་སྨིན་པའི་དམྱལ་བར་སོང་བར་གྱུར༎ 19

བཟོད་དཀའ་དྲང་སྲོང་ཆེན་པོར་གང་སྨོན་བྱུང་།
ང་ཉིད་རྩོད་ལྡན་གང་དེ་ལྷ་སྦྱིན་ནོ།
བརྒྱ་བྱིན་འདས་པའི་སྤྱོད་ཚུལ་དྲན་པ་ལ།
བདག་གི་འཛུམ་པ་འདི་སྐྱེས་རྒྱུ་མེད་མིན༎ 20

ཞེས་པ་བཅོམ་ལྡན་གསུང་ཐོས་ཡ་མཚན་དག་དང་ལྡན་པའི་ཡིད།
རབ་དགའ་རྣམ་རྒྱས་སྤྲོས་པས་གསལ་བའི་སྤྱན་གྱི་འཕྲེང་འཛིན་ཅིང་།
ཉི་མའི་འོད་ཟེར་རེག་པས་པདྨ་འི་འབྱུང་གནས་རྒྱས་པ་བཞིན།
ལྷ་རྣམས་བདག་པོ་དགའ་བས་སྐབས་གསུམ་གནས་སུ་སོང་བར་གྱུར༎ 21

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བཟོད་པ་ལ་དགའ་བའི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་སུམ་ཅུ་རྩ་བརྒྱད་པའོ༎

अपूजयत् क्षान्तिगुणं स्तवेन
तं देवता सर्व्वासितैश्च पुष्पैः ॥ १८ ॥

राजापि तत्किल्बिषकालकूट-
विस्फोटसंघट्टविनष्टचेष्टः ।
पूरोत्कटावर्त्तविवर्त्तमानः
संवर्त्तपाकं नरकं जगाम ॥ १९ ॥

योऽभूत् पुरा क्षान्तिरतिर्म्महर्षिः
सोऽहं कलिर्यश्च स देवदत्तः ।
अतीतवृत्तस्मरणेन शक्र
नाकारणं जातमिदं स्मितं मे ॥ २० ॥

इति भगवतः श्रुत्वा वाक्यं सविस्मयमानसः
प्रमदविकचव्यक्तोत्साहां वहन्नयनावलीः ।
तरणिकिरणस्पर्शेनेव स्फुटः कमलाकर-
स्त्रिदशवसतिं प्रीतः प्रायात् पतिस्त्रिदिवौकसाम् ॥
२१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
क्षान्त्यवदानमाष्टत्रिंशः पल्लवः ॥

ཡལ་འདབ་སུམ་ཅུ་རྩ་དགུ་པ།

ཆེན་པོ་ཁྱད་འཕགས་མཐོ་བ་རྣམས་ནི་ཉམས་པར་འགྱུར་བ་ཡི།
སྐྱོན་གྱི་རྒྱུ་ནི་སྐྱེ་བོ་ངན་དང་འགྲོགས་པ་ཁོ་ན་ཡིན།
འཛུག་ངོགས་ཤིང་ནི་ངེས་པར་འབྲས་བུ་སྐྱེ་བས་ལྡན་ཅིག་ཉིད།
ཆུ་དང་འགྲོགས་པས་རྩ་བ་ཕྱུང་ནས་འཕྲལ་ལ་འགྱེལ་བར་འགྱུར།། 1

བཅོམ་ལྡན་དེ་བཞིན་གཤེགས་པ་སྔོན། ཆུ་བོ་ཡིད་འོང་ལྡན་པའི་ངོགས།
ཁང་བཟང་མཛེས་པ་དང་ལྡན་པ། ཡངས་པ་ཅན་ན་རྣམ་པར་རྒྱུ།། 2

ཉ་པའི་ཚོགས་ཀྱིས་དེ་ཡི་ཆུ། བསྐྱལ་བར་དཀའ་ཞིང་ཟབ་པ་ལ།
ནམ་ཞིག་རྒྱུ་ནི་འཕང་པ་ན། འཛིགས་རུང་ཆུ་སྲིན་ཡང་དག་འཐོན།། 3

མགོ་བོ་བཅོ་བརྒྱད་སེང་གེ་དང་། གཉིས་འཐུང་སྟག་དང་བོང་བུའི་བཞིན།
ལུས་ནི་རི་ཡི་རྣམ་པ་ཅན། མི་ནི་སྟོང་ཕྲག་དག་གིས་དྲངས།། 4

དེར་ནི་དེ་མཐོང་རྣམ་པར་སྐྲག། འདྲེན་པའི་ཐུག་པ་ཆད་གྱུར་ཅིང་།
ངོ་མཚར་གཡོ་མེད་ཉ་པ་རྣམས། སྐད་ཅིག་བསྡོད་མིན་འགྲོ་བ་མིན།། 5

འཁོར་བ་ལས་ཀྱི་རྣམ་བཀྲ་བར། རྣམ་འགྱུར་ངོ་མཚར་ཟབ་མོ་ནི།
བརྒྱ་དང་ལྡན་པའི་ཁྱད་པར་རྣམས། སུ་ཞིག་གིས་ནི་རྟོ་བར་བྱེད།། 6

ऊन चत्वारिंशः पल्लवः ॥

अत्यन्त मुन्नतिमतां महतां विनाश-
दोषस्य दुर्जनसमागम एव हेतुः ।
कूलद्रुमाः किल फलप्रसवैः सहैव
सद्यः पतन्ति जलसंगतिभिन्नमूलाः ॥ १ ॥

रुचिरागारशालिन्यां वैशाल्यां भगवान् पुरा ।
वल्गुमत्यास्तटे नद्या विचचार तथागतः ॥ २ ॥

तस्याः कैवर्त्तसार्थेन गम्भीरेऽम्भसि दुस्तरे ।
कदाचिद् घोरमकरः क्षिप्त्वा जालं समुद्धृतः ॥ ३ ॥

अष्टादशशिराः सिंहद्विरदप्रखराननः ।
नृणां सहस्रैराकृष्टः पर्व्वताकारविग्रहः ॥ ४ ॥

तं दृष्ट्वा तत्र वित्रस्ताः स्रस्ताकर्षणरज्जवः ।
आश्चर्य्यनिश्चलदृशो न तस्थु र्न ययुः क्षणम् ॥ ५ ॥

गणानां गहनाश्चर्य्यविशेषशतशालिनाम् ।
संसारे कर्म्मवैचित्र्ये विकाराणां करोति कः ॥ ६ ॥

སྐབས་དེར་དེ་ཡི་ཆེད་དུ་ནི། འབྱུང་པོ་དགོངས་པ་བཅོམ་ལྡན་འདས།
སྐྱེ་བོ་ཐམས་ཅད་སྐྱོབས་པ་ལ། དུས་མཛད་རྒྱལ་བ་ཡང་དག་བྱོན།། 7

གཞན་པོ་ཁྲིས་པ་ཟད་མེད་བཅས། ལྟད་མོ་ལ་འཚོགས་སྐྱེ་བོ་དག།
བཅོམ་ལྡན་གྱིས་གཟིགས་འཛུག་ངོགས་དེར། སྟུན་ནི་ཡོངས་སུ་བཟུང་བ་མཛད།། 8

དགེ་སློང་ཚོགས་ཀྱིས་ཡོངས་བསྐོར་བའི། དེ་བཞིན་གཤེགས་པ་དེར་མཐོང་ནས།
ཆུ་གཏེར་ཕྱིར་ལ་ལོག་པ་བཞིན། སྐྱེ་བོ་ཐམས་ཅད་དེར་ཕྱོགས་གྱུར།། 9

དེ་མཐོང་ཉིད་ཀྱི་འཕྲུལ་ལ་ནི། ཉ་པ་རྣམ་པར་དུད་པ་ཡིས།
སྲོག་ཆགས་འཆི་བ་ཡངས་པའི་རྒྱུ། འཁོར་བ་ལྟ་བུ་བཏང་བར་གྱུར།། 10

དེ་ཡི་གསུང་གིས་ཆུ་ལ་ཉ། ཆུ་སྲིན་ནཀྲ་ལ་སོགས་ཚོགས།
བཏང་ནས་དེ་དག་ཁྲི་བྲལ་བས། སྡིག་པ་ཡི་ནི་དགྲ་བོར་གྱུར།། 11

དེ་དག་གིས་བཀོད་ཆུ་སྲིན་ཆེ། མདུན་དུ་བཅོམ་ལྡན་གྱིས་གཟིགས་ནས།
ཚེམས་ཀྱི་མཛེས་པ་སྙིང་རྗེ་ཡི། ཆུ་བོ་སྤྲོ་བཞིན་དེ་ལ་སྨྲས།། 12

བུ་སྐྱེ་སེར་སྐྱ་ཁྱོད་ཀྱིས་ནི། ཉེས་པ་བྱས་པ་མི་དྲན་ནས།
འདི་ཡང་ངག་གིས་ཉེས་སྤྱད་དག། སྨིན་པ་ཉམས་སུ་མྱོང་བ་ཡིན།། 13

ཁྱོད་ཀྱི་མི་དགེའི་གྲོགས་གྱུར་པ། མ་དེ་ད་ལྟ་གང་ན་གནས།
ཐམས་ཅད་མཁྱེན་པས་འདི་བརྗོད་ཚེ། དེ་ཡིས་སྐྱེ་བ་དྲན་ནས་སྨྲས།། 14

अत्रान्तरे तमुद्देशं भगवान् भूतभावनः ।
जिनः समाययौ सर्व्वजनत्राणकृतक्षणः ॥ ७ ॥

सवृद्धवाललललनं जनं कौतुकसंगतम् ।
दृष्ट्वा तत्राकरोत्तीरे भगवानासनग्रहम् ॥ ८ ॥

भिक्षुसंघैः परिवृतं दृष्ट्वा तत्र तथागतम् ।
जनोऽभूदुन्मुखः सर्व्वः प्रत्यावृत्त इवोदधिः ॥ ९ ॥

तं विलोक्यैव विनताः कैवर्त्ताः प्राणिबन्धनम् ।
विशालजालं सहसा संसारमिव तत्यजुः ॥ १० ॥

मत्स्यकुम्भीरनक्रादिसंभारं तद्गिराम्भसि ।
त्यक्त्वा ते विरताटोपा बभूवुः किल्विषद्विषः ॥ ११ ॥

तैर्न्यस्तं भगवान् दृष्ट्वा महामकर मग्रतः ।
तं जगाद सृजन् दन्तकान्त्यैव करुणानदीम् ॥ १२ ॥

अपि त्वं कपिलः पुत्र किन्न स्मरसि दुष्कृतम् ।
वचोदुश्चरितस्यायं परिपाकोऽनुभूयते ॥ १३ ॥

साप्यकल्याणमित्र न्ते जननी क्वाद्य वर्त्तते ।
सर्व्वज्ञेनेत्यभिहितः स्मृत्वा जाति मुवाच सः ॥ १४ ॥

ཁྲིབ་བདག་བདག་ནི་སེར་སྐྱ་ཡིན། རང་གིས་ཉེས་པ་བྱས་པ་དྲན།
ངག་གིས་ཉེས་བྱས་ཡོངས་སྨིན་པ། འདི་ནི་ཉམས་སུ་མྱོང་བར་གྱུར།། 15

དམྱལ་བ་སྟོན་བྱེད་བདག་གི་མ། སྔོན་དུ་དམྱལ་བ་དག་ཏུ་སྐྱེས།
ཞེས་པ་སྨྲས་ནས་ཆུ་སྤྲིན་དེར། ང་རོ་དྲག་པོས་རབ་ཏུ་ངུས།། 16

སྲུ་ངན་རྒྱ་མཚོར་བྲིང་དེ་ལ། བཅོམ་ལྡན་འདས་ཀྱིས་བཀའ་སྩལ་པ།
དུད་འགྲོའི་སྐྱེ་གནས་སོང་ཁྱོད་ལ། དུས་མིན་དེ་རིང་ཅི་ཞིག་བགྱི།། 17

བག་མེད་རྣམས་ཀྱི་བསོད་ནམས་མིན་པའི་རབ་ཏུ་རྩོམ་པ་གཟུ་ལུམས་དག།
དགོད་ཅིང་རངས་པས་བསྐྱུབས་པ་དམྱལ་བར་ཡོངས་སུ་སྨིན་ལ་ཆགས་གྱུར་ཆེ།
ཉོན་མོངས་འབབས་པ་དུག་དང་མཚུངས་པའི་རྗེས་སུ་འགྲོད་པ་མ་ཞི་བས།
ཏུ་ལ་སྐྱབས་གནས་རྣམས་ལ་མཚན་མོ་སོ་སོར་མཆོག་ཏུ་གདུང་བར་བྱེད།། 18

སྡུག་བསྔལ་སྐད་ཅིག་གིས་འཇིག་སྣད། བདག་ལ་སེམས་ནི་དང་བར་བྱོས།
དང་བའི་ཡིད་ཀྱིས་དུས་བྱས་ནས། ལྷ་ཡི་གནས་སུ་ཁྱོད་བགྲོད་འགྱུར།། 19

མཉེས་ག་ཞིན་ཕན་པ་འདི་ཡང་ཉོན། རྣམ་པར་དཔྱོད་ལ་ཡིད་ལ་གྱིས།
འདུ་བྱེད་ཐམས་ཅད་མི་རྟག་ཅིང་། ཞི་བ་མྱང་འདས་འཇིག་པ་མེད།། 20

བཅོམ་ལྡན་འདས་ཀྱི་བཀའ་འདི་ཡིས། དེ་ནི་རབ་དང་གྱུར་པའི་ཚེ།
སྐྱེ་བོའི་ཚོགས་ཀྱང་ཡུན་རིང་དུ། ངོ་མཚར་གཡོ་བ་མེད་པར་གྱུར།། 21

विभो भवामि कपिलः स्मरामि निजदुष्कृतम्।
वचोदुश्चरितस्यायं परिपाकोऽनुभूयते ॥ १५ ॥

याता मे नरकं माता नरकादेशिनी पुरा।
इत्युक्त्वा मकरस्तत्र रुरोद परुषस्वरम् ॥ १६ ॥

तं शोकसागरे मग्नं बभाषे भगवान् पुनः।
अकाले किं करोम्यद्य तिर्य्यग्योनिगतस्य ते ॥ १७ ॥

अपुण्यप्रारम्भे रभसहसितोल्लासविहिते
प्रमत्तानां याते नरकपरिपाकप्रणयिताम्।
अशान्तेः सन्तापं हृदितशरणानि प्रतिनिशं
भृशं क्लेशावेशै र्द्दिशति विषतुल्यै रनुशयः ॥ १८ ॥

क्षणं दुःखक्षयायैव मयि चित्तं प्रसादय।
प्रसन्नमानसः काले यास्यसि त्रिदशालयम् ॥ १९ ॥

शृणु वत्स हितञ्चेदं विचार्य्य कुरु चेतसि।
अनित्याः सर्व्वसंस्काराः शान्तिनिर्व्वाण मक्षयम् ॥ २० ॥

इत्याज्ञया भगवत स्तस्मिन् याते प्रसन्नताम्।
जनसंघः स सुचिरं बभूवाश्चर्य्यनिश्चलः ॥ २१ ॥

དེ་ནས་སྐྱེ་བོས་གུས་པར་ནི། གསོལ་བཏབ་འཕགས་པ་ཀུན་དགའ་བོས།
བཅོམ་ལྡན་འདས་ལ་ཐལ་སྦྱར་བྱས། དེ་ཡི་སྔོན་བྱུང་རབ་ཏུ་དྲིས།། 22

དེ་ཡིས་དྲིས་ལ་ཡེ་ཤེས་སྤྱན། དྲི་མེད་དེ་ཡིས་རབ་ཏུ་གསུངས།
སྡིག་པའི་ངང་ཚུལ་འདི་ཡི་ནི། བྱུང་བའི་མཐའ་འདི་མཉན་པར་གྱིས།། 23

བསྐལ་པ་བཟང་པོ་དག་ལ་སྔོན། སྐྱེ་བོ་ཚེ་ལོ་ཁྲི་ཕྲག་ཉུང་།
ཐུབ་ཆེ་བཅོམ་ལྡན་དེ་བཞིན་གཤེགས། འོད་སྲུང་ཞེས་པ་བྱུང་བར་གྱུར།། 24

བ་ར་ཎ་སིར་དེ་དུས་སུ། ས་སྐྱོང་ཀྲི་ཀི་ཞེས་བྱ་བ།
སྐྱོང་བའི་དཔག་བསམ་ཤིང་ལྟ་བུ། མང་པོ་རབ་ཏུ་སྤྱོར་བ་བྱུང་།། 25

ནམ་ཞིག་མཁས་པའི་གནས་སུ་ནི། མིག་སྟོང་གཞན་པ་བཞིན་དུ་གནས།
དེར་ནི་གཉིས་སྐྱེས་རིག་བྱེད་ལྡན། སྐྱ་བའི་སེང་གེ་ཞེས་པ་འོངས།། 26

ཐོགས་པ་མེད་པར་ཐུབ་པ་དང་། སྟོན་དང་བསྐྱེན་བཀུར་ཡང་དག་ཐོབ།
སློབ་མའི་འཁོར་བས་བསྐོར་བ་དེས། དེ་ཚེ་རྒྱལ་ལ་ཞེས་བརྗོད་པ།། 27

ཁྱབ་བདག་མཁས་པའི་བདག་པོ་མདུན་སར་འདུག་འོས་ཞེས།
ལྡན་ཁྱོད་ནི་ཞེས་གསུང་ཅིག།
ཁྱོད་ཀྱི་ལེགས་སྦྱོར་བདུད་རྩི་དག་ལ་མཆོག་ཏུ་སྲིད་ལྡན་ཡང་
དག་བལྟ་ལ་ཆགས།
ས་བདག་གཞན་གྱི་མིང་ལ་སྣང་ལྡན་ཡོན་ཏན་བརྗོད་ལ་སྨྲ་ཅེར་ཆེ་བར་སྒྲོགས།
ཡོན་ཏན་ཀུན་གྱི་རྟེན་གནས་ཁྱོད་ཀྱི་གློ་བུར་ཉིད་དུ་བདག་ལ་སྐྱེན་རྣམས་སྨྲར།། 28

आर्य्यानन्दः प्रणयिना जनेनाभ्यर्थित स्ततः ।
तत्पूर्व्ववृत्तं पप्रच्छ भगवन्तं कृताञ्जलिः ॥ २२ ॥

स तेन पृष्टः प्रोवाच विमलज्ञानलोचनः ।
अस्याकुशलशीलस्य वृत्तान्तः श्रूयता मयम् ॥ २३ ॥

भद्रकाख्ये पुरा कल्पे वर्षायुतयुगायुषि ।
जने बभूव भगवान् काश्यपाख्य स्तथागतः ॥ २४ ॥

क्रिकिर्नाम महीपालः कल्पशाल इवार्थिनाम् ।
अभवत् समये तस्मिन् वाराणस्यां बहुप्रदः ॥ २५ ॥

कदाचिद् विबुधास्थाने सहस्राक्ष मिवापरम् ।
आसीनं वादिसिंहाख्य स्तं विद्वानाययौ द्विजः ॥ २६ ॥

अविलम्बितसंप्राप्तदर्शनासनसत्कृतिः ।
स दत्ताशी र्न्नरपतिं शिष्यश्रेणिवृतोऽभ्यधात् ॥ २७ ॥

स्वस्ति स्वस्तिमते बुधाधिपसभासीनाय तुभ्यं विभो
लुब्धाः सच्चरितामृते तव परं सन्दर्शने रागिणः ।
सद्वेषाः परभूपनाम्नि मुखरास्ते सद्गुणोदीरणे
कस्मात् सर्व्वगुणाश्रयेण भवता दोषै र्वयं योजिताः ॥ २८ ॥

གང་ཞིག་སྡོང་བ་རྣམས་ཀྱང་བར་མེད་རིན་ཅེན་ཆར་འབབ་པས།
སྣ་ཚོགས་སྡོང་བའི་དོན་མཐུན་ཡོངས་སུ་རྫོགས་པར་བྱེད་གྱུར་པ།
དེ་དག་ཐམས་ཅད་གཏོང་ཕོད་དང་ལྡན་མཚུངས་མེད་བསོད་ནམས་གཏེར།
ཁྱོད་ཀྱི་སྦྱིན་པ་བཀྲེན་མེད་འགྱུར་བའི་རྣམ་པར་འཕེལ་བ་ཡིན།། 29

རྒྱལ་པོ་ཡོན་ཏན་ཅུང་ཟད་ཡོངས་སུ་འདྲིས་པ་བདག་གི་བླ་མ་དམ་པ་དག།
བསྟན་ལས་མཁས་པ་རྒྱལ་བྱེད་རིག་པའི་ཆ་ཡི་ཆ་ཤས་ཅི་ཡང་ཐོབ།
ཡིད་འོང་མཁས་པའི་པདྨའི་ཚོགས་ཀྱི་འོད་དང་ལྡན་པའི་མདུན་ས་འདིར།
དེ་ཡི་ཚིག་ནི་ཕྱུལ་དུ་བྱུང་བའི་ཡིད་ཆེས་འགའ་ཞིག་བདག་གིས་བསྟན།། 30

སྐྱེ་བོ་དམ་པའི་བློ་ནི་རང་གི་ཡོན་ཏན་བརྗོད་ངོ་ཚ།
དེ་ལྟ་ན་ཡང་སྨྲ་འདོད་དྲག་པོས་མུ་ཅོར་སྒྲོག་ཏུ་བཅུག།
རྒྱལ་པོ་འགྲོ་འདི་དག་ན་བདག་གི་ཚིག་ལན་ལ་སྲིད་པའི།
གལ་ཏེ་མཁས་པ་ཡོད་ན་སྨྱུར་བ་ཉིད་དུ་བརྟག་པར་གྱིས།། 31

ཞེས་པ་དེ་ཡི་གཞུང་གི་ཚིག། དྲག་པོར་སྨྲས་ཞིང་ཟབ་པ་དག།
ཐོས་ནས་ས་ཡི་བདག་པོ་ནི། སྐྱེངས་པས་སྨྱུར་བར་ཡང་དག་བསམས།། 32

གལ་ཏེ་ལན་ནི་མ་ཐོབ་པར། རྒྱགས་ཤིང་འཕྱུར་འདི་སོང་གྱུར་ན།
དེ་ལྟ་ན་ནི་བདག་ལུས་ཀྱི། གྲགས་པ་མིན་པ་སྒྲོག་པའི་རྔ།། 33

यद् याचका अपि निरन्तररत्नवर्षै
नानार्थिसार्थपरिपूरकतां प्रयान्ति ।
सर्व्वं भवानुपमपुण्यनिधे वदान्य
निर्दैन्यदानविभवस्य विजृम्भितं ते ॥ २९ ॥

राजन् किञ्चित्परिचितगुणैः सेवया सद्गुरुभ्यः
प्राप्तोऽस्माभि र्विबुधविजयी कोऽपि विद्यांशलेशः ।
अस्यां विद्वत्कमलभरसौम्यप्रभायां सभायां
तस्योत्कर्षं कतिपयपदं प्रत्ययं दर्शयामः ॥ ३० ॥

निजगुणगणने धी र्लज्जते सज्जनानां
मुखरयति तथापि प्रौढ़वादाभिलाषः ।
इयति जगति राजन् क्षिप्रमन्विष्यतां मे
प्रतिवचनरुचि श्चेदस्ति कश्चिद् विपश्चित् ॥ ३१ ॥

सन्दर्भगर्भगम्भीर मिति तस्योत्कटं वचः ।
श्रुत्वा क्षितिपतिः क्षिप्रं विलक्षः समचिन्तयत् ॥ ३२ ॥

अप्राप्तप्रतिमल्लोऽयं यदि यायात्मदोद्धतः ।
तदेष मम देशस्य यशःखण्डनडिण्डिमः ॥ ३३ ॥

གང་ནས་བདག་ལྷུན་པོར་གྱུར། ཡོན་ཏན་ཅན་རྣམས་དམན་པར་བྱེད།
དེ་ནི་སྐྱེ་བོ་རིག་བྱེད་ལ། ཡོངས་སུ་ངལ་བ་བྱེད་མ་ཡིན།། 34

ས་བདག་ཆོས་ཀྱི་ཀུན་དགའ་ར། དྲི་མེད་དབེན་པའི་སྣང་བ་ཅན།
འཇིག་རྟེན་རིག་བྱེད་ལ་འཇུག་སྟེ། དམ་པའི་བྱ་བའི་སྤྱོད་ལ་བཞིན།། 35

དེ་སྐད་འདི་ཡི་རྒྱུགས་པ་ནི། རབ་ཏུ་འབད་པས་ཚར་གཅད་བྱ།
ཡུལ་ནི་རིག་བྱེད་ཀྱིས་དབུལ་བ། རིགས་ཀྱི་བདག་པོ་ཉིད་ཀྱི་སྐྱོན།། 36

དེ་ལྟར་བསམས་ནས་མི་བདག་གིས། བྲམ་ཟེ་ཀར་བ་ཊར་གནས་པ།
མཁས་པའི་བླ་མ་རྣམ་དཔྱད་ནས། བློན་པོ་ཆེན་པོས་འགུགས་སུ་བཅུག།། 37

མཁན་པོ་རྟོག་གེ་རྣ་ལྡན་པ། ས་བདག་མ་ཏུ་ན་ས་དེར་འོངས་ནས།
སྨྲ་བའི་སེང་གེ་དྲེགས་པ་ཡི། རལ་པ་དག་ནི་ཆད་པར་བྱས།། 38

གྱུར་བར་སྨྲ་བ་མ་ལུས་ལས། རྣམ་རྒྱལ་དེ་ཡིས་ཟམ་པ་དེའི།
དབྱངས་ཅན་ངོ་མཚར་གྱུར་པ་བཞིན། སྨྲ་བཅད་རྒྱ་ནི་ཡང་དག་ཐོབ།། 39

སྐར་མ་རྣམས་ནི་འཆར་བ་བཞིན། མཁས་པ་གཟི་བྱིན་ཆེ་རྣམས་ཀྱིས།
ཡོན་ཏན་ཁྱད་འཕགས་ལ་གནས་པ། གོང་ནས་གོང་དུ་མཐོང་བ་ཡིན།། 40

དེ་ནས་ནོར་མང་མི་བདག་གིས། བྱིན་ནས་སྨྲ་བའི་སེང་གེ་བདང་།
གྲོང་ཁྱེར་ལྷ་བུ་ཀར་པ་ཊ། གཉིས་སྐྱེས་རྒྱལ་བ་དག་ལ་བྱིན།། 41

गुणापमानकृद् यत्र मूर्खो भवति भूपतिः ।
न करोति जनस्तत्र विद्यार्ज्जनपरिश्रमम् ॥ ३४ ॥

विवेकविमलालोके धर्म्मारामे महीपतौ ।
लोके विद्याः प्रवर्त्तन्ते सदाचारक्रिया इव ॥ ३५ ॥

तस्मादस्य प्रयत्नेन कर्त्तव्यो मदनिग्रहः ।
विद्यादरिद्रता देशे दोष एव विशांपतेः ॥ ३६ ॥

इति संचिन्त्य नृपतिर्विप्रं कर्वटवासिनम् ।
आनिनाय महामात्यै रन्विष्य विदुषां गुरुम् ॥ ३७ ॥

भूभृत्सभामुपाध्यायः प्रेत्य तं तर्ककर्कशम् ।
चकार वादिसिंहस्य दर्पकेशरकर्त्तनम् ॥ ३८ ॥

तस्य तेन जितस्याशु विजिताशेषवादिनः ।
मौनव्रतं समापेदे लज्जितेव सरस्वती ॥ ३९ ॥

आरूढाः शुभ्रमहसं नक्षत्राणामिवोदयाः ।
उपर्य्युपरि दृश्यन्ते गुणोत्कर्षा मनीषिणाम् ॥ ४० ॥

वादिसिंहं विसृज्याथ दत्त्वा भूरिधनं नृपः ।
ददौ द्विजाय जयिने कर्व्वटं नगरोपमम् ॥ ४१ ॥

དེ་ནས་རྒྱལ་ལས་གླང་པོ་དྲ། དཔུང་རྒྱན་ག་ཏུ་བ་བུ་མཛེས་པ་ཐོབ།
མཁན་པོ་དཔལ་དང་ལྡན་ཅིག་དུ། རང་གི་ཁྲིམ་ཏུ་རབ་དུ་ཞུགས།། 42

རྒྱལ་པོའི་དཔུང་པས་བསྐྱབས་པ་དང་། ཚོང་པས་རྒྱ་མཚོ་ནས་བསྐྱབས་དང་།
མཁས་པའི་ཡོན་དན་ཁྱད་འཕགས་ཀྱིས། བསྐྱབས་པའི་དཔལ་ནི་རྣམ་པར་
མཛེས།། 43

དུས་ཀྱི་དཔལ་དང་ལྡན་པ་དེ། བུ་སྐྱེས་ཀུན་དུ་དགའ་བར་གྱུར།
བདེ་ལའང་བདེ་བ་ཕུན་ཚོགས་པ། བསོད་ནམས་ལས་ཀྱི་མཚན་ཉིད་ཡིན།། 44

སྐྲ་ནི་སེར་སྐྱ་གཟི་བྱིན་ཅན། སེར་སྐྱ་ཞེས་བྱ་བྱིས་པ་དེ།
ཉེར་སྐྱེས་ཞིན་དུ་མཁས་པ་ནི། ཕ་ལས་མངོན་པར་ལྷག་པར་གྱུར།། 45

རིགས་བརྒྱད་ཆེན་པོ་དག་ལ་མཁས། མཁས་པ་ལ་ནི་འཁྲོར་པ་རྒྱས།
འཁྲོར་ལ་ཁྱད་འཕགས་དམ་པའི་བུ། ལེགས་བྱས་ཡལ་ག་ལྡན་པའི་འབྲས།། 46

ནམ་ཞིག་ནད་ཀྱི་སྦྱོར་བ་ཡིས། ལུས་ནི་འཇིག་ལ་ཉེ་བ་ན།
སྐྱེ་བོ་མེད་སར་བུ་བོས་ནས། བུ་ལ་མཉེས་ག་ཞིན་དེས་སྨྲས་པ།། 47

བདག་གིས་བཞོན་ལ་ཡོན་དན་བསྐྱབས། དང་ལ་ཐབས་ཚེ་ནོར་ཟས་བསྐྱབས།
བུ་གཅིག་འཇིག་རྟེན་ཕ་རོལ་གྱི། བདེ་བསྐྱབས་སླར་ཡང་བྱས་པ་མེད།། 48

མཚམས་ནི་ལེགས་པར་བགྲངས་པའི་དུས། བུ་ལོན་པ་བཞིན་འོངས་པའི་ཚེ།
ད་ནི་འཁྲུགས་དེ་བདག་གང་ན། རིག་དེ་གང་ན་ནོར་གང་ན།། 49

लब्धराजगजाश्वोऽथ चारुकेयूरकंकण: ।
उपाध्याय: स्वभवनं प्रविवेश सह श्रिया ॥ ४२ ॥

भुजैर्ज्जिता भूमिभुजां वणिजां सागरार्ज्जिता ।
विद्यावतां विराजन्ते गुणोत्कर्षार्ज्जिता: श्रिय: ॥ ४३ ॥

कालेन श्रीमत स्तस्य पुत्रजन्मोत्सवोऽभवत् ।
सुखेऽपि सुखसम्पत्ति र्लक्षणं पुण्यकर्म्मणाम् ॥ ४४ ॥

कपिलो नाम स शिशु स्तेज:पिङ्गशिरोरुह: ।
वर्द्धमानमति र्व्विद्वान् पितुरभ्यधिकोऽभवत् ॥ ४५ ॥

कुले महति वैदुष्यं वैदुष्ये विभवोद्भव: ।
विभवे सत्सुतोत्कर्ष: फलं सुकृतशाखिन: ॥ ४६ ॥

कदाचिद् व्याधिसंयोगात् प्रत्यासन्नतनुक्षय: ।
विजने पुत्र माहूय सोऽवदत् पुत्रवत्सल: ॥ ४७ ॥

बाल्ये गुणार्ज्जनं पुत्र तारुण्ये द्रविणार्ज्जनम् ।
मया कृतं न तु पुन: परलोकसुखार्ज्जनम् ॥ ४८ ॥

उत्तमर्ण इव प्राप्ते काले सुगणितावधौ ।
अधुना विवश: क्वाहं क्व सा विद्या क्व तद्धनम् ॥ ४९ ॥

ཡོན་དན་མེ་ཏོག་བདེ་འབྲས་ལྡན། ནོར་གྱི་རྩ་བཅིངས་སྐྱེ་བོ་ཡིས།
ནགས་སྒུ་དུས་མིན་རྡོ་རྗེ་བཞིན། བཟོད་དཀའི་དུས་ནི་ལྷུང་བར་འགྱུར།། 50

མཐའ་དག་རིག་དང་སྒྱུ་རྩལ་རྣམས་ཀྱིས་སྐྱེ་བ་འཕེན་བྱེད་ཅིང་།
སྐད་ཅིག་བདེ་བའི་རྒྱུར་ནི་ནོར་རྣམས་རབ་ཏུ་འཛིན་པར་བྱེད།
སྨོངས་པའི་སློབ་མ་མི་རྣམས་ཕྱུགས་དང་བྱ་ལ་དགའ་བར་བྱེད།
ལུས་འབྲལ་ཡུད་ཙམ་དག་ལ་ཐམས་ཅད་གཞན་དེ་དེ་ཡང་གཞན།། 51

མཛའ་བ་སྨོངས་པས་དབང་བྱས་བདག། ཁྱོད་ལ་ཕན་པས་འདི་བཟོད་དོ།
མཉེས་གཤིན་མང་དུ་ཐོས་པ་ལས། འཁོར་བའི་སྙིང་པོ་ཞི་ལམ་རིག་བྱ།། 52

དམ་པར་ཕྲུག་བྱ་རྩུབ་པོར་སྨྲ་མི་བྱ།
རབ་ཏུ་འབད་པས་གཞན་ལ་ཕན་པ་བྱ།
སྐྱེས་བུ་སྡིག་པའི་གཡང་སར་ལྷུང་རྣམས་ཀྱིས།
བསོད་ནམས་འདི་དག་རྣམས་ནི་བདེན་ས་ཡིན།། 53

འགྱུར་བ་དག་ལ་མ་ཆགས་མཛེས་པས་བརྒྱན།
སྣང་མེད་སྤྱོབས་དང་རང་བདེ་ལ་མ་སྨོངས།
རྩ་བ་གསུམ་པོ་འདི་ལ་དགེ་བའི་ཞིང་།
འབྲས་བུ་དམ་པའི་དཔལ་ལྡན་མ་ལུས་གནས།། 54

गुणपुष्पे सुखफले बद्धमूले घने जने ।
वने वज्र इवाकालकालः पतति दुःसहः ॥ ५० ॥

क्षपयति सकलाभि र्जन्म विद्याकलाभिः
क्षणिकसुखनिमित्तं सन्निधत्ते च वित्तम् ।
पशुशिशुषु मनुष्यः प्रीयते मोहशिष्यः
तनुविरहमुहूर्त्ते सर्व्वमन्यत् सचान्यः ॥ ५१ ॥

इदन्तु ते हितं वच्मि स्नेहमोहवशीकृतः ।
संसारसारशरणं वत्स वेत्सि बहुश्रुतः ॥ ५२ ॥

सन्तः प्रणम्याः परुषं न वाच्यं
कार्य्यः प्रयत्नेन परोपकारः ।
पापावपाते सततं हि पुंसा-
मेतानि पुण्यान्यवलम्बनानि ॥ ५३ ॥

अलोभशोभाभरणा विभूति-
रद्वेषसक्तिः स्वसुखेष्वमोहः ।
मूलत्रयेऽस्मिन् कुशलद्रुमस्य
वसत्यशेषाखिलसत्फलश्रीः ॥ ५४ ॥

ཛཱ་སྐྱིད་ས་ཡི་དཀྱིལ་འཁོར་དག། ཚ་ཟེར་གྱིས་གདུངས་དེ་སྐྱིད་པ།
འདི་ན་བྲ་ཁྲོད་མཚུངས་པ་ཡི། མཁས་པ་སླ་བ་པོ་ཡོད་མིན།། 55

ཁྲོད་ཀྱིས་ནམ་གྱིས་དུས་ན་ཡང་། དགེ་སློང་རྣམས་ལ་རྩོད་མི་བྱ།
སངས་རྒྱས་པ་ཡི་བློ་རབ་རྒྱས། ཡེ་ཤེས་ཟབ་ཅིང་རྟོགས་པར་དཀའ།། 56

དགེ་སློང་ལ་སློན་ཚིག་གི་དོན། བདག་གིས་དྲིས་ཚེ་བདག་ལ་བཤད།
མཁས་པ་ཁྲོད་ཀྱི་དྲི་བ་དག། བྲ་བ་མི་ཤེས་ཤེས་པའང་སླས།། 57

དེ་སྐད་དགེ་སློང་ལ་རྩོད་ན། ཁྲོད་མཁས་མཆོག་ཏུ་ཞུམ་པར་འགྱུར།
གང་ཕྱིར་སྤོབས་མཐུ་འདོད་པ་ཡིས། རི་ལ་སྤྲོ་བོས་བརྡུང་མི་བྱ།། 58

བྲ་ལ་དེས་སྨྲས་བྲམ་ཟེ་ནི། འཇིག་རྟེན་པ་རོལ་ས་ལ་སོང་།
ལུས་ཀྱི་ཁང་པར་ལུས་ཅན་གྱིས། འགྲོན་རྣམས་རིང་པོར་མི་གནས་སོ།། 59

དུས་ཀྱི་སྨྲ་མཁས་སེར་སྐྱ་ནི། མཁས་པ་མ་ལུས་ཉམས་བྱེད་པ།
ཡོན་ཏན་མང་པོས་རྒྱལ་པོ་ལས། ནོར་དང་མཆོད་ཆེན་རྒྱས་པ་ཐོབ།། 60

དེ་ནས་ནམ་ཞིག་སེར་སྐྱ་ནི། རྒོལ་བའི་རྒྱལ་སྲིད་ཐོབ་པ་ལ།
རབེན་པར་དཔལ་བྱུས་རང་གི་མ། ཀ་ཙ་ར་ཞེས་བྱ་བས་སྨྲས།། 61

རྒོལ་བའི་རིགས་པ་གཅོད་པའི་བུ། ཕྱོགས་དང་གླིང་ལས་རྒྱལ་བ་ཁྱེད།
དགེ་སློང་ངན་པ་རིགས་པ་ཡིས། ལོང་རྣམས་ཅི་སྐད་ཡོངས་སུ་གདོང་།། 62

यावत्तपति तीक्ष्णांशुरस्मिन् भुवनमण्डले ।
तावत्तत्सदृशः पुत्र विद्वान् वादी न विद्यते ॥ ५५ ॥

भिक्षुभिस्तु न कर्त्तव्य स्त्वया वादः कदाचन ।
गम्भीरज्ञानदुर्बोधप्रवृद्धा बौद्धबुद्धयः ॥ ५६ ॥

पुरा भिक्षु र्मया पृष्टः पदस्यार्थं जहास माम् ।
प्रश्नं कर्त्तुं न जानीषे विद्वानिति जगाद च ॥ ५७ ॥

तस्माद् भिक्षुविवाद स्ते परं पाण्डित्यपीड़नम् ।
बलप्रभावकामो हि गिरिं मूर्ध्ना न ताड़येत् ॥ ५८ ॥

इत्युक्त्वा तनयं विप्रः परलोकभुवं ययौ ।
कायावसथपान्थानां देहिनां न चिरस्थितिः ॥ ५९ ॥

वाग्मी कालेन कपिलः खण्डिताखिलपण्डितः ।
नृपाद् बहुगुणं प्राप धनमानमहोदयम् ॥ ६० ॥

ततः कदाचिदेकान्ते कपिलं काचराभिधा ।
संप्राप्तं वादिसाम्राज्यं जगाद जननी शनैः ॥ ६१ ॥

वादिदर्पच्छिदा पुत्र दिग्द्वीपजयिना त्वया ।
दुर्जनाः श्रमणाः कस्माद्दर्पान्धाः परिवर्ज्जिताः ॥ ६२ ॥

གཞན་ལས་ཁྱད་འཕགས་ལ་ཞེན་ཅིང་། མི་མཐུན་དག་ལ་བཟོད་དཀའ་བ།
འདྲིས་མི་བཟོད་ཅེས་སྐད་ཅིག་གིས། གསལ་བར་གྲགས་པ་ཉམས་པ་གྱུར།། 63

ཅེས་པ་མ་ཡིས་ཚིག་ཐོས་ནས། མཁས་པའི་མཆོག་དེས་རབ་སྨྲས་པ།
དགེ་སློང་རྣམས་ལ་རྩོད་མི་བྱ། ཞེས་དེ་བདག་གི་ཕ་ཡིས་བསྒྲོག།། 64

གང་གིས་ཡོན་ཏན་ལྡན་རྣམས་ཀྱིས། ཁ་ལ་མཆོད་པ་དམན་པར་བྱེད།
ཡི་གེ་འདྲེབས་བྱེད་སྨྲ་བ་པོ། བདག་ཅག་འཚོ་ཐབས་འདི་ཡང་ངན།། 65

ཆེན་པོ་རྣམས་ཀྱི་བདེ་གཞོམ་སྐད། རྟག་ཏུ་གང་ཞིག་རབ་བརྩོན་པ།
བླ་མ་ལ་སྨང་བཟོད་དཀའ་བའི། མཁས་པ་གཏུམ་པོ་འདི་དག་སྨད།། 66

གང་ཞིག་གཡོ་སྒྱུ་མེད་དེ་བློ། གང་ཞིག་ཆགས་པ་བཅོམ་དེ་དཔལ།
གང་ཞིག་དྲེགས་པ་མེད་དེ་རིག། གང་ཞིག་བཟོད་པ་ལྡན་དེ་སྟོབས།། 67

དེ་ལྟ་ཉིད་དུ་གཞན་རྣམས་དང་། སྨང་བས་རྩོད་པར་མི་བྱ་ན།
འགྲོ་བས་མཆོད་འོས་དགེ་སློང་ནི། གྲགས་པས་མཆོན་དང་སྨོས་ཅི་དགོས།། 68

ཚད་མས་ཡོངས་ངེས་དེ་དག་ལས། རྒྱལ་བར་ཡང་ནི་མི་ནུས་ཏེ།
གང་ཞིག་བདག་མེད་བསྟན་པ་རྣམས། མི་མཐུན་ཕྱོགས་ཀྱི་ཡོངས་མི་སྐྱོད།། 69

ཅེས་པ་བུ་ཡི་ཚིག་ཐོས་ནས། ཁྲོས་ཏེ་དེ་ཡིས་དེ་ལ་སྨྲས།
ཁྱོད་ཀྱི་ཕ་ནི་སྡིག་པ་ཅན། དགེ་སློང་འབང་གྱུར་མ་ཡིན་ནམ།། 70

परोत्कर्षाधिरूढस्य प्रतिपक्षे क्षमारतेः ।
अक्षमोऽयमिति व्यक्तं क्षणेन क्षीयते यशः ॥ ६३ ॥

इति मातुर्व्वचः श्रुत्वा सोऽवदद् विदुषां वचः ।
न वादः श्रमणैः कार्य्यः पित्राहमिति वारितः ॥ ६४ ॥

इयं दुर्जीविकास्माकं पक्षालम्बनवादिनाम् ।
क्रियते गुणमान्यानां मानम्लानि र्मुखे यया ॥ ६५ ॥

धिगेतत्खण्डपाण्डित्यं गुरुविद्वेषदुःसहम् ।
महतां सुखभङ्गाय सदा यस्मिन् समुद्यमः ॥ ६६ ॥

यस्यां न माया सा बुद्धिः सा श्री र्लोभं निहन्ति या ।
दर्प्पो न यस्य विद्या सा शक्ति र्या च क्षमावती ॥ ६७ ॥

एवमेव न कर्त्तव्यः परै र्व्विद्वेषविग्रहः ।
किं मात र्जगतां पूज्यै र्भिक्षुभिः ख्यातलक्ष्मभिः ॥ ६८ ॥

विजेतुं न च ते शक्याः प्रमाणपरिनिष्ठिताः ।
प्रतिपक्षै र्विक्षिप्तं येषां नैरात्म्यशासनम् ॥ ६९ ॥

इति पुत्रवचः श्रुत्वा कुपिता त मुवाच सा ।
अभूत्तव पिता नूनं पापश्रमणचेटकः ॥ ७० ॥

བྲམ་ཟེའི་རིགས་ནི་ཆེ་བར་སྐྱེས། མང་དུ་ཐོས་པས་ཤེས་རབ་ལྡན།
དགེ་སློང་ཕྱོགས་སུ་ལྷུང་གྱུར་པ། ཁྱོད་ཀྱང་དེ་དང་མཚུངས་པས་ཏེ།། 71

ཚད་མའི་རལ་གྲི་ཆེན་པོ་ཡིན། དགེ་སློང་རྣམས་ནི་ཚར་གཅད་མཛོད།
སྤྲིན་གྱི་ཚོགས་རྣམས་མ་བཅོམ་ནི། ཚ་ཟེར་བྱེད་པ་མི་མཛེས་སོ།། 72

ཞེས་པ་མ་ཡིས་ཚིག་གིས་བསྐུལ། དེ་ལ་གུས་པས་བསྙམས་དེས།
དགེ་སློང་རྣམས་ཀྱི་བཞི་གནས་སུ། དལ་བུས་འགྲོ་བར་ཡང་དག་བརྩམས།། 73

དེ་ནས་བགྲོད་པས་ཤེས་འདོད་ནས། ལམ་དུ་དགེ་སློང་འོང་བ་ལ།
གཞུང་གི་སྙིང་པོ་ཚད་མ་ཡང་། དུས་སུ་འོས་པ་ཡང་དག་དྲིས།། 74

དེས་དྲིས་དེ་ཡིས་རབ་སྨྲས་པ། སྒྲ་དོན་ངེས་པར་སྨྲས་གྱུར་པ།
ངེད་ཀྱི་ཚད་མ་འབུམ་ཕྲག་གསུམ། བསྟན་བཅོས་ཤྲུ་སྡེགས་དག་ལ་དགོན།། 75

མཚོ་ནི་གང་ལས་ལྡོག་འགྱུར་ཞིང་། ལམ་ནི་གང་ལས་ལྡོག་པར་འགྱུར།
གང་དུ་འཛིག་རྟེན་སྡུག་བསྔལ་དང་། བདེ་བ་ཡང་ནི་འགག་པར་འགྱུར།། 76

ཞེས་པ་བཅོམ་ལྡན་སྟོན་པ་ཡི། གསུང་གི་སྒྲ་དོན་ཟབ་མོ་དག།
ཐམས་ཅད་མཁྱེན་པ་ལ་བརྟེན་པས། ཇི་ལྟ་དེ་ལྟར་ཤེས་མ་ཡིན།། 77

དེ་དག་ཐོས་ནས་སེར་སྐྱ་ནི། ཚོགས་བཅད་ཟབ་མོས་ཡ་མཚན་ཏེ།
བཅོམ་ལྡན་འོད་སྲུངས་བདག་གིས་ནི། དཀའ་ཐུབ་ནགས་ཚལ་གཅིང་
མར་སོང་།། 78

महति ब्राह्मणकुले जातः प्राज्ञो बहुश्रुतः ।
भिक्षुपक्षे निपतितः कथं त्वमपि तादृशः ॥ ७१ ॥

पृथुप्रमाणखड्गेन कुरु श्रमणनिग्रहम् ।
अविदार्य्याभ्रसंघातं तीक्ष्णांशुर्न विराजते ॥ ७२ ॥

इति स प्रेरितो मातु र्गिरा तद्भक्तियन्त्रितः ।
भिक्षूणामाश्रमपदं शनैर्गन्तुं समुद्ययौ ॥ ७३ ॥

व्रजन् स संमुखायातं भिक्षुं जिज्ञासया पथि ।
ग्रन्थसारं प्रमाणञ्च पप्रच्छ समयोचितम् ॥ ७४ ॥

स तेन पृष्टः प्रोवाच गाढशब्दार्थनिर्णयम् ।
लक्षत्रयप्रमाणं नः शास्त्रं तीर्थिकदुर्लभम् ॥ ७५ ॥

कुतः पारेऽतिवर्त्तन्ते क्व च वर्त्मातिवर्त्तन्ते ।
सुखदुःखे च लोकस्य क्वचित्समभिबध्नतः ॥ ७६ ॥

इति गम्भीरशब्दार्थं शास्तु र्भगवतो वचः ।
अनुपासितसर्व्वज्ञै र्ज्ञायते न यथा तथा ॥ ७७ ॥

एतदाकर्ण्य कपिलः श्लोकगाम्भीर्य्यविस्मितः ।
ययौ भगवतः पुण्यं काश्यपस्य तपोवनम् ॥ ७८ ॥

དེར་ནི་དགེ་སློང་ཚོགས་མཐོང་ནས། དེ་ལ་མ་དད་རབ་སྡངས་ཏེ།
སྙིང་དང་བཞིན་རས་རབ་དང་ཞིང་། ཕྲག་དོག་བྲལ་བས་རབ་ཏུ་བསམས།། 79

གང་ཞིག་ཡང་དག་མཐོང་ཉིད་ན། ཡིད་ནི་དྲི་མ་མེད་ཐོབ་པ།
སྡང་བའི་རྟོག་པས་དེ་དག་ལ། གདུག་པ་བྱ་བར་སུ་ཡིས་འོས།། 80

དེ་ལྟར་དེ་ཡིས་ཡུན་རིང་བསམས། དེ་དང་རྩོད་ལས་ཕྱིར་ཕྱོགས་ཏེ།
ལམ་རིང་གིས་དུབ་རང་ཁྱིམ་དུ། ཕྱིན་ནས་མ་ལ་རབ་སྨྲས་པ།། 81

མ་མ་རྩོད་པའི་ལས་ལ་ང་། ཁྱོད་ཀྱིས་བསྐུལ་བ་རྫུན་ཉིད་དོ།
དོན་སྤྲས་གཞུང་སྨྲ་དགེ་སློང་ལས། འཇིག་རྟེན་དུ་ནི་རྒྱལ་མི་ནུས།། 82

ལམ་དུ་དགེ་སློང་གཅིག་གི་ནི། ཚིགས་བཅད་ཙམ་ཞིག་བདག་གིས་ཐོས།
དོན་མ་ཤེས་པས་སྐྱེངས་གྱུར་ཏེ། ཤིན་ཏུ་ཡུན་རིང་ས་ལ་བལྟས།། 83

དེ་ཡི་གཞུང་ལ་གོམས་མ་བྱས། སུ་ཡིས་དེ་ལ་སྨྲ་བར་སྤྲོབས།
དེ་དག་རབ་བྱུང་མིན་པ་ལ། རང་གི་བསྟན་བཅོས་འཆད་མི་བྱེད།། 84

ཅེས་པ་དེ་ཡིས་བརྗོད་ཐོས་ནས། མ་ཡིས་དེ་ལ་རབ་སྨྲས་པ།
ཁྱོད་ཀྱི་མངལ་གྱི་ཁུར་གྱིས་བདག། ངལ་དུབ་བསྐྱེད་པ་ཉིད་དུ་ཟད།། 85

འགྲན་ཟླ་ལ་ནི་ཁྲི་བས་སྟོང་། དམན་པས་ཀུན་ལ་རབ་ཏུ་འདུད།
གནོད་པ་བྱས་ལ་མི་སེམས་པའི། སྐྱེས་པ་དེ་ཡིས་ཅི་ཞིག་བྱེད།། 86

तथा भिक्षुगणं दृष्ट्वा प्रसन्नहृदयाननः ।
अचिन्तयत् तदश्रद्धां विहाय गतमत्सरः ॥ ७९ ॥

एतेषां द्वेषकालुष्यात् क्रौर्य्यं कः कर्त्तुमर्हति ।
येषां सन्दर्शनेनैव वैमल्यं लभते मनः ॥ ८० ॥

इति सञ्चिन्त्य स चिरं तद्विवादपराङ्मुखः ।
दूराध्वखिन्नः स्वगृहं गत्वा प्रोवाच मातरम् ॥ ८१ ॥

मिथ्यैवाहं त्वया मातः प्रेरितः कलिकर्म्मणि ।
अजयाः श्रमणा लोके गूढ़ार्थग्रन्थवादिनः ॥ ८२ ॥

श्लोकमात्रं मया श्रुत्वा भिक्षोरेकस्य वर्त्मनि ।
अज्ञातार्थेन वैलक्ष्यात् सुचिरं वीक्षिता क्षितिः ॥ ८३ ॥

तद्ग्रन्थेष्वकृताभ्यास स्तान् वक्तुं कः प्रगल्भते ।
कथयन्ति स्वशास्त्रं ते नहि प्रव्रजिताहृते ॥ ८४ ॥

इति तेनोदितं श्रुत्वा जननी त मभाषत ।
आयासिताहं भवता गर्भभारेण केवलम् ॥ ८५ ॥

संघर्षामर्षशून्येन दैन्यात् सर्व्वप्रणामिना ।
धर्षणानिर्व्विमर्षेण क्रियते पुरुषेण किम् ॥ ८६ ॥

རིན་ཆེན་མཐའ་དག་འཛིག་རྟེན་ན། རིན་ཆེན་གཟི་བརྗིད་ཉིད་ཀྱི་ཆེ།
གཟི་བརྗིད་འཚོ་བ་སྤངས་པ་ཡི། སྐྱེས་བུའི་སྒྲོག་གི་ཅི་ཞིག་དོན།། 87

དེ་གཞུང་ཐོབ་སྣང་རྫུན་གྱིས་ནི། རབ་ཏུ་བྱུང་བ་ཅེས་མི་བརྫུང་།
སྣ་བཅིང་མགོ་ལ་ཀུ་ཤ་དག། སྣར་ཡང་སྐྱེ་བར་འགྱུར་རམ་ཅི།། 88

ཞེས་པ་མ་ཡི་ཚིག་གིས་དེའི། ཡིད་ནི་རྟོག་པ་ཉིད་དུ་གྱུར།
འཁྲུལ་ལ་དུས་མིན་རླུང་ཚུབ་ཀྱིས། རྡུལ་གྱི་ནམ་མཁའ་འགེགས་པ་བཞིན།། 89

དེ་ནས་རབ་ཞི་ལ་ཆགས་པའི། ཟློག་ལྡན་དེ་ཡིས་དགེ་སློང་གི།
ནགས་སུ་ཕྱིན་ནས་རབ་བྱུང་བླངས། བདེ་བར་གཤེགས་པའི་བསྟན་བཅོས་ཐོབ།། 90

དུས་ཀྱི་ཡོན་ཏན་ལ་གྲུས་པས། སེང་གེའི་ཁྲི་ལ་ཡང་དག་འཛོམས།
མཁས་པ་ཆོས་ནི་སྨྲ་བ་པོ། དེ་ཡིས་ཆོས་ནི་བསྟན་པ་བྱས།། 91

མ་ཡིས་བསྐུལ་བར་གྱུར་བ་དེའི། བསྟན་པ་དེ་ལ་རིམ་པ་ཡིས།
དགེ་སློང་ཆོས་དང་འགལ་བའི་དོན། སྨྲ་བ་རྟ་ནི་ཡང་དག་བརྩམས།། 92

ཆོས་ལ་བསྟུན་པས་གདུངས་གྱུར་པའི། དགེ་སློང་རྣམས་ཀྱི་ཚིག་དང་ཚིག།
བཟློག་ཀྱང་དེ་ཡིས་དེ་དག་ལ། བཞིན་གྱི་རྣམ་འགྱུར་བྱས་ནས་སྨྲས།། 93

གནས་སྐབས་མིན་པ་མང་དུ་སྨྲ། རིགས་ལྡན་སྲུ་ཅེར་སོ་མཚུ་དག།
ཁྱེད་ཀྱིས་ཤེས་པ་མིན་པ་ལས། བདག་གིས་བཤད་པ་རྣམ་པར་འགོག།། 94

लोके सकलरत्नानां तेजसैव महार्घता ।
को ह्यर्थः पुरुषप्राणै स्तेजोजीवनवर्जितैः ॥ ८७ ॥

मिथ्या तद्ग्रन्थलाभाय प्रव्रज्या गृह्यते न किम् ।
मूर्द्धि कृत्तेषु जायन्ते किं केशेषु कुशः पुनः ॥ ८८ ॥

इति मातु र्गिरा तस्य मनः कलुषतां ययौ ।
सहसा कालवातालीरजोरुद्धमिवाम्बरम् ॥ ८९ ॥

ततः स कूटप्रशमप्रणयी भिक्षुकाननम् ।
गत्वा गृहीत्वा प्रव्रज्यां शास्त्रं सौगतमाप्तवान् ॥ ९० ॥

कालेन धर्म्मकथकः स विद्वान् गुणगौरवात् ।
सिंहासनं समारुह्य विदधे धर्म्मदेशनाम् ॥ ९१ ॥

जनन्या प्रेरित स्तस्यां देशनायां क्रमेण सः ।
भिक्षुधर्म्मविरुद्धार्थं वक्तुं समुपचक्रमे ॥ ९२ ॥

धर्म्मप्रहारव्यथितै र्भिक्षुभिः स पदे पदे ।
निवार्य्यमाण स्तानूचे कृत्वा विकृत माननम् ॥ ९३ ॥

अज्ञात्वा दर्प्पमुखरै रयथा बहुवादिभिः ।
भवद्भिः स्थूलदन्तोष्ठै र्व्याख्या मम विदूषिता ॥ ९४ ॥

ཁྱོད་རྣམས་བོང་བུ་སྤྲེའུ་ཛ་མོ་འི་བཞིན་ལྡན་སྟག་གི་ཁ་དང་བ་གླང་གདོང་།
ཁྱི་ལ་ཨེ་ན་ཕག་དང་ཁྱི་ཡི་བཞིན་ལྡན་མཆོག་ཏུ་ལྟ་བར་དཀའ་བའི་གདོང་།
སྨྲ་བ་བཅད་བསྟེན་ཡང་བཟོད་པ་མིན་ན་དྲག་པོ་འི་སྨྲ་ཆེན་སྒྲོག་པ་སྨོས་ཅི་དགོས།

ཞེས་པ་སྐྱིན་མ་འཁྲུག་ཅིང་ལན་གཅིག་མ་ཕན་དགེ་སློང་ཚོགས་ལ་དེ་ཡི་སྨྲས།། 95

དེ་ཡི་ཚིག་མདའ་རྣོན་པོ་ཡིས། རྣམ་པ་བཅད་བཞིན་དགེ་སློང་རྣམས།
ལན་གྱི་ཚིག་ནི་མི་བརྗོད་པ། དེ་བཏང་ནས་ནི་གཞན་དུ་སོང་།། 96

དེ་ནས་ངག་གི་སྡིག་པ་དེས། ཕྱི་ནས་འགྱོད་པས་གདུངས་གྱུར་ཏེ།
གཉིས་སྐྱེས་དེ་ཡིས་མ་ཉིད་བཏང་། རབ་ཏུ་བྱུང་བ་བཏང་མ་གྱུར།། 97

བདག་གི་བུ་ནི་དགེ་སློང་གིས། ཐོགས་ཞེས་ཚོ་ངེ་སྐྲ་དེ་ཡང་།
སྐྱོན་མར་གྱུར་ཅིང་ལུས་བཏང་ནས། དམྱལ་བ་དག་ཏུ་གནས་པ་ཐོབ།། 98

དེ་ནས་དུས་ཀྱིས་སྡིག་པ་དག། རང་གིས་བྱས་པའི་སེར་སྐྱ་ནི།
ལུས་ཀྱི་མཐུག་ཏུ་ཚིག་རྩུབ་ཀྱིས། ཆུ་སྲིན་འདི་ཉིད་དག་ཏུ་གྱུར།། 99

དགེ་སློང་སྐད་ལ་གང་སྨྲས་པ། དེ་དག་འདི་ཡི་གདོང་འདི་དག།
གང་ཕྱིར་ལས་ཀྱི་ས་བོན་ལས། འབྲས་བུ་མཚུངས་པའི་རང་བཞིན་སྐྱེ།། 100

ཞེས་གསུངས་དེར་ནི་བཅོམ་ལྡན་གྱིས། རྟག་པའི་ཆོས་ནི་བསྟན་མཛད་ནས།
ཐར་དང་བྱང་ཆུབ་སྒྲུབ་བྱེད་པའི། སྐྱེ་བོ་དག་ལ་རྗེས་བཟུང་མཛད།། 101

यूयं गर्द्दभमर्कटोष्ट्रवदना द्वीप्यास्यपश्वानना
मार्ज्जारैणवराहकुक्कुरमुखा दुर्दर्शवक्त्राः परम् ।
सद्धा मौनजुषोऽपि नैव विकटाटोपं रटन्तः किमु
भ्रूभंगैरिति भिक्षुसंघ मसकृन्निर्भर्त्सयन् सोऽभ्यधात् ॥ ९५ ॥

तस्य वाक्यशरै स्तीक्ष्णै र्विकृत्ता इव भिक्षवः ।
अनुक्त्वैव प्रतिवच स्त्यक्त्वा तं ययु रन्यतः ॥ ९६ ॥

तेन वाक्पातकेनाथ पश्चात्ताप मुपागतः ।
तत्याज जननीमेव प्रव्रज्यां न तु तां द्विजः ॥ ९७ ॥

श्रमणै र्मे हृतः पुत्र इति सा विप्रलापिनी ।
उन्मादिनी तनुं त्यक्त्वा प्रपेदे नरकस्थितिम् ॥ ९८ ॥

ततः कालेन कपिलः स्वयं कलितकिल्बिषः ।
देहान्ते वाक्यपारुष्यादिमां मकरतां गतः ॥ ९९ ॥

तान्येतानि मुखान्यस्य यान्यूचे भिक्षुभर्त्सने ।
फलं सदृशरूपं हि कर्म्मबीजात् प्रजायते ॥ १०० ॥

इत्युक्त्वा तत्र भगवान् धर्म्मं मादिश्य शाश्वतम् ।
जनस्यानुग्रहञ्चक्रे नानाबोधिविधायकम् ॥ १०१ ॥

དེ་ནས་རྒྱལ་བ་རང་གནས་སུ། གཤེགས་ཚེ་དེ་ཡི་རང་བཞིན་ཡིད།
ཆུ་སྲིན་ཁ་ཟམ་རབ་སྤངས་ནས། ལུས་བཏང་ལྷ་ཡི་གནས་སུ་སོང་།། 102

དེ་ནི་སྐད་ཅིག་བདེ་གཤེགས་ལ། སེམས་ནི་རབ་ཏུ་དང་བ་ལས།
རྒྱལ་ཆེན་བཞི་པའི་ལྷ་རྣམས་སུ། དཔལ་ལྡན་དྲི་མེད་མཛེས་པར་སྐྱེས།། 103

དེ་ནས་ཟླ་བ་ཉ་བའི་བཞིན། འཕྲེང་བ་དང་ལྡན་ན་རྒྱན་མཛེས།
ཀུན་དགའ་རྣམ་པ་དང་བཅས་བཞིན། དེ་ནི་བདེ་གཤེགས་བལྟ་རུ་འོངས།། 104

ལྷ་ཡི་མེ་ཏོག་རབ་ཏུ་གཏོར། ཅོད་པན་གྱིས་ནི་ས་ལ་རེག།
འོད་ཀྱིས་ཕྱོགས་ཀྱི་འཁོར་ལོ་བཀང་། དེ་ཡིས་དེ་ལ་གུས་ཕྱག་འཚལ།། 105

ཉེར་འཁོད་དེ་ལ་བཅོམ་ལྡན་གྱིས། ཆོས་ནི་རབ་ཏུ་བསྟན་པ་མཛད།
གང་གིས་བདེན་མཐོང་རྒྱུན་ཞུགས་ཀྱི། འབྲས་བུ་ཐོབ་ནས་དེ་སོང་གྱུར།། 106

དེ་ལྟར་བྱ་བ་དཀའ་ཡང་དེ་ནི་རྩྭ་བཞིན་སྡིག་པའི་འདམ་དག་ལས།
བདོན་ཅིང་སྐྱེ་བོ་འི་ཚོགས་པ་དེ་དག་ཀྱང་སྡེ་སྡུག་བསྔལ་བསྒྲུབས་པ་ཡིས།
གདུང་བར་ངེས་པར་ལྡུང་བ་རྣམས་ཀྱི་ཉོན་མོངས་རྩ་བ་མཚུངས་མེད་དག།
མ་ལུས་བསོད་ནམས་ངང་ཚུལ་རྣམས་ཀྱིས་བདེ་བླག་ཉིད་དུ་འཇོམས་པར་བྱེད།། 107

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སེར་སྐྱའི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སོ་སུམ་ཅུ་རྩ་དགུ་པའོ།

ततः प्रयाते स्वपदं जिने तन्मयमानसः ।
मकरः प्रोज्झिताहारस्त्यक्त्वा देहं दिवं ययौ ॥ १०२ ॥

चातुर्म्महाराजिकेषु देवेषु विशदद्युतिः ।
श्रीमान् स जातः सुगते श्रद्धां चित्तप्रसादनात् ॥ १०३ ॥

ततः पूर्णेन्दुवदनः स्रग्वी रुचिरकुण्डलः ।
स साकार इवानन्दः सुगतं द्रष्टुमाययौ ॥ १०४ ॥

प्रकीर्णदिव्यकुसुमः किरीटस्पृष्टभूतलः ।
प्रभापूरितदिक्चक्र स्तं भक्त्या प्रणनाम सः ॥ १०५

चक्रे तस्योपविष्टस्य भगवान् धर्म्मदेशनाम् ।
यया श्रोतःफलं प्राप्य सत्यदर्शी जगाम सः ॥ १०६ ॥

तृणमिव गुरुकायोऽप्युद्धृतः पापपङ्का-
दिति स जननिकायः सोऽपि दुःखाज्जिनेन ।
व्यसननिपतितानां लीलया पुण्यशीला
निखिलमतुलमूलं क्लेशमुन्मूलयन्ति ॥ १०७ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कपिलावदानं नाम एकोनचत्वारिंशः पल्लवः ॥ ० ॥

ཡུལ་འདུས་སྐྱེ་བཞི་བཅུ་པ།

ལུས་ཀྱི་སྣོད་སོན་དགེ་དང་མི་དགེ་བ།
མཉམ་པ་ཉིད་དུ་སྐྱེས་བུ་ཡོང་སྤྱོད་པ།
ལུས་ཅན་རྣམས་ཀྱི་རྣམ་མང་ལས་སྐྱེས་འབྲས།
གང་ཕྱིར་མ་སྤྱད་ཀུན་དུ་ཟད་མི་འགྱུར༎ 1

བཅོམ་ལྡན་བདེ་བར་གཤེགས་པ་སྟོན། གྲོང་ཁྱེར་རྒྱལ་པོ་འི་ཁབ་ཀྱི་ནི།
ཀ་ལནྡ་ཀའི་གནས་ཞེས་པའི། ནགས་ཀྱི་ནང་ན་རྣམ་པར་གནས༎ 2

གཟུགས་ཅན་སྙིང་པོ་ས་ཡི་བདག ། དེར་ནི་དཔལ་གྱི་རྣམ་པར་གྲགས།
རིན་ཆེན་ཀུན་གྱི་འབྱུང་གནས་གྱུར། རིན་ཅེན་*འབྱུང་གནས་གཞན་པ་བཞིན༎ 3

དུས་དེར་གྲོང་ཁྱེར་སྣ་ཚོགས་ཞེས། བྲ་བར་མི་བདག་དཔལ་དང་ལྡན།
གྲགས་པ་ཟླ་བའི་ཆུ་གཏེར་ཆེ། ཨུ་དྲ་ཡ་ན་ཞེས་པ་བྱུང་༎ 4

དེ་ཡི་བཙུན་མོ་ཟླ་བའི་འོད། ཅེས་པ་ཟླ་བའི་བཞིན་རས་ཅན།
སྲས་ནི་དྲག་པོའི་ཙལ་དང་ལྡན། རྒྱལ་ཚབ་གཙུག་ཕུད་ཅན་ཞེས་གྱུར༎ 5

ཧེ་རུ་ཀ་དང་བྷི་རུ་ཀ ། ཞེས་པ་དེ་ཡི་བློན་པོ་གཉིས།
འདུལ་བ་དཀར་པོ་ཕྱུར་བུ་དག ། བསྒྲང་བར་བྱ་བ་ཟིན་པར་གྱུར༎ 6

---

* for ཆེན །

चत्वारिंशः पल्लवः ।

तुल्यमेव पुरुषेण भुज्यते
कायभाजनगतं शुभाशुभम् ।
देहिनां विविधकर्म्मजं फलं
न ह्यभुक्तमुपयाति संक्षयम् ॥ १ ॥

भगवान् सुगतः पूर्व्वं पुरे राजगृहाभिधे ।
कलन्दकनिवासाख्ये विजहार वनान्तरे ॥ २ ॥

विम्बिसारः क्षितिपतिस्तत्राभूद् विश्रुतः श्रिया ।
आकरः सर्व्वरत्नानां रत्नाकर इवापरः ॥ ३ ॥

बभूव समये तस्मिन् रौरुकाख्ये पुरे नृपः ।
श्रीमानुद्रायणो नाम यशश्चन्द्रमहोदधिः ॥ ४ ॥

तस्य चन्द्रप्रभा नाम पत्नी चन्द्राननाभवत् ।
शिखण्डी युवराजश्च स्तनुर्व्विक्रमकर्क्कशः ॥ ५ ॥

हिरुको भिरुकश्चेति तस्यामात्यौ बभूवतुः ।
गणनीयौ न विनये ययोः शुक्रबृहस्पती ॥ ६ ॥

ས་བདག་ལྷ་ཡི་འོད་ཟེར་ཅན། ད་གཉིས་སྙིང་ཡིག་ཉིས་མཛའ་གྱུར།
རང་དུ་གནས་ཀྱང་ཉི་མ་དང་། པདྨ་ཡི་ནི་འབྱུང་གནས་བཞིན།། 7

དེ་གཉིས་མང་དུ་ལོ་ཉ་ཡིས། སྡོན་མེད་རིན་ཆེན་ཚོགས་དག་དང་།
གྲོགས་ཉིད་མཆོག་དུ་ཡོངས་རྫོགས་པས། མཛའ་བའི་གཉེར་ནི་ཐོབ་པར་གྱུར།། 8

དམ་པའི་མཛའ་བ་རིང་གནས་ཀྱང་། མཆོག་དུ་མི་ཟད་གྲགས་འབར་བཞིན།
མི་བསྲུན་མཛའ་བ་ཉེར་གནས་ཀྱང་། བདེན་པ་མ་ཡིན་རྫུ་འབར་བཞིན།། 9

ནམ་ཞིག་གཟུགས་ཅན་སྙིང་པོ་ལ། མཆོག་གི་གོ་ཆ་གསེར་འོད་འབར།
ལྷ་ཡི་རིན་ཆེན་གྱི་མཚན་པ། མི་བདག་ཀླུ་དྲི་ཡ་ནས་སྤྲིངས།། 10

དུག་མཚོན་མི་རྣམས་བསྲུང་ཞེས་པ། རྣམ་བཀྲ་རིན་ཆེན་གོ་ཆ་ནི།
གྲོགས་ཀྱིས་སྤྲིངས་པ་ལེགས་བླངས་ནས། རྒྱལ་པོས་བློན་པ་རྣམས་ལ་སྨྲས།། 11

ས་བདག་དེ་ཡིས་ལུགས་བཟང་བཞིན། ལྷག་པར་མཛའ་བ་གོ་བྱེད་ཅིང་།
ཐམས་ཅད་བསྲུན་པར་བཟོད་པ་ཡི། གོ་ཆ་འདི་ནི་བདག་ལ་སྤྲིངས།། 12

འདི་ལ་ལན་དུ་སྤྲིན་ཞེས་པ། དེ་ལས་ལྷག་ངེས་མ་མཐོང་།
ཕན་དང་གནོད་པ་དག་ལ་ཡང་། ལན་ནི་ཆུང་བ་ཟླུག་ཏུ་ཡིན།། 13

འདི་ལས་ལྷག་པ་ཆུང་ཟད་ཅིག། བསྐུར་འོད་ཁྱེད་རྣམས་ཐམས་ཅད་ཀྱིས།
བསམ་པར་མཛོད་ཅེས་བརྗོད་ནས་ནི། མི་བདག་བསམ་པ་འཁྲུགས་པར་གྱུར།། 14

जाता भूमिभुजः प्रीतिर्लेखैर्लेखत्विषस्तयोः ।
रवेर्दूरस्थितस्यापि कमलाकरयोरिव ॥ ७ ॥

अपूर्व्वरत्ननिचयप्रेषणैर्बहुशस्तयोः ।
परिपूर्णं परं प्राप सख्यं प्रेम विधानतः ॥ ८ ॥

दूरस्थापि परं प्रीतिः सतां कीर्त्तिरिवाक्षया ।
संसक्तापि खलप्रीतिस्तृणज्वालेव न स्थिरा ॥ ९ ॥

कदाचिद्दिव्यरत्नाङ्कं कवचं काञ्चनोज्ज्वलम् ।
प्राहिणोद् विम्बिसाराय सारमुद्रायणो नृपः ॥ १० ॥

विषशस्त्राग्निरक्षार्हं विचित्ररत्नकं च तत् ।
सुहृत्प्रेषितमादाय प्रोवाच सचिवान् नृपः ॥ ११ ॥

इदं मे प्रहितं तेन सौजन्यमिव भूभुजा ।
सर्व्वरक्षाक्षमं वर्म्म गाढप्रेमनिवेदकम् ॥ १२ ॥

न पश्याम्यस्य सदृशं प्रतिदेयं तथाधिकम् ।
अल्पप्रतिक्रिया शल्यमुपकारापकारयोः ॥ १३ ॥

उचितं चिन्त्यतां किञ्चित् प्रेषणीयमतोऽधिकम् ।
सर्व्वैर्भवद्भिरित्युक्त्वा नृपश्चिन्ताकुलोऽभवत् ॥ १४ ॥

དེ་ནས་བློ་ལྡན་བློན་པོ་ཆེ། དབྱར་གྱི་རྣམ་པ་ཞེས་བྲམ་ཟེ།
རིག་ཀུན་ལེགས་པར་ཕ་རོལ་ཕྱིན། ཡུན་རིང་བསམས་ནས་དེ་ལ་སྨྲས།། 15

འདི་ལས་ཡོན་ཏན་མང་བའི་སྐྱེས། རྒྱལ་པོ་གཅིག་ཀྱང་ཡོད་མ་ཡིན།
གལ་ཏེ་ནུས་ན་འབད་པ་ཡིས། དེ་ནི་རབ་ཏུ་སྨིན་པར་མཛོད།། 16

གང་ཞིག་བཅོམ་ལྡན་སངས་རྒྱས་འདི། ཁྱོད་ཀྱི་ཡུལ་ན་ཉེ་བར་གནས།
ལྷ་རྣམས་དག་གི་གསུས་གནས་ཀྱི། བྲང་ཀ་དེ་ཡི་གཟུགས་ཀྱི་མཚན།། 17

མ་ལུས་འཇིག་རྟེན་དག་པ་ཡི། མི་རྟོག་གསར་བའི་དཔག་བསམ་ཤིང་།
རི་མོ་རྨི་ལམ་ཀུན་རྟོག་ལའང་། དེ་ནི་བསོད་ནམས་ཆེ་བས་མཐོང་།། 18

ཞེས་པ་བློན་པོའི་ཚིག་ཐོས་ནས། དེ་བཞིན་ཞེས་བརྗོད་ས་ཡི་བདག།
སོང་ནས་བཅོམ་ལྡན་ལ་བཏུད་དེ། དོན་དེ་ཉིད་ནི་རབ་ཏུ་གསོལ།། 19

དེ་ནས་དེ་ཡིས་རྗེས་གནང་སྟེ། རི་མ་མཁན་པོ་མཆོག་རྣམས་ལ།
བཅོམ་ལྡན་སྐུ་གཟུགས་བྲི་བའི་ལས། མི་ཡི་བདག་པོས་ལྷུར་བར་བསྐོས།། 20

རྒྱལ་བའི་སྐུ་ནི་ལྟ་བྱེད་པ། དེ་དག་གཟུགས་ཀྱི་དབང་བྱས་ནས།
སྤོབས་དང་ལྡན་ཡང་ཚད་དག་ནི། རབ་ཏུ་གཟུང་བར་ནུས་མ་གྱུར།། 21

དེ་ནས་བཅོམ་ལྡན་སྐུ་གཟུགས་ནི། དྲི་མེད་རས་ལ་འབྲིས་པ་དག།
གཟུགས་བཟང་བསྒོམ་པ་མཐོང་ཤེས་དེས། དལ་བུས་ཡང་དག་རྫོགས་པར་བྱས།། 22

अथ धीमान् महामात्यश्चिरं ध्यात्वा तमब्रवीत् ।
वर्षाकाराभिधो विप्रः सर्व्वविद्यासु पारगः ॥ १५ ॥

अतो बहुगुणं राजन्नेकमेवास्त्युपायनम् ।
तस्य संप्रेषणे यत्नः क्रियतां यदि शक्यते ॥ १६ ॥

य एष भगवान् बुद्धः स्थितस्त्वद्विषयान्तिके ।
देवानामादरस्थानं पटस्तत्प्रतिमान्वितः ॥ १७ ॥

अशेषलोककल्याणकलिकाकल्पपादपः ।
चित्ते स्वप्नेऽथ संकल्पे पृथुपुण्यैः स दृश्यते ॥ १८ ॥

इति मन्त्रिवचः श्रुत्वा तथेत्युक्त्वा महीपतिः ।
गत्वा भगवते नम्रस्तमेवार्थं न्यवेदयत् ॥ १९ ॥

अनुज्ञातस्ततस्तेन नृपश्चित्रकरान् वरान् ।
आदिदेशाशु भगवत्प्रतिमोल्लेखकर्म्मणि ॥ २० ॥

जिनस्यालोकयन्तस्ते मूर्त्तिं रूपवशीकृताः ।
ययुः प्रमाणग्रहणे प्रगल्भा अप्यशक्तताम् ॥ २१ ॥

संक्रान्तां निर्म्मलपटे छायां भगवतस्ततः ।
सुवर्णभावनाभिख्यान्ते शनैः समपूरयन् ॥ २२ ॥

འགྲོ་བའི་མིག་གི་བསོད་ནམས་རྣམས། གཟུགས་ཅན་ཡང་དག་བསགས་པ་
བཞིན།

སངས་རྒྱས་སྐུ་གཟུགས་ཐང་ཀ་དེ། དེ་ནས་ས་གཞི་སྐྱོང་བས་སྤྲིངས།། 23

གཟུགས་ཅན་སྙིང་པོའི་ལག་རྟགས་ཅན། སྤྲིང་ཡིག་ཐང་ཀའི་སྤྲིན་ཕྱུང་བ།
མི་བདག་ཨུ་དྲ་ཡ་ན་ནི། རབ་ཏུ་དགའ་བས་རང་གི་བཀླགས།། 24

བདེ་བར་གཤེགས་པའི་ཞབས་པད་བཀོད་པའི་བསོད་ནམས་ཉེ་བསྒྱུར་བ།
སྐབས་གསུམ་གྲོང་གི་ཁྱད་པར་རྒྱ་ཆེ་མ་ག་དྷ་ཡུལ་ནས།
དགེ་བ་བྱས་པའི་གཟུགས་ཅན་ས་ཡི་བདག་པོ་གཟུགས་ཅན་སྙིང་།
ཆོས་ཀྱི་གཉེན་གྱིས་ས་གཞི་ཐིག་ལེ་ཁྱོད་ལ་རབ་སྨྲས་པ།། 25

རི་བོང་མཚན་མའི་འོད་ལྡན་བཅོམ་ལྡན་སྐུ་གཟུགས་ཆགས་སྡང་དུག་
ནི་ཉམས་པར་བྱེད།

སྲིད་པ་ཡང་དག་ཞི་བྱེད་སྲིད་པའི་རྨོངས་ཆེན་ནད་ཀྱི་སྨན་དང་ཕན་པ་དང་།
རབ་དང་མངར་བའི་བསོད་ནམས་བཅུད་ལེན་ཁྱོད་ཀྱི་མིག་གི་སྣོད་དུ་
རབ་བླུགས་པ།

འདི་ནི་ཁྱོད་ལ་རབ་སྤྲིངས་སྐལ་ལྡན་མགྲིན་པའི་བར་དུ་འདོད་པས་འཐུང་།། 26

དམ་པའི་ལམ་ལ་རྣམ་པར་སྦྱོར་ཞིང་ཡོན་ཏན་ཚོགས་རྣམས་འཛིན་པ་རྟག་ཏུ་སྒྲིབ།
བྲོ་བ་ངན་ལས་རྣམ་པར་ཟློག་ཅིང་བརྟེན་པའི་བདེ་བ་འཐོབ་ལ་མཆོག་ཏུ་བསྐུལ།།
རྒྱུན་ཆད་མེད་པ་ཉིད་དུ་བདག་ཉིད་ཀུན་གྱི་རྫོལ་མེད་ཕན་པ་སྐྱེད་བྱེད་པ།
དམ་པའི་དགེ་བའི་གྲོགས་ཀྱི་ཡིད་འོང་ཕན་པ་འདི་ལས་མཆོག་ན་ཅི་ཞིག་བྱ།། 27

प्राहिणोदथ भूपालस्तं बुद्धप्रतिमापटम् ।
जगन्नयनपुण्यानां मूर्त्तानामिव सञ्चयम् ॥ २३ ॥

विम्बिसारस्य हस्ताङ्कलेखामुद्रायणोन्नृपः ।
पटस्य पुरतः प्राप्तां हृष्टः स्वयमवाचयत् ॥ २४ ॥

सुगतचरणपद्मन्यासपुण्योपकण्ठात्
त्रिदशपुरविशेषान्मागधोदारदेशात् ।
कुशलकलितमूर्त्तिर्भूपतिर्विम्बिसारः
क्षितितलतिलकं त्वां धर्म्मबन्धुर्ब्रवीति ॥ २५ ॥

एतत्ते प्रहितं हितं भवमहामोहामये भेषजम्
रागद्वेषविषापहं भगवतोविम्बं शशाङ्कत्विषः ।
तृष्णापच्छमनं प्रसन्नमधुरं त्वन्नेत्रपात्रार्पितं
धन्यः पुण्यरसायनं पिब हठादाकण्ठमुत्कण्ठितः ॥ २६ ॥

सन्मार्गे विनियोजनं गुणगणाधाने सदाध्यापनम्
दुर्व्यापारनिवारणं स्थिरसुखप्राप्तौ परिप्रेरणम् ।
निर्व्याजोपकृतौ निरन्तरतया सर्व्वात्मना वर्त्तनम्
कर्त्तव्यं किमतः परं प्रियहितं कल्याणमित्रैः सताम् ॥ २७ ॥

ཞེས་པའི་སྙིང་ཡིག་གྲོགས་མཛེར་བའི། བདུད་རྩི་ལ་ཞོས་དོན་སྐྱུང་ནས།
ཡང་པོ་ལ་གནས་ཐང་སྐྱ་ཡི། སྨོན་དུ་རྒྱལ་པོ་རབ་ཏུ་སོང་།། 28

གྲོན་བཅས་མ་ཏུན་ན་འདོན་བཅས་ཏེ། མངོན་པར་དགའ་ནས་ཀུན་དགའ་ལས།
གསེར་གྱི་སེང་གེའི་ཁྲི་སྟེང་དུ། དེ་ཉིད་རབ་ཏུ་བཀུར་ནས་བཀོད།། 29

མཛེས་སྡུག་བསོད་ནམས་དག་གི་གནས། བདེ་གཤེགས་སྐུ་དེ་མཐོང་གྱུར་ནས།
སྐྱེ་བོས་སངས་རྒྱས་རབ་རྒྱས་ལ། ཕྱག་འཚལ་ཕྱག་འཚལ་ཞེས་པ་སྨྲས།། 30

སངས་རྒྱས་མངོན་བརྗོད་ཐོས་ཉིད་ན། སྤུ་ལོང་གིས་བརྒྱན་དབྱིབས་གྱུར་ཅིང་།
ལྷ་ཡི་མེ་ཏོག་ཆར་ཕབ་ཆེ། ས་ཡི་བདག་པོ་ཡ་མཚན་གྱུར།། 31

དེར་ནི་བཅོམ་ལྡན་སྤྱོད་པ་ཡི། བདུད་རྩིའི་བསོད་ནམས་ཐོབ་ནས་ནི།
ཆུ་འཛིན་སྒྲ་ཡིས་མགྲིན་སྟོན་དང་། རབ་འདོད་ལྡན་པ་མཚུངས་པར་གྱུར།། 32

ཅིན་འཕྲིལ་ཡན་ལག་བཅུ་གཉིས་ན། རྗེས་མཐུན་ལྡོག་པ་དང་བཅས་པ།
ཐང་ཀའི་འོག་དུ་མཐོང་གྱུར་ནས། དེ་ཡིས་རྟོགས་པ་རྣམ་པར་གྲོལ།། 33

དེ་ནས་ས་བདག་རྒྱུན་ཞུགས་ཀྱི། འབྲས་ཐོབ་བདེན་པ་མཐོང་བ་ཡིས།
གྲོགས་ལ་དགེ་སློང་རྫོངས་ཞེས་པའི། འཕྲིན་གྱི་ལན་ནི་རབ་ཏུ་སྤྲིངས།། 34

དེ་ན་པ་གཟུགས་ཅན་སྙིང་པོ་ཡིས། བཅོམ་ལྡན་འདས་ལ་གསོལ་བྱས་ནས།
ཀ་ཏྱཱ་ཡ་ན་དགེ་སློང་མ། རི་མ་ཞེས་པའང་དེ་ལ་སྤྲིངས།། 35

इति लेखार्थमास्वाद्य सुहृत्प्रेमाङ्कतोचितम् ।
राजा गजाधिरूढस्य पटस्य प्रययौ पुरः ॥ २८ ॥

अभिनन्द्य तमानन्दात् सामात्यः सपुरोहितः ।
हेमसिंहासनोत्सङ्गे स प्रसार्य्य न्यवेशयत् ॥ २९ ॥

लावण्यपुण्यनिलयं दृष्ट्वा तत् सौगतं वपुः ।
नमोनमः प्रबुद्धायेत्यवदज्जगतीजनः ॥ ३० ॥

बुद्धाभिधानं श्रुत्वैव पुलकालङ्कृताकृतिः ।
पुष्पवर्षैं सुरैर्मुक्ते विस्मितोऽभून्महीपतिः ॥ ३१ ॥

पुण्यं भगवतः श्रुत्वा स तच्च चरितामृतम् ।
पयोदानादसोत्कण्ठनीलकण्ठतुलां ययौ ॥ ३२ ॥

द्वादशाङ्गं पटस्याधः सानुलोमविपर्य्ययम् ।
प्रतीत्यसमुत्पादं च दृष्ट्वा मोहं मुमोच सः ॥ ३३ ॥

स्रोतःप्राप्तिफलेनैवं हृष्टसत्योऽथ भूपतिः ।
दिदेश प्रतिसंदेशं सख्युर्भिक्षुविसर्जनैः ॥ ३४ ॥

बिम्बिसारस्ततस्तस्मै ज्ञात्वा भगवतोऽर्थनाम् ।
कात्यायनञ्च व्यसृजत् शैलाख्याञ्चापि भिक्षुणीम् ॥ ३५ ॥

དེ་ནས་མཆོད་པ་སྤྲུལ་བྱེད་པ། མི་བདག་ཨུ་དྲ་ཡ་ན་ལ།
འཕགས་པ་ཀཱ་ཏྱཱ་ཡ་ན་དེས། དེར་ནི་ཆོས་རྣམས་བསྟན་པ་མཛད། ། 36

དེ་ཡི་ཆོས་ནི་བསྟན་པ་ཡིས། སྐྱེ་བོ་རབ་མང་འདུས་པ་རྣམས།
རྒྱུན་དང་ལན་གཅིག་ཕྱིར་མི་འོང་། དགྲ་བཅོམ་འབྲས་བུའི་གནས་ཐོབ་གྱུར། ། 37

གྲོང་ཁྱེར་དེར་ནི་རྒྱལ་དང་ནི། སྐར་རྒྱལ་ཞེས་གྲགས་ཁྱིམ་བདག་གཉིས།
ཞི་སླད་དེ་མདུན་རབ་བྱུང་ནས། ཡོངས་སུ་མྱ་ངན་འདས་པ་ཐོབ། ། 38

དུས་ཀྱི་དེ་ཡི་གཉེན་རྣམས་ཀྱིས། ལུས་ཀྱི་མཇུག་ཏུ་མཆོད་རྟེན་བརྒྱབས།
དེ་མིང་གིས་མཚན་ད་ལྟ་ཡང་། མཆོད་རྟེན་ཕྱག་བྱེད་ཕྱག་འཚལ་བྱེད། ། 39

བཙུན་མོའི་འཁོར་དུ་དགེ་སློང་མ། ཤི་མ་ཞེས་ནི་བྱ་བས་ཀྱང་།
ཤིམ་གྱི་ལྷ་མོ་ཟླ་འོད་ལ། རྟག་ཏུ་ཆོས་ནི་བསྟན་པ་མཛད། ། 40

དེ་ནས་ནམ་ཞིག་ས་སྐྱོང་གི། རྩེ་དགའི་ཁང་པར་སོང་གྱུར་བ།
མཚན་མ་ཤེས་པས་དེ་ཡིས་ནི། འཆི་བ་ཞག་བདུན་མཚམས་སུ་རིག ། 41

དེ་ནས་འཁོར་བའི་སྤྱོད་ཚུལ་ཤེས། ནོར་འཛིན་བདག་པོས་དེ་ལ་ནི།
སྨོན་ལ་རབ་ཏུ་བྱུང་བ་ཡིས། དགེ་བའི་གནས་ཐོབ་རྫས་སུ་གནང་། ། 42

ལེགས་པར་གསུངས་པའི་ཆོས་འདུལ་ལ། མི་བདག་ཚིག་གིས་དགེ་སློང་མ།
ལྷ་མོ་རབ་ཏུ་བྱུང་བའི་ལུས། ཉི་མ་བདུན་པ་ཉིད་ལ་བཏང་། ། 43

उद्रायणस्य नृपतेरार्य्यः कात्यायनोऽथ सः ।
पूजाविधायिनस्तत्र विदधे धर्म्मदेशनाम् ॥ ३६ ॥

धर्म्मदेशनया तस्य सङ्गतः सुमहान् जनः ।
स्रोतःसकृदनागामिफलार्हत्पदमाप्तवान् ॥ ३७ ॥

तस्मिन् गृहपती ख्यातौ तिष्यपुष्याभिधौ पुरे ।
शान्त्यै प्रव्रज्य तस्याग्रे परिनिर्वृतिमापतुः ॥ ३८ ॥

कालेन विहितौ स्तूपौ देहान्ते ज्ञातिभिस्तयोः ।
तन्नामचिह्नावद्यापि वन्दन्ते चैत्यवन्दकाः ॥ ३९ ॥

देव्याश्चन्द्रप्रभायाश्च शैलाख्या सापि भिक्षुणी ।
क्रमेणान्तःपुरे चक्रे सततं धर्म्मदेशनाम् ॥ ४० ॥

कदाचिदथ भूपालः क्रीडागारगतां प्रियाम् ।
तामज्ञासीन्निमित्तज्ञः सप्ताहावधिजीविताम् ॥ ४१ ॥

ज्ञातसंसारचरितस्तत स्तां वसुधाधिपः ।
अनुजज्ञे शुभपदं प्राप्तुं प्रव्रज्यया पुरः ॥ ४२ ॥

स्वाख्याते धर्म्मविनये भिक्षुक्या नृपतेर्गिरा ।
देवी प्रव्रजिता देहं दिने तत्याज सप्तमे ॥ ४३ ॥

རྒྱལ་ཆེན་བཞི་པའི་ལྷ་རྣམས་སུ། ལྷ་ཡི་བུ་མོ་ཉིད་དུ་ནི།
འཕྲུལ་ཉིད་རབ་ཏུ་གྱུར་པ་དེ། རྒྱལ་བ་ཡི་ནི་ནགས་སུ་སོང་།། 44

དེར་ནི་ཟླ་ཉའི་བཞིན་རས་ཅན། ལྷ་ཡི་རྒྱན་གྱིས་བརྒྱན་པ་དེས།
ཤཱཀྱ་ཐུབ་པ་མཐོང་གྱུར་ནས། དགའ་བས་དེ་ཡི་ཞབས་ལ་གཏུགས།། 45

ལྷ་ཡི་མེ་ཏོག་རབ་འཐོར་ལ། དེ་ལ་དེ་བཞིན་གཤེགས་པ་ཡིས།
གང་གིས་བདེན་པ་མཐོང་བྱེད་པའི། ཆོས་ནི་བསྟན་མཛད་དེ་སོང་གྱུར།། 46

དེ་ཡིས་མཁའ་ལ་ཟླ་བ་ཡི། གཟུགས་བཞིན་བདག་པོའི་གྲོང་ཁྱེར་ཕྱིན།
མཚན་མོ་ཉལ་བ་བསླངས་ནས་ནི། བྱང་ཆུབ་རབ་ཏུ་གསལ་བར་བྱས།། 47

དེ་ནི་ཕོ་རངས་རང་གནས་སུ། སོང་བའི་ཚོ་ན་ནོར་འཛིན་བདག།
རབ་བྱུང་མངོན་པར་ཕྱོགས་པས་ནུ། གཙུག་ཕུད་ཅན་ནི་དབང་བསྐུར་ཏེ།། 48

དེ་ནས་བློན་པོ་དག་ལས་དེ། སྐྱེ་རྒུ་བསྐྱབ་པའི་ཕྱིར་གཏད་ནས།
དེ་ནི་མི་བདག་གཟུགས་ཅན་སྙིང་། གྲོགས་པོའི་གྲོང་ཁྱེར་དུ་སོང་།། 49

གདུགས་དང་རྔ་ཡབ་དང་བྲལ་བ། དེ་འངས་གཟུགས་ཅན་སྙིང་པོ་ཡིས།
རབ་བཏུད་མི་བདག་ཉེར་སྤྲད་ནི། མཛེས་ཤིང་གཙང་མ་རྣམས་ཀྱིས་མཆོད།། 50

ངལ་བསོས་ཁྲི་ལ་འཁོད་དེ་ལ། དེ་དང་ཕྲད་པས་རབ་དགའ་ཞིང་།
དཔལ་དང་བྲལ་བས་སྨུག་བསྔལ་བའི། ཡ་མཚན་ལྡད་པ་དེ་ཡིས་སྨྲས།། 51

चतुर्महाराजिकेषु देवेषु सहसैव सा ।
प्रयाता देवकन्यात्वं जगाम जिनकाननम् ॥ ४४ ॥

तत्र पूर्णेन्दुवदना दिव्याभरणभूषिता ।
दृष्ट्वा शाक्यमुनिं हृष्टा सा पपातास्य पादयोः ॥ ४५ ॥

प्रकीर्णदिव्यपुष्पायास्तस्याश्चक्रे तथागतः ।
धर्मोपपादनं येन दृष्टसत्या जगाम सा ॥ ४६ ॥

सा गत्वा नगरं पत्युर्व्योम्ना मूर्त्तिरिवैन्दवी ।
विबोध्य निशि सुप्तस्य चक्रे बोधिप्रकाशनम् ॥ ४७ ॥

यातायां स्वपदं तस्यां प्रभाते वसुधाधिपः ।
प्रव्रज्याभिमुखः पुत्रमभिषिच्य शिखण्डिनम् ॥ ४८ ॥

प्रजात्राणाय निक्षिप्य तं महामात्ययोस्ततः ।
नृपतेर्विम्बिसारस्य सुहृदः स ययौ पुरम् ॥ ४९ ॥

विम्बिसारस्तमायातं विगतच्छत्रचामरम् ।
नृपोपचारैः प्रणतः प्रीतिपूतै रपूजयत् ॥ ५० ॥

विश्रान्तमासनासीनं स तमूचे सविस्मयः ।
हृष्टः संदर्शनेनास्य श्रीवियोगेन दुःखितः ॥ ५१ ॥

མཐའ་ཡས་ཀུན་གྱི་མགོ་བོ་ལ། རྒྱལ་པོ་འདི་བཀའ་ནི་ངལ་གསོ་བ།
བརྒྱ་བྱིན་དག་དང་མཚངས་པ་ཁྱོད། འདི་བཞིན་ཉེ་བར་ཇི་ལྟར་གྱུར། ། 52

རང་བཞིན་བཞིན་རས་མ་བྲལ་ཞིང་། བློ་ལྡན་དོན་ནི་སྨྲས་པ་ཅན།
དཔའ་བོ་ཁྱོད་ཀྱི་རྒྱལ་སྲིད་ནི། གཞན་གྱིས་ཐོགས་པ་སྲིད་པ་ན་ཡིན། ། 53

ཞེས་པ་གྲོགས་ཀྱིས་དྲིས་པ་ཡིས། འཛུམ་བཅས་དེ་ལ་རབ་སྨྲས་པ།
རྒྱལ་པོ་འཁོར་བ་ཐམས་ཅད་དུ། འགྲོ་ཞིང་རྒྱན་ལ་བདག་གི་དགའ། ། 54

ཡུལ་ཉམས་སྐྱོང་ལས་ཕྱིར་ཕྱོགས་སུ། སྲིད་དང་བྲལ་བས་བདག་རང་གིས།
དབང་ཕྱུག་ལོངས་སྤྱོད་སྟོད་དག་ནི། ལྷག་མ་བཞིན་དུ་ཡང་དག་བཏང་། ། 55

དགེ་བའི་གྲོགས་པོ་ཁྱོད་ཀྱིས་ནི། བདེ་གཤེགས་སྐུ་གཟུགས་ཐང་ཀ་གང་།
ཕན་སྣོད་རབ་ཏུ་སྤྲིངས་པ་དེ། བདག་གི་ཆགས་བྲལ་བླ་མར་གྱུར། ། 56

ད་ནི་ཁྱོད་ཀྱི་བཀའ་དྲིན་གྱིས། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་ཕྱིན་ནས།
ཁྱིམ་ནས་ཁྱིམ་ནི་མེད་ཉིད་དུ། རབ་བྱུང་འཁོབ་པར་བདག་འཚལ་ལོ། ། 57

ཞེས་པ་གྲོགས་ཀྱི་ཚིག་ཐོས་ནས། དེ་དེ་བཞིན་ཞེས་ནུ་བསམས་ནས་དེ།
དེ་ཡི་དབེན་པ་ལ་གསུམ་ལྡན། གཟུགས་ཅན་སྙིང་པོས་དེ་ལ་སྨྲས། ། 58

ས་ཡི་བདག་པོ་ཁྱོད་ཀྱི་བློ། དམ་པ་མང་པས་བཀུར་བ་ཡང་།
འཁོར་བ་ལས་ནི་ཕྱིར་ཕྱོགས་པ། སྐལ་ལྡན་འདི་འདྲ་ཅི་ལྟར་སྐྱེས། ། 59

राजन्ननन्तसामन्तमौलिविश्रान्तशासनः ।
पाकशासनतुल्यस्त्वं कथमेवमुपागतः ॥ ५२ ॥

अभिन्नवक्त्रप्रकृतेर्गुप्तमन्त्रस्य धीमतः ।
परेण राज्यहरणं वीर संभाव्यते न ते ॥ ५३ ॥

इति पृष्टः स सुहृदा सस्मितस्तमभाषत ।
राजन् हृद्वविभूतिर्मे न प्रिया सर्व्वंगामिनी ॥ ५४ ॥

विषयास्वादवैमुख्याद् वितृष्णेन मया स्वयम् ।
उत्सृष्टमिव संत्यक्तमैश्वर्य्यं भोगभाजनम् ॥ ५५ ॥

त्वया कल्याणमित्रेण सुगतप्रतिमापटः ।
योऽसौ हिताय प्रहितः स वैराग्यगुरुर्म्मम ॥ ५६ ॥

अधुना त्वत्प्रसादेन गत्वा भगवतोऽन्तिके ।
इच्छाम्यवाप्तुं प्रव्रज्यामगारादनगारिकः ॥ ५७ ॥

इति सख्युर्व्वचः श्रुत्वा तत्तथेति विचिन्त्य च ।
सादरस्तद्विवेकेन विम्बिसारस्तमब्रवीत् ॥ ५८ ॥

धन्यो बहुमतश्चासि सतां त्वं पृथिवीपते ।
कथं संसारविमुखी जाता ते मतिरीदृशी ॥ ५९ ॥

ཚོག་ཤིས་འཁྲོར་བ་ཐོབ་གྱུར་པས། སྐལ་པ་བཟང་པོ་མཆོག་ཏུ་མཛེས།
ཡིད་ནི་ཆགས་བྲལ་གྱིས་བརྒྱན་པ། སེམས་ཅན་དག་པའི་མཚན་ཉིད་ཡིན། 60

དམ་པ་རྣམས་ནི་འཁོར་བ་ཉེ་བར་ཞི་སླད་ཉོན་མོངས་ཆེན་སྦྲུ་གྲུ་ཉམས་བྱེད་པ།
སྐྱེ་བ་གཞན་ལ་ཉེར་བསྒྲུབས་ཆགས་བྲལ་གནས་ནི་གལ་ཏེ་ཡིད་ལ་བྱེད་པ་ན།
རྒྱལ་སྲིད་ཆེན་པོ་གཟི་ཆེན་རྡུལ་བཅས་ཀྱིས་ནི་བསྒྲུབ་དཀའ་སྒྲུབ་བྱེད་རྣམས་ཀྱི་ཅི།
ལོངས་སྤྱོད་སྐད་ཅིག་སྤྱོད་རྣམས་ཀྱི་ཅི་སྡིག་སྡེར་སྡུག་ལྡན་བདེ་བ་རྣམས་ཀྱི་ཅི། 61

གང་གིས་ནོར་མཆོག་སྤྲོག་ལས་ཐངས་པའི་ནོར་ལྡན་མ་ནི་བདེ་བླག་ཉིད་དུ་གཏོང་།
གང་ཞིག་འཇིག་རྟེན་གསུམ་པོ་འདོད་ཀྱང་འདོད་པའི་བདེ་ལ་ཕྱིར་ཕྱོགས་འདོམས་པའི་ལྷ།
གང་གིས་ཀུན་ཉོན་མོངས་སྡུག་བསྔལ་གྱི་གཟིར་འགྲོ་བ་འདི་ནི་རྗེས་སུ་བརྩེ་བའི་གནས།
བསོད་ནམས་དག་གི་བློ་ལྡན་རྣམས་ཀྱི་ཞི་ཅི་ཡང་འཁོར་བའི་གཡོན་དེར་འགྱུར། 62

ཞེས་བརྗོད་གཟུགས་ཅན་སྙིང་པོ་དེས། འོད་མའི་ཚལ་གྱི་གནས་ཁྲིད་ནས།
རབ་ཏུ་བདུད་བྲུས་བཅོམ་ལྡན་ལ། དེ་ཡིས་བྱུང་བའི་མཐའ་རྣམས་གསོལ། 63

བདེ་གཤེགས་རྣམ་པ་མཐོང་གྱུར་ནས། དགའ་བས་ཡུན་རིང་བསམས་བྱས་ཏེ།
བདག་ཉིད་བྱ་བ་བྱས་པར་གྱུར། ཨུ་དྲ་ཡ་ན་ཡིས་ཀྱང་བསམས། 64

सन्तोषविभवो भोगसुभगः शोभसे परम् ।
लक्षणं शुद्धसत्वानां वैराग्याभरणं मनः ॥ ६० ॥

किं साम्राज्यमहौजसा सरजसा दुःसाधनैः साधनैः
किं भोगैः क्षणभोजनैः कलुषदैः किं सत्वदुःखैः सुखैः ।
संसारोपरमाय चेतसि सतां जन्मान्तरोपार्जितं
वैराग्यं कुरुते पदं यदि महामोहप्ररोहापहम् ॥ ६१ ॥

येन प्राणमनःप्रिया वसुमती संत्यज्यते लीलया
त्रैलोक्याभिमतेऽपि यः स्मरसुखे वैमुख्यदीक्षागुरुः ।
संमोहव्यसनातुरं जगदिदं येनानुकम्पास्पदं
पुण्यैः कोऽपि स जायते मतिमतां संसारवामः शमः ॥ ६२ ॥

इत्युक्त्वा बिम्बिसारस्तं नीत्वा वेणुवनाश्रमम् ।
सप्रणामं भगवते तद्वृत्तान्तं न्यवेदयत् ॥ ६३ ॥

उद्रायणोऽपि सुगताकारं सुचिरचिन्तितम् ।
विलोक्य हर्षादात्मानं कृतकृत्यममन्यत ॥ ६४ ॥

མགོ་བོས་ཕྱག་འཚལ་གྱིས་བྲིལ་བ། དེ་ཡི་ལུས་ལ་བཅོམ་ལྡན་གྱིས།
གཟིགས་པ་འཁོར་བ་གཅོད་བྱེད་ན། རབ་བྱུང་ཉིད་དང་ལྡན་ཅིག་བབས། 65

དེ་ནས་དགེ་སློང་དངོས་པོ་ཐོབ། ལག་ན་ཆོས་གོས་ལྷུ་བཟེད་ལྡན།
གྲོང་ཁྱེར་དུ་ནི་བསོད་སྙོམས་བསླངས། སྐྱེ་བོ་ཡ་མཚན་ལྡན་པར་གྱུར། 66

གཙུག་ཕུད་ཅན་གྱི་རབ་དང་བྲལ། ཆོས་ཀྱི་སྐྱེ་རྒྱུ་བསྐྱངས་བྱས་ནས།
དུས་ཀྱི་ཆོས་མིན་མཐོང་འདོད་ཅིང་། རྟོག་པ་དག་དང་ལྡན་པར་གྱུར། 67

གསེར་འོད་གསལ་བའི་གློག་དག་ནི། རྣམ་པར་རོལ་པའི་སྤྲིན་འཕྲེང་བཞིན།
ཕུན་སུམ་ཚོགས་པས་སུ་ཡི་ཡིད། དྲི་མ་ཅན་དུ་བྱེད་མ་ཡིན། 68

ཧེ་ཏུ་ཀ་དང་ཧྲི་ཏུ་ཀ། བློན་ཆེན་དག་གིས་ཆོས་མིན་གྱི།
ལས་ལ་དགའ་ཞིང་དབང་མ་གྱུར། ཁྲོ་ལྡན་ཇོ་བོ་དེ་བཏང་གྱུར། 69

དེ་ནས་གནས་སུ་རྒྱལ་པོ་ཡིས། དབྱུག་པ་ཁྲོ་བ་བློན་པོར་བཅུག
སེམས་ཀྱི་རྗེས་འཇུག་མཁས་པ་ཡིས། དམན་པར་ཆགས་པ་དེ་ལ་སྨྲས། 70

སྐྱེ་རྒྱུ་རྣམས་ལ་མཛའ་བས་ཡང་དག་ཆགས། རྒྱལ་པོ་གཞུང་ངན་དག་དུ་སྨྲ་བར་བྱེད།
གཡོན་ཅན་བློན་པོ་རྣམས་ཀྱི་རང་ཉིད་ཀྱི། གྲགས་པ་རབ་ཏུ་སྒྲོགས་པར་བྱེད་པ་ཡིན། 71

प्रणामव्यग्रशिरसा संसारच्छेदिनि तनौ ।
पपात भगवद्दृष्टिस्तस्य प्रव्रज्यया सह ॥ ६५ ॥

भिक्षुभावमथासाद्य पात्रपाणिः स चीवरी ।
नगरे पिण्डपातार्थी चकार जनविस्मयम् ॥ ६६ ॥

प्रजाः शिखण्डी धर्म्मेण पालयित्वा प्रसन्नधीः ।
यातः कालेन कालुष्यमधर्म्माभिरतोऽभवत् ॥ ६७ ॥

कलुषं काञ्चनरुचिव्यक्तविद्युद्विलासिनी ।
न कस्य कुरुते लक्ष्मीर्मेघमालेव मानसम् ॥ ६८ ॥

अनायत्तं महामात्यौ हिरुकोभिरुकश्च तम् ।
अधर्म्मकर्म्मनिरतं क्रुद्धौ तत्यजतुः प्रभुम् ॥ ६९ ॥

तत्पदे विहितौ राज्ञा सचिवौ दण्डमुद्गरौ ।
चित्तानुवृत्तिकुशलौ स्वैरं सक्तं तमूचतुः ॥ ७० ॥

प्रजारञ्जनसंसक्ता राजदौर्जन्यवादिनः ।
स्वयशःख्यापनायैव जायन्ते धूर्त्तमन्त्रिणः ॥ ७१ ॥

གང་གི་ཛྙེ་པོའི་དོན་དུ་ནི། ཆོས་ལ་མི་རྟེ་བདེ་ལ་མིན།
དོན་མིན་གྲགས་མིན་འཚོ་བ་མིན། དེ་དག་མཆོག་དུ་གྲུས་པའི་གཡོག ། 72

ངེས་པར་དིལ་མཚུངས་སྐྱེ་རྒྱུ་རྣམས། རྒྱལ་པོའི་དོར་བྲེད་མ་བཅག་པས།
མ་ཡིན་མ་ཉམས་པས་ཀྱང་མིན། མ་གདུངས་པས་མིན་མ་གཟེར་མིན། ། 73

ཞེས་སྨྲས་དེ་དག་རྒྱལ་སྲིད་ཀྱི། བསམ་པ་ལ་ནི་རྒྱལ་པོས་བསྒོས།
ཆགས་ལས་སྤྱོད་ཚུལ་ཅན་པ་ཡིས། སྐྱབས་མེད་སྐྱེ་རྒྱུ་གཉིས་པར་ཞུགས། ། 74

ས་ཡི་བདག་པོ་བློ་གྲོས་ཅན། རྣམ་པར་མི་སྤྱོད་སྤྲོད་ཚུལ་ཅན།
སྣ་ཆེན་བདེན་པ་ཉམས་པའི་ཚེ། སྐྱེ་རྒྱུ་རྣམས་ནི་ག་ལ་འཚོ། ། 75

དེ་ནས་ནམ་ཞིག་ཡུན་རིང་ན། ལམ་དུ་ཨུ་དྲ་ཡ་ན་ཡིས།
རང་ཡུལ་ནས་འོངས་ཚོང་པ་ལ། མི་བདག་ཡུལ་འཁོར་གཏམ་དག་དྲིས། ། 76

དེ་ཡིས་སྨྲས་པ་ལྷ་ཁྱོད་ཀྱི། སྲས་པོ་ས་ཡི་བདག་པོ་དགེ།
འོན་ཀྱང་དམ་པའི་བློན་དང་བྲལ། བློན་པོ་ངན་པའི་དབང་དུ་སོང་། ། 77

དེར་ནི་ཛྙེ་བོའི་བཀའ་ཡིས་སྐྱེ་རྒྱུ་རྣམས།
ཉེ་བར་གདུང་བ་རབ་རྒྱས་ཅི་ཡང་གྱུར།
གང་གིས་དཔལ་དེ་ནི་ཡུལ་ངན་སྐྱེས།
གྲོང་པའི་འཇིག་རྟེན་ཉིན་དང་མཚན་མོར་གདུང་། ། 78

न धर्म्मं न सुखं नार्थं न कीर्त्तिं न च जीवितम् ।
गणयन्ति प्रभोरर्थे ते भृत्या भव्यभक्तयः ॥ ७२ ॥

नाखण्डिता नाक्षयिता नातप्ता नाप्यपीड़िताः ।
कुर्व्वन्त्यर्थक्रिया राज्ञस्तिलतुल्याः किल प्रजाः ॥ ७३ ॥

इति ब्रुवाणौ तौ राज्ञा नियुक्तौ राज्यचिन्तने ।
लोभात् प्रवृत्तौ दुर्नीतौ हन्तुं निःशरणाः प्रजाः ॥ ७४ ॥

निर्विचारे दुराचारे कुमतौ पृथिवीपतौ ।
लुप्तसत्ये महामात्ये प्रजानां जीवितं कुतः ॥ ७५ ॥

उद्रायणोऽथाचिरेण कदाचिद् वणिजं पथि ।
निजदेशागतं वार्त्तां पप्रच्छ नृपराष्ट्रयोः ॥ ७६ ॥

सोऽवदद्देव कुशली सुतस्तव महीपतिः ।
किन्तु सन्मन्त्रिरहितः कुमन्त्रिवशमागतः ॥ ७७ ॥

तत्र प्रजानां विततोपतापः
कोऽपि प्रवृत्तः प्रभुशासनेन ।
येनाद्य तत्कुत्सितदेशजन्म
दिवानिशं शोचति पौरलोकः ॥ ७८ ॥

གང་ན་ཉི་མས་མུན་པ་སྒྲོ་བྱེད་གང་ན་ཟླ་བ་མེ་ཆར་འབབས།
གང་ན་བདུད་རྩི་ལས་ནི་རབ་དྲག་ནག་པོ་བརྩེགས་པ་རབ་གསལ་སྐྱེ།
གང་ན་སྐྱོབ་བྱེད་མི་ཡི་བདག་པོས་སྐྱེ་རྒྱུ་རྣམས་ཀྱི་སྲོག་འཚོ་འཕྲོག།
ཉེར་འཚེ་ཆེ་བ་རབ་ཀྲུས་དེ་ན་ཚེ་ངོ་དགག་ནི་སུ་ཞིག་ཅན།། 79

མི་བདག་གིས་གདུངས་སྐྱོ་ལ་གཅགས། ཚོང་པའི་ཚིག་ནི་བཟོད་དཀའ་བ།
གདུང་བའི་རང་བཞིན་དེ་ཐོས་ནས། བརྩེ་བའི་གཉེར་རིས་དེ་ལ་སྨྲས།། 80

བདག་གི་ཚིག་གི་འདི་ནས་ཁྲིད། སོང་ལ་སྐྱེ་རྒྱུ་དཔུགས་དབྱུང་མཛོད།
ང་ཉིད་འོངས་ནས་གཙུག་ཕུད་ཅན། ཆོས་ལ་རབ་ཏུ་དགོད་པར་བྱ།། 81

ཞེས་པ་དེ་བརྗོད་ཀུན་དགའ་ལྡན། ཚོང་པ་རིམ་གྱིས་རང་ཡུལ་དུ།
སོང་ནས་སྔོན་དུ་སྐྱེ་རྒྱུ་རྣམས། དལ་བུས་དབུགས་ནི་དབྱུང་བ་བསྐྱབས།། 82

གདམས་དེ་རབ་ཏུ་གྲགས་པའི་ཚེ། བློན་པོ་དགྲུག་པ་ཁྲོ་བ་དག།
འདས་པའི་ས་སྐྱོང་འདོད་པ་ཡིས། སྐག་སྟེ་མི་ཡི་བདག་ལ་སྨྲས།། 83

ལེགས་པ་རྣམས་ཀྱིས་སྨད་པའི་གདམས། རྒྱལ་པོ་ཆེན་པོ་རབ་བྱུང་བ།
རྒྱལ་སྲིད་འབབ་པས་དོན་གཉེར་ལྡན། ཞེས་པ་ལྷ་གཅིག་ཀུན་དུ་ཐོས།། 84

བརྟུལ་ཞུགས་དྲག་པོས་ཡོངས་སུ་དུབ། གྲུས་པས་ལོངས་སྤྱོད་ལ་མངོན་ཕྱོགས།
རབ་བྱུང་ངོ་ཚ་ཐབས་ཅིག་ཏུ། བདང་ནས་དེ་སྐྱར་འོང་བར་འགྱུར།། 85

यत्र ध्वान्तं सृजति तरणिर्यत्र चन्द्रोऽग्निवर्षी
यत्रोदेति प्रकटममृतादुत्कटः कालकूटः ।
यत्र त्राता हरति नृपतिर्जीववृत्तिं प्रजानां
तत्राक्रन्दं प्रसृतविपुलोपप्लवं कः शृणोति ॥ ७९ ॥

इत्यासक्तान्तपायासखिन्नस्यार्त्तिमयं वचः ।
दुःसहं वणिजः श्रुत्वा स तमूचे कृपानिधिः ॥ ८० ॥

मद्गिरा त्वमितो गत्वा तूर्णमाश्वासय प्रजाः ।
स्थापयिष्याम्यहं धर्म्मे स्वयमेत्य शिखण्डिनम् ॥ ८१ ॥

इत्युक्तस्तेन सानन्दः स्वदेशं शनकैर्वणिक् ।
गत्वा प्रजानां विदधे स्वैरमाश्वासनं पुरः ॥ ८२ ॥

प्रवादे प्रसृते तस्मिन्नमात्यौ दण्डमुद्गरौ ।
अतीतभूपागमनत्रस्तौ भूपतिमूचतुः ॥ ८३ ॥

सर्व्वत्र श्रूयते देव प्रवादः साधुनिन्दितः ।
वृद्धः प्रव्रजितो राजा राज्यार्थी यत्नवानिति ॥ ८४ ॥

तीव्रव्रतपरिक्लिष्टः सम्भोगाभिमुखादरः ।
लज्जां प्रव्रज्यया सार्द्धं त्यक्त्वा स पुनरेष्यति ॥ ८५ ॥

རྒྱལ་པོ་ཆགས་བྲལ་མ་སྨིན་པས། འཕྲལ་བ་ཉིད་དུ་གང་བཏང་བ།
དེ་རྣམས་སྣང་ཡང་དེ་དག་ལ། སྨོན་ལམ་ལྷག་པར་དགའ་བར་འགྱུར།། 86

འཇིག་རྟེན་ལུགས་དང་འགལ་བ་ཡིས། ཡུལ་རྣམས་ལ་ནི་ཁྲིད་པར་དུ།
སྤྱོག་ཆགས་ཡང་དག་འདོད་གྱུར་ཏེ། གནོད་པའི་ཟས་ལ་ནད་ཅན་བཞིན།། 87

བདེ་བ་རབ་རྒྱས་ལས་ཡོངས་བཏང་། གཞན་གྱི་ལག་ཏུ་ཉེ་བར་སོང་།
སྨན་པོ་དག་གི་ཨ་མྲ་བཞིན། ཐལ་ཆེར་ཐམས་ཅད་དགའ་བར་འགྱུར།། 88

— — — — — — — — |

གནས་བརྟན་རི་བོང་ཅན་ཉམས་བཞིན། དེ་ནི་རྒྱལ་སྲིད་སྤྱོད་པར་འདོད།། 89

ལུས་ནི་ཆོས་གོས་ཀྱིས་སྒྲིབ་ཅིང་། གོས་མཆོག་མངོན་པར་འདོད་ལྡན་འདི།
མགོ་ལྷུམ་ལ་ནི་རིན་ཅན་གྱིས། མཚན་པའི་ཐོད་པན་འདོད་པར་གྱུར།། 90

རིན་ཅན་ཁང་པར་གསར་པ་ཡི། ལོངས་སྤྱོད་འཁྱེར་པས་རྣམ་བརྒྱན་པའི།
རྩེ་དགའ་གདང་ནས་ནགས་ཀྱི་གནས། ངལ་དུབ་ལྡན་པ་སུ་ཡིས་བཟོད།། 91

རི་དགས་མིག་པས་རྩུབ་ཅིང་ཚོར་བ་བལྟམས་པའི་ཐང་ཁ་ལ།
གང་ཞིག་འཛམ་པའི་མལ་སྟན་བདེར་འཁོས་དེ་དག་ཇི་ལྟར་ཉལ།
གང་གིས་ཀླུ་ཟེར་ལྟར་བསིལ་ཆང་འཐུངས་དེ་དག་ནགས་སྐྱེས་ཀྱི།
སླང་པོའི་ཚང་གིས་དྲི་ཞིང་ཁ་བའི་ཆུ་ནི་ཇི་ལྟར་འཐུང་།། 92

राजन्नपक्ववैराग्यास्त्यजन्ति सहसैव यत् ।
तत् पुर्व्वाभ्यधिकं तेषां प्रयाति प्रियतां पुनः ॥ ८६ ॥

लोकस्थितिविरुद्धेषु विषयेषु विशेषतः ।
स्पृहा संजायते जन्तोरपथ्येष्विव रोगिणः ॥ ८७ ॥

सुखोत्सेकात् परित्यक्तं परहस्तमुपागतम् ।
प्रायः सर्व्वं भवत्येव जड़स्यान्नमिव प्रियम् ॥ ८८ ॥

तस्माद् भवन्तमुत्साय्यं प्रतापनिधिमासनात् ।
क्षीणः शशीव स्थविरः स राज्यं भोक्तुमिच्छति ॥ ८९ ॥

चीवरोद्विग्नगात्रस्य वरवस्त्राभिलाषिणः ।
जातास्य मुण्डिते मूर्ध्नि रत्नाङ्कमुकुटस्पृहा ॥ ९० ॥

रत्नहर्म्येषु नवतासम्भोगविभवोद्भवम् ।
त्यक्त्वा विलास मायासं वनवासं सहेत कः ॥ ९१ ॥

मृदुशयनसुखार्हा ये कथं शेरते ते
हरिणखरखुरोद्यत्कण्टकासु स्थलीषु ।
मधु विधुकरशीतं यैर्न्निपीतं कथन्ते
वनजगजमदोष्णं तिक्तमम्भः पिबन्ति ॥ ९२ ॥

ཁྱོད་ལ་མི་བཟང་བགྱིད་པ་ན། ད་ལྟ་ཉིད་ཉེ་བར་གནས།
ལུགས་ཤེས་རྣམས་ཀྱི་དང་པོའི་གྲོས། རྒྱལ་སྲས་ངེས་པར་ལྟུང་བྱེད་པའོ།། 93

དེ་སྐད་རྒྱལ་པོ་མ་འོངས་པའི། སྔོན་དུ་ཇོ་བོ་ཁྱོད་ཀྱིས་གསོད།
ཕྱེ་མ་ལེབ་ནི་འབབ་པ་དག། གལ་ཏེ་མ་བསྒྲིགས་མར་མེ་འཛེམས།། 94

ཞེས་པ་དེ་དག་ཚིག་གིས་ནི། ས་བདག་སྨུར་དུ་འཁྲུགས་པར་གྱུར།
མི་བསྲུན་སྙིང་གྱིས་སྨྲ་ཡི་ཡིད། དྲི་མ་ལྡན་པར་བྱེད་མི་འགྱུར།། 95

དོགས་བཅས་སོག་ལེ་བཞིན་དུ་ནི། རྩུབ་མོར་གྱུར་དེ་དེས་དེར་སྨྲས།
བདག་དང་ཁྱོད་གཉིས་མཉམ་དུ་ནི། གནོད་པ་འདི་ནི་ཐུན་མོང་ཉིད།། 96

ཁྱོད་གཉིས་ཉིད་ཀྱིས་ཁྱད་པར་གིས། ཚུལ་དང་ཐབས་ལ་གནས་པའི་བློས།
བྱ་བའི་དེ་ཉིད་རྣམ་དཔྱོད་ལ། གང་རིགས་དེ་ནི་སྒྲུབ་པར་མཛོད།། 97

ཅེས་དེ་རྒྱལ་པོས་སྨྲ་བར་བྱས། དེ་དག་གིས་མགྱོགས་སོད་བྱེད་བདང་།
གསང་ཕྱིར་ཨུ་དྲ་ཡ་ན་ཡི། མདུན་གྱི་ལམ་ནི་རབ་དུ་བསླམས།། 98

དེས་ཀྱང་སྐྱེ་རྒུ་ཡོངས་བསྐྱབ་སྐད། བྲུ་ལ་བསྒོ་བར་བརྩོན་པ་ཡིས།
བཅོམ་ལྡན་འདས་ལ་མངོན་ཕྱོགས་ཏེ། བདག་འགྲོ་ལོ་ཞེས་པར་བྱས།། 99

རང་གིས་བྱས་པ་སྤྱོད་མཛོད་ཅེས། ཐམས་ཅད་མཁྱེན་པས་རྗེས་གནང་ནས།
ལས་ཀྱི་ཞགས་པས་ཡང་དག་བྲངས། དེ་ནི་སྒྲ་སྒྲོག་གྲོང་ཁྱེར་སོང་།། 100

अधुनैव तवासन्नप्रवेशविषमस्थितेः ।
आद्यमुक्तं न्यायविदां राजपुत्र निपातनम् ॥ ९३ ॥

तस्मादनागतो राजा पूर्व्वं वध्यस्तव प्रभो ।
दीपं हन्ति पतङ्गो हि न दग्धश्चेत् समापतन् ॥ ९४ ॥

तयोरिति गिरा क्षिप्रमभूद् भूपतिराकुलः ।
खलमेघैः कलुषतां नीतं कस्य न मानसम् ॥ ९५ ॥

स तौ बभाषे साशङ्कः क्रकचक्रूरतां गतः ।
बाधः साधारणश्चायं युवयोर्मम चाग्रतः ॥ ९६ ॥

भवद्भ्यामेव विनयोपायविश्रान्तया धिया ।
विचार्य्य कार्य्यतात्पर्य्यं यद्युक्तं तद्विधीयताम् ॥ ९७ ॥

इति राज्ञा कृतोत्साहौ तौ विसृज्याशु घातकान् ।
उद्रायणस्याग्रपथं वधायैव बबन्धतुः ॥ ९८ ॥

सोऽपि प्रज्ञापरित्राणे नियोक्तुं पुत्रमुद्यतः ।
भगवन्तं समभ्येत्य व्रजामीति व्यजिज्ञपत् ॥ ९९ ॥

सर्व्वज्ञेनाभ्यनुज्ञातः स्वकृतं भुज्यतामिति ।
कर्म्मपाशसमाकृष्टः स ययौ रोरुकं पुरम् ॥ १०० ॥

ལམ་དུ་ཟྲོལ་མེད་འོང་བ་དེ། བློན་པོ་གདུག་པས་བསྐོལ་བ་ཡིས།
ག་ཞིད་མ་དེ་དག་རྣམས་ཀྱིས་བསད། སྐྱེ་བོ་ངན་པས་ཀུན་སྤྱོད་བཞིན།། 101

བསད་པ་དེ་ཡི་ཆོས་གོས་དང་། ལྷུང་བཟེད་སོགས་བཟུང་དེ་དག་གིས།
བློན་པོ་དག་ལ་མགུ་བའི་སྐད། རྒྱལ་པོ་འི་ཞུ་བ་བྱས་པས་སྨྲས།། 102

སྡིག་པས་རབ་དགའ་དེ་དག་གིས། མི་ཡི་བདག་ལ་རབ་ཏུ་བསྟན།
ཕ་ཡི་ཆོས་གོས་ཁྲག་གིས་ནི། སྦགས་མཐོང་འཕྲལ་ལ་སྨོངས་པར་གྱུར།། 103

དལ་གྱིས་འདུ་ཤེས་ཐོབ་པ་དེས། ཇི་ལྟར་བདག་ཉིད་དམྱལ་བ་ནི།
འཇིགས་རུང་གདིང་དུ་ལྷུང་བ་ཡིས། མྱ་ངན་དེ་བཞིན་ཟླ་མའི་མིན།། 104

དེས་སྨྲས་དབང་ཕྱུག་སྡང་རྩི་ཚགས། སྡིག་པར་ལྷུང་བ་མ་མཐོང་བ།
བདག་གིས་སྐྱེ་བོ་མི་བསྲུན་ལས། སྐྱེ་མ་འབྲས་བུ་མང་དག་ཐོབ།། 105

ཀྱེ་མ་ཀྱེ་ཧུད་རྟེན་ས་མེད། འཇིགས་རུང་དམྱལ་བའི་གདིང་དུ་ནི།
མཐོན་པོར་འཇིགས་རྣམས་མི་བསྲུན་དང་། འགྲོགས་པས་འཕྲལ་ལ་ལྷུང་
བྱེད་འགྱུར།། 106

གདུག་པ་བློན་པོ་འི་བློ་གྲོས་ཀྱིས། བདག་གིས་སྡིག་ཆེན་འདི་དག་བྱས།
ད་ནི་ལྷུང་བར་གྱུར་བ་བདག གཙང་བྱེད་ཀྱིས་ཀྱང་གཙང་མི་བྱེད།། 107

མཉམ་དུ་ཕ་དང་དགྲ་བཅོམ་དག བསད་པ་བདག་ནི་སུ་ཡིས་སྐྱོལ།
གང་དུ་བདག་གི་སྡོད་གཅིག་དུ། དུག་གི་སྲེག་བྱེད་ལྡན་པ་འཕྲུངས།། 108

तस्माद्व्रजन्तं निर्व्याजमाचारमिव दुर्जनाः ।
दुष्टामात्यप्रयुक्तास्ते जघ्नुर्वर्त्मनि घातकाः ॥ १०१ ॥

तस्य चीवरपात्रादीन् गृहीत्वा निहतस्य ते ।
न्यवेदयन् कृतं प्रीत्यै राजकार्य्यममात्ययोः ॥ १०२ ॥

ततः पापप्रहृष्टाभ्यां नृपस्ताभ्यां प्रदर्शितम् ।
दृष्ट्वा मुमोह सहसा रक्ताक्तं चीवरं पितुः ॥ १०३ ॥

स लब्धसंज्ञः शनकैः शुशोच न तथा गुरुम् ।
यथा पतितमात्मानं घोरे नरकगह्वरे ॥१ ०४ ॥

सोऽवदद्वत्स संप्राप्तं फलं खलजनान्मया ।
ऐश्वर्य्यमधुलुब्धेन पापपातमपश्यता ॥ १०५ ॥

अहो बत निरालम्बे घोरे नरकसंकटे ।
उन्नतारोहिणां सद्यः पातकं खलसङ्गतम् ॥ १०६ ॥

कृतमेतन् महत् पापं दुष्टामात्यधिया मया ।
पतितस्य ममेदानीं पावकोऽपि न पावकः ॥ १०७ ॥

तुल्यं पितुश्चार्हतश्च वधे का मम निष्कृतिः ।
पीतं यत्र मयैकस्मिन् पात्रे सदहनं विषम् ॥ १०८ ॥

རྟོགས་མེད་ཡབ་ནི་རྒན་པོ་དག། རབ་བྱུང་ཞི་བ་བསྟེན་པ་ལ།
ཆགས་ལས་བདག་གིས་རང་གི་སེམས། མཚོན་ནི་རྣོན་པོ་འི་བྱ་བ་བྱས།། 109

གང་ཞིག་བསམས་པ་ཉིད་ན་འདར་བསྐྱེད་བྱེད་དེ་ནི་ཐོས་པར་ཡོངས་མི་བཟོད།
གང་ཞིག་མཐོང་ནས་སེམས་མེད་རྣམས་ཀྱང་སྙིང་ངན་དག་ལ་རབ་ཏུ་གཏུགས་པར་བྱེད།
གང་ལ་འགྱོད་པ་དྲག་པོ་འི་མེའི་མ་རུངས་རྣམས་ཀྱང་འཇམ་པོ་ཉིད་འགྱུར་བ།
དེ་ལའང་བརྩེ་མེད་བློ་ལྡན་རྣམས་ནི་རལ་གྲི་རྣོན་པོ་འི་བྱ་བ་རབ་ཏུ་སློས།། 110

ཞེས་བརྗོད་སྡུག་བསྔལ་གྱིས་གདུངས་པ། བཞིན་ནི་ཆོ་ངའི་སྨུ་ཅོར་ལྡན།
མ་རུངས་བློན་པོ་དེ་དག་ནི། ནང་དུ་འཇུག་པ་ཁྲོ་བས་བཀློག།། 111

ཡོན་དན་ཁྱད་པར་ཡོངས་ཤེས་རིས། ཧེ་ཏུ་ཀ་དང་ཀླི་ཏུ་ཀ།
ཡབ་ཀྱི་སྔོན་གྱི་བློན་པོ་གཉིས། རབ་ཏུ་དང་བས་མགྲོགས་པར་བོས།། 112

དེ་ནས་རྒྱལ་པོ་བསམ་པས་རིད། སྙིང་ངན་གྱིས་ནི་སྐྱུ་བོར་གྱུར།
དལ་གྱི་བློན་པོ་གདུག་པ་ཡིས། དེ་ཡི་མ་ལ་མངོན་ཕྱོགས་སྨྲས།། 113

ལྷ་མོ་ཁྱོད་སྲས་དཔལ་དང་ལྡན། རང་བཞིན་གྱི་ནི་བསམ་པ་དྲང་།
ནང་མི་རབ་གཅོད་རྒྱུ་བ་མོ་ཡིས། རྒྱལ་སྲིད་བསྐྱུང་བ་ཡོངས་མི་ཤེས།། 114

ཕ་ནི་རབ་ཏུ་བྱུང་བ་ཡང་། འདི་ཡི་རྒྱལ་སྲིད་འཕྲོག་ཏུ་འོངས།
བདག་ཅག་རྣམས་ཀྱིས་རབ་ཞི་བྱས། དེ་ལ་ཅི་ཞིག་བརྗོད་པར་བྱ།། 115

वृद्धे पितरि निःशङ्के शमप्रव्रज्ययाश्रिते ।
स्वचित्तं निशितं शस्त्रं लोभाद्व्यापारितं मया ॥ १०९ ॥

यत्संचिन्तितमेव कम्पजनकं श्रोतुं न यत् शक्यते
दृष्टं यच्च करोति शोककलनां निश्चेतनानामपि ।
यच्च क्रौर्य्यमपि प्रयाति मृदुतां तीव्रानुतापाग्निना
तच्चापि प्रसरन्ति निर्घृणधियां निस्त्रिंशतीक्ष्णाः क्रियाः ॥
१११० ॥

इत्युक्त्वा दुःखसन्तप्तः प्रलापमुखराननः ।
न्यवारयत्तयोः कोपात्स वेश्म दुष्टमन्त्रिणोः ॥ १११ ॥

गुणान्तरं परिज्ञाय भिरुकं हिरुकं च सः ।
आनिनाय प्रसाद्याशु पुराणौ सचिवौ पितुः ॥ ११२ ॥

ततश्चिन्ताकृशे राज्ञि शोकात् पाण्डुरतां गते ।
स्वैरं तज्जननीमेत्य दुष्टामात्याववोचताम् ॥ ११३ ॥

देवि त्वत्तनयः श्रीमान् स्वभावसरलाशयः ।
राज्यरक्षां न जानाति स्वजनोच्छेदकर्कशाम् ॥ ११४ ॥

पिता प्रव्रजितोऽप्यस्य राज्यं हर्तुमुपागतः ।
आवाभ्यां प्रशमं नीतस्तत्र का नाम वाच्यता ॥ ११५ ॥

གལ་ཏེ་ལུགས་ཀྱི་རྒྱུད་ལྡན་པའི། རིམ་པར་དགེ་བའི་རིམ་མིན་ན།
དགེ་སློང་དེ་ཡང་རྒྱལ་སྲིད་ནི། མངོན་པར་འདོད་དེ་ཛེ་ལྟར་རིམ།། 116

ས་བདག་ཕ་བསད་ཁྲིམས་པ་ཡིས། བདག་ཅག་གནས་ནས་རྣམ་པར་བསྐྲད།
རང་ཉིད་ད་ལྟའང་མྱ་ངན་གྱིས། ལོག་པར་ཅི་ལ་ཡོངས་སུ་སྐྱེམས།། 117

བདག་ཅག་གིས་ནི་ལེགས་བྱས་བྱས། ཇོ་བོའི་ཉེས་བྱས་ཉིད་དུ་གྱུར།
དངོས་པོ་ཀུན་ལ་གཡོག་པོ་རྣམས། གཉོད་པ་ཉིད་དང་ལྡན་པར་འགྱུར།། 118

རྒྱལ་པོ་འདས་ལ་ཅི་ཞིག་འགྱོད། གང་བྱས་དེ་དག་བྱས་པ་ཉིད།
ལྷ་མོ་བསམ་པས་རིང་པའི་བུ། ཁྱོད་ཀྱིས་ཅི་སྐྱད་བདང་སྐོམས་བྱེད།། 119

དེ་དག་གིས་ནི་བརྗོད་ཐོས་ནས། དེ་དག་ཚིག་ལ་གུས་པས་བསྒྲུབས།
ཏ་ར་ལི་ཀ་ཞེས་པ་ཡི། རྒྱལ་པོའི་མ་དེས་དལ་བུས་སྨྲས།། 120

ཁྱོད་ཀྱི་གྲོས་ལ་ཉེར་བསྙེན་པའི། རྒྱལ་པོས་སྔོན་ནི་བྱས་པ་ཡིས།
དཀྱིལ་བར་ལྷུང་བར་བྱེད་པའི་ལས། འདི་ནི་མཚམས་མེད་གཉིས་སུ་འགྱུར།། 121

འདི་ཡི་ཕ་བསད་ལས་སྐྱེས་པའི། མྱ་ངན་བདག་གིས་བཟློག་པར་བགྱི།
དགྲ་བཅོམ་བསད་སྐྱེས་སྡུག་བསྔལ་ནི། ཁྱེད་གཉིས་ཀྱིས་ཀྱང་བཟློག་པར་
མཛོད།། 122

ཅེས་པ་དལ་གྱིས་དེ་ལ་བསྟན། ས་བདག་དྲུང་དུ་དེ་སོང་ནས།
མྱ་ངན་གྱིས་ནོན་ལྷ་བ་ནི། ཡོངས་ཟད་ལྟ་བུ་དེ་ལ་སྨྲས།། 123

नीचतन्त्रोपपन्नश्चेत् क्रमोऽयमशुभक्रमः ।
राज्याभिलाषिणोभिक्षोस्तस्यापि स कथं क्रमः ॥ ११६ ॥

आवां पितृवधक्रोधात् वारितौ भूभुजा पदात् ।
स्वयमद्यापि शोकेन किं मिथ्या परिशुष्यते ॥ ११७ ॥

सुकृतं कृतमावाभ्याम् प्रभोर्दुःखकृशाङ्गता ।
भवन्ति सर्व्वभावेषु भृत्या एवापराधिनः ॥ १ ८ ॥

गतं शोचति किं राजा यत् कृतं कृतमेव तत् ।
उपेक्ष्यते त्वया देवि कस्माच्चिन्ताकृशः सुतः ॥ ११९ ॥

ताभ्यामित्युदितं श्रुत्वा सा राजजननी शनैः ।
ऊचे तरलिका नाम तद्वाक्यविहितादरा ॥ १२० ॥

आनन्तर्य्यमिदं कर्म्म द्वयोर्नरकपातकम् ।
युष्मन्मतादुपनतं राज्ञः पूर्व्वकृतेन वा ॥ १२१ ॥

अहं तु वारयाम्यस्य शोकं पितृबधोद्भवम् ।
अर्हद्बधोद्भवं दुःखं भवद्भ्यामपि वार्य्यताम् ॥ १२२ ॥

इति तौ स्वैरमादिश्य सा गत्वा पार्थिवान्तिकम् ।
तमुवाच शुचाक्रान्तं परिक्षीणमिवोडुपम् ॥ १२३ ॥

ཆོས་དང་ཆོས་མིན་རང་བཞིན་གྱིས། རྒྱལ་པོའི་རྒྱལ་སྲིད་ཉེས་པ་མང་།
དེ་ལ་སྡིག་དོགས་སྙུ་ངན་གྱིས། བུ་ཁྱོད་ཅི་ལ་ཡོངས་སུ་གཏུང་། 124

གལ་ཏེ་ངེས་པར་ཕ་བསད་ལས། བླ་མ་ལ་བྲམས་ཁྱོད་གཏུང་ན།
ཁྱོད་ཀྱི་སྡུག་བསྔལ་མི་བཟད་དེར། དེ་རིང་ཁྱོད་ལ་ངོ་ཚ་གཏོང་། 125

ཁྱོད་ཀྱི་ཆོས་ཉིད་ཕ་དེ་མིན། ཁྱོད་ནི་གསད་པ་གཞན་ལས་སྐྱེས།
རང་འདོད་ཟད་དང་བདེ་བས་བུ། བུད་མེད་རྣམས་ལ་ཁྲིལ་ཡོད་མིན། 126

ཞེས་པ་དེ་ཚིག་སྙན་མིན་ཡང་། དབེན་པར་རྒྱལ་པོས་ཐོས་གྱུར་ནས།
ཕ་བསད་སྡིག་པ་དྲག་པོ་ཡིས། སྡུག་བསྔལ་དག་གིས་གདུང་བ་བདང་། 127

ཤར་གྱི་རི་བོས་ནུབ་ཀྱི་རི་ལ་སྦྱོར་བའི་བྲུ་བ་རབ་དུ་བྱེད།
སྐད་ཅིག་གིས་ནི་ས་དང་ས་འཛིན་བྲལ་བའི་རོལ་རྩེད་རྣམ་པར་བསྒྱུབས།
འདི་དག་འཕྲལ་ལ་མེ་ནི་ཆུ་ལས་རྣམ་སྐྱོ་དེ་ཡང་སྲིག་བྱེད་ལས།
སྲིད་གསུམ་དག་ན་བུད་མེད་རྣམས་ཀྱི་བསྒྱུབ་སྒྲུ་མིན་པ་ཅི་ཡང་མེད། 128

དེ་ནས་དགྲ་བཅོམ་བསད་པ་ཉིད། ཟུག་ཏུ་སྨྲ་བུ་གཟིར་བ་ཡི།
མི་བདག་དེ་ཡིས་ལས་དེ་ནི། ཕྱིར་བཅོས་ཆོས་ཤེས་རྣམས་ལ་དྲིས། 129

དེ་ནས་བློན་ངན་དེ་དག་གིས། རྒྱལ་དང་སྐར་རྒྱལ་མཆོད་དེར་གྱི།
ནང་དུ་ཁྲི་ལ་ཚང་དུ་གཉིས། ཤ་ཡི་བསླབས་པས་ཆགས་བྱས་ནས། 130

धर्म्माधर्म्ममयं पुत्र राज्यं राज्ञां बहुच्छलम् ।
पापानां शंकया तस्मिन् किं शुचा परिशुष्यसि ॥ १२४ ॥

पितुर्वधात् प्रतप्तोऽसि यदि नाम गुरुप्रियः ।
तन्नोच्यते समुत्सृज्य लज्जां त्वद्दुःखसंकटे ॥ १२५ ॥

स्वैरं जातस्त्वमन्येन न स तद् धर्मतः पिता ।
स्वेच्छाहारसुखाः पुत्र स्त्रियो हि निरपत्रपाः ॥ १२६ ॥

इत्यप्रियमपि श्रुत्वा राजा तद्वचनं रहः ।
पितृवैशसपापोग्रदुःखसन्तापमत्यजत् ॥ १२७ ॥

प्रकुर्व्वन्त्यस्ताद्रेरुदयगिरिणा स्लेषकलनां
क्षणात् क्षौणीक्ष्माभृद्विघटनविनोदं विदधति ।
सृजन्त्येता वह्निं सपदि सलिलात्तच्च दहना-
दसाध्यं नारीणां नहि भवति किञ्चित्त्रिभुवने ॥ १२८ ॥

अथ सोऽर्हद्वधेनैव शल्यतुल्येन पीड़ितः ।
नृपः पप्रच्छ धर्म्मज्ञान्निष्कृतिं तस्य कर्म्मणः ॥ १२९ ॥

ततस्तौ दुष्टसचिवौ तिष्यपुष्याख्यचैत्ययोः ।
मार्ज्जारपोतौ धृत्वान्तःसक्तावामिषशिक्षया ॥ १३० ॥

བགྲགས་པར་གྱུར་ཀྱང་སྐྱི་བརྗོད་གྱིས། མི་བདག་མ་དུན་སར་རབ་ཞུགས་ཏེ།
གདུང་བ་དྲག་པོས་ཡོངས་གདུངས་པ། རབ་ཞི་དོན་གཉེར་དེ་ལ་སྨྲས།། 131

ལྷ་གཅིག་ཁྱོད་ནི་རྫུན་ཉིད་ཀྱིས། སེམས་ནི་མཆོག་ཏུ་གདུང་བར་བྱེད།
འཇིག་རྟེན་འདི་ན་དེ་ཉིད་དུ། ཐམས་ཅད་དགེ་བའི་དགྲ་བཅོམ་མེད།། 132

གལ་ཏེ་དེ་དག་བདེན་པ་ན། མཁའ་ལ་ངང་པའི་རྒྱལ་པོ་བཞིན།
དེ་དག་རྫུ་འཕྲུལ་གྱིས་འགྲོད་པས། གཞན་གྱིས་གསོད་པ་ཇི་ལྟར་སྲིད།། 133

དེ་སྐད་དགྲ་བཅོམ་ཡོད་མིན་ན། དེ་བསད་སྡིག་པ་ག་ལ་ཡོད།
གང་ན་གྲོང་ཁྱེར་ཡོད་མིན་པ། དེ་ན་མཚམས་ཀྱི་རྫོད་པས་ཅི།། 134

གང་དག་ཁྲིམས་བདག་རྒྱལ་དང་ནི། སྔར་རྒྱལ་དགྲ་བཅོམ་གཉིས་གྲོབ་པ།
དེ་དག་ད་ལྟ་རང་རང་གི། མཆོད་རྟེན་ནང་དུ་བྲི་ལར་སྐྱེས།། 135

དེ་དག་གསལ་བར་མངོན་སུམ་གྱིས། མཐོང་ལ་གྲེ་ཆོས་སྨྲ་ཞིག་བྱེད།
གལ་ཏེ་ཡིད་ཆེས་ཡོད་མ་ཡིན་ན། རང་ཉིད་ངེས་པར་ཅིས་མི་བལྟ།། 136

ཞེས་པ་བརྗོད་ནས་ས་བདག་ཀྱིད། ཁྲིགས་ལ་འཕྱུང་བ་བཞིན་བྲུས་ནས།
མི་བསྟུན་དེ་དག་དེ་དང་ནི། ལྷན་ཅིག་མཆོད་རྟེན་ལྟ་རུ་སོང་།། 137

སྤྲོན་མེད་ལྷུད་མོ་འབེབས་པ་ཡིས། དེར་ནི་སྐྱི་བོ་ཡང་དག་འཁྲིགས།
རྒྱལ་པོ་བློན་བཅས་བལྟ་བ་རྟེན་ཆོ། གདུག་པའི་བློན་པོ་གཡོན་ཅན་གྱིས།། 138

निषिद्धावपि धार्ष्ट्येन प्रविश्य नृपतेः सभाम् ।
तमूचतुस्तीव्रतापसन्तापप्रशमार्थिनम् ॥ १३१ ॥

देव मिथ्यैव भवता चित्तं मायास्यते भृशम् ।
सर्व्वकल्याणा लोकेऽस्मिन् नार्हन्तः सन्ति ते मताः ॥ १३२ ॥

यदि सत्यं भवेयुस्ते नभसो राजहंसवत् ।
ऋद्धिमन्तः कथं तेषामन्येन वधसम्भवः ॥ १३३ ॥

न सन्ति तस्मादर्हन्तः कुतस्तद्वधपातकम् ।
सीमाविवादः कस्तत्र यत्र ग्रामो न विद्यते ॥ १३४ ॥

तिष्यपुष्यौ गृहपती यावदर्हत्पदमापतुः ।
मार्जारावन्तरे जातौ तावेवाद्य स्वचैत्ययोः ॥ १३५ ॥

प्रकटौ तौ च दृश्येते प्रत्यक्षं कस्य संशयः ।
प्रत्ययो यदि नास्त्येव स्वयं किं न निरीक्ष्यते ॥ १३६ ॥

इत्युक्त्वा भूपतेः कृत्वा खलौ दोलाकुलम्मनः ।
जग्मतुः सहितौ तेन चैत्यसंदर्शनाय तौ ॥ १३७ ॥

अपूर्व्वकौतुकावेशात् तत्र संघटिते जने ।
विलोकनोद्यते राज्ञि सामात्ये दुष्टमन्त्रिणौ ॥ १३८ ॥

ཤ་ལ་གོམས་པས་འབྲལ་བྱས་པ། རྒྱལ་དང་སྐར་རྒྱལ་ཞེས་བརྗོད་པས།
བྱི་ལ་ཆུང་ངུ་གཉིས་པོ་དང་། དལ་བུ་ཡིས་ནི་མཐོང་བར་བྱས།། 139

རྒྱལ་དང་སྐར་རྒྱལ་དེ་དག་གིས གལ་ཏེ་དགྲ་བཅོམ་སྐྱེ་ཉིད་ན།
བདེན་པ་དེ་ཡིས་ཁྱོད་གཉིས་ཀྱིས། མཆོད་རྟེན་ལ་ནི་བསྐོར་བའང་མཛོད།། 140

ཤ་སྟེ་ཚོ་ན་དེ་དག་གིས། དེ་སྐད་སྐད་ཆེར་བརྗོད་པ་ཡིས།
བྱི་ལ་དེ་དག་མགྱོགས་པར་ནི། ངེས་པར་འཁོར་ནས་བསྐོར་བ་བྱས།། 141

མི་བདག་རྗེས་འབྲང་བཅས་པ་ཡིས། མཐོང་ནས་འཕྲུལ་ལ་ཡིད་ཆེས་ཐོབ།
སྐྱེ་བོ་ངན་པའི་སྒྱུ་མ་ཉིད། ས་སྟེང་འགྲོ་ལས་རྒྱལ་བར་གྱུར།། 142

ཁྲུ་ཚུར་དུ་རླུང་རྡོ་ལ་པདྨ་ནས་མཁའི་ཕྱོགས་ལ་རི་མོ་དང་།
ཀླེ་ཧྲི་ཡ་ཡང་སོ་དང་སྤྱུད་པའི་རོལ་པ་རབ་མང་བཀོད་པ་དང་།
གཞན་ཡང་ཅི་མིན་ཕྱུགས་དང་བྲིས་པའི་གྲོ་ལ་རྟོ་ངས་སྒྱུ་སིག་འཕྲུལ་དག།
སྐད་ཅིག་ཡོངས་འདྲིས་ཡིད་ཆེས་གཟུགས་ཅན་གསོན་ཅན་རྣམས་ཀྱིས་སྟུན་
པར་བྱེད།། 143

དེ་ནས་བདེ་གཤེགས་བསྟན་པ་ལ། རྒྱལ་པོ་མཆོག་དུ་ཡིད་ཆེས་བྲལ།
འཕགས་པ་ཀུ་ཎྜ་ཡ་ན་ནི། མ་དུན་དུ་དད་པས་མཆོད་པ་བརླག།། 144

དེ་ནས་རྒྱལ་པོས་གྲོང་ཁྱེར་བཀག། ཕྱི་རོལ་ཉིད་དེར་གདུལ་བྱ་ལ།
བརྩེ་བས་རྗེས་འབྲང་བཅས་དེ་གནས། དགེ་སློང་མ་ནི་རི་མ་ཡང་།། 145

आमिषाभ्याससम्बद्धतिष्यपुष्याभिधानयोः ।
धूर्त्तौ चक्रतुराह्वानं शनैर्बालविडालयोः ॥ १३९ ॥

तौ तिष्यपुष्यावर्हन्तौ मार्जारौ स्थो युवां यदि ।
प्रदक्षिणं वा क्रियतां तेन सत्येन चैत्ययोः ॥ १४० ॥

मांसदानक्षणे ताभ्यामिति वाचमुदीरितौ ।
तूर्णं निर्गत्य मार्जारौ चक्रतुस्तौ प्रदक्षिणम् ॥ १४१ ॥

तद्दृष्ट्वा सहसावाप्तप्रत्यये सानुगे नृपे ।
याते दुर्जनमायैव जगज्जयमहीं ययौ ॥ १४२ ॥

मुष्टौ वायुं दृषदि कमलं चित्रमाकाशदेशे
जिह्वाग्रे च प्रचुररचनासृष्टिसंहारलीलाः ।
किं वा नान्यत् पशुशिशुधियां मोहनायेन्द्रजालं
मूर्त्तः धूर्त्त क्षणपरिचितप्रत्ययं दर्शयन्ति ॥ १४३ ॥

निष्प्रत्ययपरो राजा ततः सौगतदर्शने ।
आर्य्यकात्यायनस्याग्रे श्रद्धापूजामवारयत् ॥ १४४ ॥

राजधान्यां निषिद्धोऽथ वहिरेव स सानुगः ।
विनेयकृपया तत्र तस्थौ शैला च भिक्षुणी ॥ १४५ ॥

དེ་ནས་ཀ་དུ་ཡན་ནི། གང་ཚེ་སྔོན་དུ་མི་ཡི་བདག།
འོང་བ་མཐོང་ནས་སྐྱེ་བོ་ཡི། ཚོགས་པས་སྨོད་པས་འཛིགས་ནས་ག་ཞིགས།། 146

བློན་པོ་སྤྲ་མ་དག་གིས་བསྐུལ། ཇི་ནི་ག་ཞིགས་པ་མཐོང་གྱུར་ནས།
གདུག་པའི་བློན་པོ་ཁྲི་རིང་དང་། ལྷན་པ་དག་གིས་རྒྱལ་ལ་སྨྲས།། 147

རྒྱལ་པོ་བཀྲ་ཤིས་མིན་པའི་གཏེར། དགེ་སློང་མགོ་རིག་སྐྲ་མེད་དེ།
ལམ་དུ་དེ་རིང་བདག་ཅག་གིས། མཐོང་བས་ཅི་འབྱུང་ཡོངས་མི་ཤེས།། 148

འདི་ནི་རྒྱལ་པོ་སྡིག་ཅན་གྱི། བཞིན་ལ་བདག་མི་བལྟ་ཞེས་བརྗོད།
ཁྱོད་ལ་འདི་ནས་སྐད་ཅིག་གཅིག། རིང་དུ་སོང་སྟེ་དོ་ལྟར་གནས།། 149

གཞུང་ངན་གྲོས་པས་དེ་ཐོས་ནས། མི་བདག་གིས་ནི་འཁོར་རྣམས་ལ།
ཕྲུག་དར་རྡུལ་གྱི་པར་མོ་ཡིས། རིང་དུ་གནས་འདི་གཡོགས་ཞེས་སྨྲས།། 150

གདུག་པའི་འབང་ནི་དེ་དག་གིས། རྡུལ་གྱི་པར་མོས་གཡོགས་པ་ན།
ནང་དུ་ཞུགས་པ་བཀློག་པའི་སྐད། དེ་ཡིས་མཆོག་གི་ཁང་པ་སྤྲུལ།། 151

ཁྲོ་བས་འཁྲུགས་པའི་སྤྲུལ་རྣམས་དང་། ཁྲག་ནི་འཐུངས་པའི་སྟག་དག་ཀྱང་།
ཞི་ལས་འཛམ་པ་ཉིད་གྱུར་དེ། ས་ཡི་བདག་པོའི་འབང་མ་ཡིན།། 152

དེ་ནས་མི་བདག་སོང་བའི་ཚེ། རྡུལ་ཕུང་བརྒྱ་ཡིས་གཡོགས་དེ་ལ།
ཧེ་ཙ་ཀ་དང་ཧྲི་ཙ་ཀས། རྡུལ་ལ་མངོན་དུ་ཕྱོགས་དེ་སྨྲས།། 153

ततः कदाचिदायान्तं दृष्ट्वा कात्यायनः पुरः ।
नृपतिं जनसंपातादवमानभयाद् ययौ ॥ १४६ ॥

प्रेषितं पूर्व्वमन्त्रिभ्यां व्रजन्तमवलोक्य तम् ।
दुष्टामात्यौ नरपतिं दीर्घवैरावबोचताम् ॥ १४७ ॥

राजन्नमंगलनिधिर्मुण्डोऽयं विशिरः पथि ।
दृष्टोऽद्य भिक्षुरस्माभिर्न्न विघ्नः किं भविष्यति ॥ १४८ ॥

न पश्यामि मुखं राज्ञः पापस्येति भणत्यसौ ।
तथाहि क्षण मेकांते गत्वा दूरमितः स्थितः ॥ १४९ ॥

श्रुत्वैतद् दुर्जनामर्षादुवाचानुचरान् नृपः ।
एष दूरस्थितः पांशुमुष्टिभिः पूर्य्यतामिति ॥ १५० ॥

पूर्य्यमाणः स तैः पांशुमुष्टिभिर्दुष्टचेटकैः ।
दिव्यां कुटीं प्रवेशेन परिहाराय निर्ममे ॥ १५१ ॥

अमर्षकोपिताः सर्पाः व्याघ्रा वा पीतलोहिताः ।
शान्ते रायान्ति मृदुतां नतु भूपतिचेटकाः ॥ १५२ ॥

ततः प्रयाते नृपतौ पांशुराशिशताहतम् ।
दुःखादूचतुरभ्येत्य हेरुको मिरुकश्च तम् ॥ १५३ ॥

རྒྱལ་པོ་མ་རུངས་ངན་བྱེད་ཀྱིས། འཕགས་པ་ཁྲོད་ཀྱིས་འོ་བཀྲོལ་ཐོབ།
གང་གི་མདུན་དུ་འདི་མཐོང་བས། བདག་ཅག་གི་ནི་མིག་རྣམས་སྨད། ॥ 154

རྨོངས་པའི་མུན་པ་སྡིག་སྤྱོད་དུ། སྐྱེ་བོ་ངན་པས་མི་བདག་བསྐྱུར།
ལས་འདི་མཐོང་བས་བདག་ཅག་ཀྱང་། སྡིག་པའི་སྐལ་བ་དག་དང་ལྡན། ॥ 155

ས་གཞི་སྡིག་མང་གིས་གདུངས་འདི། བློ་མདའ་ཁྲོད་ཀྱིས་བདང་བར་བྱོས།
བཟོད་དཀའ་མི་བསྲུན་གནས་པ་འདི། བདང་བར་འོས་པ་སུ་མི་འདོད། ॥ 156

ཞི་བཞི་བར་མི་འགྱུར་བཟོད་པ་ཉིད་ནི་ཉེ་བར་ཟད་མི་འགྱུར།
ཁྲོ་བ་ཙུབ་མོའི་སྐྱོན་རྣམས་དག་གིས་བློ་གྲོས་ལ་ཡང་རེག་མི་འགྱུར།
ཕན་སེམས་ཟུག་རྔུ་དང་མཚུངས་ཡིད་ལ་མི་གནས་དམ་པ་རྣམས་དག་ལ།
འཇིག་རྟེན་ན་ནི་སྐྱེ་བོ་ངན་པ་རྣམ་པར་སྤངས་ལས་བདེ་གཞན་མེད། ॥ 157

དབང་ཕྱུག་ཉིད་ནི་ཡོན་ཏན་ལྡན་རྣམས་འོག་ལྷུང་ངལ་དུབ་ཉོན་མོངས་ལྡན་པ་སྟེར།
ཟབ་མོ་ཉིད་ནི་རབ་རིབ་འབྱུང་གནས་སུ་འཛུག་སྒྲོག་ཆགས་རྣམས་ཀྱི་སྒྲོག་འགྲོག་བྱེད།
མཆོག་གྱུར་དེ་ཡང་མ་རུངས་གདུག་པ་གྱུ་གྱུའི་སྤྲུལ་རྣམས་དག་གིས་ཉམས་བྱས་པ།
སྐྱེ་མ་གང་གིས་སྐྱོན་དང་བྲལ་བ་དེ་ནི་མི་བསྲུན་ལ་མེད་ཁྲིན་པ་བཞིན། ॥ 158

དེ་དག་ཚིག་དེ་ཐོས་གྱུར་ནས། ཀུ་ཎྜ་ཡན་ཆེན་པོས་སྨྲས།
གནོད་པ་བྱས་ཀྱང་བདག་མ་ཁྲོས། འདི་འདྲ་ལས་ཀྱི་བགྲོད་པ་ཡིན། ॥ 159

आर्य्य कष्टमवाप्तोऽसि राज्ञा क्रूरेण दुष्कृतैः ।
लोचनानि धिगस्माकं यैरिदं दृश्यते पुरः ॥ १५४ ॥

मोहान्धः पातकश्वभ्रे दुर्जनैः पातितो नृपः ।
कर्म्मणो वयमप्यस्य दर्शनात् पापभागिनः ॥ १५५ ॥

भूरियं भूरिपापार्त्ता त्याज्या प्राज्यमतेस्तव ।
दुःसहः खलसंवासः त्यागः कस्य न सम्मतः ॥ १५६ ॥

प्रयाति न शमः शमं क्षयमुपैति नैव क्षमा
भवन्ति न च बुद्धयः परुषरोषदोषस्पृशः ।
वसन्ति न विमानना मनसि शल्यतुल्याः सतां
न दुष्टजनवर्जनादपरमस्ति लोके सुखम् ॥ १५७ ॥

ऐश्वर्य्यं गुणिनामधोनिपतनायासप्रयासप्रदं
गाम्भीर्य्यं तिमिराकरं प्रविशतां प्राणापहं प्राणिनाम् ।
नष्टा सापि निकृष्टदुष्टकुटिलव्यालैरुपादेयता
कूपस्येव खलस्य नास्ति तदहो दोषालियुक्तं यतः ॥ १५८ ॥

तयोरिति वचः श्रुत्वा महाकात्यायनोऽवदत् ।
न निकारेऽपि मे कोपः कर्म्मणो गतिरीदृशी ॥ १५९ ॥

གང་ཞིག་ས་བདག་བླུན་པོ་ལ། མི་བསྟུན་དང་འགྲོགས་སྐྱོན་དག་གིས།
འཇིགས་པ་ཆེན་པོ་ཉེ་བར་གནས། འདི་དག་ཁོ་ན་བདག་སྡུག་བསྔལ།། 160

འདི་ཡི་གྲོང་དུ་དང་པོ་ཡི། ཉིན་ལ་རླུང་ཆེན་འབབ་པར་འགྱུར།
གཉིས་པ་ལ་ནི་མེ་ཏོག་ཆར། དེ་ནས་གཞན་ལ་གོས་ཀྱི་ཆར།། 161

དངུལ་གྱི་ཆར་ནི་བཞི་པ་ལ། ལྔ་པ་ལ་ཡང་གསེར་གྱི་ཆར།
དེ་ནས་རིན་ཆེན་ཆར་པ་སྟེ། རྡུལ་གྱི་ཆར་པ་བདུན་པ་ལ།། 162

དེ་ཡིས་ས་བདག་གཉེན་རང་ནི། ཡུལ་འཁོར་བཅས་འདི་མེད་པར་འགྱུར།
དེ་སྐད་ཁྲིད་གཉིས་རིན་ཆེན་ནི། མང་པོ་བླངས་ནས་འགྲོ་བར་བྱ།། 163

ཞེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། དེ་བཞིན་ཞེས་དེ་དེ་དག་སོང་།
སྟོ་བསངས་ཏེ་རུ་ཀ་ཡི་བུ། དེ་ཡི་ཉེ་བར་གནས་པ་བྱས།། 164

ཧྲི་རུ་ཀས་ཀྱང་བུ་མོ་ནི། སྟོ་བསངས་ཅན་མ་ལག་པས་ཁྲིད།
དགེ་སློང་མ་ནི་རི་མ་ལ། མངོན་ཕྱོགས་གྱུར་པས་འདི་དག་སྨྲས།། 165

འཕགས་མ་བདག་གི་བུ་མོ་ནི། སྐྱུད་པ་ཞི་བར་མཛད་ཁྱེད་ཀྱིས།
ཁྲིམས་ཀྱི་བདག་པོ་གདངས་ཅན་གྱིས། ཁྲིམས་དུ་ཡང་དག་གཞག་པར་བྱ།། 166

ཞེས་སྨྲས་བུ་ཚ་གཏད་ནས་ནི། བློན་པོ་དག་ནི་རང་ཁྲིམས་སོང་།
རི་མ་ཡིས་ཀྱང་བུ་མོ་བླངས། གདངས་ཅན་གྱི་ནི་གནས་སུ་སོང་།། 167

एतावदेव मे दुःखं यन्मूढस्य महीपतेः ।
खलसङ्गमदोषेण भयं महदुपस्थितम् ॥ १६० ॥

प्रथमे हि महावायुः पुरेऽस्य निपतिष्यति ।
द्वितीये पुष्पवृष्टिश्च वस्त्रवृष्टिस्ततः परे ॥ १६१ ॥

रूप्यवृष्टिश्चतुर्थे च हेमवृष्टिश्च पञ्चमे ।
रत्नवृष्टिस्ततः षष्ठे पांशुवृष्टिश्च सप्तमे ॥ १६२ ॥

तया सबन्धुराष्ट्रोऽसौ न भविष्यति भूपतिः ।
तस्माद् भवद्भ्यां गन्तव्यं रत्नान्यादाय भूयसे ॥ १६३ ॥

इति तद्वचनं श्रुत्वा विनिश्चित्य तथेति तौ ।
हेरुकः श्यामकं पुत्रं तस्योपस्थापकं व्यधात् ॥ १६४ ॥

भिरुकश्च सुतां श्यामावतीमादाय पाणिना ।
अभ्येत्य भिक्षुकीं शैलां प्रणयादिदमब्रवीत् ॥ १६५ ॥

आर्ये भवत्या मे कन्या घोषिलस्य गृहप्रभोः ।
गृहे समर्पणीयेयमासन्नप्रतिपन्नया ॥ १६६ ॥

एवमुक्तार्पयित्वा तावमात्यौ जग्मतुर्गृहम् ।
शैलापि कन्यामादाय प्रययौ घोषिलालयम् ॥ १६७ ॥

དེ་ནས་ཇི་ལྟར་དགེ་སློང་གིས། བརྗོད་དེ་རིམ་པས་གྲོང་དུ་བྱུང་།
ཡེ་ཤེས་སྒྲོན་ལྡན་ཤེས་རབ་ཀྱིས། དེ་ཉིད་ཇི་ལྟར་བཞིན་དུ་མཐོང་།། 168

དེ་ནས་ཉི་མ་དྲུག་པ་ལ། རིན་ཅེན་ཚར་ནི་བབ་པའི་ཚེ།
བློན་པོ་དེ་དག་རིན་ཅེན་གྱིས། གང་བའི་གྲུ་བཟུང་མ་ཚོར་སོང་།། 169

དེ་དག་ཀློ་ཡི་ཕྱོགས་སོང་ནས། གྲོང་ཁྱེར་གཉིས་བྱས་ཧེ་རུ་ཀས།
ཧེ་རུ་ཀ་ཞེས་དེ་བཞིན་དུ། གཞན་གྱིས་ཧྲི་རུ་ཀ་ཚལ་ལོ།། 170

ཉི་མ་གཞན་ལ་རྡུལ་གྱི་ཆར། ཆེན་པོ་བབས་པས་དཀྲུལ་བའི་མགྲོན།
མི་བདག་གཉེན་དང་ཡུལ་འཁོར་དང་། བཅས་པ་རབ་ཏུ་ནུབ་པར་གྱུར།། 171

རྒྱལ་པོ་དབྲུག་པ་ཐོ་བར་བཅས། སྡིག་པའི་ལྷག་མར་གྱུར་པའི་ཚེ།
ཀུ་ཎྜ་ཡ་ནས་ནམ་མཁའ་ལས། བློན་པོའི་བུ་དེ་ཁྱེར་ནས་གཤེགས།། 172

གྲོང་ཁྱེར་ལྷ་མོ་ནམ་མཁའ་ལས། དགའ་བས་དེ་ཡི་རྗེས་འབྲངས་པ།
དེ་ཡི་བཀའ་ཡིས་ཀར་པ་ཊའི། ཤ་རིའི་ནགས་སུ་གནས་པར་བྱས།། 173

དགེ་སློང་བསོད་ནམས་མཐུ་དང་ནི། བློན་པོའི་བུ་དེའི་སྐལ་པ་དང་།
ལྷ་མོ་ཡི་ཡང་བྱིན་བརླབས་ཀྱིས། གྲོང་དེ་དཔལ་དང་ལྡན་པར་གྱུར།། 174

དེ་ནས་ལྷ་མོ་དེ་ཡིས་དེར། ཀུ་ཎྜ་ཡ་ནའི་མཆོད་རྟེན་བྱས།
གང་ཞིག་ད་ལྟའང་ལྷ་ལྡན་ལ། མཆོད་རྟེན་ཕྱག་བྱེད་ཕྱག་འཚལ་བྱེད།། 175

ततः क्रमेण तदभूद्यथोक्तं भिक्षुणा पुरे ।
ज्ञानदीपवती प्रज्ञा यथातत्त्वं हि पश्यति ॥ १६८ ॥

षष्ठेऽह्नि रत्नवर्षेऽथ पतिते रत्नपूरिताम् ।
ययतुर्नावमादाय तावमात्यावलक्षितौ ॥ १६९ ॥

तौ दक्षिणां दिशं गत्वा चक्रतुर्नगरद्वयम् ।
हेरुको हेरुकाख्यानं भिरुकाख्यं तथापरः ॥ १७० ॥

परेऽह्नि पांशुवर्षेण महता पतता नृपः ।
सबन्धुराष्ट्रः प्रलयं प्रययौ नरकातिथिः ॥ १७१ ॥ ॥

सदण्डिमुद्गरे रात्रि याते किल्विषशेषताम् ।
तं मन्त्रिपुत्रमादाय व्योम्ना कात्यायनो ययौ ॥ १७२ ॥

तमेवानुगता प्रीत्या नभसा पुरदेवता ।
तदाज्ञया खरवनीकर्वटे विदधे स्थितिम् ॥ १७३ ॥

भिक्षुपुण्यानुभावेन भाग्यैर्मन्त्रिसुतस्य च ।
अधिष्ठानेन देव्याश्च श्रीमत्तदभवत् पुरम् ॥ १७४ ॥

तत्राथ देवता चक्रे चैत्यं कात्यायनस्य सा ।
सुरवत्यां यदद्यापि वन्दन्ते चैत्यवन्दकाः ॥ १७५ ॥

— — — — — — — —

འཕྲུང་ཞིང་ཀུ་ཎྜ་ཡ་ན་དེ། ཡུལ་གཞན་དག་ཏུ་མཁའ་ལས་སོང་ ༎ 176

སྐྱེ་བོ་རྣམས་ནི་ཡ་མཚན་ལས། འཕྲུང་ཞིང་འཕྲུང་བ་སྣུ་ཞེས་བརྗོད།
དེར་ནི་སྐྱེ་བོ་དེ་དག་རྣམས། འཕྲུང་བ་པོ་ཞེས་གྲགས་པར་གྱུར ༎ 177

སྐབས་དེར་བུ་མེད་ས་ཡི་བདག། མགོ་རིས་དག་ཏུ་སོང་བའི་ཚེ།
དེ་ཡི་བཀའ་ཡིས་སྤྲོ་བསངས་དེ། མཚན་ཤེས་རྣམས་ཀྱིས་རྒྱལ་པོར་བྱས༎ 178

དེ་ནས་ཀུ་ཎྜ་ཡ་ན་ཡིས། བོག་ཀ་ན་ཀ་ཞེས་པ་ཡི།
ཡུལ་དུ་ཕྱིན་ནས་མ་ལ་དེར། དགེ་བའི་ཆོས་ནི་བསྟན་པ་མཛད༎ 179

བདེན་མཐོང་གསུམ་དང་བཅས་པ་དེས། བུ་ཡིས་དགྲུག་པ་བླངས་ནས་ནི།
ཆེན་པོ་རྣམས་ཀྱིས་ད་ལྟ་ཡང་། ཕྱུག་བྱ་དབྱིག་པའི་མཆོད་རྟེན་བྱས༎ 180

དེ་ནས་དཔལ་གྱིས་མཉན་ཡོད་དུ། བཞིད་ལྷན་ཀུ་ཎྜ་ཡ་ནས་ཕྱིན།
རྒྱལ་བ་མཐོང་ནས་དགའ་ལྷན་པས། དེ་ཡི་ཞབས་ལ་ཕྱག་འཚལ་བྱས༎ 181

ཨུ་དྲཱ་ཡ་ན་བུ་ཡི་གདྲས། དེར་ནི་དེ་ཡིས་རྣམ་བཤད་པ།
ཐོས་ནས་དགེ་སློང་རྣམས་ཀྱིས་དྲིས། ཐམས་ཅད་མཁྱེན་པས་དེ་ལ་གསུངས༎
182

རྫོན་པ་དྲག་པོ་འི་ཞགས་ཞེས་པས། ཀར་པ་ཊ་ཙེ་ནགས་ཚལ་དུ།
གཡལ་དང་བཅས་པའི་རྒྱུ་དག་སྤྱོད། རི་དགས་བཅིངས་པའི་སྣོད་དུ་བཀོད༎
183

मन्त्रिस्तनुमथादाय लग्नं चीवरकर्णिके ।
लम्बनं स ययौ व्योम्ना देशं कात्यायनः परम् ॥ १७६ ॥

लम्बते लम्बते कोऽयमित्युक्ते विस्मयाज्जनैः ।
बभूवुस्ते जनास्तत्र लम्बका इति विश्रुताः ॥ १७७ ॥

अत्रान्तरे दिवं याते तत्रापुत्रे महीपतौ ।
स कृतः श्यामको राजा लक्षणज्ञैस्तदाज्ञया ॥ १७८ ॥

गत्वा भोक्कानकं नाम दिशा कात्यायनस्ततः ।
जनन्यास्तत्र संशुद्धां विदधे धर्म्मदेशनाम् ॥ १७९ ॥

सा दृष्टसत्या पुत्रस्य यष्टीमादाय सादरम् ।
वन्द्यमद्यापि महती यष्टिचैत्यमकारयत् ॥ १८० ॥

श्रावस्तीमथ सोत्कण्ठः प्राप्य कात्यायनः शनैः ।
जिनं विलोक्य सानन्दश्चक्रे तत्पादवन्दनम् ॥ १८१ ॥

उद्रायणसुतकथां तत्र तेन निवेदिताम् ।
आकर्ण्य भिक्षुभिः पृष्टः सर्व्वज्ञस्तानभाषत ॥ १८२ ॥

लुब्धकः कालपाशाख्यः कर्व्वटोपान्तकानने ।
सकूटां मृगबन्धाय निदधे वागुरां पुरः ॥ १८३ ॥

འཁྲུལ་འཁོར་ཞགས་པ་ལྷུན་བཀོད་ནས། དེ་སོང་ཆོ་ན་རང་སངས་རྒྱས།
ཇི་ལྟར་འདོད་པ་འོང་བ་ཡིས། ཕྱོགས་དེར་རྣམ་པར་བརྟན་དེ་གནས།། 184

དེ་ཡི་བསོད་ནམས་མཐུ་དག་གིས། རི་དགས་འཆིངས་པར་ཆུང་མ་གྱུར།
དགེ་བའི་བདག་ཉིད་རྣམས་མདུན་དུ། སྐྱེ་བོས་མི་དགེ་ཐོབ་མ་ཡིན།། 185

དེ་ནས་རྗོན་པ་འོངས་པས་ཀྱང་། ཞགས་པ་རི་དགས་མེད་མཐོང་ནས།
ཁྲོ་བས་ལོང་བས་རང་སངས་རྒྱས། དུག་གིས་བྱུགས་པའི་མདའ་ལས་བསད།། 186

གཟི་བརྗིད་འབར་བྱེད་ལྟར་འབར་བ། མདའ་ཡིས་ཕིགས་པར་གྱུར་པ་དེའི།
མཐུ་ནི་རྨད་བྱུང་མཐོང་གྱུར་ནས། ཞབས་གཉིས་དག་ལ་དེ་ཡིས་གཏུགས།། 187

དེ་ནས་རྗོན་པ་བྲ་མིན་གྱི། རྒྱུ་ལས་མྱ་ངན་གྱིས་གདུངས་པས།
མདལ་དང་རྒྱ་ནི་ཡང་དག་བཏང་། བདག་ཉིད་སྨོད་ཅིང་མྱ་ངན་བྱས།། 188

ཡོངས་སུ་མྱང་འདས་ཐོབ་གྱུར་པ། དེ་ཡིས་གདུང་རུས་བླངས་ནས་དེས།
གདུགས་དང་རྒྱལ་མཚན་སོགས་ཚོགས་ཀྱིས། རྟག་ཏུ་མཆོད་པའི་མཆོད་
རྟེན་བྱས།། 189

བསོད་ནམས་དེ་ཡིས་རྗོན་པ་ནི། མི་བདག་ཨུ་དྲ་ཡ་ནར་གྱུར།
རང་སངས་རྒྱས་ནི་བསད་པ་ལས། ལན་མང་གསོད་པ་ཐོབ་པར་གྱུར།། 190

ཁྲིམ་བདག་ཀ་པི་ཀར་གནས་པ། ནོར་དང་འབྲུ་སོགས་རྒྱས་གྱུར་པ།
དགའ་བོ་ཞེས་ལ་བུ་མོ་ནི། རྒྱགས་པའི་རི་མོ་ཞེས་པ་བྱུང་།། 191

यन्त्रं पाशावृतं दत्त्वा याते तस्मिन् यदृच्छया ।
प्रत्येकबुद्धस्तं देशं प्राप्य विश्रान्तिमाप्तवान् ॥ १८४ ॥

तस्य पुण्यानुभावेन यन्त्रं न विविशुर्मृगाः ।
न हि शुद्धात्मनामग्रे प्राप्नोत्यकुशलं जनः ॥ १८५ ॥

लुब्धकोऽपि ततोऽभ्येत्य पाशानालोक्य निर्मृगान् ।
प्रत्येकबुद्धं क्रोधान्धो विषदिग्धेषुणावधीत् ॥ १८६ ॥

तस्य शायकविद्धस्य ज्वलज्ज्वलनतेजसः ।
प्रभावमद्भुतं दृष्ट्वा पादयोर्न्निपपात सः ॥ १८७ ॥

अकार्य्यकरणोद्वेगसन्तापादथ लुब्धकः ।
निनिन्द शोचन्नात्मानं संत्यज्य शरवागुराः ॥ १८८ ॥

परिनिर्व्वाणमाप्तस्य तस्यास्थीनि निधाय सः ।
छत्रध्वजादिसंभारैः स्तूपञ्चक्रे सदार्चितम् ॥ १८९ ॥

लुब्धकस्तेन पुण्येन बभूवोद्रायणो नृपः ।
बधात् प्रत्येकबुद्धस्य बहुशो बधमाप्तवान् ॥ १९० ॥

नन्दनाम्नो गृहपतेर्मदलेखाभिधा सुता ।
बभूव धनधान्यादिस्फीतिः कर्व्वटवासिनः ॥ १९१ ॥

ནམ་ཞིག་རྒྱགས་པས་བྲན་པ་དེས། ཁང་པ་ཆགས་པའི་རྡུལ་རྣམས་ཀྱིས།
རང་སངས་རྒྱས་ནི་ལམ་ཉིད་ནས། བྲིན་པ་རློངས་པས་རྣམ་པ་གཡོགས། ॥ 192

དེ་ཉིད་ཁོ་ནའི་ཉི་མ་ལ། ཡུན་རིང་བསམས་པས་དོན་གཉེར་བ།
ནུ་མའི་ཁུར་གྱིས་གཟིར་བ་དེའི། བག་མར་སློང་བའི་སྐྱེས་པ་འོངས། ॥ 193

རང་སངས་རྒྱས་ཀྱི་སྤྱི་བོར་ནི། ཕྱག་དར་རྡུལ་པར་གཏོར་བ་ལས།
བདག་ནི་བག་མར་གྱུར་བ་ལ། ཉི་ཞེས་མིང་པོ་ལ་དེས་སྨྲས། ॥ 194

དེ་ནས་དེ་ཡིས་གདམ་ངག་གིས། བག་མར་འགྲོ་འདོད་གཞོན་ནུ་མ།
རྒྱགས་པས་རང་སངས་རྒྱས་རྣམས་ཀྱི། མགོ་བོ་ལ་ནི་རྡུལ་རྣམས་གཏོར། ॥ 195

སྨིན་བྲུས་ཟློས་རྫེས་ཡི་གེ་ལ། རབ་ཞུགས་ཡིད་ཆེས་ཀྱིས་རློངས་པ།
རྟོག་དཔྱོད་མེད་རྣམས་འགལ་བ་ཡིས། དངོས་པོ་ལ་ཡང་རབ་དུ་འཇུག ॥ 196

སྨིག་སྒྱུར་ལ་ཞུགས་དེ་སེ་ཚོ། འཛིགས་པ་རྟོགས་ཤིང་ཁོངས་རྒྱུད་པས།
ལས་དེ་ཁྲིམ་བདག་མཁས་པ་དང་། སད་པ་ཞེས་པས་བསྒྲིག་པ་བྲུས། ॥ 197

བུ་མ་དེ་ཉིད་གཙུག་ཕུད་ཅན། མི་བདག་སྨིག་པ་ལྡན་པར་གྱུར།
དེ་ཡི་མིང་པོ་གདམ་སྒྲོགས་ཀྱང་། དགེ་སློང་ཀཱ་ཏྱཱ་ཡ་ན་འདི། ॥ 198

ངན་སྤྱོད་དར་བ་བསྒྲིག་པ་ལས། ཁྲིམ་བདག་དེ་དག་སྐྱེས་པ་ན།
ཀེ་ཙ་ཀ་དང་ཟླི་ཙ་ཀ། གྲོང་ཁྱེར་ཉེ་བར་གདུགས་ལས་གྲར། ॥ 199

सा कदाचिन्मदोत्सिक्ता गृहमार्ज्जनरेणुभिः ।
प्रत्येकबुद्धमायान्तं पथि मोहादवाकिरत् ॥ १९२ ॥

तस्मिन्नेव दिने तस्या श्चिरंचिन्ताभिरर्थितः ।
वरः स्तनभरार्त्तायाः वरणार्थी समाययौ ॥ १९३ ॥

मूर्ध्नि प्रत्येकबुद्धस्य पांशुमुष्टिनिपातनात् ।
प्रत्यासन्नविवाहाहमिति भ्रातरमाह सा ॥ १९४ ॥

ततस्तस्याः प्रवादेन चिक्षिपुर्वरणाप्तये ।
मूर्ध्नि प्रत्येकबुद्धस्य रजांसि प्रौढ़कन्यकाः ॥ १९५ ॥

गुणाकारप्रवृत्तेन प्रत्ययेन विमोहिताः ।
निर्विचार्य्य प्रवर्त्तन्ते विरुद्धेष्वपि वस्तुषु ॥ १९६ ॥

प्रवृत्तपातकाचारे तस्मिन् बुद्धबुधाभिधौ ।
निवारणं गृहपती कर्म्मणस्तस्य चक्रतुः ॥ १९७ ॥

सैव कन्या नरपतिः शिखण्डी पापभागभूत् ।
प्रवादकर्त्ता तद्भ्राता भिक्षुः कात्यायनोऽप्ययम् ॥ १९८ ॥

जातौ गृहपती रूढ़दुष्टाचारनिवारणात् ।
पुरोपतापान्निर्मुक्तौ हेरुको भिरुकश्च तौ ॥ १९९ ॥

ཞེས་པ་བཅོམ་ལྡན་གསུང་ཐོས་དགེ་སློང་རྣམས་ནི་རྣམ་པར་དཔྱོད་ནས་ཀྱང་།
དགེ་དང་མི་དགེའི་ལས་རྣམས་འབྲས་བུར་ཡོངས་གྱུར་བཀྲ་བ་རབ་ཤེས་ནས།
མི་བསྲུན་སྐྱེ་བོའི་ཚོགས་མཚུངས་དགྲ་དང་རྫོག་དཔྱོད་དང་མཉམ་ཟླ་མ་དང་།
ལེགས་བྱས་དང་མཚུངས་གཉེན་ནི་འཛིག་རྟེན་དག་ན་ཅི་ཡང་མེད་པར་ས།། 200

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཨུ་དྲ་ཡ་ནའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་པའོ།།

इति भगवतः श्रुत्वा वाक्यं विचार्य्य च भिक्षवः
फलपरिणतिं ज्ञात्वा चित्रां शुभाशुभकर्म्मणाम् ।
खलजनवचस्तुल्यं शत्रुं विचारसमं गुरुं
सुकृतसदृशं बन्धुं लोके न किञ्चन मेनिरे ॥ २०० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां-
मुद्रायणावदानं चत्वारिंशः पल्लवः ।

ཡལ་འདབ་སྡེ་བཞི་བཅུ་ཞེ་གཅིག་པ།

གང་ཞིག་ས་སྐྱོང་འཁོར་པས་རབ་བསྐྲུན་རྒྱ་ཆེར་སྦྱིན་པའི་བསོད་
ནམས་ལས་ལྷག་པ།
དམ་པའི་འབྲུ་ཡི་ཁྲར་ནི་དབུལ་པ་རྣམས་ཀྱི་སྦྱིན་པ་ཤིན་དུ་ཆུང་བས་འཕྲོག།
ཆོས་དཀར་རྣམ་པར་འཕེལ་ལ་དད་པ་ལྡན་ཚོགས་དང་ལྷན་འཁོར་བ་མེད་པ་ནི།
རྣམ་པར་འཕེལ་བྱེད་དེ་ནི་སེམས་དང་ནོར་དག་དག་པ་ཉིད་ལ་རིགས་པ་ཡིན།། 1

རྒྱལ་བ་རྒྱལ་བྱེད་ཚལ་གྱི་ནི། ཀུན་དགའ་ར་བར་བཞུགས་ཆོ་སྟོན།
མཉན་ཡོད་དུ་ནི་ཁྱིམ་བདག་དག། བརྟན་པ་ཞེས་བྱ་ནོར་ཆེན་བྱུང་།། 2

མཁས་པ་ཞེས་བྱ་དེ་ཡི་བུ། ལེགས་བྱས་དག་ལ་མཁས་པ་བྱུང་།
ཉམས་པ་མེད་པའི་གྲགས་པ་དང་། བསོད་ནམས་ནོར་གྱི་རྒྱན་གྱིས་སྤྲས།། 3

འདི་ནི་བྱིས་པ་ཁོ་ན་ནས། ཤཱ་རིའི་བུ་སོགས་དགེ་སློང་རྣམས།
རྒྱལ་པོ་ལ་འོས་གོས་ཟས་ཀྱིས། མགྲོན་དུ་གཉེར་ཞིང་བསྙེན་བཀུར་བྱེད།། 4

དེ་ནས་ནམ་ཞིག་མི་བཟད་པའི། མུ་གེ་སྐྱེ་བོ་ཟད་བྱེད་པ།
བསླུང་བྲ་སློང་བྱེད་མཚུངས་པ་ཉིད། སློང་བའི་འཚོ་བ་ཆད་པ་བྱུང་།། 5

དགེ་སློང་རྣམས་ནི་ཉམ་ང་བ། མཆོག་དུ་མི་བཟད་དུས་དེར་ནི།
བདེ་བར་གཤེགས་པས་མཁས་པ་ནི། བོས་ནས་རྒྱལ་བྱེད་ཚལ་དུ་ཆས།། 6

एकचत्वारिंशः पल्लवः ।

यद्भूपालविशालदानविभवप्रोद्भूतपुण्याधिकं
दानस्यातिकृशस्य सत्फलभरमाप्नोत्यलं दुर्गतः ।
शुद्धस्यैव विरुद्धधर्म्मधवलश्रद्धासमृद्धान्वितं
निःसंसारविजृम्भितं तदुचितं चित्तस्य वित्तस्य च ॥ १ ॥

जिने जेतवनारामविहारिणि महाधनः ।
धीराभिधानः श्रावस्त्यामभूद् गृहपतिः पुरा ॥ २ ॥

तस्य पण्डितनामाभूत् पुत्रः सुकृतपण्डितः ।
अखण्डितयशःपुण्यदानालङ्कारमण्डितः ॥ ३ ॥

स बाल एव भिक्षूणां राजार्हैर्वस्त्रभोजनैः ।
शारिपुत्रप्रधानानां चकारातिथिसत्क्रियाम् ॥ ४ ॥

ततः कदाचिदक्षीणदुर्भिक्षक्षयिते जने ।
याच्ययाचकतुल्यत्वे पिण्डच्छेदोऽर्थिनामभूत् ॥ ५ ॥

भिक्षूणां सङ्कटे तस्मिन् काले परमदारुणे ।
पण्डितः सुगताहूतः प्रतस्थे जेतकाननम् ॥ ६ ॥

གསེར་གྱི་འཕྲེང་བས་སྤྲས་པ་ཡི། །ཧ་ཡིས་བསྒྲོད་པར་བྱེད་དེ་ལ། །
ཡོན་དན་རབ་རྒྱས་མི་བཟོད་པའི། །གཡོ་ཅན་སྔོན་དུ་ཕྱོགས་ནས་སྨྲས། ། 7

སློང་བའི་དོན་མཐུན་སློང་བ་ཡི། །དཔག་བསམ་ཤིང་ཁྲིད་ཕྱོགས་སུ་གྲགས། །
བདག་ཅག་ལྷ་བརྒྱ་ཁྲིད་ལ་ནི། །བསམ་པ་གཏད་ལ་ཡང་དག་འོངས། ། 8

རྒྱན་དང་གོས་ནི་རྫུང་རེ་དག །བདག་ཅག་སོ་སོ་ཡང་དག་འདོད། །
གལ་ཏེ་ཡོད་ན་ད་ལྟ་ཉིད། །ཐོགས་པ་མེད་པར་གནང་བར་མཛོད། ། 9

དེ་ཡི་འདི་བརྗོད་དམ་པ་ཡི། །སྤྱོད་ལྡན་དེ་ནི་ཧ་ལས་བབས། །
དེ་རྣམས་ལེགས་པར་མཆོད་བྱས་ནས། །བློ་དང་ལྡན་པས་སྐད་ཅིག་བསམས། ། 10

གལ་ཏེ་བཅོམ་ལྡན་མ་མཐོང་བར། །རང་གི་ཁྱིམ་དུ་ཕྱིན་པ་ན། །
བདུད་རྩི་འཐུང་ལ་ཉེ་བ་ཡི། །གོགས་དེ་བདག་གིས་ཇི་ལྟར་བཟོད། ། 11

སློང་རྣམས་འདོད་པ་མ་བྱིན་པར། །གལ་ཏེ་ཁྲེལ་མེད་ཕྱིན་པ་ན། །
སྦྱིན་པའི་བརྟུལ་ཞུགས་རང་ཉིད་ཀྱིས། །ཉམས་པ་འདི་ཡང་ཇི་ལྟར་བྱ། ། 12

དེ་ནི་དེ་ལྟར་སེམས་པ་ན། །ཀླུ་ཡི་རྒྱལ་པོ་ལྷག་མ་རང་། །
ས་གཞི་བརྡོལ་ནས་ཡང་དག་འཐོན། །སློང་རྣམས་འདོད་པ་རབ་དུ་བྱེར། ། 13

ཀླུ་ཡི་རྒྱལ་པོས་བྱིན་པ་ཡིས། །གོས་རྣམས་དང་ནི་རྒྱན་རྣམས་ཀུན། །
དེ་དག་རྣམས་ལ་བྱིན་ནས་དེ། །ཟུག་རྔུ་མེད་བཞིན་མགྱོགས་པར་སོང་། ། 14

तं व्रजन्तं तुरङ्गेण काञ्चनादामशोभिनम् ।
ऊचुर्विटाः समभ्येत्य गुणोत्साहासहिष्णवः ॥ ७ ॥

अर्थिसार्थार्थनाकल्पवृक्षस्त्वं दिक्षु विश्रुतः ।
शतानि पञ्च संप्राप्तास्त्वामुद्दिश्याशया वयम् ॥ ८ ॥

अलङ्कारांशुकयुगं प्रत्येकं नः समीहितम् ।
अधुनैवाविलम्बेन दीयतां यदि शक्यते ॥ ९ ॥

इत्युक्तस्तैः सदाचारः सोऽवतीर्य्य तुरङ्गमात् ।
साधु पूजां विधायैषां धीमान् क्षणमचिन्तयत् ॥ १० ॥

भगवन्तमदृष्ट्वैव गच्छामि स्वगृहं यदि ।
आसन्नामृतपानस्य तं विघ्नं कथमुत्सहे ॥ ११ ॥

अदत्त्वा प्रियमर्थिभ्यो व्रजामि यदि निस्त्रपः ।
कथं करोमि दानस्य तां स्वयं व्रतखण्डनाम् ॥ १२ ॥

इति चिन्तयतस्तस्य भित्त्वा भूमिं समुन्नतः ।
नागराजः स्वयं शेषः प्रादादर्थिसमीहितम् ॥ १३ ॥

दत्तानि नागराजेन वस्त्राण्याभरणानि च ।
स तेभ्यः प्रतिपाद्याशु ययौ निःशल्यतामिव ॥ १४ ॥

དེས་ཀྱང་ངོ་མཚར་དེ་མཐོང་ནས། བདེ་གཤེགས་བསྐྱོམས་པའི་བསོད་ནམས་ནི།
དོན་ཀུན་ཕུན་སུམ་ཚོགས་པ་དག། འགྲུབ་པའི་མ་ཉིད་ཡིན་པར་སེམས།། 15

དེ་ནས་སེམས་ནི་རབ་དང་སྐྱེས། ཞེ་སྡང་སྡིག་པ་རྣམ་པར་ཉམས།
དེ་དག་དེ་དང་ལྷན་ཅིག་ཉིད། བཅོམ་ལྡན་འདས་ལ་བལྟ་རུ་སོང་།། 16

དེ་ནས་བཅོམ་ལྡན་མཐོང་གྱུར་ནས། གཞོན་ནུས་བཞིན་ནི་རབ་བདུད་རྩི།
དེ་ནས་ཞབས་ཀྱི་པད་རྡུལ་གྱིས། སྐལ་ལྡན་དཔྲལ་བར་ཐིག་ལེ་བྱས།། 17

སྟོན་པའི་ཞབས་གཉིས་མདུན་དུ་ནི། དོ་ཤལ་རྒྱ་འོད་རབ་འབར་བ།
བཀོད་ནས་མདུན་དུ་རབ་བདུད་པ། དེ་དག་དེ་ཡིས་དེ་ལ་གསོལ།། 18

བཅོམ་ལྡན་ཡེ་ཤེས་རྡོ་རྗེ་འཛིན། དེ་དག་རྣམས་ལ་ཆོས་བསྟན་པས།
འཇིག་ཚོགས་ལྟ་བའི་རི་ཕྱུག་ནས། རྒྱུན་དུ་ཞུགས་པའི་འབྲས་བུ་བསྒྲུབས།། 19

དེ་ནས་བདེན་མཐོང་དེ་དག་རྣམས། དེ་ལ་ཕྱག་འཚལ་སོང་བའི་ཚེ།
གཞོན་ནུ་མཁས་པ་དག་ལ་ནི། བཅོམ་ལྡན་དགྱེས་པས་མངོན་གསུངས་པ།། 20

བསོད་ནམས་དག་གིས་བུ་ཁྱོད་ནི། ལེགས་བྱས་དཔལ་འབྱོར་ཡོངས་རྫོགས་ཐོབ།
ཟུ་གའི་བར་དུ་དགེ་སློང་རྣམས། ཟས་ལ་ལྷག་པར་གནས་པ་མཛོད།། 21

བདག་གིས་དགེ་སློང་བརྒྱ་ཕྲག་ནི། ཕྱེད་དང་བཅུ་གསུམ་ཡོངས་བཟུང་ལ།
གཞན་ཡང་ཁྱོད་ཀྱིས་གྲོང་ཁྱེར་ལ། ཚོལ་རྒྱལ་གཟིར་ལ་བགོ་བཤར་བྱ།། 22

तेऽपि दृष्ट्वा तदाश्चर्य्यं पुण्यां सुगतभावनाम् ।
सर्व्वार्थसम्पत्सिद्धीनां जननीमेव मेनिरे ॥ १५ ॥

जातचित्तप्रसादास्ते तेनैव सहितास्ततः ।
भगवन्तं ययुर्द्रष्टुं विनष्टद्वेषकल्मषाः ॥ १६ ॥

भगवन्तमथालोक्य कुमारः प्रणताननः ।
तत्पादपद्मरजसा धन्यश्चक्रे ललाटिकाम् ॥ १७ ॥

हारं पुनश्चरणयोः शास्तुः शशिकरोज्ज्वलम् ।
विन्यस्य प्रणतानग्रे स तानस्मै न्यवेदयत् ॥ १८ ॥

धर्म्मदेशनया तेषां भगवान् ज्ञानवज्रभृत् ।
भित्त्वा सत्कायदृष्ट्यद्रिं स्रोतःप्राप्तिफलं व्यधात् ॥ १९ ॥

दृष्टसत्येषु यातेषु ततस्तेषु प्रणम्य तम् ।
कुमारं पण्डितं प्रीत्या भगवान् स्वयमभ्यधात् ॥ २० ॥

वत्स पुण्यैरवाप्तोऽसि पर्य्याप्तिं सुकृतश्रियाम् ।
दुर्भिक्षेष्वपि भिक्षूणां कुरु भोज्याधिवासनाम् ॥ २१ ॥

परिग्रहो मे भिक्षूणां शतान्यर्द्धत्रयोदश ।
अन्ये चान्विष्य कृच्छ्रार्त्ताः संविभज्यास्त्वया पुरे ॥ २२ ॥

བཅོམ་ལྡན་འདས་ཀྱིས་འདི་ཐོས་ནས། མཁས་པ་རབ་ཏུ་དགའ་བར་དཀྲིགས།
ཇི་སྲིད་འཚོ་བར་གསུམ་པ་ཡིས། དགེ་འདུན་མགྲོན་དུ་གཉེར་བར་བྱས།། 23

དེ་ནས་རང་གི་ཁྱིམ་སོང་སྟེ། དགེ་སློང་རབ་བཞེད་རྒྱལ་པོ་ལ།
འོས་པའི་ཟས་ཀྱིས་རྟག་ཏུ་ནི། རྫོགས་སངས་རྒྱས་སོགས་དགེ་འདུན་མཆོད།། 24

དབུལ་དང་དབུལ་བ་མིན་རྣམས་དང་། བསྐྱང་བྱ་དང་ནི་སློང་བྱེད་དང་།
བརྩེ་བས་འོས་པ་རྣམས་ལ་དེས། སྦྱིན་པ་ཟས་ཀྱིས་བརྩེ་བ་བསྐྱབས།། 25

ལྷག་མ་འཛུངས་པའི་ཚོགས་རྣམས་ནི། སྙིང་རྗེའི་རྒྱུ་གཉེར་དེས་བཅལ་ནས།
དེ་དག་རྣམས་ལ་རིན་ཆེན་ཚོགས། དབུལ་བའི་རབ་རིབ་འཕྲོག་པ་བྱིན།། 26

རིན་ཆེན་ཚོགས་དེ་དེ་དག་ལ། སྨོན་པའི་ཕུང་པོ་ཉིད་དུ་གྱུར།
གང་ཕྱིར་ནོར་བུ་ཇི་རང་བཞིན། རིན་ཆེན་མི་རྣམས་སྐལ་བའོ།། 27

དེ་དག་འོངས་ནས་དེ་ལ་སྨྲས། རྒྱ་ལམ་ནོར་ནི་མཐོང་བ་བཞིན།
རིན་ཆེན་མིང་གི་སོལ་ཕུང་དེ། ཁྱོད་ཀྱིས་བདག་ཅག་རྣམས་ལ་བྱིན།། 28

སྐྱེ་བོ་ནོར་ཆེན་རྙེད་པ་ཡིས། འཕྲལ་ལ་མཐོན་པོ་ཐོབ་གྱུར་པ།
སྐད་ཅིག་ཁོ་ནས་དེ་ཟད་ལས། ཡོངས་སུ་ཉམས་པ་མི་འཚོ་འོ།། 29

ཞེས་པ་དེ་དག་ཚིག་ཐོས་ནས། མཁས་པ་སྙིང་རྗེའི་གཏེར་དག་གིས།
དེར་སྤྲུས་བསོད་ནམས་དམན་རྣམས་ལ། རིན་ཆེན་རིན་ཆེན་མིན་ཉིད་འགྱུར།། 30

इति श्रुत्वा भगवतः पण्डितः प्रमदाकुलः ।
भक्त्या सङ्घस्य विदधे यावज्जीवं निमन्त्रणम् ॥ २३ ॥

ततः स्वगृहमभ्येत्य राजार्हैः भिक्षुसम्मतैः ।
संबुद्धप्रमुखं सङ्घं सदा भोज्यैरपूजयत् ॥ २४ ॥

दरिद्रानदरिद्रांश्च याच्यानपि च याचकान् ।
अनुकम्प्यान् स विदधे दानेनान्यानुकम्पिनः ॥ २५ ॥

शेषान् कृपणसङ्घातान् सोऽन्विष्य करुणाम्बुधिः ।
रत्नराशिं ददौ तेभ्यो दौर्गत्यतिमिरापहम् ॥ २६ ॥

स रत्ननिकरस्तेषां जगामाङ्गाररराशिताम् ।
नृणां भाग्यानि रत्नानि मणयः प्रस्थजातयः ॥॥ २७ ॥

ते तमूचुः समभ्येत्य स्वप्नदृष्टधना इव ।
रत्ननाम्ना त्वयास्माकं स दत्तोऽङ्गारसञ्चयः ॥ २८ ॥

धनलाभेन महता सद्यः प्राप्तोन्नतिर्जनः ।
तत्संक्षयात् क्षणेनैव परिभ्रष्टो न जीवति ॥ २९ ॥

इति तेषां वचः श्रुत्वा पण्डितः करुणानिधिः ।
तानूचे पुण्यहीनानां रत्नान्यायान्त्यरत्नताम् ॥ ३० ॥

ཁྱེད་ཀྱིས་སྡོན་ནི་སྨོང་མ་པ་ལས། ཡིགས་བྲུས་ཚོགས་ནི་མ་བྲུས་པ།
དེས་ན་རིན་ཅེན་ཕྱུང་པོ་འདི། ཁྱེད་ལ་སོལ་བའི་ཕྱུང་པོར་གྱུར། 31

རིན་ཅེན་རྣམས་ནི་འབད་ནས་བཟུང་ཡང་བསོད་ནམས་ཟད་པ་ལས།
རིང་དུ་འགྲོ་ཞིང་སྐལ་བ་ལྡན་པ་ལས་ཀུང་ཉེ་བར་འོངས།
ནོར་རྣམས་སྐྱུབ་པ་དག་ནི་རྒྱ་ཆེ་སྲུ་ངན་མཚན་མ་ཉིད།
ནོར་ནི་ཡིགས་བྲུས་དག་ལ་རབ་ཞུགས་རིགས་པའི་སེམས་ཉིད་དོ། 32

དེ་སྐད་ཁྱེད་ཀྱི་དགེ་སྦྱོང་གི། དགེ་འདུན་ཟས་ལ་སྤྱ་གོན་མཛོད།
ལོངས་སྤྱོད་ཕུན་སུམ་ཚོགས་པའི་ཚོགས། བདག་གིས་ཁྱེད་ལ་ཕུན་
ཚོགས་བགྱི། 33

ཞེས་བརྗོད་དེ་ཡི་ནོར་དང་ཟས། ཕུན་སུམ་ཚོགས་པ་བྱིན་པ་དེས།
སངས་རྒྱས་ལ་སོགས་དགེ་འདུན་རྣམས། དེ་དག་གིས་ནི་ཉིན་གཅིག་མཆོད། 34

དགེ་འདུན་ཇི་ལྟ་བཞིན་མཆོད་ནས། སྐད་ཅིག་སྨོན་ལམ་དེ་དག་གིས།
བདག་ཅག་ནམ་ཡང་དབུལ་པོར་ནི། མ་གྱུར་ཅིག་ཅེས་བྱ་བ་བྱས། 35

དེ་ནས་མཁས་པའི་ཚིག་དག་གིས། དེ་དག་སོང་བས་མདུན་དུ་ནི།
སོལ་ཕུང་དེ་ཉིད་རིན་ཅེན་གྱི།། ཕུང་པོ་ཉིད་དུ་གྱུར་པ་མཐོང་ ། 36

དེ་ནས་མཁས་པ་གཞོན་ནུ་ནི། མཐུ་དང་ལྡན་པའི་ཁྱིམ་ཉིད་དུ།
རྣམ་པར་བཞག་པའི་གཏེར་དག་ནི། གེགས་མེད་བརྒྱ་དག་བྱུང་བར་གྱུར། 37

युष्माभिर्न कृतः पूर्वं मोहात् सुकृतसञ्चयः ।
तेनायं रत्नराशिर्वः प्रयातोऽङ्गारसारताम् ॥ ३१ ॥

रत्नानि यत्ननिहितान्यपि यान्ति दूरं
पुण्यक्षयादुपनयन्ति च भाग्ययोगात् ।
वित्तार्जनं पतितशोकनिमित्तमेव
वित्तं हि चित्तमुचितं सुकृतप्रवृत्तम् ॥ ३२ ॥

तस्माद् भवद्भिर्भोज्याथ भिक्षुसङ्घोऽधिवास्यताम् ।
भोगसम्भारसम्पत्तिमहं सम्पादयामि वः ॥ ३३ ॥

इत्युक्तास्तेन तद्दत्तवित्तभोजनसम्पदा ।
ते बुद्धप्रमुखं सङ्घं दिनमेकमपूजयन् ॥ ३४ ॥

सङ्घं यथावदभ्यर्च्य प्रणिधानमकारि तैः ।
मा कदाचन दारिद्र्यं स्यादस्माकमिति क्षणम् ॥ ३५ ॥

ततस्ते पण्डितगिरा गत्वा ददृशुरग्रतः ।
तमेवाङ्गारनिकरं प्रयातं रत्नराशिताम् ॥ ३६ ॥

भवने पण्डितस्याथ कुमारस्य प्रभावतः ।
विवृतानां निधानानां निर्विघ्नं शतमुद्ययौ ॥ ३७ ॥

ཆོས་ཤེས་དེ་ཡི་ལུགས་བསྲུང་སྐད། རྒྱལ་པོ་གསལ་རྒྱལ་ཉིད་ལ་ནི།
གཏེར་གྱི་དྲུག་ཆ་ཕྲུམ་དེ་ཡང་། དེ་ལ་སོལ་བ་ཉིད་དུ་གྱུར། 38

གཞོན་ནུ་ཉིད་ཀྱི་བསོད་ནམས་ཀྱིས། གཏེར་གྱི་ཚོགས་འདི་སྤྱོད་བྱ་ཡིན།
ཞེས་པའི་ཚིག་འདི་བར་སྣང་ལས། དེ་ནས་ས་ཡི་བདག་པོས་ཐོས། 39

གཞོན་ནུ་ཉིད་ཀྱི་ཚིག་གི་ཡིན། གཏེར་རྣམས་དག་ནི་གཏེར་ཉིད་དུ།
སྣར་གྱུར་ངོ་མཚར་བཅས་པ་ཡིས། མི་བདག་གིས་ནི་དེ་ཁྲིམས་སྒྲིངས། 40

དེ་ནས་ནོར་རྣམས་མ་ལུས་པ། གཞོན་ནུ་བསམས་པ་ཡངས་པ་ཡིས།
བྲིན་ནས་ཕྱུན་སུམ་ཚོགས་པ་རྣམས། དབུལ་པོའི་ཁྲིམ་དུ་གནས་པར་གྱུར། 41

དེ་ནས་འཁོར་བ་སྙིང་པོ་མེད། རྣམ་པར་དཔྱོད་ཕྱིར་ཆགས་བྲལ་བ།
བརྟན་པ་དེ་ཡིས་མི་རྟག་ཉིད། ཡང་དག་བསམསས་ནས་ཞི་ལ་སླུས། 42

ཡབ་གཅིག་དཀར་ཐུབ་ནགས་སུ་བདག། འགྲོ་བ་རི་ཞིག་གནང་བར་མཛོད།
སྐྱེ་བ་བརྒྱ་ཡི་ལྷག་མ་ཡིས། འབྱོར་པ་ཉིད་ཀྱིས་བདག་ཉོན་མོངས། 43

འཇིག་རྟེན་གསུམ་གྱི་ཕུན་ཚོགས་ཐོབ། གང་དུ་སྤྱོད་བྱ་ཉིད་འགྱུར་བ།
འབྱུང་པོ་ཀུན་གྱི་ཚེ་ཡི་ནི། སྟོད་འདི་ཤིན་དུ་ཆུང་བ་ཉིད། 44

स प्रसेनजिते राज्ञे धर्म्मज्ञः स्थितिरक्षणात् ।
ददौ निधानषड्भागं स चास्याङ्गारतामगात् ॥ ३८ ॥

कुमारस्यैव सुकृतैर्भोग्योऽयं निधिसञ्चयः ।
इत्यन्तरीक्षाद्वचनं ततः शुश्राव भूपतिः ॥ ३९ ॥

कुमारस्यैव वचसा *तान्निधीन्निधितां पुनः ।
प्राप्तान्विलोक्य साश्चर्य्यः प्राहिणोत्तद्गृहं नृपः ॥ ४० ॥

ततस्तदखिलं वित्तं वितीर्य्य विपुलाशयः ।
कुमारः सम्पदां चक्रे स्थितिं दुर्गतवेश्मसु ॥ ४१ ॥

अथ निःसारसंसारविचारविरतस्पृहः ।
अनित्यतां स सञ्चिन्त्य धीरः पितरमब्रवीत् ॥ ४२ ॥

अनुजानीहि मां तावत् गन्तुं तात तपोवनम् ।
इमा जन्मशतोच्छिष्टा क्लिष्टा मम विभूतयः ॥ ४३ ॥

त्रैलोक्यसम्पत्संप्राप्तिर्यस्मिन् व्रजति भोग्यताम् ।
तदिदं सर्व्वभूतानामायुर्भाजनमल्पकम् ॥ ४४ ॥

---

* सान्निध्यादिति मूलपुस्तके ।

གང་ཞིག་གྲང་ལ་རྒྱུན་དུ་བདག་གིས་རི་ག་བྲ་འཛམ་པའི་གོས་ཀྱིས་
གཡོག་བྲ་ཞིང་།

གང་ཞིག་གདུང་ལ་བདག་གི་དཔལ་གྱི་དུམ་བུ་བསིལ་བའི་བྱུགས་
པས་བྱུག་པ་བྱ།

གང་གི་དོན་དུ་དུག་མཚོན་མེ་དང་ལག་འགྲོ་འི་ཚོགས་ལས་མ་རྟོག
དུ་འཇིགས་པ་འཕྲོབ།

བདག་གི་ལུས་འདི་གནོད་པ་དག་ལས་ཡོངས་སུ་བསྲུངས་ཀྱང་
འཇིག་པ་ཉིད་དུ་འགྱུར། ། 45

ཡོངས་སྤྱོད་ལས་ནི་ཆགས་བྲལ་བདག། དགའ་བའི་རབ་བྱུང་བླངས་ནས་ནི།
ནགས་སུ་གནས་ཤིང་བསམ་པ་ཡིས། གདུངས་པ་སེམས་ཀྱི་གཟིར་བ་འཕྲོག ། 46

ཅེས་བརྗོད་ཤབ་ཀྱིས་ཁས་བླངས་ནི། བྲམ་ཞེས་ཡུལ་ལ་ཆགས་པ་ཡི།
འཆིང་བ་དེ་ཡིས་ཡོངས་བཏང་ནས། ཤཱ་རིའི་བུ་ཡི་གནས་སུ་སོང་། ། 47

དེར་ནི་དེ་ཡིས་རབ་ཕྱུང་སྟེ། ལག་ན་སྣང་བཟེད་ཆོས་གོས་ཅན།
དེ་ཡི་རྗེས་འབྲང་ཉིད་གྱུར་ནས། བདུལ་ཞུགས་ཀྱིས་བསླམས་རྣམ་པར་རྒྱུ། ། 48

ཞིང་པ་རྣམས་ཀྱིས་བསྟན་པ་ཡིས། ཞིང་ནས་ཞིང་ལ་འཇུག་པའི་རྒྱུ།
ལམ་ནས་བགྲོད་པ་དེ་མཐོང་ནས། ཡ་མཚན་ལས་ནི་འདི་ལྟར་བསམས། ། 49

ཀྱེ་མ་སེམས་མེད་རྒྱུ་རྣམས་ཀྱང་། བསྒྲུབས་པའི་ལམ་ནས་བགྲོད་པ་ཡིས།
ལས་ནི་ཡང་དག་སྒྲུབ་མཐོང་སྟེ། ལུས་ཅན་རྣམས་ལ་མ་ཡིན་ནོ། ། 50

शीते यस्य करोमि सन्ततमृदुस्पर्शांशुकैर्गूहनं
सन्तापे रचयामि यस्य शिशिरश्रीखण्डचर्चार्चनम् ।
यस्यार्थे विषशस्त्रवह्निभुजगव्रातात् परं मे भयं
प्राप्तः सोऽयमपायतः परिहृतोऽप्यायाति कायः
क्षयम् ॥ ४५ ॥

भोगाद्विरक्तः प्रव्रज्यामादाय दयितां वने ।
विहरामि हरन् चिन्तां चिन्तातप्तस्य चेतसः ॥ ४६ ॥

इत्युक्त्वा स परित्यज्य विषयस्नेहबन्धनम् ।
कृताभ्युपगमः पित्रा शारिपुत्राश्रमं ययौ ॥ ४७ ॥

तत्र प्रव्रजितस्तेन पात्रपाणिः सचीवरः ।
तस्यैवानुचरो भूत्वा विचचार यतव्रतः ॥ ४८ ॥

स दृष्ट्वा कर्षकैर्धारां क्षेत्रात् क्षेत्रप्रवर्त्तिताम् ।
निर्दिष्टेन पथा यान्तीं विस्मयादित्यचिन्तयत् ॥ ४९ ॥

अहो विहितमार्गेण गच्छतामप्यचेतसाम् ।
जलानां कर्म्मसंसिद्धिर्दृश्यते न तु देहिनाम् ॥ ५० ॥

ཞེས་བསམས་བགྲོད་པས་མདུན་དུ་ནི། མདའ་མཁན་དག་གིས་མདའ་བསྒྲིམས་ཤིང་།
དྲང་པོར་བྱེད་པ་མཐོང་གྱུར་ནས། བློ་ལྡན་མཆོག་དེས་རབ་དུ་བསམས།། 51

མདའ་ནི་སེམས་མེད་འདི་དག་རྣམས། གདུང་བས་དྲང་པོ་ཉིད་འགྱུར་དེ།
ལུས་ཅན་འཁྲུག་པོ་རྣམས་དག་ནི། འཁོར་བའི་གདུང་བས་ཀྱང་མ་ཡིན།། 52

ཞེས་སེམས་མདུན་དུ་ཤིང་མཁན་གྱིས། ཤིང་རྟའི་འཁོར་ལོ་ཉིད་བྱས་པའི།
བརྟན་པའི་གཟུགས་རྣམས་མཐོང་གྱུར་ནས། སྒྱུར་ཡང་ཡང་དག་སེམས་པར་གྱུར།། 53

ཀྱེ་མ་སེམས་མེད་ཤིང་རྣམས་ནི། བཟོ་ཡི་སྦྱོར་བས་སྐད་ཅིག་ལས།
ལས་སུ་རུང་བ་ཉིད་འགྱུར་དེ། ལུས་ཅན་རྣམས་ཀྱི་སེམས་མ་ཡིན།། 54

འདི་དག་བསམས་ཤིང་ཡང་དག་སོང་། ཆོས་བཟང་ངེས་པ་ལ་ཞུགས་པ།
དེ་ཡི་སློབ་དཔོན་ལ་སླས་པ། མཉེས་ག་ཞེན་པ་ལ་བུ་ཡིས་བཞིན།། 55

འཕགས་པ་ཉིད་ནི་བསོད་སྙོམས་ལ། དེ་རིང་བདག་གི་ཆེད་དུ་གཞེགས།
ཁྱེད་ཀྱི་བསྟན་པ་རང་ཉིད་ཀྱི། བརྟུལ་ཞུགས་བདག་གིས་བསམས་པར་བགྱི།། 56

ཞེས་དེ་ཟས་ཀྱི་བྱ་བ་ནི། མཁན་པོ་ལ་གསོལ་མཁན་པ་ནི།
དེ་སོང་ཚེ་ན་དེས་བསྟན་པའི། གཙུག་ལག་ཁང་གི་ཁང་པར་ཞུགས།། 57

དེ་ནི་གཡོ་མེད་སྐྱིལ་ཀྲུང་བཅས། ལུས་ནི་དྲང་པོ་ཉིད་དུ་བྱས།
དྲན་པ་སྔོན་དུ་བྱས་ནས་ནི། དེ་ཡིས་རང་གི་ཆོས་ལ་བསམས།། 58

सञ्चिन्त्येति व्रजन्नग्रे दृष्ट्वा यष्टीकृतं शरम् ।
प्रतप्तमिषुकारेण प्रदध्यौ धीमतांवरः ॥ ५१ ॥

तापात् प्रगुणतामेते यान्ति निश्चेतनाः शराः ।
न तु संसारसन्तप्ता अपि वक्राः शरीरिणः ॥ ५२ ॥

इति ध्यायन् विलोक्याग्रे तक्ष्णा शकटचक्रताम् ।
नीतानि दृढ़रूपाणि पुनश्चिन्तां समाययौ ॥ ५३ ॥

अहो नु घटनायोगाद् यान्ति कर्म्मण्यतां क्षणात् ।
निश्चेतनानि दारूणि न चित्तानि शरीरिणाम् ॥ ५४ ॥

इति सञ्चिन्त्य संयातः सुधर्म्मनियमादरः ।
वत्सलं पितरं पुत्र इवाचार्य्यमुवाच सः ॥ ५५ ॥

आर्य्य एव प्रयात्वद्य पिण्डपाताय मत्कृते ।
अहन्तु भवतादिष्टं चिन्तयामि निजव्रतम् ॥ ५६ ॥

इत्युपाध्यायमभ्यर्थ्य भक्तकृत्याय पण्डितः ।
तस्मिन् याते तदादिष्टं विहारागारमाविशत् ॥ ५७ ॥

तत्र यष्टीकृततनुः कृत्वा प्रतिमुखीं स्मृतिम् ।
स प्रदध्यौ निजं धर्म्मं बद्धपर्य्यङ्कनिश्चलः ॥ ५८ ॥

རེ་ཞིག་ཏིང་འཛིན་ལ་ཞུགས་ཚེ། ནོར་འཛིན་འཛིན་མ་འཛིན་བྱེད་བཅས།
མ་ལུས་རྒྱ་གཏེར་རྒྱ་རླབས་ཀྱིས། དུ་གུ་ལ་ཡི་གོས་ཅན་གཡོས། ། 59

ངེས་པའི་བསམ་གཏན་དེ་ཞིས་ནས། གེགས་མེད་གྲུབ་སླད་བརྒྱ་བྱིན་གྱིས།
ཕྱོགས་སུ་བསྲུང་སླད་ཕྱོགས་སྐྱོང་ནས། ཟླ་བ་ཉི་མར་བཅས་པ་བཀོས། ། 60

དེ་ནས་བཅོམ་ལྡན་ཀུན་མཁྱེན་གྱིས། དེ་ཡི་དགེ་རྩ་སྨིན་པ་ལས།
གྲུབ་པ་ཉེ་བར་གནས་པ་དག། མཁྱེན་ནས་སྐད་ཅིག་ཡང་དག་བསམས། ། 61

འདི་ཡི་དགྲ་བཅོམ་ཉེ་བ་ལ། གལ་ཏེ་ཤཱ་རིའི་བུ་འོངས་ནས།
སྒོ་ནི་རབ་ཏུ་བརྟུངས་པ་ན། བར་དུ་བགེགས་འདི་ཐེ་ཚོམ་མེད། ། 62

དེ་ནས་དེ་ནི་འོང་བ་ཡིས། སྔོན་དུ་བདག་རང་ཉིད་སོང་སྟེ།
སྣ་ཚོགས་འདྲི་བ་ལ་བརྟེན་པའི། གདམས་ཀྱི་དུས་ནི་དགྲོག་པར་བྱ། ། 63

དེ་ལྟར་དགོངས་ནས་བཅོམ་ལྡན་འདས། རང་ཉིད་ཕྱོགས་དེར་བྱོན་ནས་ནི།
དགེ་སློང་དེ་ནི་འོང་བ་དག། གདམས་ཀྱིས་ཐོགས་པ་ཉིད་དུ་བྱས། ། 64

ལྷ་ཡི་མཐུ་ལས་མཁར་བགྲོད་རྣམས། སྒྲ་མེད་ལུས་ནི་བསྒྲམས་གྱུར་པའི།
འཇིག་རྟེན་དུ་ནི་མཁས་པ་ཡིས། རླུང་མེད་སྒྲོན་མ་ཉིད་མཚུངས་ཐོབ། ། 65

དེ་ཡིས་རྒྱུན་ཞུགས་འབྲས་བུ་ལས། སྟེང་དུ་ལན་གཅིག་ཕྱིར་འོང་ཐོབ།
ཕྱིར་མི་འོང་གི་འབྲས་ཐོབ་ནས། དེ་ནས་དགྲ་བཅོམ་འབྲས་བུ་ཐོབ། ། 66

तस्मिन् समाधिसन्नद्धे वसुधा सधराधरा ।
विचचालाखिलाम्भोधिजललोलदुकूलिनी ॥ ५९ ॥

शक्रस्तं ध्याननिरतं ज्ञात्वा निर्विघ्नसिद्धये ।
दिदेश दिक्षु रक्षार्थं दिक्पालान् सेन्दुभास्करान् ॥ ६० ॥

भगवानथ सर्व्वज्ञस्तस्य सिद्धिमुपस्थिताम् ।
पाकात् कुशलमूलानां ज्ञात्वा क्षणमचिन्तयत् ॥ ६१ ॥

आसन्नार्हत्पदस्यास्य शारिपुत्रः समेत्य चेत् ।
द्वारमुद्घाटयेन्मध्ये विघ्न एष न संशयः ॥ ६२ ॥

तस्मादागच्छतस्तस्य गत्वा स्वयमहं पुरः ।
करोमि कालहाराय नानाप्रश्नाश्रयाः कथाः ॥ ६३ ॥

इति सञ्चिन्त्य भगवान् स्वयं तद्देशमागतः ।
भिक्षोरागच्छतस्तस्य विलम्बं कथयाकरोत् ॥ ६४ ॥

सुरप्रभावान्निःशब्दे नभोगत*विहङ्गमे ।
लोके निर्वातदीपस्य तुल्यतां प्राप पण्डितः ॥ ६५ ॥

स्रोतःप्राप्तिफलादूर्द्ध्वं सकृदागाम्यवाप्य सः ।
अनागामि फलं प्राप्य ततोऽर्हत्फलमाप्तवान् ॥ ६६ ॥

---

* मूलपुस्तके "निम्नङ्गे" इति पाठः ।

དེ་ནས་གཏམ་གྱི་མཇུག་ཏུ་ནི། བདེ་གཤེགས་གཤེགས་ཏེ་རང་གནས་སུ།
ཤཱ་རིའི་བུ་ཡིས་ཞུགས་པ་ན། སློབ་མ་ཉི་མ་བཞིན་དུ་མཐོང་། ॥ 67

སྲིད་པའི་འཆིང་བ་རྣམ་བཏང་ཞིང་། འཕྲུལ་ལ་ཐར་པ་དེ་མཐོང་ནས།
དེ་ཡིས་གྲུབ་པ་དུས་བཞི་བརྒྱུས། ཐོབ་བྱ་དེ་ནི་དེ་ཡིས་བསྒྲགས། ॥ 68

དེ་ཡིས་དགྲ་བཅོམ་གནས་ཐོབ་པར། འགྲོ་ལ་གྲགས་པ་དེ་ཐོས་ནས།
དགེ་སློང་རྣམས་ཀྱིས་དེ་ཡིས་གདམས། དྲིས་ཤིང་བཅོམ་ལྡན་རྒྱལ་བས་
གསུངས། ॥ 69

དེ་བཞིན་གཤེགས་པ་བཅོམ་ལྡན་འདས། འོད་སྲུངས་བ་ར་ཎ་སེར་སྤྱོད།
དགེ་སློང་སྟོང་ཕྲག་ཉི་ཤུ་དང་། ལྷན་ཅིག་གྲོང་ཁྱེར་བ་རྣམས་ཀྱིས། ॥ 70

དད་པས་ཕུལ་ཞིང་གཙང་མ་ཡི། ལོངས་སྤྱོད་ཡིད་འོང་ཐམས་ཅད་ཀྱིས།
མཆོད་ཅིང་དུས་ནི་ཇི་སྙེད་ཅིག། སེམས་ཅན་ཕན་པར་བརྩོན་པས་བཞུགས། ॥ 71

དེར་ནི་དགེ་སློང་མཆོད་ལ་ཆགས། ཁྱིམ་བདག་ཁྱིམ་དུ་ཞུགས་པ་ན།
དབུལ་པོ་ཞེས་པའི་དབུལ་པོ་ཡིས། ཤུགས་རིངས་སྤྱུངས་ནས་རབ་
བསམས་པ། ॥ 72

གང་ཞིག་སྐལ་བ་དམན་པ་ཡིས། དགེ་སློང་གཅིག་ཀྱང་མགྲོན་མ་གཉེར།
ཤིན་ཏུ་དབུལ་ལས་དགེ་བ་ཡིས། བྱ་བ་བཏང་བ་བདག་འདྲ་དམན། ॥ 73

ངག་ཚད་ཚིག་ནི་འཚམས་སྦྱོར་རྣམས་ལ་རིགས་པ་ཡོད་མིན་ཞིང་།
བྱ་བ་ཉམས་ཤིང་བྱེད་པ་དང་བྲལ་དེ་ཉིད་དམན་གྱུར་པ།

ततः कथान्ते सुगते प्रयाते निजमाश्रमम् ।
शारिपुत्रः प्रविश्यार्कमिव शिष्यं व्यलोकयत् ॥ ६७ ॥

तं दृष्ट्वा सहसोत्तीर्णं विशीर्णभवबन्धनम् ।
सिद्धिं युगशतप्राप्यां तस्य तां प्रशशंस सः ॥ ६८ ॥

तां तस्यार्हत्पदप्राप्तिं श्रुत्वा जगति विश्रुताम् ।
भिक्षुभिर्भगवान् पृष्टस्तत्कथामब्रवीज्जिनः ॥ ६९ ॥

भगवान् काश्यपः पूर्व्वं वाराणस्यां तथागतः ।
सह भिक्षुसहस्राणां विंशत्या पुरवासिभिः ॥ ७० ॥

श्रद्धाप्रणीतैः शुचिभिः सर्व्वभोग्यैर्मनोऽनुगैः ।
उवास पूजितः कञ्चित् कालं सत्वहितोद्यतः ॥ ७१ ॥

भिक्षुपूजापरे तत्र वर्त्तमाने गृहे गृहे ।
अचिन्तयद्विनिःश्वस्य दुर्गतो नाम दुर्गतः ॥ ७२ ॥

धिङ् मामतीव दारिद्र्यात् नीचं* निष्कुशलक्रियम् ।
नैकोऽपि मन्दभाग्येन येन भिक्षुर्निमन्त्रितः ॥ ७३ ॥

त्याज्या जनस्य सकलव्यवहारवाह्याः
वाक्यप्रमाणपदसन्धिषु नैव योग्याः ।

---

* "निस्वतुः" इति मूलपुस्तके ।

ཐ་སྐད་ཀུན་ལས་ཁྲི་རོལ་གྱུར་ཅིང་དོན་དང་བྲལ་བ་ཡི།
སྒྲ་རྣམས་བཞིན་དུ་སྐྱེས་བུ་རྣམས་ཀྱི་སྐྱེ་བོས་དོན་བྲ་ཡིན།། 74

འདི་བསམས་མེ་ཡི་ཟིལ་གནོན་ཅིང་། ནོར་གྲིས་དམན་ཞིང་སློང་བྱེད་པ།
དེ་ལ་ལེགས་བྱས་སྐུལ་བྱེད་པའི། ལས་པས་མངོན་དུ་ཕྱོགས་དེ་སྨྲས།། 75

ནོར་གྲིས་དམན་པ་ཁྱོད་ཀྱིས་ཀྱང་། སྐྱེ་བ་གཞན་དུ་དགེ་ཐོབ་སླད།
ཇི་ཞིག་ལྷུར་ཡང་དགེ་སློང་ནི། གཅིག་ཀྱང་ཅི་སླད་མགྲོན་མི་གཉེར།། 76

ཞེས་པ་དེ་ཡིས་བཙོད་པ་ན། ཟུག་རྒྱུ་ཟུག་པ་སླར་བསྐྱུན་བཞིན།
དགེ་སློང་ཞལ་ཟས་མ་འགྱུར་བས། དེ་ནི་མཆོག་དུ་གདུང་བར་གྱུར།། 77

ཚོང་དཔོན་ཁང་པར་ཇི་ཞིག་ལྷུར། དཀྲིས་པས་ཡོངས་ཉེན་དེ་སོང་ནས།
འབད་པས་ཤིང་ནི་གཅོད་པ་ཡི། ལས་ཀྱིས་རིན་གྱི་ཆ་ཤས་ཐོབ།། 78

དེ་ཡི་རྐྱང་མའི་དག་བའི་འབྲས། དེ་ཉིད་དུ་ནི་གྱུབ་བྱས་ནས།
དེ་ཡི་གླ་བརྙན་ཆ་ཤས་ཐོབ། གྱུས་པས་ཟླ་བོ་དག་ལ་ཕུལ།། 79

དེ་ནས་དད་པས་དགེ་སློང་གི། ཟས་ནི་བསྒྲུབ་པར་བརྩོན་གྱུར་པ།
སྙིང་སྟོབས་དག་པ་དེ་ཡིས་ནི། རྗེས་སུ་སྒྲུབ་བྱེད་བརྒྱ་བྱིན་གྱུར།། 80

མཛད་པོ་བརྒྱ་བྱིན་གཟུགས་བསྒྲིབས་པས། ལྷ་ཡི་བཟའ་བ་ཁ་དོག་དང་།
དྲི་དང་རོ་ལྡན་བསྒྲུབས་པའི་ཚེ། དབུལ་པོས་དགེ་སློང་རྙེད་མ་གྱུར།། 81

नष्टक्रिया विगतकारकतर्कहीनाः
शब्दा इवार्थरहिताः पुरुषा भवन्ति ॥ ७४ ॥

इति चिन्तानलाक्रान्तं निन्दितं* धनहीनतः ।
तं समाहूय कोऽप्येत्य सुकृतप्रेरकोऽभ्यधात् ॥ ७५ ॥

क्षीणार्थेनापि भवता जन्मान्तरशुभाप्तये ।
यथाकथञ्चिदेकोऽपि भिक्षुः किं न निमन्त्रितः ॥ ७६ ॥

इत्युक्तस्तेन संसक्तशल्यः पुनरिवाहतः ।
भिक्षुभोजनवैकल्यात् स भृशं व्यथितोऽभवत् ॥ ७७ ॥

कथञ्चित् क्षुत्परिक्षामः स गत्वा श्रेष्ठिमन्दिरम् ।
यत्नेन प्राप मूल्यांशं दारुपाटनकर्म्मणा ॥ ७८ ॥

कृत्वा तत्रैव तद्भार्य्या शुद्धतण्डुलखण्डनम् ।
तदंशभृतिमूल्याप्तं भक्त्या भर्त्रे न्यवेदयत् ॥ ७९ ॥

समुद्यतस्य तस्याथ भिक्षुभोजनसिद्धये ।
शुद्धये शुद्धसत्त्वस्य शक्रोऽभूदनुसाधकः ॥ ८० ॥

दिव्यवर्णरसामोदे भोज्ये शक्रेण साधिते ।
प्रीत्या प्रच्छन्नरूपेण भिक्षुं लेभे न दुर्गतः ॥ ८१ ॥

---

* निर्दग्धमिति मूलपुस्तके ।

འབྱོར་ལྡན་ལོངས་སྤྱོད་ཕྱུག་པ་ཡིས། གྲོང་པ་རྣམས་ཀྱི་སྔོན་དུ་ནི།
དགེ་སློང་མགྲོན་གཉེར་ཕྱུག་བསྐལ་ལས། དབུལ་པོ་འཆི་བརྗོས་པར་གྱུར། ॥ 82

དེ་ལ་བརྩེ་བས་བཅོམ་ལྡན་འདས། འོད་སྲུངས་རང་ཉིད་མངོན་ཕྱོགས་དེ།
དག་ཅིང་གྲུབ་པ་ཡོངས་མཁྱེན་ནས། ཞལ་ཟས་རབ་ཏུ་བླང་བ་མཛད། ॥ 83

བཅོམ་ལྡན་འདས་ཀྱི་ཞལ་ཟས་བདག། དབུལ་ཞིས་རྒྱལ་པོས་ནོར་རྣམས་ཀྱིས།
རབ་ཏུ་འབད་པས་གསོལ་བདབ་ཀྱང་། དབུལ་པོས་ངེས་པར་ཁས་མ་བླང་། ॥ 84

དེ་ནས་བཅོཾ་ལྡན་མཆོད་བྱས་དེ། དེ་ཡིས་སྨོན་ལམ་རབ་ཏུ་བཏབ།
ཡོན་ཏན་ནོར་ནི་ཡང་དག་རྫོགས། དབུལ་ལ་དྲིན་པར་བདག་གྱུར་ཅིག། ॥ 85

འོད་སྲུངས་རང་གི་གནས་གཤེགས་ཤིང་། ལྷ་དབང་མཐོ་རིས་སོང་བའི་ཚེ།
ལྷ་ཡི་རིན་ཆེན་ཐམས་ཅད་ཀྱིས། དབུལ་པོའི་ཁྱིམ་ནི་ཁེངས་པར་གྱུར། ॥ 86

དེ་ནས་བརྒྱ་བྱིན་བཀའ་ལས་ནི། དེ་ཡི་ཁང་པ་སྐྱེད་ཚལ་མཛེས།
བི་ཤྭ་ཀརྨས་རིན་ཆེན་གྱི། ཀ་བས་རྣམ་པར་བརྒྱན་པ་བྱས། ॥ 87

དྲི་མེད་དབང་ཕྱུག་ཡང་དག་ཐོབ། དེ་ཡིས་ཞག་བདུན་འོད་སྲུངས་ནི།
དགེ་སློང་ཀུན་དང་བཅས་པ་དག། འབྱོར་པ་ལོངས་སྤྱོད་རྣམས་ཀྱིས་མཆོད། ॥ 88

གང་གི་ཁྱིམ་ནི་བྲུད་མེད་བཀྲིས་པས་རིད་ཅིང་བྲུ་ཚ་ཙྭ་ལ་སློང་རྣམས་ཀྱིས།
སྒོ་ནི་ཡོངས་དོར་ཁྲི་སྟན་སྐྱ་མོག་འཕྱང་ལྡན་གཡོ་མེད་ཟུར་ན་སྦྲང་བུ་སྐྲགས།

विभूतिमोहितैर्गूढैः पूर्व्वं पुरनिवासिभिः ।
सङ्घे निमन्त्रिते दुःखात् दुर्गतो मर्त्तुमुद्ययौ ॥ ८२ ॥

कृपया तस्य भगवान् स्वयमभ्येत्य काश्यपः ।
शुद्धिसिद्धिं परिज्ञाय चक्रे भोज्यप्रतिग्रहम् ॥ ८३ ॥

अहोऽहं भवतो भोज्यं प्रयच्छामीति भूभुजा ।
प्रयत्नात् प्रार्थितोऽप्यर्थं नैवामन्यत दुर्गतः ॥ ८४ ॥

गुणद्रविणसंपूर्णः स्यां दरिद्रप्रसादनः ।
भगवन्तमथाभ्यर्च्य प्रणिधानं चकार सः ॥ ८५ ॥

स्वाश्रमं काश्यपे याते सुरेन्द्रे च दिवं गते ।
दुर्गतस्य गृहं सर्व्वं दिव्यरत्नमपूरयत् ॥ ८६ ॥

विश्वकर्म्मा ततस्तस्य विदधे शक्रशासनात् ।
भवनं रुचिरोद्यानं रत्नस्तम्भविभूषितम् ॥ ८७ ॥

संप्राप्तविमलैश्वर्य्यः सहितं सर्व्वभिक्षुभिः ।
सप्ताहं विभवैर्भोगैः स काश्यपमपूजयत् ॥ ८८ ॥

क्षुत्क्षामाङ्गनमर्थिभिः परिहृतद्वारं रुदद्दारकम्
गेहं निश्चलकज्जलान्यपि स्थलीकोणस्वण*न्माक्षिकम् ।

* Not clear.

བྲེ་བའི་ཕྲུག་གུ་དག་ནི་ཐབ་ཏུ་ཉལ་ཞིང་དྲུ་འབོད་གཞན་པ་བཞིན་གྱུར་པ།
དེ་ཡི་དཔལ་ནི་མི་བདག་ཚགས་པའི་གནས་ཉིད་དག་གིས་སུ་ཞིག་མཚོང་
མི་བྱེད།། 89

སྨིན་པའི་མཐུ་ནི་བདུད་རྩི་ལྟར། དག་པ་དེ་ཡིས་དབྱུལ་པོ་ནི།
སྐྱེ་བ་གཞན་དུ་མཁས་པ་ནི། ཐོབ་ནས་དགྲ་བཅོམ་ཉིད་དུ་གྱུར།། 90

དེ་ལྟར་ཀུན་རིག་ཡོན་ཏན་ལ་གུས་པས།
མཁས་པའི་སྐྱེ་བ་སྔ་མར་བྱུང་བ་གསུངས།
རྣམ་དག་སྨིན་པའི་བསོད་ནམས་དགེ་ལ་འོས།
ངེས་པར་བཟུང་ནས་དགེ་སློང་ཚོགས་དེས་བསྔགས།། 91

ཞེས་པ་དགེ་བའི་དབང་པོས་བྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མཁས་པའི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་ཞེ་གཅིག་པའོ།།

चुल्लीसुप्तविड़ालबालमपरं यस्याभवद्रौरवम्
श्रीस्तस्यैव नृपस्पृहास्पदतयाश्चर्य्यं न कस्य स्वयम् ॥ ८९ ॥

तेन दानप्रभावेन सुधाशुद्धेन दुर्गतः ।
जन्मान्तरे पण्डिततामवाप्यार्हत्त्वमागतः ॥ ९० ॥

इति पण्डितपूर्व्वजन्मवृत्तं
कथितं सर्व्वविदा गुणादरेण ।
अवधार्य्य विशुद्धदानपुण्यं
कुशलार्हं प्रशशंस भिक्षुसङ्घः ॥ ९१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कपिलावदानं नामैकचत्वारिंशः पल्लवः ॥ ० ॥

ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་གཉིས་པ།

སྙིང་སྟོབས་ཀྱིས་ནི་ཉི་མའི་འོད་ཟེར་ལྡན་པ་ལ་བཞིན་གསལ།
ཆོས་དག་གིས་ནི་རིན་ཆེན་ཚོགས་རྣམས་མཁའ་ལས་འབབ་པར་འགྱུར།
བརྟན་པ་ཡིས་ནི་རྒྱུད་པ་ཐམས་ཅད་རབ་ཏུ་ཞི་བར་འགྲོ།
སྨིན་པ་ཡིས་ནི་ཕྱོགས་རྣམས་ཡོངས་སྐྱོད་སྐལ་བ་བཟང་པོར་འགྱུར། ། 1

མཉན་ཡོད་རྒྱལ་བྱེད་ཚལ་དུ་སྡོད། བཅོམ་ལྡན་བདེ་བར་གཤེགས་པ་ཡིས།
དགེ་བ་རབ་ཏུ་རྫོགས་རྣམས་ལ། ཆོས་ནི་རབ་ཏུ་བསྟན་པ་མཛད། ། 2

སྔོན་གྱི་དུས་ནི་གཞན་དག་ལ། སྐྱེ་བོ་ཚེ་ལོ་བརྒྱད་ཁྲིའི་ཚེ།
དཔལ་ལྡན་གསེར་མདོག་ཅེས་བྱ་བའི། ས་ཡི་བདག་པོ་བྱུང་བར་གྱུར། ། 3

དེ་ཡི་གྲོང་ཁྱེར་གསེར་ཞེས་པ། བརྒྱ་བྱིན་འཆི་མེད་ལྡན་བཞིན་དུ།
འཇིག་རྟེན་ཀུན་གྱི་དབང་ཡིན་ཀྱང་། བཞུགས་གནས་ཡིད་དུ་འོང་བར་གྱུར། ། 4

འདྲེན་པར་འོས་ཤིང་གྲགས་པར་དཀར། མཛེས་པར་གཟུགས་ཤིང་ཡོན་
ཏན་རིགས།
གང་གིས་སྤུ་རིག་དོ་ཤལ་བཞིན། སྐྱེ་རྒུའི་བྱ་བ་སྙིང་ལ་བཟུང་། ། 5

སྐྱེ་རྒུའི་ལས་ཀྱི་རྣམ་སྨིན་གྱིས། ཆར་མེད་མཆོག་ཏུ་མི་བཟད་ཅིང་།
སྐྱེ་རྒུ་རྣམས་ལ་འཇིགས་སྐྲར་བ། དེ་ཡི་གྲོང་ཁྱེར་དག་ཏུ་བྱུང་། ། 6

द्विचत्वारिंशः पल्लवः ।

सत्त्वेन सूर्य्यरुचयस्तमसि स्फुरन्ति
धर्म्मेण रत्ननिचया नभसः पतन्ति ।
धैर्य्येण सर्व्वविपदः प्रशमं व्रजन्ति
दानेन भोगसुभगाः ककुभो भवन्ति ॥ १ ॥

भगवान् सुगतः पूर्व्वं श्रावस्त्यां जेतकानने ।
कुशलानां प्रपन्नानां विदधे धर्म्मदेशनाम् ॥ २ ॥

पूर्व्वकल्पान्तरजने वत्सराष्टायुतायुषि ।*
श्रीमान् कनकवर्णाख्यो बभूव पृथिवीपतिः ॥ ३ ॥

कनकाख्या पुरी तस्य शक्रस्येवामरावती ।
सर्व्वलोकेश्वरस्यापि वसतिर्वल्लभाभवत् ॥ ४ ॥

नायकार्हं यशःशुभ्रं चारुवृत्तगुणोचितम् ।
हृदये यः प्रजाकार्य्यं मुक्ताहारमिवावहत् ॥ ५ ॥

प्रजाकर्म्मविपाकेन पुरे परमदारुणा ।
अवृष्टिरभवत् तत्र सर्व्वभूतभयप्रदा ॥ ६ ॥

---

* Not clear.

སྙིང་སྟོབས་ལྡན་པ་འདྲེན་བྱེད་ཅིང་། ཐམས་ཅད་ཡོངས་སུ་གདུང་བྱེད་པ།
ཚུར་མེད་དེ་ནི་ས་འཛིན་གྱིས། ཡིད་ནི་ཡོངས་གདུང་རྒྱུ་ཉིད་གྱུར།། 7

བཅོམ་ཐབས་ཐམས་ཅད་ཉམས་པ་དེས། སྔོན་པོ་འི་གཙོ་བོ་འི་དཀྱིལ་འཁོར་ནི།
བསམ་པས་གཡོ་བ་མེད་མདུན་དུ། ཤིན་ཏུ་ཡུན་རིང་བསམས་ནས་སླས།། 8

བཅོམ་ཐབས་མེད་པའི་ཚར་མེད་ནི། ཉེ་བར་ལྷུང་འདི་སྐྱེ་རྒྱུ་རྣམས།
བདག་གིས་འབད་པས་ཡོངས་བསྐྱང་བ། བྱས་པ་འབྲས་བུས་མེད་པར་བྱེད།། 9

ས་སྤྱོད་སྡིག་པས་སྐྱེ་རྒྱུ་རྣམས། མཆི་མའི་ཚར་ནི་རབ་འབེབས་ཤིང་།
འཁོར་མེད་གསལ་བྱེད་ཕྱོགས་རྣམས་ཀྱི། ཚར་ནི་ངེས་པར་འཆད་པར་འགྱུར།། 10

སྐྱེ་རྒྱུ་འཛིག་པ་ཆེ་ལ་གང་། རྒྱལ་པོས་སྐྱོབ་པར་མི་བྱེད་པར།
དེ་ཡི་ཟུར་ཕྱོད་ཅོད་པན་འཛིན། གསལ་བར་ཟླས་གར་ལྷ་བུ་ཡིན།། 11

གང་ཚེ་རྒྱལ་པོས་འགྲོ་ལ་ཕན། དེ་ཚེ་འཇིག་རྟེན་རྫོགས་ལྡན་དུས།
གང་ཚེ་རྒྱལ་པོས་འགྲོ་མི་ཕན། ངེས་པར་འཇིག་རྟེན་རྩོད་ལྡན་དུས།། 12

མི་བདག་རྣམས་ཀྱི་སྡིག་པ་ལས་ནི་སྐྱབས་མེད་སྐྱེ་རྒྱུ་སུ་གིས་ཉེན་གྱུར་ཅིང་།
མི་མཐུན་ཕྱོགས་ལྷུང་མངོན་སུམ་མཚོན་པས་འཇིག་ཅིང་ནད་དང་སྡུག་
བསྔལ་ཉེ་བར་གནས།
ཟབ་རྒྱས་ཉོན་མོངས་དག་གིས་ཤིན་ཏུ་ཉམ་ཐག་མ་བསྡུས་ཀྱི་རྒྱུད་ཅེས་
པ་སྒྲོགས།
ཤིན་ཏུ་མི་བསྲུན་མཛའ་བོས་བསྐྱངས་རྣམས་རྒྱ་ངན་བྱེད་ཅིང་མཛའ་
གཅུགས་མེད་པར་འགྱུར།། 13

सा धैर्य्यहारिणी सर्व्वलोकसन्तापकारिणी ।
अवृष्टिः प्रययौ भूमन्मानसायासहेतुताम् ॥ ७ ॥

कुण्ठसर्व्वप्रतीकारः स चिन्तास्तिमितं पुरः ।
उवाच सुचिरं ध्यात्वा प्रधानामात्यमण्डलम् ॥ ८ ॥

अवर्षोपनिपातोऽयं प्रजानां निष्प्रतिक्रियः ।
करोति मे यत्नकृतं निष्फलं परिपालनम् ॥ ९ ॥

निवृत्तवर्षाः ककुभो भवन्त्यभ्राश्च स्वच्छकाः ।
प्रवृत्तवाष्पवर्षाश्च प्रजाः पापेन भूभुजाम् ॥ १० ॥

त्राणं महाभयाद्राजा प्रजानां न करोति यः ।
तस्य स्पष्टं नटस्येव किरीटमुकुटग्रहः ॥ ११ ॥

तदा कृतयुगं लोके यदा राजा प्रजाहितः ।
तदा किल कलिर्लोके यदा राजा प्रजाहितः ॥ १२ ॥

दुर्भिक्षक्षयिता विपक्षपतनप्रत्यक्षलक्ष्ये क्षये
रोगोद्वेगसमाहिताः पृथुतरक्लेशावलीविह्वलाः ।
हाहाकारविसृङ्खलाः खलतरैरत्यर्दिता वल्लभैः
शोचन्त्यः प्रलयं प्रयान्त्यशरणाः पापैर्नृपाणां प्रजाः ॥ १३ ॥

དེ་སྐད་བདག་གིས་སྐྱེ་དགུ་རྣམས། མཐའ་དག་མཛོད་ཀྱིས་བསྐྱང་བར་བྱ།
རྒྱལ་པོས་སྐྱེ་རྒུ་ཡོངས་སྐྱོབ་པ། བསོད་ནམས་རིན་ཆེན་རང་བཞིན་གཏེར།། 14

ཞེས་བརྗོད་དེ་ཡིས་རང་གིས་ནི། མཛོད་དང་ཁང་བ་ལ་སོགས་ཀུན།
རྟག་ཏུ་འཇིག་རྟེན་ཐམས་ཅད་ཀྱིས། ལོངས་སྤྱོད་ཉེ་བར་སྤྱད་བྱར་བྱས།། 15

དེ་ནས་དེ་ཡིས་ཟས་ཀྱི་ཚོགས། དུས་ཀྱིས་སྨུ་གེ་དྲག་པོ་ཡིས།
འགོད་པ་ཆེ་བས་སྐྲུས་བུ་ནི། གཅིག་གིས་ཟས་ཀྱི་ལྷག་མར་གྱུར།། 16

དེ་ནས་གནས་སྐབས་དེ་ལ་ནི། ཉི་མའི་འོད་ཅན་རང་སངས་རྒྱས།
ནམ་མཁའ་ལས་ནི་མངོན་ཕྱོགས་དེ། དེ་ལ་ཟས་ནི་བསླང་བར་མཛད།། 17

ངེས་པའི་ཕྲེ་ཚོམ་དེ་ལ་ནི། བདག་ཉིད་ཀྱིས་ནི་སྲོག་གིས་མིན།
མ་བརྟགས་རབ་དང་བློ་ལྡན་རིས། དེ་དག་ཐམས་ཅད་དེ་ལ་ཕུལ།། 18

དད་པ་ཅན་རིས་རང་སྲོག་གི། འཚོ་བས་མགྲོན་དུ་བྱས་པ་དེའི།
དེ་ཡི་སྙིང་སྟོབས་ངང་ཚུལ་ཉིད། བསྔགས་ཤིང་མཁའ་ལ་རབ་ཏུ་གཤེགས།། 19

དེ་ནས་མཁའ་ལ་སྤྲིན་འཕྲེང་ཆུ་རིས་ཅན།
གཉིས་འཐུང་ཆེ་ལ་བྱུང་བའི་འཕྲེང་བཞིན་དང་།
ཉུབ་ཕྱོགས་བྲུ་མོའི་འགྲམ་པར་ཨ་ཀ་རུ།
ནག་པོའི་དོག་པ་ལྷ་བུར་རབ་ཏུ་བརྩམས།། 20

तस्मात्समस्तकोषेण रक्षणीया मया प्रजाः ।
राज्ञां प्रजापरित्राणपुण्यं रत्नमयो निधिः ॥ १४ ॥

इत्युक्त्वा सर्व्वलोकस्य संचिन्त्य कोष्ठकोषयोः ।
स निनाय निजं सर्व्वं सदा भोग्योपभोग्यताम् ॥ १५ ॥

ततः कालेन तस्योग्रदुर्भिक्षेणान्नसञ्चयः ।
ययौ महाव्ययादेकपुरुषाशनशेषताम् ॥ १६ ॥

तस्मिन्नवसरे व्योम्ना समभ्येत्य रविप्रभः ।
प्रत्येकबुद्धस्तस्याथ विदधे भोजनार्थनाम् ॥ १७ ॥

नियमे संशये तस्मिन्नात्मनः प्राणधारणे ।
निर्व्विकल्प्य स तत्सर्व्वं ददौ तस्मै प्रसन्नधीः ॥ १८ ॥

स्वप्राणवृत्तिं तेनासौ कृत्वातिथ्यप्रसादिना ।
प्रययौ नभसा तस्य प्रशंसन् सत्त्वशीलताम् ॥ १९ ॥

अथोद्ययौ व्योममहाद्विपस्य
नीलालिमालेव सदम्बुलेखा ।
मेघावली पश्चिमदिक्प्रलम्बा
कपोलकालागुरुमञ्जरीव ॥ २० ॥

དེ་ནས་ནམ་མཁའ་བར་སྣང་མཐའ་དག་ནི། ཨུཏྤལ་སྔོན་པོ་རབ་རྒྱས་ནགས་ཀྱི་མདངས།
བྱང་བའི་ཁྲུ་ཡིས་བཞིན་དུ་སྤྲིན་གྱི་ཚོགས། རོ་དང་ལྡན་པས་གཡོགས་གྱུར་རྣམ་པར་མཛེས།། 21

དེ་ནས་ཞག་བདུན་ས་ལ་སྐྱེ་དགུ་རྣམས། འདོད་པའི་ཁ་ཟས་མ་ལུས་ཆར་དུ་འབབ།
དེ་ཡི་འོག་ཏུ་འབྲུ་ལ་སོགས་པའི་ཆར། དེ་ནས་རིམ་གྱིས་རིན་ཆེན་ཚོགས་ཆར་ཡང་།། 22

དེ་ལྟར་ལེགས་བྱས་ཕུན་ཚོགས་ལ་དགའ་ས་ཡི་བདག་པོ་དག།
གསེར་མདོག་དེ་ནི་ས་བདག་ཀུན་གྱི་ཅོད་པན་ནོར་བུ་བཞིན།
མཆོག་ཏུ་མཛེས་ཤིང་སྐྱེ་རྒུ་རྣམས་ཀྱི་སྲོག་ནི་བསྲུང་བས་མཛེས།
གང་ཕྱིར་སྐྱེ་བོ་དམ་པའི་མཐུ་ནི་གཞན་དོན་རབ་སྒྲུབ་བྱེད།། 23

གང་ཞིག་ས་ཡི་བདག་པོ་གསེར་མདོག་དེ། ད་ལྟ་ང་ཉིད་སྐུ་ཡི་བདག་ཉིད་འདི།
དེ་སྐད་གསུངས་ནས་བཅོམ་ལྡན་རྒྱལ་བ་ཡིས། བློ་ལྡན་དམ་པ་རྣམས་ལ་ཆོས་བསྟན་མཛད།། 24

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གསེར་མདོག་གི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་གཉིས་པའོ།།

ततः समस्तं गगनान्तराल-
मुत्फुल्लनीलोत्पलकाननाभम् ।
आच्छाद्यमानं सरसैर्बभासे
भृङ्गप्रबन्धैरिव मेघसङ्घैः ॥ २१ ॥

ततः पपाताखिलभोज्यवृष्टि-
रिष्टा प्रजानां भुवि सप्तरात्रीः ।
धान्यादिवृष्टि स्तदनन्तरञ्च
रत्नादिवृष्टिश्च ततः क्रमेण ॥ २२ ॥

इति स कनकवर्णः क्ष्मापतिर्भूपतीनां
मुकुटमणि रिवोच्चैर्भ्राजमानः प्रजानाम् ।
अकृत सुकृतसम्पत्प्रीणितः प्राणरक्षां
प्रभवति हि परार्थे सज्जनानां प्रभावः ॥ २३ ॥

भूपतिः कनकवर्ण एष यः
सोऽहमेव वपुषात्मनाधुना ।
इत्युदीर्य्य भगवान् जिनः सतां
धीमतां व्यधित धर्म्मदेशनाम् ॥ २४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कनकवर्णावदानं नाम द्विचत्वारिंशः पल्लवः ॥ ० ॥

ཡལ་འདབ་སྡེ་བཞི་བཅུ་རྩ་གསུམ་པ།

གཞན་ལ་ཕན་པ་འདེབས་པའི་མཐུ་དང་ནི།
ཀུན་གྱི་ཉེར་འཚོ་འབྱོར་པ་ཆེན་པོ་སྟེ།
འབྲས་བུ་ཆེར་འོས་འདི་དག་དགེ་རྣམས་ཀྱི།
བསོད་ནམས་མྱུ་གུའི་འབྲས་བུ་དང་པོ་ཡིན།། 1

རྒྱལ་བྱེད་ཚལ་གྱི་ཀུན་རར་སྟོན། རྒྱལ་བ་བཞུགས་ཤིང་སྟོན་དགྱེས་ཚེ།
དཔལ་ལྡན་ཁྱིམ་བདག་ལྷ་ཡི་སྡེ། ཞེས་པ་མཚན་ཡོད་དག་ན་གནས།། 2

བུ་ཁྱོད་ཀྱིས་ནི་ཁེངས་ལྡན་དེའི། བུ་ནི་གསེར་གྱི་ལག་གྱུར་དེ།
གང་གི་ལག་གཉིས་སྨད་བྱུང་བ། གསེར་གྱི་རང་བཞིན་དག་ཏུ་འགྱུར།། 3

དེ་ཡི་ལག་གཉིས་དག་ལ་དངུལ། སྤུ་རྡོ་སྤུ་རྡོ་འབུམ་ཕྲག་གཉིས།
རབ་ཏུ་སྐྱེ་བ་གང་གིས་ནི། སྐྱོང་བའི་དཔག་བསམ་ཤིང་དུ་གྱུར།། 4

དེ་ཡི་དགེ་བའི་རྩ་བ་རྣམས། དུས་ཀྱི་ཡོངས་སུ་སྨིན་གྱུར་པ།
རབ་གསལ་དབེན་པ་ཆེན་པོ་ཡི། རྒྱལ་བ་ལ་ནི་གུས་པ་སྐྱེས།། 5

དེ་ནས་རྒྱལ་བྱེད་ཚལ་དུ་དེ། སོང་ནས་བཅོམ་ལྡན་དེ་བཞིན་གཤེགས།
མཐོང་སྟེ་ཀུན་དགའ་ལྡན་པ་ཡིས། དེ་ཡི་ཞབས་ལ་ཕྱག་འཚལ་བྱས།། 6

त्रिचत्वारिंशः पल्लवः ।

सर्व्वोपकारप्रणयी प्रभावः
सर्व्वोपजीव्या महती विभूतिः ।
पुण्याङ्कुराहस्य फलं* विशाल-
फलार्हमेतत् प्रथमं हि पुण्यम् ॥ १ ॥

जिने जेतवनारामविहाराभिगते पुरा ।
श्रावस्त्यां देवसेनाख्यः श्रीमानासीद् गृहाधिपः ॥ २ ॥

हिरण्यपाणिस्तस्याभूत् पुत्रः सत्पुत्रमानिनः ।
यस्य हेममयं जातं पाणिद्वितयमद्भुतम् ॥ ३ ॥

रूप्यलक्षद्वयं तस्य प्रातः प्रातः करद्वये ।
प्रादुरासीत् स तेनाभूदर्थिनां कल्पपादपः ॥ ४ ॥

तस्य व्यक्तविवेकेन परिपाकेण भूयसा ।
काले कुशलमूलानां जिने भक्तिरजायत ॥ ५ ॥

अथ जेतवनं गत्वा भगवन्तं तथागतम् ।
स दृष्ट्वा विदधे तस्य सानन्दः पादवन्दनम् ॥ ६ ॥

---

* Orig. फलतम् ।

བཅོམ་ལྡན་གྱིས་ཀྱང་འཁོར་བ་ཡི། གདུང་བ་ཞི་བྱེད་ཟླ་བའི་འོད།
བདུད་རྩིའི་གྲོགས་པོ་དགེ་བ་ཡིས། ཡོ་ཛ་གཟིགས་པ་དེ་ལ་གདད།། 7

སྟོན་པས་གཟིགས་པ་ཉིད་ཀྱིས་དེ། ཀུན་སྨོངས་རབ་རིབ་རབ་སྤྲངས་པ།
ཉི་མའི་འོད་ཀྱི་པདྨ་ནི། རབ་ཏུ་རྒྱས་པ་ལྟ་བུར་མཛེས།། 8

དེ་ནས་བཅོམ་ལྡན་འདས་ཀྱིས་ཀྱང་། དེ་ལ་དམ་པའི་ཆོས་བསྟན་མཛད།
གང་གི་ཆོས་ཀྱི་རང་བཞིན་ཅན། མི་དམན་སྣང་བ་རབ་ཏུ་བསྐྱུན།། 9

སྔོན་གྱི་བསོད་ནམས་ཡོངས་སྨིན་པས། ཆགས་བྲལ་བག་ཆགས་སད་གྱུར་པ།
ཤེས་རབ་དྲི་མ་མེད་པ་དེས། ཕྱག་འཚལ་ཀུན་མཁྱེན་ལ་གསོལ་པ།། 10

བཅོམ་ལྡན་སྐྱབས་ཐོབ་སྐྱབས་སུ་འོས། ཉོན་མོངས་མ་ལུས་ཉམས་པའི་སྐད།
སྲིད་པ་འཕྲོག་པའི་རབ་བྱུང་ནི། བདག་ལ་རབ་ཏུ་སྐྱུབ་པར་མཛོད།། 11

སེམས་ཅན་རྣམས་ཀྱི་ཚེ་སྲོག་གཡོ། ཡང་ཚེ་གཞན་པ་དེ་བས་ཀྱང་།
གློག་ནི་འཁྲུག་པ་བཞིན་དུ་གཡོ། དེ་བས་ཀྱང་ནི་འགྱུར་བ་འདི།། 12

ཞེས་པ་སྨྲ་ཞིང་ཆགས་བྲལ་བ། དེ་ཡི་ལུས་ལ་བདེ་གཤེགས་ཀྱིས།
རྗེས་སུ་བཟུང་བ་ལས་སྐྱེས་པའི། རབ་བྱུང་རང་ཉིད་ལྷུང་བར་གྱུར།། 13

ཆོས་གོས་དམར་པོས་རབ་གསལ་བའི། ཆགས་བྲལ་ཉིད་ནི་དེ་ཡིས་བཟུང་།
ལྷུང་བཟེད་བཟུང་བས་སྔར་ཡང་ནི། འཁོར་བའི་སྟོད་ཉིད་རབ་ཏུ་བཏང་།། 14

भगवानपि संसारतापप्रशमचन्द्रिकाम् ।
सुधासखीं दिदेशास्मै दृशं कुशलदूतिकाम् ॥ ७ ॥

स शास्तुर्दर्शनेनैव संमोहतिमिरोज्झितः ।
बभाषे सूर्यकिरणप्रबुद्धकमलोपमः ॥ ८ ॥

भगवान् विदधे तस्य ततः सद्धर्मदेशनाम् ।
यया धर्ममयं चक्षुरक्षुणालोकमुदययौ ॥ ९ ॥

प्राक्पुण्यपरिणामेन जातवैराग्यवासनः ।
प्रणम्य विमलप्रज्ञः स सर्वज्ञमभाषत ॥ १० ॥

शरण्य शरणात्तस्य भगवन् भवहारिणी ।
अशेषक्लेशनाशाय प्रव्रज्या मे विधीयताम् ॥ ११ ॥

चपलं प्राणिनामायुस्ततोऽपि नवयौवनम् ।
विद्युद्विलासचपलास्ततोऽप्येता विभूतयः ॥ १२ ॥

इति तस्य ब्रुवाणस्य सुगतानुग्रहोदिता ।
पपात वीतरजसः प्रव्रज्या वपुषि स्वयम् ॥ १३ ॥

रक्तचीवरसुव्यक्तां बिभ्राणः स विरक्तताम् ।
पाशग्रहेण तत्याज पुनः संसारपाशताम् ॥ १४ ॥

དགེ་སློང་རྣམས་ཀྱིས་དེ་ཡིས་ནི། སྨད་བྱུང་གྲུབ་དེ་མངོན་སུམ་མཐོང་།
དེ་ཡི་སྔོན་བྱུང་བཅོམ་ལྡན་ལ། དྲིས་ཤིང་དེས་ཀྱང་རབ་གསུངས་པ།། 15

རྒྱལ་པོ་ཀྲི་ཀི་ཞེས་པ་སྔོན། ལྷ་ར་ཀྲ་སེར་དེ་བཞིན་གཤེགས།
བཅོམ་ལྡན་འོད་སྲུངས་ཞེས་བྱབ། ཡོངས་སུ་མྱ་ངན་འདས་གྱུར་ཚེ།། 16

དེ་ཡི་གདུང་ནི་རབ་སྦྲངས་ནས། མཆོད་རྟེན་རིན་ཆེན་རང་བཞིན་དག།
མཐོ་རིམ་སྐྱོག་ཉུས་བསོད་ནམས་ནི། གཟུགས་ཅན་བཞིན་དུ་མཐོ་བ་བྱས།། 17

དེ་ལ་མཆོད་པ་ཡོངས་འཛིན་ཅིང་། བྲ་རྒུ་འཛུགས་པ་བྱེད་པའི་ཚེ།
བཟོ་བོ་ཀན་དུ་ལ་ཞེས་པའི། གཟུགས་ཅན་གཉིས་ནི་རྣམ་པར་བཀོད།། 18

དང་བའི་སེམས་ནི་དག་པ་ཡིས། བསོད་ནམས་ཤིན་དུ་ཆེ་བ་དེས།
ད་ལྟ་གསེར་གྱི་ལག་པ་ནི། འདོད་པར་བྱ་བ་ཆེན་པོ་ཐོབ།། 19

འཇིག་རྟེན་དུ་ནི་རབ་ཏུ་གྲགས་པ་དཀར་པོ་བདུད་རྩིའི་ཟེར་གྱིས་སྤྲིན་ཟླང་དང་།
གདོང་བའི་ཡོན་ཏན་དྲག་པོ་དང་ལྡན་འཁྱེར་པ་རབ་ཏུ་རྒྱས་གྱུར་པ།
ཆུང་དུ་གང་ཞིག་ཡོངས་བསྒྲོའི་གནས་ལ་བསོད་ནམས་ཆུང་ངུ་ཉིད་མིན་གྱུར།
དེ་ཉིད་ཁོ་ན་དྲི་མེད་ཡིད་ཀྱི་དང་པ་དག་པའི་ཀུན་སྤྱོད་ཡིན།། 20

तस्य तामद्भुतां सिद्धिं प्रत्यक्षं वीक्ष्य भिक्षवः ।
तत्पूर्ववृत्तं पप्रच्छुर्भगवन्तं स चाब्रवीत् ॥ १५ ॥

वाराणस्यां पुरा राजा कृकिर्नाम तथागते ।
काश्यपाख्ये भगवति प्रयाति परिनिर्वृतिम् ॥ १६ ॥

शरीरमस्य सत्कृत्य स्तूपं रत्नमयं व्यधात् ।
स्वर्गावगाहनप्रौढं मूर्त्तं पुण्यमिवोन्नतम् ॥ १७ ॥

तस्मिन्नारोप्यमाणायां यष्ट्यां पूजापरिग्रहे ।
कितवः कन्दखो नाम निदधे रूपकद्वयम् ॥ १८ ॥

चित्तप्रसादशुद्धेन तेन पुण्येन भूयसा ।
हिरण्यपाणिः प्राप्तोऽद्य महतां स्पृहणीयताम् ॥ १९ ॥

भवति विभवस्त्यागोदारः समग्रगुणो भुवि
प्रसरति यशः शुक्लं लोके सुधांशुसहोदरम् ।
परिणतिपदे पुण्यं धत्ते यदल्पमनल्पतां
विमलमनसः श्रद्धाशुद्धं तदेव विजृम्भितम् ॥ २० ॥

བསོད་ནམས་མཐུ་ལྡན་གསེར་གྱི་ལག་པ་ཡི།
མཐུ་ནི་དེ་ལྟར་རྒྱལ་བས་བཤད་པ་དག།
ཐོས་པ་ཉིད་ན་དགེ་སློང་དགེ་འདུན་དེ།
དགའ་དང་མགུས་དང་ཡ་མཚན་དབང་དུ་གྱུར།། 21

ཅེས་པ་དགེ་བའི་དབང་པོས་བྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གསེར་གྱི་ལག་པའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་གསུམ་པའོ།།

इति प्रभावं कथितं जिनेन
पुण्यानुभावस्य हिरण्यपाणेः ।
श्रुत्वैव हर्षादरविस्मयानां
स भिक्षुसङ्घः प्रणयी बभूव ॥ २१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
हिरण्यपाण्यवदानं त्रिचत्वारिंशः पल्लवः ॥ ० ॥

ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་བཞི་པ།

སྲིད་པའི་འཇིགས་འཕྲོག་རྒྱལ་བ་དྲན་པ་ནི།
སྐྱེ་བོ་ངན་པ་བཟོད་དཀའ་དུག་འཛིན་དང་།
ཤིན་ཏུ་འཇིགས་རུང་ཁྲོན་པར་ལྷུང་གྱུར་པའི།
སྐྱེ་བོ་རྣམས་ཀྱི་རྟེན་སར་གྱུར་པ་ཡིན།། 1

གྲོང་ཁྱེར་རྒྱལ་པོ་འི་ཁབ་ཅེས་བར། ས་འཛིན་བྱ་རྒོད་ཕུང་པོ་ཡི།
ངོས་ལ་སྟོན་ཆོ་བཅོམ་ལྡན་འདས། དེ་བཞིན་གཤེགས་པ་བཞུགས་པར་གྱུར།། 2

སྐབས་དེར་བྱ་ལ་བྱམས་པ་ཡིས། རྒྱལ་པོ་གཟུགས་ཅན་སྙིང་པོ་ཉིད།
དེ་ཡི་བུ་ནི་མ་སྐྱེས་དགྲ། གདུག་པ་བྱེད་པར་གྱུར་པ་ཡིས།། 3

གྲོགས་པོ་སྡིག་པ་དང་ལྡན་པ། ལྷ་སྦྱིན་གྱི་ནི་གྲོས་བཞིན་དུ།
འཇིགས་རུང་སྲུན་ཅན་བཙོན་ཁང་ནི། རྒྱུ་བ་མེད་པར་རབ་ཏུ་བཅུག།། 4

བཀྲེས་པས་ཉེན་པ་དེ་ལ་ནི། བཙུན་མོས་བྲས་དག་བཙོན་ཁང་དུ།
གསང་ནས་རབ་ཏུ་འཇུག་པར་བྱས། དེས་གསང་འདོད་དེས་ཤེས་ནས་བཀློག།
5

ས་ཡི་བདག་དེ་ཤིན་ཏུ་རིད། སྒོ་ཞིང་དྲི་མ་ལྡན་པར་གྱུར།
དུས་མིན་སྤྲིན་ནག་གིས་གཟིར་བའི། ནག་པོའི་ཕྱོགས་ཀྱི་ཟླ་བ་བཞིན།། 6

चतुश्चत्वारिंशः पल्लवः ।

दुर्जनदुःसहविषधरभीषणतरतिमिरपतितानाम् ।
आलम्बनजननं भवभयहरणं जिनस्मरणम् ॥ १ ॥

पुरे राजगृहाभिख्ये भगवान् भूभृतः पुरा ।
कटके गृध्रकूटस्य विजहार तथागतः ॥ २ ॥

तस्मिन्नवसरे राजा बिम्बिसारः सुतप्रियः ।
अजातशत्रुणा तत्र पुत्रेण क्रूरकारिणा ॥ ३ ॥

सुहृदः पावकस्येव देवदत्तस्य सम्मतम् ।
घोरान्धबन्धनागारं निःसञ्चारं प्रवेशितः ॥ ४ ॥

पत्न्या प्रवेशितं तस्य बन्धने गूढभोजनम् ।
ज्ञात्वा स तत्क्षयाकाङ्क्षी क्षुत्क्षामस्य न्यवारयत् ॥ ५ ॥

रूक्षः कृशोऽतिमलिनः सोऽभवत् पृथिवीपतिः ।
अकालकालमेघार्त्तः कृष्णपक्ष इवोडुपः ॥ ६ ॥

ཐལ་ཆེར་མཉེས་གཤིན་སེམས་ལྡན་ལ། མཆོག་ཏུ་རྒྱུད་པའི་མཛའ་བོ་ནི།
གདུང་བཅས་སྲིད་དང་ལྡན་བཞིན་དུ། ཤིན་ཏུ་དམ་པར་འཁྲུད་པར་བྱེད།། 7

བདེ་གཤེགས་བཞུགས་པའི་ཕྱོགས་སུ་ནི། མྱ་ངན་གྱིས་གཟིར་དེར་ཕྱོགས་ཏེ།
ཐལ་མོ་སྦྱར་ཏེ་ཕྱིས་བདུད་ནས། སྐད་གདངས་ཞན་པར་རབ་སྨྲས་པ།། 8

དམན་པ་འདོན་པ་ལ་བརྩོན་པ། ཡང་དག་རྫོགས་པའི་བྱང་ཆུབ་སེམས།
རིན་ཆེན་དགྲ་བཅོམ་ཆེན་པོ་ཉིད། བཅོམ་ལྡན་ཁྱོད་ལ་ཕྱག་འཚལ་ལོ།། 9

རྒྱལ་བ་སྐྱེ་ཚོགས་སྐྱེ་བ་ཡི། ཉོན་མོངས་རབ་ཏུ་ཞི་བའི་རྒྱུ།
འཇིགས་རུང་འཁོར་བ་རྒྱ་མཚོ་ཡི། ཟམ་སྟེགས་ཁྱོད་ལ་ཕྱག་འཚལ་ལོ།། 10

སངས་རྒྱས་གཟི་བརྗིད་ནམ་པར་དག། སྙིང་རྗེ་བདུད་རྩིའི་རྒྱ་མཚོ་སྟེ།
སེམས་ཅན་ཀུན་གྱི་གཉེན་གཅིག་པུ། རྟག་ཏུ་སང་ལ་ཕྱག་འཚལ་ལོ།། 11

ཞེས་པ་བསོད་ནམས་མི་རྟོག་ལས། འཁྲུངས་ཤིང་གསུམ་པའི་བདུད་རྩིས་བྲན།
བསྟོད་པའི་རྟོག་པ་བདེ་གཤེགས་ཀྱི། སྙན་དུ་འོས་པ་དེ་ཡིས་བྱས།། 12

དེ་ཡི་ཉོན་མོངས་སྡུག་བསྔལ་གྱི། རང་བཞིན་སྐབས་མཁྱེན་ཀུན་མཁྱེན་གྱིས།
འཆིང་བའི་ཁང་པའི་སྒོ་ཁ་ཡི། སྣང་བ་དག་གིས་ཆོམ་པར་བྱས།། 13

དེ་ལྟར་གྱུར་པ་མ་སྐྱེས་དགྲས། ཤེས་ནས་རྟོགས་པས་འཁྲུགས་གྱུར་ཏེ།
ཕ་ཡི་བཙོན་ཁང་དག་གི་ནི། སྒྲུག་པ་ཤིན་ཏུ་ཆུང་བའང་བཀག།། 14

सङ्कीर्णवासमसन्तापात् प्रायः पेशलचेतसाम् ।
करोत्यालिङ्गनं प्रौढा गाढ़प्रणयिनी विपत् ॥ ७ ॥

स समुद्दिश्य शोकार्त्तः सुगताध्युषितां दिशम् ।
कृताञ्जलिर्नतशिराः क्षामस्वरमभाषत ॥ ८ ॥

नमस्तुभ्यं भगवते महार्हाय महार्हते ।
दीनोद्धरणसन्नद्धसम्यक्सम्बोधिचेतसे ॥ ९ ॥

नमस्ते घोरसंसारमकराकरसेतवे ।
जिनाय जनताजन्मक्लेशप्रशमहेतवे ॥ १० ॥

नमो नित्यप्रबुद्धाय सर्व्वसत्त्वैकबन्धवे ।
विशुद्धधाम्ने बुद्धाय करुणामृतसिन्धवे ॥ ११ ॥

इति भक्तिसुधां सिक्ता सुगतश्रवणोचिताम् ।
पुण्यपुष्पप्रसविनीं स चक्रे स्तुतिमञ्जरीम् ॥ १२ ॥

सर्व्वज्ञस्तस्य विज्ञाय कायक्लेशमयीं दशाम् ।
बन्धनागारविवरालोकैराप्यायनं व्यधात् ॥ १३ ॥

अजातशत्रुस्तद्वृत्तं ज्ञात्वा शङ्काकुलः पितुः ।
न्यवारयद्बन्धगृहे सूक्ष्मविवराण्यपि ॥ १४ ॥

དེ་ནས་གདུག་པའི་བཙོན་སྲུང་གིས། དེ་ཡི་བཀའ་ལས་སྐྱུ་གྲི་ཡིས།
དམ་དུ་བཅིངས་པ་དེ་ཡི་ནི། ཀང་པ་རྣམ་པར་བཅད་པར་བྱས།། 15

དྲག་པོ་སྡུག་བསྔལ་ཉོན་མོངས་ཀྱིས། མཆོག་དུ་གཟིར་བའི་ས་བདག་དེས།
སངས་རྒྱས་སངས་རྒྱས་ཕྱག་འཚལ་ཞེས། གདུང་བའི་ཚོ་ངེ་ལྷན་པས་བཟོད།།
16

དེ་ནས་བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན། མདུན་དུ་མངོན་སུམ་ཉིད་གཤེགས་དེ།
བརྒྱ་བྱིན་གྱིས་བཞམས་གདན་ལ་བཞུགས། ཐུགས་རྗེ་ཉིད་ཀྱིས་དེར་བཀའ་
སྩལ།། 17

རྒྱལ་པོ་ཅི་བྱ་མི་བཟད་པའི། ལས་ཀྱི་ལུགས་ནི་འདི་འདྲ་ཡིན།
དགེ་དང་མི་དགེ་རབ་བསྒྲུན་འབྲས། སྤྱོད་པ་མིན་པར་ཡོངས་མི་འཛད།། 18

ཆགས་སྡང་དུག་གིས་དཀྲིགས་གྱུར་ཅིང་། སྣ་ཚོགས་གདུང་བ་བཟོད་དཀའ་བ།
སྙིང་པོ་མེད་པའི་འཁོར་བ་ན། སྡུག་བསྔལ་འདི་ལྟ་སྙིང་པོ་ཉིད།། 19

རྒྱུད་པ་རྒྱས་པས་ཉམ་ཐག་ཅིང་། ཀུན་ནས་ཉོན་མོངས་རྫོགས་དུས་སུ།
འཁྲུགས་པ་མེད་པའི་ཆགས་བྲལ་ལམ། བརྟན་པ་ཁོ་ན་ཡོངས་སྐྱབས་ཡིན།། 20

འཁོར་བ་འཇིགས་རུང་ནགས་ཀྱི་ནང་ན་རབ་དུ་རྒྱས་གྱུར་པ།
སྡུག་བསྔལ་མེ་ཡི་གདུང་པ་འགྲོ་བས་རབ་རྒྱས་དུ་བ་བཞིན།
སྐྱར་ཡང་རེག་པར་གྱུར་པ་མིན་པ་ལེགས་བྱས་ལྡན་རྣམས་ཀྱི།
མིག་ནི་མཆི་མའི་རྒྱ་ཡི་ཐིགས་ཀྱིས་རྒྱས་པར་མི་འགྱུར་རོ།། 21

ततस्तस्य तदादेशात् चक्षुर्बन्धनरक्षिणः ।
क्षुरेण गाढ़बद्धस्य पादयोस्तद्विकर्त्तनम् ॥ १५ ॥

स तीव्रवैशसक्लेशव्यथितः पार्थिवः परम् ।
नमो बुद्धाय बुद्धायेत्यार्त्तसंक्रन्दनं व्यधात् ॥ १६ ॥

भगवानथ सर्व्वज्ञः पुरः प्रत्यक्षतां गतः ।
शक्रदत्तासनासीनः कारुण्यात् तमभाषत ॥ १७ ॥

राजन् किं क्रियते क्रूरकर्म्मणां गतिरीदृशी ।
शुभाशुभसमुद्भूतं न भुक्तं क्षीयते फलम् ॥ १८ ॥

रागद्वेषविषासक्ते नानाव्यसनदुःसहे ।
एवंविधैव निःसारे संसारे दुःखसारता ॥ १९ ॥

संक्लेशकलिले काले विपत्सम्पद्विसङ्कटे ।
धैर्य्यमेव परित्राणं वैराग्यञ्च निराकुलम् ॥ २० ॥

संसारघोरगहनान्तरवर्द्धमानैः
दुःखानलव्यतिकरः प्रसृतैरसिक्ताः ।
धूमोद्गमैरिव पुनः सुकृतोचितानां
वाष्पाम्बुबिन्दुकलिला न दृशो भवन्ति ॥ २१ ॥

རྒྱལ་པོ་ལོངས་སྤྱོད་རི་བ་ཐོང༌། སྡུག་བསྔལ་འདི་ལ་བརྟན་པ་བརྟེན།
འཁོར་བའི་སྤྱོད་ཚུལ་ཐམས་ཅད་ནི། ཡོངས་སུ་གྱུར་པ་འགལ་བ་ཅན།། 22

ལུས་ཀྱི་མཇུག་དུ་ད་ལྟ་ཉིད། ཁྱོད་ལ་དགེ་བ་ཉེ་བར་གནས།
ཞེས་བརྗོད་དེ་ནི་དབུགས་ཕྱུང་སྟེ། བཅོམ་ལྡན་རང་གི་གནས་སུ་གཤེགས།། 23

གཟུགས་ཅན་སྙིང་པོ་ཡའང་ལུས་ཀྱི་མཐར། དེ་དུས་ཉིད་ན་མཐོ་རིས་སུ།
དཔལ་ལྡན་རྣམ་ཐོས་སྲས་ཀྱི་བུ། རྒྱལ་བའི་ཁྱུ་མཆོག་ཅེས་པར་གྱུར། 24

ཕ་ནི་སྡིག་དང་བྲལ་བ་དག། མ་སྐྱེས་དགྲ་ཡི་ཞེ་སྡང་ནས།
དེ་ཡི་ལུས་ནི་རབ་སྤྱངས་ཏེ། རང་གི་ཉེས་པར་བྱས་པར་སྨད།། 25

དེ་སེམས་དྲག་པོའི་སྡིག་པས་གདུངས། སྐྱང་ཚུལ་ངན་པས་སྤྱན་ཕྱུང་སྟེ།
ཕྱི་ལ་གདུང་བའི་མེ་ལ་དེར། དག་པའི་བྲུ་བ་བྱེད་པ་བཞིན།། 26

དེས་བསམས་ཀྱི་མ་ཀུན་རྨོངས་ལས། དབང་ཕྱུག་གིས་རྒྱགས་སྲིད་ལྡན་བློ།
ཚུལ་ངན་བདག་ནི་ལ་སྨྲ་བ་དུ། སྡིག་པའི་གཡང་ལ་ལྷུང་བར་གྱུར།། 27

ཐོས་པ་ཤེས་རབ་ཀྱིས་དབུལ་ཞིང༌། རང་ཉིད་བདེ་བས་རྨོངས་གྱུར་པ།
མི་བསྲུན་སྤྲུགས་རྫིས་ཞུགས་པ་རྣམས། བསམ་པས་ལུས་ནི་གདུང་བར་བྱེད།། 28

རྟེན་ས་མེད་པའི་སྡིག་པ་ཡི། འདམ་དུ་ལྷུང་ཞིང་ཉམས་གྱུར་པ།
བག་མེད་དག་ལ་རྒྱལ་བ་ནི། ཡང་དག་དྲན་པ་སྐྱབས་སུ་འགྱུར།། 29

भजस्व धैर्य्यं दुःखेऽस्मिन् भोगाशां त्यज भूपते ।
परिणामविरोधिन्यः सर्व्वाः संसारवृत्तयः ॥ २२ ॥

अधुनैव तवासन्ना देहान्ते कुशलस्थितिः ।
इत्युक्त्वा तं समाश्वस्य भगवान् स्वपदं ययौ ॥ २३ ॥

बिम्बिसारोऽपि देहान्ते तस्मिन्नेव क्षणे दिवि ।
अभूज्जिनर्षभो नाम श्रीमान् वैश्रवणात्मजः ॥ २४ ॥

अजातशत्रुर्जनकं ज्ञात्वा विगतजीवितम् ।
शरीरमस्य सत्कृत्य निनिन्द निजदुष्कृतम् ॥ २५ ॥

तस्यातितीव्रपापार्त्तं चित्तं दुर्वृत्तदूषितम् ।
पश्चात्तापाग्निपतनं प्रायश्चित्तमिवाकरोत् ॥ २६ ॥

सोऽवदद्वत* संमोहादैश्वर्य्यमदलुब्धधीः ।
दुर्वृत्तपातकश्वभ्रे पतितोऽहमधोमुखः ॥ २७ ॥

श्रुतप्रज्ञादरिद्राणां निजनिद्रासुखापहा ।
चिन्ता दहति गात्राणि खलमन्त्रानुवर्त्तिनाम् ॥ २८ ॥

पतितस्यावसन्नस्य पापपङ्के प्रमादिनः ।
अनालम्बस्य संत्राणं जिनसंस्मरणं मम ॥ २९ ॥

---

* Orig. वत्स ।

དེ་ལྟར་ཡུན་རིང་བསམས་ནས་དེར། བདེ་བར་གཤེགས་པའི་དྲུང་སོང་སྟེ།
ངན་པ་བྲམ་ལ་སྨོད་བྱེད་ཅིང་། མཆོག་ཏུ་ཡང་དག་གཞུམ་པར་གྱུར།། 30

དེར་ནི་བདག་ཉིད་མི་གཙང་བ། ཁས་ལེན་ཁྲིལ་དང་བཅས་པ་དེས།
སྡིག་ལ་རིག་པས་འཇིགས་པ་བཞིན། རིང་ནས་རྒྱལ་བལ་ཕྱག་འཚལ།། 31

དན་བྲམ་ལུས་ལ་ཡང་དག་ཆགས། གསལ་བར་བྱེད་བཞིན་འདར་ལྡན་པས།
མིག་ནི་མཆི་མ་དང་བཅས་དེས། ཀུན་མཁྱེན་ལ་ནི་ཡོངས་སྐྱབས་ཞུས།། 32

ཡོངས་གདུངས་སྡིག་པ་བྲམས་པ་བདག། ང་སྐྱོལ་བའི་མེ་ནི་ཉེ་བར་གནས།
ཐུགས་རྗེའི་རྒྱ་མཚོ་བཅོམ་ལྡན་འདས། ཁྱོད་ཉིད་ལ་ནི་སྐྱབས་སུ་སོང་།། 33

གྲུ་གཉིས་དམར་བ་ཁྱོད་ཀྱི་སྤྲིན། པད་མོ་འི་འོད་ལྡན་གང་གཱ་བཞིན།
དྲི་མ་འཁྲུ་བཟོད་དགག་བྱེད་པ། འདི་ཡི་བདག་ལ་རིག་པ་མཛོད།། 34

མི་བསྲུན་གྲོས་ཀྱི་རབ་ཞུགས་ཤིང་། བག་མེད་སྤྱོད་ཚུལ་ངན་པ་ཅན།
སྡིག་ཅན་འཁོར་བ་ལ་ཆགས་པ། བདག་གིས་ཕ་ནི་རྣམ་པར་བསད།། 35

ཅེས་པ་ཚོང་ལྡན་དེ་ཡི། ཚིག་ཐོས་དེ་བཞིན་གཤེགས་པ་ཡིས།
དེ་ཡི་སྡིག་རྡུལ་དག་བྱའི་སྐད། བསོད་ནམས་དབྱངས་ཅན་རབ་དུ་སྒྲོས།། 36

རང་ལས་ཀྱིས་བཞིན་མི་བསྲུན་པ། རྒྱལ་པོ་གནོར་པ་མ་བསམས་པ།
ཁྱོད་ནི་ཕ་བསད་ལ་བསྐུལ་དེ། ཉམ་ངའི་སྡིག་པར་ལྷུང་བར་འགྱུར།། 37

इति सञ्चिन्त्य सुचिरं स गत्वा सुगतान्तिकम् ।
जुगुप्समानः कुकृतात् परं संकोचमाययौ ॥ ३० ॥

तत्रापवित्रमात्मानं मन्यमानः सपत्रपः ।
प्रणनाम जिनं दूरात् पापस्पर्शभयादिव ॥ ३१ ॥

साश्रुनेत्रः परित्राणं स सर्व्वज्ञं व्यजिज्ञपत् ।
सकम्पः कायसंसक्तं विधुन्वन्निव दुष्कृतम् ॥ ३२ ॥

भगवन् कृतपापोऽहमासन्ननरकानलैः ।
उत्तप्तः करुणासिन्धुं त्वामेव शरणं गतः ॥ ३३ ॥

मामियं शोणपर्य्यन्ता दृष्टिस्ते पुष्करप्रभा ।
पुण्या स्पृशतु गङ्गेव मलप्रक्षालनक्षमा ॥ ३४ ॥

खलमन्त्रप्रवृत्तेन दुर्वृत्तेन प्रमादिना ।
मया विभवलुब्धेन पापेन निहतः पिता ॥ ३५ ॥

इति प्रलापिनस्तस्य वचः श्रुत्वा तथागतः ।
ससर्ज तत्पापरजःशुद्ध्यै पुण्यसरस्वतीम् ॥ ३६ ॥

राजन्न चिन्तितः पापः खलेनेव स्वकर्म्मणा ।
प्रेरितस्त्वं पितृवधे पतितः पापसङ्कटे ॥ ३७ ॥

སྡུག་བསྔལ་དེ་དེས་སྤྲུད་བྱ་ཞིང་། ཁྱོད་ཀྱིས་ཀྱང་ནི་སྡིག་པ་སྤོབ།
ས་སྐྱོང་དེ་དང་ཁྱོད་ཀྱི་འདི། སྐྱོང་བར་བྱ་བ་མཚུངས་པ་ཉིད།། 38

རང་གི་ལས་ནི་རབ་བཀོད་པ། དཔྲལ་བའི་ངོས་ལ་གནས་པ་དག།
ཛེ་ཡི་དུམ་བུའི་རི་མོ་དག། མི་རྣམས་ཀྱིས་རི་གཡོ་མ་ཡིན།། 39

ཁྱོད་ནི་མི་བསྟུན་པས་བསྐུལ་ནས། སྡིག་པའི་ལས་ནི་བྱས་པ་ཡིས།
དགེ་ལེགས་བདུད་རྩི་ཉེ་བ་ནི། རང་གི་ལག་གས་འཕངས་པར་འགྱུར།། 40

གལ་དེ་ཁྱོད་ལ་ད་ལྟ་ཡང་། སྡིག་གཉེས་ཕུན་ཚོགས་སྤོབ་འདོད་པ།
ཡོད་ན་བསོད་ནམས་བློ་གྲོས་མཛོད། དེ་ཡང་གཞི་ལས་བདག་ཉིད་ལའོ།། 41

མར་མེའི་སྤྲོད་ཚུལ་བདེ་བ་སྐྱེད། འཚོ་བྱེད་གྲགས་པ་བར་དུ་འབར།
བདུད་རྩིའི་རབ་དུ་བྱེད་པ་འདི། ལེགས་པ་དང་འགྲོགས་དམ་པའི་སྤྱོད།། 42

རྗེས་སུ་འགྲོད་པའི་སེམས་གདུངས་དང་། དམ་པ་རྣམས་དང་འགྲོགས་པ་དང་།
ཡང་དག་བསྔགས་དང་སྦྱིན་པ་ཡི། ལུས་ཅན་རྣམས་ཀྱི་སྡིག་ཉམས་བྱེད།། 43

སྟོད་ནི་གཙང་བྱེད་ཡོན་ཏན་སྟོང་བུ་ངེས་པར་ཟད་མི་བྱེད།
མཛའ་བའི་སྨྲུམ་ནི་མི་འཁྲོག་ཏྲི་མ་ཡང་ནི་སྐྱེད་མི་བྱེད།
སྐྱོན་མཚན་མཇུག་ཏུ་རབ་མཛེས་གཡོ་བ་ཉིད་ནི་འཛིན་མི་བྱེད།
དམ་པ་དང་འགྲོགས་ལེགས་བྱས་ཁང་པར་མར་མེ་ཅི་ཡང་ཡིན།། 44

दुःखं तत्तेन भोक्तव्यं प्राप्तव्यं किल्बिषं त्वया ।
तव तस्य च भूपाल तुल्यैषा भवितव्यता ॥ ३८ ॥

निजकण्ठसमुत्कीर्णा ललाटतटवर्त्तिनी ।
शिलाशकललेखेव निश्चला नियतिर्नृणाम् ॥ ३९ ॥

कुर्व्वता कलुषं कर्म्म खलप्रेरणया त्वया ।
प्रत्यासन्नामृतश्रेयः सहस्तेन तिरस्कृतम् ॥ ४० ॥

अद्यापि यदि ते पापं हन्तुं प्राप्तुञ्च सम्पदम् ।
वाञ्छास्ति तत्कुरु मतिं पुण्ये पापशमात्मनि ॥ ४१ ॥

दीपवृत्त्या सुखं सूते जीवयत्युज्ज्वलं यशः ।
अमृतस्य प्रकारोऽयं सुवृत्तः सत्समागमः ॥ ४२ ॥

पश्चात्तापाग्निपातेन साधुना सङ्गमेन च ।
संकीर्त्तनेन दानेन पापं नश्यति देहिनाम् ॥ ४३ ॥

पात्रं पवित्रयति नैव गुणान् क्षिणोति
स्नेहं न संहरति नैव मलं प्रसूते ।
दोषावसानरुचिरश्चलतां न धत्ते
सत्सङ्गमः सुकृतसद्मनि कोऽपि दीपः ॥ ४४ ॥

ཡོན་ཏན་ལྡན་པའི་ཚོགས་ལ་རྒྱུད་པ་འདོམས་མཁས་མཚན་མོའི་སྐད་
ཅིག་མཚུངས།

སྐྱེ་བོའི་འདྲེན་བྱེད་རྣམས་ཀྱི་གྲུ་བ་མཐའ་དག་རབ་ཏུ་འགོག་པར་བྱེད།
ཞེན་དུ་མཉམ་དང་མི་མཉམ་གནས་ལ་གནས་ཞིང་སྣང་བ་ཡོངས་ཟད་ལས།
རྨོངས་པ་ཆེན་པོའི་འབྱུང་བ་བསྐྱེད་དེ་སྨུན་པ་དང་ནི་མི་བསྲུན་གྲོགས།། 45

རྒྱལ་པོ་དཔལ་སྲུ་དཔལ་སྲུ་ཡིས། དུས་ཀྱི་སྡིག་པ་ཟད་གྱུར་ནས།
དབེན་པས་སྣང་བར་བྱས་པ་ཡི། རང་སངས་རྒྱས་སུ་ཁྱོད་འགྱུར་རོ།། 46

ཞེས་པ་བཅོམ་ལྡན་རྒྱལ་བ་ཡིས། བརྩེ་བས་དེ་ནི་དབུགས་དབྱུང་མཛད།
ལྷུང་ལས་ལྷག་པར་དམ་པ་རྣམས། སྙིང་རྗེ་བྱམས་པའི་སྤྱན་དང་ལྡན།། 47

དེ་ནས་བདེ་གཤེགས་ལ་བདུད་དེ། མི་བདག་རང་གི་གནས་སུ་སོང་།
སྡིག་པའི་ཁུར་པོ་ཆེན་པོ་ནི། ཡང་བ་ཉིད་བཞིན་རྣམ་པར་དག།། 48

དགེ་སློང་རྣམས་ཀྱི་དེ་སོང་ཚེ། དེ་ཡི་ལས་ཀྱི་དགེ་མཚན་ལས།
ས་སྐྱོང་གིས་ནི་སྔོན་བྱུང་མཐའ། དྲིས་ཤིང་བཅོམ་ལྡན་གྱིས་བཀའ་སྩལ།། 49

བ་ར་ཎཱ་སིར་ཚོང་དཔོན་གྱི། བུ་བཞི་དག་ནི་བྱུང་གྱུར་དེ།
དཔལ་ལྡན་བསྡམས་པ་དག་བྲལ་ཞིང་། གདུང་མེད་རྩེ་དགའ་ལ་བརྩོན་པའོ།། 50

ནམ་ཞིག་བདེ་བས་སྐྱོས་གྱུར་ཅིང་། ཕན་ཚུན་ཀུལ་ཀའི་གཏམ་གྱི་ནི།
ལང་ཚོས་འཕྱུར་བ་དེ་དག་གྲིས། རང་སངས་རྒྱས་ནི་བྲིན་པ་མཐོང་།། 51

गुणिगणविपद्दीक्षादक्षः क्षपाक्षणसन्निभः
सकलनयनव्यापाराणां जनेषु निरोधकः ।
असमविषमायासावासः प्रकाशपरिक्षयात्
सृजति हि महामोहाद् गाढं तमः खलसङ्गमः ॥ ४५ ॥

प्रत्येकबुद्धस्त्वं राजन् कालेन क्षीणकिल्बिषः ।
भविष्यसि विवेकेन कृतालोकः शनैः शनैः ॥ ४६ ॥

इति तस्य दयाश्वासं चकार भगवान् जिनः ।
पतितेष्वधिकं सन्तः करुणास्निग्धलोचनाः ॥ ४७ ॥

ततः प्रणम्य सुगतं प्रयातः स्वपदं नृपः ।
महतः पापभारस्य विवेद लघुतामिव ॥ ४८ ॥

तस्मिन् प्रयाते सर्व्वज्ञः पृष्टस्तत्कर्म्मकौतुकात् ।
भिक्षुभिः क्षितिपालस्य पूर्व्ववृत्तमभाषत ॥ ४९ ॥

वाराणस्यां निरायासविश्वासव्यवसायिनः ।
चत्वारः श्रेष्ठितनया बभूवुः श्रीविसृङ्खलाः ॥ ५० ॥

ते कदाचित् सुखक्षीवा मिथः कलिकयास्थिताः ।
प्रत्येकबुद्धमायान्तं ददृशुर्यौवनोद्धताः ॥ ५१ ॥

དེ་མཐོང་རྣམ་པར་སྣང་བ་སྐྱེས། ཞི་དུལ་སྤྱོད་བྱེད་ཕུང་པོ་ནི།
སྲུན་དར་ཀ་ཞེས་པ་ཡིས། འཇོམ་བཅས་སྤྱན་སྔ་རྣམས་ལ་སྨྲས།། 52

བདུང་བས་སྐྱོས་པའི་དགེ་སློང་ནི། ཆོས་གོས་ལྷུང་བཟེད་རྟགས་ཅན་འདི།
སྒྲོག་དང་བྲལ་བ་བསྒྲུབ་བོ་ཞེས། འདི་ནི་བདག་གི་ཡིད་ལ་སྙམ།། 53

གསོ་བ་ལས་དེས་འདི་བཟོད་ཆོ། གཉིས་པ་ཀུན་དྲ་ར་ཞེས་པས།
སྨྲས་པ་བདག་ནི་དགེ་སློང་འདི། རྩ་ལ་འཕངས་དེ་གསད་པར་འདོད།། 54

དེ་ནས་གསུམ་པ་ཕྱིག་པ་ཅན། སྲུན་དར་ཀ་ཞེས་པས་སྨྲས།
དགེ་སློང་འདི་ཉིད་མགྱོགས་པར་ནི། ཁ་ཁྱེར་དག་ལ་འཕངས་པར་བྱ།། 55

བཞི་པ་གདུག་པའི་བློ་གྲོས་ཅན། ཀན་དར་ཞེས་བྱ་བས་སྨྲས།
དགེ་སློང་རྐང་པ་རང་གིས་ནི། སྤྱུ་གྲིས་ལེགས་པ་མེད་པར་བྱ།། 56

ཞེས་པ་སྨྲས་ཞིང་དེ་དག་རྣམས། ཕྱིག་པ་ཡིད་ལ་འདོད་པར་གྱུར།
རང་གིས་རང་འདོད་མཚུངས་པའི་འབྲས། དེ་དག་སྐྱེ་བ་གཞན་ལ་ཐོབ།། 57

ཆགས་པས་ལོང་བས་ནོར་མཐོང་སྟེ། ཁྲོ་བས་ལོང་བས་དགྲ་ཉིད་དོ།
འདོད་པས་ལོང་བས་འདོད་ལྡན་མ། རྒྱགས་པས་ལོང་བས་ཅི་ཡང་མིན།། 58

ནོར་གྱི་རབ་བསྐྱེད་རྣམ་འགྱུར་ཅན། བདག་ཉིད་མི་སྒོམ་རྟོག་དགྱོད་དམན།
རྒྱགས་པ་རྣམས་ཀྱི་ཀུན་དགའ་ནི། ཉོན་མོངས་རྩ་བ་ཉིད་དུ་གྱུར། 59

རྒྱུ་མེད་ཁྲོ་བར་བྱེད་ཙང་རྒྱུ་མེད་རབ་ཏུ་འབར་བར་བྱེད།
རྒྱུ་མེད་མཛད་པར་བྱེད་ཅིང་རྒྱུ་མེད་ཀུན་དུ་ཁས་ལེན་བྱེད།

तं दृष्ट्वा जातविद्वेषाः शमसंयमनिन्दकाः ।
ज्येष्ठः सुन्दरको नाम भ्रातॄन् प्रोवाच सस्मितः ॥ ५२ ॥

अयं चीवरपात्राङ्कः पानेन गतजीवितः ।
क्षीबो विधीयते भिक्षुरित्ययं मे मनोरथः ॥ ५३ ॥

इत्युक्ते चापरस्तत्र तेन द्वितीयः कुन्दराभिधः ।
उवाच भिक्षुं क्षिप्रमेनं हन्तुमिच्छाम्यहं जवे ॥ ५४ ॥

ततस्तृतीयोऽप्यवदत् पापः सुन्दरकाभिधः ।
एष भिक्षुर्वरं तस्यां वीथ्यां निक्षिप्यते जवात् ॥ ५५ ॥

चतुर्थोऽप्यवदत् क्रूरमतिः कन्दरकाभिधः ।
भिक्षोः क्षुरेण क्रियते निश्चर्म्म चरणद्वयम् ॥ ५६ ॥

इति तेषां ब्रुवाणानां कलुषोऽभून्मनोरथः ।
येन जन्मान्तरे प्रापुस्ते स्वेच्छासदृशं फलम् ॥ ५७ ॥

धनं पश्यति लोभान्धः क्रोधान्धः शत्रुमेव च ।
कामान्धः कामिनीमेव दर्पान्धस्तु न किञ्चन ॥ ५८ ॥

धनोद्भूतविकाराणां प्रयात्यनियतात्मनाम् ।
मदमन्दविचाराणामानन्दः क्लेशबन्धताम् ॥ ५९ ॥

क्रुध्यन्त्यकारणमकारणमुत्पतन्ति
स्निह्यन्त्यकारणमकारणमामनन्ति ।

ངེས་པར་སྨོངས་པས་བཅོམ་པ་ཕན་དང་མི་ཕན་དབྱེད་མེད་ཅིང་།
མཆོག་ཏུ་ཆོས་པས་མི་ཡི་ཕྱུགས་རྣམས་རྒྱུགས་དང་བཅས་པར་གྱུར། ॥ 60

སྲིག་ལས་ཚོང་དཔོན་བྲུ་ཐུ་བོ། དེ་ཉིད་སྐྱེ་བ་གཞན་ལ་ནི།
ཤཱཀྱ་ཤཱ་རིའི་རྒྱུ་ཞེས་པ། ཆང་འཐུངས་ནས་ནི་ཉམས་པར་འགྱུར། ॥ 61
གཉིས་པ་ཡང་ནི་ཤཱཀྱ་དག ། མིང་ཆེན་ཆུ་ལ་ཤི་བར་གྱུར།
གསུམ་པ་རྒྱལ་པོ་གསལ་རྒྱལ་ཡང་། བུ་ཡི་བསྐྲད་ནས་བསད་པར་འགྱུར། ॥ 62
བཞི་པ་གཟུགས་ཅན་སྙིང་པོ་ནི། བུ་ཡི་བཙོན་དུ་བཅིངས་ནས་བསད།
སྐྱིད་དང་ལྡན་པའི་ནོར་བཞིན་དུ། ལས་ནི་རབ་ལྡན་སྤྱོད་པར་བྱེད། ॥ 63

དེ་ལྟར་སྨོངས་པས་བཅོམ་པའི་དམ་པ་དམ་མིན་རྣམས་ཀྱིས་འདིར།
བདེ་བ་མེད་པའི་ལས་ནི་འཕྲུལ་ཉིད་རྣམ་པར་བསྒྲུབ་པ་གང་།
ཚུལ་མིན་ཉེ་བར་གནས་པ་དེ་ནི་མཆི་མའི་ཆུ་དག་གིས།
མི་རྫོགས་སུ་ངན་མི་ཆུང་དབང་དང་བྲལ་བས་སྤྱོད་པར་བྱེད། ॥ 64

གཟུགས་ཅན་སྙིང་པོའི་སྐྱེ་བ་ལྷ་མར་རབ་ཞུགས་བྱུང་བའི་ཚུལ།
མི་བཟང་དུག་གི་རྣམ་སྨིན་འདི་དག་བདེ་གཤེགས་ཀྱིས་གསུངས་པ།
མདུན་སར་དགེ་སློང་རྣམ་མང་དག་གི་གསལ་བར་ཐོས་གྱུར་ནས།
གདུང་བ་བརྒྱ་ཡི་མཚན་མས་སྐྱུན་བྱུང་སེམས་ཉིད་ཡིན་པར་སེམས། ॥ 65

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་བཞི་པའོ། ॥

मोहाहताः खलु हिताहितनिर्विचाराः
तृप्ताः परं नृपपशवः समदा भवन्ति ॥ ६० ॥

ज्येष्ठः श्रेष्ठिसुतः पापात् स एवापरजन्मनि ।
शारिश्रेयानाभिधः शाक्यः पीत्वा मद्यं व्यपद्यत ॥ ६१ ॥

द्वितीयोऽपि महान्नाम शाक्यस्तोये क्षयं गतः ।
तृतीयश्च स्वपुत्रेण व्यस्तो राजा प्रसेनजित् ॥ ६२ ॥

विम्बिसारश्चतुर्थोऽसौ हृतः पुत्रेण बन्धने ।
प्रयुक्तं धनवत् कर्म्म भुज्यते हि सवृद्धिकम् ॥ ६३ ॥

मोहाहतैरिह हि सद्भिरसद्भिरेषां
निःशर्म्म कर्म्म सहसैव विडम्ब्यते यत्
वाष्पाम्बुपूर्णनयनैरनयोपनीत-
मस्तोकशोकविवशैरनुभूयतेऽच्च ॥ ६४ ॥

सुगतकथितमेतत् पूर्व्वजन्मप्रवृत्तं
विषविषमविपाकं विम्बिसारस्य वृत्तम् ।
विबुधसदसि भिक्षुः स्पष्टमाकर्ण्य मेने
व्यसनशतनिमित्तं दूषितं चित्तमेव ॥ ६५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलताया-
मजातशत्रुपितृद्रोहावदानं नाम चतुश्चत्वारिंशः पल्लवः ॥

ཡལ་འདབ་སྟི་བཞི་བཅུ་རྩ་ལྔ་པ།

མི་བསྐྱུད་ཕུན་པས་འཕྲལ་ལ་ལོང་བར་གྱུར་ཅིང་།
དཔལ་འབྱོར་རྣམ་པར་གནས་དང་བྲལ་ཟར་རབ་བསྐྱུན་ཀྱང་།
ཉམ་ངའི་གནས་སྐབས་མཚན་མོ་འདས་ནས་པདྨ་བཞིན།
སླར་ཡང་ཡོན་ཏན་ལྡན་པས་རང་གི་ཕུན་ཚོགས་ཐོབ།། 1

བདེ་གཤེགས་མཚན་ཡོད་རྒྱལ་བྱེད་ཀྱི། སྐྱིད་མོས་ཚལ་ན་བཞུགས་པའི་ཚེ།
ལྷ་སྦྱིན་ཡོངས་སུ་སྤྱོང་བ་ཡི། རྫོད་པས་ཁྱབ་པས་རྣམ་བསམས་པ།། 2

ཤཱཀྱའི་རིགས་ལས་སྐྱེས་པའི་མི། བདག་ནི་སྤྱན་དང་མཚུངས་ཤིང་མཉམ།
བསོད་ནམས་མཐུ་ཡིས་འགྲོ་གསུམ་གྱིས། མཆོད་བྱ་ཉིད་ནི་རྒྱལ་ཟས་ཐོབ།། 3

དེ་སྐད་དེ་ཡི་འཚོ་བ་ནི། རབ་ཏུ་གནོམ་ལ་བདག་འབད་བྱ།
གང་ཕྱིར་ཉི་མ་མ་ནུབ་ཚེ། གཞན་གྱི་གཟི་བྱིན་གསལ་བ་མེད།། 4

ཡིད་ནི་ང་རྒྱལ་གྱིས་སྒོ་བའི། རྣམ་ཤེས་དག་དང་མཐུ་དང་ནི།
རིགས་དང་དཀའ་ཐུབ་དཔལ་དག་གིས། ཕ་རོལ་ཁྱད་འཕགས་བཟོད་མ་ཡིན།། 5

དུག་ནི་རང་གི་སྙིང་རྩེ་ལ། བརྫུང་ནས་དེ་ལ་ཕྱག་འཚལ་དེ།
བརྟན་པར་ཁང་པ་ལ་མནན་པས། ངེས་པར་ཕྱག་ལ་བདང་བར་བྱ།། 6

पञ्चचत्वारिंशः पल्लवः ।

अन्धीकृतोऽपि सहसा तमसा खलेन
लक्ष्मीविहारविरहे विनिपातितोऽपि ।
कष्टां दशामिव निशामतिवाह्य पद्मः
स्वामेव सम्पदमुपैति पुनर्गुणाढ्यः ॥ १ ॥

श्रावस्त्यां सुगते जेतवनोद्यानविहारिणि ।
देवदत्तः परिद्वेषव्याधिव्याप्तो व्यचिन्तयत् ॥ २ ॥

तुल्यः समानो मे भ्राता मनुष्यः शाक्यवंशजः ।
प्राप्तः पुण्यप्रभावेण त्रिजगत्पूज्यतां जिनः ॥ ३ ॥

जीवितोद्वृत्तये तस्मात् तस्य यत्नं करोम्यहम् ।
न ह्यनस्तंगते भानौ परतेजः प्रकाशते ॥ ४ ॥

विज्ञानेनानुभावेन विद्यया तपसा श्रिया ।
परप्रकर्षं सहते नहि मानोन्नतं मनः ॥ ५ ॥

विषं निजनखाग्रेषु धृत्वा तस्य प्रणामकृत् ।
सञ्चारयामि वपुषि मैदिष्टः पादपीडनैः ॥ ६ ॥

དེ་ལྟར་སྡིག་པ་བསམས་བྲུས་ནས། སྡང་བའི་དབང་གྱུར་མི་བསྒྲུན་པ།
དེ་ཡིས་སྐར་རྒྱལ་སོགས་པས། གཉེན་རྣམས་ལ་ནི་འདི་སྐད་སྨྲས།། 7

དེ་རིང་བདེ་གཤེགས་གཙུ་བོ་ཡིས། ཞབས་ལ་རབ་ཏུ་དང་བའི་སྐྱིད།
གཏུག་པ་གནོད་པ་བྱེད་པ་ཡིས། སྡིག་པ་ལྷི་ལྡན་བདག་གདུག་གོ།། 8

ཞེས་སྨྲ་གདུག་པའི་བློ་ཅན་དེ། རྗེས་མཐུན་སྟེར་བྱེད་དེ་དག་རྣམས།
ཀུན་དང་ལྷན་ཅིག་རྒྱལ་བ་ནི།། རྒྱལ་བྱེད་ཚལ་བཞུགས་བལྟ་རུ་སོང་།། 9

དེར་ནི་བཅོམ་ལྡན་མཐོང་གྱུར་ནས། ཇི་སྙེད་ཉེ་བར་དེས་ཕྱིན་པ།
དེ་སྲིད་བདག་ནི་བསྒྲིགས་སོ་ཞེས། ཁང་པ་སྒྲུག་ཅིང་རྒྱ་ཆེར་སྨྲས།། 10

འཚོ་བའི་རྣམ་རྟོག་སྡིག་པ་ནི། རྡོ་རྗེ་ལྟ་བུས་ཡང་དག་བཅོམ།
སྐད་ཅིག་དེ་ལ་ང་རྒྱལ་བའི་མེར། ལུས་དང་བཅས་པ་ལྷུང་བར་འགྱུར།། 11

འཇིགས་རུང་ང་རྒྱལ་བར་ལྷུང་བ་དེ། འཕྲལ་ལ་ཀུན་མཁྱེན་གྱིས་གཟིགས་ནས།
དེ་བརྗོད་ཐོས་པའི་ཡ་མཚན་པའི། ཕུན་ཚོགས་དགེ་སློང་ལ་གསུངས་པ།། 12

སྡིག་པ་དག་གིས་སྐྱོན་གྱིས་ནི། ཉོན་མོངས་ཅམ་ངར་ལྷུང་བར་གྱུར།
གང་ཕྱིར་དྲི་མ་ལྡན་པའི་ཡིད། ཀུན་ཏུ་རབ་རིབ་དྲག་པོ་སྐྱེད།། 13

གྲོང་ཁྱེར་དགེ་བའི་དབྱངས་སུ་ནི། ས་ཡི་བདག་པོ་ཡོད་བཟང་ལ།
བྲུས་ཤེས་དང་ནི་བྲུས་མི་ཤེས། བུ་གཉིས་སྟོན་ཆེ་བྱུང་བར་གྱུར།། 14

इति सञ्चिन्त्य कलुषं विद्वेषविवशः खलः ।
स तिष्यप्रमुखानेत्य बान्धवानिदमभ्यधात् ॥ ७ ॥

क्रूरः कृतापकारोऽहं सुगतस्याद्य पादयोः ।
सरलस्य प्रसादाय पतामि गुरुपातकः ॥ ८ ॥

इति ब्रुवाणस्तैः सर्व्वैः सुहृद्भिरनुमतैः सह ।
जिनं जेतवनासीनं द्रष्टुं दुष्टमतिर्ययौ ॥ ९ ॥

भगवन्तं* विलोक्याभूत्तत्र यावत् स सर्व्वशः ।
तावद्वन्द्योऽहमित्युच्चैरुत्क्षिप्तचरणोऽवदत् ॥ १० ॥

हिंसासङ्कल्पपापेन वज्रेणेव समाहतः ।
सशरीरं क्षणे तस्मिन् नरकाग्नौ पपात सः ॥ ११ ॥

सर्व्वज्ञः सहसा दृष्ट्वा तं घोरनरके च्युतम् ।
उवाच श्रुततद्वृत्तविस्मितां भिक्षुसंसदम् ॥ १२ ॥

एष किल्बिषदोषेण पतितः क्लेशसङ्कटे ।
तीव्रं हि तिमिरं सूते सर्व्वथा मलिनं मनः ॥ १३ ॥

नगर्य्यामतिघोषायां रतिसोमस्य भूपतेः ।
कृतज्ञश्चाकृतज्ञश्च पुरा पुत्रौ बभूवतुः ॥ १४ ॥

---

* Orig. भगवान् तम् ।

བྱས་ཤེས་བརྩེ་བས་སྐྱང་རྣམས་ལ། ཏྲག་ཏུ་དཔག་བསམ་ཤིང་བཞིན་དུ།
རང་གི་རིན་ཆེན་རྒྱན་གྱིས་ཚོགས། རིམ་བར་བཀྲོལ་ནས་རབ་ཏུ་སྟེར།། 15

བགོས་པ་མིན་པ་ཕ་ཡི་རྫས། ཐམས་ཅད་ཡུ་ཅག་ཐུན་མོང་ཡིན།
ཞེས་སླས་བྱས་མི་ཤེས་ཀྱིས་ཀྱང་། དེ་ཡི་བྱིན་པ་དེ་དག་འཕྲོགས།། 16

དེ་ནས་མི་བདག་བློ་གྲོས་དབྱངས། ཞེས་པས་བྱས་ཤེས་བསྔགས་འདི་ས་ལ།
སྐྱོ་བོ་དགེ་མ་ཞེས་པ་ཡིས། བུ་མོ་ཚིག་གི་བྱིན་པར་གྱུར།། 17

རང་ཉིད་ཀྱིས་བསྒྲུབས་བྱིན་པ་ཡིས། ཡོད་ལ་རེ་བ་དེ་ལ་སྐྱེས།
དེ་ནས་རྒྱ་གཉེར་ཆེན་པོར་ནི། བྱས་ཤེས་གཟིངས་ལ་ཞོན་པར་གྱུར།། 18

སྐྱང་ཞིང་འགྲན་པས་གསུས་འཕེལ་བ། ངན་པ་བྱས་མི་ཤེས་པ་ཡང་།
རིན་ཆེན་སྒྲུབ་བརྩོན་དེ་ཉིད་ཀྱིས། རྗེས་སུ་ཆགས་ལས་སོང་བར་འགྱུར།། 19

དེ་ནས་ཚོང་པའི་དོན་མཐུན་གྱིས། ཡོངས་གང་གཟིངས་ནི་དལ་བུ་ཡི།
རྗེས་སུ་མཐུན་པའི་རླུང་དག་གིས། འདོད་པའི་གླིང་དུ་ཕྱིན་པར་གྱུར།། 20

ཚོང་པ་རྣམས་ཀྱི་ཀུན་རྟོགས་བཞིན། རིན་ཆེན་ཚོགས་ཀྱི་ཀུན་དུ་ཁེངས།
དེ་ནས་དེ་ནི་སླར་ལོག་ནས། རང་གི་ཕྱོགས་སུ་འགྲོ་བརྩོན་ཆེ།། 21

ས་གཞི་ནི་པའི་རིན་པོ་ཆེ། བརྒྱ་ཕྲག་ལྔ་ནི་བྱས་ཤེས་ཀྱིས།
བླངས་ནས་གོས་ཀྱི་ཡལ་འདབ་ལ། རས་མ་ཡིས་ནི་མདུད་པར་བཅིངས།། 22

कृतज्ञः कृपयार्थिभ्यः कल्पवृक्ष इवानिशम् ।
निजं विमुच्य प्रददौ रत्नाभरणसञ्चयम् ॥ १५ ॥

अविभक्तं पितुर्द्रव्यं सर्व्वं साधारणं तयोः ।
वदन्नित्यकृतज्ञोऽपि तेन दत्तं जहार तत् ॥ १६ ॥

ततः श्लाघ्याय वचसा मतिघोषाभिधो नृपः ।
जनकल्याणिकां नाम कृतज्ञाय सुतां ददौ ॥ १७ ॥

स्वयमेवार्जितं वित्तं दातुं जातमनोरथः ।
आरुरोह प्रवहणं कृतज्ञोऽथ महोदधौ ॥ १८ ॥

रत्नार्जनोद्यतं यान्तं तं द्वेषस्पर्द्धितादरः ।
तमेवानुययौ लोभादकृतज्ञोऽपि दुर्जनः ॥ १९ ॥

संपूर्णं वणिजां सार्थैः ततः प्रवहणं शनैः ।
आनुकूल्येन मरुतामवाप द्वीपमीप्सितम् ॥ २० ॥

तस्मिन् प्रतिनिवृत्तेऽथ स्वदेशं गन्तुमुद्यते ।
रत्नराशिभिरापूर्णसंकल्पे वणिजां गणे* ॥ २१ ॥

कृतज्ञः पृथिवीमूल्यं रत्नानां शतपञ्चकम् ।
आदाय ग्रन्थिपट्टेन बबन्धांशुकपल्लवे ॥ २२ ॥

---

* Orig. मिव ।

དེ་ནས་གཟིངས་ཆེན་རིན་ཅན་གྱི། ཁར་གྱིས་ཡོངས་སུ་ངལ་བ་དེ།
རླུང་ཆེན་དག་གིས་ཞིག་གྱུར་ཏེ། ཚུལ་ངན་རྣམས་ཀྱི་དབང་ཕྱུག་བཞིན།། 23

དེ་ནས་ཤིང་དུམ་བཟུང་བ་ཡི། གྲུ་ཤེས་ཀྱིས་ནི་འཚོ་བ་ཐོབ།
སྐྱབ་ཀྱི་གྲུས་མི་ཤེས་དག་ནི། གླིངས་པར་གྱུར་བ་མང་དག་བསྐྱལ།། 24

འཇིགས་རུང་ཆུ་སྲིན་འབྱུང་གནས་ལས། བརྩེ་བས་བསྐྱལ་བའི་སྐྱོན་ཟླ་དེས།
དེ་ཡི་གྲུ་བ་དག་ལ་ནི། རིན་ཅན་ཡིད་འོང་བསགས་པ་མཐོང་།། 25

དེ་ཡི་རིན་ཆེན་ལ་ཆགས་དང་། སྡང་བའི་དབང་དུ་གྱུར་པ་དེས།
རྒྱ་མཚོ་འི་འགྲམ་དུ་ངལ་བ་ཡི། སྐྱོན་ཁ་འཁྲུ་བ་བསམས་པར་འགྱུར།། 26

དེ་ནི་གཉིད་དུ་སོང་བ་ལ། མིག་དག་མཚོན་གྱི་རབ་ཕྱུང་ནས།
རིན་པོ་ཆེ་ཡི་ཚོགས་བཟུང་སྟེ། གྲུས་མི་བཟེ་དེ་མགྲོགས་པར་སོང་།། 27

སྒྲ་གཅན་གྱིས་ནི་ཉིར་བྱེད་བཞིན། གདུག་པས་ལོང་བར་བྱས་པ་དེས།
འཇིག་རྟེན་ཕན་པར་བྱལ་བ་ལས། སྡུག་བསྔལ་ལྡན་པས་དེས་ཀུང་བསམས།། 28

ང་ནི་སློང་ལ་སྦྱིན་དོན་དུ། ཡིད་ལ་རེ་བ་དོན་མེད་གྱུར།
ལོང་བ་བདག་གི་འཚོ་བ་ནི། འབྲས་མེད་དག་གིས་དགོས་པ་ཅི།། 29

གལ་ཏེ་དུས་ལ་མ་བབ་པས། སྲོག་ནི་འཇིག་པར་མི་འགྱུར་ན།
དེ་ལ་གྲོགས་མེད་དཀའ་ཐུབ་ཀྱི། སྦྱོར་བ་ཉོན་མོངས་ཞི་འཇིག་བཟོད།། 30

रत्नभारपरिश्रान्तं ततः प्रवहणं महत् ।
अभज्यत महावातैरैश्वर्यमिव दुर्नयैः ॥ २३ ॥

ततः फलकवाहस्तं कृतघ्नः प्राप्तजीवितः ।
अकृतघ्नं निमज्जन्तं पृष्ठेन समतारयत् ॥ २४ ॥

तारितः कृपया भ्राता स घोरमकराकरात् ।
अपश्यदञ्चले तस्य रुचिरं रत्नसञ्चयम् ॥ २५ ॥

स तस्य रत्नलोभेन द्वेषेण च वशीकृतः ।
समुद्रतीरे श्रान्तस्य भ्रातुर्द्रोहमचिन्तयत् ॥ २६ ॥

तस्य निद्रानिलीनस्य शस्त्रेणोत्पाट्य लोचनम् ।
गृहीत्वा रत्ननिचयं कृतघ्नः स ययौ जवात् ॥ २७ ॥

क्रूरेणाङ्गीकृतस्तेन राहुणेव दिवाकरः ।
लोकोपकारविहतो दुःखितः सोऽप्यचिन्तयत् ॥ २८ ॥

अधुनार्थिप्रदानेऽर्थे व्यर्थीभूते मनोरथे ।
किं ममान्धस्य वन्ध्येन जीवितेन प्रयोजनम् ॥ २९ ॥

अप्राप्तविषयाः प्राणा न प्रयान्ति यदि क्षयम् ।
तदसङ्गतयो योगाः क्लेशयन्ति क्षयक्षमाः ॥ ३० ॥

ནོར་ཟད་སྐྱེ་བོ་སྡང་གྱུར་ཅིང་། ཁེངས་པ་དང་བྲལ་འཁྲུགས་པའི་ཚེ།
སྐྱེས་བུ་རྣམས་ནི་ན་ཚོད་འཛུག། ཞི་བས་ཟད་པ་མཆོད་པར་འོས།། 31

དེ་ལྟར་བསམས་ཞིང་དཔལ་བྱུས་ནི། འགྲོ་བ་དོན་མཐུན་དག་གིས་བསྐུལ།
ས་བདག་བློ་གྲོས་དབྱངས་ཀྱིས་ནི། གྲོང་ཁྱེར་དགའ་དང་ཉེ་བར་ཕྱིན།། 32

བ་ལང་སྐྱོང་བའི་ཁང་པ་རེར། ཅུང་ཟད་དུས་ནི་དེ་ཡི་བཞུད།
རྒྱལ་པོའི་བུ་མོ་སྐྱིད་མོས་ཚལ། རྣམ་པར་ལྟ་ཞིང་འགྲོ་བ་ཡི།། 33

ཡོང་ཡང་རྒྱལ་པོའི་མཚན་རྣམས་ཀྱི། གསལ་བར་མཚན་པ་དེ་མཐོང་ནས།
སྐྱེ་བ་སྔ་མའི་མཛའ་བས་བཅིངས། དེ་ལ་མངོན་པར་དགའ་བར་གྱུར།། 34

དེ་ནས་ཡབ་ཀྱིས་བཀའ་ལས་ནི། རང་ཉིད་མཆོག་འདམ་དེ་ཡིས་བྱས།
རྒྱལ་པོ་རྣམས་ཀྱི་ནང་ནས་ནི། མིག་དང་བྲལ་བ་མོས་དེ་གདམས།། 35

ས་སྐྱོང་རྣམས་ནི་ཡོངས་བཏང་ནས། སྨིག་མ་ཁྲོད་ཀྱིས་ཡོང་ཞ་གདམས།
ཞེས་བརྗོད་པ་ནི་ཁྲིམས་པ་ཡི། དགེ་མ་དེ་ནི་ཕྱི་རོལ་བསྒྲད།། 36

མཛའ་བཅུགས་ཉེར་བསགས་གསུས་པ་ཅན། དེ་ཡི་ཡོང་ཞ་སྐྱིད་ཚལ་དུ།
བཞག་ནས་འབད་པས་ཁ་ཟས་དག། བསྐྱངས་ནས་སྟེར་ཞིང་རྟག་ཏུ་གནས།། 37

ནམ་ཞིག་ཟས་ཀྱི་སྐབས་འདས་ཚེ། ཡུན་རིང་ལོན་ནས་འོངས་དེ་ལ།
བཀྲེས་པས་བཞིན་ནི་ཡོངས་ཉམས་པའི། རྒྱལ་པོའི་བུ་ཡིས་རབ་སྨྲས་པ།། 38

क्षीणे धने जने द्वेषमानवैकल्यविह्वले ।
पूज्ये पुंसां समेनैव शेषस्य च यशोव्ययः ॥ ३१ ॥*

इति सञ्चिन्त्य स शनैर्व्रजन् सार्थेन तारितः ।
अवाप नगरोपान्तं मतिघोषस्य भूपतेः ॥ ३२ ॥

गोपालभवने तत्र स कञ्चित्कालमास्थितः ।
उद्यानयात्रागतया राजपुत्र्या विलोकितः ॥ ३३ ॥

तं दृष्ट्वान्धमपि व्यक्तराजलक्षणलक्षितम् ।
प्राग्जन्मप्रेमबन्धेन साभिलाषा बभूव सा ॥ ३४ ॥

ततः स्वयंवरविधिं सा कृत्वा शासनात् पितुः ।
राज्ञां मध्ये च मान्यानां वव्रे विगतलोचनम् ॥ ३५ ॥

भूमिपालान् परित्यज्य वृतोऽन्धः पापया त्वया ।
उक्तेति पित्रा कोपेन निरस्ता शुशुभे न सा ॥ ३६ ॥†

उद्याने सा निधायान्धं यत्नेनाहृत्य भोजनम् ।
सदा तस्मै ददौ प्रेम प्रणयोपचितादरा ॥ ३७ ॥

कदाचित् तां चिरायातामाहारावसरे गते ।
उवाच राजतनयः परं म्लानाननः क्षुधा ॥ ३८ ॥

---

* Not clear. † Not clear.

ཁྱོད་ནི་ཀུན་དུ་མ་བརྟགས་པར། བྱེད་མས་གཡོ་བ་འབའ་ཞིག་ལས།
མི་བདག་ཡངས་པའི་སྤྱན་ལྡན་རྣམས། ཡོངས་བཏང་བདག་ནི་ལོང་བ་འདམས།། 39

ཁྱོད་ནི་ཕྱི་ནས་འགྱོད་པ་ཡིས། བདག་ལ་གུས་པ་དམན་གྱུར་ཏེ།
ད་ནི་མཛའ་བ་ཞན་པ་ཉིད། སྟོན་པར་བརྩོན་པ་མ་ཡིན་ནམ།། 40

ལོང་བ་ལྟ་བས་ཡིད་བྱུང་དེ། གཟུགས་བཟང་བལྟ་ལ་མངོན་པར་ཕྱོགས།
དེ་རིང་ཟལ་ཀྱི་ངུས་འདས་ཏེ། རིང་མོ་ཞིག་ན་ཁྱོད་འོངས་སོ།། 41

དེ་ཡིས་རྩུབ་མོ་འདི་སྨྲས་ཏེ། འདར་བ་དང་ལྡན་འཁྲི་ཤིང་ནི།
སྨྲ་སྒྲོག་བུང་བའི་འཕྲེང་ལྡན་བཞིན། སྙན་པར་སྨྲས་བྱེད་དེས་སྨྲས་པ།། 42

མགོན་པོ་ཁྲི་ནས་བདག་ལ་ནི། ལོག་པའི་ངོགས་པ་བགྱིད་མི་འོས།
མཛའ་ནས་མཉེས་གཞིན་སེམས་ཀྱིས་ནི། ཚིག་གི་མདའ་ལྷུང་མི་བཟོད་དོ།། 43

ཁྱོད་ནི་ལྷ་ཉིད་དུ་ཤེས་ལ། གལ་ཏེ་བདག་གི་ཡིད་དག་ན།
བདེན་པ་དེ་ཡིས་ཁྱོད་ཀྱི་མིས། གཅིག་ནི་སྣང་བ་ལྡན་གྱུར་ཅིག།། 44

ཅེས་པ་སྙིང་སྟོབས་ལྡན་མ་དེས། བརྗོད་ཚེ་གྱུར་པར་དེ་ཡི་སྤྱན།
རབ་རྒྱས་པདྨའི་རྣམ་པ་ཅན། གཅིག་ནི་དྲི་མེད་ཉིད་དུ་གྱུར།། 45

དེ་ཡི་བདེན་པའི་མཐུ་ཡིས་ནི། ཡ་མཚན་ཆེན་པོ་ཡང་དག་སྐྱེས།
བདེན་པའི་ཡིད་ཆེས་སྨྲ་ལྡན་པས། གྲུས་ཤེས་ཀྱིས་ནི་དེ་ལ་སྨྲས།། 46

असमीक्षितकारिण्या त्वया केवलचापलात् ।
हतोऽहमन्धः सन्त्यज्य नृपान् विपुललोचनान् ॥ ३९ ॥

पश्चात्तापेन नूनं त्वं मयि पर्य्युषितादरा ।
अधुना ताण्डवं प्रेम्णः प्रदर्शयितुमुद्यता ॥ ४० ॥

अन्धसन्दर्शनोद्विग्ना सुरूपालोकनोन्मुखी ।
आहारकालेऽतिक्रान्ते चिरेणेह त्वमागता ॥ ४१ ॥

इत्युक्ता परुषं तेन कम्पमाना लतेव सा ।
उवाच गुञ्जन्मधुपश्रेणीमधुरवादिनी ॥ ४२ ॥

नाथ मिथ्यैव मे शङ्कां न कोपात्कर्त्तुमर्हसि ।
वाग्बाणपातं सहते न चेतः प्रीतिपेशलम् ॥ ४३ ॥

त्वामेव देवतां जाने यद्यहं शुद्धमानसा ।
तेन सत्येन सालोकमेकं नयनमस्तु ते ॥ ४४ ॥

इत्युक्ते सत्वशालिन्या तया तस्याशु लोचनम् ।
उत्फुल्लकमलाकारमेकं विमलतां ययौ ॥ ४५ ॥

तस्याः सत्यप्रभावेण सञ्जातपृथुविस्मयः ।
सत्यप्रत्ययसोत्साहः कृतज्ञस्तामभाषत ॥ ४६ ॥

སྤྲུན་ཟླ་བྲུས་མི་ཤེས་དེ་ཡིས། མིག་གཉིས་དག་ནི་ཕྱུང་གྱུར་པའི།
གནོད་པ་དེ་ལ་བདག་ལ་ནི། ཁོན་ནས་རྣམ་འགྱུར་མ་སྐྱེས་ན།། 47

བདེན་པ་དེ་ཡིས་གཉིས་པ་ནི། མིག་ཀྱང་རྣལ་དུ་གནས་གྱུར་ཅིག།
ཅེས་བརྗོད་དེ་ཡིས་སྐད་ཅིག་ལ། དེ་ནི་གསལ་བའི་མིག་གིས་མཚན།། 48

དེ་ནས་བྱུང་བའི་མཐའ་བཤད་པའི། བྲུས་ཤེས་བདག་པར་འཚིས་པ་ནི།
སྐྱེ་བོ་དགེ་མ་རབ་མགུ་བས། སོང་ནས་ཕ་ལ་ངེས་པར་བཤད།། 49

དེ་ནས་དེ་ནི་གྲོས་པོ་ཡིས། རིན་ཅན་གླང་པོ་ཧ་ཡིས་མཆོད།
དཔལ་དང་བཞིན་དུ་མཛེས་མ་དང་། ལྷན་ཅིག་ཡབ་ཀྱི་གྲོང་ཁྱེར་སོང་།། 50

ཞབས་ལ་ཅོད་པན་གྱིས་གཏུགས་ཏེ། རབ་ཏུ་མགུ་བའི་ཕ་ཡིས་དེར།
སྐལ་བཟང་སྐྱེ་བོ་རྗེས་ཆགས་པ། རྒྱལ་ཚབ་དག་གི་གནས་ལ་བཀོད།། 51

ངོ་ཚ་མེད་པ་བྲུས་མི་ཤེས། དེ་ལ་རབ་ཏུ་དང་བའི་གཡོས།
ཞབས་ལ་གཏུགས་ཏེ་དེ་ལ་ནི། འཁྲུ་བའི་བསམ་པས་ཡང་དག་འོངས།། 52

སྒྲུ་ཡིས་དེ་ནི་གསང་འདོད་པའི། གྱུ་གྱུའི་བསམ་པ་ལྡན་པ་དེ།
ཀྱེ་ཧུད་བདག་བསྒྲིགས་བདག་བསྒྲིགས་ཞེས། བརྗོད་པ་ཁོ་ནས་དམྱལ་བར་ལྷུང་།། 53

དེ་ཉིད་ལྷ་སྦྱིན་འདི་ཡིན་ཏེ། བྲུས་ཤེས་དེ་ཡང་ང་ཉིད་དོ།
སྐྱེ་བ་གཞན་དུ་རྗེས་འབྲེལ་བས། འདི་ཡི་སྡང་བ་ཡོངས་མི་ལྡོག། 54

आज्ञा तेनाकृतज्ञेन पाटिते लोचनद्वये ।
तस्मिन् विकारो वैरं वा न निकारोऽप्यभून्मम ॥ ४७ ॥

स्वच्छं तेनास्तु सत्येन द्वितीयमपि लोचनम् ।
इत्युक्ते तत्क्षणेनास्य स्पष्टं चक्षुरलक्ष्यत ॥ ४८ ॥

ततः कथितवृत्तान्तं कृतज्ञमुचितं पतिम् ।
प्रहृष्टा जनकस्याग्रे गत्वा पित्रे न्यवेदयत् ॥ ४९ ॥

पूजितः श्वशुरेणाथ स रत्नगजवाजिभिः ।
श्रियेव कान्तया सार्द्धं जगाम नगरं पितुः ॥ ५० ॥

स तत्र पित्रा हृष्टेन चरणालीनशेखरः ।
जनानुरागसुभगे यौवराज्ये पदे धृतः ॥ ५१ ॥

अकृतज्ञोऽपि निर्लज्जस्तं प्रसादयितुं शठः ।
विचिन्त्य पादपतने तस्य द्रोहं समाययौ ॥ ५२ ॥

उन्मना हन्तुमायातः स तं कुटिलचेष्टितः ।
हाहा दग्धोऽस्मि दग्धोऽस्मीत्युक्त्वैव नरकेऽपतत् ॥ ५३ ॥

स एव देवदत्तोऽसौ कृतज्ञोऽप्यहमेव च ।
जन्मान्तरानुबन्धेन द्वेषोऽस्य न निवर्त्तते ॥ ५४ ॥

དེ་ལྟར་ཀུན་མཁྱེན་གྱིས་གསུངས་ལྷ་སྦྱིན་གྱི་ནི་སྤྱོད་པ་དེ།
ཡོངས་སུ་གདུང་བ་བྱེད་པ་གནོད་པ་རབ་མང་དང་ལྡན་ཞིང་།
སྐྱེ་བ་གཞན་དུ་ཉེ་བར་བསགས་པའི་སྡིག་པ་རྗེས་འབྲེལ་བ།
དགེ་སློང་ཚོགས་ཀྱི་ཐོས་ནས་ཡིད་ནི་བྱུང་བ་བཞིན་དུ་གྱུར། ། 55

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བྱས་ཤེས་ཀྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་ལྔ་པའོ། །

सर्व्वज्ञभाषितमिति प्रचुरोपकारं
तद्देवदत्तचरितं परितापकारि ।
जन्मान्तरोपचितपातकसन्निबद्धं
श्रुत्वा बभूव विमना इव भिक्षुसङ्घः ॥ ५५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
क्षतघ्नावदानं पञ्चचत्वारिंशः पल्लवः ।

ཡལ་འདབ་སྟེ་བཅུ་ཚ་དྲུག་པ།

སྙིང་སྟོབས་ཆེ་བསྟེན་ཡོད་ནི་སྦྱིན་ལ་ཞེན་དུ་ངེས་རྣམས་ཀྱི།
སྐྱོ་དང་མཆོད་དང་ཡོན་ཏན་ལོངས་སྤྱོད་འབྱོར་པ་སྐྱེད་བྱེད་པ།
སྔོན་གྱི་བསོད་ནམས་བསགས་པ་ལས་བྱུང་དགེ་བ་མངོན་བརྗོད་པའི།
དཔག་བསམ་ཤིང་ནི་ངེས་པར་དུས་སུ་མ་ཚང་མེད་འབྲས་སྐྱེད།། 1

བཅོམ་ལྡན་རྒྱལ་བ་མཉན་ཡོད་ན། ས་བདག་ཀོ་ས་ལ་དབང་གི།
སྐྱེད་ཚལ་མཆོག་ན་དགེ་སློང་གི། ཚོགས་དང་ཐབས་ཅིག་མངོན་བཞུགས་ཚེ།། 2

ཐོག་མ་བར་དང་མཐར་དགེ་བ། སྲིད་བཟྲིལ་མནོན་མཆོག་གི་ཆོས།
འཇིག་རྟེན་གསུམ་པོ་དགེ་བ་ལ། སྦྱོར་བ་དེ་ཡིས་རབ་དུ་བསྟན།། 3

སྐབས་དེར་ཀླུ་ཡི་རྒྱལ་པོའི་བུ། རྒྱ་མཚོ་དག་དུ་གནས་པ་བཞི།
སྟོབས་དང་ཤིན་དུ་སྟོབས་དང་ནི། དབྱུགས་དང་དབྱུགས་ཆེན་ཞེས་བྱ་བ།། 4

སྲིང་མོ་མངོན་དགའ་ཞེས་པ་ཡིས། བསྐུལ་ནས་དེ་དག་མཚོ་དུ་ནི།
བདེ་གཤེགས་ཀྱིས་གསུངས་དམ་པའི་ཆོས། མཆོག་གི་བདུད་རྩི་ཉན་དུ་
འོངས།། 5

སྔོན་གྱི་དུས་ན་བཅོམ་ལྡན་འདས། ཀློ་བཟང་འཁོར་བ་འཇིག་དང་ནི།
གསེར་ཐུབ་ཅེས་ནི་བྱ་བ་དང་། དེ་བཞིན་དགྲ་བཅོམ་འོད་སྲུངས་ལ།། 6

षट्चत्वारिंशः पल्लवः ।

दानैकतानमनसां पृथुसत्त्वभाजा
मुत्साहमानगुणभोगविभूतिपूतः ।
प्राक्पुण्यसञ्चयमयः कुशलाभिधानः
काले फलत्यविकलः किल कल्पवृक्षः ॥ १ ॥

कोशलेन्द्रस्य भूभर्त्तुः श्रावस्त्यां भगवान् पुरा ।
विजहार वरोद्याने सह भिक्षुगणैर्जिनः ॥ २ ॥

आदिमध्यान्तकल्याणं भवाभिभवसाधकम् ।
सन्दिदेश स सद्धर्म्मं त्रैलोक्यकुशलोद्यतः ॥ ३ ॥

अत्रान्तरे नागराजपुत्राः सागरवासिनः ।
चत्वारः सुगतोदीर्णं सद्धर्म्मं परमामृतम् ॥ ४ ॥

अभिरत्याख्यया स्वस्रा प्रेरिताः श्रोतुमागताः ।
ते बलातिबल-श्वास-महाश्वासाभिधाः समम् ॥ ५ ॥

क्रकुच्छन्दस्य* सुधियः काले भगवतः पुरा ।
कणकाख्यस्य च मुनेः काश्यपस्य च यत्नतः ॥ ६ ॥

* Orig. कुकुत्सुन्दस्य ।

ཉིན་དུ་སྤྱིང་སོགས་བསྐྱལ་གྱུར་ཀྱང་། དཔལ་གྱི་བདེར་ཚགས་འོངས་མ་གྱུར།
དེ་དག་བསོད་ནམས་ཡོངས་སྨིན་ནས། ཤཱཀྱ་ཐུབ་པའི་སྔོན་དུ་འོངས།། 7

དེ་དག་མི་ཡིས་ལུས་བསྒྲུབས་ཏེ། སྟོན་པ་ལ་ནི་ཕྱག་བཙལ་ནས།
ཞབས་ལ་མགོ་ཡི་གདུགས་བྱས་ཏེ། འཁོར་དེར་ཉེ་བར་འདུག་པའི་ཚེ།། 8

གསལ་རྒྱལ་ཀོ་ས་ལ་ཡི་དབང་། དཔལ་འབྱོར་རྒྱགས་འཇོམས་མཛེས་པ་ཡི།
གདུགས་དང་རྫ་ཡབ་བཀློག་ནས་ནི། དམ་ཆོས་ཉན་དུ་ཡང་དག་འོངས།། 9

སྟོན་པའི་ཞབས་ལ་ཕྱག་འཚལ་སྨྲད། ཚོགས་སུ་ཞུགས་པ་དེ་ལ་ནི།
མི་ཡི་བདག་ལ་གསུས་པ་ལས། ཀུན་གྱི་བདུད་རྩི་ཅིང་གོ་སྐབས་དབྱེ།། 10

རི་ག་གནས་ཐྲ་ན་མི་རྣམས་ཀྱི། མཆོད་པར་དགའ་བར་བྱས་དེ་ལ།
སྐུ་ཡི་རྒྱལ་པོ་འི་བུ་རྣམས་ཀྱིས། གོ་སྐབས་བཀུར་སྟི་བྱས་མ་གྱུར།། 11

དེ་དག་དྲེགས་པས་ཁེངས་པ་དང་། རྒྱལ་བ་ལ་ནི་གསུས་པས་ཀྱང་།
ཁེངས་ལྡན་མི་བདག་ཁྲོ་བ་ནི། ནང་དུ་རབ་དུ་བསྒྲིབས་པར་གྱུར།། 12

དེ་ཡི་རང་གི་འཁོར་ལ་ནི། འགྲོ་ཚེ་སྔོན་དུ་དེ་དག་རྣམས།
ཚར་བཅད་བརྫའ་ཡིས་བསྐོས་བྱས་ནས། རྣམ་འགྱུར་མེད་པ་བཞིན་དུ་སྒྱུར།། 13

བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན་པས་ཀྱང་། དེ་ཡི་ངེས་པ་མཁྱེན་གྱུར་ནས།
ཆོས་ནི་ཉེ་བར་བསྟན་པ་ཡི། མཇུག་དུ་འཇོམས་མཛད་རབ་གསུངས་པ།། 14

आजग्मुः श्रीसुखासक्ताः श्रोतुमप्रार्थिता अपि ।
तत्पुण्यपरिणामेन प्राप्ताः शाक्यमुनेः पुरा ॥ ७ ॥

तेषु प्रणम्य शास्तारं चरणालीनमौलिषु ।
विधाय मानुषं रूप मुपविष्टेषु पर्षदि ॥ ८ ॥

सद्धर्म्ममाययौ श्रोतुं कोशलेन्द्रः प्रसेनजित् ।
लक्ष्मीमन्दस्मितच्छायं निवार्य्य छत्रचामरम् ॥ ९ ॥

शास्तुः पादप्रणामाय विशतस्तस्य संसदि ।
अवकाशं नताश्चक्रुः सर्व्वे नृपतिगौरवात् ॥ १० ॥

तस्याभिनन्द्यमानस्य वर्णाश्रमगुरोर्न्टभिः ।
नागराजसुताश्चक्रुर्नावकाशं न सत्कृतम् ॥ ११ ॥

तेषां तदपमानेन जिनस्य विनयेन च ।
मानिनो नृपतेरन्तर्मन्युः प्रच्छन्नतां ययौ ॥ १२ ॥

स संज्ञया समादिश्य निजं परिजनं पुरः ।
गमने निग्रहं तेषां निर्व्विकार इवाभवत् ॥ १३ ॥

भगवानपि सर्व्वज्ञस्तस्य ज्ञात्वा च निश्चयम् ।
धर्म्मोपदेशपर्य्यन्ते प्रोवाच रचितस्मितः ॥ १४ ॥

ཡིད་ཀྱི་མེ་ལོང་དྲི་མ་ཅན། སྣང་བའི་རྡུལ་གྱི་གང་བ་ལ།
ཆོས་ནི་ཉེ་བར་བསྟན་པ་ཡི། གཟུགས་བརྙན་འཛིན་མ་ཡིན།། 15

མཉམ་པ་ཉིད་དང་བྲལ་ཞིང་ཁྲོ་དང་རྨོངས་པས་བཅོམ་རྣམས་ལ།
ཉེར་བསྟན་གྱིས་ནི་དགེ་བའི་ཆ་ཤས་ཆུང་ངུ་ཡོངས་མི་བྱེད།
གང་ཕྱིར་བློ་གྲོས་ལྡན་པོ་རྣམས་ཀྱི་རབ་མང་སྐྱོན་ལྷན་ལུས།
དག་པས་དམན་པ་དག་ལ་སྨན་ནི་སྨན་ཉིད་མི་འགྱུར་རོ།། 16

ཞེས་པ་བཅོམ་ལྡན་རིག་པ་ཡི། ཕན་པ་གསུང་བ་ཐོས་གྱུར་ཀྱང་།
ཀླུ་རྣམས་ལ་ནི་སྣང་བའི་ཡིད། ས་ཡི་བདག་པོས་བདང་མ་གྱུར།། 17

དེ་ནས་བཅོམ་ལྡན་ལ་བཏུད་ནས། མི་བདག་རང་གི་གནས་སོང་ཚེ།
དེ་ཡིས་དབྱུང་གིས་ལམ་བཀག་པས། ཀླུ་རྣམས་མཁའ་ཡི་ལམ་ནས་སོང་།།18

ཁྲིམ་དུ་དེ་དག་གིས་བསམས་དེ། ས་བདག་གཉེར་པའི་དུས་བྱས་ནས།
འཇིགས་རུང་སྒྲོ་སྒྲོགས་སྤྲིན་གྱི་ཚོགས། སྣང་བ་འཇོམས་པས་ཡང་དག་
འོངས།། 19

དེ་དག་སྟོལ་བ་ཀུན་མཁྱེན་གྱིས། མཁྱེན་ནས་ས་ཡི་བདག་པོ་ཡི།
ཕྱོགས་སུ་ལྷུང་ཞིང་བསྲུངས་བཟོད་པ། མཽ་གལ་གྱི་བུ་ལ་བསྐོས།། 20

དེ་ནས་ཀླུ་ཡི་ཚོགས་རྣམས་ཀྱིས། རྡོ་རྗེའི་ཆར་ཆེན་རབ་སྤྲོས་པ།
དེ་ཡི་མཐུ་ཡིས་ས་བདག་ལ། མེ་ཏོག་ཆར་པ་ཉིད་དུ་གྱུར།། 21

न विद्वेषरजःपूर्णमनोमलिनदर्पणे ।
भाति धर्म्मोपदेशस्य प्रतिविम्बप्रतिग्रहः ॥ १५ ॥

अविहितसमतानां कोपमोहाहतानां
कणमपि कुशलांशं नोपदेशः करोति ।
नहि वहुतरदोषे शुद्धिहीने शरीरे
व्रजति हतमतीनां भेषजं भेषजत्वम् ॥ १६ ॥

इति युक्तं भगवता हितमुक्तं महीपतिः ।
श्रुत्वापि न च तत्याज नागेषु विमनस्कताम् ॥ १७ ॥

भगवन्तं प्रणम्याथ प्रयाते स्वपदं नृपे ।
नागास्तत्सैनिकावद्धमार्गे व्योमपथा ययुः ॥ १८ ॥

ते विचिन्त्य स्वभवने क्ष्मासंक्षयकृतक्षणाः ।
घोरनिर्घातमेघौघग्रस्तलोकाः समाययुः ॥ १९ ॥

तेषां व्यवसितं ज्ञात्वा सर्व्वज्ञः पक्षपातिनाम् ।
रक्षाक्षमं क्षितिपतेर्मौद्गल्यायनमादिशत् ॥ २० ॥

अथ नागगणोत्सृष्टा वज्रवृष्टिर्महीपतौ ।
भूभर्त्तुस्तत्प्रभावेण प्रययौ पुष्पवृष्टिताम् ॥ २१ ॥

དེ་ནས་དེ་དག་གིས་མཚོན་དང་། རྡོ་ཡི་ཆར་དྲག་བཟོད་དགའ་བ།
མཽ་གལ་བུ་ཡི་བཏག་པ་ལས། རྒྱལ་པོ་ལ་འོས་ཟས་ཉིད་འགྱུར།། 22

དེ་ཡི་མཐུ་ལས་གདེངས་ཅན་རྣམས། སྤྲོ་བ་ཉམས་ནས་སོང་བའི་ཚེ།
འཚོ་བ་དང་བྲལ་མི་ཡི་བདག། སོང་ནས་བདེ་གཤེགས་ལ་ཕྱག་འཚལ།། 23

རྒྱལ་བའི་བཀའ་ལས་མཽ་གལ་བུ། དེ་ཡི་ལོངས་སྤྱོད་ཕུན་ཚོགས་ཀྱི།
གུས་པས་ལེགས་སྦྱར་སྐལ་བ་བཟང་། རིགས་པ་ཉིད་དུ་མཆོད་པར་བྱས།། 24

དེ་ནས་མཐོ་རིས་ལ་འོས་པའི། ས་བདག་འབྱོར་མགོན་དགེ་སློང་གིས།
ཐལ་མོ་སྦྱར་ནས་ཀུན་མཁྱེན་ལ། དགེ་མཚན་འབེབས་ལས་རབ་དུ་ཕྱུས།། 25

བཅོམ་ལྡན་བསོད་ནམས་ཅི་ཞིག་གི། མཐུ་ཡི་རྒྱལ་པོ་གསལ་རྒྱལ་ནི།
ལོངས་སྤྱོད་ཀུན་གྱིས་རྣམ་མཛེས་པའི། རབ་རྒྱས་རྒྱལ་སྲིད་ཆེན་པོ་ཐོབ།། 26

འདི་ལ་རྟག་ཏུ་ས་ལི་ཡི། སྡོང་པོ་བུར་ཤིང་སྡོང་པོར་འགྱུར།
ལྷ་ཡི་བཟའ་བཏུང་ཕུན་སུམ་ཚོགས། དེ་དག་ལས་ནི་གང་གི་འབྲས།། 27

དགེ་སློང་གུས་པས་དྲིས་པ་འདི། བཅོམ་ལྡན་རྒྱལ་བས་བཀའ་སྩལ་པ།
རྒྱལ་པོ་འི་ལོངས་སྤྱོད་ཕུན་ཚོགས་ཀྱི། རྒྱུ་ནི་རབ་དུ་མཉེན་པར་མཛོད།། 28

ཀོ་ས་ལ་ཡི་ལྗོངས་འདི་རུ། བུར་ཤིང་ཞིང་པ་དུམ་བུ་ཞེས།
བྲ་ནས་རང་སངས་རྒྱས་ལ་སྦྱིན། བུར་ཆུ་དང་ནི་ཟས་དག་བྱིན།། 29

शस्त्रास्त्रवृष्टिर्निविड़क्षिप्ता तैरथ दुःसहा ।
मौद्गल्यायनसंकल्पात् ययौ राजार्हभोज्यताम् ॥ २२ ॥

तत्प्रभावात् प्रयातेषु भग्नोत्साहेषु भोगिषु ।
गत्वा ववन्दे सुगतं नृपति र्वीतविप्लवः ॥ २३ ॥

स मौद्गल्यायनस्यार्घ्यमुचितं भोगसम्पदा ।
भक्तिसंस्कारसुभगं विदधे जिनशासनात् ॥ २४ ॥

ततः स्वर्गोचितां भिक्षुर्विभूतिं वीक्ष्य भूपतेः ।
पप्रच्छ कौतुकवशात् सर्व्वज्ञं रचिताञ्जलिः ॥ २५ ॥

भगवन् कस्य पुण्यस्य प्रभावेण प्रसेनजित् ।
सर्व्वैर्विराजितं भोगैः प्राज्यं राज्यमवाप्तवान् ॥ २६ ॥

इक्षुस्तम्बवदेतस्य शालिस्तम्बश्च जायते ।
दिव्यपानान्नसम्पत्तिः फलं तत् कस्य कर्म्मणः ॥ २७

इति पृष्टः प्रणयिना भिक्षुणा भगवान् जिनः ।
उवाच श्रूयतां राज्ञः कारणं भोगसम्पदाम् ॥ २८ ॥

कोशलेऽस्मिन् जनपदे खण्डाख्यगुड़कर्षकः ।
ददौ प्रत्येकबुद्धाय पूर्व्वमिक्षुरसौदनम् ॥ २९ ॥

དེ་ཡི་བསོད་ནམས་རྣམས་དང་ནི། བུར་ཆུ་གཟན་དག་གསོལ་བ་དེས།
རླུང་ནད་ཀྱིས་ཉམ་རང་སངས་རྒྱས། རང་དྭང་དྲི་མེད་ཉིད་དུ་གྱུར༎ 30

བུར་ཤིང་ཞིང་པ་བསོད་ནམས་ཅན། དེ་ཡི་རྒྱལ་པོ་གསལ་རྒྱལ་འདི།
བསོད་ནམས་དེ་ཡི་མཐུ་ཡིས་ནི། ལོངས་སྤྱོད་སྐལ་ལྡན་རྣམ་པར་མཛེས༎ 31

བྱས་ཤེས་རྣམས་ལ་ཕན་པ་དང་། གདུག་སེམས་ཅན་ལ་གནོད་པ་དང་།
དམ་པ་རྣམས་ལ་ལེགས་བྱས་ནི། ཆུང་ཡང་ཆུང་ངུ་ཉིད་མིན་འགྱུར༎ 32

ས་བདག་སྔོན་གྱི་བསོད་ནམས་ནི། ཀུན་མཁྱེན་གྱིས་ནི་གསུངས་པའི་ཚེ།
ལེགས་བྱས་མཆོག་ཏུ་གྱུར་པ་ལས། དགེ་སློང་ངོ་མཚར་གཡོ་མེད་གྱུར༎ 33

དེ་ནས་བཅོམ་ལྡན་ལ་གུས་པས། རྒྱལ་པོས་ལྷག་པར་གནས་བྱས་ནས།
ལོངས་སྤྱོད་ཕུན་ཚོགས་ལྷ་ལ་འདྲས། དེ་དེ་རང་གི་ཉེ་བར་བཀོད༎ 34

མཆོག་ཏུ་མཛེས་པའི་རིམ་གྲོ་ཡིས། མཆོད་དེ་གསེར་གྱི་ཁྲི་ལ་ནི།
བདེར་བཞུགས་དེ་བཞིན་གཤེགས་པ་ལ། མི་ཡི་མགོན་པོས་རབ་སྨྲས་པ༎ 35

བཅོམ་ལྡན་ཁྱེད་ལ་གུས་པ་ཡིས། ལེགས་བྱས་དཔལ་ནི་རྣམ་རྒྱས་པ།
དགེ་བའི་རྩ་བ་བབས་པ་ཡིས། བདག་ནི་གྲོལ་གྱུར་སྲིད་ལགས་སམ༎ 36

བསོད་ནམས་ཛོགས་པའི་ང་རྒྱལ་ཅན། ས་ཡི་བདག་པོ་གུས་པས་འདྲི།
དྲིས་ལ་བདེ་བར་གཤེགས་པ་ཡིས། འཇུམ་དཀར་སྣང་བ་སྤྲོ་ཞིང་གསུངས༎37

भुक्तेनैक्षुरसान्नेन तेन वातगदार्दितः ।
प्रत्येकबुद्धस्तत्पुण्यैः प्रसन्नः सुस्थतां ययौ ॥ ३० ॥

राजा प्रसेनजित् सोऽयं पुण्यवान् गुड़कर्षकः ।
तेन पुण्यप्रभावेण भोगभागी विराजते ॥ ३१ ॥

उपकारः कृतघ्नानां निकारः क्रूरचेतसाम् ।
सुकृतांशश्च साधूनामल्पोऽप्यायात्यनल्पताम् ॥ ३२ ॥

सर्व्वज्ञेनेति कथिते पूर्व्वपुण्ये महीपतेः ।
बभूव सुकृतोत्कर्षे भिक्षुराश्चर्य्यनिश्चलः ॥ ३३ ॥

अथ भक्त्या भगवतः कृत्वा राजाधिवासनाम् ।
उपनिन्ये स्वयं तान्तां सुरार्हां भोगसम्पदम् ॥ ३४ ॥

परोपचारैरुचिरैरर्च्चिते काञ्चनासने ।
सुखोपविष्टं प्रोवाच नरनाथस्तथागतम् ॥ ३५ ॥

भगवन् मे भवद्भक्ति-विभक्त-सुकृतश्रियः ।
चयः कुशलमूलाना मनिर्मुक्त्यै भविष्यति ॥ ३६ ॥

विनयात् पार्थिवेनेति पूर्णपुण्याभिमानिना ।
पृष्टः स्मितसितालोकं जगाद सुगतः सृजन् ॥ ३७ ॥

རྒྱལ་པོར་འཁོར་བ་དག་གིས་ལམ། ཐོག་མཐའ་མེད་པར་འཇུག་པ་འདི།
ཉོན་མོངས་ཀུན་ཟད་མ་ཐོབ་བར། སྐྱེས་བུས་བདེ་བར་ཇི་ལྟར་འགོངས།། 38

ཡུན་རིང་ཡོངས་འདྲིས་འཁོར་ལོ་བསྐོར་ཞིང་རྒྱུན་དུ་འོང་དང་འགྲོ་བ་ཡིས།
རང་བཞིན་གྱིས་ཟབ་འཁོར་བ་འདི་ལ་བདེ་ཀླག་འགོངས་པར་མི་ནུས་ཏེ།
སྦྱོར་བ་གོམས་པ་མེད་ཅིང་ལས་རྣམས་ངེས་པར་ཟད་པ་མིན་པ་ནི།
རྒྱ་ཆེ་འབྲས་བུ་གསལ་བའི་ཆོས་ཀྱང་འདིར་ནི་འཆིང་བ་ཉིད་དུ་གྱུར།། 39

སྨྲིན་ལ་གོམས་པ་ཆེན་པོ་ཡིས། ཀུན་ལས་རྣམ་པར་ལོག་གྱུར་པ།
བདག་ཀྱང་ས་ལ་སྐྱེ་བ་བཟུང་། ཆོས་ཀྱི་འཁོར་བ་ཉིད་དུ་གྱུར།། 40

ནོར་ཅན་ཞེས་ཕ་ནོར་དང་ལྡན། བ་ར་ཀྭ་སེར་སྔོན་བྱུང་གྱུར།
གདུང་བ་འཕྲོག་ཅིང་འབྲས་བུ་རྒྱས། སྐྱོང་བ་རྣམས་ཀྱི་གྲིབ་ཤིང་བཞིན།། 41

སྒྲ་གིས་འཇིག་རྟེན་བསྒྲག་གྱུར་ཅིང་། མི་བཟད་ཉོན་མོངས་ཀྱིས་འཁྲུགས་ཚེ།
རང་སངས་རྒྱས་ནི་ལྔ་བརྒྱ་ཡིས། དེ་ལ་འཚོ་བ་བསྐྱངས་པར་གྱུར།། 42

མི་ཆུར་དཔལ་ངེས་བང་བ་ཡིས། ཁང་བདག་ལ་བགྲོས་དེ་དག་ལ།
མཆོག་ཏུ་ལོངས་སྤྱོད་ཞེས་པའི་ཟས། སྒྲ་གེ་དག་གི་མཐར་ཐུག་སྒྱུར།། 43

དེ་ཡི་ཁྱིམ་དུ་གསོལ་བ་ལ། བརྒྱ་ཕྲག་ལྔ་ནི་ཚོགས་གྱུར་ཏེ།
དེ་ནས་རིམ་གྱིས་རང་སངས་རྒྱས། སྟོང་ཕྲག་གཉིས་ནི་བྱུང་བར་འགྱུར།། 44

राजन् संसारमार्गोऽयमनादिनिधनोद्भवः ।
हेलालङ्घ्यः कथं पुंसामप्राप्य क्लेशसंक्षयम् ॥ ३८ ॥

चिरपरिचितैश्चक्रावर्त्तैरसक्तगतागतिः
प्रकृतिगहनः संसारोऽयं सुखेन न लङ्घ्यते ।
असति हि विना योगाभ्यासं क्षये किल कर्म्मणां
स्फुटफलततिर्धर्म्मोऽप्यस्मिन्निबन्धनतां गतः ॥ ३९ ॥

सर्व्वतो विनिवृत्तस्य दानाभ्यासेन भूयसा ।
ममापि धर्म्मसंसारो बभूव भूरिजन्मकृत् ॥ ४० ॥

धनिको नाम धनवान् वाराणस्यामभूत्पुरा ।
तापोपहः फलस्फीतश्छायावृक्ष इवार्थिनाम् ॥ ४१ ॥

दुर्भिक्षक्षपिते लोके विषमक्लेशविह्वले ।
भोज्यं प्रत्येकबुद्धानां सोऽर्थितः पञ्चभिः शतैः ॥ ४२ ॥

स तेषां परभोगार्हं दुर्भिक्षावधि भोजनम् ।
अकल्पयदनल्पश्रीः कोष्ठागारी गतस्मयः ॥ ४३ ॥ *

शतपञ्चकसंघाते भोक्तुं तस्य गृहं ततः ।
क्रमात्प्रत्येकबुद्धानां सहस्रद्वयमाययौ ॥ ४४ ॥

སྐྱེས་ཚེ་འབྲས་བུའི་དཔལ་ཐོབ་པ། བསོད་ནམས་བདབ་པ་དེ་ཡིས་ནི།
ཀླུ་གཞིའི་སྤྲིན་པས་དེ་ཡིས་མཛོད། ཟས་ཀྱི་ཉོན་མོངས་ཟད་མ་གྱུར།། 45

བདེ་བ་བརྒྱུད་པ་བསོད་ནམས་ཀྱིས། སྤྲུད་ནས་ནོར་ཅན་དེ་ཉིད་ནི།
ང་ཡིན་ཞི་བ་མཆོག་གིས་འདིར། ཡང་དག་རྫོགས་པའི་བྱང་ཆུབ་བསྟན།། 46

འཁོར་བ་པ་ཡི་ལས་འབྲས་འཛུག་པ་འདི།
འཆིང་བྱེད་ཐག་པ་དཀར་དང་དཀར་མིན་ནི།
བསོད་ནམས་སྡིག་པ་དག་གིས་རྣམ་ཡར་བཅིངས།
དེ་ཟད་པ་ལ་ཐར་པའི་གནས་ཞེས་བརྗོད།། 47

དེ་ལྟར་རྨོངས་པ་ཐད་པས་ཐར་པ་ནི།
རྒྱལ་བས་གསུངས་པ་ས་དབང་གིས་ཐོས་ནས།
ཉོན་མོངས་འཛིང་འོས་ཞི་བ་ཁོ་ནར་ངེས།
བསོད་ནམས་མངོན་པའི་ང་རྒྱལ་ལྡོད་པར་གྱུར།། 48

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ས་ལའི་སྐྱོང་བུའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་དྲུག་པའོ།།

तस्य तत्पुण्यवासेन जातो लब्धफलश्रिया ।
दुर्भिक्षदानजनितो रत्नकोशस्तदाश्रयः ॥ ४५ ॥

सुखं सनातनं पुण्यभोग्यत्वं प्रणिधानतः ।
शास्तुस्ततः परेणायं सम्यक् सम्बोधिमापितः ॥ ४६ ॥

पुण्येन पापेन च वेष्टितेयं
संसारिणां कर्म्मफलप्रवृत्तिः ।
सितासिता बन्धनरज्जुरेषा
तत्संक्षये मोक्षपथं वदन्ति ॥ ४७ ॥

इति क्षितीशः कथितं जिनेन
मोहव्यपायेन निशम्य मोक्षम् ।
क्लेशक्षयार्हं शममेव मत्वा
पुण्याभिमानं शिथिलीचकार ॥ ४८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शालिस्तम्बावदानं नाम षट्चत्वारिंशः पल्लवः ॥ ० ॥

ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་བདུན་པ།

རང་དོན་ལ་འཇུག་ཆགས་པ་དང་བྲལ་ཞིང་།
གཞན་ལ་ཕན་པར་རྟག་ཏུ་བརྩོན་རྣམས་ཀྱིས།
གྲུབ་པ་ཉོན་མོངས་རྣམས་ལ་མི་འཛིགས་ཤིང་།
གདུང་དང་བགེགས་བྲལ་གཟིར་བྱེད་མེད་པར་གྱུར།། 1

མཚན་ཡོད་རྒྱལ་བྱེད་ཚལ་དུ་སྔོན། བཞུགས་པ་བཅོམ་ལྡན་རྒྱལ་བ་ཡིས།
ཆོས་འཆད་པ་ཡི་ཞར་ལ་ནི། དགེ་སློང་ཚོགས་ལ་བཀའ་སྩལ་པ།། 2

ས་བདག་ས་རྣམས་ཀུན་གྱི་བདག། དོན་གྲུབ་ཅེས་པ་ལེགས་བྱས་ལྡན།
ས་སྐྱོང་ཀུན་གྱི་མགོ་བོ་ལ། བཀའ་ནི་རྣམ་པར་བསྒྲེ་བར་འགྱུར།། 3

ཆུ་ཡི་གཏེར་ལ་གནས་གྱུར་པ། རྒྱ་མཚོ་ཞེས་བྱ་ཀླུ་ཡི་བུ།
དོན་ཀུན་གྲུབ་པས་ས་བདག་ནི། དེ་ཡི་བུ་ཉིད་དག་ཏུ་གྱུར།། 4

སྙིང་སྟོབས་རབ་ཏུ་འབར་བའི་འོད། སྐལ་བཟང་བྱང་ཆུབ་སེམས་དཔའ་དེ།
སྐྱེས་པ་ཙམ་གྱིས་ས་གཞི་ནི། རང་གི་འོད་ཀྱིས་ཁྱབ་པར་བྱས།། 5

དེ་ནི་ཆེ་བར་སྐྱེས་གྱུར་པའི། གྲགས་པ་ལྷ་རྣམས་ཀྱིས་མཆོད་པ།
སྲིད་པ་མཐའ་དག་ཁྱབ་པ་ནི། ཆོས་ཀྱི་བཞིན་དུ་ཡང་དག་རྒྱས།། 6

सप्तचत्वारिंशः पल्लवः ।

स्वार्थप्रवृत्तौ विगतस्पृहाणां
परोपकारे सततोद्यतानाम् ।
क्लेशेषभीता व्यसनैरनीता
विघ्नैरपीड़ाकरमेति सिद्धिः ॥ १ ॥

श्रावस्त्यां भगवान् पूर्व्वं जिनो जेतवनस्थितः ।
धर्म्माख्यानप्रसङ्गेन भिक्षुसङ्घमभाषत ॥ २ ॥

आसीदखिलभूपालमौलिलालितशासनः ।
सिद्धार्थोनाम सुकृती सार्व्वभौमो महीपतिः ॥ ३ ॥

सागराख्यस्य नागस्य सूनुर्जलधिवासिनः ।
सर्व्वार्थसिद्धः पुत्त्रत्वं प्रययौ तस्य भूपतेः ॥ ४ ॥

स भाद्रकल्पिको बोधिसत्त्वः सत्त्वोज्ज्वलप्रभः ।
जातमात्रः क्षितितलं चक्रे पूर्णं स्वऋद्धिभिः ॥ ५ ॥

तस्य प्रवर्द्धमानस्य धर्म्मस्येव समुद्ययौ ।
समस्तभुवनव्यापि विबुधाभ्यर्च्चितं यशः ॥ ६ ॥

སྐྱིད་ཚལ་མཆོག་ཏུ་དར་མ་དེ། ནམ་ཞིག་ཤིང་རྟས་འགྲོ་བ་ན།
མདུན་དུ་ལྷ་རྣམས་ཀྱིས་སྤྲུལ་པའི། སྐྱེས་བུ་རྒན་པོ་མཐོང་བར་གྱུར། 7

རྒ་བས་འཁོགས་པ་དེ་མཐོང་ནས། ཆགས་བྲལ་གྱི་ནི་བག་ཆགས་སད།
འཁོར་བ་བཞིན་དུ་ལུས་དག་ནི། སྙིང་པོ་མེད་པར་དེ་ཡིས་བསམས། 8

སྐྱིད་ཚལ་བལྟ་བའི་ཆགས་བྲལ་དེ། དལ་གྱི་ལོག་ནས་འོང་བ་དེས།
ལམ་དུ་དབུལ་བ་ཉིད་ཀྱིས་ནི། མཛེས་བྲལ་ཕོངས་པར་གྱུར་པ་མཐོང་། 9

སྙིང་རྗེས་དྲངས་པའི་ཡིད་ཅན་དེས། བདེ་མེད་ཉེར་མོངས་དེ་མཐོང་ནས།
བསམས་པ་ས་དབུལ་པོ་རྣམས། ཀྱེ་མ་སྡུག་བསྔལ་བཟོད་པར་བྱེད། 10

རིན་ཆེན་གྱིས་གང་ས་གཞི་ན། གཞན་ལ་བསླངས་པས་ཉེར་འཚོ་ཞིང་།
ཕོངས་གྱུར་འདི་དང་སྡུག་བསྔལ་ནི། སྦྱིན་པ་མིན་ལས་སྐྱེས་པར་སྨྲ། 11

སྐྱེས་བུ་བཀྲེན་པ་འདི་དག་རྣམས། སྐྱེས་བུ་གཞན་ལ་སློང་བ་གང་།
འདི་ཉིད་ཁོ་ན་མི་བསླུ་བར། སྡིག་པའི་ལས་རྣམས་དག་གི་རྟགས། 12

གནས་དང་གནས་སུ་སྐད་གྱུར་ཅིང་། འདི་དག་སློང་བས་ཡིད་བྱུང་ལ།
བསླངས་པར་གྱུར་ཀྱང་བཀྲེས་པ་ན། ཀྱེ་མ་འདི་དག་ཉེས་བྱས་ཉིད། 13

དེ་ལྟར་ཡུན་རིང་བསམས་བྱས་ནས། ཀུན་གྱི་ཉེར་མོངས་གཞོམ་བརྩོན་པས།
འགྲོ་བ་དབུལ་མེད་བྱ་བའི་སྐད། རིན་ཆེན་དོན་གཉེར་རྒྱ་མཚོར་སོང་། 14

स कदाचिद्वरोद्याने स्यन्दनेन युवा व्रजन् ।
ददर्श वृद्धपुरुषं देवतानिर्म्मितं पुरः ॥ ७ ॥

तं विलोक्य जराजीर्णं जातवैराग्यवासनः ।
संसारमिव निःसारं स शरीरममन्यत ॥ ८ ॥

उद्यानयात्राविरतः शनैः प्रतिनिवृत्य सः ।
दारिद्र्यविद्रुतच्छायानद्राक्षीत् कृपणान् पथि ॥ ९ ॥

दृष्ट्वा तान् सुखक्लिष्टान् करुणाकृष्टमानसः ।
अचिन्तयदहो दुःखं सहन्ते भुवि दुर्गताः ॥ १० ॥

अदानप्रभवं दुःखं वदन्तीति विसङ्गताः ।
पृथिव्यां रत्नपूर्णायां परपिण्डोपजीविनः ॥ ११ ॥

इदमेवाविसंवादि चिह्नं कलुषकर्म्मणाम् ।
दीना यदेते याचन्ते पुरुषं पुरुषाः परम् ॥ १२ ॥

अहो दुष्कृतमेतेषामवधूताः पदे पदे ।
यदेते मार्गणोद्विग्नाः भिक्षित्वापि बुभुक्षिताः ॥ १३ ॥

इति सञ्चिन्त्य सुचिरं विश्वक्लेशक्षयोद्यतः ।
अदरिद्रं जगत्कर्त्तुं रत्नार्थी जलधिं ययौ ॥ १४ ॥

པ་ཡི་ཛྲི་ཞིག་ལྷུར་སྟེམས་ཉིད། རྫིས་གནང་ངེས་པ་བརྟན་པ་དེ།
གཟིངས་ལ་ཡང་དག་གཞོན་བྲུས་ནས། རིན་ཆེན་གླིང་དུ་ཕྱིན་པར་གྱུར།། 15

དེར་ནི་ཚོང་པ་གཟིངས་དག་ལ། ཞོན་ནས་ལྷན་ཅིག་འོངས་རྣམས་ལ།
དེ་ཡིས་སྨྲས་པ་ཁྱེད་ཅག་རྣམས། རིན་ཆེན་འདོད་པ་བསྡུ་བར་སྫོད།། 16

ཐུན་མོང་རིན་ཆེན་འདི་དག་གིས། བདག་ལ་དགོས་པ་ཡོད་མ་ཡིན།
བདག་ཅག་མཛོད་ན་རིན་ཆེན་མཆོག། འོད་དང་ལྡན་པ་མང་པོ་ཡོད།། 17

འོན་ཀྱང་ཡིད་བཞིན་ནོར་ཐོབ་སླད། བདག་གི་རྩོམ་པ་ཆེན་པོ་འདི།
དེ་ཡིས་ས་ནི་དབྱུལ་བ་ཉིད། ཉམས་པ་དག་ཏུ་བྱ་བར་འདོད།། 18

རྒྱ་མཚོ་ཞེས་བྱ་ཀླུ་ཡི་རྒྱལ། ཆུ་གཏེར་ཆེ་ལ་རབ་ཏུ་གནས།
བསམ་པའི་དོན་སྟེར་ནོར་བུ་ནི། དེ་ཁྱིམ་ན་ཡོད་བདག་གིས་ཐོས།། 19

མི་བཟད་ལམ་ནི་བགྲོད་བྱས་ཏེ། བང་ག་ནི་དེ་ཉིད་ལེན་དུ་འགྲོ།
བརྟེན་པའི་གྲོགས་ལྡན་འབབ་རྩོད་དང་། ལྡན་པ་རྣམས་ལ་བགྲོད་དཀའ་མེད།། 20

བདག་གི་ལེགས་བྱས་རྩོམ་པ་འདི། གལ་ཏེ་འཐོབ་ན་བདེན་ཉིད་དུ།
བདག་དང་བྲལ་བས་ཁྱེད་ཅག་རྣམས། ཅི་ཡང་གདུང་བར་མི་འགྱུར་རོ།། 21

ཞེས་བརྗོད་དེ་དག་ལ་བཀྲས་ནས། སྙིང་སྟོབས་ལྡན་པ་རྒྱལ་པོ་ཞི་བུ།
ཆེན་པོ་བརྟན་པ་ལ་བརྟེན་ནས། ངེས་པ་བརྟན་པས་རབ་ཏུ་ཞུགས།། 22

कथञ्चिदिव संसक्तः स पिचा दृढनिश्चयः ।
समारुह्य प्रवहणं रत्नद्वीपमवाप्तवान् ॥ १५ ॥

तच प्रवहणारूढान् वणिजः सहयायिनः ।
सोऽब्रवीत् क्रियतां कामं युष्माभिर्मणिसंग्रहः ॥ १६ ॥

एतैः सामान्यरत्नैस्तु मम नास्ति प्रयोजनम् ।
कोशे महान्ति भास्वन्ति सन्ति रत्नोत्तमानि नः ॥ १७ ॥

किन्तु चिन्तामणिप्राप्त्यै विपुलोऽयं ममोद्यमः ।
तेन विद्रुतदारिद्र्यां कर्त्तुमिच्छामि मेदिनीम् ॥ १८ ॥

श्रुतं मया नागराजः सागराख्यो महोदधौ ।
वसत्यस्ति गृहे तस्य चिन्तितार्थप्रदो मणिः ॥ १९ ॥

विलङ्घ्य विषमं मार्गं तमादातुं व्रजाम्यहम् ।
नास्ति धैर्य्यसहायानां दुर्गमं व्यवसायिनाम् ॥ २० ॥

न च मद्विरहे किञ्चिद्व्यसनं वो भविष्यति ।
सत्यमेव परार्थोऽयं यदि मे सुकृतोद्यमः ॥ २१ ॥

इत्युक्त्वा तान् समामन्त्र्य प्रतस्थे स्थिरनिश्चयः ।
महतीं धृतिमालम्ब्य सत्त्ववान् पार्थिवात्मजः ॥ २२ ॥

དེ་ཡི་རྒྱུ་ཡི་ལམ་དག་ཏུ། ལོང་བུ་ཙམ་ལ་ཉིན་བདུན་ཕྱིན།
ཕུས་ནུབ་ཙམ་ལ་ཉིན་བདུན་དང་། སྐྱེས་བུ་ཙམ་ལ་ཉིན་བདུན་དེ།། 23

དེ་ནས་ཞག་ནི་བདུན་པ་བཞི། གླང་མོའི་ཚད་ཀྱི་རྒྱུ་དག་ལ།
ཕྱིན་པས་མདུན་དུ་སོ་དུག་ཅན། འཇིགས་རུང་མགྲིང་པ་དུག་ཅན་མགྲིང་།། 24

དེ་ནས་བྱམས་ལྡན་ཡིད་ཀྱིས་ནི། དེ་དག་དུག་མེད་བྲུས་ནས་དེ།
ཁྲོ་བས་འཁྲུགས་པའི་གནོད་སྦྱིན་གྱིས། གང་བའི་གནོད་སྦྱིན་གླིང་དུ་ཕྱིན།། 25

དེར་ནི་བྱམས་ལྡན་ཡིད་དག་གིས། དེ་དག་ཁྲོ་དང་བྲལ་བར་བསྒྲུབས།
སྐྱོ་བ་ཡངས་པས་ཡ་མཚན་པ། དེ་དག་གིས་བཤད་ཐོས་གྱུར་དེ།། 26

གཞོན་ནུ་སྙིང་སྟོབས་རྒྱས་པ་དང་། བརྩོན་འགྲུས་སྐྱོ་བ་འདི་ཡིས་ནི།
ཀླུ་ཡི་རྒྱལ་པོའི་ཁང་པ་རུ། ཁྱོད་ཉིད་བཞེད་པ་ཐོབ་པར་འགྱུར།། 27

དུས་ཀྱིས་ཁྱོད་ནི་ཐམས་ཅད་མཁྱེན། ཡང་དག་རྫོགས་པའི་སངས་རྒྱས་འགྱུར།
བདག་ཅག་རྣམས་ཀྱང་ཁྱོད་ཉིད་ཀྱི། རྗེས་འབྲང་ཉན་ཐོས་དག་ཏུ་འགྱུར།། 28

འདི་དག་དང་བས་འདི་བརྗོད་དེ། མངོན་པར་དགའ་བའི་མི་བདག་ཏུ།
སྲིན་པོ་རྣམས་ཀྱི་ཁེངས་གྱུར་པ། ཉམ་ང་སྲིན་པོའི་གླིང་དུ་ཕྱིན།། 29

རྣམ་འགྱུར་གདུག་བྲལ་དེ་དག་གིས། དེ་བཞིན་ཉིད་དུ་མཆོད་ནས་དེ།
དཔུང་པས་བླངས་དེ་སྐད་ཅིག་གི། ཀླུ་ཡི་དབང་པོའི་ཁང་པར་འཕངས།། 30

गुल्फमात्रेण सप्ताहं गत्वा जङ्गमवर्त्मना ।
जानुदघ्नेन सप्ताहं सप्ताहं पौरुषेण च ॥ २३ ॥

चत्वारि सप्तरात्राणि ततः पुष्करिणीजलैः ।
गत्वा दृष्टिविषान् घोरान् ददर्श फणिनः पुरः ॥ २४ ॥

मैत्रीयुक्तेन मनसा कृत्वा तानथ निर्विषान् ।
क्रूरकोपैर्वृतं यक्षैर्यक्षद्वीपमवाप सः ॥ २५ ॥

तत्र मैत्रेण मनसा वीतक्रोधान् विधाय तान् ।
शुश्राव तैरभिहितं विपुलोत्साहविस्मितैः ॥ २६ ॥

कुमारः स्फीतसत्त्वेन तथा वीर्य्येण चामुना ।
नागराजस्य भवनं समाहित मवाप्य तम्* ॥ २७ ॥

कालेन सम्यक्सम्बुद्धः सर्व्वज्ञस्त्वं भविष्यसि ।
श्रावकाश्च भविष्यामो वयं त्वदनुयायिनः ॥ २८ ॥

प्रसन्नैरिति तैरुक्तमभिनन्द्य नृपात्मजः ।
रक्षोवराहृतं प्राप राक्षसद्वीपमुत्कटम् ॥ २९ ॥

तथैव विगतक्रूरविकारै स्तैः स पूजितः ।
भुजोत्क्षेपेण निक्षिप्तः क्षणान्नागेन्द्रसद्मनि ॥ ३० ॥

---

* Orig. सः ।

ལྷ་ཡི་དགའ་བདེ་ལ་ངོམས་པའི། སྣང་བ་འགྱུར་ལྡན་དེར་ནི་དེས།
སྡུག་བསྔལ་ཆེན་པོས་གཟིར་གྱུར་པའི། ཚོ་ངའི་སྨྲ་ནི་ཐོས་པར་གྱུར།། 31

དེ་ཡིས་དེ་ཐོས་ཆགས་བྲལ་ཅན། རང་བཞིན་བརྩེ་བས་བརླན་པའི་བློས།
མདུན་དུ་ཀླུ་ཡི་བུ་མོ་དག མཐོང་ནས་འདི་དག་ཅི་ཞེས་དྲིས།། 32

ཡང་ཡང་ཉུ་ངན་ལ་ཆགས་པའི། ཏྲོ་བ་གསལ་བྱེད་ཤུགས་རིངས་ཀྱིས།
ཐིམ་པའི་ཆུ་འདབ་མཛེས་པ་དག། དྲི་མ་བྱེད་དེས་དེ་ལ་སྨྲས།། 33

ཡོན་དན་ལྡན་པ་པདྨའི་སྤྱན། ཀླུ་ཡི་རྒྱལ་པོ་དག་གི་བུ།
ཐུ་བོ་དོན་ཀུན་གྲུབ་ཅེས་པ། གཅེས་པ་ལྡེ་པ་ཉིད་དུ་གྱུར།། 34

དེ་ཡི་སྡུག་བསྔལ་དག་གིས་ནི། ཀུན་དགའ་དང་བྲལ་བདེ་དགའ་སྤངས།
ཁངས་པ་འདི་ནི་ཚོ་ངེ་དག། སྡུག་པོ་ཉིད་ཀྱིས་གནས་པར་གྱུར།། 35

ཞེས་པ་དེ་ཡིས་ཚིག་ཐོས་ནས། རང་ཡུལ་མཐོང་བས་དགའ་བ་དེས།
ནང་དུ་ཡོངས་འདྲིས་འཛིན་བྱེད་ཅིང་། ཀླུ་ཡི་རྒྱལ་པོ་འི་དྲུང་དུ་ཕྱིན།། 36

ཀླུ་ཡི་རྒྱལ་པོ་དགའ་མ་དང་། བཅས་པ་དེ་འོངས་ཡོངས་ཤེས་ནས།
བུ་གཅིག་ཚུར་ཤོག་ཚུར་ཤོག་ཅེས། བརྗོད་ཅིང་ཀུན་དགའ་འཁྲུགས་པར་གྱུར། 37

མི་ཡི་སྐྱེ་བའི་གཏམ་དང་ནི། རང་ཉིད་འོངས་པའི་རྒྱུ་དག་ཀྱང་།
དེ་ཡིས་བཤད་པ་ཐོས་གྱུར་ནས། ཀླུ་ཡི་ཡོངས་འཁྱུད་དེ་ལ་སྨྲས།། 38

स तत्र दीप्तविभवे दिव्योत्साहसुखोचितः ।
अशृणोद्दीर्घदुःखार्त्तिसूचकं रोदनध्वनिम् ॥ ३१ ॥

स तमाकर्ण्य सोद्वेगः प्रकृत्यैव दयार्द्रधीः ।
किमेतदिति पप्रच्छ हर्म्याग्रे नागकन्यकाम् ॥ ३२ ॥

सा तं बभाषे संसक्तशोकोष्मपिशुनैर्मुहुः ।
म्लानयन्ती स्वनिश्वासैर्बिम्बाधरदलत्विषम् ॥ ३३ ॥

गुणवान् नागराजस्य पुत्रः कमललोचनः ।
ज्येष्ठः सर्व्वार्थसिद्धाख्यः प्रियः पञ्चत्वमागतः ॥ ३४ ॥

ततः प्रतिगतानन्दे विनिवृत्तसुखोत्सवे ।
घनेन रोदनेनास्मिन्न भवेद्भवने स्थितिः ॥ ३५ ॥

इति तस्या वचः श्रुत्वा सोऽन्तः परिचितां वहन् ।
स्वदेशदर्शनप्राप्तो नागराजान्तिकं ययौ ॥ ३६ ॥

नागराजस्तमायान्तं परिज्ञाय प्रियासखः ।
एह्येहि पुत्रेति वदन् बभूवानन्दविह्वलः ॥ ३७ ॥

मर्त्त्यजन्मकथां तेन स्वस्यागमनकारणम् ।
श्रुत्वा निवेदितं नागः परिष्वज्य जगाद तम् ॥ ३८ ॥

ཟླ་གཅིག་ཡིད་བཞིན་ནོར་བུ་འདི། བདག་གི་མགོ་བོ་ཉིད་ཀྱིས་རྒྱན།
ལོང་ཞིག་ཁྱོད་ཀྱི་རྙག་པ་ནི། འབྲས་མེད་བྱེད་པར་མི་སྤྲོ་འོ། 39

འགྲོ་བའི་བྲ་བ་བྲུས་ནས་འདི། ཁྱོད་ཀྱིས་བདག་ལ་སླར་སྦྱིན་བྱ།
ཞེས་བརྗོད་གཙུག་གི་རིན་ཅེན་མཆོག། དེ་ཡིས་བཀྲོལ་ནས་དེ་ལ་བྱིན། 40

ཡིད་བཞིན་ནོར་བུ་ཉི་མའི་འོད། ཡང་དག་བླངས་ནས་གཞོན་ནུ་ནི།
དགའ་བས་ཀླུ་དབང་ལ་བཏུད་དེ། གཟིངས་དང་ཉེ་བ་དག་ཏུ་སོང་། 41

དེ་ཡིས་གདམས་ཐོས་རྒྱ་མཚོ་ཡིས། ལྷ་ཡིས་དེར་ནི་དེ་མཐོང་ནས།
དགེ་བ་ཁྱོད་ཀྱིས་ཐོབ་པ་ཡི། ཡིད་བཞིན་ནོར་བུ་ཅི་འདྲ་སྨྲོས། 42

དེ་ཡི་གསལ་བར་འདི་བརྗོད་ཚེ། ཟོལ་མེད་བསམ་པ་དྲང་པོ་དེས།
ལག་པའི་པདྨ་རབ་གདེངས་ནས། ཡིད་བཞིན་ཀྱིས་ནི་ནོར་བུ་བསྟན། 43

རིན་ཅེན་མཆོག་དེ་དེས་མཐོང་ནས། ཕྲག་དོག་དྲི་མའི་བསམ་པ་ཡིས།
དེ་ཡི་ལག་པ་ལག་པ་ཡིས། ཐལ་མོ་བསྣུན་ནས་ཆུ་གཏེར་དོར། 44

ཤིན་ཏུ་དཀའ་བས་བསྒྲུབས་པ་ཡི། རིན་ཆེན་རྒྱ་མཚོར་ལྷུང་མཐོང་ནས།
རྩོམ་པ་བརྟན་པ་འབྲས་མེད་པའི། ཀུ་ངན་གསོ་མེད་དེས་སྨྲས་པ། 45

ཡོན་དན་ལ་འོངས་རྣམ་པ་ཅན། མཛའ་བས་འཛུམ་པར་སྨྲ་བྱེད་པ།
ཀྱེ་མ་སྡང་བས་སྡིག་པའི་ལས། བྲུས་པས་ཁྱོད་ནི་མཛེས་མ་ཡིན། 46

चिन्तामणिरयं पुत्र मम मौलिविभूषणम् ।
गृह्यतां तव संकल्पं न वन्ध्यं कर्त्तुमुत्सहे ॥ ३९ ॥

देयः कृतजगत्कृत्यो ममैवायं पुनस्त्वया ।
इत्युक्त्वास्मै ददौ दिव्यचूड़ रत्नं विमुच्य सः ॥ ४० ॥

चिन्तामणिं समादाय कुमारस्तरणिद्युतिः ।
हृष्टः प्रणम्य नागेन्द्रं ययौ प्रवहणान्तिकम् ॥ ४१ ॥

समुद्रदेवता तत्र तं दृष्ट्वा श्रुततत्कथा ।
उवाच कीदृशः साधो प्राप्तश्चिन्तामणिस्त्वया ॥ ४२ ॥

— — — — ।
— — — — ॥ ४३ ॥

— — — — ।
— — — — ॥ ४४ ॥*

समुद्रे पतितं दृष्ट्वा रत्नं कृच्छ्रतरार्जितम् ।
स जगाद दृढोद्योगवैफल्योद्वेगनिश्वसः ॥ ४५ ॥

अहो गुणोचिताकारा प्रणयान्मृदुवादिनी ।
विद्वेषकलुषं कर्म्म कृत्वा त्वं न विलज्जसे ॥ ४६ ॥

* Not legible.

གང་ཞིག་ཕ་རོལ་ཕྱིད་འཕགས་ལ། འགྲན་དང་ཟླ་ངན་ཉོན་མོངས་གྱུར།
དེ་ལ་ཕྱོགས་ནི་འདི་དག་རྣམས། བསོལ་ཡང་འབར་བས་དཀྲིགས་པར་གྱུར།། 47

གང་ཞིག་གཞན་གྱི་སྒྲོ་བས་མགུ། སྙིང་སྟོབས་རྒྱ་གཏེར་ཆེན་པོ་དེས།
གྲགས་པ་ག་བུར་ལྟར་དཀར་བ། འཇིག་རྟེན་གསུམ་གྱི་ཐིག་ལེ་འཛིན།། 48

ལྷ་དག་བདག་གི་རིན་ཅེན་སྤྱོལ། སྨིག་པ་འདི་དང་བྲལ་བར་མཛོད།
དམ་པ་རྣམས་ཀྱི་ལས་དག་གིས། སྨད་པ་དག་དང་མཚུངས་མི་འགྱུར།། 49

ཆགས་སམ་བག་མེད་སྤྱང་བ་ལས། གལ་ཏེ་རིན་ཅེན་མི་སྤྱོལ་ན།
དེ་ལྟ་ན་ནི་ཁྱོད་ཀྱི་གནས། རྒྱ་གཏེར་འདི་ནི་བདག་གི་བསྐམ།། 50

ཞེས་པ་ལན་མང་དེས་སྨྲས་ཀྱང་། གང་ཚེ་རིན་ཅེན་དེས་མ་བྱིན།
དེ་ཚེ་རང་གི་མཐུ་ཡིས་དེ། རྒྱ་གཏེར་བསྐམ་ཕྱིར་རབ་ཏུ་ཞུགས།། 51

མིག་སྟོང་ལྡན་པའི་ཚིག་གིས་ནི། བི་ཤྭ་ཀརྨས་སྤྲུལ་པའི་སྣོད།
བསམས་པ་ཙམ་གྱིས་དེ་ཡི་ནི། ལག་ཏུ་འཕྲུལ་ལ་བྱུང་བར་གྱུར།། 52

བསྐམ་པར་བརྩོན་དེས་རི་བྱི་ཡི། ཁྱེར་བའི་རྣམ་པ་དེ་ཡིས་ནི།
རྒྱ་གཏེར་དག་ལས་རྒྱ་བླངས་ནས། བར་སྣང་ལ་ནི་རབ་ཏུ་གཏོར།། 53

ཤིན་ཏུ་རྨད་བྱུང་བྱེད་པ་དེས། རྒྱ་གཏེར་གསུམ་ཆ་ལྷག་བྱས་ཏེ།
ལྷ་རྣམས་ཀྱིས་ནི་སྨད་པ་ཡིས། འཇིག་ནས་ལྷ་ཡི་ནོར་བུ་བྱིན།། 54

परोत्कर्षेषु संघर्षशोकक्लेशमुपैति यः ।
शीतला अपि तस्यैता ज्वालावलयिता दिशः ॥ ४७ ॥

परोत्साहः प्रियो यस्य तस्य सत्त्वमहोदधेः ।
कर्पूरधवलं धत्ते त्रिलोकीतिलकं यशः ॥ ४८ ॥

देवि प्रयच्छ मे रत्नमस्माद्विरम पातकात् ।
अपवादलतां कर्म्म न साधोरधिरोहति ॥ ४९ ॥

लोभात्प्रमादाद्द्वेषाद्वा रत्नञ्चेन्न प्रयच्छसि ।
शोषयाम्येष जलधिं तदिमं ते समाश्रयम् ॥ ५० ॥

इत्युक्ताप्यसक्तत्तेन सा रत्नं न ददौ यदा ।
स तदा स्वप्रभावेण शोषायाब्धेः समुद्ययौ ॥ ५१ ॥

ध्यातमात्रं सहस्राक्षवचसा विश्वकर्म्मणा ।
निर्म्मितं सहसा तस्य पात्रमाविरभूत्करे ॥ ५२ ॥

स तेनागस्त्यचुलुकाकारेणाम्भः पयोनिधेः ।
अन्तरीक्षे समुत्क्षिप्य चिक्षेप क्षमणोद्यतः ॥ ५३ ॥

कृते भूभागशेषेऽब्धौ तेनात्यद्भुतकारिणा ।
सुरनिर्भर्त्सिता भीता देवतास्मै मणिं ददौ ॥ ५४ ॥

རིན་ཆེན་རྣམས་བཞིན་བདག་ཉིད་ཆེ། ཕྱོགས་རྣམས་དང་ནི་དཀའ་ཐུབ་ཀྱང་།
ཟོལ་མེད་གཟི་བྱིན་ཆེ་རྣམས་ཀྱིས། མདུ་ཡི་དེ་ཉིད་སྲུ་ཡིས་རིག། 55

རིན་ཆེན་འབྱུང་གནས་རབ་རྒྱས་པ་རོལ་མེད་པ་དེ་སྲིད་ཆུ་ཡི་དཀྲིགས་གྱུར་ཅིང་།
བྱེད་པོའི་བདེ་ཐྲག་སྟོབས་ལས་རྦ་རླབས་འཕྲེང་བས་མཁའ་ལ་འགོད་པ་
ཉིད་དུ་ཐོས།
དམ་པ་རྣམས་ཀྱི་མཐུ་ནི་ཆེན་པོའི་བདག་ཉིད་གཞལ་མེད་ཅི་ཡང་ཟབ་པ་སྟེ།
ཡ་མཚན་གནས་གང་བསམ་པའི་ཆོ་ག་དག་ལ་བློ་ནི་མཐའ་རུ་རྒྱལ་བར་བྱེད།།
56

དེ་ནས་ཡིད་བཞིན་ནོར་ཐོབ་སྟེ། རང་གི་དོན་མཐུན་དང་འགྲོགས་ནས།
རེ་བ་རྫོགས་པ་རྒྱལ་པོའི་བུ། རླུང་གིས་གྲོང་ཁྱེར་དག་ཏུ་ཕྱིན།། 57

རབ་ཏུ་མགུ་བའི་ཕ་ཡིས་དེར། མཆོད་སྦྱིན་བྱ་བ་བྱས་པ་དེས།
རྒྱལ་མཚན་རྩེ་ལ་རིན་ཆེན་བཏགས། སྐྱེ་བོའི་མདུན་སར་རབ་སྒྲགས་པ།། 58

གལ་ཏེ་འགར་ཡང་བདག་འབད་འདི། གཞན་དོན་ཁོ་ན་བདག་དོན་མིན།
བདེ་ན་པ་དེ་ཡིས་འཇིག་རྟེན་འདི། ཐམས་ཅད་དབུལ་མེད་ཉིད་གྱུར་ཅིག། 59

དམན་ལ་བརྩེ་ལྡན་སྙིང་སྟོབས་ཀྱི། གཏེར་དེས་དེ་སྐད་བརྗོད་པ་ན།
རིན་ཆེན་ཆར་པ་མཐའ་མེད་ནི། ས་གཞི་དག་ལ་བབས་པར་གྱུར།། 60

ཕྱོགས་རྣམས་ཀུན་ཏུ་རིན་ཆེན་ཚོགས། འོད་དང་ལྡན་པ་དེ་ཡིས་ནི།
སྐྱེ་བོ་དབུལ་བའི་རང་བཞིན་གྱི། སུན་པ་ལྷག་མེད་ཉིད་དུ་གྱུར།། 61

निर्व्याजं साहसं दीप्तिं रत्नानामिव तत्त्वतः ।
प्रभावं वेत्ति महतां मन्त्राणां तपसाञ्च कः ॥ ५५ ॥

स्फारस्तावदपारवारिविरसव्यापारहेलाबलात्
कल्लोलावलियन्त्रिताम्बरतया रत्नाकरः श्रूयते ।
गम्भीरः पुनरप्रमेयमहिमा कोऽपि प्रभावः सतां
यस्मिन् विस्मयधाम्नि चिन्तनविधावन्ते प्लवन्ते धियः ॥ ५६ ॥

ततश्चिन्तामणिं बद्धा निजसार्थेन सङ्गतः ।
राजसूनुः स्वनगरं प्राप पूर्णमनोरथः ॥ ५७ ॥

कृतकृत्यः प्रहृष्टेन स पित्रा तत्र पूजितः ।
ध्वजाग्रे रत्नमाधाय जगाद जनसंसदि ॥ ५८ ॥

परार्थएव यत्नोऽयं नात्मार्थो यदि मे क्वचित् ।
तेन सत्येन लोकोऽयं सर्व्वो यात्वदरिद्रताम् ॥ ५९ ॥

इत्युक्ते सत्त्वनिधिना तेन दीनदयालुना ।
रत्नवृष्टिरपर्य्यन्ता निपपात महीतले ॥ ६० ॥

तेन रत्नसमूहेन दिक्षु सर्व्वासु भास्वता ।
ययौ जनस्य दारिद्र्यमयं निःशेषतां तमः ॥ ६१ ॥

ཛེ་བའི་ཞགས་ལྡན་སྟོབས་ཀྱིས་དཔལ་ལྡན་རྣམས་ཀྱི་ཁང་མདུན་ཕྱི་རོལ་དག་ཏུ་འཇུག།

སྒྲོ་བས་བརྟེགས་ལྡན་ཡང་ཡང་རྣམ་པར་གཡོ་ཞིང་སྒྲོ་ཡི་ཁོངས་སུ་ཉིན་གྱུར་ལ།

ཕྱུགས་རི་ངས་དང་ལྡན་སྒྱུ་ངན་དག་གིས་འགྲོལ་ཞིང་ལུས་ནི་འཇིག་པ་འདོད་གྱུར་པ།

བགྲེན་པ་རྣམས་ལ་ནོར་བུའི་ཕྲེང་པོ་འོད་ཟེར་དྲང་པོའི་དཔལ་ཚོགས་ཅི་ཡང་བྱུང་།། 62

འཇིག་རྟེན་མཐོང་བའི་ཉིན་དང་བྲལ་ཞིང་ཡིད་བཞིན་ནོར་བུ་ཡང་།
དེ་ཡི་བཀའ་ལས་ལྷོ་འཕྱེའི་འདྲེན་པ་ཉིད་དུ་གྱུར་པའི་ཚེ།
ཀུན་དུ་སྤྲིན་པ་ལ་ཞེན་སྐྱེ་བོ་དག་གི་སེམས་རྣམས་ནི།
སྐྱོང་བའི་དོན་མཐུན་ཀུན་དང་བྲལ་བས་འཁྲུགས་པ་ཉིད་དུ་གྱུར།། 63

དོན་མཐུན་གྲུབ་པ་ས་སྐྱོང་གསལ་པོར་ནི།
གང་གྱུར་དེ་ཉིད་ང་ཡིན་ལུས་གཞན་འདིར།
ཞེས་པའི་སྨོན་བྱུང་རྒྱལ་བས་གསུངས་ཐོས་ནས།
དགེ་སློང་དེ་ག་དེ་ཉིད་སེམས་པར་གྱུར།། 64

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དོན་མཐུན་གྲུབ་པའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་བདུན་པའོ།།

आशापाशवतां बलात्प्रविशतां वाह्याङ्गनं श्रीमताम्
द्वाःस्थाघातवतां मुहुर्विचलतां द्वारोदरे सीदताम् ।
दीर्घैं निःश्वसितैः शुचा निपततां देहक्षयं काङ्क्षताम्
दीनानां मणिराशिरश्मिशवलः श्रीसङ्गमः कोऽप्यभूत् ॥ ६२ ॥

तच्छासनादुरगनायकमेव याते
चिन्तामणौ विगतदैन्यजने च लोके ।
सर्व्वेव दानरसिकस्य जनस्य चेतः
सर्व्वार्थिसार्थविरताकुलितं बभूव ॥ ६३ ॥

सर्व्वार्थसिद्धः क्षितिपालसूनुः
योऽभूत् स एवाहमिहान्यदेहः ।
श्रुत्वेतिवृत्तं कथितं जिनेन
ते भिक्षवस्तन्मयतामवापुः ॥ ६४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
सर्व्वार्थसिद्धावदानं सप्तचत्वारिंशः पल्लवः ॥ ० ॥

ཡལ་འདབ་སྟེ་བཞི་བཅུ་རྩ་བརྒྱད་པ།

ཉུ་མ་མཛོན་དགའ་གླང་ཆེན་སྐྱོས་བྲུམ་མཐོ།
ག་བུར་དོ་ཤལ་འོད་ཟེར་རྩེ་དགའ་རྒོད།
དར་ལ་བབ་པའི་ན་ཚུང་འགྱིར་པ་ལང་།
བསོད་ནམས་བྱས་པ་རྣམས་ལ་དགའ་སྟེར་ཡིན།། 1

དེ་བཞིན་གཤེགས་པ་བཅོམ་ལྡན་འདས། མཉན་ཡོད་ནགས་ན་རྒྱུ་བའི་ཚེ།
དཔལ་ལྡན་ཁྱིམ་གྱི་བདག་པོ་སྦྱིན། ལེགས་པར་རབ་སད་ཅེས་པ་བྱུང་།། 2

ཤིན་ཏུ་སྡུག་པ་དེ་ཡི་བུ། གླང་པོ་ཅན་ཞེས་བྱ་བར་གྱུར།
སྦྱིན་བསྒྲུབས་བསོད་ནམས་དག་གི་ཚོགས། རྣམ་པ་དག་དང་བཅས་པ་བཞིན།། 3

དེ་ནི་སྐྱེས་པའི་ཉིན་པར་ལ། རབ་མཆོག་གླང་པོ་ཆེན་པོ་ནི།
གསེར་གྱི་རང་བཞིན་སྐྱེས་གྱུར་ཏེ། ངོ་མཚར་ཚོགས་ནི་གཅིག་གྱུར་བཞིན།། 4

གླང་དབང་དེ་དང་གཞོན་ནུ་དང་། དེ་ཡི་ཕ་ཡིས་རེ་བ་དང་།
འཛིག་རྟེན་ལྟད་མོ་མཛོད་རྣམས་ཀྱང་། མཚུངས་པ་ཉིད་དུ་གང་བར་གྱུར།། 5

རི་བོང་ཅན་བཞིན་ཁྲིས་པ་དེ། དུས་ལ་སྐྲ་རྩལ་ཆ་གནས་གྱུར།
འཛིག་རྟེན་ཀུན་གྱི་མིག་གི་གཉེན། འོད་ཟེར་ལྡན་ཞིང་རབ་ཏུ་མཛེས།། 6

अष्टचत्वारिंशः पल्लवः ।

मत्तेभकुम्भोच्चकुचाभिरामाः
कर्पूरहारांशुविलासहासाः ।
प्रीतिप्रदाः पुण्यवतां भवन्ति
प्रौढ़ा युवत्यश्च विभूतयश्च ॥ १ ॥

तथागते भगवति श्रावस्त्यां वनचारिणि ।
अभवत्सुप्रबुद्धाख्यः श्रीमान् गृहपतिः पुरा ॥ २ ॥

बभूव हस्तको नाम तस्यातिदयितः सुतः ।
पूर्व्वार्जितानां पुण्यानां साकारइव सञ्चयः ॥ ३ ॥

तस्य जन्मदिने जातश्चामीकरमयो महान् ।
एकीभूतइवाश्चर्य्यव्रजः प्रवरकुञ्जरः ॥ ४ ॥

स गजेन्द्रः कुमारश्च तत्पितुश्च मनोरथः ।
लोककौतुककोशाश्च पूर्णतां तुल्यमाययुः ॥ ५ ॥

स प्राप्यैव शिशुः काले कलानिलयतां गतः ।
ररुचे रुचिमान् सर्व्वलोकलोचनबान्धवः ॥ ६ ॥

དཔལ་གྱིས་དེ་ནི་ཁོ་ལག་རྫོགས། དཔུང་པའི་ཀ་བས་རྣམ་པར་བརྒྱན།
ཡིད་ལས་བྱུང་བ་རྩོམ་པའི་གནས། ཡང་ཚོགས་རབ་ཐོབ་བར་གྱུར། ‖ 7

དེ་ནས་ནམ་ཞིག་དེ་ཡིས་ནི། ས་ཡི་བདག་པོ་གསལ་རྒྱལ་གྱི།
བུ་མོ་ལུས་ནི་ཆོས་གོས་ཀྱི། རྟགས་དང་ལྡན་སྐྱེས་རྣམ་མཛེས་མ། ‖ 8

ཆོས་གོས་བུ་མོ་ཞེས་བྱ་བ། མཛེས་ཤིང་ཡིད་འོང་བཞིན་རས་ཅན།
མིང་ཡང་གཞོན་ནུ་མ་དག་ནི། སྐྱིད་ཚལ་ལྷ་རྩེ་འོང་བ་མཐོང་། ‖ 9

ཉམས་པ་མེད་པའི་གཟུགས་ལྡན་ཞིང་། མཛེས་པ་མི་དམན་དེ་མཐོང་ནས།
དེ་ནི་འཕྲུལ་ལ་ཡ་མཚན་དང་། འདོད་པའི་དབང་དུ་མཉམ་པར་གྱུར། ‖ 10

དེ་བསམས་ཀྱི་མ་ལུས་འདི་ནི། ཤིན་ཏུ་སྐད་བྱུང་མཛེས་པ་སྟེ།
སྐྱོན་བྲལ་དྲི་མེད་རི་བོང་ཅན། གང་དུ་བཞིན་གྱི་ཟླ་གྱིས་མཛེས། ‖ 11

གཟུགས་ཅན་མཚོ་ནི་བཀྲ་ཀ་གཉིས་ཡིད་འོང་རང་བཞིན་ཅན།
ཏུ
འདི་ནི་དོ་ཟླ་མེད་པའི་མཛེས་སྡུག་རྣམ་པར་འཛིན་བྱེད་ཅིང་།
རྒྱན་ལྡན་བྱ་རྩའི་ཡལ་འདབ་དག་ལ་འཁྲུ་བར་བརྩོན་པ་དང་།
བིམ་པའི་འོད་ཀྱིས་རྣམ་འཕྲུལ་དག་ནི་འཕྲུལ་ལ་འབྲས་མེད་བྱེད། ‖ 12

རི་བོང་འཛིན་པའི་རྒྱུགས་པ་བཞིན་གྱི་མི་བཟོད་མཛེས་པས་བདུད་རྩི་དམན་བྱེད་ཅིང་།

ཨུཏྤལ་རབ་ཏུ་རྒྱས་པའི་ནགས་ཚལ་འོད་ནི་མིག་གིས་རབ་དུ་ཉམས་པར་བྱེད།

स शनैः पूरिताभोगभुजस्तम्भविभूषणम् ।
लेभे मनोभवारम्भभवनं नवयौवनम् ॥ ७ ॥

कदाचिदथ भूभर्तुः स प्रसेनजितः सुताम् ।
तनुचीवरचिह्नेन सहजेन विराजिताम् ॥ ८ ॥

कन्यां चीवरकन्याख्यां लावण्यललिताननाम् ।
उद्यानदर्शनायातां ददर्शायतलोचनाम् ॥ ९ ॥

अक्लिष्टरूपामालोक्य तामपर्य्युषितद्युतिम् ।
विस्मयस्मरयोस्तुल्यमाययौ सहसा वशम् ॥ १० ॥

सोऽचिन्तयदहो कान्तमिदमत्यद्भुतं वपुः ।
यस्मिन् भाति मुखव्याजाददोषविशदः शशी ॥ ११ ॥

लावण्यमप्रतिममेषा बिभर्त्ति तन्वी
बन्धूकबन्धुरधरो मधुरस्वभावः ।
द्रोहोद्यतः सरसविद्रुमपल्लवानां
बिम्बप्रभाप्रसभविभ्रमबन्ध्यकारः ॥ १२ ॥

वक्त्रं न क्षमते मदं शशभृतः क्लिश्नाति कान्तिः सुधा-
मुत्फुल्लोत्पलकाननस्य कुरुते दृष्टिः प्रभाभर्त्सनम् ।

ཡིད་བསྲུབས་འགྲོགས་འོས་ལུས་ཅན་འདི་ཡི་འཇོ་སྒེག་འགྲན་
ལྷ་དག་ལ་འཛིགས་སྤྱོར་བས།
དགའ་མའི་རོལ་རྩེ་ད་ཐ་རླབས་དག་ནི་འཕྲུལ་ལ་ཉིད་དུ་སྙེམས་
པར་བྱེད་དམ་སྙམ།། 13
ཀྱེ་མ་གང་གི་འོ་མ་འཛིན་པ་ཟུང་ནི་རབ་ཏུ་སྲ་མཁྲེགས་དབེན་པ་ཉམས།
སྨྲོན་གྱི་རང་བཞིན་ཡིན་ཡང་ཡོན་ཏན་ལྡན་པའི་དོ་ཤལ་དག་གིས་
གནས་པར་གྱུར།
བཞིན་འདི་ལ་ཡང་བུང་བའི་འཕྲེང་རྣམས་རྒྱ་སྐྱེས་སྒྲོ་ཡིས་ཉེ་བར་བརྟན་པ་དང་།
གཡོ་ལྡན་མིག་གི་འདྲེན་བྱེད་ཐུབ་པའི་ཡིད་སྐྱོང་ཅི་ཡང་ཆགས་
ཤིང་ཉམས་པར་བྱེད།། 14
དེ་ལྟར་སེམས་པ་དེ་ཡི་ལུས། མི་རྟོག་མདའ་ཅན་ལྷ་བུ་དག།
མཐོང་ནས་ས་བདག་བུ་མོ་ནི། ངོ་མཚར་གཡོ་བ་མེད་པར་གྱུར།། 15
དྲན་པ་འཇོམས་པར་བྱེད་པ་ཡིས། དེ་ཡི་ངོ་ཚའི་གོས་གྲོགས་དེ།
གསར་དུ་སྐྱ་ལོང་རྒྱས་པ་ཡིས། ལུས་ནི་གསར་པར་མཐོང་མ་གྱུར།། 16
མངོན་འདོད་གསར་པས་བཀག་གྱུར་ཀྱང་། སྐྱེངས་པ་ཡིས་ནི་ཕྱིར་བཟློག་སྟེ།
ཡིད་ནི་དེ་ཉིད་ལ་བཞག་ནས། དེ་ནི་སྟོང་བཞིན་དལ་གྱིས་སོང་།། 17
རྒྱལ་པོའི་པོ་བྲང་ཕྱིན་གྱུར་ནས། དོ་ཚ་ཡ་མཚན་ཡི་སྐབས་ཀྱིས།
བྲུམ་པ་བཞིན་དང་ཞུམ་པ། དགྲ་བཅོམ་བཞིན་དུ་དེ་གྱུར་དོ།། 18
གཞོན་ནུ་ཡང་ནི་རང་ཁྲིམ་དུ། ཡིད་ལས་བྱུང་བ་ཡང་དག་རྒྱས།
མདུན་དུ་ཟླ་བཞིན་མ་དེ་ཉིད། ཀུན་དུ་རྟོགས་པས་ཡང་ཡང་བྲིས།། 19

मन्ये मन्मथसङ्गमोचिततनोः सापत्न्यभीतिप्रदा
लीलास्याः सहसा विलासलहरीशोषं विधत्ते रतेः ॥ १३ ॥

उद्वृत्ते कठिने पयोधरयुगे नश्यद्विवेके चिरं
यस्या दोषमयेऽप्यहो गुणवता हारेण बद्धा स्थितिः ।
यत्रास्मिन्नवलम्बलेऽम्बुजधिया रोलम्बरेखा मुखे
लोलाक्ष्याः किमपि प्रशान्तनयने लीनं मुनीनां मनः ॥ १४ ॥

इति चिन्तयतस्तस्य वपुः पुष्पशरोपमम् ।
विलोक्य भूपतिसुता बभूवाश्चर्यनिश्चला ॥ १५ ॥

हृते लज्जांशुके तस्याः स्मरेण स्मितकारिणा ।
प्रत्यग्रपुलकाकीर्णं वपुः स्पष्टमदृश्यत ॥ १६ ॥

रुद्धा नवाभिलाषेण वैलक्ष्येण निवर्त्तिता ।
मनस्तत्रैव निक्षिप्य सा शून्येव शनैर्ययौ ॥ १७ ॥

राजधानीं समासाद्य लज्जाविस्मयमन्मथैः ।
मीलितेव निलीनेव प्रोषितेव बभूव सा ॥ १८ ॥

कुमारोऽपि स्वभवने समुद्भूतमनोभवः ।
तामेवेन्दुमुखीमग्रे संकल्पैरलिखन् मुहुः ॥ १९ ॥

དེ་ཡིས་ཡིད་ཀྱི་ནོར་མཆོག་དེ། འདོད་པའི་རིག་པ་བཞིན་དྲན་ཅིང་།
འཁོར་ལོ་སྒྱུར་བའི་བུ་མོ་ནི། རྙེད་པར་དཀའ་བས་ཞེས་ནས་བསམས།། 20

སྐྱེ་བ་གཞན་ལ་གང་གི་ལུས། ཡུན་རིང་དཀའ་ཐུབ་ཡོངས་འདྲིས་པ།
སྐལ་ལྡན་དེ་ཡིས་ལེགས་བྱས་ཀྱིས། ཤིང་གི་འཁྲི་ཤིང་དེ་ཐོབ་གྱུར།། 21

དགའ་བ་རབ་སྤྲིན་བསོད་ནམས་ཀྱིས། དེ་མཐོང་བ་ནི་ཐོབ་གྱུར་དེ།
གང་ཞིག་དེ་འགྲོགས་འབྲས་ལྡན་པའི། བསོད་ནམས་དེ་དག་ཡོངས་མི་ཤེས།། 22

དེ་ཡིས་བཞིན་རས་བསིལ་བའི་ཟེར་ལྡན་དྲན་པས་དགའ་བ་དང་།
དེ་ཡང་རྙེད་དཀའ་ཉིད་ཀྱིས་འབྲལ་བའི་གདུང་བ་དག་གི་བདག།
བརྟན་པ་འདི་ཅི་སྨོངས་འདི་ཅི་ཞིག་འཚོ་བ་ཉིད་ནི་ཅི།
སྒྲོག་དང་ལྡན་ཅིག་རྣམ་པར་བྲལ་ལམ་ཅི་ཡིན་ཡོངས་མི་ཤེས།། 23

དེ་གདོང་ཆུ་སྐྱེས་དག་གི་འཕྲལ་ལ་བཅོམ་པས་མཚན་མོའི་ཡིད་འོང་
ཉམས་པ་བསྟེན།
དེ་ཡི་སྨིན་མའི་རྣམ་འཕྱུལ་དག་ལ་ངོ་ཚ་ཡིད་སྦུབས་གཞུ་ནི་ཀྱག་པར་གྱུར།
ཡིད་འོང་ཡལ་འདབ་མདངས་འཕྲོག་དེ་ཡིས་མཆུ་སྐྲོས་དམར་བ
དག་གིས་གཟིར་གྱུར་དེ།
ཆགས་བྲལ་ཉིད་ཐོབ་བིམྦ་དག་ནི་ནགས་ཀྱི་ས་ལ་ཡང་དག་བརྟེན་ནས་སྐྱམ།། 24

དེ་ལྟར་ཛྲ་ཞའི་བཞིན་རས་ཅན། བཞིན་ལས་སམས་གདན་གཡོ་མེད་ཀྱིས།
གཉིད་ཀྱིས་ཕྲག་དོག་ཅན་གྱིས་བཞིན། གདུང་བ་དེ་ཡིས་མཚན་མོ་འདས།། 25

स तां मानससर्व्वस्वं स्मरविद्यामिव स्मरन् ।
प्रदध्यौ दुर्लभां मत्वा तनयां चक्रवर्त्तिनः ॥ २० ॥

जन्मान्तरे तनुर्यस्य तपःपरिचिता चिरम् ।
धन्यः स तामवाप्नोति लतां सुकृतशाखिनः ॥ २१ ॥

रम्यप्रदानपुण्येन तद्दर्शनमवाप्यते ।
न जाने तानि पुण्यानि येषां तत्सङ्गमः फलम् ॥ २२ ॥

तद्वक्त्रशीतकिरणस्मरणोत्सवेन
तस्याश्च दुर्लभतया विरहोष्मणा मे ।
नो वेद्मि किं धृतिरियं किमयं विमोहः
किं जीवितं किमसुभिः सह विप्रयोगः ॥ २३ ॥

तद्वक्त्राब्जजितः प्रसह्य भजते क्षैण्यं क्षपावल्लभः
तद्भ्रूविभ्रमलज्जितञ्च विनतिं धत्ते धनुर्मान्मथम् ।
तस्याः पल्लवपेशलद्युतिमुषा शोणाधरेणाहितं
नूनं प्राप्य पराजयं वनमहीं विम्बं समालम्बते ॥ २४ ॥

इति पूर्णेन्दुवदनावदनध्याननिश्चलः ।
निशां निनाय संत्यक्तः सेर्ष्ययेव स निद्रया ॥ २५ ॥

མཛེས་མ་མཐོང་བར་གྱུར་པའི་མཐའ། དེ་ནི་དེ་ཡིས་བཤད་པ་དག།
པ་ཡིས་ཐོས་ནས་དེ་ཡིས་ནི། བསམ་པ་འཕོས་ཤིང་ཡོངས་འདྲིས་གྱུར།། 26

དེ་ལ་དེ་སྐྱེས་བདག་ཅག་བུ། རྒྱལ་པོའི་གྲོང་ཁྱེར་གནས་པའང་མིན།
འཁོར་ལོ་སྒྱུར་དེ་བུ་མོ་ནི། ཁྱོད་ལ་ཇི་ལྟར་སྟེར་བར་འགྱུར།། 27

མཁས་པ་བཀུར་བ་འདོད་པ་རྣམས། མི་ནུས་པ་ཉིད་བྱེད་མ་ཡིན།
ཉེད་པར་དཀའ་བ་འདོད་མ་ཡིན། མི་བདེན་པ་ནི་སྨྲ་མ་ཡིན།། 28

འབྲི་ཤིང་ཙུ་ད་ཙུམ་པ་ཀ། རང་དབང་རྣམས་ལ་མི་གུས་པར།
ཡོངས་འདུའི་འབྲི་ཤིང་སེམས་པ་ན། ཀང་དྲུག་པ་ཉིད་བསྐམ་པར་འགྱུར།། 29

གལ་དེ་ཁྱོད་དང་དེ་གཉིས་ཀྱང་། སྐྱེ་བ་སྔ་མར་འབྲེལ་བསྒྲུབས་ན།
དེ་ཡི་འབྲས་བུ་འབད་མེད་དུ། ངེས་པ་ཁོ་ནར་རྒྱས་པར་འགྱུར།། 30

རི་བའི་ཞགས་བས་མ་བཀུག་ཅིང་། རྡོག་དབྱོད་དག་གིས་མ་གཟིར་ལ།
འབད་པའི་ཁུར་གྱིས་མ་ངལ་བར། ངེས་པར་སྐྱོང་བྱ་གྲུབ་པ་ཉིད།། 31

ཅེས་པ་པ་ཡི་ཚིག་ཐོས་ནས། དེ་དེ་བཞིན་ཞེས་རྣམ་བསམས་ཏེ།
སེམས་ནི་མཛེས་མས་བཟུང་བ་དག། སླར་ཡང་ཟློག་པ་དེས་མ་ནུས།། 32

དེ་སོང་གསེར་གྱི་གླང་པོ་ལ། རྒྱལ་ལ་གསེར་དུ་ཕྲད་པ་ཡིས།
དགའ་བར་འོས་ཕྲད་སྐྱེས་སུ་ནི། གསེར་གྱི་མཆེ་བ་ཟུང་དག་གླངས།། 33

कन्यादर्शनवृत्तान्तं ततस्तेन निवेदितम् ।
श्रुत्वा पितास्य संक्रान्तचिन्तापरिचितोऽभवत् ॥ २६ ॥

स तमूचे वयं पुत्र राज्ञोऽस्य पुरवासिनः ।
स कथं ते दुहितरं चक्रवर्त्ती प्रदास्यति ॥ २७ ॥

अशक्यं नैव कुर्व्वन्ति समीहन्ते न दुर्लभम् ।
असम्भाव्यं न भाषन्ते मानकामा मनीषिणः ॥ २८ ॥

चूतचम्पकवल्लीषु स्वाधीनासु निरादरः ।
चिन्तयन् पारिजातस्य लतां शुष्यति षट्पदः ॥ २९ ॥

तव तस्याश्च सम्बन्धः प्राग्जन्मविहितो यदि ।
तदवश्यं भवत्येव निष्प्रयत्नफलोदयः ॥ ३० ॥

आशापाशैरनाकृष्टं विचारैरकदर्थितम् ।
प्रयत्नभारैरश्रान्तं विधत्ते भवितव्यता ॥ ३१ ॥

इत्याकर्ण्य पितुर्वाक्यं तत्तथेति विचिन्तयन् ।
न चेतः कन्यकानीतं समानेतुं शशाक सः ॥ ३२ ॥

स गत्वा दन्तयुगलं ययाचे हेमकुञ्जरम् ।
नवसंदर्शने राज्ञः प्रीतियोग्यमुपायनम् ॥ ३३ ॥

དེ་ནས་ལག་ལྷན་བསོད་ནམས་ཀྱིས། མཛའ་བས་ཕྲིན་པའི་མཆེ་བ་ལྷུང་།
གསེར་གྱི་རང་བཞིན་ཁྲེར་ནས་དེ། ས་ཡི་བདག་པོ་ལྷ་རྫུ་སོང་། 34

དེ་ཡིས་རིན་ཅན་གྱིས་མཛེས་པའི། ས་ཡི་བདག་པོའི་ཁང་པར་ཕྱིན།
ནང་ཞུགས་རབ་དུད་མཛའ་བའི་སྣང་། གསེར་གྱི་མཆེ་བ་གཉིས་པོ་ཕྲིན། 35

རྒྱལ་པོ་རབ་དུ་དང་བ་ཡིས། ཡོན་དན་གྱིས་གྲགས་དགའ་བར་གྱུས།
མཆོག་ནི་ལོང་ཞེས་བརྗོད་གྱུར་ཀྱང་། དེ་ཡིས་ཅི་ཡང་བླངས་མ་གྱུར། 36

མཛེས་པ་དམན་མིན་དེ་ལ་ནི། རྒྱལ་པོས་ལྷག་པར་བཀུར་བ་བྱུས།
རིགས་ཤིང་མཛེས་པའི་སྤྱོད་པ་ཅན། ཆགས་པ་མེད་ལ་སུ་མི་དགའ། 37

རྟག་དུ་རྒྱལ་ལ་ཕྲད་ཆེ་དེས། གསར་དུ་སོ་ལྷན་ལ་སྐྱེས་པ།
གསེར་གྱི་རང་བཞིན་མཆེ་བ་རྣམས། དགའ་བའི་སྣད་དུ་རབ་དུ་ཕྲིན། 38

ཡིད་རབ་དང་བའི་ཡོ་ཉ་ནི། བཞིན་རས་མཛེས་པ་འཛིན་བྱེད་ཅིང་།
བསྔོན་པའི་མཛའ་གཙུགས་ཀྱིས་བསྒམས་པའི། ས་སྐྱོང་གིས་ནི་དེ་ལ་སྨྲས། 39

རབ་མང་གསེར་ཚོགས་བསྐྱིང་བ་ཡིས། བསྔོན་འདི་བདག་གིས་ཡོངས་མི་བཟེད།
གང་ཕྱིར་གྲོད་ཁྲེར་བ་ཡི་ཚོགས། ས་བདག་རྣམས་ཀྱི་རྒྱས་བྲ་ཉིད། 40

སྐྱེ་བོས་བགོས་སྐལ་ཕྲལ་བ་ཡིས། གསེར་གྱི་དགའ་བ་བདག་ལ་ཅི།
རིན་ཅན་ཡོན་དན་ཁྲིད་ཀྱི་ནི། གཟུགས་འདི་ཉིད་ལ་བདག་དགར་བོ། 41

पुण्यबन्धेन करिणा दत्तं दन्तयुगं ततः ।
स हेममयमादाय द्रष्टुं भूमिपतिं ययौ ॥ ३४ ॥

स रत्नरुचिरं प्राप्य भवनं पृथिवीपतेः ।
प्रविश्य प्रणतः प्रीत्यै हेमदन्तद्वयं ददौ ॥ ३५ ॥

भूभुजा विश्रुतगुणः प्रसादेनाभिनन्दितः ।
वरं गृहाणेत्युक्तश्च स न जग्राह किञ्चन ॥ ३६ ॥

तस्यादीनद्युतेश्चक्रे मानमभ्यधिकं नृपः ।
औचित्यचारुचरितः प्रियः कस्य न निस्पृहः ॥ ३७ ॥

स सदा दर्शने राज्ञः काञ्चनाङ्गानि दन्तिनः ।
पुनर्जातनवाङ्गेन दत्तानि प्रीतये ददौ ॥ ३८ ॥

तमुवाच महीपालः सेवाप्रणययन्त्रितः ।
दूतीं मनःप्रसादस्य वदनद्युतिमुद्वहन् ॥ ३९ ॥

प्रभूतहेमसम्भारां गुर्वीं सेवामिमामहम् ।
न सहे पौरवर्गो हि भरणीयो महीभृताम् ॥ ४० ॥

संविभज्य जनानीतैः का प्रीतिर्मम काञ्चनैः ।
तवानर्घगुणा मूर्त्तिरियमेव मम प्रिया ॥ ४१ ॥

གསེར་དང་རིན་ཆེན་རྡོ་ཡི་ཚོགས། མཛོད་རྣམས་ན་གནས་རྒྱལ་པོ་ནི།
རྒྱན་དུ་འོས་པའི་སྐྱེས་བུ་དག། རིན་ཅེན་རྣམས་ལ་ཆགས་ན་མཛེས།། 42

ཁྱོད་ལ་འདོད་པའི་མཆོག་དག་ནི། བདག་གིས་ཅི་སྦྱིན་སྨྲ་བར་མཛོད།
མ་ལུས་མཛོད་ནི་བྱིན་གྱུར་ཀྱང་། ངེས་པར་བདག་ནི་འགྱོད་མི་འགྱུར།། 43

རྒྱལ་པོའི་སྐྱུར་ཟུར་ལྟང་ཙམ་གྱིས། གལ་ཏེ་དཔལ་འབྱོར་མ་ཐོབ་ན།
དོན་གཉེར་དོན་མེད་ཉིད་གྱུར་པས། ས་བདག་བསྟེན་པའི་དོན་ནི་ཅི།། 44

དེ་སྐད་ས་སྐྱོང་གིས་སྨྲས་ཚེ། གཞོན་ནུས་ཐལ་མོ་སྦྱར་བྱས་ནས།
དེ་ལ་སྨྲས་པས་ས་སྐྱོང་དག། སྟེར་བར་འོས་པ་གཞན་པ་སུ།། 45

མཁས་པ་རྣམས་ལ་རིན་ཅེན་ནི། དོན་དུ་མ་གཉེར་སྩོལ་མཛད་པ།
ཁྱོད་ཀྱི་རྒྱ་མཚོའི་གྲགས་པ་ནི། རབ་རྒྱས་དེ་དག་རྒྱུ་ཡིས་བརྡབ།། 46

རབ་དུ་སྦྱིན་པ་ཆེན་པོས་ཀྱང་། རེ་ཆེན་པོ་ཁེངས་ས་མིན།
ཆུང་ངུ་རྣམས་ཀྱི་དབང་ཕྱུག་གང་། དེ་ནི་ཆེན་པོའི་དབུལ་པོ་ཉིད།། 47

འོན་ཀྱང་གང་གིས་ནོར་སྐྱོང་བ། ཁྱོད་ཀྱི་དཔུང་པས་བསྲུངས་གྱུར་ཅིང་།
ཆོས་ཀྱི་ལམ་གྱི་འཚོ་བ་ཡི། སྐྱེ་བོ་རྣམས་ལ་དབུལ་པོ་མེད།། 48

བདག་ཀྱང་ནོར་དོན་གཉེར་བ་མིན། སྟེན་པར་བྱེད་པ་པོ་ཡང་མིན།
ནོར་ལྡན་རྣམས་ལ་ནོར་ཉིད་ནོར། ཁེང་ལྡན་རྣམས་ལ་བཀུར་བ་ཉིད།། 49

लोभः पुरुषरत्नेषु भूषणार्हेषु शोभते ।
राज्ञां कोशेषु सीदन्ति हेमरत्नाश्मसञ्चयाः ॥ ४२ ॥

समीहिततमं तुभ्यं किं प्रयच्छामि कथ्यताम् ।
निःशेषकोशदानेन न नामानुशयोऽस्तु मे ॥ ४३ ॥

राज्ञां दृक्पातमात्रेण प्राप्यन्ते यदि न श्रियः ।
तदनर्थं गतार्थिन्या कोऽर्थः पार्थिवसेवया ॥ ४४ ॥

इत्युक्तः क्षितिपालेन कुमारः कलिताञ्जलिः ।
तमभाषत भूपाल दातुमर्हति कोऽपरः ॥ ४५ ॥

अनर्थितेन रत्नानि विबुधेभ्यः प्रयच्छता ।
तदुन्निद्रं समुद्रस्य मुद्रितं भवता यशः ॥ ४६ ॥

महतापि प्रयत्नेन पूर्यते न महाशयः ।
अल्पकानां यदैश्वर्यं दारिद्र्यं तन्महीयसाम् ॥ ४७ ॥

किन्तु त्वद्भुजगुप्तानां धर्म्ममार्गेण जीवताम् ।
जनानां नास्ति दारिद्र्यं द्रविणं येन मृग्यते ॥ ४८ ॥

धनार्थिनो न तु वयं न च सेवाधिकारिणः ।
धनं धनं धनधियां मानएव मनस्विनाम् ॥ ४९ ॥

དམ་པའི་དབང་ཕྱུག་བསྟེན་པས་ཡོན་ཏན་དག་ནི་ཟུམ་གྱུར་པས།
དམ་པའི་མི་དོག་རྣམས་ནི་འཕྲལ་ལ་སྙིང་པ་ཉིད་གྱུར་ཅིང་།
སྐར་ཡང་བཀྲེན་པའི་ཚོང་གི་ལམ་དུ་དམན་པས་ལྷུང་གྱུར་ལ།
དམ་པའི་སྐྱེ་བོ་རྣམས་ནི་རིག་པ་ཙམ་ཡང་མི་མཛོད་དོ ༎ 50

དམན་ཞིང་སྨད་པའི་བདག་ཉིད་ལུས་འཛིན་རྣམས་ཀྱིས་སློང་བ
ཉིད་པས་ཤི་བ་མཆོག།
སློང་བ་མཆོག་ཏུ་བཀུར་སྟི་འོས་པ་སྐྱེ་བོ་ཀུན་གྱི་སྨད་པ་དག་གིས་གནས།
ཇི་སྲིད་དོན་གཉེར་ཉིད་ཐོབ་སྤྲངས་པའི་སྟུན་པར་དབང་མེད
འཇུག་ཅིང་འབབ་བྱེད་པ།
དེ་སྲིད་ཡོན་ཏན་ལྡན་པའི་བུམ་པ་ཁྲོན་པར་འཇུག་ལས་མཆོག་ཏུ་ཐུར་དུ་འགྲོ ༎
51

ཕུན་ཚོགས་ཐུན་མོང་ནོར་ནི་ཞིང་ལས་ཚོང་ལ་རྟག་ཏུ་བློ་ལྡན་རྣམས་ཀྱིས་འཐོབ།
གལ་ཏེ་ཆོག་ཤེས་མེད་ན་གཞན་པ་ཅི་ཞིག་ས་ལ་གཏེར་རྣམས་བྲུས་པ་དང་།
ཕྱུལ་བྱུང་རབ་དང་གསེར་དང་དངུལ་གྱི་བྲུ་བ་དེ་དག་ཡོང་བ་ཉིད།
དགའ་དང་འགྲོགས་པའི་སྐད་དུ་ལུས་ནི་གསོག་གི་རང་བཞིན
དུ་འཚོ་སྲུ་ཞིག་འདོད ༎ 52

ཅེས་པ་བློ་གྲོས་གཞན་དེ་ཡིས། ཚིག་ཐོས་ནས་ནི་ས་ཡིས་བདག།
གུས་དང་བཅས་པས་གཞན་པ་ནི། ཅུང་ཟད་བླང་བར་མཛོད་ཅེས་སྨྲས ༎ 53

རིགས་ཤིང་བཟོད་པ་མཁས་པ་ཡི། རྒྱབ་མོ་ལ་ཡང་མི་རྣམས་དགའ།
བཀྲེན་པ་རྣམས་ཀྱིས་ངོ་བསྟོད་ན། འཛམ་ཡང་རྣ་བ་ན་བའི་རྒྱུ ༎ 54

शीलद्गुणेन परमेश्वरसेवनेन
निर्मूलतां सुमनसां सहसा गतानाम् ।
दैन्यात् पुनः कृपणपण्यपथे च्युतानां
न स्पर्शमात्रमपि साधुजनः करोति ॥ ५० ॥

अर्थित्वान्मरणं वरं तनुभृतां दैन्यावसन्नात्मनाम्
अर्थी सर्व्वजनावमानवसतिः सत्कारयोग्यः शवः ।
कुम्भस्तावदधः प्रयाति गुणवान् कूपावतारे परं
यावन्मोहतमःप्रवेशविवशः प्राप्तोऽर्थितां लम्बते ॥ ५१ ॥

सामान्या धनसम्पदः क्रयकृषिप्राप्याः सदा धीमतां
सन्तोषो यदि नास्ति तत्किमपरा भूमि र्निधानावृता ।
सन्त्येवातिशयप्रसादनिरतास्ता हेमरत्नक्रियाः
कस्येष्टः प्रियसङ्गमाय वपुषां सेवामयो विक्रयः ॥ ५२ ॥

इत्यपारधियस्तस्य वचः श्रुत्वा महीपतिः ।
गृह्यतामपरं किञ्चिदित्यभाषत सादरः ॥ ५३ ॥

औचित्यचतुरालापः कर्कशोऽपि नृणां प्रियः ।
कृपणश्चाटुकारोऽपि कर्णशूलाय केवलः ॥ ५४ ॥

རྒྱ་ཆེར་ཡོངས་སུ་ཆོམས་པ་ཡི། རྒྱལ་པོས་མཆོག་དུ་གསོལ་བ་བཏབ།
དེ་ལ་སྨྲས་པ་ཕམ་དེ་ཁྲིད། སེམས་ན་བུ་མོ་བདག་ལ་སྩོལ།། 55

དེས་དེ་བརྗོད་ཚེ་མི་བདག་ནི། བསམ་པ་ཐེ་ཚོམ་འཕྱུང་མེར་གྱུར།
ནང་པར་བདག་སྨྲས་ཞེས་སྨྲས་ནས། སྐད་ཅིག་ས་གཞི་དག་ལ་བལྟས།། 56

དེ་ནས་གཞོན་ནུ་བཏང་ནས་དེས། བློན་པོ་འི་གཙོ་བོ་ལ་སྨྲས་པ།
རབ་དང་གཟུ་ལུམས་དག་གིས་ནི། བྱ་རོག་བཞིན་དུ་གསོ་བ་བས།། 57

འཁོར་ལོ་སྒྱུར་བའི་རིགས་འཁྲུངས་པའི། བུ་མོ་བསོད་ནམས་ཟོད་ལ་འོས།
གྲོང་པ་ཐུན་མོང་བ་ལ་ནི། ཡོན་ཏན་ཙམ་གྱིས་ཇི་ལྟར་སྦྱིན།། 58

སྦྱིན་ནོ་ཞེས་ནི་རབ་བསྒྲགས་ནས། རྗེས་སུ་འགྱོད་པས་གཟིར་གྱུར་པའི།
བདེན་ནོར་ལྡན་པར་གྱུར་བ་བདག། སློང་བ་འབྲས་མེད་ཇི་ལྟར་འགྱུར།། 59

ནང་པར་མདུན་དུ་དེ་འོངས་པའི། བཞིན་ནི་བདག་གིས་ཇི་ལྟར་ལྟ།
བདག་ལ་རེད་དཀའ་དེས་བསྒྲངས་ནས། མཛའ་ཡང་མཛོད་མིན་ཉིད་དུ་གྱུར།། 60

རང་བཞིན་ཉིད་ཀྱིས་ལུས་ཅན་རྣམས། ངེས་པར་ཡོན་ཏན་ཡོངས་རྫོགས་ཀྱང་།
ཇི་སྲིད་བསླང་ཞེས་མ་བརྗོད་པར། དེ་སྲིད་སྙིང་དུ་སྡུག་པ་ཡིན།། 61

ཞེས་པས་བདག་ཁྲིགས་ལ་ནི། ངེས་པར་བདེན་པའི་ཚིག་ཐོས་ནས།
བློན་པོ་ཆེན་པོས་གནས་སྐབས་སུ། འོས་པ་བསམས་ནས་དེ་ལ་སྨྲས།། 62

औदार्यपरितुष्टेन स राज्ञाभ्यर्थितः परम् ।
तमूचे यदि तुष्टोऽसि सुता मह्यं प्रदीयताम् ॥ ५५ ॥

इत्युक्ते तेन नृपतिः सन्देहान्दोलिताशयः ।
प्रातर्वक्ताहमित्युक्त्वा क्षणं स्नातस्तमैक्षत ॥ ५६ ॥

स कुमारं विसृज्याथ प्रधानामात्यमब्रवीत् ।
प्रसादरभसेनैव कृतं वाक्चापलं मया ॥ ५७ ॥

चक्रवर्तिकुलोत्पन्ना कन्या पुण्यपणोचिता ।
कथं सामान्यपौराय गुणमात्रेण दीयते ॥ ५८ ॥

ददामीति प्रतिश्रुत्य पश्चादनुशयाकुलः ।
कथं सारधनो भूत्वा भविष्याम्यर्थिनिष्फलः ॥ ५९ ॥

कथं प्राप्तस्य तस्याहं प्रातर्द्रष्टा मुखं पुरः ।
प्रियोऽप्यप्रियतां यातः स मे दुर्लभयेच्छया ॥ ६० ॥

नूनं गुणोपपन्नोऽपि प्रकृत्यैव शरीरिणाम् ।
वक्ति यावन्न देहीति तावद्भवति वल्लभः ॥ ६१ ॥

इति भूमिपतेः श्रुत्वा वचो दोलावलम्बिनः ।
तमुवाच महामात्यः सञ्चिन्त्यावसरोचितम् ॥ ६२ ॥

རྗེ་བོ་དག་གི་བློ་གྲོས་རྣམས། བགྲོས་པ་མིན་པའི་མཐར་ཐུག་ཅིང་།
གསར་དུ་ཆགས་ལྡན་གསུམ་པ་དང་། རང་བཞིན་གཟུ་ལུམ་ལྡན་པ་ཡིས། ། 63

སྙིང་ལྡན་མི་ནུས་དོན་གཉེར་བས། ཡོན་དན་འབྱུང་གནས་བཞིན་དུ་ནི།
རྒྱལ་པོ་འི་གཡོག་ལ་རབ་ཞུགས་དེས། གསེར་གྱིས་གླང་ཆེན་རྣམ་པར་བཙོམ། ། 64

བུ་མོ་སློང་བསྐུར་འོངས་ཚེ། ཁྱོད་ཀྱི་དཔལ་བུས་འདི་བརྗོད་བྱ།
གསེར་གླང་ཞིག་དེ་འོངས་པ་ན། བདག་གི་བུ་མོ་ཐོབ་པར་འགྱུར། ། 65

དེ་ཡི་རང་ལག་གིས་བསད་ནས། དེ་ལ་གླང་པོ་ག་ལ་ཡོད།
དེ་དང་བྲལ་བའི་ངོ་ཚ་ཡིས། སླང་ཡང་འོང་བར་མི་འགྱུར་རོ། ། 66

ཞེས་པ་བློན་པོ་འི་ཚིག་གིས་ནི། ཉིན་གཞན་གཞོན་ནུ་འོངས་པ་ལ།
ལུགས་ལ་བརྟེན་པའི་མི་བདག་གིས། མངོན་དུ་ཕྱོགས་དེ་དེ་ཉིད་སྨྲས། ། 67

གཞོན་ནུ་ཡང་ནི་ཁྱིམ་སོང་ནས། བག་མ་ལེན་འོས་བཀྲ་ཤིས་ཀྱིས།
གསེར་གྱི་སོ་གཉིས་ལ་ཞོན་དེ། རང་གི་མི་དང་ལྷན་ཅིག་འོངས། ། 68

གསེར་གྱི་གླང་ཆེན་ལ་ཞོན་ནས། འོང་བ་དེ་ནི་ས་བདག་གིས།
མཐོང་ནས་ངོ་མཚར་འབྱོར་པ་ཅན། བསོད་ནམས་ལྡན་པའི་མཆོག་དུ་ཤེས། ། 69

དེ་ནས་རྒྱལ་པོས་དགེ་མཚན་ལས། གླང་པོ་གསེར་ལུས་ཅན་དེ་ལ།
སྐྱེ་བ་ཆེན་པོས་ལྷུན་པོ་ལ། རྡོ་རྗེ་འཛིན་པ་བཞིན་དུ་ཞོན། ། 70

अनालोचितपर्यन्ताः प्रत्यग्रसरसादराः ।
स्वभावरभसा एव भवन्ति प्रभुबुद्धयः ॥ ६३ ॥

अशक्यार्थनया तेन लुब्धेनैव गुणोदयः ।
राजसेवाप्रवृत्तेन हेमहस्ती विनाशितः ॥ ६४ ॥

वाच्योऽसौ भवता स्वैरं कन्यार्थी पुनरागतः ।
हेमहस्तिनमारुह्य प्राप्तः प्राप्स्यसि मे सुताम् ॥ ६५ ॥

तेनोत्कृत्तः स्वहस्तेन कृतस्तस्य स कुञ्जरः ।
न चासौ तद्विरहितः पुनरायाति लज्जया ॥ ६६ ॥

इत्यमात्यस्य वचसा नृपतिर्युक्तिमाश्रितः ।
प्राप्तं कुमार मन्येद्युस्तद्देवाभिमुखोऽवदत् ॥ ६७ ॥

कुमारोऽपि गृहं गत्वा विवाहोचितमङ्गलैः ।
हैमद्विरदमारुह्य स्वजनेन सहाययौ ॥ ६८ ॥

स्वर्णवारणसंरूढं तमायान्तं महीपतिः ।
विलोक्याश्चर्यविभवं मेने पुण्यवतां वरम् ॥ ६९ ॥

कौतुकादथ भूपालस्तं गजं हैमविग्रहम् ।
आरुरोह महोत्साहः सुमेरुमिव वज्रभृत् ॥ ७० ॥

ས་སྐྱོང་གིས་ནི་ཞོན་པའི་ཚེ། གླང་པོ་དེ་ནི་མི་གཡོ་ཞིང་།
སྟོན་ནི་གཞོར་ནུས་བརྒྱན་པའི་ཚེ། སླར་ཡང་རབ་ཏུ་གཡོ་བར་འགྱུར།། 71

མི་བདག་གིས་དེ་ལྟར་ཤེས་ཤིང་། དེ་ཡི་མཐུ་ཡིས་ཡ་མཚན་པས།
བདག་ནི་སྐལ་བཟང་ཞེས་བརྗོད་ཅིང་། བུ་མོ་འདོད་དཔལ་དེ་ལ་བྱིན།། 72

རིན་ཅན་བུ་མོས་སྐྱེས་བུ་མཆོག། མ་ནོར་མཆོད་གནས་མི་ཡི་བདག།
སྒྲོ་དགའ་ཡང་དག་རྒྱས་གྱུར་པ། བདུད་རྩིའི་རྒྱ་མཚོ་བཞིན་དུ་མཛེས།། 73

དེ་ནས་གཞོན་ནུས་མཛེས་མ་ནི། གླངས་ནས་རང་གི་ཁྱིམ་སོང་སྟེ།
ལུས་ནི་གཞུ་ནི་དྲངས་པ་ཡིས། ངལ་བ་འབྲས་བུ་ཡོད་པར་འགྱུར།། 74

ཡང་ཚེ་གསར་པ་ལོངས་སྤྱོད་འདིས། མཛེས་མ་གསར་པ་དང་འགྲོགས་སྟེ།
འཁོར་པ་རྒྱ་ཆེས་རྟག་ཏུ་དེས། གསར་པ་གསར་པ་དགའ་བར་འགྱུར།། 75

དེ་ནས་ནམ་ཞིག་ས་སྐྱོང་ནི། བྲུ་བ་བྲུས་པ་གསལ་རྒྱལ་གྱིས།
བསོད་ནམས་མཐུ་ལྡན་མག་པ་དག། ཡིད་ལ་གཅགས་ཤིང་རབ་བསམས་པ།། 76

སྐྱེ་མ་ལྷ་ཡི་མཐུ་འདི་ནི། གཞོན་ནུ་དག་ལ་རབ་ཏུ་མཐོང་།
གང་ཕྱིར་ཐུན་མོང་བསོད་ནམས་རྣམས། དེ་ལྟར་མིན་པར་འགྱུར་མ་ཡིན།། 77

རིགས་ནི་དཔལ་འཁོར་ཁང་བཟང་གཟུགས་ཀྱི་ན་རྣ་བས་ཟླ་
བའི་རིགས་པ་འགྲོགས།
ཡང་ཚེ་ལོངས་སྤྱོད་འདིས་དང་ཡོངས་སུ་འདྲིས་པའི་ཡོན་ཏན་རྒྱུན་གྱི་ཚོགས།

आरूढे पृथिवीपाले न चचाल स कुञ्जरः ।
प्रससर्प कुमारेण पुनश्चालङ्कृतासनः ॥ ७१ ॥

तं ज्ञात्वा नृपतिर्दैवं तत्प्रभावेण विस्मितः ।
धन्योऽस्मीति वदन् कन्यां ददौ तस्मै स्मरश्रियम् ॥ ७२ ॥

अभ्यर्च्य कन्यारत्नेन नृपतिः पुरुषोत्तमम् ।
हर्षोत्सवसमुद्भूतः सुधासिन्धुरिवाबभौ ॥ ७३ ॥

ततः कुमारे दयितामादाय स्वगृहं गते ।
सफलोऽभूदनङ्गस्य कार्मुकाकर्षणश्रमः ॥ ७४ ॥

नवे वयसि भोगार्हे नवकान्तासमागमे ।
तस्याभूद्विभवोदारः सदा नवनवोत्सवः ॥ ७५ ॥

ततः कदाचिद् भूपालः कृतकृत्यः प्रसेनजित् ।
पुण्यप्रभावं जामातुः कलयन् समचिन्तयत् ॥ ७६ ॥

अहो दिव्यः प्रभावोऽसौ कुमारस्य प्रदृश्यते ।
नहि सामान्यपुण्यानां पाको भवति तद्विधः ॥ ७७ ॥

कुलं लक्ष्मीहर्म्यं हृतशशिमदा रूपलहरी
वयः संभोगार्हं गुणपरिचयो भूषणचयः ।

གྲགས་པ་བསོད་ནམས་སྐྱིད་ཚལ་རབ་འཁྲུངས་མི་རྟོག་རབ་
ཏུ་བཀྲམ་པའི་གྲོགས།
འབྱོར་པ་འདི་ནི་དགེ་བ་ཡོངས་སྨིན་ཏི་ཡི་འབྲས་བུ་ཡིན་པར་ཡོངས་མི་ཤེས།། 78

དགེ་མཚན་ཡང་དག་སྐྱེས་པ་དེས། དེ་ལྟར་ཡང་དག་བསམས་ནས་ནི།
སངས་རྒྱས་བལྟ་བ་ལ་བདགས་པའི། ཡིད་ཀྱི་ཤིང་རྟ་དག་ལ་འཛེགས།། 79

ག་བུ་མོ་བོས་ནས་ནི། བློན་པོ་དག་དང་ལྷན་ཅིག་ཏུ།
ཡིད་ནི་སྔོན་དུ་འགྲོ་བ་ཡིས། བཅོམ་ལྡན་འདས་ལ་ལྟ་རུ་སོང་།། 80

རྒྱལ་བྱེད་ཚལ་ནི་མིག་ལམ་དུ། གྱུར་ཚེ་བཞེན་པ་ཡང་དག་བདང་།
ཀང་པས་ཉེར་བདུད་མི་བདག་གིས། བཅོམ་ལྡན་འདས་ལ་རྣམ་པར་བལྟས།། 81

དེར་བདུད་དེ་ཡི་ཞབས་པད་ཀྱིས། གཙུག་གི་ནོར་བུ་གཡོ་བ་དེས།
བུ་མོ་མགག་པ་བདུད་པ་དག། དེ་ལ་མིང་གིས་རྣམ་པར་བཤད།། 82

ཐམས་ཅད་འཁོར་ཞིང་ཕྱག་འཚལ་དེ། ཀུན་ནས་མགོ་བོ་བཏུད་པའི་ཚེ།
བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན་པ་ལ། ཐལ་མོ་སྦྱར་ནས་རྒྱལ་པོས་དྲིས།། 83

བཅོམ་ལྡན་ལས་ནི་ཅི་ཞིག་གིས། གཞོན་ནུ་དཔལ་ལྡན་རྣམས་ཀྱི་མཆོག།
ཡོན་ཏན་ཚོགས་ནི་རྒྱས་པ་འདི། གསེར་གྱི་གླང་པོས་འགྲོ་བ་ལགས།། 84

འདི་ཡི་བག་གསར་བདག་གི་ནི། བུ་མོ་གོས་ཀྱིས་མཛེས་མ་འདི།
བསོད་ནམས་གང་གི་རྣམ་སྨིན་གྱིས། སྲོག་ལས་ལྷག་པར་སྙིང་དུ་སྡུག།། 85

यशः पुण्योद्यानप्रसृतकुसुमोल्लासरुचिरम्
न विद्मः कस्यायं कुशलपरिणामस्य विभवः ॥ ७८ ॥

इति सञ्चिन्त्य सुचिरं स सञ्जातकुतूहलः।
सर्व्वज्ञदर्शनाबद्ध मारुरोह मनोरथम् ॥ ७९ ॥

स जामातरमाहूय सुताञ्च सचिवैः सह।
भगवन्तं ययौ द्रष्टुं मनसा प्रथमं गतः ॥ ८० ॥

याते दृष्टिपथं जेतवने संत्यज्य वाहनम्।
उपसृत्य नृपः पद्भ्यां भगवन्तं व्यलोकयत् ॥ ८१ ॥

स तं प्रणम्य तत्पादपद्मभूतिशिखामणिः।
सुतां जामातरञ्चास्मै नम्रो नाम्ना न्यवेदयत् ॥ ८२ ॥

उपविष्टेषु सर्व्वेषु प्रणामानतमौलिषु।
पप्रच्छ राजा सर्व्वज्ञं भगवन्तं कृताञ्जलिः ॥ ८३ ॥

अयं गुणगणोपेतः कुमारः श्रीमतांवरः।
हैमेन दन्तिनायातो भगवन् केन कर्म्मणा ॥ ८४ ॥

इयं चीवरकन्या च मत्सुतास्य नवा वधूः।
केन पुण्यप्रभावेण जीवितादधिवल्लभा ॥ ८५ ॥

ས་ཡི་བདག་པོས་འདི་དྲིས་ཚེ། ཀུན་རིག་བཅོམ་ལྡན་རྒྱལ་བ་ཡིས།
དེར་གསུངས་སྐྱེས་བུའི་འགྲོར་པ་རྣམས། ས་བདག་བསོད་ནམས་དག
ལས་བྱུང་ ༎ 86

འཇིག་རྟེན་ན་ནི་འདོད་བྱ་གང་། རྒྱ་ཆེ་གང་དང་འོས་པ་གང་།
མཛེས་པ་གང་དང་སྨད་བྱུང་གང་། དེ་དེ་བསོད་ནམས་ཉིད་ལས་བྱུང་ ༎ 87

བཅོམ་ལྡན་བདེ་གཤེགས་རྣམ་པར་གཟིགས། དགེ་སློང་དག་དང་ལྷན་ཅིག་སྤྱོན།
རྒྱལ་པོ་གཙུག་ལྡན་གྲོང་ཁྱེར་དུ། འཇིག་རྟེན་ལ་ནི་བརྩེ་བས་རྒྱུ ༎ 88

གནས་སྐབས་དེ་ནི་ཁྲེའུ་ཞིག། གཞོན་ནུ་མ་དང་འགྲོགས་ནས་ནི།
ཤིང་གི་རང་བཞིན་གླང་པོ་བྱས། ལམ་གྱི་མདུན་དེར་རྣམ་པར་རྩེ ༎ 89

བཙོ་མ་འཛམྦུ་ན་དའི་འོད། པད་འདབ་རྒྱས་པའི་རྣམ་པ་ཅན།
ཡིད་འོང་སྙིང་རྗེའི་སྤྱན་ལྡན་པ། བཅོམ་ལྡན་བྱོན་པ་དེ་དག་གིས ༎ 90

མཐོང་ནས་དེ་ལ་གུས་པ་རྒྱས། རྫས་སུ་ཆགས་པས་མངོན་ཕྱོགས་དེ།
དེ་ལ་རྩེ་ཚ་གླང་པོ་ནི། ཕུལ་ནས་མདུན་དུ་བདུད་དེ་གནས ༎ 91

བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན་པས་ཀྱང་། དེ་དག་བསམ་པ་མཁྱེན་གྱུར་ནས།
བརྩེ་བས་ཤིང་གི་གླང་པོ་ལ། ཞབས་པད་དག་གིས་རེག་པར་མཛད ༎ 92

དེ་ནས་དེ་དག་བཅོམ་ལྡན་གྱིས། ཡང་དག་དང་བའི་ཐུགས་ཀྱིས་གཟིགས།
པད་རྩེན་ཁྲེའུ་བུ་མོ་དག། ཁོ་ཤུག་དུ་ནི་སྨོན་ལམ་བྱས ༎ 93

इति पृष्टः क्षितीशेन सर्व्वविद् भगवान् जिनः ।
तमूचे भूपते पुंसां पुण्योद्भूता विभूतयः ॥ ८६ ॥

यदुदारो यदुचितो यद् भ्राजिष्णु यदद्भुतम् ।
स्पृहणीयञ्च यल्लोके तत्तत्पुण्यसमुद्भवम् ॥ ८७ ॥

विपश्यी भगवान् पूर्व्वं सुगतः सह भिक्षुभिः ।
चचार लोककृपया राज्ञो बन्धुमतः पुरे ॥ ८८ ॥

तस्मिन्नवसरे तत्र कुमार्य्यौ सह दारकः ।
विक्रीडावर्त्मनि पुरः कृत्वा दारुमयं गजम् ॥ ८९ ॥

तौ विलोक्य समायान्तं ध्मातजम्बूनदद्युतिम् ।
फुल्लपद्मदलाकारकरुणास्निग्धलोचनम् ॥ ९० ॥

भगवन्तं समुद्भूततद्भक्तिसरसोन्मुखौ ।
क्रीड़ागजं निवेद्यास्मै प्रणतौ तस्थतुः पुरः ॥ ९१ ॥

भगवानपि सर्व्वज्ञ स्तयोर्ज्ञात्वा मनोरथम् ।
दयया चरणस्पर्शं विदधे दारुदन्तिनः ॥ ९२ ॥

सम्यक् चित्तप्रसादेन दृष्टौ भगवताथ तौ ।
प्रणिधानं विवाहाय चक्रतुर्दारकौ मिथः ॥ ९३ ॥

གསེར་གྱི་གླང་པོའི་བཞོན་པ་དང་། རིགས་དང་མཐུ་འབྱོར་པ་ཡིས།
བདག་གི་སྐྱེ་བ་འདིས་གྱུར་ཅིག། ཅེས་པ་གཞོན་ནུའི་བློ་གྲོས་གྱུར།། 94

བུ་མོས་བཅོམ་ལྡན་ཆོས་གོས་ནི། མཛེས་པ་དང་ལྡན་མཐོང་གྱུར་ནས།
བདག་གི་སྐྱེ་བ་ཆོས་གོས་དང་། ལྡན་པར་གྱུར་ཅིག་ཅེས་པ་བསམས།། 95

དེ་ནི་སྨོན་ལམ་དེ་དག་གིས། གླང་པོ་ཅན་འདི་ཉིད་དུ་སྐྱེས།
ཆོས་གོས་བུ་མོ་འདི་ཡང་ནི། ལུས་ནི་ཆོས་གོས་ཀྱིས་མཚན་ནོ།། 96

བདེ་གཤེགས་ཀྱིས་གསུངས་བྱུང་ཚུལ་དེ། དེ་ལྟར་ས་བདག་གིས་ཐོས་ནས།
ཅོད་པན་དེ་ཡི་ཞབས་པད་ལ། རིག་ནས་རང་གི་ཁང་པར་སོང་།། 97

རྒྱལ་པོ་ཡ་མཚན་བཅས་སོང་ཚེ། གཞོན་ནུ་ཆུང་མར་བཅས་པ་ཡིས།
བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས་པ་ནི། ཆོས་ནི་དགེ་བའི་བློ་ཡིས་ཐོས།། 98

དེ་ནས་དེ་དག་ཆགས་བྲལ་སྐྱེས། འཁོར་བའི་བག་ཆགས་ཉམས་གྱུར་ཅིག།
རབ་དུ་བྱུང་བས་ཉོན་མོངས་བདུལ། དགེ་བའི་བྱང་ཆུབ་ཐོབ་པར་གྱུར།། 99

རྒྱ་ཆེ་ལེགས་བྱས་གོམས་པའི་སྦྱོར་བས་བསོད་ནམས་བསྟེན་པ་ཡི།
སྐྱེས་བུ་རྣམས་ནི་ཆོས་འདོད་དོན་ཡང་དགེ་བས་ཕུན་ཚོགས་འགྱུར།
དེ་ནས་དེ་འབྲས་མངོན་འདོད་སྨྲ་ནས་གསུམ་བཅས་དེ་དག་རྣམས།
སྤྲིན་བྲལ་མཁའ་ལྟར་མཛེས་པའི་ཞི་བ་མཐུག་དུ་སྨིན་པར་བྱེད།། 100

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གླང་པོ་ཅན་གྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟོ་བཞི་བཅུ་རྩ་བརྒྱད་པའོ།།

कुलप्रभावविभवैर्भूयाज्जन्म ममोचितम् ।
वाहनं हेमदन्ती च कुमारस्येत्यभून्मतिः ॥ ९४ ॥

दृष्ट्वा भगवतः कन्या संसक्ते चारुचीवरे ।
जन्मचीवरयुक्ता स्या* महमेतदचिन्तयत् ॥ ९५ ॥

स एष प्रणिधानेन जातस्तेनेह हस्तकः ।
इयं चीवरकन्या च तनुचीवरलक्षणा ॥ ९६ ॥

इति श्रुत्वा क्षितिपतिस्तद्वृत्तं सुगतोदितम् ।
मुकुटस्पृष्टतत्पादपद्मः स्वभवनं ययौ ॥ ९७ ॥

याते सविस्मयं राज्ञि कुमारः सह जायया ।
कथ्यमानं भगवता धर्म्मं शुश्राव शुद्धधीः ॥ ९८ ॥

ततस्तौ जातवैराग्यौ क्षीणसंसारवासनौ ।
प्रव्रज्यया जितक्लेशौ शुद्धां बोधिमवापतुः ॥ ९९ ॥

विततसुकृतपुण्याभ्यासयोगेन पुंसां
भवति कुशलभाजां धर्म्मकामार्थसम्पत् ।
अभिमत मथ भुक्त्वा तत्फलं सादरातं†
विघनगगनकान्तिं शान्ति मन्ते भजन्ते ॥ १०० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
हस्तकावदानमष्टचत्वारिंशः पल्लवः ॥ ० ॥

---

* Orig. युक्तेय ।   † सादरास्ते ?

APPENDIX.

མངལ་ནས་འབྱུང་བ་བསྟན་པའི་ཡལ་འདབ་སྟེ་བཅུ་པའོ། །

गर्भक्रान्त्यवदानम् ।

འཇིག་རྟེན་མཐའ་དག་ཉེ་བར་གཟུང་སླད་རབ་ཞུགས་སྨོན་པ་དག་ནི་སྤྲིན། །
གྲོང་ཁྱེར་ཙམ་པ་དང་ཉེ་དྲི་མེད་པདྨའི་རྫིང་ངོགས་འགྲམ་ན་བཞུགས། །
ཀུན་དགའ་བོ་ཞེས་བྱ་བ་རིག་ན་བདེ་བའི་འོད་ལྡན་དགེ་སློང་གིས། །
དྲིས་ནས་མངལ་བརྩམས་ལ་སོགས་སྐྱེ་བོ་འི་ཚོགས་ཀྱི་སྐྱེ་བའི་སྤྱོད་ཚུལ་
གསུངས། ། 1

འཇིག་རྟེན་དུ་ནི་དཀར་ནག་འདྲེན་མའི་འོད་ཅན་ལས་རླུང་ཀྱིས་བཀྲ་བའི། །
ལུས་ཅན་རྣམས་ཀྱི་སྐྱེ་བའི་གོས་ནི་རབ་མང་གནས་སྐབས་མཐོང་གྱུར་ཏེ། །
ཤིན་དུ་འབད་པས་གང་ཞིག་ཡུན་རིང་ཡོངས་སྐྱུར་སྤྱལ་པོར་གྱུར་མོད་ཀྱང་། །
གདུང་བའི་དྲི་མ་སྣུམ་ཆགས་ཚོན་ནི་མེད་པ་ཉིད་དུ་འགྱུར་མ་ཡིན། ། 2

སྐྱེས་པ་ཐུབ་མེད་དག་ཀྱང་འཇིགས་པ་རྣམ་ཉམས་རིག་པར་ཞུགས་བྱས་ཤིང་། །
སྦྱོར་བ་བསྟེན་པའི་ཁ་བ་ཟླ་མཚན་ཡང་དག་འགྲོགས་ལ་ལྷུང་གྱུར་པ། །
གཅིག་དུ་གྱུར་ཅིང་ངེས་པ་འགའ་ལས་ས་བོན་དག་གིས་དངོས་པོར་གྱུར། །
སུ་ཞིག་ཁང་དེར་འཕྲལ་ལ་འཇུག་སྟེ་དཔེར་ན་བསྲུབས་པའི་མེ་བཞིན་ནོ། ། 3

ཞིལ་དུས་དག་ལ་ཚོན་གྱིས་རབ་དབྱེ་སྤྲིན་ལ་ཆུ་ཡི་གཏེར་གྱི་ཆུ། །
རྡོལ་ལ་མེ་ཏོག་དྲི་བཟང་གསེར་ལ་མེ་ཡིས་གདུངས་བཞིན་དལ་བུ་ཡིས། །

ཀྲི་རྣམས་ཀྱིས་བཞིན་རྣམ་པ་མང་པོ་འི་ལས་ཀྱིས་བསྒོས་པར་གྱུར་པའི་རླུང་།
སྐྱོད་ཚུལ་བྱེད་པོ་ཡིས་ཀྱང་ཡང་དག་མི་མཚོན་འདི་དེ་ནང་དུ་འཛུག། 4

དེར་ནི་ཕྲ་བའི་རིམ་པས་ཡོངས་སུ་འགྱུར་ཞིང་རང་བཞིན་གྱིས་བཅོར་འདིར།
ཇི་སྲིད་དུས་སུ་རྣམ་པར་འགྱུར་བ་མེད་པ་བཞིན་དུ་རྣམ་འགྱུར་འཛིན།
རྣམ་པ་སྣ་ཚོགས་རབ་མང་བཀོད་པ་བཀྲ་བའི་གཟུགས་ནི་མི་མཚོན་དེ།
རྨ་བྱའི་སྒོང་ཆུ་ཡིས་རང་བཞིན་རྨ་བྱའི་རྣམ་པར་མི་གསལ་བཞིན། 5

དེར་ནི་མེར་མེར་ནུར་ནུར་ནར་ནར་གོ་གོང་ལ་སོགས་གནས་སྐབས་བརྒྱུད།
དེ་དང་དེ་དག་ལྟོ་ཡིས་བསྐྱེད་པའི་དྲོད་གོར་མོར་མཁན་ཀྱིས་སྨིན་ཅིང་བདང་
བྱས་ནས།

ཟླ་བ་རྫོགས་པའམ་ཡང་ན་དགུ་ཡིས་འཁྲིལ་བའི་ལས་ཀྱི་རིམ་པ་འདི།
སྡུག་བསྔལ་འདུ་ཤེས་རབ་ལྷན་ཅི་ཡང་རུང་བའི་མི་བཟད་ཉོན་མོངས་སྤྱོད། 6

དུས་སུ་ཡུ་བ་དག་ལས་འབྲས་བུ་རང་ཉིད་ལྷུང་བཞིན་མངལ་སྨིན་པས།
དེ་དུས་ལངས་པའི་མ་ཡི་རླུང་ནི་མི་དམན་མགྱོགས་པའི་རབ་བསྐྱུལ་ནས།
མཚོན་ཆ་གསོམས་པའི་གནས་ཀྱི་གྲོགས་པོ་འཆོང་བའི་ལས་ཀྱིས་རྫོགས་གྱུར་པ།
གཞུ་ཡི་འཕྲུལ་འཁོར་བཀང་ནས་བདང་བའི་མདའ་བཞིན་ནང་ནས་ཕྱིར་
འཐོན་འགྱུར། 7

གན་རྒྱལ་ཁ་གདངས་རོ་འཛིན་དྲག་པོས་ནུ་ཏིག་ཞུ་ལ་འཛིན་བྱེད་ཅིང་།
མ་ཡི་ནུ་ཞོ་འཐུངས་པས་གང་འདི་རྣ་བས་མིན་ཞིང་མིག་གིས་མིན།

སྐྱེ་བར་གོམས་པའི་གདུང་བས་བསྐྱེད་པའི་ཉོན་མོངས་གནས་པའི་རོལ་བ་དེས།
དེ་ཡི་མ་དུན་དུ་སྤྲོས་པ་མཐའ་དག་སྟོན་བྱེད་བག་ཆགས་ཁོ་ནའོ། 8

རྣམ་མང་ཡུལ་ཀྱིས་ཉམས་མྱོང་བསྐྱེད་པའི་དབྱེ་བས་གྲུབ་པ་ནང་ཁྲུབ་པ།
གསལ་བར་སྐུད་པ་རབ་དུ་རྒྱས་པར་ལེགས་སྦྱར་པད་རྩེའི་ཆ་ཤས་བཞིན།
དེ་ནས་རང་བཞིན་དབང་པོའི་གྲོགས་ཀྱིས་འདུ་ཤེས་བྱིན་པའི་སྒོ་ངས་པ་དེ།
ཉུ་མའི་དོན་དུ་བརྫོན་ཅིང་ཡོངས་སུ་མཆེ་བའི་རིག་པས་མ་མ་རིག། 9

མལ་སྟན་གོས་རྣམས་ལག་པས་བསྐྱོད་པའི་འདར་བྱེད་དག་གིས་མནར་པ་དང་།
གནས་དང་གནས་སུ་ཡ་ཡོར་འགྱུར་ལུས་སྲོག་ཆགས་རྣམས་ཀྱིས་ཟོས་
གྱུར་པས།

རྟག་ཏུ་དུ་ཞིང་ཚིག་དང་བྲལ་བས་ལུས་ཀྱི་ཉོན་མོངས་རྒུད་མ་ནི།
སྲུ་ལ་སྨྲ་སྤྱི་མི་བཟད་རྒུད་པ་ཉིད་ཀྱི་གནས་སུ་རབ་དུ་འགྱུར། 10

ལྷུང་བ་སྐྱུགས་ཤིང་རབ་འཐོབ་འོ་མའི་ཚོགས་ཀྱིས་བཞིན་ནི་སྨྲགས་གྱུར་དེ།
གཉ་རྒྱལ་ཐང་གི་དབུས་སུ་ལྷུང་བས་མཚན་པས་ཐན་པར་གྱུར་པ་འདི།
སྒྱུ་མའི་བུད་མེད་ལ་འགྲོགས་མཆོག་དུ་རྩེ་དགའི་རོལ་པ་དྲན་པ་ལས།
དགོད་པའི་འོད་ཟེར་ཤིན་དུ་གསལ་བས་རབ་དུ་ཁྲུབ་པ་བཞིན། 11

དེ་ནས་དེ་ནི་རྩེ་བས་ཡིག་འཕྲེང་ཡོངས་འདྲིས་དག་ལ་ལག་གདང་ཐོབ།
འཁོར་བ་འདིར་ནི་གཡོ་མེད་འཆིང་བའི་རྩིབས་ཀྱི་རི་མོའི་ལམ་དག་ལས།
རང་གི་སྐྱེ་བའི་ཁོར་མོ་རིང་དུ་འབྲི་བཞིན་ཨོ་ཡིག་ལ་སོགས་པ།
སྡེ་དང་སྡེ་ལ་བློ་གྲོས་རབ་གསལ་ལོངས་སྤྱོད་སྤྲོས་པ་ངེས་པར་འཇུག། 12

ཇི་ཞིག་ལྟར་ཡང་བྲིས་པའི་དངོས་པོའི་རབ་སྒོངས་བྲལ་ནས་ཤེས་རབ་འཐོབ།
སྐྲད་ནས་ཀུང་ནི་ལང་ཚོ་དར་ལ་འདོད་པས་རབ་བསླད་འདུ་ཤེས་ཉམས།
སྡུག་བསྔལ་མཛེས་པའི་སྤྲིན་གློག་བུད་མེད་རྣམས་ཀྱི་རྩེ་དགའ་རོལ་པ་དག།
སྙིང་པོ་མེད་ལ་རབ་ཏུ་བརྟན་པའི་བློ་ཡིས་མངོན་པར་འདོད་པ་བཅིངས། 13

བུད་མེད་རྣམས་ཀྱི་ཚིག་ལ་རྣ་བ་ལུས་ནི་གཡོ་མེད་འཁྲུད་པ་ལ།
ཁ་ཡི་ཚང་གི་དྲི་ལ་སྣ་དང་དེ་ཡི་རོ་ལ་སྙོང་བྱེད་དང་།
བཞིན་ལ་མིག་ཀུང་སྟོད་དུ་བཀྲིས་ནས་བྱ་བ་ཐམས་ཅད་བསྐལ་བ་འདི།
ལུས་ནི་ཡོངས་སུ་འགྱུར་བའི་དབང་པོ་ཐམས་ཅད་ཚོད་དག་འཛིན་པ་བཞིན། 14

སྣང་ལ་མཛའ་ཞིང་ཡོངས་སུ་འདྲིས་ལ་ཡོངས་སྣང་ངང་ཚུལ་འདོད་ལྡན་དེ།
གསར་པ་གསར་པ་ལ་ཆགས་འབད་བཅས་གཞན་གྱིས་འདོད་མ་གཞན་
དག་འདོད།
དེ་ལྟར་ཟན་ཚུན་རིགས་མིན་སྤྱོད་པ་མཆོན་ནས་སྐྱེངས་པ་མཐོང་གྱུར་པ།
འདི་ཡི་འདོད་པ་རང་བཞིན་རོ་བྲལ་བཀྲ་བའི་རྒྱུད་འདྲིས་བཞད་སླད་ཉིད། 15

ཉིན་ཞག་དག་ནི་ཉུང་ཞིག་གནས་པའི་ལང་ཚོས་ལོང་བར་བྱས་གྱུར་ཅིང་།
འདམ་ལ་གླང་པོ་བཞིན་དུ་ཡུལ་གྱི་རྒྱ་གདེར་དག་ནི་མཐའ་དེ་ལ།
བྲིང་ཞིང་མཐའ་ལ་རབ་ལྷུང་འགྲོ་བ་དག་ནི་རབ་ཏུ་ཉམས་པ་འདི།
ཅི་ཞིག་བྱ་ཞེས་ངེས་པའི་ཤེས་པ་དང་བྲལ་སྐྱོངས་པས་བརྒྱལ་བར་འགྱུར། 16

ཇི་སྲིད་འདི་ནི་རྩེ་ཞིང་འཁྲམས་དང་གཡོ་དང་དགའ་དང་གླལ་བ་དང་།
འདོད་པས་འཁྲུད་པའི་ལུས་ནི་འཁྲིག་པས་འཛུམ་ཞིང་སྨྲ་བྱེད་པ།

དེ་སྲིད་དེ་ཡིས་སྟོང་དུ་དུས་ཀྱིས་རབ་འཕངས་གསོད་རྟགས་མི་རྟོག་འཕྲིང་།
ཁ་བའི་འཕྲེང་བ་ལྟར་དཀར་སྐྲ་དཀར་ཐོལ་གྱིས་ཡོངས་སུ་འབབ་པ་ཉིད། 17

གཏི་སྨུག་གཉིད་ལ་ཆགས་པས་དུས་དང་དུས་ལ་སྐད་ཅིག་ལྟར་ཤེས་ཤིང་།
ལུས་འདིར་ལེགས་བྱས་མ་ཐོབ་བྱིན་པ་ཉིད་མིན་སྨྲུད་པ་ཉིད་མིན་པའི།
རྒྱུ་འདྲིས་དེ་ནི་ཀུན་པོས་བཀུས་བཞིན་སྡུག་བསྔལ་དག་ལ་སེམས་པ་ཉིད།
ཀུན་དུ་རྨོངས་པ་རྣམས་ཀྱི་ཉམས་ཉེས་བག་མེད་འགྱོད་པའི་འབྲས་བུ་ཅན། 18

ལས་ངན་གྱིས་ཐོབ་ནོར་དང་མཚུངས་པས་ལང་ཚོ་སྨི་ལམ་དུ་རྟག་པ།
བྲུད་མེད་འཛེ་སྐྲིག་སོས་ཀའི་མེ་རྟོག་འཁྲི་ཤིང་སོང་བ་དེ་ཡི་ཚེ།
ཡན་ལག་མ་ལུས་སྐྱོ་ཞིང་ཆགས་དང་བྲལ་བས་རང་བཞིན་མཐའ་དག་ཉམས།
རྒྱལ་སྲིད་ལས་ཉམས་མི་བདག་བཞིན་དེ་དེ་ནས་བདེ་བ་འདས་པས་གདུང་། 19

ངདག་གི་ཚེ་བདང་སྨོང་བ་རྣམས་ཡང་དག་འོས་པའི་སྨིན་མ་བཏང་།
ཕྱོགས་ཕྱོགས་རབ་དུ་གྲགས་པའང་མ་བསྐྱུན་ལེགས་པའི་ལམ་ནི་མ་རྟོགས་ཤིང་།
སྨོང་བའི་དུག་འཕྲུངས་ཚ་དང་གྲང་བ་ཡོངས་སུ་རྒྱས་པ་ལྷག་པར་ཐོབ།
སྡིག་ལས་ཅི་ཡང་འཇིགས་པར་མ་གྱུར་གང་ཞིག་དེ་ཉིད་ཁོ་ན་བགྲེས། 20

གསེར་གྱི་ལྷུན་པའི་འོད་འཕྲོག་ཡིད་འཕྲོག་ལང་ཚོ་འི་དཔལ་ནི་གང་ན་སྟེ།
སྨིན་ཞིང་མཛེས་བྲལ་སྨིན་བུས་བཅོས་པའི་ཤིང་མཚུངས་ལུས་འདི་ག་ལ་ཞིག།

ན་ཆུང་འདི་དག་མིག་གིས་རིང་ནས་ཡོངས་སྤྱོད་བྱུར་ན་ཞེན་གྱུར་པ།
བདག་ལ་ནགས་ཀྱི་སྐྱིའུ་བསྐམས་ཤིང་འཁྱོགས་པས་འཁྱོགས་པ་བཞིན་ཞེས་སྨྲས། 21

ལུས་འདི་རྣམ་པར་འཇིག་པ་བསྟེན་དེ་སྒྲུ་མའི་ཚོགས་ནི་མ་ཡིན་ཉིད།
སོ་ནི་ནོར་བུ་ཀུན་དང་སྒྲ་དེ་ལྷུང་སྟེ་སྨྲོན་ནི་མ་ཡིན་ཉིན།
ལུས་ཀྱི་བརྩོན་འགྲུས་རྒྱུང་ནི་རབ་ཏུ་སྦྱོར་དེ་གདི་མགག་རྒྱུ་གྱུ་མིན།
མལ་སྟན་ལ་བརྐྱངས་ཟད་པར་གྱུར་ཀྱང་བདག་གི་སྤྱོད་པ་ཟད་མ་ཡིན། 22

དེ་ལྟར་བསམས་ནས་མི་ཟད་དབྱུགས་བརྩེགས་ཅིག་སོགས་རབ་ཏུ་རྒྱས་གྱུར་པས།
འདི་ནི་ཡུན་རིང་འདྲིས་པའི་འཇིག་རྟེན་སྤྱོད་ཚུལ་འཕྲ་ལ་གཏོང་རྩོམ་སྟེ།
སྐུགས་གྱུར་རང་གི་སྐྱེ་པོ་དང་བྲལ་སེམས་ཞིང་ནུས་པ་ཆད་པ་ལས།
བསྟུན་པ་ཉམས་གྱུར་དུས་ལ་བབ་པ་དབུལ་པ་བུ་ལོན་ཆེན་པོ་བཞིན། 23

རེ་ཞིག་ས་དང་ཁང་པ་ནོར་དང་གཡོག་འཁོར་བུ་དང་ཆུང་མ་དང་།
སྤྲོག་ནི་མཐར་ཐུག་དུས་སུ་ཀློ་ཡིས་དེ་སྐྱིད་གཞན་ཡང་བསམས་བྱས་པ།
ཇི་སྲིད་སྐྱེ་བ་ལ་ཡང་འདི་ཉིད་སྐད་ནས་ཆགས་རྐྱངས་འཆིང་བ་དག།
དེ་དེས་ནང་དུ་ཡོངས་སུ་འདྲིས་བྱས་དེ་ཡིས་རང་བཞིན་ངོ་བོར་འགྲོ། 24

ཟངས་ཆེན་སྟོང་ཕྲག་ནང་དུ་སྡིག་ལས་ཀྱིས་བསྐྱེད་བཟོད་པར་དཀའ་བའི་སྡུག་བསྔལ་དག།
སྤྱོད་ནས་ཙ་འབོད་ཐིག་ནག་དམྱལ་བ་རྣམས་ཀྱི་སྐྱེ་གནས་དག་ཏུ་འཁོར་གྱུར་ཅིང་།

ཀང་ཡང་བསོད་ནམས་ཚོགས་བསྒྲུབས་བདེ་བའི་གནས་དེ་ཡང་

དག་ཟད་ནས་སྡུག་བསྔལ་སྟེར།

དེ་སྐད་ཕྱིར་མི་ལྡོང་བཅས་འབྲས་ཐོབ་སྐད་དུ་དྲི་མེད་བློ་ཡིས་ཏིང་འཛིན་

མཛོད། 25

སེམས་ཅན་རྣམས་ཀྱི་དགེ་ཐོབ་སླད།

དེ་སྐད་སྒྲིད་པའི་རྒྱ་གཏེར་ནི།

འཛིགས་རྟེན་ལས་སྒྲོལ་བརྟུལ་ཞུགས་མཛད།

བཅོམ་ལྡན་འདས་ཀྱིས་ཡང་དག་བ.ཤད། 26

ཅེས་པ་དགེ་བའི་དབང་པོས་བྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་

པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མངལ་ནས་འབྱུང་བ་

བསྟན་པའི་ཡལ་འདབ་སྟེ་བཅུ་པའོ * ||

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

---

* The 'Garbhakrāntyavadānam,' which figures as the 10th 'pallava' of the 'Avadānakalpalatā,' was evidently an interpolation introduced to make up the auspicious total of 108 'pallavas.' Accordingly this particular 'pallava' has been omitted from its proper place. Its Tibetan version is inserted here as an Appendix.—S. C. V.